॥ कोबातीर्थमंडन श्री महावीरस्वामिने नमः ॥

॥ अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ॥

॥ गणधर भगवंत श्री सुधर्मास्वामिने नमः ॥

॥ योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ॥

॥ चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ॥

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

P7535 P6232

॥ * ॥ अथ मन्त्रमहार्णवप्रारंभः ॥ * ॥

Serving JinShasan 052186 gyanmandir@kobatirth.org

इस संपूर्ण ग्रंथका और पृथक् पृथक् तन्त्रोंका सर्व रजिस्टरी हक "श्रीवेङ्कटेश्वर" यन्त्रालयाध्यक्षने स्वाधीन रक्खा है।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ सर्वमंत्रप्रणेत्रे श्रीपार्वतीपतये नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ मंत्रमहार्णवग्रंथस्थविषयानुक्रमणिका प्रारभ्यते।

पत्रांकाः	पृष्ठांकाः	विषयाः
१	१	मंगलाचरणम्।
,,	,,	तन्त्रसंज्ञा।
,,	२	साध्यजन्मनक्षत्रवृक्षाः।
,,	,,	युगभेदेन देवताभेदः।
,,	,,	पुरश्चरणकरणार्थमादावावश्यकज्ञातव्य-पदार्थाः।
२	१	गुरुशिष्यपरीक्षणम्।
,,	,,	गुरुमाहात्म्यम्।
,,	,,	त्याज्यगुरुः।
,,	२	त्याज्यशिष्यः।
,,	,,	दीक्षामुहूर्तनिर्णयः।
३	१	अनुष्ठानारम्भे मुहूर्तनिर्णयः।
,,	२	भक्ष्याभक्ष्यनिर्णयः।
४	१	जपस्थाननिर्णयः।
,,	,,	स्थानभेदेन जपमाहात्म्यम्।
,,	,,	स्थानलक्षणम्।
,,	२	अत्राधिकारिणः।
,,	,,	दिङ्निर्णयः।
५	१	स्नाननिर्णयः।
,,	,,	तिलकनिर्णयः।
,,	,,	आसननिर्णयः।
,,	२	मालानिर्णयः।
६	१	रुद्राक्षमाहात्म्यं पद्मपुराणे।
७	,,	अस्य धारणविधानम्।
,,	,,	गोमुखीनिर्णयः।
,,	,,	अंगुलीनिर्णयः।
,,	२	जपनिर्णयः।
८	१	होमनिर्णयः।
,,	,,	होमस्थानम्।
,,	,,	कुण्डस्वरूपम्।
,,	,,	वर्णभेदेन कुण्डप्रकारः।
,,	,,	कुण्डप्रमाणम्।
९	१	द्रव्यभेदेनाहुतिप्रमाणम्।
,,	२	पूर्णाहुतिविचारः।
१०	१	यन्त्रलेखनार्थं पात्रनिर्णयः।
,,	,,	गन्धनिर्णयः।
,,	,,	गन्धार्पणे अंगुलीविचारः।
,,	,,	फलपुष्पनिर्णयः।
,,	२	दीपनिर्णयः।
,,	,,	धूपनिर्णयः।
,,	,,	नैवेद्यनिर्णयः।
११	१	वस्त्रनिर्णयः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
११	१	प्रदक्षिणानिर्णयः ।
,,	,,	कूर्म्मनिर्णयः ।
१२	२	सिद्धादिमन्त्रविचारः ।
१३	१	अरिमन्त्रचक्रम् ।
,,	२	ऋणधनशोधनम् ।
१४	१	कलिसिद्धमंत्राः ।
,,	,,	कलौ चतुर्वर्णोपयोगिमंत्राः ।
,,	,,	मंत्राणां स्त्रीपुन्नपुंसकविचारः ।
,,	२	कामनापरत्वेन मंत्रादौ बीजनिर्णयः ।
१५	१	कामनापरत्वेन मंत्रांते पल्लवनिर्णयः ।
,,	,,	मंत्राणां छिन्नादिकदोषनिर्णयः ।
१६	२	छिन्नत्वादिकदोषनिवारणायदशसंस्काराः
१८	१	उत्कीलनविधिः ।
,,	,,	पुरश्चरणनिर्णयः ।
२०	१	पुरश्चरणादौ गायत्रीजपावश्यकता ।
,,	२	पुरश्चरणविधिः ।
२२	१	मंत्रसिद्धिचिह्नानि ।

पूर्वखंडे मुद्राप्रकरणे द्वितीयस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
२३	१	मुद्राप्रकारः ।
,,	२	आवाहनादि नव मुद्रालक्षणम् ।
,,	,,	षडंगन्यासोपयोगिषण्मुद्रालक्षणम् ।
२४	१	एकोनविंशतिविष्णुमुद्रालक्षणम् ।
२५	१	शिवस्य दशमुद्रालक्षणम् ।
,,	,,	गणेशसप्तमुद्रालक्षणम् ।
,,	२	शक्तिदशमुद्राः ।
,,	,,	लक्ष्मीमुद्रैका ।
,,	,,	सरस्वत्याः पंचमुद्राः ।
,,	,,	वह्निमुद्रा चैका ।
२६	१	अनेकमुद्रालक्षणम् ।

पूर्वखंडे भद्रमंडलप्रकरणे तृतीयस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
२६	२	एकोनविंशतिरेखात्मकं सर्वतोभद्रमंडलम् ।
३१	१	चतुस्त्रिंशद्रेखात्मकं द्वादशलिंगतोभद्रमंडलम् ।
३३	१	त्रयोदशरेखात्मकं लघुगौरीतिलकाख्यमेकलिंगतोभद्रमंडलम् ।
३४	१	सूर्यमंडलम् ।
,,	,,	गणपतिभद्रमंडलम् ।

पूर्वखंडे सर्वदेवोपयोगिपद्धतौ चतुर्थस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
३६	१	पंचांगपूजनम् ।
,,	,,	पंचांगपूजने मंत्रोद्धारणक्रमः ।
,,	,,	संक्षेपतः सर्वासां देवतानां नित्यपूजाविधिः ।
,,	,,	पूजादिमाहात्म्यम् ।
,,	,,	पूजायां पंचांगशुद्धिः ।
,,	२	षोडशोपचाराः ।
,,	,,	पंचोपचाराः ।
३७	१	सर्वदेवतापूजनोपयोगि तिथ्यादिकम् ।
,,	,,	सर्वमंत्रानुष्ठानोपयोगि प्रारंभात्पूर्वकृत्यम् ।
३८	१	प्रातःकृत्यम् ।
,,	२	तीर्थस्नानप्रयोगः ।
३९	१	गृहस्नानप्रयोगः ।
,,	,,	तिलकधारणप्रयोगः ।
,,	,,	शैवे भस्मत्रिपुंड्प्रकारः ।
,,	२	वैष्णवानामूर्ध्वपुंड्रविधानम् ।
,,	,,	तांत्रिकसंध्याप्रयोगः ।
४०	१	द्वारपूजाप्रयोगः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
४०	२	क्षेत्रकीलनम्।
४१	१	प्रयोगविधानम्।
,,	२	भूतशुद्धिप्रकारः।
४२	२	स्वप्राणप्रतिष्ठाप्रकारः।
४३	२	अंतर्मातृकान्यासः।
४४	१	बहिर्मातृकान्यासः।
४५	१	सृष्टिक्रमः।
,,	२	स्थितिक्रमः।
४६	१	संहारक्रमः।
,,	२	पीठपूजाप्रकारः।
४७	१	पात्रासाधनप्रकारः।
,,	,,	कलशस्थापनप्रकारः।
,,	२	शंखस्थापनम्।
४८	२	घण्टास्थापनम्।
,,	,,	अखण्डदीपस्थापनम्।
४९	१	पूजाप्रकारः।
,,	,,	अभ्युत्तारणप्रयोगः।
,,	२	प्राणप्रतिष्ठाप्रयोगः।
५०	१	पाद्यादिपूजनम्।

पत्रांकाः	पृष्ठांकाः	विषयाः
५४	१	मालासंस्काराः।
,,	२	क्षमापनम्।
५५	२	मलोत्सवप्रारंभः।
,,	,,	शान्तिकलशस्थापनम्।
५७	१	षोडशस्तंभप्रतिष्ठाप्रयोगः।
५९	२	तोरणध्वजपताकाप्रतिष्ठा।
६६	१	अग्निस्थापनप्रयोगः।
,,	,,	कुण्डे अष्टसंस्काराः।
,,	२	अग्निस्थापनम्।
६७	१	कुशकंडिकाप्रकारः।
,,	२	घृतसंस्काराः।
६८	१	होमप्रकारः।
६९	२	तर्पणादिविधानम्।
७०	१	कुमारीपूजाप्रयोगः।

पूर्वखण्डे गणेशतंत्रे पञ्चमस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
७२	२	षडक्षरवक्रतुण्डमन्त्रप्रयोगः।
७४	२	एकत्रिंशदक्षरवक्रतुण्डमन्त्रप्रयोगः।
७५	१	उच्छिष्टगणपतिनवार्णमंत्रप्रयोगः।
७७	२	द्वादशाक्षरोच्छिष्टगणेशमंत्रप्रयोगः

पत्रांकाः	पृष्ठांकाः	विषयाः
७८	१	एकोनविंशत्यक्षरोच्छिष्टगणेशमन्त्र-प्रयोगः।
,,	२	त्रयस्त्रिंशदक्षरोच्छिष्टगणेशमन्त्रप्रयोगः।
८०	२	शक्तिविनायकचतुरक्षरमन्त्रप्रयोगः।
८२	१	लक्ष्मीविनायकमन्त्रप्रयोगः।
८३	२	त्रैलोक्यमोहनकरगणेशमन्त्रप्रयोगः।
८५	१	हारिद्रागणेशमन्त्रप्रयोगः।
८७	१	ऋणहर्तृगणेशमन्त्रविधानम्।
,,	२	सिद्धिविनायकमंत्रप्रयोगः।
८८	२	गणेशपद्धतिः।
,,	,,	तत्रादौ पूर्वकृत्यम्।
८९	१	गणेशप्रातःस्मरणम्।
,,	२	गृहस्नानप्रयोगः।
,,	,,	पूजाविधिः।
९६	२	वक्रतुण्डगणेशकवचम्।
,,	,,	वक्रतुंडगणेशस्तवराजः।
९७	२	वक्रतुंडगणेशसहस्रनामस्तोत्रम्।
१०३	२	वक्रतुंडशतनामस्तोत्रम्।
१०४	१	वक्रतुंडस्तोत्रम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
१०५	१	उच्छिष्टगणेशकवचम् ।
१०६	२	उच्छिष्टगणेशसहस्रनामस्तोत्रम् ।
११०	२	उच्छिष्टगणेशस्तवराजः ।
१११	१	हरिद्रागणेशकवचम् ।

पूर्वखंडे शिवतंत्रे षष्ठस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
११२	२	शिवपंचाक्षरीमन्त्रप्रयोगः ।
११५	१	अष्टाक्षरीशिवमन्त्रप्रयोगः ।
११६	१	अजरमृत्युंजयमन्त्रप्रयोगः ।
११७	२	त्र्यंबकमन्त्रप्रयोगः ।
१२०	२	महामृत्युंजयमन्त्रप्रयोगः ।
१२५	२	दशाक्षररुद्रमन्त्रविधानम् ।
१३२	२	त्वरितरुद्रमन्त्रपुरश्चरणप्रयोगः ।
१३४	१	दक्षिणामूर्तिमन्त्रप्रयोगः ।
१३५	२	द्वात्रिंशत्यक्षरदक्षिणामूर्तिमंत्रप्रयोगोन्यः।
१३६	२	पार्थिवलिंगपूजाविधानम् ।
१३७	२	शिवपूजापद्धतिः ।
१४४	१	सदाशिवकवचम् ।
१४५	१	सदाशिवस्तोत्रम् ।
,,	,,	शिवशतनामस्तोत्रम् ।
,,	२	शिवसहस्रनामस्तोत्रम् ।
१५०	२	मृत्युंजयकवचम् ।

पूर्वखण्डे विष्णुतंत्रे सप्तमस्तरङ्गः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
१५२	१	अष्टाक्षरविष्णुमन्त्रप्रयोगः ।
१५४	२	द्वादशाक्षरविष्णुमन्त्रप्रयोगो द्वितीयः।
१५६	१	राममन्त्रप्रयोगः ।
१५७	२	षड्विधमन्त्रस्वरूपचक्रम् ।
१५८	१	दशाक्षररामममन्त्रप्रयोगः ।
,,	२	रामनामलेखनविधिः ।
,,	,,	कृष्णमन्त्रप्रयोगः ।
१६०	२	नवविधकृष्णमन्त्रचक्रम् ।
,,	२	लक्ष्मीनारायणमंत्रप्रयोगः ।
१६२	१	दधिवामनाख्यचमत्कारिमंत्रप्रयोगः ।
१६४	१	हयग्रीवविष्णुमन्त्रप्रयोगः ।
१६५	२	वाराहरूपविष्णुमन्त्रप्रयोगः ।
१६६	२	नृसिंहमन्त्रप्रयोगः ।
१६९	१	विष्णुपूजापद्धतिः ।
१७७	१	विष्णुकवचम् ।
१७८	२	नारायणहृदयम् ।
१७९	२	विष्णुस्तोत्रम् ।
१८०	१	विष्णोरष्टोत्तरशतनामस्तोत्रम् ।
,,	२	विष्णुसहस्रनामस्तोत्रम् ।
१८७	२	महापुरुषविद्या ।
,,	,,	नृसिंहकवचम् ।

पूर्वखंडे सूर्यतंत्रे अष्टमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
१८९	२	सूर्यमंत्रप्रयोगः ।
१९१	२	सूर्यपद्धतिः ।
१९५	२	सूर्यकवचम् ।
१९६	१	सूर्यस्तवराजः ।
,,	२	सूर्याष्टोत्तरशतनामस्तोत्रम् ।
१९७	१	आदित्यहृदयस्तोत्रम् ।
१९८	१	सूर्यसहस्रनामस्तोत्रम् ।

पूर्वखंडे हनुमत्तंत्रे नवमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
२०२	२	हनुमद्द्वादशाक्षरमंत्रप्रयोगः ।
२०५	१	हनुमद्द्वादशाक्षरमंत्रप्रयोगः ।
२०६	२	द्वादशाक्षरहनुमत्कल्पः ।
२०८	२	हनुमद्दशाक्षरमंत्रवीरसाधनप्रयोगः ।

For Private And Personal Use Only

पत्रांकाः	पृष्ठांकाः	विषयाः
२०९	१	हनुमदष्टादशाक्षरमंत्रप्रयोगः ।
,,	२	चतुर्दशाक्षरहनुमन्मंत्रप्रयोगः ।
,,	,,	हनुमत्पूजापद्धतिः ।
२१६	१	पंचमुखीहनुमत्कवचम् ।
२१८	२	एकादशमुखहनुमत्कवचम् ।
२१९	१	श्रीरामप्रोक्तहनुमत्कवचम् ।
२२०	१	हनुमत्सहस्रनामस्तोत्रप्रारंभः ।
२२५	१	हनुमत्स्तोत्रप्रारंभः ।
,,	१	लांगूलास्त्रशत्रुंजयस्तोत्रम् ।

पूर्वखंडे बटुकभैरवतंत्रे दशमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
२२८	२	आपदुद्धारकबटुकमंत्रप्रयोगः ।
२३७	१	स्वर्णाकर्षणभैरवमन्त्रप्रयोगः ।
२४१	१	बटुकभैरववीरसाधनप्रयोगः ।
२४५	१	बटुकभैरवदीपदानप्रयोगः ।
२५०	१	बटुकभैरवपूजापद्धतिः ।
२७१	१	श्रीबटुकभैरवब्रह्मकवचम् ।
२७२	१	श्रीबटुकभैरवसहस्रनामस्तोत्रम् ।
२७९	१	श्रीबटुकभैरवस्तवराजप्रारंभः ।
२८३	१	बटुकभैरवाष्टोत्तरशतनामस्तोत्रम् ।

२

पूर्वखंडे मिश्रतंत्रे एकादशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
२८४	२	क्षेत्रपालमंत्रप्रयोगः ।
२८५	२	वरुणमंत्रप्रयोगः ।
२८७	२	कामदेवबीजमंत्रप्रयोगः ।
२९१	१	कुबेरमंत्रप्रयोगः ।
२९२	१	चन्द्रमोमन्त्रप्रयोगः ।
२९४	१	चन्द्रमस्तोत्रम् ।
,,	१	धनपुत्रप्रदमंगलमंत्रविधानम् ।
२९७	१	मंगलस्तोत्रम् ।
,,	२	बुधस्तोत्रम् ।
२९८	१	बृहस्पतिमन्त्रप्रयोगः ।
२९९	१	बृहस्पतिस्तोत्रम् ।
,,	२	शुक्रमन्त्रप्रयोगः ।
३००	२	शुक्रस्तोत्रम् ।
३०१	१	व्यासमंत्रप्रयोगः ।
३०२	१	धर्मराजमंत्रप्रयोगः ।
,,	२	चित्रगुप्तमंत्रप्र० ।
,,	,,	घंटाकर्णमन्त्रप्रयोगः ।
३०३	१	कार्तवीर्यार्जुनमंत्रप्रयोगः ।
३०५	२	श्रीमद्भागवतानुष्ठानचक्रम्
३०७	१	हनुमत्कवचम् ।
३०९	१	शत्रुघ्नकवचम् ।
४१०	१	भरतकवचम् ।
३११	१	लक्ष्मणकवचम् ।
३१२	१	सीताकवचम् ।
३१३	१	श्रीरामकवचम् ।
३१४	१	हरिवाहनगरुडमन्त्रप्रयोगः ।
३१६	१	चरणायुध मंत्रप्रयोगः ।
३१९	२	पक्षिराजधूपतंत्रम् ।
३२२	१	संतानोपायः ।
,,	,,	हरिवंशश्रवणविधिः ।
,,	२	संतानगोपालमंत्रप्रयोगः ।
३२४	१	पुत्रदाभिलाषाष्टकम् ।
३२५	१	पुत्रोत्पत्तिकरयंत्रम् ।
,,	,,	औषधाद्युपायाः संतानविषये ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ मध्यखंडस्थविषयानुक्रमणिका—

मध्यखंडे गायत्रीतंत्रे प्रथमस्तरंगः ।

पत्रांकाः	पृष्ठाकाः	विषयाः
३२७	१	ब्रह्मगायत्रीपुरश्चरणविधानम् ।
३३४	१	हंसगायत्रीमन्त्रः ।
,,	२	ब्रह्मगायत्रीमंत्रः ।
,,	,,	सरस्वतीगायत्रीमंत्रः ।
,,	,,	विष्णुगायत्रीमंत्रः ।
३३५	१	लक्ष्मीगायत्रीमंत्रः ।
,,	,,	नारायणगायत्रीमंत्रः ।
,,	,,	रामगायत्रीमंत्रः ।
,,	२	जानकीगायत्रीमंत्रः ।
,,	,,	लक्ष्मणगायत्रीमंत्रः ।
,,	,,	हनुमद्गायत्रीमंत्रः ।
३३६	१	गरुडगायत्रीमन्त्रः ।
,,	,,	कृष्णगायत्रीमन्त्रः ।
,,	,,	गोपालगायत्रीमन्त्रः ।
,,	२	राधिकागायत्रीमंत्रः ।
,,	,,	परशुरामगायत्रीमंत्रः ।
,,	,,	नृसिंहगायत्रीमन्त्रः ।

पत्राकाः	पृष्ठांकाः	विषयाः
३३७	१	हयग्रीवगायत्रीमन्त्रः ।
,,	,,	शिवगायत्रीमन्त्रः ।
,,	,,	रुद्रगायत्रीमन्त्रः ।
,,	,,	दक्षिणामूर्तिगायत्रीमन्त्रः ।
,,	२	गौरीगायत्रीमन्त्रः ।
,,	,,	गणेशगायत्रीमन्त्रः ।
,,	,,	षण्मुखगायत्रीमन्त्रः ।
,,	,,	नंदीगायत्रीमन्त्रः ।
३३८	१	सूर्यगायत्रीमंत्रः ।
,,	,,	चन्द्रगायत्रीमंत्रः ।
,,	,,	भौमगायत्रीमंत्रः ।
,,	२	पृथ्वीगायत्रीमन्त्रः ।
,,	,,	अग्निगायत्रीमंत्रः ।
,,	,,	जलगायत्रीमन्त्रः ।
,,	,,	आकाशगायत्रीमन्त्रः ।
३३९	१	वायुगायत्रीमन्त्रः ।
,,	,,	इन्द्रगायत्रीमन्त्रः ।
,,	,,	कामगायत्रीमन्त्रः ।
,,	२	गुरुगायत्रीमन्त्रः ।
,,	,,	तुलसीगायात्रीमंत्रः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	,,	देवीगायत्रीमन्त्रः ।
,,	,,	शक्तिगायत्रीमन्त्रः ।
३४०	१	दुर्गागायत्रीमन्त्रः ।
,,	,,	जयदुर्गागायत्रीमन्त्रः ।
,,	,,	अन्नपूर्णागायत्रीमंत्रः ।
,,	२	कालीगायत्रीमन्त्रः ।
,,	,,	तारागायत्रीमन्त्रः ।
,,	,,	षोडशीगायत्रीमन्त्रः ।
,,	,,	भुवनेश्वरीगायत्रीमन्त्रः ।
३४१	१	भैरवीगायत्रीमन्त्रः ।
,,	,,	छिन्नमस्तागायत्रीमन्त्रः ।
,,	,,	धूमावतीगायत्रीमन्त्रः ।
,,	,,	बगलामुखीगायत्रीमन्त्रः ।
,,	२	मातङ्गीगायत्रीमन्त्रः ।
,,	,,	महिषमर्दिनीगायत्रीमन्त्रः ।
,,	,,	त्वरितागायत्रीमन्त्रः ।
३४२	१	गायत्रीकवचम् ।
३४३	२	गायत्रीपंजरस्तोत्रम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
३४६	२	गायत्रीस्तवराजः ।
३४८	२	गायत्रीसहस्रनामस्तोत्रम् ।
३५३	२	गायत्रीतत्त्वम् ।
३५४	१	गायत्र्युपनिषद् ।
३५६	१	गायत्रीचक्रम् ।

मध्यखण्डे दुर्गातंत्रे द्वितीयस्तरंग ।

पत्रांकाः	पृष्ठांकाः	विषयाः
३५७	१	दुर्गातंत्रे दुर्गानामप्राप्तिः ।
,,	,,	दुर्गापटलम् ।
,,	२	दुर्गाभुवनवर्णनम् ।
३५८	२	दुर्गाष्टाक्षरमन्त्रप्रयोगः ।
३६१	२	चण्डिकामालामन्त्रप्रयोगः ।
३६२	२	नवार्णमन्त्रप्रयोगः ।
३६९	१	कार्यपरत्वेन नवार्णे दुर्गापाठे वा पल्लवनिर्णयः ।
३७०	१	नवार्णमन्त्रस्यमारणादिषट्प्रयोगास्तत्र मारणप्र० ।
३७१	२	मोहनप्रयोगः ।
३७२	२	उच्चाटनप्रयोगः ।
३७३	२	वशीकरणप्रयोगः ।
३७५	१	स्तंभनप्रयोगः ।
३७६	१	विद्वेषणप्रयोगः ।
३७७	२	नवार्णमहामंत्रस्वरूपम् ।
३७८	१	दुर्गेस्मृतामंत्रप्रयोगः ।
,,	२	शूलिनीदुर्गामंत्रप्रयोगः ।
३८०	२	दुर्गासप्तशतीप्रयोगः ।
,,	,,	चरित्रत्रयरहस्यत्रयनिर्णयः ।
,,	,,	दुर्गापाठक्रमः ।
३८१	१	सप्तशतीपाठेंगषट्कस्यमुख्यता–तदपठने दोषः ।
,,	,,	सप्तशतीपाठे कवचार्गलाकीलकानामावश्यकता ।
,,	२	कामनापरत्वेन चंडीपाठसंख्या ।
३८२	१	सप्तशत्याः शापोद्धारोत्कीलने ।
,,	,,	सप्तशतीस्तोत्रांतर्गतमंत्राणां कामनापरत्वेन संपुटनिर्णयः ।
३८४	२	कार्यपरत्वेनसप्तशतीस्तोत्रांतर्गत–प्रतिश्लोकप्रयोगः ।
३८५	२	दुर्गापाठस्य नवनामानि तल्लक्षणानि च
३८६	१	नवदुर्गाविधानम् ।
,,	२	नित्यचंडीविधानम् ।
३८७	१	शीघ्रकार्यसिद्ध्यैमत्यद्‍ नवचंडी–विधानम् ।
"	"	नवरात्रे वार्षिकनवचंडीविधानम् ।
३८९	२	शतचंडीसहस्रचंड्यादिविधानम् ।
३९२	२	दुर्गापूजामाहात्म्यम् ।
३९७	२	दुर्गापूजापद्धतिः ।
४१६	१	सप्तशतीपाठः ।
४४१	१	दुर्गाष्टाक्षरीकवचानि ।
४४३	१	दुर्गाष्टाक्षरीसहस्रनामस्तोत्रम् ।
४४७	१	दुर्गाष्टाक्षरीस्तोत्रम् ।
,,	२	दुर्गास्तवः ।
४४८	२	दुर्गास्तोत्रम् ।
४४९	२	परशुरामकृतदुर्गास्तोत्रम् ।
४५१	१	दुर्गाशतनामात्मकस्तोत्रम् ।
,,	२	चंडिकास्तोत्रं मार्कण्डेयपुराणोक्तम् ।
४५२	२	मार्कण्डेयप्रोक्तलघुदुर्गासप्तशतीस्तोत्रम् ।
४५३	१	रुद्रचंडीपाठः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्यखंडे दशमहाविद्यापद्धतौ तृतीयस्तरंगः

पत्रांकाः	पृष्ठांकाः	विषयाः
४५५	१	दशमहाविद्यानामानि ।
,,	,,	पुरश्चरणात्पूर्वकृत्यम् ।
,,	२	प्रातःकृत्यम् ।
४५६	१	शौचक्रियाः ।
,,	२	गृहस्नानप्रयोगः ।
४५७	१	भस्मत्रिपुंड्रप्रकारः ।
,,	,,	द्वारपूजाप्रकारः ।
,,	२	क्षेत्रकीलनम् ।
४५८	१	पुरश्चरणविधानम् ।
४६०	१	पीठपूजनम् ।
,,	२	पात्रासादनम् ।
४६१	२	शंखस्थापनम् ।
,,	,,	कलशस्थापनप्रयोगः ।
४६४	१	घंटास्थापनम् ।
,,	२	अखण्डदीपस्थापनम् ।
,,	,,	प्राणप्रतिष्ठाप्रयोगः ।
४६५	१	मानसोपचारपूजा ।
४६६	१	पद्यादिपूजनम् ।
४६९	२	मालायाः संस्काराः ।
४७०	१	नित्यबलिदानप्रयोगः ।
,,	२	छागादिबलिदानप्रयोगः ।
४७१	२	कुमारीसुवासिनीपूजाप्रयोगः ।
४७४	१	नित्यहोमप्रकारः
,,	,,	कुलाचारः ।
४७६	१	शिवाबलिप्रयोगः ।
४७७	२	कुलनाइकाः ।
४८०	१	लिंगपूजनम् ।
४८१	१	कुलस्तोत्रम् ।

मध्यखंडे कालीतंत्रे चतुर्थस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
४८२	१	द्वाविंशत्यक्षरदक्षिणकालीमंत्र० ।
४८६	१	भद्रकालीमंत्रप्रयोगः ।
,,	,,	स्मशानकालीमंत्रप्रयोगः ।
४८७	१	श्यामाकवचप्रारंभः ।
४८८	२	श्यामाकर्पूरस्तोत्रम् ।
४८९	२	कालीस्तवप्रारंभः ।
४९०	२	काल्यष्टोत्तरशतनामस्तोत्रप्रारंभः ।
४९१	२	कालीहृदयप्रारंभः ।
४९२	२	कालीसहस्रनामस्तोत्रप्रारंभः ।
५०६	१	कालीसहस्रनामावलिः ।

मध्यखंडे तारातंत्रे पञ्चमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
५१४	१	पंचाक्षरतारामंत्रप्रयोगः ।
५१९	१	द्वात्रिंशदक्षरस्तारामंत्रभेदः
,,	,,	अष्टौ तारामंत्राः ।
२२०	१	ताराभेदैकजटामन्त्रप्रयोगः ।
,,	,,	नीलसरस्वती मंत्रप्रयोगः ।
,,	२	महाविद्या (विद्याराज्ञी) मंत्रप्रयोगः ।
५२६	२	वागीश्वरी (सरस्वती) महाकल्पः ।
२२८	२	सरस्वतीदशाक्षरमंत्रप्रयोगः ।
५३०	१	एकादशाक्षरसरस्वतीमन्त्रप्रयोगः ।
५३१	२	विद्याप्रसंगात्कृष्णादेवी (तारणी) महाकल्पः ।
५३५	१	कात्यायनीमहाकल्पः ।
५३६	२	ताराकवचप्रारंभः ।
५३८	२	तारास्तोत्रप्रारम्भः ।
५३९	१	ताराशतनामस्तोत्रप्रारंभः ।
,,	२	तारातकारादिसहस्रनामप्रारंभः ।

For Private And Personal Use Only

पत्रांकाः	पृष्ठांकाः	विषयाः
५४७	१	श्रीताराहृदयप्रारंभः।
,,	२	सरस्वतीस्तोत्रप्रारंभः।

मध्यखंडे षोडशीश्रीविद्यातंत्रे षष्ठस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
५४९	१	षोडशाक्षरीषोडशीमंत्रप्रयोगः।
५५७	१	बालात्रिपुरामन्त्रप्रयोगः।
५६२	१	त्रिपुरसुन्दरीकवचप्रारंभः।
,,	२	त्रिपुरलक्ष्मीकवचप्रारंभः।
५६३	१	श्रीविद्याकवचप्रारम्भः।
,,	२	षोडशीस्तोत्रप्रारम्भः।
५६४	२	षोडश्यष्टोत्तरशतनामस्तोत्रप्रा०।
५६५	१	षोडशीसहस्रनामस्तोत्रप्रारम्भः।
५७०	१	षोडशीहृदयप्रारम्भः।

मध्यखंडे भुवनेश्वरीतन्त्रे सप्तमस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
५७१	२	एकाक्षरीभुवनेश्वरीमन्त्रप्रयोगः।
५७५	२	त्र्यक्षरमन्त्रप्रयोगः।
५७६	१	त्रैलोक्यमङ्गलभुवनेश्वरीकवचम्।
५७७	१	भुवनेश्वरीस्तोत्रम्।
५७८	१	भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रप्रारम्भः।
५७९	१	भुवनेश्वरीसहस्रनामस्तोत्रप्रारंभः।
५८४	२	भुवनेश्वरीहृदयप्रारम्भः।

मध्यखंडे त्रिपुरभैरवीतन्त्रेऽष्टमस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
५८६	१	त्रिपुरभैरवीमन्त्रप्रयोगः।
५८७	२	त्रिपुरभैरवीकवचप्रारम्भः।
५८९	१	भैरवीकवचप्रारंभः।
५९०	१	त्रिपुरभैरवीसहस्रनामस्तोत्रप्रा०।
५९४	२	भैरवीस्तवराजप्रारंभः।
५९५	१	भैरव्यष्टोत्तरशतनामस्तोत्रप्रारंभः।

मध्यखंडे छिन्नमस्तातंत्रे नवमस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
५९६	१	सप्तदशाक्षरच्छिन्नमस्तामंत्रप्रयोगः।
६००	२	छिन्नमस्ताकवचम्।
६०१	२	छिन्नमस्तास्तोत्रम्।
६०२	१	प्रचंडचंडिकास्तोत्रम्।
६०३	१	छिन्नमस्ताष्टोत्तरशतनामस्तोत्रम्।
,,	२	छिन्नमस्तासहस्रनामस्तोत्रम्।
६०९	१	छिन्नमस्ताहृदयस्तोत्रम्।

मध्यखंडेधूमावतीतंत्रे दशमस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
६१०	२	अष्टाक्षरधूमावतीमंत्रप्रयोगः।
६१२	२	धूमावतीकवचम्।
६१३	१	धूमावतीस्तोत्रम्।
,,	२	धूमावत्यष्टोत्तरशतनामस्तोत्रम्।
६१४	१	धूमावतीसहस्रनामस्तोत्रम्।
६१९	१	धूमावतीहृदयम्।

मध्यखंडे बगलामुखीतंत्रे एकादशस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
६२०	२	बगलामुखीषट्त्रिंशदक्षरमंत्रप्रयोगः।
६२४	२	बगलामुखीकवचम्।
६२६	२	बगलामुखीसहस्रनामस्तोत्रम्।
६३२	१	बगलामुखीस्तोत्रम्।
६३३	१	बगलामुखीशतनामस्तोत्रम्।

मध्यखंडे श्रीमातंगीतंत्रे द्वादशस्तरंगः।

पत्रांकाः	पृष्ठांकाः	विषयाः
६३४	१	द्वात्रिंशदक्षरमातंगीमंत्रप्रयोगः।
६३७	२	लघुश्यामामंत्रप्रयोगः।
६४२	२	मातंगीदशाक्षरमंत्रप्रयोगः।
६४४	२	सुमुखीमंत्रप्रयोगः।
६४६	२	मातंगीसुमुखीकवचम्।
६४७	१	मातंगीकवचं द्वितीयम्।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
६४७	२	मातंगीस्तोत्रम् ।
६४८	१	मातंगशितनामस्तोत्रम ।
६४९	१	मातंगीसहस्रनामस्तोत्रम् ।
६५३	२	मातंगीहृदयम् ।

मध्यखंडे कमलात्मिकातंत्रे त्रयोदशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
६५५	१	एकाक्षरलक्ष्मीबीजमन्त्रप्रयोगः ।
६५७	१	चतुरक्षरलक्ष्मीबीजमंत्रप्रयोगः ।
,,	,,	दशाक्षरलक्ष्मीबीजमन्त्रप्रयोगः ।
६५८	१	सप्तविंशत्यक्षरमहालक्ष्मीमन्त्रप्रयोगः ।
६६०	१	द्वादशाक्षरमहालक्ष्मीमंत्रप्रयोगः ।
६६४	१	त्रयोविंशत्यक्षरलक्ष्मीमंत्रप्रयोगः ।
,,	,,	सिद्धलक्ष्म्येकादशाक्षरमंत्रप्रयोगः ।
,,	२	सिद्धलक्ष्मीस्तोत्रम् ।
६६५	२	ज्येष्ठालक्ष्मीमन्त्रप्रयोगः ।
६६७	१	वसुधालक्ष्मीमन्त्रप्रयोगः ।
६६८	२	लक्ष्मीकवचम् ।
६६९	२	लक्ष्मीस्तोत्रम् ।
,,	,,	कमलाया अष्टोत्तरशतनामस्तोत्रम् ।
६७०	२	लक्ष्मीसहस्रनामस्तोत्रम् ।

पत्रांकाः	पृष्ठांकाः	विषयाः
६७५	२	लक्ष्मीहृदयस्तोत्रम् ।
६७९	२	लक्ष्मीसूक्तम् ।

मध्यखंडे कुमारीतंत्रे चतुर्दशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
६८०	२	वर्णभेदेन कुमारीभेदनिरूपणम् ।
,,	,,	कुमारीणां वर्णभेदनिरूपणम् ।
६८१	१	कुमारीदानफलम् ।
,,	२	कुमारीपूजाप्रयोगः ।
६८४	२	कुमारीकवचम् ।
६८६	१	कुमारीस्तोत्रम् ।
६८७	१	कुमारीसहस्रनामस्तोत्रम् ।
६९२	२	कुमारीतर्पणात्मकस्तोत्रम् ।

मध्यखंडे कालिन्दीतन्त्रे पञ्चदशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
६९३	२	एकादशाक्षरयमुनामन्त्रपटलम् ।
६९५	२	यमुनाकवचम् ।
६९६	१	यमुनास्तवः ।
६९७	१	यमुनासहस्रनामस्तोत्रम् ।

मध्यखंडे मिश्रतन्त्रे षोडशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७०१	१	आसुरीमहाकल्पः ।
७०२	१	कालरात्रिमहामन्त्रप्रयोगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७०६	१	वशीकरणप्रयोगः ।
७०७	१	स्तम्भनप्रयोगः ।
,,	२	मोहनप्रयोगः ।
७०८	१	आकर्षणप्रयोगः ।
,,	२	उच्चाटनप्रयोगः ।
,,	,,	विद्वेषणप्रयोगः ।
७०९	१	मारणप्रयोगः ।
,,	,,	वार्तालीमन्त्रप्रयोगः ।
७१४	१	महिषमर्दिनीमन्त्रप्रयोगः ।
७१५	१	महिषमर्दिनीकवचम् ।
७१६	१	रेणुकाशबरीमन्त्रप्रयोगः ।
७१८	२	अन्नपूर्णामन्त्रप्रयोगः ।
७२०	२	अन्नपूर्णाकवचम् ।
७२१	१	अन्नपूर्णास्तोत्रम् ।
,,	२	पृथ्वीमन्त्रप्रयोगः ।
७२२	२	गंगामन्त्रप्रयोगः ।
७२४	२	मणिकर्णिकामंत्रप्रयोगः ।
७२५	२	शीतलामन्त्रप्रयोगः ।
७२६	१	ज्वालामुखीमन्त्रप्रयोगः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
७२६	२	इन्द्राक्षीस्तोत्रम् ।
७२७	१	जैनमते पद्मावतीस्तोत्रम् ।
,,	२	कार्यपरत्वेन पद्मावतीस्तोत्रस्थप्रतिश्लोकपुरश्चरणं भाषया ।

अथोत्तरखंडस्थितविषयानुक्रमणिका

उत्तरखंडे स्वप्नसिद्धितंत्रे प्रथमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७३६	२	स्वप्नवाराहीमंत्रप्रयोगः ।
७४०	१	स्वप्नेश्वरीमंत्रप्रयोगः ।
७४१	२	हनूमन्मंत्रप्रयोगः ।
,,	२	योजनगन्धायोगिनीमन्त्रप्रयोगः ।
,,	,,	चण्डयोगिनीमन्त्रप्रयोगः ।
७४२	१	मणिभद्रमन्त्रप्रयोगः ।
,,	,,	स्वप्नमातंगीमन्त्रप्रयोगः ।
,,	,,	यक्षिणीमन्त्रप्रयोगः ।
,,	,,	घण्टाकर्णीमन्त्रप्रयोगः ।
,,	२	कर्णपिशाचिनीमन्त्रप्रयोगः ।
७४३	१	चिंचिनीपिशाचिनीमन्त्रप्रयोगः ।
,,	,,	चामुण्डामन्त्रप्रयोगः ।
७४३	२	रुद्रमंत्रप्रयोगः ।
७४५	१	मुसल्मानीमंत्रः ।
,,	,,	द्वितीयः सप्तविंशत्यक्षरोमंत्रः ।
,,	,,	तृतीयश्चतुरक्षरोमंत्रः ।
,,	२	नीलामकेवास्ते पीरका कलमा ।
,,	,,	वागीश्वरीमंत्रः ।
,,	,,	चित्रेश्वरीमंत्रः ।
,,	,,	कुलजामंत्रः ।
,,	,,	कीर्तीश्वरीमंत्रः ।
,,	,,	अंतरिक्षसरस्वतीमंत्रः ।
,,	,,	नीलामंत्रः ।
,,	,,	किंकिणीमंत्रः
,,	,,	घटसरस्वतीमंत्रः ।

उत्तरखंडे यक्षिण्यादितंत्रे द्वितीयस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७४५	१	षट्त्रिंशद्यक्षिणीनामानि ।
,,	,,	षट्त्रिंशद्यक्षिणीसाधने सूचना
,,	२	षट्त्रिंशद्यक्षिणीसाधने मुद्रादयः ।
,,	,,	विचित्रायक्षिणीसाधनम् ।
,,	,,	विभ्रमासाधनम् ।
७४६	१	हंसीसाधनम् ।
,,	,,	भिक्षिणीसाधनम् ।
,,	,,	जनरंजिनीसाधनम् ।
,,	,,	विशालासाधनम् ।
,,	२	मदनासाधनम् ।
,,	,,	घंटायक्षिणीसाधनम् ।
,,	,,	कालकर्णीसाधनम् ।
,,	,,	महाभयासाधनम् ।
७४७	१	माहेंद्रीसाधनम् ।
,,	,,	शंखिनीसाधनम् ।
,,	,,	चांद्री (चंद्रिका) यक्षिणीसाधनम् ।
,,	,,	श्मशानीसाधनम् ।
,,	२	वटयक्षिणीसाधनम् ।
७४९	२	मेखलासाधनम् ।
,,	,,	विकलासाधनम् ।
,,	,,	लक्ष्मीसाधनम् ।
,,	,,	मानिनीसाधनम् ।
७५०	१	शतपत्रिकासाधनम् ।
,,	,,	सुलोचनासाधनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
७५०	१	सुशोभनासाधनम् ।
,,	,,	कपालिनीसाधनम् ।
,,	२	विलासिनीसाधनम् ।
,,	,,	नटीसाधनम् ।
७५१	१	कामेश्वरीसाधनम् ।
,,	२	स्वर्णरेखासाधनम् ।
,,	,,	सुरसुंदरीसाधनम् ।
७५२	२	मनोहरीसाधनम् ।
७५३	१	प्रमदासाधनम् ।
७५४	२	अनुरागिणीसाधनम् ।
७५५	१	नखकेशिकासाधनम् ।
,,	,,	नेमिनी (भामिनी) प्रियासाधनम् ।
,,	२	पद्मिनीसाधनम् ।
७५६	१	स्वर्णावती (कनकावती) साधनम् ।
,,	२	रतिप्रिया साधनम् ।
७५७	१	धनदारतिप्रियायक्षिणीपंचांगम् ।
,,	२	रतिप्रियाधनदायक्षिणपटलम् ।
७६०	१	धनदारतिप्रियायक्षिणीपद्धतिः ।
७६२	२	धनदारतिप्रियायक्षिणीकवचम् ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७६३	२	धनदायक्षिणीस्तोत्रम् ।
७६४	१	बिल्वयाक्षिणीमंत्रप्रयोगः ।
७६५	१	चंद्रद्रवापटयक्षिणीमंत्रप्रयोगः ।
,,	,,	धनदापिप्पलयक्षिणीमंत्रप्रयोगः ।
,,	२	पुत्रदाआम्रयक्षिणीमंत्रप्रयोगः ।
,,	,,	अशुभक्षयकरीधात्रीयक्षिणी । मंत्र प्रयोगः ।
,,	,,	विद्यादात्र्युदुंबरयक्षिणीमंत्रप्रयोगः ।
,,	,,	विद्यादात्रीनिर्गुंडीयक्षिणीमंत्रप्रयोगः ।
,,	,,	जयार्कयक्षिणीमन्त्रप्रयोगः ।
,,	,,	सन्तोषाश्वेतगुञ्जायक्षिणीमन्त्रप्रयोगः ।
,,	,,	राज्यदातुलसीयक्षिणीमन्त्रप्रयोगः ।
७६६	१	राज्यदाअंकोलयक्षिणीमन्त्रप्रयोगः ।
,,	,,	कुशयक्षिणीमन्त्रप्रयोगः ।
,,	,,	अपामार्गयक्षिणीमन्त्रप्रयोगः ।
,,	,,	क्षीरार्णवायक्षिणीसाधनम् ।
,,	,,	उच्छिष्टयक्षिणीसाधनम् ।
,,	,,	चन्द्रामृतयक्षिणीसाधनम् ।
,,	२	स्वामीश्वरीसाधनम् ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७६६	२	महामायाभोगयक्षिणीसाधनम् ।
,,	,,	त्यागासाधनम् ।
,,	,,	सर्वाङ्गसुलोचनासाधनम् ।
७६७	१	भूतलोचनासाधनम् ।
,,	,,	जलवाणिसाधनम् ।
,,	,,	मातंगेश्वरीसाधनम् ।
,,	,,	विद्यायक्षिणीसाधनम् ।
,,	,,	इटेलेकुमारीसाधनम् ।
,,	२	वंदीसाधनम् ।
७६८	२	अष्टाप्सरोदेवकन्यासाधनम् ।
,,	,,	शशिदेव्यप्सरोमन्त्रप्रयोगः ।
७६९	१	तिलोत्तमाप्सरोमन्त्रप्रयोगः ।
,,	,,	कांचनमालाप्सरःसाधनम् ।
,,	,,	कुंडलाहारिण्यप्सरोमन्त्रप्रयोगः ।
,,	,,	रत्नमालाप्सरोमंत्रप्रयोगः ।
,,	२	रंभाप्सरोमन्त्रप्रयोगः ।
,,	,,	उर्वश्यप्सरोमंत्रप्रयोगः ।
,,	,,	श्रीभूषण्यप्सरःसाधनम् ।
७७०	१	अष्टकिन्नरीसाधनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
७७०	१	मंजुघोषामंत्रप्रयोगः ।
,,	,,	मनोहारीमंत्रप्रयोगः ।
,,	,,	सुभगामंत्रप्रयोगः ।
,,	,,	विशालनेत्राकिन्नरीमंत्रप्रयोगः ।
,,	२	सुरसिप्रियाकिन्नरीमंत्रप्रयोगः ।
,,	,,	अश्वमुखीकिन्नरीमंत्रप्रयोगः ।
,,	,,	दिवाकीरमुखीकिन्नरीमंत्रप्रयोगः ।
,,	,,	अष्टभूतकात्यायनीसाधनम् ।
,,	,,	सुभगाकात्यायनीमंत्रप्रयोगः ।
७७१	१	कुंडलकात्यायनीमंत्रप्रयोगः ।
,,	,,	चंडकात्यायनीमंत्रप्रयोगः ।
,,	२	रुद्रकात्यायनीमंत्रप्रयोगः ।
,,	,,	महाकात्यायनीमंत्रप्रयोगः ।
,,	,,	सुरकात्यायनीमंत्रप्रयोगः ।

उत्तरखंडे कर्णपिशाचिन्यादितंत्रे तृ.स्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७७२	१	कर्णपिशाचिनीमंत्रसाधनम् ।
७७४	२	विप्रचांडालिनीमंत्रप्रयोगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	,,	क्षोभिणीमंत्रप्रयोगः ।
,,	,,	वेतालसाधनम् ।
,,	,,	श्मशानोत्थापनप्रयोगः ।
७७५	१	प्रेतसाधनम् ।
,,	२	भूतयक्षिणीप्रसन्नताकारकंयंत्रम् ।
,,	,,	स्वप्ने भूतदर्शकयंत्रम् ।
,,	,,	देवीप्रसन्नताकरयंत्रम् ।
,,	,,	पीरखिरहनामंत्रप्रयोगः ।
७७६	१	महम्मदापीरसाधनम् ।
,,	,,	डाकिनीसाधनम् ।
,,	२	प्रेतदर्शकतंत्रम् ।
,,	,,	पितृदर्शकतंत्रम् ।
,,	,,	देवीदेवतादर्शकतंत्रम् ।
,,	;;	भैरवदर्शकतंत्रम् ।
७७७	१	पूर्वजन्मदर्शकतंत्रम् ।

उत्तरखंडे चेटकतंत्रे चतुर्थस्तरंगः

पत्रांकाः	पृष्ठांकाः	विषयाः
७७७	२	वटयक्षिणीचेटकः ।
,,	,,	कर्णवर्तश्मशानयक्षिणीचेटकः ।
,,	,,	करालिनीचेटकः ।
,,	,,	कालिकाचेटकः ।
,,	,,	भैरवचेटकः ।
,,	,,	लिंगचेटकः ।
७७८	१	विरूचेटकः ।
,,	,,	नानासिद्धिचेटकः ।
,,	,,	नृसिंहचेटकः ।
,,	,,	सागरचेटकः ।
,,	२	हंसवद्धचेटकः ।
,,	,,	मणिभद्रचेटकः ।
,,	,,	भूतेश्वरचेटकः ।
७७९	१	किंकरोयमस्यचेटकः ।
,,	,,	कालीचेटकः ।
,,	,,	मन्त्रवादेकालीचेटकः ।
,,	२	रक्तकंबलाचेटकः ।
,,	,,	आकाशगामीचेटकः ।
,,	,,	देवांगनाप्राप्तिचेटकः ।
,,	,,	ज्वालामालिनीचेटकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
७७९	२	वेत्कारिणीचेटकः ।
७८०	१	यक्षचेटकः ।
,,	,,	उच्छिष्टचांडालिनीचेटकः ।
,,	,,	रतिराजचेटकः ।
,,	,,	सूर्यदर्शनचेटकः ।
,,	,,	ग्रहणदर्शनचेटकः ।
,,	,,	दिनेनक्षत्रदर्शनचेटकः ।
,,	२	रात्रिसमये दिनवत्दृश्यचेटकः ।
,,	,,	शतयोजनदृष्टिचेटकः ।
,,	,,	अनाहारचेटकः ।
७८१	१	आहारकरणचेटकः ।
,,	,,	हाजरातचेटकः ।
,,	,,	तत्रादौ ख्वाजामंत्रप्रयोगः ।
,,	२	महंमदपीरमंत्रः ।
७८२	१	हनूमन्मंत्रप्रयोगः ।
७८४	२	कामाख्यामंत्रप्रयोगः ।
७८५	१	तैलमातंगीमंत्रः ।
,,	२	मंडूकयुग्मचेटकः ।
,,	,,	वस्त्याकर्षणचेटकः ।
७८६	१	यंत्रभंजनचेटकः ।
,,	,,	निगडभंजनचेटकः ।
,,	,,	द्वारभंजनचेटकः ।
,,	,,	राघ्युत्थापनचेटकः ।
,,	२	तस्करग्रहणचेटकः ।
७८७	१	मार्गचेटकः ।
,,	२	योजनवार्ताश्रवणचेटकः ।
,,	,,	गुप्तवार्ताश्रवणचेटकः ।
,,	,,	जलालेपकरणचेटकः ।
,,	,,	स्त्रीवीर्यपातनचेटकः ।
,,	,,	जलविचारचेटकः ।
,,	,,	रसायनचेटकः ।
७९०	१	समयज्ञानचेटकः ।
,,	२	वस्तुकी तेजीमंदी देखनेकी सारिणी ।

उत्तरखण्डे निधिग्रहणाञ्जनतन्त्रे पंचमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७९१	१	निधिस्थानलक्षणम् ।
,,	२	निधिग्रहणांजनम् ।
,,	,,	कज्जलपात्रम् ।
७९२	१	कज्जलार्थे अग्निग्रहणमंत्रः
,,	,,	दीपमंत्रः ।
,,	२	शिखाबंधनमंत्रः ।
,,	,,	सर्वाञ्जनविधिः ।
७९३	२	कुमारांजनम् ।
,,	,,	पादजाताञ्जनम् ।
७९४	१	पादुकायोगः ।
,,	,,	निधिखननमुहूर्त्तः ।
,,	,,	ज्ञाननिधानस्य ग्रहणोपायः ।
७९५	१	भूमिखननोपायः ।
,,	२	धूपः ।
,,	,,	निधिग्रहणमंत्रः ।
७९६	१	द्रव्यशुद्धिकरणम् ।
,,	,,	समयदर्शनम् ।

उत्तरखंडे अदृश्यविद्यातंत्रे षष्ठस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
७९६	२	आसुरीकल्पे अदृश्ययोगः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
		उत्तरखंडे षट्कर्मतंत्रे सप्तमस्तरंगः ।
८०२	१	षट्कर्मलक्षणानि ।
,,	२	षट्कर्मोपयोगिनिर्णयचक्रम् ।
८०३	३	प्रत्यंगिरामंत्रप्रयोगः ।
८०५	२	प्रत्यंगिरामालामंत्रप्रयोगः ।
८०६	१	नारायणास्त्रम् ।
,,	२	चोरनिवारणम् ।
८०७	१	भूतोपद्रवनाशकाउड्डीशमंत्राः ।
,,	,,	डाकिनीक्षेतो बालकको छुडानेका मन्त्र।
,,	२	प्रेतादिरोगादिवाझाडनेका मन्त्र ।
,,	,,	नजरझाडनेका मन्त्र ।
८०८	१	डाकिनीके चोटमारवाको मन्त्र ।
,,	,,	डाकिनीभक्षितका झाडा ।
,,	२	डाकिनी दूरकरनेवाला मंत्र ।
,,	,,	डाकिनीके वकरावाको मंत्र ।
८०९	१	प्रेतादिझाडनेका मंत्र ।
,,	,,	सर्वज्वरे बलिदानम् ।

पत्रांकाः	पृष्ठांकाः	विषयाः
८१०	१	मंथरज्वरनिवारणतंत्रम्
,,	,,	संततज्वरतंत्रम् ।
,,	२	शीतज्वरतंत्रम् ।
,,	,,	अन्येद्युष्कज्वरनिवारणम् ।
८११	१	तृतीयज्वरनिवारणम् ।
,,	,,	चातुर्थिकज्वरनिवारण म् ।
,,	,,	रात्रिज्वरनिवारणम् ।
,,	,,	अर्शनिवारणतन्त्रम् ।
,,	२	जाढके निवारणका मंत्र ।
,,	,,	घरण ठिकाने आवै ।
८१२	१	हूकाका मन्त्र ।
,,	,,	प्लीहानिवारणमन्त्रः ।
,,	,,	कखलाईनिवारणमन्त्रः ।
,,	,,	रांघनवायको मन्त्र ।
,,	२	सुखप्रसवः ।
,,	,,	नेत्रपीडानिवारणमंत्रः ।
८१३	१	कंठवेलका मंत्र ।
,,	,,	अदीठमंत्रः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	,,	बिच्छू झाडनेका मंत्र ।
,,	२	सर्प झाडनेका मंत्र ।
८१४	१	सर्प कीलवाको मंत्र ।
,,	,,	सर्प कीलनेका मंत्र ।
,,	,,	साँप खोलनेका मंत्र ।
,,	२	सर्पोंको भगानेका मंत्र ।
,,	,,	बावले कुत्तेका मंत्र ।
,,	,,	आधाशीशीका मंत्र ।
८१५	१	कमल झाडनेका मंत्र ।
,,	,,	दर्द और थनपलका झाडा ।
,,	,,	जमोगाका मंत्र ।
,,	,,	डबा पसली झाडवाको मंत्र ।
,,	२	द्यूतविजयकरणम् ।
८१६	१	विक्रीयवर्धनम् ।
,,	,,	गोमहिषीणां दुग्धवर्धनोपायः ।
,,	२	फलवृद्धियंत्रम् ।
,,	,,	लडकी सासरेमें रहे रुठकर न आवै ।
,,	,,	कलहनाशनम् ।
,,	,,	अनावृष्टिकाले वृष्टिकरणम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
		उत्तरखंडे वशीकरणतन्त्रेऽष्टमस्तरंगः ।
८१७	१	स्वयंवलकलामंत्रप्रयोगः ।
८१९	२	मधुमतीमन्त्रप्रयोगः ।
८२१	१	बाणेशीमंत्रप्रयोगः ।
८२२	२	कामेशीमंत्रप्रयोगः ।
८२३	१	नित्यामंत्रप्रयोगः ।
८२५	२	वज्रप्रस्तारिणीमंत्रप्रयोगः ।
८२७	१	त्रैलोक्यमोहनगौरीमंत्रप्रयोगः ।
८२९	१	कामदेवमंत्रप्रयोगः ।
,,	२	काममेखलामंत्रप्रयोगः ।
,,	,,	सूर्यमन्त्रप्रयोगः ।
,,	,,	घोररूपिणीमंत्रप्रयोगः ।
८३०	१	दुर्गामंत्रप्रयोगः ।
,,	,,	मातंगीमंत्रप्रयोगः ।
,,	,,	माहेश्वरीमंत्रप्रयोगः ।
,,	,,	वश्यमुखीमंत्रप्रयोगः ।
,,	,,	क्षोभिणीमंत्रप्रयोगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	,,	चामुंडामंत्रप्रयोगः ।
,,	२	भगमालिनीमंत्रप्रयोगः ।
,,	,,	स्त्रीवशीकरणे शैतानीमंत्रः ।
८३१	१	कामपिशाचिनीमंत्रप्रयोगः ।
,,	,,	चामुंडामंत्रप्रयोगः ।
,,	२	अतरमोहिनी ।
,,	,,	लूणमोहिनी ।
,,	,,	सुपारीमोहिनी ।
,,	,,	इलायचीमोहिनी ।
८३२	१	लौंगमोहिनी ।
,,	,,	वेश्यावशीकरणम् ।
,,	,,	राजवशीकरणम् ।
,,	२	मंत्रिवशीकरणम् ।
,,	,,	सभामोहिनी ।
,,	,,	नग्नमोहिनी ।
८३३	१	शत्रुमोहिनी ।
,,	,,	विश्वावसुनामकगंधर्वमंत्रप्रयोगः ।
,,	,,	मलीमंत्रप्रयोगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	२	बीजमंत्रप्रयोगः ।
,,	,,	आदिरूपमंत्रः ।
,,	,,	रुद्रमंत्रप्रयोगः ।
८३४	१	मोहनतंत्रम् ।
,,	२	वशीकरणतंत्रम् ।
८३५	१	राजवशीकरणतंत्रम् ।
,,	२	पतिवशीकरणम् ।
,,	,,	स्त्रीवशीकरणम् ।
८३७	२	आकर्षणतंत्रम् ।
८३९	१	कालानलयंत्रम् ।
		उत्तरखण्डे षट्कर्मतन्त्रे नवमस्तरंगः ।
८३९	२	उच्चाटनम् ।
८४०	१	शत्रुपीडाकारकमंत्रः ।
,,	,,	प्रेतावेशकरणम् ।
,,	२	दुर्गावेशकरणम् !
,,	,,	भूतवादः
,,	,,	भूतकरणम् ।

For Private And Personal Use Only

पत्रांकाः	पृष्ठांकाः	विषयाः
८४१	१	विक्षिप्तकरणन् ।
,,	,,	ज्वरकरणम् ।
,,	२	पगच्छेदनम् ।
८४२	२	शत्रूणां मूत्रावरोधनम् ।
८४३	१	शत्रुशिरसि पादुकाहननम् ।
८४४	१	शत्रुपीडनम् ।
८४५	२	संततिनाशनम् ।
,,	,,	कुलनाशनम् ।
,,	,,	शत्रुगृहे कलहकरणम् ।
८४६	१	शत्रोः सर्पदर्शनम् ।
,,	,,	शत्रुगृहेऽश्मवर्षणम् ।
,,	,,	शत्रुकृषिनाशनम् ।
,,	,,	शत्रुगृहजालनम् ।
,,	२	शत्रुतैलनाशनम् ।
,,	,,	दुग्धनाशनम् ।
,,	,,	पलनाशनम् ।
,,	,,	अश्वनाशनम् ।
८४७	१	शत्रूणांबधिरीकरणम् ।
,,	,,	मंदाग्निकरणम् ।
,,	,,	वस्त्रनाशनन् ।
,,	,,	विक्रीरोधनम् ।
,,	,,	मारणप्रयोगः ।
,,	२	शत्रुदमनमन्त्रः ।
८४९	१	आर्द्रपटीविद्या ।
,,	२	भैरवमन्त्रप्रयोगः ।
८५०	१	प्रत्यंगिरामंत्रप्रयोगः ।
८५१	१	मूठचालनमंत्रः ।

उत्तखण्डे षट्कर्मतंत्रे दशमस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
८५२	१	मुखस्तंभनम् ।
,,	२	दृष्टिस्तंभनम् ।
,,	,,	बुद्धिस्तंभनम् ।
८५३	१	मेघस्तंभनम् ।
,,	,,	शस्त्रस्तंभनम् ।
,,	२	शस्त्रलेपनम् ।
,,	,,	सेनास्तंभनम् ।
८५४	१	सेनापलायनम् ।
,,	,,	मनुष्यस्तंभनम् ।
,,	,,	निद्रास्तम्भनन् ।
,,	,,	नौकास्तम्भनम् ।
,,	,,	जलस्तम्भनम् ।
,,	,,	अग्निस्तम्भनम् ।
८५५	१	आसनस्तम्भनम् ।
,,	,,	गर्भस्तम्भनम् ।
,,	२	पदस्तंभनम् ।
,,	,,	भीतस्तंभनम् ।
,,	,,	पशुस्तंभनम् ।
८५६	१	पाषाणस्तंभनम् ।
,,	२	नौकास्तंभनम् ।
,,	,,	विद्वेषणतंत्रम् ।

उत्तरखंडे यन्त्रप्रकरणे एकादशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
८५८	१	विंशांकयन्त्रविधानम् ।
८६२	१	विंशांकयन्त्राणामनेकरूपाणि ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पत्रांकाः	पृष्ठांकाः	विषयाः
८६२	२	पञ्चदशीविधानम् ।
८६४	१	अस्य प्रयोगः ।
८६५	१	वर्णभेदेन वारभेदः ।
,,	२	कार्यपरत्वेन दीपमाह ।
,,	,,	वर्णभेदेन पत्रभेदः ।
,,	,,	कार्यपरत्वेन लेखनीमाह ।
,,	,,	कार्यपरत्वेन गन्धमाह ।
,,	,,	कार्यपरत्वेनांकमाह ।
८६६	१	कार्यपरत्वेन संख्यामाह ।
,,	२	कार्यपरत्वेन प्रयोगमाह ।
८६८	१	त्रिकोणयंत्रम् ।
,,	,,	ग्रहशान्तियंत्रम् ।
,,	,,	यंत्राणां वर्णभेदः
,,	२	बहत्तरके यंत्रकी विधि ।
८६९	२	द्वात्रिंशांकयंत्रविधानम्
८७०	१	आपदुद्धारबटुकयंत्रविधानम् ।
,,	२	हनुमानयंत्रविधानम् ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	,,	सर्वकार्यसिद्धिकारकयंत्रम् ।
८७१	१	वचनसिद्धियंत्रम् ।
,,	,,	पक्षिआकर्षणयंत्रम् ।
,,	,,	फलवृद्धियत्रम् ।
,,	,,	दुष्टस्वप्ननाशकयंत्रम् ।
,,	,,	विच्छुसर्पादिनाशकयंत्रम् ।
,,	२	इच्छाप्राप्तिकारकयंत्रम् ।
,,	,,	वृद्धियंत्रम् ।
,,	,,	राजकोपनिवारणयंत्रम् ।
८७२	१	वैराग्योत्पत्तिकरं यंत्रम् ।
,,	,,	सेनापलायनयंत्रम् ।
,,	२	शीतलायंत्रम् ।
,,	,,	मूँठउद्धारयंत्रम् ।
,,	,,	मूठोद्धारयंत्रम् ।
८७३	१	नपुंसकयत्रम् ।
,,	,,	गर्भस्तंभनयंत्रम् ।
,,	,,	सौभाग्यवृद्धियंत्रम् ।

पत्रांकाः	पृष्ठांकाः	विषयाः
,,	,,	धरणियंत्रम् ।
,,	,,	पुत्रोत्पत्तियंत्रम् ।
,,	२	रोजीप्राप्तियंत्रम् ।
,,	,,	पुरुषवश्ययंत्रम् ।
,,	,,	श्वानविघ्नयंत्रम् ।
,,	,,	डाकिनीयंत्रम् ।
८७४	१	कामलायंत्रम् ।
,,	,,	अश्वकष्टनिवारणयंत्रम् ।
,,	,,	आकर्षणयंत्रम् ।
,,	,,	वयगोलायंत्रम् ।
,,	२	दृष्टियंत्रम् ।
,,	,,	कर्णपीडायंत्रम् ।
,,	,,	आधाशीशीयंत्रम् ।

उत्तरखंडे मिश्रतंत्रे द्वादशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
८७५	१	अंकोलतंत्रम् ।
,,	२	ब्रह्मवृक्षश्वेतपलाशतंत्रम् ।
८७६	१	रक्तगुंजातंत्रप्रारंभः ।

For Private And Personal Use Only

पत्रांका:	पृष्ठांका:	विषया
८७७	२	श्वेतगुंजातंत्रप्रारंभः ।
८७८	१	तिलतंत्रप्रारंभः ।
,,	,,	सर्ववृक्षाणांमूलैतंत्रम् ।
,,	,,	श्वेतार्कमूलतंत्रम् ।
,,	,,	पुनर्नवामूलतंत्रम् ।
,,	,,	अपामार्गमूलतंत्रम् ।
,,	,,	गुंजामूलतंत्रम् ।
,,	२	श्वेतकरवीरमूलतंत्रम् ।
,,	,,	धत्तूरमूलतंत्रम् ।
,,	,,	अमृतामूलतंत्रम् ।
,,	,,	विष्णुक्रांतामूलतंत्रम् ।
,,	,,	सुदर्शनमूलतंत्रम् ।
,,	,,	बृहतीमूलतंत्रम् ।
,,	,,	सिद्धार्थमूलतंत्रम् ।
,,	,,	वटमूलतंत्रम् ।
,,	,,	औदुंबरमूलतंत्रम् ।
,,	,,	सहदेवीमूलतंत्रम् ।

पत्रांका:	पृष्ठांका:	विषया:
८७९	१	कौमारीमूलतंत्रम् ।
,,	,,	कदलीमूलतंत्रम् ।
,,	,,	तांबूलवल्लीजातिमूलतंत्रम् ।
,,	,,	आम्रमूलतंत्रम् ।
,,	,,	पालाशमूलतंत्रम् ।
,,	,,	एरंडमूलतंत्रम् ।
,,	,,	भृंगराजमूलतंत्रम् ।
,,	,,	बंधकचमत्कारतंत्रम् ।
,,	,,	बन्धकलक्षणम् ।
,,	,,	पिप्पलबन्धकतन्त्रम् ।
,,	,,	वटबन्धकतन्त्रम् ।
,,	,,	निंबबन्धकतन्त्रम् ।
,,	२	आंम्रबन्धकतन्त्रम् ।
,,	,,	जंबुबन्धकतन्त्रम् ।
,,	,,	शिरसबन्धकतन्त्रम् ।
,,	,,	बिल्वबन्धकतन्त्रम् ।

पत्रांका:	पृष्ठांका:	विषया:
,,	,,	बदरीबन्धकतंत्रम् ।
,,	,,	शालबंधकतंत्रम् ।
,,	,,	भल्लातकबंधकतंत्रम् ।
,,	,,	महाराष्ट्रभाषोक्तकचोराबन्धकतंत्रम् ।
,,	,,	महाराष्ट्रभाषोक्तधमोडाबंधकतंत्रम् ।
,,	,,	थो[illegible]रबंधकतंत्रम् ।
,,	,,	कपित्थबंधकतंत्रम् ।
,,	,,	कुशबंधकतंत्रम् ।
,,	,,	रोहितबंधकतंत्रम् ।
८८०	१	कार्पासबंधकतंत्रम् ।
,,	,,	मार्जारीनालतंत्रम् ।
,,	,,	बालकनालतंत्रम् ।
,,	,,	बालकदन्ततंत्रम् ।
,,	,,	श्यालनाभितंत्रम् ।
,,	२	वराटकीतंत्रम् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्तरखंडे इन्द्रजालकौतुकतंत्रे त्रयोदशस्तरंगः ।

पत्रांकाः	पृष्ठांकाः	विषयाः
८८१	१	सर्वोपरिमंत्रः
,,	,,	रक्षामंत्रः
,,	,,	इन्द्रजालकौतुककरणोपयोगी मंत्रः ।
,,	,,	दृष्टिस्तंभनम् ।
,,	,,	नानारूपधारणकौतुकम् ।
८८२	२	अन्यकौतुम् ।
८८४	१	जलकौतुकम् ।
८८५	१	वृक्षोत्पत्तिकौतुकम् ।
,,	२	अक्षरोत्पत्तिकौतुकम् ।
८८६	२	नानारंगकौतुकम् ।
८८७	१	मिष्टकौतुकम् ।
,,	,,	काचकुप्पीकौतुकम् ।
,,	२	बंदूककौतुकम्
८८८	१	युद्धकौतुकम् ।
,,	,,	चित्रकौतुकम् ।
८८९	१	जीवोत्पत्तिकौतुकम् ।
,,	,,	अंडकौतुम् ।
,,	,,	नृत्यकौतुकम् ।
,,	२	नानाकौतुकानि
,,	,,	बदामके भीतरकी गिरी फोडना ।
,,	,,	मट्टीका भैंसा बोले ।
,,	,,	पीरका हुक्का ।
,,	,,	चित्रकी पुतली हसै ।
,,	,,	हनुमानके पसेव आवै ।
८९०	१	हनुमानके मुखसे फूल झरे ।
,,	,,	नारियलमें बदाम छुहारा निकलै ।
,,	,,	छुहारेके भीतरसे लौंग इलायची निकालना ।
,,	,,	चासनी बिगडै ।
,,	,,	धान सीझै नहीं ।
,,	,,	मालीकी डालियोंमेंसे फूल फल बाहर निकल पडे ।
,,	,,	घरमें सर्प दीखैं ।
,,	२	बिना खूंटीकी खडाऊँपर चलना ।
,,	,,	तेलका घृत बनै ।
,,	,,	पैसेको रुपया बनाना ।
,,	,,	जीमता हसै ।
,,	,,	जीमतो वमन करै ।
,,	,,	ओष्ठ सफेद करना ।
,,	,,	धुवा निकलै ।
८९१	१	पक्षी पकडना ।
,,	,,	जल बंधै खुलै ।
,,	,,	निजरूप कुरूप दीखै ।
,,	,,	सभाके लोग दर्याकी सैर करते दीखें ।
,,	,,	अंगमें सुई छेदना ।

॥ समाप्तेयं मंत्रमहार्णवग्रंथस्यविषयानुक्रमणिका शिवचरणयोरर्पितास्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमिका।

इस परब्रह्म परमात्माको अनेक धन्यवाद हैं के जिस्की कृपासे हम सब कोई अपने कार्य्यको निर्विघ्नपूर्वक समाप्तकरनेमें समर्थ होतेहैं। इसके उपरांत हम अपने सहृदय पाठकोंको भी धन्यवाद दियेविना नहींरहेसक्ते कि जिनकी कृपाका अवलंबनही हमारे उत्साहको द्विगुणित करतारहा। तीसरे सर्वशक्तिमान् शिवजी महाराजको धन्यवाद देनाही योग्यहै क्योंके जिनकी कृपारूपी दृष्टिके कारण ही मंत्रशास्त्र रचागया। जिस मंत्रशास्त्रके प्रभावसेही प्राचीन मनुष्योंने देवतोंसे भी जय पाई। और देवतोंको वशीभूत करके उन देवतोंसे अपने किंकरवत् कार्य्य कराया करतेथे। इस मंत्रशास्त्रके द्वारा रावणादिक राक्षस श्रीरामचन्द्रादिकसे युद्धकरनेमें समर्थ हुये। जिस मंत्रशास्त्रके द्वारा सपूर्णोंकी दृष्टीके आगेसे अलोप होजाते थे। जिस मंत्रशास्त्रके द्वारा दूसरेके शरीरमें आप प्रवेश होसक्तेथे। जिस मंत्रशास्त्रके द्वारा नानाप्रकारके रूप धारण करलेतेथे। जिस मंत्रशास्त्रके द्वारा जलके भीतरही भीतर सहस्रोंयोजनतक जानेकी सामर्थ्य रखतेथे। जिस मंत्रशास्त्रके द्वारा आकाशमार्ग होकर देवलोकको जातेथे। जिस मंत्रशास्त्रके द्वारा भूत भविष्य वर्तमान तीनों कालकी वार्ताओंके जाननेमें समर्थ होतेथे। जिस मंत्रशास्त्रके द्वारा देवतोंकाभी आकर्षण करलेतेथे। जिस मंत्रशास्त्रके द्वारा अजीत शत्रुसे भी जय पातेथे। जिस मंत्रशास्त्रके द्वारा मनोवांछित पदार्थ अपने आपही मँगालेतेथे। जिस मंत्रशास्त्रके द्वारा अष्टसिद्धि नवनिधि सन्मुख हांथ बांधे खडीरहतीथीं। इस मंत्रशास्त्रके प्रभावकरकेही ब्राह्मणोंसे ती रघू इत्यादि राजा भैभित होतेथे। ऐसी अनेक सिद्धियां इच्छानुसार प्राप्तकरना यह

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंत्रशास्त्रहीका काम था। आज अत्यंत खेदका समय है के ऐसा अमूल्य रत्न मंत्रशास्त्र इच्छाके पूर्णकरनेवाला इस लोकसे लुप्त हुवाजाताहै। कारणके प्रथमतो आजकल ऐसे पदार्थोंका मिलनाहीं कठिनहै वह यदि किसीके पास यत्किंचितहै भी तो गोपनीयवचनोंके कारण किसीको दर्शनभी नहीं कराता यदि थोडा बहोत मिलता भी है तो अशुद्ध मिलताहै किसीका पूजन नहीं किसीकी पीठशक्तिका पता नही किसीमें आवरणका ठिकाना नही कहीं केवल मंत्रही मिलताहै आप कहाके ऐसे विधानोंसे सिद्धी किसप्रकार होसक्ती है इसीकारण अबके मनुष्योंके अनुष्ठान करनेपर सिद्धी नही प्राप्तहोनेके कारण मंत्रशास्त्रको झूठा मानने लगे हैं। ऐसा मानना विद्वज्जनोंकी भूलहै। कारण के प्रथम तो शिवजी महाराजके वाक्यको मिथ्या माननाही अज्ञानताका कारण होताहै। दूसरे कुछ दिनो पहेलेही मंत्रशास्त्रका चमत्कार आपलागोंके दृष्टिगोचर होताही था। इस्से मंत्रशास्त्रको मिथ्या किसप्रकार बनासक्ते हो। किंतु ठीकठीक विधानोंका न मिलना और मिलनेपर आप लोगोंके चित्तकी कातरताही सिद्धीके अवरोधका कारण होताहै मंत्रशास्त्रको मिथ्या बताना प्रत्यक्षमें भूलहै। आशाहै के आप लोग विश्वास रक्खोगे कि मंत्रशास्त्र झूठा नहींहै। किंतु इस्की क्रिया गुप्त होरहीथी और कुछ साधकको साहस कमहोनेके कारण मंत्रशास्त्रको झूठा मानना पडाथा। ऐसे ऐसे भ्रमोंको दूर करनेके निमित्तसेही मंत्रशास्त्रमें शिरोमणि इस मंत्रमहार्णवका जन्म हुवाहै। किंतु वैष्णव शैव और शाक्तोंके मनको प्रफुल्लितकरनेके निमित्तही अनेक प्राचीनमंत्रशास्त्रोंकी सहायतापूर्वक इसमंत्रमहार्णवको पंडित मंत्रशास्त्री माधौराय वैद्य प्रयागराजानिवासीने संग्राह कियाहै। इस्को अवलोकनकरनेसे इष्टदेवताको प्रसन्नकरनेके निमित्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्पूर्ण विधान आपलोगोंको एकही स्थानमें मिलजायगा। नतो सम्पूर्ण ग्रंथको उलटपुलट करना होगा नतो मूल श्लोकोंको लगाकर आधीबातें समझना पडेगा न मंत्रशास्त्रियोंके पछिपछि भटकना पडैगा मंत्रमहार्णवको हाथमें लेतेही आपको इष्टदेवताका मंत्रोद्धार, न्यास, ध्यान, पीठपूजा, पीठशक्ति, यंत्रोद्धार, देवासन, प्रतिष्टा, आवरणपूजा षोडशोपचारपूजा, स्तोत्रादि सम्पूर्ण पञ्चाङ्गही पद्धतीकीरीतिपर एकही स्थानमें मिलजावेंगे सिर्फ पत्रोंको हाथमेंलेकर कार्य्य स्वयं वा यजमानको कराते चले जावो क्रमपूर्वक मिलैगा प्रसंग कही खण्डित नहींहोगा जिस्के द्वारा आपके मंत्रकी सिद्धी होकर प्रयोगोंके करनेमें समर्थ होसक्तेहैं। इस मंत्रमहार्णवमें कोईभी मंत्र ऐसा आपको नहींमिलैगा जिस्का सम्पूर्ण विधान आपको उसी स्थानमें न मिलजावे किन्तु अवश्यही मिलैगा। और ऐसा कोई देवता, दैत्य, यक्ष, गंधर्व, किन्नर, योगिनी अप्सरा, देवकन्या, नागकन्या, राक्षस, प्रेतादिक नहीं होगा जिस्का पूर्णविधान आपको मंत्रमहार्णवमें नमिल जावे किंतु सभीमिलेंगे। और अलोपाञ्जन, निधि ग्रहणा ञ्जन, रसायनिकक्रिया, कल्पादिक, मशमेरेजम, स्वप्नसिद्धि, कर्णपिशाचिनी, पुत्रोत्पात्ति, मोहनादिषट् प्रयोग नाना चेटकादि अनेकप्रकारके आपको इस मंत्रमहार्णवमें मिलैंगे मंत्रमहार्णवमें एक विचित्रता यह है कि प्रत्येक देवताओं और प्रत्येक कार्योंके सिद्धीके पृथक्पृथक् अर्थ तरंग कियेगये हैं जिसमें किसी विषयके देखने वालोंको सम्पूर्ण ग्रंथ उलटपुलट न करनापडे. ऐसा कोईभी कार्य्य नहीं होगा जिसके सिद्धि करनेके निमित्त अनुष्टान आपको मंत्रमहार्णवमें न मिले नहीं संपूर्णही मिलैगा। जहांतक मेरी दृष्टीमें आया है सभी विषय एकत्रित कर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दियेगये हैं मेरी बुद्धीमें तो इस समय मंत्रशास्त्र जितने प्रचलित होरहे हैं सब मंत्रमहार्णवके उदरस्थ होगये हैं और जो बिलकुल लुप्त होगये हैं उनके उद्धार करनेमें पुस्तकोंके न मिलनेके कारण मैं समर्थ नहीं हुवा कृपापूर्वक इतनेहीमें संतोप करें औरभी मंत्रमहार्णवमें ऐसी सुगम रीतियां दीगई हैं कि बड़े २ विद्वज्जनोंके समान न्यून विद्यावालेभी सुगमतापूर्वक विचारांश करके अनुष्ठानोंके द्वारा अपने कार्योंकी सिद्धी करनेमें समर्थ होवें हैं और कहते हैं कि आप लोग मन्त्रशास्त्रसे क्यों अश्रद्धा होते हैं आनंदपूर्वक रीत्यानुसार अनुष्ठान करें कृतकार्य्य होवोगे ब्राह्मण तो पूर्वकालमें मंत्रशास्त्रकीही सिद्धिके कारण महत्वको प्राप्तथे उसको आपलोग क्यों नहीं अंगीकार करते जिसमें नाना क्लेशोंसे मुक्त होकर अंतकालमें देवलोक प्राप्ति होवै. विशेष लिखना वृथा है एक वार मंत्रमहार्णवको अवलोकन करनेसे स्वयंही ग्रंथका गुणदोष प्रगट होजावैगा यदि आप लोग अपनी दयालुताके कारण मंत्रमहार्णवको अपने कोमल हृदयरूपी मानससरमें हंसवत् इस ग्रंथको स्थान देंगे तो थोडेही दिनोंमें औरभी कई विषयोंके ग्रंथ संग्रह करके आप लोगोंकी भेट करूंगा इस मेरे संगृहीत मंत्रमहार्णव ग्रंथके मुद्रणादि अधिकार मैंने मुंबईके "श्रीवेङ्कटेश्वर" स्टीम् प्रेसके मालिक शेठ खेमराज श्रीकृष्णदासजीको दियेहैं इसमेंसे किसी भागको छापनेका किसीनेभी साहस नहीं करना ।

इत्यलं बहुनोल्लिखितेन–विदुषां कृपाभिलाषिवरः ।

ग्रंथसंग्रहीता--

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥ ॥ ॐ सरस्वत्यै नमः ॥ ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ ॥ गणपतिं प्रणमामि सुसिद्धिदं हरसुतं कुचुमध्य
मुखं विभुम् । गिरिसुतां गणराजसुवंदितां शिवमिहेप्सितदं शिवदं नृणाम् ॥ १ ॥श्रीसूर्यप्रभृतीन्सुरांश्च सततं ये साक्षिणः कर्मणां राधा
कृष्णपदारविन्दयुगलं ध्येयं सदा योगिभिः ॥ सावित्र्य सुविभूषितं सुरवरं ब्रह्माणमीडेऽत्र ते ग्रंथे मंत्रमहार्णवे प्रतिदिनं कुर्वन्तु सन्मंगलम्
॥ २ ॥ दृष्ट्वा तंत्राण्यनेकानि माधवाख्येन धीमता ॥ वक्ष्यते कलिसिद्धोयं ग्रंथो मंत्रमहार्णवः ॥ ३ ॥ सर्वतंत्रैकमुकुटं सर्वसारमयं
ध्रुवम्॥वक्ष्यामि परमप्रीत्या रहस्यं सर्वमंत्रिणाम् ॥ ४ ॥ नामूलं लिख्यते किंचिदिह विज्ञेयमादरात् ॥ नैवात्र संशयः कार्यो नानाभेद
विधानके ॥ ५ ॥ तंत्रांतरेष्वनेकानि विधानानि मुनीश्वरैः ॥ उक्तान्यनेकदेवानां प्रसिद्धानि च संति वै ॥ ६ ॥देशदेशाच्च तेषां वै
संग्रहः क्रियते मया ॥ साधकानां हितार्थाय श्रीदुर्गायाः प्रसादतः ॥७ त्रीणि खण्डानि ग्रंथेस्मिन्पूर्वं मध्यं तथोत्तरम् ॥ पुंदेवानां पूर्वखण्डे
स्त्रीदेवीनां च मध्यमे॥यक्षिणीप्रभृतीनां तु तथैवोत्तरखण्डके॥८॥ अनुष्ठानं मया प्रोक्तं तरंगैस्तु पृथक्पृथक्॥९॥ संगृहीतमिमं ग्रन्थं मया
च लघुबुद्धिना॥अंगीकुर्वंतु शास्त्रज्ञा दयां कृत्वा ममोपरि॥१०॥यदि दोषो भवेत्कुत्रचिन्मदज्ञानकारणात्॥प्रार्थये सुजनास्तद्वै क्षमध्वं मे
ऽपराधकम् ॥ ११ ॥ यदत्र वाक्यमधिकं न्यूनं यत्र च कुत्रचित ॥ रोषमुत्सृज्य तत्सर्वं निर्दोषं कुरुत द्विजाः ॥१२ ॥ (तत्रादौ तंत्र-
संज्ञाः) सिद्धीश्वरं महातंत्रं कालीतंत्रं कुलार्णवम् ॥ ज्ञानार्णवं नीलतंत्रं फेत्कारीतंत्रमुत्तमम् ॥ १३ ॥ देव्यागमं चोत्तराख्यं श्रीक्रमं
सिद्धियामलम् ॥ मत्स्यसूक्तं सिद्धिसारं सिद्धिसारस्वतं तथा ॥ १४ ॥ वाराहीतंत्रं देवेशि योगिनीतंत्रमुत्तमम् ॥ गणेशमर्षिणीतंत्रं
नित्यतंत्रं शिवागमम् ॥ १५ ॥ चामुंडाख्यं महेशानि मुंडमालाख्यतंत्रकम् ॥ हंसमाहेश्वरं तंत्रं निरुत्तरमनुत्तमम् ॥ १६ ॥ कुलप्रकाशकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवि कल्पं गांधर्वकं शिवे ॥ क्रियासारं निबंधाख्यं स्वतंत्रं तंत्रमुत्तमम् ॥१७॥ सम्मोहनं तंत्रराजं ललिताख्यं तथा शिवे ॥ राधाख्यं मालिनीतंत्रं रुद्रयामलमुत्तमम् ॥ १८ ॥ बृहच्च श्रीक्रमं तंत्रं गवाक्षं कुसुमादिनि ॥ विशुद्धेश्वरतंत्रं च मलिनीविजयं तथा ॥ १९ ॥ समयाचारतंत्रं च भैरवीतंत्रमुत्तमम् ॥ योगिनीहृदयं तंत्रं भैरवं परमेश्वरि ॥२०॥ सनत्कुमारकं तंत्रं योनितंत्रं प्रकीर्तितम् ॥ तंत्रांतरं च देवेशि नवरत्नेश्वरं तथा ॥२१॥ कुलचूडामणिं तंत्रं भावचूडामणीयकम् ॥ तंत्रदेवप्रकाशं च कामाख्यानामकं तथा ॥२२ ॥ कामधेनुं कुमारीं च भूतडामरसंज्ञकम् ॥ नलिनीविजयं तंत्रं यामलं ब्रह्मयामलम् ॥ २३ ॥ विश्वसारं महातंत्रं महाकुलकुलांतनम् ॥ कुलोड्डीशं कुब्जकाख्यं यंत्रचिंतामणीयकम् ॥ २४ ॥ एतानि तंत्ररत्नानि सफलानि युगेयुगे ॥ कालीविलासकादीनि तंत्राणि परमेश्वरि ॥ २५ ॥ कलिकाले प्रसिद्धानि अश्वाकांतासु भूमिषु ॥ महानीचानि तंत्राणि अविकल्पे महेश्वरि ॥ २६ ॥ अथ साध्यजन्मनक्षत्रवृक्षा यथा (शारदातिलके) कारस्करोथ धात्री स्यादुदुंबरतरुः पुनः ॥ जंबूः खदिरकृष्णाख्यौ वंशपिप्पलसंज्ञकौ ॥ २७ ॥ नागरोहिणीनामानौ पलाशप्लक्षसंज्ञकौ ॥ अंबष्ठबिल्वार्जुनाख्यविकंकतमहीरुहाः ॥२८ ॥ बकुलः सरलः सर्ज्जो वंजुलः पनसार्ककौ ॥ शमीकदंम्बनिंबाम्रमधूका वृक्षशाखिनः ॥ २९ ॥ इत्यश्विन्यादिक्रमेण योजयेत् ॥ अथ युगभेदेन देवताभेदः । (पूजास्कंधे) ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ॥ द्वापरे भगवान् विष्णुः कलौ देवो महेश्वरः ॥ ३० ॥ अथ पुरश्चरणकरणार्थमादाववश्यकज्ञातव्यपदार्थानाह (कुलार्णवे) विधिं मंत्रं च करणी योनिमार्यं च पक्षजम् ॥ दीपार्थं कूर्मचक्राणि ज्ञात्वा कर्माणि साधयेत् ॥ ३१ ॥ ऋषिच्छंदोदेवतांगन्यासध्यानार्चनादिकम् ॥ बीजशक्ती कालवेधौ ज्ञात्वा मंत्राणि साधयेत् ॥ ३२ ॥ पंचशुद्धासनं प्राणायामा न्यासाक्षिमा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिका ॥ दोषसंस्कारशुद्धादीन् ज्ञात्वा कर्माणि साधयेत् ॥ ३३ ॥ साध्यसाधककर्माणि लेखन्या द्रव्यपंचकम् ॥ स्थानं यंत्रप्रमाणं च ज्ञात्वा कर्माणि साधयेत् ॥ ३४ ॥ अथवासनादिदिग्वर्णनाडीतत्त्वानुसंगतिम् ॥ देवताकालमंत्रां च ज्ञात्वा कर्माणि साधयेत् ॥ ३५ ॥ उत्पत्तिरसनावर्णान्मूर्तिसंस्कारसंस्थितिम् ॥ कुंडद्रव्यप्रामाणदीन् ज्ञात्वा होमं समाचरेत् ॥ ३६ ॥ अग्निप्रभांधूम्रवर्णं ध्यानगंधशिखाकृतीः ॥ दूतचेष्टादिकं ज्ञात्वा कल्पयेत्तु शुभाशुभम् ॥ ३७ ॥ मंत्रतत्त्वानुसंधानं देहावेशादिलक्षणम् ॥ मंत्रोच्चारणभेदं च ज्ञात्वा कर्माणि साधयेत् ॥ ३८ ॥ मंडलं कलशं दिव्यं शुद्धगंधाष्टकादिकम् दीक्षां वामप्रदायीं च ज्ञात्वा दीक्षां समाचरेत् ॥ ३९ ॥ नित्यं नैमित्तिकं काम्यं नियमं नाम वासनाम् ॥ पूजाधारणयंत्राणि ज्ञात्वा कर्माणि साधयेत् ॥ ४० ॥ पूजागृहप्रवेशादि कुलपूजनलक्षणम् ॥ कुलद्रव्यादिशुद्धिं च ज्ञात्वा पूजां समाचरेत् ॥ ४१ ॥ अथ गुरुशिष्यपरीक्षणम् ॥ ज्ञानेन क्रियया वापि गुरुः शिष्यं परीक्षयेत् ॥ संवत्सरं तदर्द्धं वा तदर्द्धं वा प्रयत्नतः ॥ ४२ ॥ शिष्योपि लक्षणैरेतैः कुर्याद्गुरुपरीक्षणम् ॥ आनंदाद्यैर्जपैस्तोत्रैर्ध्यानहोमार्चनादिषु ॥ ४३ ॥ ज्ञानोपदेशसामर्थ्यं मंत्रशुद्धमपीश्वरम् ॥ बोधकत्वं च विज्ञाय शिष्योभूयान्न चान्यथा ॥ ४४ ॥ (कुलार्णवतंत्रे) श्रीगुरुः परमेशानि शुद्धवेषो मनोहरः ॥ सर्वलक्षणसंपन्नः सर्वावयवशोभितः ॥ ४५ ॥ अग्रगण्यो गर्भारिश्च पात्रापात्रविशेषवित् ॥ शिवविष्णुसमः साधुर्न च दर्शनदूषकः ॥ ४६ ॥ नित्यनैमित्तिके काम्ये रतः कर्मण्यनिन्दिते ॥ यदृच्छालाभसंतुष्टो गुणदोषविभेदकः ॥ इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये ॥ ४७ ॥ अथ गुरुमाहात्म्यम् ॥ अत्रिनेत्रः शिवः साक्षादचतुर्बाहुरच्युतः ॥ अचतुर्वदनो ब्रह्मा श्रीगुरुः कथितः प्रिये ॥ ४८ ॥ अथ त्याज्यगुरुः ॥ निन्दितस्तु पितुर्मंत्र-

For Private And Personal Use Only

स्तथा मातामहस्य च ॥ सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥ ४९ ॥ शूद्राणां च तथा स्त्रीणां गुरुत्वं न कदाचन ॥
योग्यमार्यं गुरुं त्यक्त्वा शिष्यः शूद्रं क्रियाविदम् ॥ गुरुं समाश्रयेदन्यं यः प्रयाति स दुर्गतिम् ॥ ५० ॥ अथ त्याज्यशिष्यः ॥
न देयमर्थलुब्धाय पिशुनायास्थिराय च ॥ भक्तिश्रद्धाविहीनाय शुश्रूषाविमुखाय च ॥ ५१ ॥ दीक्षा मुहूर्तनिर्णयः ॥ वैशाखे
श्रावणे वापि आश्विने कार्तिकेथ वा ॥ फाल्गुने मार्गशीर्षे वा कुर्यान्मंत्रस्य दीक्षणम् ॥ ५२ ॥ (सिद्धांतशेखरे) ॥
शरत्काले च मंत्रस्य दीक्षा श्रेष्ठफलप्रदा ॥ फाल्गुने मार्गशीर्षे च ज्येष्ठे दीक्षा तु मध्यमा ॥ ५३ ॥ आषाढे श्रावणे माघे कनिष्ठा
सद्भिरादृता ॥ निन्दितश्चाश्विमासस्तु पौषो भाद्रपदस्तथा ॥ ५४ ॥ मुक्तिकामैः कृष्णपक्षे भूतिकामैः सिते सदा ॥ पूर्णिमा पंचमी
चैव द्वितीया सप्तमी तथा ॥ ५५ ॥ त्रयोदशी च दशमी प्रशस्ताः सर्वकामदाः ॥ रवौ गुरौ विधौ दीक्षा कर्तव्या बुधशुक्रयोः ॥ ५६ ॥
अश्विनीरोहिणीस्वातीविशाखाहस्तभेषु च ॥ ज्येष्ठोत्तरात्रये चैव कुर्यान्मंत्राभिषेचनम् ॥ ५७ ॥ श्रवणार्द्राधनिष्ठा च पुष्यः
शतभिषा तथा ॥ दीक्षानक्षत्रजातानीत्याहुस्तंत्रार्थकोविदाः ॥ ५८ ॥ मेषकर्कटकन्यासु तुलायां वृश्चिके तथा ॥ मकरे कुम्भके
चैव दीक्षा सर्वशुभावहा ॥ ५९ ॥ षष्ठी भाद्रपदे मास्याश्विने कृष्णा त्रयोदशी ॥ कार्तिके नवमी शुक्ला श्रावणे कृष्णपंचमी ॥
॥ ६० ॥ एतानि देवपर्वाणि तीर्थकोटिफलानि च ॥ निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा ॥ ६१ ॥ ॥ २ ॥
न मासतिथिवारादिशोधनं सूर्यपर्वणि ॥ सिद्धिर्भवति मंत्रस्य विनाभ्यासेन वेगतः ॥ ६२ ॥ (रुद्रयामले) सतीर्थेर्कविधुग्रासे
महापर्वणि चैव हि ॥ मंत्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥ ६३ ॥संहितायाम्) विषुवेप्ययनद्वंद्वे संक्रांत्यां दमनोत्सवे ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीक्षा कार्यान्यकालेपि पवित्रे गुरुपर्वणि ॥ ६४ ॥ (शैवागमे च) ॥ सतीर्थेऽर्कविधुग्रासे पुण्यारण्ये वनेषु च ॥ पुण्यक्षेत्रे कुरुक्षेत्रे देवीपीठे चतुष्टये ॥ प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत् ॥ ६५ ॥ (उपदेशसुधातंत्रे) ॥ चंद्रसूर्यग्रहे चैव सिद्धक्षेत्रे शिवालये ॥ मंत्रमात्रप्रकथनमुपदेशः स उच्यते ॥ ६६ ॥ (सारसंहिता याम्) तिथिं विनापि दीक्षायां विशिष्टं वासरं शृणु ॥ दुर्लभे सद्गुरूणां च सकृत्संग उपस्थिते ॥ ६७ ॥ तदनुज्ञा यदा लब्धा स दीक्षावसरो महान् ॥ ग्रामे वा यदि वारण्ये क्षेत्रे वा यदि वा निशि ॥ आगच्छति गुरुर्देवो यदा दीक्षा तदा भवेत ॥ ६८ ॥ (तत्त्वसारे) यदेवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः ॥ न तिथिर्न व्रतो होमो न स्नानं न जपक्रिया ॥ दीक्षायाः कारणं किं तु स्वेच्छा वाज्ञा गुरोरिह ॥ ६९ ॥ (वैशंपायनसंहितायाम्) ॥ संध्यागर्जित निर्घोषभूकंपोल्कानिपातनम् ॥ एतानन्यांश्च दिवसान् स्मृत्युक्तांश्च परित्यजेत् ॥ ७० ॥ (नारदीये) आचार्यादनभिप्राप्त मंत्रश्चादत्तदक्षिणः ॥ अभ्यस्तोपि सदा मंत्रः श्रेयसे नावकल्पते ॥ ७१ ॥ अथानुष्ठानारंभे मुहूर्तनिर्णयः ॥ (रुद्रयामले) कार्तिकाश्विवैशाखमाघेथ मार्गशीर्षके ॥ फाल्गुने श्रावणे मंत्रपुरश्चर्या प्रशस्यते ॥ ७२ ॥ (वैशंपायनसंहितायाम्) ॥ मंत्रस्यारंभणं मेषे धनधान्यप्रदं भवेत् ॥ वृषे मरणमाप्नोति मिथुनेऽपत्यनाशनम् ॥ ७३ ॥ कर्कटे सर्व्वसिद्धिः स्यात् सिंहे मेधाविनाशनम् ॥ कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्वसिद्धयः ॥ ७४ ॥ वृश्चिके स्वर्णलाभः स्याद्धनुर्मानविनाशनम् ॥ मकरः पुण्यदः प्रोक्तः कुंभो धनसमृद्धिदः ॥ मीनो दुःखप्रदो नित्यं मेवं मासविधिक्रमः ॥ ७५ ॥ (तंत्रसारे) चन्द्रतारानुकूले च शुक्लपक्षे शुभे दिने ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आरंभे तु पुरश्चर्य्यां हरौ सुप्ते न चाचरेत् ॥ ७६ ॥ (स्मृतितत्त्वे) पूर्णिमा पंचमी चैव द्वितीया सप्तमी तथा ॥ त्रयोदशी च दशमी प्रशस्ता सर्वकामदा ॥ या तिथिर्यस्य देवस्य तस्यां वा शुभदः स्मृतः ॥ ७७॥(पुरश्चरणदीपिकायाम्)मंत्रारंभो रवौ शुक्रे बुधे जीवे विशेषतः ॥ शनौ मृत्युः क्षयो भौमे सोमे मध्यफलं स्मृतम् ॥ ७८ ॥(मुहूर्तगणपतौ)पुनर्वसुद्वये हस्ते त्र्युत्तरे श्रवणत्रये ॥ रेवतीद्वितये हस्तेऽनुराधारोहिणीद्वये ॥ शांतिकं पौष्टिकं कर्म्म पुण्याहे कीर्तितं बुधैः ॥ ७९ ॥ (पुरश्चरणदीपिकायाम्) अश्विनीरोहिणी स्वातीविशाखाहस्तभेषु च ॥ ज्येष्ठोत्तरात्रयेष्वेव कुर्यान्मंत्राभिषेचनम् ॥ ८०॥ (शब्दकल्पद्रुमे) आर्द्रायां कृत्तिकायां च मंत्रारंभः प्रशस्यते ॥ यदीशस्य कृशानोर्वा मंत्रारंभं यथाक्रमम् ॥ ८१ ॥ स्थिरलग्नं विष्णुमंत्रे शिवमंत्रे चरं ध्रुवम् ॥ द्विस्वभावगतं लग्नं शक्तिमंत्रे प्रशस्यते ॥८२॥ अथ भक्ष्याभक्ष्यनिर्णयः ॥(शारदातिलके)भक्ष्यं हविष्यं शाकानि विहितानि फलं पयः॥मूलं सक्तुर्यवोत्पन्नो भक्ष्याण्येतानि मंत्रिणाम् ॥८३॥(पुरश्चरणदीपिकायाम्)चरुमूलफलक्षीरदधिभिक्षान्नसक्तवः ॥ शाकाश्चाष्टविधं चान्नं साधकस्योच्यते बुधैः ॥ ८४ ॥ (नारदीये) पयोव्रतस्य सिद्धिः स्याल्लक्षेणैव न संशयः ॥ शाकभक्ष्यहविष्याशी कलौ लक्षत्रयं जपेत् ॥ ॥८५॥(देवीभागवते) भिक्षान्नं शुद्धमानीय कृत्वा भागचतुष्टयम् ॥ एके भागो द्विजे भक्तो गोग्रासे च द्वितीयकः॥८६ ॥ अतिथिभ्यस्तृतीयस्तु तदूर्ध्वं शिशुभार्ययोः ॥ आश्रमस्य यथा यस्य कृत्वा ग्रासविधिं क्रमात् ॥८७॥तदूर्ध्वं संख्यया स्याद्वा वानप्रस्थगृहस्थयोः कुक्कुटांडप्रमाणं तु ग्रासमानं विधीयते॥८८॥अष्टौ ग्रासान्गृहस्थश्च वानप्रस्थस्तदर्धकम्॥ ब्रह्मचारी यथेष्टं च गोमूत्रविधिपूर्वकम्॥८९॥ ब्रह्मपात्रे तु भुंजीत मध्यपत्रविवर्जिते ॥ दक्षं ब्रह्मोतरं विष्णुर्मध्यपत्रं महेश्वरः ॥अन्यथा भोजनादोषात् सिद्धिहानिः प्रजायते ॥९०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ जपस्थाननिर्णयः ॥(पुरश्चरणचंद्रिकायाम्) पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम् ॥ तीर्थप्रदेशाः सिंधूनां संगमः पावनं वनम् ॥९१॥उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः॥ देवतायतनं कूलं समुद्रस्य निजं गृहम्॥साधनेषु प्रशस्यंते स्थानान्येतानि मंत्रिणाम् ॥ ९२ ॥ (नारदीये) शिवस्य सन्निधाने च सूर्याग्न्योर्वा गुरोरपि ॥ दीपस्य ज्वलितस्यापि जपकर्म प्रशस्यते ॥९३॥ अटिवीः पर्वते पुण्ये नदीतीराणि यानि च ॥ (तंत्रांतरेपि) अश्वत्थामलकीमूलं गोशाला जलमध्यतः ॥ ९४॥(रुद्रयामले) म्लेच्छदुष्टमृगव्यालशंकातंकादिवर्जिते ॥ कांते च पावने निंदारहिते भक्तिसंयुते ॥ ९५ ॥(समयाचारतंत्रे)शृणु देवि विशेषेण उत्तराम्नाय, हेतवे ॥ वेश्यागृहे श्मशाने वा गत्वा मैथुनमाचरेत् ॥ ९६ ॥ ततो जपादिकं देवि कृत्वाशु लभते फलम् ॥ अथवा स्वगृहे रात्रौ भक्तिमान् यः समाचरेत् ॥ स प्राप्नोति फलं सर्वं चिंताभयविवर्जितः ॥ ९७ ॥ (ज्ञानार्णवेपि) यत्र वा कुत्रचिद्भागे लिंगं यत्पश्चिमामुखम् ॥ स्वयंभूर्बाणलिंगं वा वृषशून्यं जलास्थितम् ॥९८॥ (फेत्कारिणीतंत्रे) एकलिंगे श्मशाने वा शून्यागारे चतुष्पथे॥ तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम्॥ ९९ ॥ (महाकपिलपंचरात्रे) कुटीविरक्तमित्येते देशाः स्युर्मंत्रसिद्धिदाः॥ एकांते मठिकामध्ये स्थातव्यं हठयोगिना ॥१००॥ (स्थानभेदेन जपमाहात्म्य) गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत्॥कोटिर्देवालये पुण्यमनंतं शिवसन्निधौ ॥ १०१ ॥ (शिववचनात्) गृहे जपं समं विंद्याद्गोष्ठे शतगुणं भवेत ॥ नद्यां शतसहस्रं स्यादनंतं शिव सन्निधौ ॥ १०२ ॥ समुद्रतीरे च ह्रदे गिरौ देवालयेषु च पुण्याश्रमेषु सर्वेषु जपः कोटिगुणो भवेत् ॥ १०३ ॥ (स्थानभेदेन कालभेदः) वटेरण्ये श्मशाने च शून्यागारे चतुष्पथे ॥ अर्धरात्रेपिमध्याह्ने पुरश्चरणमारभेत् ॥ १०४ ॥ (स्थानलक्षणम्) ग्रामा

For Private And Personal Use Only

त्को शमितं स्थानं नद्यादौ स्वेच्छया मितम् ॥ नगरादावथ क्रोशं क्रोशयुग्ममथापि वा आहारादिविहारार्थं तावतीं भूमिमाक्रमेत्॥
(एकलिंगलक्षणं फेत्कारिणीतंत्रे) पंचक्रोशांतरे यत्र न लिंगान्तरमीक्ष्यते तदेकलिंगमाख्यातं तत्र सिद्धिरनुत्तमा ॥ १०५ ॥
(श्मशानलक्षणं फेत्कारिणीतंत्रे)दह्यंते व्यसवो यत्र शवकीलकसंकुले ॥ गृध्रगोमायुकाकाद्यैर्मांसलुब्धैर्यदावृतम् ॥ तच्छ्मशानमिति
ख्यातंपिशाचगणसेवितम् ॥ १०६ ॥ (चितालक्षणम्) असंस्कृता चिता ग्राह्या न तु संस्कारसंयुता ॥ चांडालादिषु संप्राप्ता
केवलं शीघ्रसिद्धिदा ॥ १०७ ॥ (अत्राधिकारिणः) महाबलो महाबुद्धिर्महासाहसिकः शुचिः ॥ महास्वच्छो दयावांश्च सर्व
भूतहिते रतः ॥ १०८ ॥ (शून्यागारलक्षणं त्रिशक्तिरत्ने) काकादिनीडसंयुक्तं क्रिमिच्छत्रादिसंयुतम् ॥ नागरैर्दूरनिर्मुक्तं साध्व
सोद्भवकारणम् ॥सौधं संवृद्धघासौघं शून्यागारं तदुच्यते ॥ १०९ ॥ (चतुष्पथलक्षणं फेत्कारिणीतंत्रे) चतुर्णां च पथां यत्र संपा
तो युगपद्भवेत ॥ तच्चतुष्पथमित्युक्तं रजन्यामिष्टदायकम् ॥ ११० ॥ (मठलक्षणं कुलार्णवे) अल्पद्वारमरंध्रगर्तविवरं नात्युच्चनीचा
यतं सम्यग्गोमयसांद्रलिप्तममलं निःशेषजंतूज्झितम् ॥ बाह्ये मंडपवेदिकूपरुचिरं प्राकारसंवेष्टितं प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्ह
ठाभ्यासिभिः॥१११॥(अथ दिग्निर्णयः)उपविश्यासने मंत्री प्राङ्मुखो वा युदङ्मुखः॥रात्रावुदङ्मुखैःकार्यं देवकार्यं सदैवहि॥११२॥
(महाभारते उद्योगपर्वणि) सुपर्ण उवाच ॥ अनुशिष्टोस्मि देवेन गालवायातियोगिना ॥ ब्रूहि कामं तु कां यामि द्रष्टुं प्रथमतो दिशम्
॥ ११३ ॥ पूर्वां वा दक्षिणां वाहमथवा पश्चिमां दिशम्॥उत्तरां वा द्विजश्रेष्ठ कुतो गच्छामि गालव ॥ ११४ ॥ गालव उवाच ॥
यस्यामुदयते पूर्वं सर्वलोकप्रभावनः॥ सविता यत्र संध्याभ्यां साध्यानां वर्तते तु यः॥ब्रतद्वारं द्विजश्रेष्ठ दिवसस्य तथाध्वनः॥११५॥(शिव

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूजनदिग्विभागः शिवरहस्ये)उत्तराभिमुखैः कार्यं श्रीमहादेवपूजनम्॥प्राङ्मुखेनाथ वा कार्यं श्रीमहादेवपूजनम्॥पश्चिमाभिमुखैर्वापि कर्तव्यं शिवपूजनम्॥दक्षिणाभिमुखैर्मर्त्यैर्न कर्तव्यं शिवार्चनम्॥ ११६॥(ताराकाल्युपासनायां दिग्विभागः फेत्कारिण्याम्)प्राङ्मुखोदङ्मुखो वापि वक्ष्यमाणक्रमेण तु ॥ श्रीकामः शान्तिकामो वा पश्चिमाभिमुखः स्थितः॥११७॥ (कालिकापुराणे) दिग्विभागेषु कौबेरी दिक् शिवाप्रीतिदायिनी ॥ तस्मात्तन्मुख आसीनः पूजयेचंडिकां सदा ॥ ११८ ॥ (अथ स्नाननिर्णयः) स्नानं त्रिषवणं प्रोक्तमशक्तौ द्विः सकृत्तथा ॥ अस्नातस्य फलं नास्ति न च पितॄनतर्पतः ॥ ११९ ॥ (अथ तिलकनिर्णयः) केशवाद्यभिधानैस्तु स्थानेषु द्वादशस्वपि ॥ ललाटोदरहृत्कंठदक्षपार्श्वांसकं ततः ॥ १२० ॥ वामपार्श्वांसकर्णे च पृष्ठदेशे ककुद्यपि ॥ ललाटे तु गदां कुर्य्याद्धृदये नंदकं पुनः ॥ १२१ ॥ शंखं चक्रं भुजद्वंद्वे शार्ङ्गं बाणं च मूर्द्धनि ॥ इत्थं तु वैष्णवः कुर्याच्छैवः कुर्यात्रिपुंड्रकम् ॥ १२२ ॥ अग्निहोत्रोत्थितं भस्मादायाग्निरिति मंत्रतः ॥ अभिमंत्र्य त्र्यंबकेन कुर्य्यात्पंच त्रिपुंड्रकम् ॥ १२३ ॥ (अथ आसननिर्णयः ॥ (मंत्रमहोदधौ) जपोन्निधाय दर्भाश्विन्कुशचर्मोवरासने ॥ काष्ठपल्लववंशाश्मगोशकृत्तृणमृन्मयम् ॥ विषयं कठिनं मंत्री त्यजेदासनमाधिदम् ॥ १२४ ॥ (तंत्रांतरे) वंशासने दारिद्रत्वं पाषणे व्याधिसंभवः ॥ धरण्यां दुःखसंभूतिर्दौर्भाग्यं दारुकासने ॥ १२५ ॥ तूलकम्बलवस्त्राणि पट्टव्याघ्रमृगाजिनम् ॥ कल्पयेदासनं धीमान्सौभाग्यं ज्ञानसिद्धिदम् ॥ १२६ ॥ तृणासने यशोहानिः पल्लवे चित्तविभ्रमः ॥ कृष्णासने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि ॥ १२७ ॥ स्यात्पौष्टिकं च कौशेयं शांतिकं वेत्रविष्टरम् ॥ वंशासने व्याधिनाशो कम्बले दुःखमोचनम् ॥ १२८ ॥ स्यादाभिचारिकं नीले रक्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 वश्यादिकं भवेत् ॥ धवले शांतिकं मोक्षः सर्वार्थश्चित्रकम्बल ॥ सर्वाभावे त्वासनार्थं कुशविष्टरमिष्यते ॥ १२९ ॥ (हंसमाहेश्वरे)
लोम्नि चैव यदासीनस्तदा सर्वं विनश्यति ॥ लोमस्पर्शनमात्रेण सिद्धिहानिः प्रजायते ॥ कुशासने मंत्रसिद्धिर्नात्र कार्या विचारणा ॥ १३० ॥ जानूर्वोरंतरे कृत्वा सम्यक्पादतले उभे ॥ ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते ॥ ऊर्वोरुपरि विन्यस्य सम्यक्पादतले उभे ॥ अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः ॥ १३१ ॥ पद्मासनमिति प्रोक्तं योगिनां हृदयंगमम् ॥ एकं पादमधः कृत्वा विन्यस्योरौ तथोत्तरम् ॥ ऋजुकायो विशेद्योगी वीरासनमितीरितम् ॥ १३२ ॥ (अथ मालानिर्णयः) अरिष्टपुत्रजीवैश्च शंखपद्मैर्मणिस्तथा ॥ कुशग्रंथिश्च रुद्राक्षा उत्तमं चोत्तरोत्तरम् ॥ १३३ ॥ (मंत्रखंडे) स्फाटिकी मौक्तिकी वापि प्रोतव्या सितसूत्रकैः ॥ सर्वकर्मसमृद्ध्यर्थं जपेद्रुद्राक्षमालया ॥ १३४ ॥ वैष्णवे तुलसीमाला गजदंतैर्गणेश्वरे ॥ त्रिपुराया जपे शस्ता रुद्राक्षै रक्तचन्दनैः ॥ १३५ ॥ (मंत्रखंडे) रेखयाष्टगुणं विंद्यात् पुत्रजीवैर्दश स्मृतम् ॥ शतं चन्दनशंखैश्च प्रवालैस्तु सहस्रकम् ॥ १३६ ॥ स्फाटिकैर्लक्षसाहस्रं मौक्तिकैर्लक्षमेव च ॥ दशलक्षं राजताक्षैः सौवर्णैः कोटिरुच्यते ॥ १३७ ॥ कुशग्रन्थ्या च रुद्राक्षैरनन्तगुणितं भवेत् ॥ अष्टोत्तरशतैर्माला पञ्चाशच्चतुराधिकैः ॥ १३८ ॥ सप्तविंशतिभिः कार्या एकग्रीवा समेरुका ॥ मुखं मुखेन संयोज्य पुच्छं पुच्छेन योजयेत् ॥ १३९ ॥ प्रोतव्या सितसूत्रेण सत्कर्मफलसिद्धये ॥ पट्टसूत्रकृता माला देव्याः प्रीतिकरा मता ॥ १४० ॥ कार्ष्यैर्वैष्णवी माला पद्मसूत्रैरथापि वा ॥ ऊर्णाभिर्वल्कलैर्वापि शैवी माला प्रकीर्तिता ॥ १४१ ॥ कार्पाससूत्रैरन्येषां विदध्याज्जपमालिकाम् ॥ त्रिंशद्भिः स्याद्धनं पुष्टिः सप्तविंशतिभिर्भवेत् ॥ १४२ ॥ पंचविंशतिभिर्मोक्षः पंच स्यादभिचारणे ॥ पंचाशद्भिः कुलेशानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वसिद्धिरुदीरिता ॥ १४३ ॥ जप्त्वाक्षमालां सकलां भ्रामयेदाशिखामणेः ॥ प्रदक्षिणा पुनर्वक्रमारभ्यैवं समाचरेत् ॥ १४४ ॥ स्वयं वामेन हस्तेन जपमालां न संस्पृशेत् ॥ अदीक्षितो द्विजो वापि स्पृशेच्चेच्छुद्धिमाचरेत् ॥ १४५ ॥ न धारयेत्करे मूर्ध्नि कंठे च जपमालिकाम् ॥ जपकाले जपं कृत्वा सदा शुद्धस्थले क्षिपेत ॥ १४६ ॥ गुरुं प्रकाशयेद्धीमान्मंत्रं नैव प्रकाशयेत् ॥ अक्षमालां च मुद्रां च गुरोरपि न दर्शयेत् ॥ १४७ ॥ कम्पनात्सिद्धिहानिस्स्याद्धननं बहुदुःखकृत् ॥ शब्दे जाते भवेद्रोगी करभ्रष्टा विनाशकृत् ॥ १४८ ॥ छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत् ॥ जपांते कर्णदेशे वा उच्चस्थानेथवा न्यसेत् ॥ १४९ ॥ इति ॥ (अथ रुद्राक्षमाहात्म्यं पद्मपुराणे) शिखायां हस्तयोः कंठे कर्णयोश्चापि यो नरः ॥ रुद्राक्षं धारयेद्भक्त्या शैवं लोकमवाप्नुयात् ॥ १५० ॥ रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि ॥ सोपि रुद्रपदं याति किं पुनर्मानवा गुह ॥ १५१ ॥ यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुखम् ॥ तस्य प्रीतो भवेद्रुद्रः प्रयच्छति निजं पदम् ॥ १५२ ॥ नववक्त्रं तु रुद्राक्षं धारयेद्वामबाहुना ॥ चतुर्दशमुखं चैव शिखायां धारयेद्बुधः ॥ १५३ ॥ सप्तविंशतिरुद्राक्षमालया देहसंस्थया ॥ यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् ॥ १५४ ॥ (स्कंदपुराणे विशेषः) रुद्राक्षान्कण्ठदेशे दशनपरिमितान्मस्तके विंशती द्वे षट्षट् कर्णप्रदेशे करयुगलगता द्वादश द्वादशैव ॥ बाह्वोरिन्दोः कलाभिः पृथगिरिशिखासूत्रयोरेकमेकं वक्षस्यष्टाधिकं स्यात्कलयति सततं स स्वयं नीलकंठः ॥ १५५ ॥ (मुखभेदेन रुद्राक्षमाहात्म्यं स्कंदपुराणे) कार्तिकेय उवाच ॥ एकद्वित्रिश्चतुःपंचषट्सप्तवसवो नव ॥ दशैकादश द्वादश त्रयोदश चतुर्दश ॥ १५६ ॥ एतेषां तु मुखानां तु देवता कोत्र शंकर ॥ गुणं च कीदृशं तेषां कथयस्व यथार्थतः ॥ १५७ ॥ शंकर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उवाच ॥ एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ॥ द्विवक्त्रो देवदेव्यौ[1] च गोवधं नाशयेद्ध्रुवम् ॥ १५८ ॥ त्रिवक्त्रो दहनः[2] साक्षाद्भ्रूणहत्यां व्यपोहति ॥ चतुर्वक्त्रःस्वयं ब्रह्मा ब्रह्महत्यां व्यपोहति ॥ १५९ ॥ पंचवक्त्रः[3] स्वयं रुद्रः कालाग्निर्नाम नामतः ॥ षड्वक्त्रः कार्तिकेयस्तु धारयेद्दक्षिणे भुजे ॥ १६० ॥ ब्रह्महत्यादिभिः[4] पापैर्मुच्यते नात्र संशयः ॥ सप्तवक्त्रो महासेनो ह्यनंतो नाम नागराट् ॥ १६१ ॥ गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः ॥ अष्टवक्त्रो महासेनः साक्षाद्देवो विनायकः ॥ १६२ ॥ पृष्ठोदरकरे गापि संस्पृशेद्वा गुरुस्त्रियम् ॥ एवमादीनि पापानि चातिपापानि सर्वशः ॥ १६३ ॥ विघ्नास्तस्य च नश्यंति मुक्तो याति परां गतिम् ॥ गुणा ह्येतेषु सर्वेषु अष्टवक्त्रेषु धारणात् ॥ १६४ ॥ नववक्त्रो भैरवः स्याद्धारयेद्वामके भुजे ॥ कपिलो[5] मुक्तिदः प्रोक्तो मम तुल्यबलो भवेत् ॥ १६५ ॥ लक्षकोटिसहस्राणि ब्रह्महत्यां करोति यः ॥ तत्सर्वं दहते शीघ्रं नववक्त्रस्य धारणात ॥ १६६ ॥ दशवक्त्रो महासेनः साक्षाद्देवो जनार्दनः ॥ ग्रहाश्चैव पिशाचाश्च वैताला ब्रह्मराक्षसाः ॥ १६७ ॥ पन्नगाश्च विनश्यंति दशवक्त्रस्य धारणात् वक्त्रैकादशरुद्राक्षो रुद्र एकादशः स्मृतः ॥ १६८ ॥ शिखायां धारयेन्नित्यं तस्य पुण्यफलं शृणु ॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥ १६९ ॥ हेमशृंगस्य लक्षस्य सम्यग्दत्तस्य यत्फलम् ॥ तत्फलं समवाप्नोति रुद्रैकादशधारणात् ॥ १७० ॥ रुद्राक्षद्वादशाक्षस्य कंठदेशे च धारणात् ॥ आदित्यैस्तुष्यते नित्यं द्वादशार्केव्यवस्थितः ॥ १७१ ॥ त्रयोदशमुखः कामः सर्वकामफ ॥ ६ ॥

---

१ मतांतरे हरगौर्याविति पाठः । २ पद्मपुराणे—त्रिवक्त्रोग्निरित्युक्तम्तस्माद्धन्मोत्थपापराशिं प्रणाशयेदिति पाठः । ३ पद्मपुराणे—पंचवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् । इति पाठः । ४ पद्मपुराणे—गर्भहत्यां व्यपोहतीति पाठः । ५ पद्मपुराणे—शिवसायुज्यकारकः । इति पाठः ।

For Private And Personal Use Only

लप्रदः ॥ चतुर्दशास्यः श्रीकंठो दंशोद्धारकरः प॰ः ॥ १७२ ॥ (अस्य धारणविधानं पद्मपुराणे) पंचामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत ॥ रुद्राक्षस्य प्रतिष्ठायां मन्त्रः पंचाक्षरो यथा ॥ ॐ त्र्यंबकादिमन्त्रं च यथा तेन प्रयोजयेत् ॥ १७३ ॥ (तत्र मंत्रः) ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनम्॥ उर्व्वारुकमिव बंधनान्मृत्योर्मुक्षीयमामृतात्॥ ॐ हौं अघोरे घोरेहुं घोरतरेहुं ॐ ह्रीं श्रीं सर्वतः सर्वांगे नमस्ते रुद्ररूपेहुम् ॥ इति मन्त्रः ॥ अनेनापि च मंत्रेण रुद्राक्षस्य द्विजोत्तमः ॥प्रतिष्ठां विधिवत्कुर्य्यात्ततोधिकफलं भवेत्॥ततो यथा स्वमंत्रेण धारयेद्भक्तिसंयुतः ॥ १७४ ॥ (तत्र क्रमेण मंत्रः) ॐ ॐ ह्शं नमः १ ॐ ॐ नमः २ ॐ ॐ नमः ३ ॐ ह्रीं नमः ४ ॐ हूं नमः ५ ॐ हूं नमः ६ ॐ हुं नमः ७ ॐ सः हूं नमः ८ ॐ हं नमः ९ ॐ ह्रीं नमः १० ॐ श्रीं नमः ११ ॐ हूं ह्रीं नमः १२ ॐ क्षां चौं नमः १३ ॐ नमोनमः १४ इति रुद्राक्षधारणम् ॥ (अथ गोमुखीनिर्णयः) ॥ वस्त्रेणाच्छादितकरं दक्षिणं यः सदा जपेत् ॥ तस्य स्यात्सफलं जाप्यं तद्धीनमफलं स्मृतम् ॥ १७५ ॥ भूतराक्षसवेताळाः सिद्धगंधर्वचारणाः ॥ हरंति प्रकटं यस्मात्तस्माद्गुप्तं जपेत्सुधीः ॥ १७६ ॥ अथांगुलीनिर्णयः ॥ (शिवाज्ञाविद्याग्रंथे) अंगुष्ठं मोक्षदं विद्यात्तर्ज्जनी शत्रुनाशिनी ॥ मध्यमा धनदा शांतिकरस्त्वे वा ह्यनामिका ॥ १७७ ॥ कनिष्ठा कर्षणे शस्ता जपकर्मणि शोभने ॥ अंगुष्ठेन विना कर्म कृतं तदफलं यतः ॥ १७८ ॥ (ग्रंथांतरे)मध्यमानामिकांगुष्ठैरक्षमालामणीशितैः ॥ एवं जपस्य

---

१ पद्मपुराणे–द्वादशास्यो भेदर्कः इति पाठः । २ स्कंदपुराणे धारणमंत्रभेदः–ॐ ऐं नमः१ ॐ श्रीं नमः २ ॐ ध्रुं ध्रुं नमः ३ ॐ ह्रीं हूं नमः ४ ॐ श्रीं नमः ५ ॐ ह्रीं नमः ६ ॐ ह्रीं नमः ७ ॐ कंवंनमः ८ ॐ ह्रीं नमः ९ ॐ ह्रीं नमः १० ॐ श्रीं नमः ११ ॐ ह्रां ह्रीं नमः १२ ॐ क्ष्यैं स्त्रौं नमः १३ ॐ ङं नां नमः १४–इति भेदः ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चैकस्य क्रमोयं चालयेज्जपेत् ॥ १७९ ॥ अंगुष्ठेन तु मोक्षाय मध्यमाघविवृद्धये ॥ जपेदनामिकांगुष्ठैनेतराभ्यां कदाचन ॥
अंगुष्ठमध्यमायोगात्सर्वसिद्धिप्रदासने ॥ (मतान्तरे) अंगुष्ठमध्यमाभ्यां च चालयेन्मध्यमध्यतः ॥ तर्जन्या न स्पृशेदेनां मुक्तिदो गणन
क्रमः ॥ १८० ॥ अथ जपनिर्णयः(गोभिलमते) नैरन्तर्य्यविधिः प्रोक्तो न दिनं व्यतिलङ्घयेत् ॥ दिवसातिक्रमे तेषां सिद्धिरोधः प्रजायते
॥ १८१ ॥ शनैः शनैरतिस्पष्टं न द्रुतं न विलम्बितम् ॥ न न्यूनं नातिरिक्तं वा जपं कुर्य्याद्दिनेदिने ॥ १८२ ॥ (तंत्रसारे)
मनः संहृत्य विषयान्मंत्रार्थगतमानसः ॥ न द्रुतं न विलंबं च जपेन्मौक्तिकपंक्तिवत् ॥ १८३ ॥ उच्चरेदर्थमुद्दिश्य मानसः स
जपः स्मृतः ॥ जिह्वोष्ठौ चालयेत्किंचिद्देवतागतमानसः ॥ १८४ ॥ किंचिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः ॥ जिह्वाजपः
शतगुणः सहस्रं मानसः स्मृतः ॥ जिह्वाजपः स विज्ञेयः केवलं जिह्वया बुधैः ॥ १८५ ॥ वर्णलक्षं जपेन्मंत्रं तदर्धं वा महेश्वरि ॥
एकलक्षावधि कुर्यान्नातो न्यूनं कदाचन ॥ १८६ ॥ कल्पान्ते तु कृते संख्या त्रेतायां द्विगुणा स्मृता ॥ द्वापरे त्रिगुणा
प्रोक्ता कलौ संख्या चतुर्गुणा ॥ १८७ ॥ (मंत्रमहोदधौ) पुरश्चरण एकस्मिन्कृते जन्मांतरोचतः ॥ मंत्रो यदि न सिद्धः स्यात्तदा
तत्पुनराचरेत् ॥ १८८ ॥ (ग्रंथांतरे) सम्यगनुष्ठितो मंत्रो यदि सिद्धिर्न जायते ॥ पुनस्तेनैव कर्तव्यं ततः सिद्धो भवेद्ध्रुवम्
॥ १८९ ॥ पुनरनुष्ठितो मंत्रो यदि सिद्धो न जायते ॥ पुनस्तेनैव कर्तव्यं ततः सिद्धो भवेद्ध्रुवम् ॥ १९० ॥ पुनः सोऽनुष्ठितो
मंत्रो यदि सिद्धो न जायते ॥ उपायास्तत्र कर्तव्याः सप्त शंकरभाषिताः ॥ १९१ ॥ भ्रामणं रोधनं वश्यं पीडनं शोषपोषणे ॥
दहनांतं क्रमात्कुर्यात्ततः सिद्धोभवेत्पुनः ॥ १९२ ॥ (मंत्रमहोदधौ) यद्वा समुद्रगामिन्यां नद्यामिंदुरविग्रहे ॥ स्पर्शान्मोक्षांतमाजप्य
जुहुयात्तद्दशांशतः ॥ १९३ ॥ विप्रान्संभोज्य नानान्नैर्मंत्राणां सिद्धिमाप्नुयात् ॥ सम्यग्जपपरस्यापि सिद्ध्यंति मनवोऽचिरात् ॥ १९४ ॥ ॥ ७ ॥

For Private And Personal Use Only

(अगस्त्यसंहितायाम्) ॥ ग्रहणेऽर्कस्य चेंदोर्वा शुचिः पूर्वामुखोषितः ॥ नद्यां समुद्रगाभिन्यां नाभिमात्रोदके स्थितः ॥ स्पर्शाद्विमुक्ति पर्यंतं जपेन्मंत्रमनन्यधीः ॥ १९५ ॥ (रुद्रयामले) अपि शुद्धोदकैः स्नात्वा शुचौ देशे समाहितः ॥ ग्रासाद्विमुक्तिपर्यंतं जपेन्मंत्र मनन्यधीः ॥ इति कृत्वा न संदेहो जपस्य फलभाग्भवेत् ॥ १९६ ॥ श्रद्धादेरनुरोधेन यदि जाप्यं त्यजेन्नरः ॥ स भवेद्देवता द्रोही पितॄन् सप्त नयेदधः ॥ १९७ ॥ अथ होमनिर्णयः ॥ (होमकालः) वसन्तश्चैव पूर्वाह्णमध्यह्ने ग्रीष्म उच्यते ॥ अपराह्णे भ वेद्वर्षा शरच्चैवार्द्धरात्रिके ॥ उषो हेमंतकश्चैव संध्यायां शैशिरः स्मृतः ॥ १९८ ॥ (पुरश्चरणचंद्रिकायाम्) ततो जपदशांशेन होमं कुर्याद्दिनेदिने ॥ अथवा लक्षसंख्यायां पूर्णायां होममाचरेत् ॥ १९९ ॥ (अथ होमस्थानं वायवीयसंहितायाम्) अथाग्निकार्यं वक्ष्यामि कुण्डे वा स्थण्डिलेपि वा ॥ वेद्यामप्यायसे पात्रे मृन्मये वा नवे शुभे ॥ स्थंडिले वा प्रकुर्वीत सुसिद्धैः सिकतैः सितैः ॥ २०० ॥ ॥ (अथ कुंडस्वरूपम्) चतुरस्रं योनिमर्द्धचन्द्रं त्र्यस्रं सुवर्तुलम् ॥ षडस्रं पंकजाकारमष्टास्रं तानि नामतः ॥ २०१ ॥ सर्वसिद्धिकरं कुंडं चतुरस्रमुदाहृतम् ॥ पुत्रप्रदं योनिकुंडमर्द्धेंद्वाभं शुभप्रदम् ॥ २०२ ॥ शत्रुक्षयकरं त्र्यस्रं वर्तुलं शांतिकर्मणि ॥ छेदमारणयोः कुंडं षडस्रं पद्मसन्निभम् ॥ पुष्टिदं रोगशमनं कुंडमष्टास्रमीरितम् ॥ २०३ ॥ (वर्णभेदेन कुंडप्रकारः) विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते ॥ वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् ॥ चतुरस्रं तु सर्वेषां केचिदिच्छन्ति तांत्रिकाः ॥ २०४ ॥ (अथ कुंडप्रमाणं नारदीये) कुंडं तु नारदेनोक्तं हस्तमात्रं शुभं मतम् ॥ यावत्कुंडस्य विस्तारः खननं तावदीरितम् ॥ २०५ ॥ (हस्तप्रमाणम्) चतुर्विंशत्यंगुलाढ्यं हस्तं तस्य विदो विदुः ॥ कर्तुर्दक्षिणहस्तस्य मध्य

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मांगुलिपर्वणः ॥ २०६ ॥ (होमप्रमाणेन कुंडप्रमाणम्) मुष्टिमात्रमितं कुंडं शतार्द्धे संप्रचक्षते ॥ शतहोमेरत्निमात्रं हस्तमात्रं सहस्रके॥२०७॥ द्विहस्तमयुते लक्षे चतुर्हस्तमुदीरितम् ॥ दशलक्षे तु षड्हस्तं कोट्यामष्टकरं स्मृतम् ॥ मानहीनाधिकं कुंडमनेकभयदं भवेत् ॥२०८ ॥ (कुंडस्यांगानि) कुंडरूपं तु जानीयात् परमं प्रकृतेर्वपुः॥प्राच्यां शिरः समाख्यातं बाहू दक्षिणसौम्ययोः ॥ उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे॥२०९॥(अथ कुंडप्रमाणेन मेखलाप्रमाणम्)कुंडवन्मेखलां कृत्वा योनिं कृत्वा ततः परम् ॥ कुंडानां यादृशं रूपं मेखलानां तु तादृशम्॥ २१०॥कुडानां मेखलास्तिस्रो मुष्टिमात्रे तु ताः क्रमात् ॥ उत्सेधायामतो ज्ञेया कण्ठार्द्धगलसंमिताः ॥ २११ ॥ अरत्निमात्रे कुंडे स्युस्तास्त्रिद्व्येकांगुलात्मिकाः ॥ एकहस्तमिते कुंडे वेदाग्निनेत्रनांगुलाः ॥ २१२ ॥ मेखलानां भवेदंतः परितो नेमिरंगुलात् ॥ एकहस्तस्य कुंडस्य वर्द्धयेत्तत्क्रमात्सुधीः॥ २१३॥दशहस्तांतमन्येषामर्द्धांगुलवशात्पृथक्॥कुंडे द्विहस्ते ता ज्ञेया रसवेदगुणांगुलाः॥ २१४॥चतुर्हस्तेषु कुंडेषुर्वसुतर्कयुगांगुलाः॥कुंडे रसकरे ताः स्युर्दशाष्टत्र्यंगुलान्विताः॥ २१५॥ वसुहस्तमिते कुंडे भानुपंक्त्यष्टकान्विताः॥दशहस्तमिते कुंडे मनुभानुदशाङ्गुलाः॥विस्ताररोत्सेधतो ज्ञेया मेखला सर्वतो बुधैः॥२१६॥(योनिप्रमाणम्) होतुरग्रे योनिरासामुपर्यश्वत्थपत्रवत् ॥ मुष्ट्यारत्न्येकहस्तानां कुंडानां योनिरीरिता ॥ २१७ ॥ षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी ॥ एकांगुलं तु योन्यग्रं कुर्यादीषदधोमुखम् ॥ २१८ ॥ एकैकांगुलितो योनिं कुंडेष्वन्येषु वर्द्धयेत् ॥ यवद्वयक्रमेणैव योन्यग्रमपि वर्द्धयेत् ॥ २१९ ॥ स्थलादारभ्य नालं स्याद्योन्या मध्यं सरंध्रकरम् ॥ । नार्पयेत्कुंडकोणेषु योनिं तां तत्र वित्तमः ॥२२०॥

१ स्थलाद् भूमिमारभ्य इत्यर्थः । नालं योन्याधारं मृन्मयमूर्द्धाकारं कल्पयेत् । सरंध्रकं मेखलावालच्छुपरिस्तरणार्थं रन्ध्रं कल्पयेदित्यर्थः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(नाभिमानम्) कुंडानां कल्पयेदंतर्नाभिमंबुजसन्निभाम् ॥ तत्तत्कुंडानुरूपं वा मानमस्या निगद्यते॥ २२१॥मुष्ट्यरत्न्येकहस्तानां नाभिरुत्से धतारतः।।द्वित्रिवेदांगुलोपेतां कुंडेष्वन्येषु वर्द्धयेत्॥ २२२॥ यवयवक्रमेणैव नाभिं पृथगुदारधीः।।योनिकुंडे योनिमब्जकुंडे नाभिं विवर्जयेत्॥ ॥२२३॥ नाभिक्षेत्रं त्रिधा भित्त्वा मध्ये कुर्वीत कर्णिकाम्॥बहिरंशद्वयेनाष्टौ पत्राणि परिकल्पयेत्।।२२४॥ (शाकल्यप्रमाणं महार्णवे) तिलास्तु द्विगुणाः प्रोक्ता यवेभ्यश्चैव सर्वदा ॥ अन्ये सौगंधिकाः स्निग्धा गुग्गुल्वादियवैः समाः ॥२२५॥ (त्रिकारिकायाम्) आयुःक्षयं यवाधिक्यं यवसाम्यं धनक्षयम् ॥ सर्वकामसमृद्ध्यर्थं तिलाधिक्यं सदैव हि ॥२२६॥ (अथ द्रव्यभेदेनाहुतिप्रमाणं शारदातिलके) अथात्र होममानेन प्रमाणमभिधीयते ॥कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतम् ॥२२७॥ उक्तानि पंच गव्यानि तत्समानि मनीषिभिः ॥ तत्समं मधुदुग्धान्नमक्षमात्रमुदाहृतम् ॥२२८॥ दधि प्रसृतिमात्रं स्याल्लाजाः स्युर्मुष्टिसंमिताः ॥ पृथुकास्तत्प्रमाणाः स्युः सक्तवोपि तथा मताः ॥ ॥२२९॥गुडं पलार्द्धमानं स्याच्छर्करापि तथा मता॥ग्रासार्द्धं चरुमानं स्यादिक्षुः पर्वावधिर्मतः॥२३०॥एकैकं पत्रपुष्पाणि तथाऽपूपानि कल्पयेत्॥कदलीफलनारंगफलान्येकैकशो विदुः॥२३१॥ मातुलुंगं चतुःखण्डं पनसं दशधा कृतम् ॥ अष्टधा नारिकेलानि खण्डितानि विदुर्बुधाः॥२३२॥ त्रिधा कृतं फलं बिल्वं कपिलं खण्डितं त्रिधा॥ उर्वारुकफलं होमे चोदितं खण्डितं त्रिधा ॥२३३॥ फलान्यन्यानि खण्डानि समिधः स्युर्दशांगुलाः ॥ दूर्वात्रयं समुद्दिष्टं गुडूची चतुरंगुला ॥ २३४ ॥ व्रीहयो मुष्टिमात्राः स्युर्मुद्गमाषा यवा अपि ॥ तण्डुलाः स्युस्तदर्द्धांशाः कोद्रवा मुष्टिसंमिताः ॥ २३५ ॥ गोधूमा रक्तकलमा विहिता मुष्टिमानतः ॥ तिलाश्चुलुकमात्राः स्युस्सर्षपा स्तत्प्रमाणकाः ॥ २३६ ॥ शुक्तिप्रमाणं लवणं मरीचान्येकविंशतिः ॥ पुरं बदरमानं स्याद्रामठं तत्समं स्मृतम् ॥ २३७ ॥ चन्दना

For Private And Personal Use Only

गुरुकर्पूरकस्तूरीकुंकुमानि च ॥ तिंतिडीबीजमानानि समुद्दिष्टानि देशिकैः ॥ २३८ ॥ (आथाग्र्यंगानि) बधिरत्वं कर्णहोमे नेत्रे त्वंधत्वमाप्नुयात्॥नासिकायां मनःपीडा शिरोहोमो हि मृत्युदः॥२३९॥यतः काष्ठं ततः श्रोत्रं यतो धूम्यथ नासिका ॥ यतोल्पज्वलनं नेत्रं यतो भस्म ततः शिरः ॥ यतः प्रज्वालितो वह्निस्तन्मुखं जातवेदसः॥२४०॥(अग्निवर्णेन शुभाशुभपरीक्षणम्) स्वर्णसिंदूरबालार्ककुंकुमक्षोदसंनिभः ॥ भेरीवारिदहस्तिनां ध्वनिर्वह्नेः शुभावहः॥२४१॥नागचम्पकपुन्नागवकुलाः केतकानि च ॥ यूथिकानुनिभो गंधो गंधो वह्नेः शुभावहः ॥२४२॥ काकस्वरस्वरो वह्नेर्यजमानस्य दुःखदः ॥ कृष्णे कृष्णगतेर्वर्णे यजमानं विनाशयेत् ॥२४३॥ एवं दुष्टेषु चिह्नेषु प्रायश्चित्तोपदेशकः ॥ मूलेनाज्येन जुहुयात्पञ्चविंशतिराहुतीः ॥ २४४ ॥ (अथ पूर्णाहुतिविचारः संस्कारभास्करे शौनकः) अंते पूर्णाहुतिं हुत्वा समुद्रादूर्मिसूक्ततः ॥ सततमाज्यधारां तां पूर्णाहुतिमथाचरेत् ॥ २४५ ॥ (ग्रंथांतरे) चतुर्गृहीतमाज्यं तद्गृहीत्वा स्रुचि मध्यतः ॥ वस्त्रतांबूलपूगादिफलपुष्पसमन्विताम् ॥ २४६ ॥ अधोमुखस्रुवच्छन्नां गंधाक्षतैरलंकृताम् ॥ पूर्वं दक्षिणहस्तेन पश्चाद्वामेन पाणिना ॥ २४७ ॥ अग्रमध्यममध्यस्थं मूलमध्यममध्यतः ॥ पाणिद्वयेन होतव्यं पाणिरेको निरर्थकः ॥ २४८ ॥ (शांतिरत्ने) ऐशान्यामाहरेद्भस्म स्रुचा वाथ स्रुवेण वा ॥ अंकनं कारयेत्तेन शिरःकंठांसकेषु च ॥ २४९ ॥ (होमेऽशक्तेरुपायो योगिनीहृदये) होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः ॥ यद्यदङ्गं भवेद्भग्नं तत्संख्याद्विगुणो जपः ॥ २५० ॥ होमाभावे जपः कार्यो होमसंख्याचतुर्गुणः ॥ विप्राणां क्षत्रियाणां च रससंख्यागुणः स्मृतः ॥ वैश्यानां वसुसंख्याकमेषां स्त्रीणामयं विधिः ॥ २५१ ॥ (अगस्त्यसंहितायान्तु) यदि होमेऽप्यशक्तः स्यात्पूजायां तर्पणेऽपि वा ॥ तावत्संख्याजपेनैव ब्राह्मणाराधनेन च ॥ २५२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ यंत्रलेखनार्थे पात्रनिर्णयः) स्वर्णादिपात्रे संलिख्य मातृकायंत्रमुत्तमम् ॥ काश्मीरचन्दनेनापि भस्मना वाथ सुव्रत ॥ २५३ ॥ काश्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनौ॥शैवे भस्म समाख्यातं मातृकायंत्रलेखने ॥ २५४ ॥ (धूपादिसमर्पणाङ्गनिर्णयः रुद्रयामले) निवेदयेत्पुरोभागे गंधं पुष्पं च भूषणम् ॥ दीपं दक्षिणतो दद्यात्पुरतो वा न वामतः ॥ २५५ ॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे ॥ नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः ॥ धूपदीपौ सुभोज्यं च देवताग्रे निवेदयेत् ॥२५६॥ (अथ गंधनिर्णयः) सर्वेषु गंधजातेषु प्रशस्तो मलयोद्भवः ॥ तस्मात्सर्वप्रयत्नेन दद्यान्मलयजं सदा ॥२५७॥(देवभेदेन गंधाः) कृष्णागुरुः सकर्पूरः सहितो मलयोद्भवः ॥ वैष्णवप्रीतिदो गंधः कामाख्यायाश्च भैरवे ॥ २५८ ॥ कुंकुमागरुकस्तूरीचन्द्रभागैः समीकृतैः ॥ त्रिपुराप्रीतिदो गंधस्तथा चंडयाश्च शंभुना॥२५९॥ (देवभेदेन गंधाष्टकम्) गंधाष्टकं त्रिविधं शक्तिविष्णुशिवात्मकम्॥ चंदनागुरुकर्पूरचोरकुंकुमरोचनाः॥जटामांसीकपियुताः शक्तेर्गंधाष्टकं विदुः ॥२६० ॥ चन्दनागुरुह्रीवेरकुष्ठकुंकुमसेव्यकाः ॥ जटामांसीमुरमिति विष्णोर्गंधाष्टकं विदुः ॥ २६१ ॥ चंदनागुरुकर्पूरतमालजलकुंकुमम् ॥ कुशीतं कुष्टसंयुक्तं शैवं गंधाष्टकं विदुः ॥२६२॥ (गंधार्पणे अंगुलीविचारः) अनामिकया च देवस्य ऋषीणां च तथैव च ॥ गंधानुलेपनं कार्यं प्रयत्नेन विशेषतः ॥ २६३ ॥ पितॄणामर्पयेद्गंधं तर्जन्या च सदैव हि ॥ तथैव मध्यमांगुल्या धार्यं गंधं स्वयं बुधैः॥२६४॥अथ फलपुष्पनिर्णयः॥(मंत्रमहोदधौ) श्वेतं पीतं हरेरिष्टं रक्तं रविगणेशयोः ॥ अक्षतानर्कधत्तूरौ विष्णौ नैवार्पयेत्सुधीः॥२६५॥ बंधूकं केतकीं कुंदं केसरं कुटजं जपाम् ॥ शंकरे नार्पयेद्विद्वान्मालतीं यूथिकामपि ॥२६६॥ शक्तौ दूर्वार्कमंदारान्मालूरं तगरं रवौ॥विनायके तु तुलसीं नार्पयेज्जातुचिद्बुधः ॥२६७॥ (स्नाने विहिते पुष्पस्पर्शे दोषः लघुहारीतः) स्नानं कृत्वा च ये

For Private And Personal Use Only

केचित्पुष्पं गृह्णंति वै द्विजाः॥देवतास्तन्न गृह्णंति भस्मी भवति काष्ठवत्॥२६८॥पुष्पं पत्रं फलं देवे न प्रदद्यादधोमुखम्॥पुष्पांजलौ न त
द्दोषस्तथा पर्युषितस्य च ॥२६९॥ (मंत्रमहोदधौ) चम्पकं कमलं त्यक्त्वा कलिकामविवर्जयेत्॥कुरंटकं कांचनारं वर्जयेद्बृहतीयुगम् ॥
॥२७०॥ अथ सर्वदेवोपयोगिधूपः॥ (तंत्रसारे) गुग्गुलुं सरलं दारु पत्रं मलयसंभवम्॥ह्रीबेरमगुरुं कुष्ठं गुडं सर्जरसं घनम्॥२७१॥हरी
तकीं नखीं लाक्षां जटामांसीं च शैलजम् ॥ षोडशाङ्गं विदुर्धूपं दैवे पित्र्ये च कर्मणि॥२७२॥अथ दीपनिर्णयः॥ (दीपपात्रं कालिका
पुराणे) सुवृत्तवर्तिसस्नेहपात्रेऽभग्ने सुदर्शने॥मृण्मये वृक्षकोटौ तु दीपं दद्यात्प्रयत्नतः॥२७३॥तैजसं दारवं लौहं मार्तिक्यं नारिकेलजम्॥
तृणध्वजोद्भवं चापि दीपपात्रं प्रशस्यते॥२७४॥(दीपविचारः) न मिश्रीकृत्य दद्यात्तु दीपं स्नेहे घृतादिकम्॥घृतेन दीपकं नित्यं तिलतैलेन
वा पुनः॥२७५॥दीपं घृतयुतं दक्षे तैलयुक्तं च वामतः॥ दक्षिणे च सितां वर्तिं वामतो रक्तवर्तिकाम् ॥२७६॥नैव निर्वापयेद्दीपं देवार्थमु
पकल्पितम्॥दीपहर्ता भवेदंधः काणो निर्वापको भवेत्॥२७७॥(अथ वाद्यनिर्णयो योगिनीतंत्रे)शिवागारे झल्लकं च सूर्यागारे तु शंखकम्॥
दुर्गागारे वंशवाद्यं माधुरीं च न वादयेत् ॥ २७८ ॥ (जयसिंहकल्पद्रुमे) वादित्राणामभावे तु पूजाकाले च सर्वदा ॥ घंटाशब्दो नरैः
कार्यः सर्ववाद्यमयी यतः ॥२७९॥ (अथ नैवेद्यनिर्णयः)भक्ष्यं भोज्यं च लेह्यं च पेयं चोष्यं च पंचमम् ॥ सर्वत्र चैतन्नैवेद्यमाराध्यास्यै
निवेदयेत् ॥ २८० ॥ (नैवेद्यपात्राणि) तैजसेषु च पात्रेषु सौवर्णे राजते तथा ॥ ताम्रे वा प्रस्तरे वाथ पद्मपात्रेथ वा पुनः ॥२८१॥
यज्ञदारुमये वापि नैवेद्यं स्थापयेद्बुधः ॥ सर्वाभावे च माहेये स्वहस्तघटिते यदि ॥ २८२ ॥ (नैवेद्यल०) अर्वाग्विसर्जनाद्द्रव्यं नैवेद्यं
सर्वमुच्यते ॥ विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात् ॥२८३॥ नैवेद्यत्यागनिषेधः ॥ (आह्निकतत्त्वे) तृषार्ताः पशवो रुद्धाः कन्यका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च रजस्वला ॥ देवता च सनिर्माल्या हंति पुण्यं पुरा कृतम् ॥ २८४ ॥ (रुद्रयामले) निवेदितं च यद्द्रव्यं भोक्तव्यं तद्विधानतः ॥ तन्न चेद्भुज्यते मोहाद्रोक्तुमायान्ति देवताः ॥ २८५ ॥ अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ॥ शालिग्रामशिलासंगात्सर्वं याति पवित्रताम् ॥ ॥ २८६ ॥ (उच्छिष्टाधिकारी मंत्रमहोदधौ) विष्वक्सेनो हरेरुक्तश्चंडेश्वर उमापतेः ॥ विकर्तनस्य चंडांशुर्वक्रतुंडो गणेशितुः ॥ शक्तेरुच्छिष्टचांडाली स्मृता उच्छिष्टभोजिनः ॥ २८७ ॥ अथ वस्त्रनिर्णयः ॥ (जयसिंहकल्पद्रुमे) पीतकौशेयवसनं विष्णुप्रीत्यै प्रकीर्तितम् ॥ रक्तं शक्त्यर्कविघ्नानां शिवस्य च सितं प्रियम् ॥ मलहीनं तथाऽछिद्रं क्षौमं कार्पासमेव च ॥ २८८ ॥ अथ प्रदक्षिणानिर्णयः ॥ (लिंगार्चनचंद्रिकायाम्) एका चंड्यां रवौ सप्त तिस्रो दद्याद्विनायके ॥ चतस्रो विष्णवे दद्याच्छिवे तिस्रः प्रदक्षिणाः ॥ २८९ ॥ (ग्रंथांतरे) एका चंड्या रवेः सप्त तिस्रः कार्या विनाके ॥ हरेश्चतस्रः कर्तव्याः शिवस्यार्द्धप्रदक्षिणा ॥ २९० ॥ (शिवप्रदक्षिणामाहात्म्यम्) पूजां कृत्वा च यः शंभोर्न करोति प्रदक्षिणाम् ॥ सा पूजा निष्फला तस्य पूजकः स च दांभिकः ॥ २९१ ॥ भक्त्या करोति यः सम्यक् केवलं तु प्रदक्षिणम् ॥ पूजा सर्वा कृता तेन स सम्यक्छिवपूजकः ॥ २९२ ॥ अथ कूर्म्मनिर्णयः ॥ (कूर्मचक्रस्यावश्यकता यामले) क्षेत्रमध्यं समाश्रित्य कूर्मचक्रं विचिंतयेत् ॥ कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकम् ॥ तज्जपस्य फलं नास्ति सर्वानर्थाय कल्पते ॥ ॥ २९३ ॥ (तंत्रराजे) कूर्म्मस्थितिं सुविज्ञाय यो जपेदवधिस्थितिः ॥ स प्राप्नोति फलान्युक्तान्यन्यथा नाशमेति च ॥ २९४ ॥ (पुरश्चरणचंद्रिकोक्तकूर्मचक्रम्) वर्तुलं नवकोष्ठं तत्कृत्वा कूर्माकृतिं लिखेत् ॥ स्वरयुग्मं क्रमेणैव ऐंद्याद्यष्टसु दिक्षु च ॥ २९५ ॥ कादीन् वर्णान्लक्षमीशे मध्ये क्षेत्राधिपं यजेत् ॥ क्षेत्रनामाद्यवर्णस्तु यस्मिन्कोष्ठे स्थितो भवेत ॥ २९६ ॥ मुखं तु तस्य जानीयाद्धस्तावुभयतः

For Private And Personal Use Only

स्थितौ ॥ कोष्ठे कुक्षी उभौ पादौ द्वौ शिष्टं पुच्छमीरितम् ॥ २९७ ॥ मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः ॥ कुक्षिस्थितिरुदासीनः
पादस्थो दुःखमाप्नुयात् ॥ २९८ ॥ पुच्छस्थः पीड्यते मंत्री बन्धनोच्चाटनादिभिः ॥ कूर्मचक्रमिति प्रोक्तं मंत्राणां सिद्धिसाधनम् ॥
॥ २९९ ॥ (मंत्रमहोदधौ) नवधा तां धरां कृत्वा पूर्वादिषु समालिखेत् ॥ कोष्ठेषु सप्त वर्गांश्च लक्षौ मध्ये तथा स्वरान् ॥ ३०० ॥

पुरश्चरणचन्द्रिकोक्तं कूर्मम् ।

	ईशानभुजा	पूर्वमुख	अग्निभुजा	
	ल- क्ष- अं- अः-	अ- आ- क ख ग घ ङ	इ- ई- च छ ज झ ञ	
उत्तर कुक्षि दक्षि	ओ- औ- श ष स ह	व्रजा	उ- ऊ- ट ठ ड ढ ण	दक्षिण कुक्षि वाम
	ए- ऐ- य र ल व	ऌ- ॡ- प फ ब भ म	ऋ ॠ- त थ द ध न	
	वायुपाद	पश्चिमपुच्छ	नैर्ऋत्यपाद	

मंत्रमहोदधिप्रोक्तं कूर्मम् ।

	ईशान	पूर्व	अग्नि	
	ल· क्ष	क ख ग घ ङ	च छ ज झ ञ	
उत्तर	श ष स ह	अं अः | अ आ | इ ई ओ औ | | उ ऊ ए ऐ | ऌ ॡ | ऋ ॠ	ट ठ ड ढ ण	दक्षिण
	य र ल व	प फ ब भ म	त थ द ध न	
	वायुकोण	पश्चिम	नैर्ऋत्यकोण	

कक्षपुटिप्रोक्तं कूर्मम् ।

	ईशान	पूर्व	अग्नि	
	दक्षभुजा महाशंख ळ क्ष	मुख वृषभ क ख ग घ ङ	वामभुजा शूलराज च छ ज झ ञ	
उत्तर	दक्षिणकटि पद्मयोनि श ष स ह	हृदय अमृत अ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ अं अः	वामकटि वासुकि ट ठ ड ढ ण	दक्षि०
	दक्षांघ्रि पूज्य य र ल व	पुच्छ अजर प फ ब भ म	वामांघ्रि पूज्य अमर त थ द ध न	
	वायव्य	पश्चिम	नैर्ऋत्यकोण	

क्षेत्रनामादिमो वर्णो यत्र कोष्ठे भवेत्ततः ॥ उपविश्य जपं कुर्यान्नान्यास्मिन्दुःखदे स्थले ॥ ३०१ ॥ (कक्षपुटौ) देवस्थाने सुनिश्चित्य कूर्मचक्रं सुसिद्धिदम् ॥ अष्टवर्गं लिखेद्धीमान्मध्यतो यावदुत्तरम् ॥ ३०२ ॥ लक्ष्मीशपदे क्षेत्रे वेद्यास्ते नवकोष्ठके ॥ हृदास्यभुजकट्यंघ्रिपुच्छे वर्गाः क्रमात्स्थिताः॥ ३०३॥ पादादि यदि संज्ञानि तेषु क्षेत्राधिपा नव ॥ अमृतो वृषभश्चैव शूलराजश्च वासुकिः ॥ ३०४ ॥ अमरा अजरश्चैव पूज्य शक्तियुतस्तथा ॥ पद्मयोनिर्महाशंखो ज्ञेयास्तत्तदनुक्रमात् ॥ माध्यात्पूर्वादितः पूज्या मंत्रमत्रैव चोच्यते ॥ ३०५ ॥ अथ मंत्रः ॐ अमुकक्षेत्रपाल देवीपुत्रावतारावतर बलिं पिशितं गृह्ण २ खल २ सर्वविघ्नान् हन २ स्वाहा ॥ वि० ॥ अनेन मंत्रेण अमृतादयः सर्वे क्षेत्रपालाः पूज्याः स्वस्यास्थितभूम्यां यः क्षेत्रपालः तस्योद्देशेन तन्नाम्ना बलिर्देयः ॥ ३०६ ॥ यत्रयत्र भवेद्वर्गे क्षेत्रनामाद्यमक्षरम् ॥ तन्मुखं शेषवर्गेषु करकुक्ष्यंघ्रिकल्पना ॥ ३०७॥ मुखस्थः क्षोभयेन्मंत्री करस्थः स्वल्पभोगभाक् ॥ कुक्षिस्थो ह्युदासीनः पादस्थो दुःखमाप्नुयात् ॥ ३०८ ॥ पुच्छस्थो वधबंधं च जपादाप्नोति निश्चितम् ॥ दीपस्थानं ततः क्षेत्रं ज्ञात्वा मंत्राञ्शुचिर्जपेत् ॥ ३०९ ॥ (दीपस्थाने कूर्मविशेषः)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(क्षेत्राधिपस्य नाम्ना हि दीपस्थानं विचारयेत् ॥ मुखं च नवधा कृत्वा स्वरवर्णादिकं लिखेत् ॥३१०॥ साध्यनामादिमो वर्णो यत्र कोष्ठे भवेद्यदि ॥ अथ वा कूर्म्मकोष्ठे तु यत्र नामाक्षरं भवेत् ॥३११॥ दीपस्थानं हि तज्ज्ञेयं तत्र स्थित्वा मनुं जपेत्) क्षेत्रसाधकमंत्राणामेकमेवाद्यमक्षरम् ॥ यदि स्यात्स ध्रुवो मंत्रः क्षिप्रमेव सुसिध्यति ॥ ३१२ ॥ (तंत्रराजे) कूर्म्मस्थितिं सुविज्ञाय यो जपेदवधिस्थितिः ॥ स प्राप्नोति फलान्युक्तान्यन्यथा नाशमेति च॥ ३१३॥ (यामले) कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकम्॥ तज्जपस्य फलं नास्ति सर्वानर्थाय कल्पते ॥ ३१४ ॥ (देवीयामले) कुरुक्षेत्रे प्रयागे च गंगासागरसंगमे ॥ महाकाले च काश्यां च कूर्म्मस्थानं न चिंतयेत् ॥३१५॥ (गौतमीये) पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे॥ यदि कुर्यात्पुरश्चर्यां तत्र कूर्म्मं न चिंतयेत्॥ग्रामे वा यदि वास्तौ वा गृहे तं च विचिंतयेत् ॥ ३१६॥ (विश्वामित्रकल्पे) काशी पुरी च केदारो महाकालोथ नासिकम्॥ त्र्यंबकं च महाक्षेत्रं पंच दीपा इमे भुवि॥ ३१७॥इति कूर्मः॥

सिद्धादियोगे
मालिनीविजये अकडमचक्रम् ।

सिद्धादियोगे
शुद्धाकडमचक्रम् ।



अथ सिद्धादिमंत्रविचारः ॥ (मालिनीविजये) ऋणसिद्धादियोगेषु मंत्रे दाने विशेषतः॥प्रसिद्धं नाम गृह्णीयाज्जागर्तिमनुजो यतः ॥ ३१८ ॥ (सिद्धादिचक्रं मालिनीविजये) द्वादशारे तथा चक्रे कूटप्रांतविवर्जितान् ॥ आद्यंतान्विलिखेद्वर्णान् पूर्वतो यावदीश्वरः ॥ ३१९ ॥ अङ्कानेकादिभान्वंतॉल्लिखेत्पूर्वादितः क्रमात् ॥ सिद्धः साध्यः सुसिद्धोरिश्चतुर्धा तु स्फुटो भवेत् ॥ ३२० ॥ मंत्रसाधकयोराद्यो वर्णः स्याद्यत्र कोष्ठगः ॥ स एव सततं ग्राह्यः स्ववर्णान्मंत्रव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्णतः ॥ ३२१ ॥ नवैकपंचमे सिद्धः साध्यः षड्दशयुग्मके ॥ त्रिसप्तैकादशे मित्रं वेदाष्टद्वादशे रिपुः ॥ ३२२ ॥ (मंत्रमहोदधौ) नाम्नो मंत्रस्य वर्णांश्च चतुर्भिर्विभजेत् सुधीः ॥ एकादिशेषे सिद्धादि क्रमाज्ज्ञेयं विचक्षणैः ॥ ३२३ ॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः ॥ सुसिद्धः प्रतिमात्रेण साधकं भक्षयेदरिः ॥ ३२४ ॥ अथारिमंत्रचक्रम् ॥ अथारिमित्रमंत्रविचारः ॥ (समयाचारतंत्रे)

अथारिमंत्रचक्रम्.

वैरि	अआ	ऋ ॠ	ऌ ॡ	उ ऊ	ज	ल	ड	फ	फ	क
वैरि	ग	ठ	प	ष	ट	ख	त	घ	र	स

मंत्राक्षरेण मंत्रं च दीपनाम्नोर्भवेद्यदि ॥ साधकस्य च नाम्नाथ किं न सिध्यंति मंत्रिणः ॥ ३२५ ॥ तस्माच्चक्रं विचार्यैव मित्रं चेत्सर्वसिद्धिदम् ॥ अरित्वमद्वयस्येह गकारेण परस्परम् ॥ ३२६ ॥ ऋद्वयस्य ठकारेण ठकारस्य च ऋद्वयम् ॥ लृद्वयस्य पकारेण पकारस्य च लृद्वयम् ॥ ३२७ ॥ उद्वयस्य षकारेण षकारस्योयुगेन तु ॥ जकारस्य टकारेण लकारस्य खकारतः ॥ ३२८ ॥ डकारस्य तकारेण फकारस्य घकारतः ॥ फकारस्य च रेफेण ककारस्य सकारतः ॥ अरित्वमेषां वर्णानामन्येषां मित्रभावना ॥ ३२९ ॥ (अरिमंत्रदोषोद्धारो मालिनीविजये) अरिमंत्रो गृहीतश्चेदज्ञानवशतस्तदा ॥ तस्य त्यागः प्रकर्तव्यस्तत्प्रकारोधुनोच्यते ॥ ३३० ॥ सुदिने स्थापयेत्कुंभं सर्वतोभद्रमंडले ॥ विलोमश्च जपेन्मंत्रं पूरयेत्तन्तु पायसा ॥ ३३१ ॥ तत्र देवं समावाह्य जपेदावरणार्चितः ॥ तदग्रे स्थंडिलं कृत्वा प्रतिष्ठाप्यानलं ततः ॥ ३३२ ॥ जुहुयान्मूलमंत्रेण विलोमेन शतं घृतैः ॥ दिक्पतिभ्यो बलिं दद्यात्पायसान्नैर्घृतान्वितैः ॥ ३३३ ॥ पुनः संपूज्य देवेशं प्रार्थयेन्मनुनामुना ॥ अनुकूटमनालोच्य मया तरलबुद्धिना ॥ ३३४ ॥ यद्गुपात्तं पूजितं च प्रभो मंत्रस्य रूपकम् ॥ तेन मे मनसः क्षोभमशेषं विनिवर्तय ॥ ३३५ ॥ पूजनं प्रत्यहं वा तु भूयाच्छ्रेयः सनातनम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तनोतु मम कल्याणं पावनी भक्तिरस्तु मे ॥ ३३६ ॥ एवं सम्प्रार्थ्य देवेशं कर्पूरागरुचन्दनैः ॥ विलोमं विलिखेन्मंत्रं ताडपत्रे तदर्चयेत ॥ ३३७ ॥ प्रबध्य तु निजे मूर्ध्नि स्नायात्कुंभस्थितैर्जलैः ॥ पुनः सम्पूर्य तत्तोयैर्न पश्येन्मंत्रपत्रकम् ॥ ३३८ ॥ सम्पूज्य कुंभसहितं तडागे वा विनिःक्षिपेत्॥ विप्रान्सम्भोज्य मुच्येत पीडयासौ च मानवः ॥ ३३९॥ अथ ऋणधनशोधनम् (मालिनीविजये) नामाद्यक्षरमारभ्य यावन्मंत्रादिवर्णकम् ॥ कृत्वा स्वरैर्बुधो भियात्तदन्यद्विपरीतकम् ॥ ३४०॥कृत्वाधिको मंत्रवर्णे ऋणी चेन्मंत्रमुत्तमम् ॥ स्वयं ऋणी च तन्मंत्रं त्यजेत्पूर्वऋणी यतः ॥ ३४१ ॥ (प्रकारांतरोपि) मंत्रसाधकनामार्णः साधकस्य तथैव च ॥ अष्टभिस्तु हरेद्भागं शेषैर्ऋणधनम्भवेत ॥ ३४२॥ विना शुद्धिं न जपोपयेगिमंत्रः ॥ येषां मनूनां सिद्धादिशोधनं नास्ति तान्ब्रुवे ॥ एकवर्णे त्रिवर्णो वा पंचार्णो रसवर्णकः॥ ३४३॥ सप्तार्णो नववर्णश्च रुद्रार्णो रदनाक्षरः ॥ अष्टार्णो हंसमंत्रश्च कूटो वेदोदितो ध्रुवम् ॥ ३४४॥ स्वप्नलब्धः स्त्रिया प्राप्तो माला मंत्रो नृकेसरी प्रसादो रविमंत्रश्च वाराहो मातृकाः परा ॥३४५॥ त्रिपुरा काममंत्रश्चाज्ञासिद्धः पक्षिनायकः॥ बौद्धमंत्रा जैनमंत्रा नैव सिद्धादिशोधनम्॥ एताद्भिन्नेषु मन्त्रेषु शुद्धिरावश्यकी मता ॥ ३४६ ॥ (सिद्धसारस्वते विशेषः) नपुंसकस्य मंत्रस्य सिद्धादीन्नैव शोधयेत् ॥ ३४७ ॥ शापरहितमंत्राः ॥ भीष्मपर्वणि या गीता सा प्रशस्ता कलौ युग ॥ विष्णोः सहस्रनामाख्यं स्तोत्रं पापप्रणाशनम् ॥ ३४८ ॥ गजेन्द्रमोक्षणं चैव तथा कारुण्यकः स्तवः ॥ नारसिंहं तथा स्तोत्रं स्तोत्रं श्रीरामसंज्ञकम् ॥ ३४९ ॥ देव्याः सप्तशतीस्तोत्रं तथा नामसहस्रकम् ॥ श्लोकाष्टकं नीलकंठं शैवं नामसहस्रकम् ॥ ३५० ॥ त्रिपुरायाः प्रसादाख्यं सूर्यस्य स्तवराजकम् ॥ पैत्रो रुचिस्तवो यश्च इन्द्राक्षीस्तोत्रमेव च ॥ ३५१ ॥ वैष्णवं च महालक्ष्म्याः स्तोत्रमिंद्रेण भाषितम् ॥ भार्गवाख्येन रामेण शप्तान्यन्यानि कारणात्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३५२ ॥ :अथ कलिसिद्धिप्रदा मंत्राः ॥ (मंत्रमहोदधौ) सिद्धिप्रदा कलियुगे ये मंत्रास्तान्वदाम्यतः ॥त्र्यर्ण एकाक्षरोऽनुष्टुप् त्रिविधो नरकेसरी ॥ ३५३ ॥ एकाक्षरोर्जुनोनुष्टुब् द्विविधस्तुरगाननः ॥ चिंतामणिः क्षेत्रपालो भैरवो यक्षनायकः ॥ ३५४ ॥ गोपालो गजवक्त्रश्च चेटका यक्षिणी तथा ॥ मातंगी सुंदरी श्यामा तारा कर्णपिशाचिनी ॥ ३५५ ॥ शबर्य्येकजटा वर्मा काली नीलसरस्वती ॥ त्रिपुरा कालरात्रिश्च कलाविष्टप्रदा इमे ॥ ३५६ ॥ कलौ चतुर्वर्णोपयोगि मंत्राः ॥ अघोरा दक्षिणामूर्तिरुमा माहेश्वरो मनुः हयग्रीवो वराहश्च लक्ष्मीनारायणस्तथा ॥ ३५७ ॥ प्रणवाद्याश्चतुर्वर्णा वह्नेर्मंत्रास्तथा रवेः ॥ प्रणवाद्यो गणपतिर्हरिद्रागणनायकः ॥ ३५८ ॥ सौराष्ट्राक्षरमंत्रश्च तथा रामषडक्षरः ॥ मंत्रराजो ध्रुवादिश्च प्रणवो वैदिको मनुः ॥ ३५९ ॥ वर्णत्रयाय दातव्या एते शूद्राय नो बुधैः ॥ सुदर्शनं पाशुपतमाग्नेयास्त्रं नृकेसरी ॥ वर्णद्वयाय दातव्या नान्यवर्णे कदाचन ॥ ३६० ॥ छिन्नमस्ता च मातंगी त्रिपुरा कालिका शिवः ॥ लघुश्यामा कालरात्रिर्गोपालो जानकीपतिः ॥ ३६१ ॥ उग्रतारा भैरवश्च देया वर्णचतुष्टये ॥ मृगीदृशां विशेषेण मंत्रा ये ते सुसिद्धिदाः ॥ ३६२ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा नार्योऽधिकारिणः ॥ श्रद्धावंतो देवगुरुद्विजपूजासु सर्वथा ॥ ३६३ ॥ मायां कामं श्रियं वाचं प्रदद्यान्मुखजन्मने ॥ मायामृते बाहुजेभ्य ऊरुजेभ्यः श्रियं गिरम् ॥ ३६४ ॥ वाणीबीजं तु शूद्रेभ्योन्येभ्यो वर्म वषण्नमः ॥ ३६५ ॥ (कुलार्णवे) दासस्य शिवभक्तस्य हितप्रियकरस्य च ॥ शुद्रस्यापि प्रदातव्यं नमोंतं प्रणवं विना ॥ ३६६ ॥ विना हि प्रणवं मन्त्रः स्त्रीशूद्राणां प्रकीर्तितः ॥ प्रणवेन समायुक्तास्तन्मंत्राश्च विषोपमाः ॥ ३६७ ॥ (आगमेपि) स्वाहाप्रणवसंयुक्तं मंत्रं शूद्रे ददेद्द्विजः ॥ शूद्रश्चांडालतामेति विप्रः शूद्रत्वमेव हि ॥ ३६८ ॥ अथ मंत्राणां पुंस्त्रीनपुंसकविचारः ॥ (शरदा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिलके) पुंमंत्रा हुंफडंतः स्युर्द्विठांतास्तु स्त्रियो मताः ॥ नपुंसका नमोंताः स्युरित्युक्ता मनवस्त्रिधा ॥ ३६९॥ (मंत्रमहोदधौ) पुंस्त्रीनपुंसकाः प्रोक्ता मनवस्त्रिविधा बुधैः ॥ वषडंता फडंताश्च पुमांसो मनवः स्मृताः ॥ ३७० ॥ वौषट् स्वाहांतगा नार्यो हूंनमोंता नपुंसकाः ॥ वश्योच्चाटनरोधेषु पुमांसः सिद्धिदायकाः ॥ ३७१ ॥ क्षुद्रकर्मरुजां नाशे स्त्रीमंत्राः शीघ्रसिद्धिदाः ॥ अभिचारे स्मृता क्लीबा एवं ते मनवस्त्रिधा ॥ ३७२ ॥ (अग्निचन्द्रसम्बंधिमंत्रा ग्रंथांतरे) प्रणवाक्षररेफहकारप्राया मंत्रा आग्नेयाः ॥ इन्द्वामृताक्षरप्राया मंत्राः सौम्याः सूर्ये वहति ॥ आग्नेयानां प्रबोधकालश्चन्द्रे सौम्यानाम् ॥ स्वप्रबोधकाले मंत्रग्रहणे जपे च कृते तात्कालिकसिद्धिः स्यादेवेति ॥ ३७३ ॥ (बीजमंत्रादिप्रकारो मंत्रमहोदधौ) बीजमंत्रास्तथा मंत्रा मालामंत्रास्तथापरे ॥ त्रिधा मंत्रगणाः प्रोक्ता बुधैरागमवेदिभिः ॥ ॥ ३७४ ॥ बीजमंत्रा दशार्णांतास्ततो मंत्रा नखावधिः ॥ विंशत्यधिकवर्णा ये मालामंत्रास्तु ते स्मृताः ॥ ३७५ ॥ बाल्ये वयसि सिद्ध्यंति बीजमंत्रा उपासितुम् ॥ मंत्राः सिद्धा यौवने तु मालामंत्राश्च वार्द्धके ॥ ३७६ ॥ उक्तान्यस्यामवस्थायामभीष्टप्राप्तये सुधीः ॥ बीजमंत्रादिमंत्राणां द्विगुणं जपमाचरेत् ॥ ३७७ ॥ (गुप्तचैतन्यशक्तियुक्तमंत्राः शिवोपि) गुप्तवीर्याश्च ये मंत्रा न दास्यंति फलं प्रिये ॥ मंत्राश्चैतन्यसहिताः सर्वसिद्धिकराः स्मृताः ॥ ३७८ ॥ चैतन्यरहिता मंत्रा प्रोक्ता वर्णास्तु केवलाः ॥ फलं नैव प्रयच्छंति लक्षकोटिजपादपि ॥ ३७९ अथ कामनापरत्वेन मंत्रादौ बीजनिर्णयः ॥ (मालिनीविजये) यदि दोषे तु सर्वत्र मायाकाममथापि वा ॥ क्षिप्त्वा ह्यादौ श्रियं दद्यात्सर्वदोषविमुक्तये ॥ ३८० ॥ प्रणवो भुवनेशानि रमाबीजमनोभवम् ॥ जीवनं सर्वमंत्राणामित्याहुर्भगवाञ्छिवः ॥ ३८१ ॥ श्रीबीजाद्यं यदा जप्यं तदा लक्ष्मीरचंचला ॥ कामाद्यं जपनादेव सर्वलोकं वशं नयेत ॥

For Private And Personal Use Only

॥ ३८२॥ वाग्गादिजपनादेव वाक्सिद्धिर्जायतेचिरात् ॥ शक्तिबीजादिको मंत्रो निर्दोषमचिराद्दिशेत् ॥ ३८३ ॥ पुटनात्प्रणवाभ्यां तु मोक्षमाप्नोति निश्चितम् ॥ एवं मंत्रवरं जप्त्वा किं न सिध्यति मंत्रवित् ॥ ३८४ ॥ अथ कामनापरत्वेन मंत्रांते पल्लव निर्णयः (हरगौरीतंत्रे) मंत्राणां पल्लवो वासो मंत्राणां प्रणवः शिरः ॥ शिरःपल्लवसंयुक्तो मंत्रः कामदुघो भवेत् ॥ ३८५ ॥ वश्याकर्षणहोमेषु स्वाहांतः सिद्धिदायकः ॥ वौषट्पल्लवसंयुक्तो मंत्रः पुष्ट्यादिसाधकः ॥ ३८६ ॥ हुंकारपल्लवोपेतो मारणे ब्राह्मणं विना ॥ यंत्रभंजनकार्येषु सुघोरभयनाशने ॥ ३८७ ॥ वषडंतः प्रकल्प्यस्तु ग्रहबाधाविनाशकः ॥ उच्चाटने तु संप्रोक्तो मंत्रः फट्पल्लवान्वितः ॥ ३८८ ॥ (मनुमते)॥ वषड् वश्ये फडुच्चाटे हुंस्तंभे खे च मारणे ॥ स्वाहा तुष्टयै ठःठः पुष्टयै नमः सर्वार्थसाधने॥ ॥ ३८९ ॥ मतांतरे ॥ वषड् वश्ये फडुच्चाटे हुंद्वेषे खे च मारणे ॥ टस्तंभ वौषडाकर्षं नमः संपत्तिहेतवे ॥ स्वाहा पुष्टिस्तथा तुष्टिरित्येते मंत्रपल्लवाः ॥ ३९० ॥ अथ मंत्राणां छिन्नादिकदोषनिर्णयः ॥ (शारदातिलके) छिन्नादिदुष्टा मंत्रास्ते पालयंति न साधकम् ॥ छिन्नो रुद्धः शक्तिहीनः पराङ्मुख उदीरितः ॥ ३९१ ॥ बधिरो नेत्रहीनश्च कीलितस्तंभितस्तथा ॥ दग्धस्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः ॥ ३९२ ॥ भेदितश्च सुसुप्तश्च मदोन्मत्तश्च मूर्छितः ॥ हतवीर्यश्च हीनश्च प्रध्वस्तो बालकस्ततः ॥ ३९३ ॥ कुमारश्च युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा ॥ निर्बीजः सिद्धिहीनश्च मंदः कूटस्तथा पुनः ॥ ३९४ ॥ निरंशकः सत्त्वहीनः केकरो बीजहीनकः ॥ धूमिलालिंगितौ स्यातां मोहितस्तु क्षुधार्तकः ॥ ३९५ ॥ अतिदृप्तोंगहीनः स्यादतिक्रुद्धः समीरितः ॥ अतिक्रूरश्च सव्रीडः शांतमानस एव च ॥ ३९६ ॥ स्थानभ्रष्टस्तु विकलः सोतिवृद्धः प्रकीर्तितः॥ निःस्नेहः पीडितश्चापि वक्ष्याम्येषांच लक्षणम् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥३९७॥ (अथ लक्षणानि) मनोर्यस्यादिमध्यांतेष्वानिलं बीजमुच्यते ॥ संयुक्तं वापि युक्तं वा स्वराक्रांतं त्रिधा पुनः ॥ ३९८ ॥
चतुर्धा पंचधा वाथ समंत्रश्छिन्नसंज्ञकः ॥ आदिमध्यावसानेषु भूबीजद्वंद्वलांछितः ॥३९९॥ रुद्धमंत्रः स विज्ञेयो भुक्तिमुक्तिविवर्जितः
॥ ४०० ॥ मायात्रितत्त्वं श्रीबीजं रावहीनश्च यो मनुः ॥ शक्तिहीनः स कथितो यस्य मध्ये न विद्यते ॥ ४०१ ॥ कामबीजं मुखे
माया शिरस्यंकुशमेव च ॥ असौ पराङ्मुखः प्रोक्तो हकारो बिंदुसंयुतः ॥ ४०२ ॥ आद्यंतमध्येष्विंदुर्वा स भवेद्बधिरः स्मृतः ॥ पंचवर्णो
मनुर्यः स्याद्रेफार्केंदुविवर्जितः ॥ ४०३ ॥ नेत्रहीनः स विज्ञेयो दुःखशोकामयप्रदः ॥ आदिमध्यावसानेषु हसः प्रासाद वाग्भवौ ॥
रुकारो बिन्दुमात्र् जीवो रावश्चापि चतुष्फलः ॥ ४०४ ॥ माया नमामि च पदं नास्ति यस्मिन्स कीलितः ॥ एकं मध्ये द्वयं मूर्द्धि
यस्मिन्नस्त्रपुरंदरौ ॥४०५॥ विद्यते स तु मंत्रः स्यात्स्तंभितः सिद्धिरोधकः ॥ वह्निर्वायुसमायुक्तो यस्य मंत्रस्य मूर्द्धनि ॥४०६॥ सप्तधा
दृश्यते तं तु दग्धं मन्वीत मंत्रवित् ॥ अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टभिर्दृश्यतेक्षरैः ॥४०७॥ त्रस्तः सोभिहितो यस्य मुखे न प्रणवः स्थितः ॥
शिवो वा शक्तिरथवा भीताख्यः स प्रकीर्तितः ॥४०८॥ आदिमध्यावसानेषु भवेत्यार्णचतुष्टयम् ॥ अस्य मंत्रः स मलिनो मंत्रवित्तं विवर्जयेत् ॥
॥ ४०९ ॥ यस्य मध्ये दकारो वा क्रोधो वा मूर्द्धनि द्विधा ॥ अस्त्रं तिष्ठति मंत्रश्च स तिरस्कृत ईरितः ॥ ४१० ॥ स्योद्वयं हृदयं शीर्षे
वषड् वौषट् च मध्यतः ॥ यस्यासौ भेदितो मंत्रस्त्याज्यः सिद्धिषु सूरिभिः ॥४११॥ त्रिवर्णो हंसहीनो यः सुषुप्तः समुदाहृतः ॥ मंत्रो वाप्यथ वा
विद्या सप्ताधिकदशाक्षरः ॥४१२॥ फट्कारपंचकादिर्यो मदोन्मत्त उदीरितः ॥ तद्वदस्त्रं स्थितं मध्ये यस्य मंत्रः समूर्च्छितः ॥ ४१३ ॥
विरामस्थानगं यस्य हृतवीर्यस्सकथ्यते ॥ आदौ मध्ये तथा मूर्द्धि चतुरस्त्रयुतो मनुः ॥४१४॥ ज्ञातव्यो हीन इत्येष यः स्यादष्टादशाक्षरः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकोनविंशत्यर्णो वा यो मंत्रस्तारसंयुतः॥ ४१५॥ हल्लेखांकुशबीजाढ्यस्तं भ्रष्टं प्रचक्षते सप्तवर्णो मनुर्बालः कुमारोष्टाक्षरः स्मृतः॥ ४१६॥
षोडशार्णो युवा प्रौढश्चत्वारिंशल्लिपिर्मनुः ॥ त्रिंशदर्णश्चतुःषष्टिवर्णो मंत्रःशताक्षरः॥ ४१७॥ चतुः शताक्षरश्चापि वृद्ध इत्यभिधीयते ॥ नवाक्ष
रो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः ॥ ४१८ ॥ अस्यावसाने हृदयं शिरोमंत्रश्च मध्यतः ॥ शिखी वर्म च न स्यातां वौषट् फट्कार एव वा ॥
॥ ४१९॥ शिवशक्त्यर्णहीनो वा स निर्बीज इतीरितः॥ एषु स्थानेषु फट्कारः षोढा यस्मिन्प्रदृश्यते॥ ४२०॥ स मंत्रः सिद्धिहीनः स्यान्मंदः
पंक्त्यक्षरो मनुः॥ कूट एकाक्षरो मंत्रः स एवोक्तो निरंशकः॥ ४२१॥ द्विवर्णः सत्त्वहीनः स्याच्चतुर्वर्णश्च केकरः॥ षडक्षरो बीजहीनः सार्धसप्ताक्ष
रो मनुः ॥ ४२२ ॥ सार्द्धद्वादशवर्णो वा धूमितः स तु निंदितः ॥ सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः ॥ ४२३॥ विंशत्यर्णस्त्रिंशदर्णो यः
स्यादालिंगितस्तु सः ॥ द्वात्रिंशदक्षरो मंत्रो मोहितः परकीर्तितः ॥ ४२४॥ चतुर्विंशतिवर्णो यः सप्तविंशतिवर्णकः॥ क्षुधार्तः स तु विज्ञेयो
यश्चतुस्त्रिंशदर्णकः ॥ ४२५॥ एकादशाक्षरो वापि पंचविंशतिवर्णकः ॥ त्रयोविंशतिवर्णो वा मंत्र दृप्त उदाहृतः ॥ ४२६॥ षड्विंशत्यक्षरो
मंत्रः षट्त्रिंशद्वर्णकस्तथा ॥ त्रिंशदेकोनवर्णो वाप्यंगहीनोऽभिधीयते ॥ ४२७ ॥ अष्टाविंशत्यक्षरो य एकत्रिंशदथापि वा ॥ अतिक्रूरः स
कथितो निंदितः सर्वकर्मसु ॥ ४२८ ॥ त्रिंशदक्षरको मंत्रस्त्रयस्त्रिंशदथापि वा ॥ अतिक्रूरः स गदितो निंदितः सर्वकर्मसु ॥ ४२९ ॥
ऊनचत्वारिंशदर्णः सप्तत्रिंशदथापि वा ॥ कथयंत्यतिरिक्तं तं मंत्रं मंत्रविशारदाः ॥ ४३० ॥ चत्वारिंशकमारभ्य द्विषष्टिर्या
वदापयेत् ॥ तावत्संख्या निगदिता मंत्राः सव्रीडसंज्ञकाः ॥ ४३१ ॥ पंचषष्ट्यक्षरा ये स्युर्मंत्रास्ते शांतमानसाः ॥ एको
नशतपर्यंतं पंचषष्ट्यक्षरादितः ॥ ४३२ ॥ ये मंत्रास्ते निगदिता स्थानभ्रष्टाह्वया बुधैः ॥ त्रयोदशाक्षरा ये स्युर्मंत्राः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चदशाक्षराः ॥ ४३३ ॥ विकलास्तेभिधीयंते शतं सार्धशतं तथा ॥ शतद्वयं द्विनवतिरेकहीनाथ वापि सा ॥ ४३४ ॥ शतत्रयं वा यत्संख्या निःस्नेहास्ते समीरिताः ॥ चतुःशतान्यथारभ्य यावद्वर्णसहस्रकम् ॥४३५॥ अतिवृद्धाः स योगेषु परित्याज्याः सदा बुधैः॥ सहस्रार्णाधिका मंत्रा दंडका पीडिताह्वयाः ॥ ४३६ ॥ द्विसहस्राक्षरा मंत्राः खंडशः शतधा कृताः ॥ ज्ञातव्या स्तोत्ररूपास्ते मंत्रा एते यथा स्थिताः ॥ ४३७॥ तथा विधाश्च बोद्धव्या मंत्रिभिः काम्यकर्मसु ॥ दोषानिमानविज्ञाय यो मंत्रान्भजेत जडः॥४३८॥ सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि॥इत्यादिदोषदुष्टांस्तान्मंत्रानात्मनि योजयेत् ॥ शोधयेद्रुद्धपवनो बद्धया योनिमुद्रया ॥४३९॥ अथ च्छिन्नत्वादिकदोषनिवारणार्थं दश संस्काराः (मंत्रमहोदधौ) मंत्रश्चरणसंपन्नो मंत्रो हि फलदायकः ॥ किं होमैः किं जपैश्चैव किं मंत्रन्यासविस्तरैः ॥ ४४० ॥ छिन्नत्वादिकदोषा ये पंचाशन्मंत्रसंस्थिताः ॥ तैर्दोषैः सकला व्याप्ता मनवः सप्तकोटयः ॥ ४४१ ॥ अतस्तद्दोषशांत्यर्थं संस्कारदशकं चरेत् ॥ जननं जीवनं पश्चात्ताडनं बोधकं तथा ॥ ४४२॥ अथाभिषेको विमलीकरणाप्यायने पुनः ॥ तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रियाः ॥४४३॥ (अथ जननसंस्कारः) भूर्जपत्रे लिखेत्सम्यक् त्रिकोणं रोचनादिभिः ॥ वारुणं कोणमारभ्य सप्तधा विभजेत समम् ॥४४४॥एवमीशाग्निकोणाभ्यां जायंते तत्र योनयः ॥ नववेदमितास्तत्र विलिखेन्मातृकां क्रमात् ॥४४५॥ अकारादिहकारांतामाशादिवरुणावधिः ॥ देवीं तत्र समावाह्य पूजयेच्चंदनादिभिः॥ततः समुद्धरेन्मंत्रं जननं तदुदीरितम् ॥४४६॥ (अथ द्वितीयो दीपनसंस्कारः)पजो हंसपुटस्यास्य सहस्रं दीपनं स्मृतम्॥४४७॥(अथ तृतीयो बोधनसंस्कारः)॥नभोवह्नींदुयुक्ताद्धिसंपुटस्य जपो मनोः॥सहस्रपंचकमितो बोधनं तत् स्मृतं बुधैः॥४४८॥ (चतुर्थं ताडनमाह) सहस्रं प्रजपेदत्र पुटितं ताडनं हि तत्॥(पंचमम् अभिषेकमाह)

For Private And Personal Use Only

वाग्धंसतारैर्जतेन सहस्त्रं पयसा मनुम् ॥ अभिषिंचते वागाद्यैरभिषेकोयमीरितः ॥ ४४९ ॥ षष्ठं विमलीकरणमाह ॥ हरिवह्न्यन्वितस्तारो वषडंतो ध्रुवादिकः ॥ सहस्त्रं तत्पुटो जप्यो विमलीकरणे मनुः ॥ ४५० ॥ (सप्तमं जीवनमाह) स्वधावषट्पुटं जप्यात्सहस्त्रं जीवने मनुम् ॥ (अष्टमं तर्पणमाह) क्षीराज्ययुक्तपाथोभिस्तर्पणे तर्पयेन्मनुम् ॥ ४५१ ॥ (नवमं गोपनमाह) जपेन्मायापुटं मंत्रं सहस्त्रं गोपनं हितम् ॥ (दशममाप्यायनमाह) बाला तार्तीयबीजेन गगनाद्येन संपुटम् ॥ सहस्त्रं प्रजपेन्मंत्रमेतदाप्यायनं मतम् ॥ ४५२ ॥ संस्कारदशकं प्रोक्तं मनूनां दोषनाशकम् ॥ ४५३ ॥ (अथ शारदातिलकोक्ता दश संस्काराः) कर्मण्यतिजडा मंत्रा मंत्रिणां योजिता अपि ॥ तस्मात्तद्दोषनाशाय कर्तव्याः संस्क्रिया दश ॥ ४५४ ॥ मंत्राणां दश संस्काराः कथ्यन्ते सिद्धिदायिनः ॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥ ४५५ ॥ अथाभिषेको विमलीकरणाप्यायनेपुनः ॥ तर्पणं दीपनं गुप्तिश्चैताः स्युर्मंत्रसंस्क्रियाः॥ ४५६॥ (जननमाह) मंत्राणां मातृकामध्यादुद्धारो जननं स्मृतम् ॥ ४५७ ॥ (जीवनमाह) प्रणवांतारितान्कृत्वा मंत्रवर्णाञ्जपेत्सुधीः ॥ एतज्जीवनमित्याहुर्मंत्रतंत्रविशारदाः ॥ ४५८ ॥ (ताडनमाह) मंत्रवर्णान्समालिख्य ताडयेच्चन्दनाम्भसा ॥ प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतम् ॥ ४५९ ॥ (बोधनमाह) विलिख्य मंत्रं तं मंत्री प्रसूनैः करवीरजैः ॥ तन्मंत्राक्षरसंख्यातैर्हन्याद्रेफेन बोधनम् ॥ ४६०॥ (अभिषेकमाह) स्वतन्त्रोक्तविधानेन मंत्री मंत्रार्णसंख्यया ॥ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये ॥ ४६१ ॥ (विमलीकरणमाह) संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत् ॥ मंत्रे मलत्रयं मंत्री विमलीकरणं त्विदम् ॥ ४६२ ॥ (आप्यायनमाह) तारं व्योमाग्निमनुयुग्दंडी ज्योतिर्मनुर्मतः ॥ कुशोदकेन जप्तेन प्रत्यर्णप्रोक्षणं मनोः ॥ तेन मंत्रेण विधिवदेतदाप्यायनं मतम् ॥ ४६३॥ (तर्पणमाह)

५

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंत्रेण वारिणा सिंचेन्मंत्रेण तर्पणं स्मृतम् ॥४६४॥ (दीपनगोपनमाह) परमापरमायोगो गोपनदीपनमुच्यते ॥ जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनम् ॥ ४६५ ॥ संस्कारा दश ते प्रोक्ताः सर्वतंत्रेषु गोपिताः ॥ यान् कृत्वा संप्रदायेन मंत्री वांछितमश्नुते ॥ ४६६ ॥ तांबूले भूर्जपत्रे वा लिखित्वा च कर्तव्याः ॥ (अथ शंकरोक्ताः सप्त उपायाः) भ्रामणं बोधनं वश्यं पीडनं पोषशोषणे ॥ दहनांतं क्रमात् कुर्यात्ततः सिद्धो भवेद्ध्रुवम् ॥ ४६७ ॥ भ्रामणं वायुबीजेन प्रथमं क्रमयोगतः ॥ तन्मत्रं यंत्रमालिख्य सिक्तकर्पूरचन्दनैः ॥ ४६८ ॥ उशीरचन्दनाभ्यां तु यंत्रं संपुटमालिखेत् ॥ पूजनाज्जपनाद्धोमाद्भ्रामितः सिद्धिदो भवेत् ॥४६९॥ भ्रामितो यदि नो सिद्धो बोधनं तस्य कारयेत् ॥ सा[1]रस्वतेन बीजेन संपुटीकृत्य संजपेत् ॥ ४७० ॥ एवं रुद्धो भवेत्सिद्धो न चेदेतद्वशी कुरु ॥ अलक्तं चन्दनं कुष्ठं हारिद्रा मादनं शिला ॥ ४७१ ॥ एतैस्तु यंत्रमालिख्य भूर्जपत्रे सुशोभने ॥ धृत्वा कंठे भवेत् सिद्धः पीडनं तस्य कारयेत् ॥ ४७२ ॥ अधरोत्तरयोगेन पदानि परिजाप्य वै ॥ ध्यायेच्च देवतां तद्वदधरोत्तररूपिणीम् ॥ ४७३ ॥ विद्यामा[2]दित्यदुग्धेन लिखित्वाक्रम्य चांघ्रिणा ॥ तथाभूतेन मंत्रेण होमः कार्यो दिनेदिने ॥ ४७४ ॥ पीडितो ल[3]ज्जयाविष्टः सिद्धिः स्यादथ पोषयेत् ॥ बालायां त्रि[4]तयं बीजमाद्यंते तस्य योजयेत् ॥ ४७५ ॥ गोक्षीरमधुनालिख्य विद्यां पाणौ विधारयेत् ॥ पोषितोयं भवेत् सिद्धो न चेत्कुर्वीत शोषणम् ॥ ॥ ४७६ ॥ द्वाभ्यां च वायुबीजाभ्यां मंत्रं कुर्याद्विदर्भितम् ॥ एषा विद्या गले धार्या लिखित्वा वरभस्मना ॥ ४७७ ॥ शोभितो न च सिद्ध्येच्च दहनीयोग्निबीजतः ॥ आग्नेयेन तु बीजेन मंत्रस्यैकैकमक्षरम् ॥ ४७८ ॥ आद्यंतमथ ऊर्द्ध्वं च योजयेद्दाहकर्मणि॥ब्रह्मवृक्षस्य

१ सारस्वतबीजम् ऐं । २ आदित्योऽर्कः । ३ ह्रीं । ४ ऐं क्लीं सौः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैलेन मंत्रमालिख्य धारयन् ॥ ४७९ ॥ कंठदेशे ततो मंत्रासिद्धिः स्याच्छंकरोदिता ॥ इत्येतत्कथितं सम्यक् केवलं तव भक्तितः ॥ एकेनैव कृतार्थः स्याद्बहुभिः किमु सुव्रते ॥ ४८० ॥ अथोत्कीलनविधिः (मंत्रमहोदधौ) शिवेन कीलिता विद्या तदुत्कीलनमुच्यते॥ मायातारपुटां मंत्री जप्यादष्टोत्तरं शतम् ॥४८१॥ मंत्रस्यादौ तथैवांते भवेत्सिद्धिप्रदा तु सा ॥ एष नूनं विधिर्गोप्यः सिद्धिकामेन मंत्रिणा ॥ ४८२ ॥ (तंत्रांतरे) भूर्जपत्रेऽष्टगंधेन[1] अष्टोत्तरशतं मूलं विलिख्य पंचोपचारैः संपूज्य ब्राह्मणान् भोजयेत् ॥ ततस्ताम्रपात्रे जलमापूर्य प्रत्येकं क्षिपेत् ॥ अथवा नद्यादौ क्षिपेत् उत्कीलनं भवति ॥ ४८३ ॥ (अन्यत्) ॥ मृत्तिकया नराकारामिष्टदेवप्रतिमां कृत्वा प्राणान्संस्थाप्य ततो भूर्जपत्रेऽष्टगंधेन मंत्रं विलिख्य प्रतिमां हृदये संस्थाप्य मासांतरे पंचोपचारैः संपूजयेत् । अष्टोत्तरशतं मूलं च जपेत् मासांते गुरोराज्ञया नद्यादौ प्रवाहयेत् ॥ ब्राह्मणांश्च भोजयेत् तदा उत्कीलनं भवति ॥ ४८४ ॥ अथ पुरश्चरणनिर्णयः ॥ (मंत्रसिद्धभाण्डागारे) फलिष्यतीति विश्वासः सिद्धेः प्रथमलक्षणम् ॥ द्वितीयं श्रद्धया युक्तं तृतीयं गुरुपूजनम् ॥ ४८५ ॥ चतुर्थं समताभावं पञ्चमेन्द्रियनिग्रहम् ॥ षष्ठं च प्रतिमाहारं सप्तमं नैव विद्यते ॥४८६ ॥ (मंत्रमहोदधौ) निश्चयोत्साहधैर्याच्च तत्त्वज्ञानस्य दर्शनात् ॥ अल्पाशी त्यक्तसङ्गश्च षड्भिर्मंत्रः प्रसिध्यति ॥ ४८७ ॥ (कुलप्रकाशतंत्रे) उपदेशस्य सामर्थ्याच्छ्रीगुरोश्च प्रसादतः ॥ मंत्रप्रभावाद्भक्त्या च मंत्रसिद्धिः प्रजायते ॥ ४८८ ॥ (शिवेपि) मनःसंहारणं शौचं मौनं मंत्रार्थचिंतनम् ॥ अव्यग्रत्वमनिर्वेदो जपसिद्धेस्तु हेतवः॥४८९॥ (ग्रंथांतरे) अभ्यासात्सिद्धिमाप्नोति भोगयुक्तोपि मानवः ॥ सकलः साधितार्थोपि सिद्धो भवति भूतले॥ ४९०॥

---

१ गोरोचनम्, कर्पूरम्, गजमदः, मृगमदः, अगरम्, केसरम्, चन्दनद्वयं च इत्यष्टगंधः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वपन्नपि ॥ मंत्रैकशरणो विद्वान् मनसैवं समभ्यसेत ॥ न दोषो मानसे जापे सर्वदेशेपि सर्वदा ॥ ४९१ ॥ (मंत्रसिद्धिभांडागारे) प्रवासी बहुभक्षी च प्रजल्पी नियमारतः ॥ नीचसंगाच्च लौल्याच्च षड्भिर्मंत्रो न सिध्यति ॥ ४९२ ॥ (स्त्रीभोगत्यागे महत्फलं देवीभागवते) मैथुनञ्च तदालापं तद्गोष्ठीमपि वर्जयेत् ॥ कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ॥ ४९३ ॥ सर्वत्र मैथुनत्यागं ब्रह्मचर्यं प्रचक्षते ॥ राज्ञश्चैव गृहस्थस्य ब्रह्मचर्यमुदाहृतम् ॥ ४९४ ॥ ऋतुस्नातेषु दारेषु संगतिस्तु विधानतः ॥ संस्कृतायां सवर्णायामृतुं दृष्ट्वा प्रयत्नतः ॥ रात्रौ तु गमनं कार्यं ब्रह्मचर्यं हरेन्न वत ॥ ४९५ ॥ (शिवरहस्ये) व्यासाद्यैरपि दुर्वृत्तैः कृतः स्त्रीसंग्रहो मुदा ॥ दुर्लभः पुरुषाणां तु नित्यमिंद्रियनिग्रहः ॥ ४९६ ॥ विषयेभ्यस्तु सर्वेभ्यः स्त्रीरूपविषयो महान् ॥ पुमांसं मोहयत्येव विरक्तमपि सत्वरम् ॥ विषयेभ्यो निवृत्तिश्चेज्जितं तेन न संशयः ॥ ४९७ ॥ (पुरश्चरणे वणिग्दत्तधनं वर्ज्यं शिवरहस्ये) वणिग्दत्तेन वित्तेन तनुं यः पोषयिष्यति ॥ भुक्त्वा स नरकं घोरं प्रयात्येव न संशयः ॥ ४९८ ॥ (योगिनीहृदये) ॥ ईश्वर उवाच ॥ सर्वहिंसाविनिर्मुक्तः सर्वप्राणिहिते रतः ॥ सोऽस्मिञ्छास्त्रेऽधिकारी स्यात्तदन्ये भ्रष्टसाधकाः ॥ ४९९ ॥ (कुलार्णवे पंचमखंडे पंचदशोल्लासे) ॥ देव्युवाच ॥ कुलेश श्रोतुमिच्छामि पुरश्चरलक्षणम् ॥ स्थानाहारादिभेदेन वद मे परमेश्वर ॥ ५०० ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि यन्मा त्वं परिपृच्छसि ॥ तस्य श्रवणमात्रेण मंत्रतत्त्वं प्रकाशते ॥ ॥ ५०१ ॥ जपयज्ञात्परो यज्ञो नापरोस्तीह कश्चन ॥ तस्माज्जपेन धर्मार्थकाममोक्षं च साधयेत् ॥ ५०२ ॥ सर्वपादान् परित्यज्य मंत्रपादं समाचरेत् ॥ आब्रह्मजीवे दोषाश्च नियमातिक्रमोद्भवाः ॥ ५०३ ॥ ज्ञानाज्ञानकृताः सर्वे प्रणश्यंति यथा प्रिये ॥ संसारे दुःखभूयिष्ठे यदीच्छेत्सिद्धिमात्मनः ॥ ५०४ ॥ पंचांगोपासनेनैव मंत्रजापी सुखं व्रजेत् ॥ मंत्रं यंत्रं पंजरं च स्तोत्रं नामसहस्रकम् ॥ ५०५ ॥ पूजा त्रैका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिकी नित्यं जपस्तर्पणमेव च॥होमो ब्राह्मणभुक्तिश्च पुरश्चणमुच्यते ॥ ५०६ ॥ यद्यदंगं च विहितं तत्संख्याद्विगुणं जपम् ॥ कुर्या
द्धि त्रिचतुःपंचसंख्यं वा साधकः प्रिये ॥ ५०७ ॥ कुर्वीत सांगसिद्ध्यर्थं तदशक्तेन भक्तितः ॥ सर्वदांगविहीनस्य मंत्री नेष्टमवा
नुयात् ॥ ५०८ ॥ सम्यक्सिद्धैकमंत्रस्य :पंचांगसेवनेन च ॥ सर्वमंत्राश्च सिध्यंति तत्प्रभावात्कुलेश्वरि ॥ ५०९ ॥ उपदेशस्य
सामर्थ्यागच्छेद्गुरोश्च प्रभावतः ॥मंत्रप्रतापाद्भक्तेश्च मंत्रसिद्धिः प्रजायते ॥ ५१० ॥ सिद्धमंत्रं गुरोर्लब्ध्वा मंत्रोयं शीघ्रसिद्धये ॥
पूर्वजन्मकृताभ्यासान्मंत्रोयं शीघ्रसिद्धिदः॥५११॥दीक्षापूर्वं कुलेशानि पारंपर्यक्रमागतम्॥न्यासलब्धं तु यन्मंत्रं तच्च सिद्धं न संशयः ॥
॥ ५१२ ॥ मासमात्रं जपेन्मंत्रं भूतलिप्यर्णसंपुटम् ॥ क्रमोत्क्रमात्सहस्रं तु तस्य सिद्धो भवेन्मनुः ॥ ५१३ ॥ मण्डलं
पूजयेन्मंत्रं मातृकाक्षरसंपुटम्॥अनुलोमविलोमेन मंत्रसिद्धिः प्रजायते॥५१४॥विषद्वाक्षरसंयुक्तं मातृकाक्षरसंपुटम्॥क्रमोत्क्रमं तु तज्जप्त्वा
मासात्सिद्धो भवेन्मनुः ॥५१५॥ मातृकाजपमात्रेण मंत्राणां कोटिकोटयः ॥ जागृताः स्युर्न संदेहो यत्तत्सर्वं तदुद्भवम् ॥५१६॥ अनेन
कोटिमंत्रेण चित्तव्याकुलकारकम्॥मंत्रगुरुरूपाख्यातमेकं स्यात्सर्वसिद्धिदम्॥५१७॥यदीच्छया श्रुतं मंत्रंच्छद्मनापिच्छलेन वा॥यत्र स्थि
तं च वाग्ध्वस्तं तज्जपेन ह्यनर्थकृत् ॥ ५१८ ॥ पुस्तके लिखितान्मंत्रानालोक्य प्रजपन्ति ये॥ब्रह्महत्यासमं तेषां पातकं परिकीर्तितम् ॥
॥५१९॥स्नानासनप्राणायामन्यासमालाजपक्षणम्॥मनसा यः स्मरेत्स्तोत्रं वचसा वा मनुं पठेत् ॥५२०॥ उभयोर्निष्फलं देवि भिन्नभां
डोदकं यथा॥शाणोल्लीढानि शस्त्राणि यथा स्युर्निशितानि वै ॥ ५२१ ॥ मंत्राश्च मूर्तिमायांति संस्कारैर्दशभिस्तथा॥तेषां हविष्यं शाका
दि हविष्याणि फलं पयः ॥ ५२२॥ मूलं सक्तुर्यवान्नं च ह्यष्टान्येतानि मंत्रिणाम् ॥ यथान्नपानपूगस्य कुरुते धर्मसंचयम् ॥ ५२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्नदातुः फलस्यार्द्धं कर्तुश्चार्द्धं न संशयः ॥ तस्मात्सर्वप्रयत्नेन परान्नं वर्जयेत्सुधीः ॥५२४॥ पुरश्चरणकर्तुश्च करो दग्धः प्रतिग्रहैः ॥ मनो दग्धं परस्त्रीभिः कार्यसिद्धिः कथं भवेत् ॥५२५॥मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र मारुतः॥ न सिध्यंति वरारोहे लक्षकोटिजपादपि ॥ ५२६ ॥ वादार्थं पठ्यते विद्या परार्थः क्रियते जपः ॥ ख्यत्यर्थं दीयते दानं कथं सिद्धिर्वरानने ॥५२७॥ धनार्थं गम्यते तीर्थं दंभार्थं क्रियते तपः ॥ काम्यार्थं देवतायात्रा कथं सिद्धिर्वरानने ॥ ५२८ ॥ अनित्येन तु देहेन न्यासं देवार्चनं जपम् ॥ होमं कुर्वंति ये मूढा सर्वं भवति निष्फलम् ॥५२९॥ तपोर्चनादिकं सर्वमपवित्रं भवेत् प्रिये॥मलिनांगपरा केशा मुखं दुर्गंधसंयुतम् ॥ यो जपेत्तं तदा हन्याद्देवता सुजुगुप्सितम् ॥ ५३० ॥ (मंत्रमहोदधौ) भूशय्यां ब्रह्मचर्यं च त्रिकालं देवतार्चनम्॥नैमित्तिकार्चनं देवस्तुतिं विश्वासमाश्रयेत ॥५३१॥ प्रत्यहंप्रत्यहं तावन्नैव न्यूनाधिकं क्वचित्॥एवं जपं समाप्यान्ते दशांशं होममाचरेत् ॥ ५३२ ॥ तत्तत्कल्पोदितैर्द्रव्यैस्तदाधानमुदीर्यते॥प्राणायामं षडंगं च कृत्वा मूलेन मंत्रवित् ॥ ५३३॥ हविष्यं निशि भुंजीत त्रिःस्नाय्यभ्यंगवर्जितः ॥ व्यग्रतालस्यनिष्ठीवक्रोधं पादप्रसारणम् ॥ ५३४ ॥ अन्यभाषां त्यजेच्चैव जपकाले सदा सुधीः ॥ स्त्रीशूद्रभाषणं निद्रां तांबूलं शयनं दिवा ॥ प्रतिग्रहं नृत्यगीतं कौटिल्यं वर्जयेत्सदा ॥ ५३५ ॥ (तंत्रांतरेपि) लवणं पललं चैव क्षारं क्षौद्रं रसांतरम् ॥ माषमुद्गमसूरांश्च कोद्रवांश्चणकानपि ॥ ५३६ ॥ असद्भाषणमन्याय्यं वर्जयेदन्यपूजनम्॥विना श्रमोचितं नित्यमथ नैमित्तिकश्चरेत ॥५३७॥ तांबूलं गंधलेपं च पुष्पधारणमेव च॥मैथुनं तत्कथालापं तद्गोष्ठीं परिवर्जयेत्॥५३८॥असंकल्पितकृत्यश्च ह्यनिवेदितभोजनम्॥न छिंद्यान्नखरोमाणि न स्पृशेद्यदमंगलम् ॥ ५३९ ॥ नार्द्रवस्त्रो जपं कुर्याद्धोमं दानं प्रतिग्रहम्॥सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतम् ॥ ५४० ॥ न पदा पादमा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रम्य तथैव हि पदा करौ॥न चासमाहितमना न च संश्रावयञ्जपेत् ॥ ५४१ ॥ न च चंक्रमणैश्चैव न पार्श्वे चावलोकयेत्॥न प्रवृत्तो न जल्पंश्च न प्रावृतशिरास्तथा ॥५४२॥ अथानुष्ठाने छिक्कादिदोषनिवारणविधिः (योगिनीहृदये) पतितानामंत्यजानां दर्शने भाषणे क्षुते॥ क्षुतेऽधोवायुगमने जृंभणे जपमुत्सृजेत् ॥५४३॥ तथाचम्य च तत्प्रान्तौ प्राणायामं षडंगकम्॥कृत्वाचम्य जपेच्छेषं यद्वा सूर्यादिदर्शनम्॥ ॥ ५४४ ॥ (तंत्रांतरेपि) सकृदुच्चारिते शब्दे प्रणवं समुदीरयेत् ॥ प्रोक्तपामरशब्देपि प्रणवं सकृदुच्चरेत् ॥५४५॥ (याज्ञवल्क्ये) परिवाग्यमलोपः स्याज्जपादिषु कथंचन॥व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययम्॥५४६॥क्षुते निष्ठीवने चैव दंतोच्छिष्टे तथानृते॥पतितानां च संभाषे कर्णश्च दक्षिणं स्पृशेत्॥५४७॥ अग्निरापश्च वेदश्च सोमसूर्यानिलास्तथा॥सर्व एव हि विप्रस्य कर्णे तिष्ठंति दक्षिणे ॥५४८॥ (सनत्कुमारसंहितायाम्) जपकाले यदा पश्येदशुचिं मंत्रवित्तमः ॥ प्राणायामं तदा कुर्यात्ततः शेषं समाचरेत् ॥ ५४९ ॥ यदा चैव पठेन्मंत्री स्वयमप्यशुचिःपुनः ॥ आचम्य प्रयतो भूत्वा न्यासं पूर्ववदाचरेत् ॥ ५५० ॥ (पुरश्चरणे सूतकनिर्णयः) विनियोगं समारभ्य यथायथमथाचरेत्॥पुरश्चरणमध्ये तु सूतकं नैव विद्यते ॥ ५५१ ॥ (सूतकनिवृत्तिः) जातसूतकमादौ स्यादंते वैमृतसूतकम्॥सूतकद्वयनिर्मुक्तः स मंत्रः सर्वसिद्धिदः ॥ ५५२ ॥ तस्माद्देवि प्रयत्नेन ध्रुवेण पुटितं ध्रुवम् ॥ अष्टोत्तरशतं वापि सप्तवारं जपेदतः ॥ जपांते च ततो जप्त्वा चतुर्वर्गफलाप्तये ॥ ५५३ ॥ (तत्रैव) ब्रह्मबीजं मनौ दत्त्वा चाद्यंते च महेश्वरि॥सप्तवारं जपेन्मंत्री सूतकद्वयमुक्तये ॥ ५५४ ॥ पुरश्चरणादौ गायत्रीजपावश्यकता ॥ (मंत्रमहोदधौ) सर्वे शाक्ता द्विजाः प्रोक्ता न शैवा न च वैष्णवाः॥ आदिदेवीमुपासंते गायत्रीं वेदमातरम्॥तस्मादादौ प्रयत्नेन गायत्रीं प्रयुतं जपेत् ॥ ५५५ ॥ (तंत्रांतरे) यस्य कस्यापि मंत्रस्य पुरश्चरणमारभेत् ॥ व्याहृतित्रयसंयु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्तां गायत्रीं चायुतं जपेत्॥विना जप्त्वा तु गायत्रीं तत्सर्वं निष्फलं भवेत् ॥ ५५६ ॥ (शाक्तानंदतरंगिण्याम्) हविष्येणैव भोक्तव्यं कृत्वा देहविशोधनम्॥प्रातः स्नात्वाथ सावित्र्या जपेत्पंचसहस्रकम् ॥ ५५७ ॥ त्रिसहस्रं सहस्रमं वा जपेदष्टोत्तरं शुचिः ॥ ज्ञाताज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः ॥ ५५८ ॥ वाचिकसंकल्पापेक्षया मानसिकसंकल्पो मुख्यः ॥ (बीजार्णवतंत्रे षोडशपटले) संकल्पो मानसो देवि चतुर्वर्गफलप्रदः॥अत एव महेशानि संकल्पो मानसः स्मृतः ॥ ५५९ ॥ स्थूलो हि परमेशानि संकल्पो व्यर्थ उच्यते॥ संकल्पेन विना देवि यत्किंचित्कुरुते सुधीः ॥ व्यर्थमेव हि देवेशि तत्सर्वं मानसेन च ॥ ५६० ॥ (देवतापञ्चाङ्गनिर्णयः पुरश्चरणचान्द्रिकायाम्) पटलं पद्धतिर्वर्म तथा नामसहस्रकम्॥स्तोत्राणि चेति पंचांगं देवताराधने स्मृतम्॥५६१॥कवचं देवतागात्रं पटलं देवताशिरः ॥ पद्धतिर्देवहस्तौ तु मुखं साहस्रकं स्मृतम् ॥ ५६२ ॥(पंचांगोपासनानिर्णयः देवीरहस्यतंत्रे) जप्त्वा मंत्री मंत्रराजं हुत्वा देवे दशांशतः ॥ तर्पयेत्तद्दशांशेन मार्जयेत्तद्दशांशतः ॥५६३॥ भोजयेतद्दशांशेन मंत्रसिद्धिर्भवेद्ध्रुवम् ॥जीवहीनो यथा देहो सर्वकर्मसु न क्षमः ॥ पुरश्चरणहीनोयं तथा मंत्रः प्रकीर्तितः ॥ ५६४ ॥(ग्रहणस्पर्शकालनिश्चयकरणम्) चक्षुषा दर्शनं राहोर्यत्तद्ग्रहणमुच्यते ॥ तत्र कर्माणि कुर्वीत गणनामात्रतो न हि ॥ ५६५ ॥ (अथ पुरश्चरणविधिः श्रीबीजार्णवतंत्रे सप्तदशपटले देवीं प्रति शिववाक्यम्) एकदा परमेशानि कामाख्यायां महेश्वरि॥ दृष्टोपरागं यत्कर्म तच्छृणुष्व वरानने ॥५६६॥ कुतः स्नानं कुतः संध्या प्राणायामः कुतः प्रिये॥ भूतशुद्धिः कुतो भद्रे कुतः पूजा वरानने ॥ ५६७॥ कालातीतभयादेवि सर्वं संत्यज्य कामिनि॥संकल्पं मानसं कृत्वा जपं कृत्वा वरानने ॥ ५६८ ॥ पंचांगविधिना देवि सिद्धो भवति नान्यथा॥मंत्रविद्या महेशानि कवचं स्तव एव च ॥ ५६९ ॥ ध्यानं वा परमेशानि न्यासो वा कमलानने॥

For Private And Personal Use Only

एकोच्चारेण देवेशि भवंति दश कोटयः ॥ ५७० ॥ असंख्यः स जपो देवि ग्रहणे चन्द्रसूर्ययोः ॥ तत्कथं परमेशानि क्रियते जपसंख्यकम् ॥ ५७१ ॥ अत एव वरारोहे होमो नास्ति शुचिस्मिते॥अभिषेकश्च देवेशि तथा च तर्पणादिकम् ॥ ५७२ ॥ भोजनं च महेशानि नास्ति वै कमलानने॥चन्द्रसूर्यग्रहे देवि पंचांगं नास्ति कामिनि ॥ पंचांगेन विना देवि सिद्धो भवति नान्यथा ॥५७३॥ प्रथमे प्रहरे देवि चन्द्रग्रासो यदा भवेत॥चन्द्रग्रहणकाले तु जपयज्ञादिकं चरेत ॥ ५७४ ॥ दिवसे च यदा भद्रे भास्करग्रहणं भवेत॥ रात्रौ भुक्त्वा च पीत्वा च जपयज्ञादिकं चरेत् ॥५७५ ॥ सर्वेषु विष्णुमंत्रेषु शिवगाणपयोस्तथा॥शक्तिमंत्रो महेशानि प्रशस्तः सततं जपे॥ ५७६ ॥ संकल्पो यस्तु देवेशि मानसे समुपस्थितः ॥ तं संकल्पं विजानीयाद्ग्रहणे चन्द्रसूर्ययोः ॥ ५७७ ॥ तस्मात्तु चंचलापांगि संकल्पं नैव कारयेत् ॥ इति बीजार्णवे तंत्रे शिवेनैव प्रकाशितम् ॥ ५७८ ॥ (पुरश्चरणचन्द्रिकायाम) ग्रहणेर्कस्य चेन्दोर्वा शुचिः पूर्वमुखोषितः ॥ नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ॥ ५७९ ॥ ग्रहणान्मोक्षपर्यंतं जपेन्मन्त्रं समाहितः ॥ अनंतरं दशांशेन क्रमाद्धोमादिकं चरेत् ॥ ५८० ॥ तदंते महतीं पूजां कुर्याद्ब्राह्मणतर्पणम् ॥ ततो मंत्रप्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत् ॥ एवं च मंत्रसिद्धिः स्याद्देवता च प्रसीदति ॥ ५८१ ॥ (रुद्रयामले) अथ चान्यप्रकारेण पुरश्चरणमिष्यते ॥ अपि शुद्धोदकैः स्नात्वा शुचौ देशे समाहितः ॥ ५८२ ॥ ग्रहणान्मुक्ति पर्यंतं जपेन्मंत्रमनन्यधीः ॥ इति कृत्वा न संदेहो जपस्य फलभाग्भवेत्॥५८३॥(तंत्रांतरेपि) यस्तु श्रद्धानुरोधेन ग्रहणे चन्द्रसूर्ययोः ॥ न करोति पुरश्चर्यां नरके स विपच्यते ॥५८४॥ अथ सूर्योदयमारभ्य द्वितीयसूर्योदयपर्यंतं पुरश्चरणं (देवीरहस्ये) अथ चान्यप्रकारेण पुरश्चरणमिष्यते ॥ सूर्योदयात्समारभ्य याव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्सूर्योदयांतरम्॥तावज्जप्त्वा निरातंको मंत्रः कल्पद्रमो भवेत् ॥ ५८५ ॥ कृष्णाष्टमीमारभ्य कृष्णाष्टमीपर्यंतमेकमासपुरश्चरणं (मुंडमालायाम्) अथ वान्यप्रकारेण पुरश्चरणमिष्यते॥कृष्णाष्टमीं समारभ्य यावत् कृष्णाष्टमी भवेत॥सहस्रसंख्याजते तु पुरश्चरणमिष्यते ॥५८६॥ कृष्णचतुर्दशीमारभ्य शुल्कनवमीपर्यंतमेकादशदिनपुरश्चरणम् ॥ (मुंडमालायाम्) कृष्णां चतुर्दशीं प्राप्य नवम्यन्तं महोत्सवे ॥ अष्टमीनवमीरात्रौ पूजां कुर्याद्विशेषतः ॥ ५८७ ॥ दशम्यां पारणं कुर्यान्मत्स्यमांसादिभिर्युतम् ॥ षट्सहस्रं जपेन्नित्यं भक्तिभावपरायणः॥ ॥५८८॥ अष्टमीमारभ्य चतुर्दशीपर्यंतं सप्तदिनपुरश्चरणम्॥(कालीतंत्रे) अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ अष्टम्याश्च चतुर्दश्यां पक्षयोरुभयोरपि ॥ ५८९ ॥ सूर्योदयात्समारभ्य यावत्सूर्योदयांतरम् ॥तावज्जप्त्वा निरातंकं सर्वसिद्धीश्वरो भवेत् ॥ ५९० ॥ भौमशनिवारपुरश्चरणं (कालीतंत्रे) अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ कुजे वा शनिवारे वा नरमुंडं समाहृतम् ॥ ५९१ ॥ पंचगव्येन मिलितं चंदनाद्यैर्विशेषतः ॥ निक्षिप्य भूमौ हस्तार्द्धमानतः काननांतरे ॥ ५९२ ॥ तत्र तद्दिवसे रात्रौ सहस्रं यदि साधकः ॥ एकाकी प्रजपेन्मंत्रं स भवेत्कल्पपादपः ॥ ५९३ ॥ कार्तिकफाल्गुनवैशाखेषु शुक्लपक्षे प्रतिपदामारभ्यैकादश्यतमेकादशदिने वैष्णवमंत्रपुरश्चरणविधानम् (चन्द्रपीठे) ऊर्जे तपसि राधे वा शुक्लपक्षे तु वैष्णवे ॥ एकादश्यन्तमैशे तु भूतांतः फाल्गुनेतुस्मृतम् ॥ ५९४ ॥ चतुर्दशीमारभ्य चतुर्दशीपर्यंतं पंचदशदिनानि माहेश्वरपुरश्चरणविधानम् ॥ अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ चतुर्दशीं समारभ्य यावदन्या चतुर्दशी ॥ ५९५ ॥ तावज्जपेन्महेशानि पुरश्चरणमिष्यते ॥ केवलं जपमात्रेण मंत्राः सिद्धा भवंति हि ॥ ५९६ ॥ बलिहोमादिदानेन विशेषात्पीठपूजने ॥ योगिपीठं महापीठं कामरूपं तथापरम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तयोरेकतमं पूज्यं रुद्रदेह इवापरः ॥ ५९७ ॥ ॥ भाद्रमार्गमाघेषु नवरात्रे वा गणेशमंत्रपुरश्चरणविधानं (चन्द्रपीठे) अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ भाद्रेऽपि विघ्नराजत्वं माघमार्गौ स्ववामरात् ॥ ५९८ ॥ अन्येष्वपि च मंत्रेषु पूर्वोक्तं नवरात्रकम् ॥ जपो मातृकया प्रातःकालान्मध्यंदिनावधि ॥ ५९९ ॥ रात्रौ याममितः कार्यः पयोमूलफलाशिना ॥ चतुर्थयामे कर्तव्या मालामंत्रे दशांशतः ॥ ६०० ॥ विंशांशाद्वा दशांशाद्वा अन्येष्वपि हुतं मतम् ॥ दक्षिणा च यथोक्ता च वित्तशाठ्यं न कारयेत ॥ एवं मंत्रः प्रयोगार्हो भवत्येव न संशयः ॥ ६०१ ॥ आश्विने चैत्रे वा प्रतिपदामारभ्य महानवमीपर्यंतं नवरात्रे शक्तिपुरश्चरणविधानं (चन्द्रपीठे) अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ महालक्ष्मीं समारभ्य आमहानवमीश्वरीम् ॥ कृष्णामा नवमी चैव मधौ शक्तेर्मनो स्मृते ॥ ६०२ ॥ शरत्काले चतुर्थ्यादिनवम्यंतं षड्दिनपुरश्चरणविधानम् (तंत्रांतरे) अथ वान्यप्रकारेण पुरश्चरणमिष्यते॥शरत्काले चतुर्थ्यादिनवम्यंतं विशेषतः ॥ ६०३ ॥ भक्तितः पूजयित्वा तु रात्रौ तावत्सहस्रकम्॥जपेदेव तु विजने केवलं तिमिरालये ॥ ६०४ ॥ अष्टम्यादिनवम्यंतमुपवासपरो भवेत् ॥ स भवेत्सर्वसिद्धीशो नात्र कार्या विचारणा ॥ ६०५ ॥ पुत्रजन्मोत्सवदिने पुरश्चरणविधानं (देवीरहस्ये) अथ वान्यप्रकारेण पुरश्चरणमिष्यते ॥ पुत्रजन्मोत्सवदिने सूतिकाकुलमंदिरे ॥ ६०६ ॥ मांत्रिको मूलमंत्रं स्वं जपेद्दशदिनावधि॥दशांशसंस्कृतं मंत्रं कुर्यात्सिद्धो भवेन्मनुः॥६०७॥ मृतसूतकदिने पुरश्चरणविधानम्॥(देवीरहस्ये) अथ वान्यप्रकारेण पुरश्चरणमिष्यते॥मृतकाशौचदिवसे प्रथमे साधको जपेत् ॥ ६०८ ॥ मनुं दशदिनं रात्रौ धीरो भूत्वा यथार्थतः ॥ एकादशाहानि सुधीः कुर्यान्मंत्रं सुसंस्कृतम्॥कर्मणा मनसा वाचा मंत्रः कल्पद्रुमो भवेत् ॥६०९ ॥ (अथ मंत्रसिद्धिचिह्नानि वक्रतुडकल्पे)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चित्तप्रसादो मनसश्च तुष्टिरल्पाशिता स्वप्नपराङ्मुखत्वम्॥ स्वप्ने प्रपापक्कफलं भवन्ति सिद्धस्य चिह्नानि भवंति सद्यः ॥६१० ॥ (भैरवीतं
त्रे) ज्योतिः पश्यति सर्वत्र शरीरं वा प्रकाशयुक्॥ निजं शरीरमथ वा देवतामयमेव हि ॥ ६११ ॥ (नारदपंचरात्रे) नानाश्चर्यादिहृदय
मंत्रसिद्धिमयानि वै ॥अन्यानंदप्रदान्याशु प्रत्यक्षेण बहिस्तथा ॥ ६१२ ॥ जडधीस्तु क्षणं विप्र क्षणमस्ति प्रहर्षितः॥क्षणं दुंदुभिनिर्घोषं
शृणोत्यस्यांतरिक्षतः ॥ ६१३ ॥ क्षणं च मधुरं वाद्यं नानागीतसमन्वितम् ॥ आजिघ्रति क्षणं गंधान् कर्पूरमृगनाभिजान् ॥ ६१४ ॥
उत्पतंतं क्षणं वापि पश्यत्यात्मानमात्मनि॥ चन्द्रार्ककिरणाकीर्णं क्षणमालोकयेन्नभः ॥६१५॥ गजगोवृपनादांश्च शृणुयाच्च क्षणं द्विज॥
निर्भरांबुदसंक्षोभं क्षणमाकंपयन्त्यपि॥६१६॥ तारकाणि विचित्राणि योगिनो नभसि स्थितान्॥पश्यंति दाहयंतं च क्षणं मंत्रवती सदा॥
॥ ६१७ ॥ क्षणं किलिकिलारावं हंसबर्हिवं तथा॥ क्षणमेवोदयं पश्येत्क्षणं रात्रिं दिने सति ॥ ६१८ ॥ रात्रौ दिवसवल्लोकं संपूर्यं क्षण
मीक्षते॥बलेन परिपूर्णश्च तेजसा भास्करोपमः ॥ ६१९ ॥ पूर्णेंदुसदृशः कांत्या गमने विहगोपमः॥ समेन युक्तः प्रौढेन गांभीर्येण सुखेन
च ॥ ६२० ॥ स्वल्पासनेनासंवृत्तो बहुनापि न बध्यते ॥ विण्मूत्रयोरनल्पत्वं भवेत्तंद्राजयस्तथा ॥ ६२१ ॥ जपध्यानगतो मंत्री न
खेदमधिगच्छति ॥६२२॥ विना भोजनपानाभ्यां पक्षमासादिकं मुने॥इत्येवमादिभिश्चिह्नैर्महाविस्मयकारिभिः ॥ ६२३ ॥ एवमादीनि
चिह्नानि यदा पश्यति मंत्रवित्॥सिद्धिं मंत्रस्य जानीयाद्देवतायाः प्रसन्नताम्॥ततो जपेऽधिकं यत्नं प्रकुर्याज्ज्ञानलब्धये ॥६२४॥ (तंत्रां
तरे) मंत्राराधनशक्तस्य प्रथमं वत्सरत्रयम् ॥ जायंते बहवो विघ्ना नियतं तस्य नारद ॥६२५॥ नोद्वेगः साधके यावत् कर्मणा मनसा
यदि ॥ तृतीयवत्सरादूर्ध्वं स्वयं सिध्यति मंत्रराट् ॥ ६२६ ॥ इति श्रीमंत्रमहार्णवे पूर्वखंडे निर्णयप्रकरणे प्रथमस्तरंगः ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥श्रीगणेशाय नमः ॥ अथ मुद्राप्रकारः ॥ अथ मुद्राः प्रवक्ष्यामि सर्वतंत्रेषु गोपिताः ॥ याभिर्विरचिताभिश्च मोदंते मंत्रदेवताः ॥ १ ॥ अर्चने जपकाले च ध्याने काम्ये च कर्मणि ॥ स्नाने चावाहने शंखे प्रतिष्ठायां च रक्षेण ॥२॥ नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ॥ स्थाने मुद्राः प्रद्रष्टव्याः स्वस्वलक्षणलक्षिताः ॥ ३ ॥ आवाहनादिका मुद्रा नव सा सारणी मता ॥ तथा षडंगमुद्राश्च सर्वमंत्रेषु योजयेत् ॥ ॥ ४ ॥ एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः ॥ शंखचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥ ५ ॥ वनमाला तथा ज्ञान मुद्रा बिल्वाह्वया तथा ॥ गरुडाख्या परा विष्णोर्मुद्रा मंतोषवर्द्धिनी ॥ ६ ॥ नारसिंही च वाराही हयग्रीवी धनुस्तथा ॥ बाणमुद्रा ततः पर्शुर्जगन्मोहिनिका च सा ॥ ७ ॥ काममुद्रा परा ख्याता शिवस्य दश मुद्रिकाः ॥ लिंगयोनित्रिशूलाख्या माल्येष्टाभिर्मृगात्मिका ॥ ॥ ८ ॥ खट्वांगा च कपालाख्या डमरुः शिवतोषिका ॥ सूर्यस्यैकैव पद्माख्या सतमुद्रा गणेशितुः ॥ ९ ॥ दंतपाशांकुशाविघ्नपर्शुलड्डुकसंज्ञकाः॥बीजपूराह्वया मुद्रा विज्ञेयाविघ्नपूजने ॥ १० ॥ पाशांकुशवराभीतिखड्गचर्म्मधनुःशराः ॥ मौशलीमुद्रिका दौर्गी मुद्रा शक्तेः प्रियंकराः ॥ ११ ॥ लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्यास्तु पूजने ॥ अक्षमाला तथा वीणा व्याख्या पुस्तकमुद्रिका ॥ १२ ॥ सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने ॥ मत्स्यमुद्रा च कूर्माख्या लेलिहा मुंडसंज्ञिका ॥ १३ ॥ महायोनिरिति ख्याता सर्वसिद्धिसमृद्धिदा ॥ शक्त्यर्चने महायोनिः श्यामादौ मुंडमुद्रिका ॥ १४ ॥ मत्स्यकूर्मलेलिहाख्या सर्वसाधारणी मता ॥ दश मुद्राश्च विज्ञेया त्रिपुरायाः प्रपूजने ॥ १५ ॥ संक्षोभद्राविणाकर्षवश्योन्मादमहांकुशाः ॥ खेचरी बीजयोन्याख्या त्रिखंडा परिकीर्तिता ॥ १६ ॥ कुंभमुद्राभिषेके स्यात्पद्ममुद्रासने तथा ॥ कालकर्णी प्रयोक्तव्या विघ्नप्रशमकर्म्मणि ॥ १७ ॥ गालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगोपालार्चने वेणुर्नृहरेर्नारसिंहिका ॥ १८ ॥ वराहस्य च पूजाया वराहाख्यां प्रदर्शयेत् ॥ रामार्चने धनुर्बाणमुद्रे पर्शुस्तथार्चने ॥ ॥ १९ ॥ परशुरामस्य विज्ञेया तथा परशुमुद्रिका ॥ वासुदेवाह्वया ध्याने कुंतमुद्रा तु रक्षणे ॥ २० ॥ सर्वत्र प्रार्थने चैव प्रार्थनाख्यां नियोजयेत् ॥ उद्देशानुक्रमादासामुच्यते लक्षणन्तथा ॥ २१ ॥ अथावाहनादिनवमुद्रालक्षणम् ॥ हस्ताभ्यामंजलिं बद्ध्वानामिका मूलपर्वभिः ॥ अंगुष्ठौ निःक्षिपेत्सेयं मुद्रा त्वावाहिनी मता ॥ इत्यावाहनीमुद्राः ॥ १ ॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मुद्रिका स्मृता ॥ इति स्थापनीमुद्राः ॥ २ ॥ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगात्सन्निधापनी ॥ इति संनिधापनी मुद्रा ॥ ३ ॥ अंतःप्रवेशितांगुष्ठा सैव संशोधनी मता ॥ इति संशोधनी मुद्रा ॥ ४ ॥ उत्तानमुष्टियुगला सन्मुखीकरणी मता ॥ इति संमुखीकरणमुद्रा ॥ ५ ॥ देवतांगे षडंगानां न्यासः स्यात् शकलीकृतिः ॥ इति शकलीकरणमुद्रा ॥ ६ ॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखसर्ज्जनी ॥ अवगुंठनमुद्रेयमभितो भ्रामिता मता ॥ इत्यवगुंठनी मुद्रा ॥ ७ ॥ अन्योन्याभिमुखा श्लिष्टा कनिष्ठानामिका पुनः ॥ तथैव तर्जनी मध्या धेनुमुद्रा समीरिता ॥ अमृतीकरणं कुर्यात्तया साधकसत्तमः ॥ इत्यमृतीकरणे धेनुमुद्रा ॥ ८ ॥ अन्योन्यग्रथितांगुष्ठा प्रसारितकरांगुली ॥ महामुद्रेयमुदिता परमीकरणे बुधैः ॥ इति परमीकरणे महामुद्रा ॥ प्रयोजयेदिमा मुद्रा देवताह्वानकर्माणि ॥ ९ ॥ इत्यावाहनादयो नव मुद्राः ॥ अथ षडंगन्यासोपयोगिषड्मुद्रालक्षणम् ॥ अंगन्यासस्य या मुद्रास्तासां लक्षणमुच्यते ॥ ऋजवो हस्तशाखाश्च हृदये च शिरस्यथ ॥ तर्ज्जनीमध्यमांगुष्ठमधोमुष्टिशिखां तथा ॥ करद्वंद्वांगुलीः सर्वाः कवचे स्युः प्रमोदिकाः ॥ नाराचमुद्रिकामध्ये तर्ज्जनीध्वनिरीरिता ॥ विष्वक्सेने स्मृता मुद्रा नेत्रयोर्म्मध्यतर्ज्जनी ॥ नेत्रत्रयं यत्र भवेदनामा मध्यतर्ज्जनी ॥ इति षडंगमुद्रा ॥ अथैकोनविंशति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विष्णुमुद्रालक्षणम् ॥ वैष्णवीनां तु मुद्राणां कथ्यंते लक्षणान्यथ ॥ वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना ॥ कृत्वोत्तानां ततो मुष्टिमंगुष्ठं तु प्रसारयेत् ॥ वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः स्युः प्रसारिताः ॥ दक्षिणांगुष्ठसंस्पृष्टा मुद्रैषा शंखमुद्रिका ॥ इति शंखमुद्रा ॥ १ ॥ हस्तौ च संमुखौ कृत्वा सुभुग्नौ सुप्रसारितौ ॥ कनिष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका ॥ इति चक्रमुद्रा ॥ २ ॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुलीः ॥ अंगुष्ठमध्यमे भूयः संलग्ने संप्रसारिते ॥ गदामुद्रेयमुदिता विष्णोः संतोषवर्द्धिनी ॥ इति गदामुद्रा ॥ ३ ॥ हस्तौ तु संमुखौ कृत्वा संहतप्रोन्नतांगुलीः ॥ तलांतमिलितांगुष्ठौ कृत्वैषा पद्ममुद्रिका ॥ इति पद्ममुद्रा ॥ ४ ॥ ओष्ठे वामकरांगुष्ठे लग्नस्तस्य कनिष्ठके ॥ दक्षिणांगुष्ठसंसर्गात्तत्कनिष्ठा प्रसारिता ॥ तर्ज्जनीमध्यमानामाः किंचित्संकोच्य चालिताः ॥ वेणुमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः ॥ इति वेणुमुद्रा ॥ ५ ॥ अन्योन्यस्पृष्टकरयोर्म्मध्यमानामिकांगुलीः ॥ अंगुष्ठेन तु बध्नीयात्कनिष्ठामूलसंस्थिते ॥ तर्ज्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञिका ॥ इति श्रीवत्समुद्रा ॥ ६ ॥ अनामां पृष्ठसंलग्नां दक्षिणस्य कनिष्ठिकाम् ॥ कनिष्ठयान्ययाबध्य तर्ज्जन्या दक्षया तथा॥वामानामां च बध्नीयाद्दक्षिणांगुष्ठमूलके ॥ अंगुष्ठमध्यमे वामे संयोज्य सरलाः पराः ॥ चतस्रोप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका ॥ इति कौस्तुभमुद्रा॥७॥ स्पृशेत्कंठादिपादांतं तर्ज्जन्यांगुष्ठया तथा॥करद्वयेन मालावन्मुद्रेयं वनमालिका॥ इति वनमाला मुद्रा ॥ ८ ॥ तर्ज्जन्यंगुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् ॥ वामहस्तांबुजं वामे जानुमूर्द्धनि विन्यसेत् ॥ ज्ञानमुद्रा भवेदेषा रामचंद्रस्य प्रेयसी ॥ इति ज्ञानमुद्रा ॥९॥ अंगुष्ठं वाममुद्धाटितमितरकरांगुष्ठकेनाथ बद्ध्वा तस्याग्रं पीडयित्वांगुलिभिरपि च ता वामहस्तांगुलीभिः ॥ बद्ध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्मारबीजं बिल्वाख्या मुद्रिकैषा स्फुटमिह कथिता गोपनीया विधिज्ञैः ॥ इति

For Private And Personal Use Only

मं० म० बिल्वाख्यमुद्रा ॥ १०॥ हस्तौ तु विमुखौ कृत्वा ग्रंथयित्वा कनिष्ठिके॥ मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा ॥ मध्यमानामिका द्वे पू०खं० १
 तु द्वौ पक्षाविव चालयेत् ॥ एषा गरुडमुद्राख्या विष्णोः संतोषवर्द्धिनी ॥ इति गरुडमुद्रा ॥ ११ ॥ जानुमध्ये करौ दत्त्वा चिबुकोष्ठौ नि० प्र० १
समावृतौ ॥ हस्तौ च भूमिसंलग्नौ कंपमानः पुनःपुनः॥ मुखं च विवृतं कुर्य्याल्लेलिहानां च जिह्विकाम् ॥ नारसिंही भवेदेषा मुद्रा तत्प्रीतिव तरं० २
र्द्धिनी ॥ इति नारसिंही मुद्रा ॥ १२॥ अंगुष्ठाभ्यां तु करयोरथाक्रम्य कनिष्ठिके ॥ अधोमुखीभिः सर्वाभिः मुद्रेयं नृहरेर्मता॥ इति द्वितीया
नृहरिमुद्रा ॥ १३ ॥ दक्षोपरि करं वामं कृत्वोत्तानमधः सुधीः ॥ नामयेदिति संप्रोक्ता मुद्रा वाराहसंज्ञिका ॥ इति वाराहमुद्रा॥ १३ ॥
दक्षहस्तं चोर्द्धमुखं वामहस्तमधोमुखम् ॥ अंगुल्यग्रं तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥ इति वाराहमुद्रा द्वितीया ॥ १३ ॥ वामहस्ततले
दक्षा अंगुलीस्ता अधोमुखीः ॥ संरोप्य मध्यमा तासामुन्नाम्याधो विकुंचयेत् ॥ हयग्रीवप्रिया मुद्रा तन्मूर्तेरनुकारिणी॥ इति हयग्रीवमुद्रा
॥ १४ ॥ वामस्य मध्यमाग्रं तु तर्जन्यग्रेण योजयेत् ॥ अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत् ॥ दर्शयेद्वामके स्कंधे धनुर्मुद्रेयमी[1]
रिता ॥ इति धनुर्मुद्रा ॥ १५ ॥ दक्षमुष्टेस्तु तर्जन्या दीर्घया बाणमुद्रिका ॥ इति बाणमुद्रा ॥ १६ ॥ तते तलं तु करयोस्तिर्यक् सं
योज्य चांगुलीम् ॥ संहतां प्रसृतां कुर्य्यान्मुद्रेयं पर्शुसंज्ञिका ॥ इति परशुमुद्रा ॥ १७ ॥ उर्द्धस्थांगुष्ठमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी ॥
इति जगन्मोहिनी मुद्रा॥ १८ ॥ हस्तौ तु संपुटौ कृत्वा प्रसृतांगुलिकौ तथा॥ तर्जन्यौ मध्यमा पृष्ठे ह्यंगुष्ठौ मध्यमाश्रितौ॥ काममुद्रेयमुदि

---

१ ज्ञानार्णवे यथाहस्तगतं चापं तथाहस्तं कुरु प्रिये। चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ॥ २-यथा हस्तगता बाणास्तथा हस्तं कुरु प्रिये । बाणमुद्रेयमाख्याता रिपुवर्गनिकृंतनी ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ता सर्वदेवप्रियंकरी ॥ इति काममुद्रा ॥ १९ ॥ इति विष्णुमुद्राः ॥ अथ शिवस्य दशमुद्रालक्षणम् ॥ महादेवप्रियाणां च कथ्यंते लक्षणान्यथ । उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बंधयेत् ॥ वामांगुलीर्दक्षिणाभिरंगुलीभिश्च बंधयेत् । लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥ इति लिंगमुद्रा ॥ १ ॥ मिथः कनिष्ठिके बद्धा तर्जनीभ्यामनामिके ॥ अनामिकोर्द्ध्वसंश्लिष्टे दीर्घमध्यमयोरथ ॥ अंगुष्ठाग्रद्वयं न्यस्येद्योनिमुद्रेयमीरिता ॥ इति योनिमुद्रा॥२॥ अंगुष्ठेन कनिष्ठां तु बद्धा शिष्टांगुलित्रयम् ॥ प्रसारयेत्त्रिशूलाख्या मुद्रैषा परिकीर्तिता॥ इति त्रिशूलमुद्रा ॥ ३ ॥ अंगुष्ठतर्जन्यग्रे तु ग्रंथयित्वांगुलित्रयम् ॥ प्रसारयेदक्षमाला मुद्रेयं परिकीर्तिता॥इत्यक्षमाला मुद्रा ॥४॥ अधःस्थितो दक्षहस्तः प्रसृतो वरमुद्रिका ॥ इति वरमुद्रा ॥ ५ ॥ ऊर्द्ध्वीकृतो वामहस्तः प्रसृतोभयमुद्रिका ॥ इत्यभयमुद्रा ॥ ६ ॥ मिलितानामिकांगुष्ठं मध्यमाग्रे नियोजयेत् ॥ शिष्टांगुल्युच्छ्रिते कुर्यान्मृगमुद्रेयमीरिता ॥ इति मृगमुद्रा ॥ ७ ॥ पंचांगुल्यो दक्षिणास्तु मिलिता ह्यूर्द्ध्वमूर्द्धता ॥ खट्वांगमुद्रा विख्याता शिवस्यातिप्रिया मता ॥ इति खट्वांगमुद्रा ॥ ८ ॥ पात्रवद्वामहस्तं च कृत्वांके वामके तथा ॥ निधायोच्छ्रितवत्कुर्यान्मुद्रा कापालिकी मता ॥ इति कपालाख्यमुद्रा ॥ ९ ॥ मुष्टिं च शिथिलां बद्धा हीषत्कुंचितमध्यमाम्॥ दक्षिणान्तूर्द्ध्वमुन्नम्य कर्णदेशे प्रचालयेत् ॥ एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी॥इति डमरुमुद्रा॥१०॥ इति शिवस्य दश मुद्राः ॥ अथ गणेशसप्तमुद्रालक्षणम्॥ ततो गणेशमुद्राणामुच्यंते लक्षणानि तु ॥ उत्तानोर्ध्वमुखी मध्या सरला बद्धमुष्टिका ॥ दंतमुद्रा समाख्याता सर्वागमविशारदैः॥ इति दंतमुद्रा ॥ १ ॥ वाममुष्टेस्तु तर्जन्या दक्षमुष्टेस्तु तर्ज्जनीम् ॥ संयोज्यांगुष्ठकाग्राभ्यां तर्ज्जन्यग्रे समुत्क्षिपेत् ॥ एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता॥ इति पाशमुद्रा ॥ २ ॥ ऋज्वीं च मध्यमां कृत्वा तर्ज्जनीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्यपर्वणि ॥ संयोज्याकुंचयेत्किंचिन्मुद्रैषांकुशसंज्ञिका ॥ इत्यंकुशमुद्रा ॥ ३ ॥ तर्ज्जनी मध्यमानामा कनिष्ठांगुष्ठमुच्छ्रिता ॥
अधोमुखी दीर्घरूपा मध्यमा विघ्ननामिका ॥ इति विघ्नमुद्रा ॥ ४ ॥ पर्शुमुद्रा निगदिता प्रसिद्धा लड्डुमुद्रिका ॥ बीजपूराह्वया मुद्रा
प्रसिद्धत्वादुपेक्षिता ॥ इति पर्शुलड्डुकबीजपूरादिमुद्राः ॥ ५ ॥ ६ ॥ ७ ॥ इति गणेशसप्तमुद्राः ॥ अथ शक्तिदशमुद्राः ॥ शाक्तेयीनां
च मुद्राणां कथ्यंते लक्षणानि तु॥ पाशांकुशवराभीतिधनुर्बाणाः समीरिताः॥ (इति षड् मुद्राः पूर्ववत् ज्ञेयाः) कनिष्ठानामिकां बद्ध्वा स्वां
गुष्ठेनैव दक्षतः ॥ मितांगुली च प्रसृते संस्पृष्टे खड्गमुद्रिका ॥ ७ ॥ वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसार्य च ॥ आकुंचितांगुलिं
कुर्याच्चर्म्ममुद्रेयमीरिता ॥ इति चर्ममुद्रा ॥ ८ ॥ मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम्॥ कुर्यान्मुसलमुद्रेयं सर्वविघ्नविनाशिनी॥
इति मुसलमुद्रा॥९॥मुष्टिं कृत्वा कराभ्यां च वामस्योपरि दक्षिणम् ॥ कृत्वा शिरसि संयोगाद्दुर्गामुद्रेयमीरिता॥इति दौर्गी मुद्रा ॥ १०॥
अथ लक्ष्मीमुद्रा-एका ॥ चक्रमुद्रां तथा बद्ध्वा मध्यमे द्वे प्रसार्य्य च॥ कनिष्ठिके तथानीय तदग्रे मुष्टिके क्षिपेत् ॥ लक्ष्मीमुद्रा परा ह्येषा
सर्वसम्पत्प्रदायिनी ॥ इति लक्ष्मीमुद्रा ॥ १ ॥ अथ सरस्वत्याः पंचमुद्रालक्षणम् ॥ वीणावादनवद्धस्तौ कृत्वा संचालयेच्छिरः ॥
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियंकरी ॥ इति वीणामुद्रा ॥१॥वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका ॥ इति पुस्तकमुद्रा ॥२॥
दक्षिणांगुष्ठतर्ज्जन्याग्रलग्ने पराङ्मुखे ॥ प्रसार्य्य संहितोत्ताना ह्येषा व्याख्यानमुद्रिका॥श्रीरामस्य सरस्वत्या अत्यंतप्रेयसी मता ॥ ३ ॥
(अक्षमालादिमुद्रिका पूर्वोक्ता ज्ञेया) इति सरस्वतीपंचमुद्राः ॥ अथ वह्निमुद्रा-एका ॥ मणिबंधस्थितौ कृत्वा प्रसृतांगुलिकौ करौ ॥
कनिष्ठांगुष्ठयुगले मिलितौ तां प्रसारयेत् ॥ सप्तजिह्वाख्यमुद्रेयं वैश्वानरप्रियंकरी ॥ इति सप्तजिह्वाख्याग्निमुद्रा ॥ १ ॥ अथानेकमुद्रा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्षणम् ॥ कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरम् ॥ तर्ज्जनी मध्यमानामा संहता भुग्नवर्जिताः ॥ मुद्रैषा गालिनी प्रोक्ता शंखकस्योपचालिता ॥ इति गालिनी मुद्रा ॥ १ ॥ दक्षांगुष्ठे परांगुष्ठे क्षिप्त्वा हस्तद्वयेन तु ॥ सावकाशामेकमुष्टिं कुर्यात्सा कुंभमुद्रिका ॥ इति कुंभमुद्रा ॥ २ ॥ मुष्टयोरूर्द्ध्वकृतांगुष्ठौ तर्ज्जन्यग्रे तु विन्यसेत् ॥ सर्वरक्षाकरी ह्येषा कुंभमुद्रेयमीरिता ॥ इति कुंभमुद्रा द्वितीया ॥ ॥ २ ॥ प्रसृतांगुलिकौ हस्तौ मिथः श्लिष्टौ च संमुखौ ॥ कुर्य्यात्स्वहृदये सेयं मुद्रा प्रार्थनसंज्ञिका ॥ इति प्रार्थनामुद्रा ॥ ३ ॥ अंजल्यंजलिमुद्रा स्याद्वासुदेवाभिधा न सा ॥ इत्यंजलिमुद्रा ॥ ४ ॥ अंगुष्ठावुन्नतौ कृत्वा मुष्टयोः संलग्नयोर्द्वयोः ॥ तावेवाभिमुखौ कुर्य्यान्मुद्रैषा कालकर्णिका ॥ इति कालकर्णी मुद्रा ॥ ५ ॥ दक्षिणा निबिडा मुष्टिरनामार्पिततर्ज्जनी ॥ मुद्रा विस्मयसंज्ञा स्याद्विस्मयावेशकारिणी ॥ इति विस्मयमुद्रा ॥ ६ ॥ मुष्टिरूर्द्ध्वकृतांगुष्ठा दक्षिणा नादमुद्रिका ॥ तर्जन्यंगुष्ठसंयोगादग्रतो बिंदुमुद्रिका॥ इति बिंदुमुद्रा ॥ ७ ॥ अधोमुखे वामहस्ते ऊर्द्ध्वं स्याद्दक्षहस्तकम् । क्षिप्त्वांगुलीरंगुलीभिः संग्रथ्य परिवर्तयेत ॥ एषा संहारमुद्रा स्याद्विसर्ज्जनविधौ स्मृता ॥ इति संहारमुद्रा ॥ ८ ॥ दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् ॥ अंगुष्ठौ चालयेत्सम्यङ्मुद्रेयं मत्स्यरूपिणी इति मत्स्यमुद्रा ॥ ९ ॥ वामहस्तस्य तर्ज्जन्यां दक्षिणस्य करस्य च । वामस्य पितृतीर्थेन मध्यमानामिके तथा ॥ अधोमुखैश्च तैः कुर्य्याद्दक्षिणस्य करस्य च । कूर्मपृष्ठसमं कुर्याद्दक्षं पाणिं च सर्वतः ॥ कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि ॥ इति कूर्म्ममुद्रा ॥ १० ॥ पृष्ठे क्रोडांतरेंगुष्ठमुष्टिं कृत्वा करस्य च ॥ मध्यमाग्रं तु दक्षस्य तथालंब्य प्रयत्नतः ॥ मध्यमेनाथ तर्ज्जन्यामंगुष्ठाग्रे तु योजयेत् ॥ दक्षिणं योजयेत्पाणिं याममुष्टौ तु साधकः ॥ दर्शये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणे भागे मुंडमुद्रेयमुच्यते ॥ इति मुंडमुद्रा ॥ ११ ॥ तर्ज्जनीमध्यमानामाः समाः कुर्यादधोमुखीः । अनामायां क्षिपेद्वृद्धामूर्द्ध्वं
कृत्वा कनिष्ठिकाम् । लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्तिता ॥ इति लेलिहा मुद्रा ॥ १२ ॥ तर्जन्यनामिकामध्ये कनिष्ठाक्रम
योगतः । करयोर्योजयत्येव कनिष्ठामूलदेशतः ॥ अंगुष्ठाग्रे तु निःक्षिप्य महायोनिः प्रकीर्तिता ॥ इति महायोनिमुद्रा ॥ १३ ॥
परिवृत्तकरौ स्पृष्टावंगुष्ठौ कारयेत्समौ । अनामांतर्गते कृत्वा तर्ज्जन्यौ कुटिलाकृती ॥ कनिष्ठिके नियुंजीत निजस्थाने महेश्वरि । त्रिखंडेयं
समाख्याता त्रिपुराध्यानकर्म्मणि ॥ इति त्रिखंडमुद्रा ॥ १४ ॥ मध्यमा मध्यगे कृत्वा कनिष्ठंगुष्ठरोधिते । तर्जन्यौ दंडवत्कुर्य्या
न्मध्यमोपर्यनामिके ॥ एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी ॥ इति प्रथमा मुद्रा ॥ १५ ॥ एतस्या एव मुद्राया मध्यमे सरले तथा ॥
क्रियेते परमेशानि सर्वविद्रावणी परा ॥ इति सर्वविद्रावणी मुद्रा ॥ १५ ॥ मध्यमातर्ज्जनीभ्यां च कनिष्ठानामिके समे । अंकुशाकार
रूपाभ्यां मध्यमे परमेश्वरि ॥ अंगुष्ठं तु नियुंजीत कनिष्ठानामिकोपरि ॥ इयमाकर्षणी मुद्रा त्रैलोक्याकर्षिणी मता ॥ इत्याकर्षिणी
मुद्रा ॥१६॥ पुटाकारौ करौ कृत्वा तर्ज्जन्यावंशुकाकृती । परिवर्तक्रमेणैव मध्यमे तदधोगते ॥ क्रमेण देवि तेनैव कनिष्ठानामिकादयः ।
संयोज्या निबिडाः सर्वा अंगुष्ठावग्रदेशतः ॥ मुद्रेयं परमेशानि सर्ववश्यकरी मता ॥ इति सर्ववश्यकरी मुद्रा ॥ १७ ॥ संमुखौ तु करौ
कृत्वा मध्यमामध्यगेंत्यजे । अनामिके तु सरले तद्बहिस्तर्जनीद्वयम् ॥ दंडाकारौ ततोंगुष्ठौ मध्यमानखदेशिकौ । मुद्रैवोन्मादिनी
नाम्ना क्लेदिनी सर्वयोषिताम् ॥ इत्युन्मादिनी मुद्रा ॥ १८ ॥ अस्यां त्वनामिकायुग्ममधः कृत्वांकुशाकृति । तर्जन्यावपि तेनैव क्रमेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनियोजयेत् ॥ इत्थं महांकुशा मुद्रा सर्वकामार्थसाधनी ॥ इति महांकुशमुद्रा ॥ १९ ॥ सव्यं दक्षिणदेशेषु सव्यदेशे तु दक्षिणम् । बाहुं कृत्वा महादेवि हस्तौ संपरिवर्तयेत् ॥ कनिष्ठानामिके देवि मुक्ते तेन क्रमेण च । तर्जनीभ्यां समाक्रांते सर्वोर्द्धमपि मध्यमे ॥ अंगुष्ठौ च महादेवि सरलावपि कारयेत् । इयं सा खेचरी मुद्रा पार्थिवस्थानयोजिता ॥ इति खेचरी मुद्रा ॥ २० ॥ परिवृत्य करौ स्पृष्टावर्द्धचन्द्राकृती प्रिये । तर्जन्यंगुष्ठयुगलं युगपत्कारयेत्ततः ॥ अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् । अथैव कुटिले योज्ये सर्वाधस्तदनामिके ॥ बीजमुद्रेयमचिरात्सर्वसिद्धिप्रदायिनी ॥ इति बीजमुद्रा ॥ २१ ॥ मध्यमे कुटिले कृत्वा तर्जन्युपरि संस्थिते । अनामिकामध्यगते तथैव हि कनिष्ठिके ॥ सर्वा एकत्र संयोज्य अंगुष्ठपरिपीडिताः । एषा तु प्रथमा मुद्रा योनिमुद्रेति संज्ञिता ॥ इति प्रथमा योनिमुद्रा ॥ २२ ॥ वामहस्तेन मुष्टिं तु बद्ध्वा कर्णप्रदेशके । तर्जनीं सरलां कृत्वा भ्रामयेन्मनुवित्तमः ॥ सौभाग्यदंडिनी मुद्रा न्यासकालेपि सूचिता ॥ इति सौभाग्यदंडिनी मुद्रा॥२३॥ अंतरंगुष्ठमुष्ट्या तु निरुध्य तर्जनीमिमाम् ॥ रिपुजिह्वाग्रहा मुद्रा न्यासकाले तु सूचिता ॥ इति रिपुजिह्वाग्रहा मुद्रा ॥ २४ ॥ बद्ध्वा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ॥ अंगुष्ठेन तदग्रे तु मुद्रेयं भूतिनी मता ॥ इति भूतिनी मुद्रा ॥ २५ ॥ याममुष्टिं विधायाथ तर्जनीमध्यमे ततः ॥ प्रसार्य तर्जनीमुद्रा निर्दिष्टा वज्रपाणिना ॥ इति तर्जनी मुद्रा ॥ २६ ॥ मुष्टिं कृत्वा कनिष्ठाद्वयं वेष्टयेत् तर्जनीं प्रसार्याकुंचयेत ॥ इति क्रोधमुद्रा॥२७॥

इति श्रीमंत्रमहार्णवे पूर्वखण्डे मुद्राप्रकरणे द्वितीयस्तरंगः ॥ २ ॥ ॥ ॥ ॥ ॥

For Private And Personal Use Only

श्रीगणेशाय नमः ॥ अथ भद्रमंडलप्रकरणम् ॥ तत्रादौ एकोनविंशतिरेखात्मकं सर्वतो-भद्रमण्डलम् ॥ (व्रतराजे हेमाद्रौ स्कांदे) प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतीः ॥ खंडेन्दुस्त्रिपदः कोणे शृंखला पंचभिः पदैः ॥ १ ॥ एकादशपदा वल्ली भद्रं तु नवभिः पदैः ॥ चतुर्विंशत्पदा वापी विंशत्या परिधिः पदैः ॥ २ ॥ मध्ये षोडशभिः कोष्ठैः पद्म मष्टदलं स्मृतम् ॥ श्वेतेंदुः शृंखला कृष्णा वल्लीं नीलेन पूरयेत् ॥ ३ ॥ भद्रारुणा सिता वापी परिधिः पीतवर्णिका ॥ बाह्यांतरदले श्वेता कर्णिका पीतवर्णिका ॥ ४ ॥ परिध्या वेष्टितं पद्मं बाह्ये सत्त्वं रजस्तमः ॥ तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरेश्वरान् ॥ ५ ॥ (तत्र देवताः व्रतराजे) तत्रादौ संकल्पः ॥ देशकालौ संकीर्त्य अद्य पुण्यतिथौ ममेह जन्मनि जन्मांतरे वा कृतकायिकवाचिकमानसिकसांसर्गिकदोषपरिहारार्थमिहामुत्र सुख सौभाग्यसुखसंपत्त्यादिकफलप्राप्त्यर्थं श्रीअमुकदेवताप्रीतये अमुककालमारभ्यामुकदिनपर्यंतं मया आचरितस्य व्रतस्य फलप्राप्तिद्वारा एतत्सर्वतोभद्रमण्डले वेदपुराणोक्तमंत्रैर्ब्रह्मादिषट्

एकोनविंशतिरेखात्मकंसर्वतोभद्रमंडलं।



पंचाशद्देवतावाहनप्रतिष्ठापूजनं च करिष्ये॥ इति संकल्पः ॥ अक्षतान्गृहीत्वा ॥ ततो मध्ये॥ ब्रह्मजज्ञानं, गौतमो वामदेवो ब्रह्मा त्रिष्टुप् मध्ये ब्रह्मावाहने विनियोगः॥ ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोवेन आवः ॥ सबुध्न्या उपमा अस्यविष्ठाः सतश्च योनिमसतश्च विवः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एह्येहि धातस्तु समस्तसृष्टेः पद्मोद्भवः पद्मसुखप्रदातः। सुरासुरैर्वंदितपादपद्म यज्ञे ममास्मिन्कुरु सन्निधानम्॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ पूजां गृहाण मम संमुखः सुप्रसन्नो वरदो भव ॥ १ ॥ इत्येवंप्रकारेण सर्वत्र देवतानामावाहनादिकं ज्ञेयम् ॥ ततः उदीचीमारभ्य वायवी पर्यंतं सोमादयोऽष्टौ लोकपालाः स्थापनीयाः॥ तत्र क्रमः-आप्यायस्व, राहूगणो गौतमः सोमो गायत्री उत्तरे सोमावाहने विनियोगः ॥ ॐ आप्यायस्वसमेतुतेविश्वतःसोमवृष्णियंभवावाजस्यसंगथे ॥ कुबेरं गुह्यकाध्यक्षं सुरासुरनमस्कृतम् ॥ धनदं शिबिकारूढं चिंतयामि सदाप्रियम्॥उत्तरे सोमम् ॥२॥ अभित्वा, आजीगर्तिः शुनःशेप ईशानो गायत्री ईशान्यामीशानावाहने विनियोगः ॥ ॐ अभित्वा देवस वितरीशानंवार्याणांसदावनभागमीमहे ॥ आवाहयाम्यहं देवमीशानं च वरप्रदम् ॥ सर्वलोकप्रपूज्यं त्वामीशानं पूजयाम्यहम् ॥ ईशान्या मीशानम् ॥ ३ ॥ इन्द्रंवो,मधुच्छंदा इंद्रो गायत्री पूर्वे इंद्रावाहने विनियोगः ॥ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः अस्माकमस्तुकेवलः॥ आवाहयाम्यहं देवं महेंद्रं च महाप्रभुम् ॥ पीतवर्णं गजारूढं वज्रपाणिं सुरेश्वरम् ॥ पूर्वे इंद्रम् ॥ ४ ॥ अग्निं दूतं, काण्वो मेधातिथिरग्नि र्गायत्री आग्नेय्यामग्न्यावाहने विनियोगः ॥ ॐ अग्निंदूतंवृणीमहेहोतारंविश्ववेदमअस्ययज्ञस्यसुक्रतुम् ॥ अथाग्निमूर्तिं ध्यायामि सर्वाभीष्ट फलप्रदाम् ॥ एकजिह्वां द्विशीर्षां च जटामुकुटमण्डिताम् ॥ आग्नेय्यामग्निम् ॥ ५ ॥ यमाय सोमं, वैवस्वतो यमोऽनुष्टुप् दक्षिणे यमा वाहने विनियोगः ॥ ॐ यमायसोमꣳसुनुयमायजुहुताहविःयमꣳहयज्ञोगच्छत्यग्निदूतोअरंकृतः ॥ अवाहयाम्यहं देवं यमं महिषवाहनम् ॥ ऊर्ध्वकेशं विरूपाक्षं भैरवं रक्तलोचनम् ॥ दक्षिणे यमम्॥६॥मोषुणो, घोरः कण्वो निर्ऋतिर्गायत्री नैर्ऋत्यां निर्ऋत्यावाहने विनियोगः ॥ ॐ मोषुणः परापरानिर्ऋतिर्दुर्हणावधीत् ॥ पदीष्टतृष्णयासह ॥ आवाहयाम्यहं देवं निर्ऋतिं श्वेतरूपिणम् ॥ लंबकेशं विरूपाक्षं खड्गपाणिं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुरासदम् ॥ नैर्ऋत्यां निर्ऋतिम् ॥ ७ ॥ तत्त्वायामि, शुनःशेपो वरुणस्त्रिष्टुप् पश्चिमे वरुणावाहने विनियोगः ॥ ॐ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडयानोवरुणेहवोध्युरुशर्कसमानआयुःप्रमोषीः ॥ आवाहयाम्यहं देवं वरुणं कमलेक्षणम् ॥ रक्तांबरधरं देवं रक्तमालाविभूषितम् ॥ पश्चिमे वरुणम् ॥ ८ ॥ वायोशतं, वामदेवो वायुरनुष्टुप् वायव्यां वाय्वावाहने विनियोगः ॥ ॐ वायो शतँहराणांयुवस्वपोष्याणाम् ॥ उतवातेसहस्त्रिणोरथ आयातुपाजसा ॥ अहमावाहयिष्यामि वायुं सर्वत्र व्यापिनम् ॥ ऊर्ध्वकेशं विरूपाक्षं सर्वचैतन्यरूपिणम् ॥ वायव्यां वायुम् ॥ ९ ॥ ज्मयाअत्र, मैत्रावरुणौ वसवस्त्रिष्टुप् वायुसोमयोर्मध्ये वस्वावाहने विनियोगः ॥ ॐ ज्मयाअत्रवसवोरंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः ॥ अर्वाक्पथउरुज्रयः कृणुध्वं श्रोतादूतस्य जग्मुषोनोअस्य ॥ धरो ध्रुवश्च रोमश्च आपश्चैव नलोनलः ॥ प्रत्यूषश्च प्रभातश्च वसवोष्टौ प्रकीर्तिताः ॥ वायुसोममध्ये अष्टौ वसून् ॥ १० ॥ आरुद्रासः, श्यावाश्व एकादश रुद्रा जगती सोमेशयोर्मध्ये एकादशरुद्रावाहने विनियोगः ॥ ॐ आरुद्रासइंद्रवंतः सजोषसोहिरण्यरथाः सुवितायगंतनइयंवोअस्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिवउत्साउदन्यवे ॥ अजैकपादहिर्बुध्न्यो विरूपाक्षोथ रैवतः ॥ हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः ॥ सविता च जयंतश्च पिनाकी रुद्र एव च ॥ सोमेशानयोर्मध्ये एकादश रुद्रान् ॥ ११ ॥ त्यांनु, मत्स्यः सामदो द्वादशादित्या गायत्री ईशानेंद्रयोर्मध्ये द्वादशादित्यावाहने विनियोगः ॥ ॐ त्यांनुक्षत्रियाम् अवआदित्यान्याचिषामहेसुमृळीकां अभीष्टये ॥ धाता मित्रो यमश्चेन्द्रो वरुणः सूर्य एव च ॥ भगो विवस्वान् पुरुषः सविता विष्णुरेव च ॥ त्वष्टेति द्वादशादित्यान् पूजयामि यथाविधि ॥ ईशानेन्द्रयोर्मध्ये द्वादशादित्यान् ॥ १२ ॥ अश्विनावर्ति, राहुगणो गौतमोऽश्विनावुष्णिक् इन्द्राग्न्योर्मध्ये

For Private And Personal Use Only

अश्व्याःवाहने विनियोगः ॥ ॐ अश्विनावर्तिरस्मादागोमदस्राहिरण्यवत् ॥ अर्वाग्रथंसमनसानियच्छतम् ॥ रूपेणाप्रतिमौ देवौ सूर्यस्य तनयावुभौ ॥ वडवागर्भसंभूतौ मंडले विशतामुभौ ॥ इंद्राग्न्योर्मध्ये अश्विनौ ॥ १३ ॥ सोमासः, मधुच्छंदा विश्वेदेवा गायत्री अग्नि यमयोर्मध्ये विश्वेदेवावाहने विनियोगः ॥ ॐ सोमासश्चर्षणीधृतोविश्वेदेवासआगतदाश्वांसोदाशुषः सुत ॥ क्रतुर्दक्षो वसुः सत्यः कामलौ धूम्रलोचनौ । पुरूरवार्द्रवश्चैव विश्वेदेवा इमे दश ॥ सोमपा अग्निष्वात्ताश्च बर्हिषदस्तु कालकाः।एकशृंगो वसुश्चैव द्वितीयः सोमपास्तथा ॥ अग्नियममध्ये विश्वेदेवान् सपितृकान् ॥ १४ ॥ अभित्यं, देवो गौतमो वामदेवः सप्त यक्षा अष्टी यमनिर्ऋत्योर्मध्ये सप्तयक्षावाहने विनियोगः ॥ ॐ अभित्यं देवं सवितारमूण्योः कविक्रतुमर्चामिसत्यसवंरत्नधामभिप्रियंमति॥ ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्य पाणिरमिमीतसुक्रतुः कृपासुवः ॥ अहमावाहयिष्यामि सप्तयक्षान्महाबलान् ॥ पुण्यरूपान् पुण्यजनान् पुण्यकर्मरतान्सदा ॥ यमनैर्ऋत मध्ये सप्त यक्षान् ॥ १५ ॥ आयंगौः, सार्पराज्ञी सर्पा गायत्री निर्ऋतिवरुणमध्येसर्पावाहने विनियोगः ॥ ॐ आयंगौःपृश्निरक्रमीदसद न्मातरंपुरः पितरंचप्रयन्त्स्वः ॥ आवाहयाम्यहं देवान्भूतनागान् महाबलान् ॥ सर्पराजान्महाकायान्मणिमंडलभूषितान् ॥ निर्ऋति वरुणमध्ये भूतनागान् ॥ १६ ॥ अप्सरसाम्, पेतश ऋष्यशृंगो गंधर्वाप्सरसोनुष्टुप् वरुणवाय्वोर्मध्ये गंधर्वाप्सरसआवाहने विनियोगः ॥ ॐ अप्सरसांगंधर्वाणांमृगाणाचरणेचरन् ॥ केशीकेतस्यविद्वानसखास्वादुर्मदिंतमः ॥ आवहयामि गंधर्वान् साप्सरोगीततत्परान् ॥ हाहाहूहूश्चैवमायान् गंधर्वाप्सरसस्तथा ॥ वरुणवायुमध्ये गंधर्वाप्सरोभ्यो नमः गंधर्वाप्सरसः ॥ १७ ॥ यदक्रंद, औचाथ्यो दीर्घतमास्कंद त्रिष्टुप् ब्रह्मसोममध्ये स्कंदावाहने विनियोगः ॥ ॐ यदक्रंदःप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यंमहिजातंतेअर्वन ॥ एह्येहि षण्मुख सुरेश्वर तारकारे श्रीनीलकंठवरवाहन शक्तिपाणे ॥ ओंकारकोटरसुरेश्वरपूज्यमान सांनिध्यमत्र कुरु
ब्रह्मकुबेरमध्ये ॥ इति स्कंदम्॥१८॥ तत्रैव ॥ ऋषभम्, ऋषभो वैराजो नंदीश्वरोनुष्टुप् ब्रह्मसोमयोर्मध्ये नंदीश्वरावाहने विनियोगः॥ॐ
ऋषभं मासमानानां सपत्नानां वृषासहिम् ॥ हंतारं शत्रुणां कृधि विराजं गोपतिं गवाम्॥आवाहयाम्यहं देवं वृषभं सर्वपूजितम्॥ महादेवा
सने मुख्यं सर्वसिद्धिप्रदायकम्॥ स्कंदादुत्तरे नंदिनम् ॥ १९ ॥ कद्रुद्राय, घोरः कण्वः शूलो गायत्री तदुत्तरे शूलावाहने विनियोगः ॥
ॐ कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसेवोचेमशंतमंहृदे ॥आवाहयामि तं शूलं शस्त्रराजं महोज्ज्वलम्॥दुष्टारिघातने दक्षं शिवबाहुविराजितम्॥
तत्रैव शूलम्॥२०॥कुमारं, कुमारो महाकालस्त्रिष्टुप् तदुत्तरे महाकालावाहने विनियोगः॥ ॐ कुमारंमातायुवतिःसमुब्धंगुहाबिभर्तिनददाति
पत्रे॥अनिकमस्यनमिनज्जानासः पुरःपश्यंतिनिहितमरातौ॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥ सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपि
णम्॥ शूलादुत्तरे महाकालम् ॥२१॥ अदितिः, लौक्यो बृहस्पतिर्दक्षोनुष्टुप् ब्रह्मेशानयोर्मध्ये दक्षावाहने विनियोगः ॥ ॐ अदितिर्ह्यजनि
ष्टदक्षयादुहितातवतान्देवाअन्वजायंतभद्राअमृतबंधवः ॥ आवाहयामि तान् देवान् कैलासाधिपपार्षदान् ॥ दक्षादिप्रमुखान् सप्तगणाञ्शिव
सुखावहान् ॥ ब्रह्मेशानयोर्मध्ये दक्षादिसप्तगणान् ॥ २२ ॥ तामग्निवर्णां, सौभरिर्दुर्गात्रिष्टुप् ब्रह्मेंद्रयोर्मध्ये दुर्गावाहने विनियोगः ॥ ॐ
तामग्निवर्णांतपसाज्वलंतींवैरोचनीं कर्मफलेषुजुष्टाम् ॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरासितरसेनमः ॥ आगच्छ कोकिले दुर्गे सिंहारूढे महाभुजे ॥
विंध्याचलकृतावासे मंडले त्वं समाविश ॥ ब्रह्मेंद्रमध्ये दुर्गाम् ॥ २३ ॥ इदंविष्णुः, काण्वो मेधातिथिर्विष्णुर्गायत्री ब्रह्मेंद्रयोर्मध्ये
विष्णवावाहने विनियोगः ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपांसुरे ॥ आवाहयाम्यहं देवं श्रीविष्णुं कमलापतिम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगच्चक्षुर्विश्वजन्मस्थितिसंहारकारकम्॥ दुर्गापूर्वे विष्णुम् ॥२४॥ उदीरतामवर, शंखः स्वधा पितरस्त्रिष्टुप् ब्रह्माग्न्योर्मध्ये स्वधावाहने विनियोगः॥ ॐ उदीरतामवरउत्परासउन्मध्यमाःपितरःसौम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु॥ कव्यमादाय सततं पितृभ्यो या प्रयच्छति॥ तिष्ठत्युदीच्यां दिश्यर्कच्छविमावाहये स्वधाम्॥ ब्रह्माग्न्योर्मध्ये स्वधाम् ॥ २५ ॥ परंमृत्यो, संकुशिको मृत्युरोगास्त्रिष्टुप् ब्रह्मयमयोर्मध्ये मृत्युरोगावाहने विनियोगः ॥ ॐ परंमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदेवयानात् ॥ चक्षुष्मंतेशृण्वतेतेब्रवीमानः प्रजांरीरिषोमोतवीरान्॥ इहोपहूतो भगवान् मृत्युः शामित्रकर्मणि॥ न कश्चिन्म्रियते तावद्यावदास्त इहांतकः॥ ब्रह्मयममध्ये मृत्युरोगान्॥ ॥ २६ ॥ गणानांत्वा, शौनको गृत्समदो गणपतिर्जगती ब्रह्मनिर्ऋत्योर्मध्ये गणपत्यावाहने विनियोगः॥ ॐ गणानांत्वागणपतिंहवामहे॥ कविं कवीनामुपमश्रवस्तमम्॥ ज्येष्ठराजंब्रह्मणाब्रह्मणस्पतिआनःशृण्वन्नूतिभिःसीदसादनम्॥ एकदंतं महाकायं पद्मकांचनसन्निभम्॥ लंबोदरं विशालाक्षं वंदेहं गणनायकम्॥ ब्रह्मनिर्ऋतिमध्ये गणपतिम् ॥ २७ ॥ शन्नोदेवीः, आंबरीषः सिंधुद्वीप आपो गायत्री ब्रह्मवरुणयोर्मध्ये अबावाहने विनियोगः ॥ ॐ शन्नोदेवीरभीष्टयआपोभवन्तुपीतये ॥ शंयोरभिस्रवंतुनः ॥ स्वच्छाः पवित्रा जनशुद्धिबीजा यादोभिरत्यंतभयंकाराश्च ॥ कुर्वंतु सान्निध्यमथांबुवेगास्सर्वस्य विश्वस्य च जीवरूपाः॥ ब्रह्मवरुणमध्ये अपः ॥२८॥ मरुतो यस्य, राहूगणो गौतमो मरुतो गायत्री ब्रह्मवाय्योर्मध्ये मरुदावाहने विनियोगः ॥ ॐ मरुतोयस्यहिक्षयेपाथादिवोविमहसः ससुगोपातमोजनः ॥ आगच्छ त्वं महादेव मृगारूढ प्रभंजन ॥ यज्ञसंरक्षणार्थाय मंडले त्वं स्थिरो भव ॥ ब्रह्मवायुमध्ये मरुद्भ्यो नमः मरुतः ॥ २९ ॥ स्योनापृथिवि, काण्वो मेधातिथिर्भूमिर्गायत्री ब्रह्मणः पादमूले कर्णिकाधः पृथिव्यावाहने विनियोगः ॥ ॐ

For Private And Personal Use Only

स्योनापृथिविनो भवानृक्षरानिवेशनी॥यच्छानः शर्मसप्रथाः॥ एह्येहि वसुधे देवि शैलजीवनकानने ॥ ब्रह्मणः पादमूले तु सान्निध्यं कुरु
मे सदा॥ ब्रह्मपादमूले पृथिवीम्॥ ३० ॥इमंमेगंगे, सिंधुक्षित्प्रय्यामेधा गंगादिनद्यो जगती (तत्रैव) गंगादिनद्यावाहने विनियोगः॥ ॐ इमंमेगंगे
यमुनेसरस्वतिशुतुद्रिस्तोम ॰ सचतापरुष्णिया॥ असिक्नियामरुद्वृधेवितस्तयार्जीकीयेश्रृणुह्यासुषोमया ॥ गंगे च यमुने चैव गोदावरि सर
स्वति॥नर्मदे सिंधुकावेरि सांनिध्यं कुर्वतामिह ॥ तत्रैव गंगादिसप्तसरितः ॥ ३१ ॥ धाम्नो, गौतमो वामदेवः सागरोऽनुष्टुप् (तत्रैव) सप्त
सागरावाहने विनियोगः॥ ॐधाम्नोधाम्नोराजन्नितोवरुणनोमुंच॥ यदापोअघ्न्यावरुणेतिशपामहेततोवरुणनोमुंचमयिद्रापोमोषधीहिंसीरतोविश्व
व्यचाभूस्त्वेतोवरुणनोमुंच॥क्षारेक्षुरससर्पोदान् घृतोदक्षीरकोदकौ॥दधिमंडोदशुद्धोदौ सप्तैतान् स्थापयाम्यहम्॥ तत्रैव सप्तसागरान्॥ ३२॥
तदुपरि मेरुं नाममंत्रेण पूजयेत्॥मेरवे नमः, मेरुमावाहयामि ॥ ३३ ॥ ततो मंडलाद्बहिः सोमादिसन्निधौ क्रमेण आयुधान्यावाहयेत् ॥
तत्र क्रमः ॥ सोमसमीपे गदायै नमः, गदामावाहयामि ॥ ३४ ॥ ईशानसमीपे-त्रिशूलाय नमः, त्रिशूलमावाहयामि ॥ ३५ ॥ इन्द्रस
मीपे-वज्राय नमः, वज्रमावाहयामि ॥ ३६ ॥ अग्निसमीपे-शक्तये नमः, शक्तिमावाहयामि ॥ ३७ ॥ यमसमीपे-दंडाय नमः दंडमावाह
यामि ॥ ३८ ॥ निर्ऋतिसमीपे-खड्गाय नमः खड्गमावाहयामि ॥ ३९ ॥ वरुणसमीपे-पाशाय नमः पाशमावाहयामि ॥ ४० ॥ वायु
समीपे-अंकुशाय नमः अंकुशमावाहयामि ॥ ४१ ॥ तद्बाह्ये उत्तरे-गौतमाय नमः गौतममावाहयामि ॥ इति सर्वत्र ॥ ४२ ॥ ईशान्यां
भारद्वाजाय नमः भारद्वाजम्० ॥ ४३ ॥पूर्वे-विश्वामित्राय नमः विश्वामित्रम्० ॥ ४४ ॥अग्नेय्यां-कश्यपाय नमः कश्यपम्० ॥ ४५॥ दक्षिणे
जमदग्नये नमः जमदग्निम्० ॥ ४६ ॥ नैर्ऋत्यां-वसिष्ठाय नमः वसिष्ठम्० ॥ ४७॥ पश्चिमे-अत्रये नमः अत्रिम्० ॥ ४८ ॥ वायव्याम्-अरुंध

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यै नमः अरुंधतिम्० ॥ ४९ ॥ तद्बाह्ये-पूर्वादिक्रमेण ऐंद्र्यै नमः ऐंद्रीम्० ॥ ५० ॥ कौमार्यै नमः कौमारीम्० ॥ ५१ ॥ ब्राह्म्यै नमः ब्राह्मीम्० ॥ ५२ ॥ वाराह्यै नमः वाराहीम्० ॥ ५३ ॥ चामुंडायै नमः चामुंडाम्० ॥ ५४ ॥ वैष्णव्यै नमः वैष्णवीम्० ॥ ५५ ॥ उत्तरस्यां-माहेश्वर्यै नमः माहेश्वरीम्० ॥ ५६ ॥ वैनायक्यै नमः वैनायकीम्० ॥ ५७ ॥ इत्यष्टौ शक्तीः प्रतिष्ठाप्य प्रत्येकं सहैवावाहयेत् पूजयेदिति ॥ अत्र एकदेवतायाः षट्पंचाशद्गणनायामाधिक्यम् ॥ तत्र शूलमहाकालयोः एकवद्भावत्वात् अग्रत्रिशूलस्य ग्रहणात् पृथकूत्वं न, गणिते सत्यपि एक एव देवता तेन न विरोधः ॥ देवतास्तु षट्पंचाशदेवेत्यलमिति ॥ इत्येकोनविंशतिरेखात्मकं सर्वतोभद्रमंडलं समाप्तम् ॥

अथ चतुस्त्रिंशद्रेखात्मकं द्वादशलिंगतोभद्रमंडलं सदेवतमाह ॥ (उक्तं च रुद्रयामले) रुद्र उवाच ॥ उद्धारं कथयिष्येहं मदर्चार्थं तव प्रिये ॥ चतुस्त्रिंशत समारेखाः कुर्यात्पूर्वोत्तराः शुभाः ॥ १ ॥ मध्ये वृत्तं समालिख्य तन्मध्ये तु दशारकम् ॥ बहिरष्टदलं पद्मं ततः षोडशपत्रकम् ॥ २ ॥ चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा ॥ चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभम् ॥ ३ ॥ खंडेंदुस्त्रिपदैः कोणे शृंखला दशकोष्ठिका ॥ एकविंशत्पदा वल्ली भद्रे तु षट्पदैस्तथा ॥ ४ ॥ अष्टादशपदं लिंगं भद्रं चाष्टपदं तथा ॥ त्रयोदशपदीं वापीं कुर्याल्लिंगस्य सन्निधौ ॥ ५ ॥ पूज्योपर्यपि भद्राणि भवंति नवभिः पदैः ॥ एवं द्वादशलिंगाढ्यं वापीषोडशकान्वितम् ॥ ६ ॥ षट्पदाष्टकभद्राढ्यं पूज्यं द्वादशकात्मकम् ॥ मध्ये विंशति भद्रं तु कथितं पूर्वसूरिभिः ॥ ७ ॥ वर्णक्रमः ॥ वर्णक्रममथो वक्ष्ये मंडलस्य च सिद्धये ॥ भृष्टतंडुलपिष्टेन कृष्णवर्णेन निर्मितम् ॥ ८ ॥ लिंगजातं सितेंदुः स्याद्वल्ली बिल्वदलप्रभा ॥ शृंखला कृष्णवर्णा च पीतं भद्रद्वयं भवेत् ॥ ९ ॥ सिता वाप्यस्तथा पूज्या मध्यभद्रे त्वयं क्रमः ॥ पूज्योपर्यरुणे भद्रे सिते द्वे मध्यमं सितम् ॥ १० ॥ सत्त्वं रजस्तमश्चैव बाह्यतः परिधित्रयम् ॥ एवं सुशोभितं कार्यं मंडलं

For Private And Personal Use Only

शिवपूजने ॥ अथ देवतास्थापनम् ॥ देशकालौ संकीर्त्य अद्य पुण्यतिथौ मम इह जन्मनि जन्मांतरे च सुखसौभाग्यसंतानादिफल
प्राप्त्यर्थम् उमामहेश्वरदेवताप्रीतये मया आचरितस्य अमुकव्रतस्य फलप्राप्तिद्वारा लिंगतोभद्रमंडलदेवतावाहनप्रतिष्ठापूजनं च करिष्ये ॥
इति संकल्पः ॥ मंडलबाह्ये ईशानकोणे ॥ गुरवे नमः गुरुमावाहयामि स्थापयामि । एवं सर्वत्र १॥ अग्नेय्यां-गणपतये नमः२ ॥ नैर्ऋते
दुर्गायै नमः ३॥ वायव्ये-क्षेत्रपालाय नमः ४॥ ततः भद्रमध्ये-श्रीसदाशिवाय नमः ५॥ इति स्थापयेत् ॥ ततः अष्टदले-पूर्वस्यां दिशि
कालाग्निरुद्राय नमः ॥ कूर्माय नमः॥ मण्डूकाय नमः१॥ आग्नेय्यां-वाराहाय नमः ॥ अनन्ताय नमः २॥ दक्षिणे-पृथिव्यै नमः ॥
स्कंदाय नमः ३ ॥ नैर्ऋत्यां-दिशि नलाय नमः॥ यमाय नमः ४॥ पश्चिमे-पत्रेभ्यो नमः ॥ केसरेभ्यो नमः ॥ कर्णिकायै नमः ५ ॥
वायव्यां-सिंहासनाय नमः॥ पद्मासनाय नमः ६॥ उत्तरे-धर्माय नमः॥ ज्ञानाय नमः ॥ वैराग्याय नमः ७ ॥ ईशान्याम्-ऐश्वर्याय नमः॥
चिदाकाशाय नमः ८ ॥ पीठमध्ये-योगपीठात्मने नमः ॥ इत्येकविंशतिदेवताः संस्थापयेत् ॥ ततः कर्णिकोपरि ॥ पूर्वे-पृथिव्यै नमः १॥
दक्षिणे-कपालाय नमः२॥ पश्चिमे-सरिद्भ्यो नमः३॥ उत्तरे-सागरेभ्यो नमः४॥ कर्णिकासमीपे-चत्वारि श्वेतभद्राणि तद्देवतास्थापनम् ॥
पूर्वे-तत्पुरुषाय नमः१॥ दक्षिणे-अघोराय नमः२॥ पश्चिमे-सद्योजाताय नमः३॥उत्तरे-वामदेवाय नमः४॥तत्समीपे-कृष्णानि अष्टौभद्राणि
तद्देवतास्थापनम्॥ऐशान्ये-भगवत्यैनमः१॥पूर्वे-उमायैनमः२॥ आग्नेय्यां-शंकरप्रियायैनमः३॥दक्षिणे-पार्वत्यैनमः४॥नैर्ऋत्ये-गौर्यैनमः५॥ ॥ ३१ ॥
पश्चिमे-काल्यै नमः६॥ वायव्यां-कौम्यै नमः७॥ उत्तरे-विश्वंभर्यै नमः८॥ ततः कृष्णभद्राणाम् अधःअष्टौ रक्तभद्राणि तद्देवतास्थापनम्॥
ऐशान्ये-नंदिन्यै नमः १ ॥ पूर्वे-महाकालाय नमः २॥ आग्नेय्यां-वृषभाय नमः ३ ॥ दक्षिणे-भृंगकिरीटिने नमः ४ ॥ नैर्ऋत्यां-स्कंदाय

नमः ५ ।। पश्चिमे-उमापतये नमः ६ ।। वायव्यां-चण्डेश्वराय नमः ७ ॥ उत्तरे-सोमसूत्राय नमः ८ ।। अथ लिंगोपरि चत्वारि श्वेत भद्राणि तद्देवतास्थापनम् ।। पूर्वे-धात्रे नमः १ ।। दक्षिणे-मित्राय नमः २ ।। पश्चिमे-यमाय नमः ३ ।। उत्तरे-रुद्राय नमः ४ ।। ततः तत्समीपलिंगोपरि अष्टौ पीतभद्राणि तद्देवतास्थापनम् ।। ऐशान्ये-वरुणाय नमः १ ।। पूर्वे-सूर्य्याय नमः २ ॥ अग्न्यां-भगाय नमः ३ ।। दक्षिणे-विवस्वते नमः ४ ।। नैर्ऋत्यां-पुरुषोत्तमाय नमः ५ ।। पश्चिमे-सवित्रे नमः ६ ॥ वायव्ये-त्वष्ट्रे नमः ७ ।। उत्तरे-विष्णवे नमः ८ ।। ततः द्वादशलिंगदेवतास्थापनं पूर्वादिचतुर्दिक्षु ॥ पूर्वे-शिवाय नमः १ ॥ एकनेत्राय नमः २ ॥ एकरुद्राय नमः ३ ॥ दक्षिणे-त्रिमूर्तये नमः १ ॥ श्रीकंठाय नमः २ ॥ वामदेवाय नमः ३ ॥ पश्चिमे-ज्येष्ठाय नमः १ ॥ श्रेष्ठाय नमः २ ॥ रुद्राय नमः ३ ॥ उत्तरे-कालाय नमः १ ॥ कलकर्णिकाय नमः २ ॥ बलविकर्णाय नमः ३ ॥ अथ श्वेतषोडशवापीदेवतास्थापनमीशानादि क्रमेण ॥ अणिमायै नमः १ ॥ महिमायै नमः २ ॥ लघिमायै नमः ३ ॥ गरिमायै नमः ४ ॥ प्राप्त्यै नमः ५ ॥ प्राकाम्यायै नमः ६ ॥ ईशितायै नमः ७ ॥ वशितायै नमः ८ ॥ ब्राह्मयै नमः ९ ॥ महेश्वर्यै नमः १० ॥ कौमार्यै नमः ११ ॥ वैष्णव्यै नमः १२ ॥ वाराह्यै नमः १३ ॥ इन्द्राण्यै नमः १४ ॥ चामुण्डायै नमः १५ ॥ चण्डिकायै नमः १६ ॥ ततः वापीसमीपे अष्टौ रक्तभद्राणि तद्देवतास्थापनमैशान्यादिक्रमेण ॥ असितांगभैरवाय नमः १ ॥ रुरुभैरवाय नमः २ ॥ चंडभैरवाय नमः ३ ॥ क्रोधभैरवाय नमः ४ ॥ उन्मत्तभैरवाय नमः ५ ॥ कालभैरवाय नमः ६ ॥ भीषणभैरवाय नमः ७ ॥ संहारभैरवाय नमः ८ ॥ अथाष्ट वल्लीदेवतास्थापनमैशान्यादिक्रमेण ॥ घृताच्यै नमः १ ॥ मेनकायै नमः २ ॥ रंभायै नमः ३ ॥ उर्वश्यै नमः ४ ॥ तिलोत्तमायै

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः ५ ॥ सुकेश्यै नमः ६ ॥ मंजुघोषायै नमः ७ ॥ अप्सरोभ्यो नमः ८ ॥ ततः मण्डलमध्ये परिधिसमीपे शृंखलादेवतास्थापनमाग्नेय्यादिक्रमेण-अग्नेय्यां-भवाय नमः १ ॥ शिवाय नमः २॥ रुद्राय नमः ३ ॥ पशुपतये नमः ४ ॥ उग्राय नमः ५॥ महादेवाय नमः ६ ॥ भीमाय नमः ७ ॥ ईशानाय नमः ८ ॥ अनन्ताय नमः ९ ॥ वासुकये नमः १० ॥ ततः नैर्ऋते-परिधिसमीपे शृंखलादेवतास्थापनम् ॥ तक्षकाय नमः १ ॥ कुलीरकाय नमः २ ॥ कर्कोटकाय नमः ३ ॥ शंखपालाय नमः ४ ॥ कंबलाय नमः ५ ॥ अश्वतराय नमः ६ ॥ वैन्याय नमः ७ ॥ अंगाय नमः ८ ॥ हैहयाय नमः ९ ॥ अर्जुनाय नमः १० ॥ वायव्ये-दशशृंखलादेवतास्थापनम् ॥ शकुंतलाय नमः १ ॥ भरताय नमः २ ॥ नलाय नमः ३ ॥ रामाय नमः ४ ॥ सार्वभौमाय नमः ५ ॥ निषधाय नमः ६ ॥ विंध्याचलाय नमः ७ ॥ माल्यवते नमः ८ ॥ पारियात्राय नमः ९ ॥ सह्याय नमः १० ॥ ततः ऐशान्ये-परिधिसमीपे दशशृंखलादेवतास्थापनम् ॥ हेमकूटाय नमः १ ॥

अथचतुस्त्रिंशद्रेखात्मकंद्वादशलिंगतोभद्रमं०



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गन्धमादनाय नमः २ ॥ कुलाचलाय नमः ३ ॥ हिमवते नमः ४ ॥ रैवताचलाय नमः ५ ॥ देवगिरये नमः ६ ॥ मलयाचलाय नमः ७ ॥ कनकाचलाय नमः ८॥ पृथिव्यै नमः ९ ॥ अनन्ताय नमः १० ॥ अथ चतुर्दिक्षु खंडेन्दुदेवतास्थापनमैशान्यादिक्रमेण॥ ऐशान्ये-अश्विनीकुमाराभ्यां नमः १ ॥ आग्नेय्यां-विश्वेभ्यो देवेभ्यो नमः २ ॥ नैर्ऋते पितृभ्यो नमः ३ ॥ वायव्यां-नागेभ्यो नमः ४॥ ततः मंडलाद्बहिः प्रथमं सत्त्वपरिधौ पूर्वादिक्रमेण देवतास्थापनम् ॥ इन्द्राय नमः १ ॥ अग्नये नमः २ ॥ यमाय नमः ३ ॥ निर्ऋतये नमः ४ ॥ वरुणाय नमः ५ ॥ वायवे नमः ६ ॥ कुबेराय नमः ७ ॥ ईश्वराय नमः ८॥ इन्द्रेशानयोर्मध्ये-ब्रह्मणे नमः ९ ॥ वरुणनैर्ऋतयोर्मध्ये-अनन्ताय नमः १० ॥ तद्बहिः रजःपरिधौ पूर्वादिक्रमेण देवतास्थापनम् ॥ वज्राय नमः १ ॥ शक्तये नमः २ ॥ दण्डाय नमः ३ खड्गाय नमः ४ ॥ पाशाय नमः ५ ॥ अंकुशाय नमः ६ ॥ गदायै नमः ७ ॥ त्रिशूलाय नमः ८ ॥ पद्माय नमः ९ ॥ चक्राय नमः १० ॥ तद्बहिः तमोमयकृष्णपरिधौ पूर्वादिक्रमेण देवतास्थापनम् ॥ कश्यपाय नमः १ ॥ अत्रये नमः २॥ भरद्वाजाय नमः ३ ॥ विश्वामित्राय नमः ४ ॥ गौतमाय नमः ५ ॥ जमदग्नये नमः ६ ॥ वसिष्ठाय नमः ७ ॥ अरुंधत्यै नमः ८॥ ततः पूर्वे-ऋग्वेदाय नमः १ ॥ दक्षिणे-यजुर्वेदाय नमः २ ॥ पश्चिमे-सामवेदाय नमः ३ ॥ उत्तरे-अथर्ववेदाय नमः ४ ॥ एवमष्टोत्तरशत१०८देवताः संस्थाप्य षोडशोपचारैः संपूज्य ततः प्रधानदेवतां मण्डलमध्ये संस्थाप्य पूजयेत् ॥ इति द्वादशलिंगतोभद्रमण्डलविधानम् ॥ अथ त्रयोदशरेखात्मकं लघुगौरीतिलकाख्यमेकलिंगतोभद्रमण्डलम्॥ तिर्यगूर्ध्वगता रेखाः कार्याः स्त्रिग्धास्त्रयोदश॥ कोणेंदुस्त्रिपदः कार्यः श्रृंखलास्त्रिपदाः सिताः ॥ १ ॥ बल्ली च षट्पदा नीला भद्रं रक्तं प्रकल्पयेत् ॥ पदैर्द्वादशभिः स्पष्टमुत्तरे पूर्वदक्षिणे ॥ २ ॥

९.

For Private And Personal Use Only

पश्चिमायां महारुद्रमष्टाविंशतिकोष्ठकैः ॥ लिंगपार्श्वे तथा मूर्धन्यष्टौ कोष्ठाः सुपीतकाः ॥ ३ ॥ लिंगमेकं तथा गौर्य्यस्तिस्रश्चात्र तु मंडले ॥
पूजयेन्मण्डलं चैव तस्य गौरी प्रसीदति ॥ देवता पूर्वोक्ता एव ॥ इति ॥ ल० ॥ अथ लघुगौरीतिलकाख्यमेकलिंगतोभद्रमण्डलम् ॥
अथ सूर्य्यभद्रम ॥ रेखाविंशतिसंयुक्तं भीमरथ्यास्तु मंडलम॥ सूर्यव्रतेषु सर्वेषु शस्यते मंडलं त्विदम् ॥
॥ १ ॥ खंडेन्दुस्त्रिपदः कार्यः शृंखला षट्पदा मता ॥ त्रयोदशपदैर्वल्ली भद्रं तु त्रिपदं मतम्॥ २ ॥ सू
र्यत्रयं प्रकुर्वीत सप्तविंशतिभिः पदैः ॥ सूर्यत्रयं चतुष्कोणे पदमर्धमितं भवेत॥ ३॥ पदैस्तु नवभिः कृत्वा
भवेत्सूर्यत्रयं ततः॥ सूर्योपरि भवेद्भद्रं पदं द्वादशसंमितम॥ ४॥ ऊर्ध्वमिंदुं प्रकुर्वीत चतुर्भिस्तु मितैः पदैः॥
परिधिः षोडशपदा पद्मं नवपदं ततः ॥ ५ ॥ सत्त्वं रजस्तम इति रेखाः स्युर्मंडलाद्बहिः ॥ कृष्णा च शृंख
ला ज्ञेया वल्ली नीला प्रकीर्तिता ॥ ६ ॥ भद्रान् पीतान् प्रकुर्वीत रवीन् रक्तान् प्रकारयेत् ॥ पीतश्च परिधि
प्रोक्तः पद्मं रक्तं तथैव च ॥ ७ ॥ इति भद्रमार्तण्डे सूर्यभद्रम्॥ अथ गणपतिभद्रम् ॥ अथातः



संप्रवक्ष्यामि मंडलं सर्वसिद्धिदम् ॥ नाम्ना च विघ्नमर्दाख्यं विनायकव्रते हितम् ॥ १ ॥ तिर्यगूर्ध्वं सप्तदश रेखाः कार्याः सुशोभनाः ॥
खडेंदुस्त्रिपदः कोणे शृंखला च चतुष्पदैः॥ २॥ कार्या नवपदा वल्ली भद्रं रक्तं चतुष्पदम्॥ ततो विं[illegible]तिकोष्ठेषु कार्यो गणपतिः शुभः ॥ ३॥
कोष्ठद्वयेन मुकुटं गणेशस्य च कारयेत् ॥ पीतश्च परिधिः कार्यः पदैर्विंशतिभिस्तथा ॥ ४॥ मध्ये षोडशकोष्ठेन पद्मं कार्यं सुशोभनम् ॥
सर्वतोभद्रदेवान्वै विशेषेणात्र योजयेत् ॥ इति गणपतिभद्रम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे भद्रमंडलप्रकरणे तृतीयस्तरंगः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूर्यमण्डलम् ॥



गणपतिभद्रमण्डलम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ मंडलानां मध्ये उक्तखंडेन्दुशृंखलादिस्वरूपज्ञानाय तच्चिह्नानि ।

इदं खंडेंदुस्त्रिपदस्तस्य चिह्नम् । अत्र श्वेतवर्णः ।

इदं शृंखलाचिह्नम् । अत्र कृष्णवर्णः ।



इयमेकादशादिपदात्मिका वल्ली तस्याश्चिह्नम् ॥ अत्र हरितवर्णः पीतश्च क्वचित् ।



इमानि भद्रचिह्नानि ।
अत्र वर्णस्तु पीतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इमानि वापीचिह्नानि अत्र श्वेतवर्णः।
पंचमी खण्डवापी ।

इदं राममुद्राचिह्नम् ।





इमानि शिवलिंगचिह्नानि अत्र कृष्णवर्णः ।



इदं तोरणचिह्नमुभयभद्रसंलग्नमत्र रक्तादिवर्णः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इदं परिधिचिह्नमत्र पीतश्वेतरक्तकृष्णवर्णाः ।

अथ स्पष्टलिखितमंडलानां कोष्ठकमध्ये पंचरंगानां पूरणार्थं बिंदुचिह्नानि संति तेषां सूचना ।

एतादृशेषु श्वेतकोष्ठकेषु श्वेतवर्णं श्वेतधान्यं वा पूरयेत् ।

एकबिन्दुयुक्तेषु कोष्ठकेषु पीतवर्णं पीतधान्यं वा पूरयेत् ।

यत्र बिंदुद्वयं तत्र रक्तवर्णं रक्तधान्यं वा पूरयेत् ।

यत्र बिंदुत्रयं तत्कोष्ठकेषु हरितवर्णं हरितधान्यं वा पूरयेत् ।

कृष्णवर्णयुक्तकोष्ठकेषु कृष्णवर्णं कृष्णधान्यं वा पूरयेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशाय नमः॥अथ सर्वदेवोपयोगिपद्धतिप्रारंभः॥तत्रादौ पंचांगपूजनं (देवीरहस्ये) जप्त्वा मंत्री मंत्रराजं हुत्वा देवे दशांशतः॥ तर्पयेत्तद्दशांशेन मार्जयेत्तद्दशांशतः॥ भोजयेत्तद्दशांशेन मंत्रसिद्धिर्भवेद्ध्रुवम् ॥ अथ पञ्चांगपूजने मंत्रोद्धारणक्रमः (आगमचिंतामणौ) होमतर्पणयोः स्वाहा न्यासपूजनयोर्नमः ॥ मंत्रांते योजयेन्मंत्री जपकाले यथा तथा ॥ अथ संक्षेपतः सर्वासां देवतानां नित्यपूजाविधिः (रुद्रयामले) आदौ ऋष्यादिविन्यासः करशुद्धिस्ततः परम् ॥ अंगुलीव्यापकौ कृत्वा हृदयादिन्यास एव च ॥ १ ॥ तालत्रयं च दिग्बंधः प्राणायामस्ततः परम् ॥ ध्यानं पूजा जपश्चैव सर्वतंत्रेष्वयं विधिः ॥ २ ॥ अथ पूजादिमाहात्म्यम् ॥ पूजया विपुलं राज्यमग्निकार्येण सम्पदः ॥ जपेन पापसंशुद्धिर्ज्ञानध्यानेन मुच्यते ॥ ३ ॥ त्रिकालं गन्धपुष्पाद्यैरर्चिते दैवते निशि ॥ पुरश्चरणकृतेन विनैवासौ प्रसीदति ॥ ४ ॥ (तत्रांतरेपि) एकदा वा भवेत्पूजा न जपेत्पूजनं विना ॥ जपांते च भवेत्पूजा पूजांते वा जपेन्मनुम् ॥ ५ ॥ मासार्द्धमथ वा मासमथ वा द्विगुणं तथा ॥ यावत्फलानिमान्योगी तावदेवं समाचरेत् ॥ ६ ॥ (मंत्रमहोदधौ) पूजनेन फलार्द्धं स्यादन्यदत्तैस्तु साधनैः ॥ (तंत्रांतरेपि) यदि पूजाद्यशक्तः स्याद्द्रव्याभावेन सुंदरि ॥ केवलं जपमात्रेण पुरश्चर्या विधीयते ॥ ७ ॥ नियमः पुरुषे ज्ञेयो न योषित्सु कदाचन ॥ न न्यासो योषितां चात्र न ध्यानं न च पूजनम् ॥ ८ ॥ केवलं जपमात्रेण मंत्राः सिध्यंति योषिताम् ॥ ९ ॥ अथ पूजायां पंचांगशुद्धिः ॥ (ज्ञानार्णवे) आत्मा स्थानं मंत्रहव्ये देवशुद्धिस्तु पंचमी ॥ यावन्न कुरुते देवि तस्य देवार्चनं कुतः ॥ पंचशुद्धिं विना पूजा ह्यभिचाराय कल्पते ॥ १० ॥ (अथात्मशुद्धिप्रकारः) सुस्नातैर्भूतशुद्धैश्च प्राणायामादिभिः प्रिये ॥ षडंगाद्यखिलन्यासैरात्मशुद्धिरितीरिता ॥ ११ ॥ (अथ मंत्रशुद्धिप्रकारः) ग्रंथिता मातृकावर्णैर्मूलमंत्राक्षराणि च ॥ क्रमोत्क्रमाद्द्विरावृत्त्या मंत्रशु

For Private And Personal Use Only

द्धिरितीरिता ॥ १२ ॥ (अथ द्रव्यशुद्धिप्रकारः) पूजाद्रव्याणि मूलास्त्रैः प्रोक्षणीयैर्विशेषतः॥ दर्शयेद्धेनुमुद्रादि द्रव्यशुद्धिरितीरिता॥ ॥ १३ ॥ (अथ देवशुद्धिप्रकारः) पीठे देवं प्रतिष्ठाप्य सकलीकृत्य मंत्रवित् ॥ मूलमंत्रेण दीपादीन्माल्यादीनुदकेन च ॥ १४ ॥ त्रिवारं प्रोक्षयेद्विद्वान् देवशुद्धिरितीरिता ॥ पंचशुद्धिं विधायेत्थं पश्चाद्यजनमाचरेत् ॥ १५ ॥ (स्थानमंत्रेण स्थानं शोधयेत) अथ षोडशोपचाराः ॥ पाद्यार्घ्याचमनीयं च स्नानं वसनभूषणे ॥ गंधपुष्पधूपदीपनैवेद्याचमनं तथा ॥ १६ ॥ तांबूलमर्चनस्तोत्रं तर्पणं च नमस्क्रियाम्॥प्रयोजयेत्प्रपूजायामुपचारांस्तु षोडश ॥ १७ ॥ अथ पंचोपचाराः॥ गंधं पुष्पं तथा धूपं दीपं नैवेद्यमेव च॥ अखंडफलमासाद्य कैवल्यं लभते ध्रुवम् ॥१८॥ (आसनाद्युपचारफलं शैवरत्नाकरे)आवाहनं तु यो दद्यात्स च क्रतुफलं लभेत्॥ आसनं रुचिरं दत्त्वा शक्रतत्त्वमवाप्नुयात् ॥ १९ ॥ पाद्येन पातकं हन्यादर्घ्येणाप्नोत्यनर्घ्यताम् । ततश्चाचमनं दत्त्वा सुचित्तः सुखितां व्रजेत् ॥२०॥ स्नानं व्याधिभयं हन्याद्वस्त्रेणायुष्यवर्द्धनम् ॥ उपवीतं तु यो दद्याद्ब्रह्मवेतृत्वमेव च ॥२१॥ भूषणानि च यो दद्यादनापद्यमवाप्नुयात्॥ गंधेन लभते काममक्षतैरक्षतं भवेत् ॥ २२ ॥ नानापुष्पप्रदानेन स्वर्गे राज्यमवाप्नुयात् ॥ धूपो दहति पापानि दीपो मृत्युविनाशनः ॥ २३ ॥ सर्वमानस्तु नैवेद्यं दत्त्वा तृप्तिरतो भवेत् ॥ मुखवासनदानेन कीर्तिमान् भवति ध्रुवम् ॥ २४ ॥ नीराजनेन शुद्धात्मा

---

१ बृहत्पाराशरसंहितायाम्-आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमम् । द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया ॥ अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनं तथा॥ षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रधौतकम् ॥ यज्ञोपवीतं चाष्टम्या नवम्या गंधमेव च । पुष्पं देयं दशम्या तु एकादश्या च धूपकम् ॥ द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदयेत् । चतुर्दश्या नमस्कारं पंचदश्या प्रदक्षिणाः ॥ षोडश्योद्वासनं कुर्याच्छेषकर्माणि पूर्ववत् । तच्च सर्वं जपेद्भूयः पौरुषं सूक्तमेव च ॥ इति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्पणेन प्रकाशयेत् ॥ फलदः पुत्रवान्मर्त्यस्तांबूलात्स्वर्गमाप्नुयात्॥ २५ ॥ प्रदक्षिणं तु यः कुर्यात्पापं हंति पदेपदे ॥ दण्डप्रणामं यः कुर्य्याद्देवमुद्दिश्य सन्निधौ ॥ २६ ॥ वर्षाणि वसते स्वर्गे देहांते रेणुसंख्यया ॥ स्तोत्रेण दिव्यदेहोपि वाग्मी भवति तत्क्षणात्॥ २७॥ पुराणपठनेनैव सर्वपापक्षयो भवेत् ॥ २८ ॥ अथ सर्वदेवतापूजनोपयोगितिथ्यादिकम् ॥ चैत्रे शुक्लचतुर्दश्यां दमनैः पूजयेद्धरम् ॥ नारायणं तु द्वादश्यामष्टम्यां गिरिनंदिनीम् ॥सप्तम्यां भास्करं देवं चतुर्थ्यां गणनायकम। एवं तत्तत्तिथौ तंतं पवित्रैः श्रावणेर्चयेत् ॥ माघ कृष्णचतुर्दश्यां विशेषाच्छिवपूजनम्। आश्विनाद्यनवाहेषु दुर्गापूजा यथाविधि ॥ गोपालं पूजयेद्विद्वान्नभःकृष्णाष्टमीदिने । रामं चैत्रसिते पक्षे नवम्यामर्चयेत्सुधीः॥ वैशाखाद्यचतुर्दश्यां नरसिंहं प्रपूजयेत्।यजेच्छुक्लचतुर्थ्यां तु गणेशं भाद्रमाघयोः॥महालक्ष्मीं यजेद्विद्वान् भाद्रकृष्णाष्टमी दिने । माघस्य शुक्लसप्तम्यां विशेषाद्दिननायकम् ॥ या काचित्सप्तमी शुक्ला रविवारयुता यदि । तस्यां दिनेशं संपूज्य दद्यादर्घ्यं पुरोदितम ॥

॥ अथ सर्वमंत्रानुष्ठानोपयोगिप्रारम्भात्पूर्वकृत्यम् ॥ तत्रादौ चन्द्रताराद्विबलान्विते सुदिने सुमुहूर्ते तीर्थपुण्यक्षेत्रनिर्जनस्थाना दावनुष्ठानयोग्यभूमिपरिग्रहणं कृत्वा तत्र मार्जनदहनखननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रमाहारादिविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्मशोधनं कुर्य्यात् ॥ ततः पुरश्चरणात् प्राक् तृतीय दिवसे क्षौरादिकं विधाय प्रायश्चित्तांगविष्णुपूजाविष्णुतर्पणविष्णुश्राद्धं होमं चांद्रायणादिव्रतं च कुर्य्यात् ॥ व्रताशक्तौ गोदानं द्रव्य दानं च कुर्य्यात् ॥ सर्वकर्मणामशक्तौ प्रायश्चित्तांगपंचगव्यप्राशनं कुर्य्यात् ॥ तत्र मंत्रः ॥ ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनं पंचगव्यस्य दहत्वग्निरिवेंधनम् ॥ १ ॥ मूलं पठित्वा प्रणवेन पंचगव्यं पिबेत् ॥ तद्दिने उपवासं कुर्यात् ॥ अशक्तश्चेत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पयःपानहविष्यान्नैनैकभुक्तिव्रतम् । पुरश्चरणात् पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थं चायुतगायत्रीजपं कुर्य्यात् ॥ तथा च देशकालौ संकीर्त्य ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणामुकदेवतापुरश्चरणाधिकारार्थममुकमंत्रेण सिध्यर्थं च गायत्र्ययुतजपमहं करिष्ये ॥ इति संकल्प्य गायत्र्ययुतं जपेत् । ततो गायत्र्याचार्य्यमृषिं विश्वामित्रं तर्पयामि । गायत्रीछंदस्तर्पयामि । सवितारं देवं तर्पयामि ॥ इति तर्पणं कुर्यात् । ततस्तस्यां रात्रौ देवतोपास्तौ शुभाशुभस्वप्नं विचारयेत् । तथा च स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं स्थित्वा वृषभध्वजं प्रार्थयेत । तत्र मंत्रः-ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वत ॥ १ ॥ ॐ नमोऽजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ २ ॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥ ३ ॥ इति मंत्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य निद्रां कुर्य्यात्॥ततः निशि दृष्टं स्वप्नं प्रातर्गुरवे विनिवेदयेत्॥अथ वा स्वयं स्वप्नं विचारयेत् ॥इति

---

१ देवीभागवते-यस्य कस्यापि मंत्रस्य पुरश्चरणमारभेत । व्याहृतित्रयसंयुक्तां गायत्रीं चायुतं जपेत् ॥ नृसिंहार्कवराहाणां तांत्रिकं वैदिकं तथा । विना जप्त्वा तु गायत्रीं तत्सर्वं निष्फलं भवेत् ॥

२ लिंगं चन्द्रार्कयोर्बिंबं भारतीं जाह्नवीं गुरुम् । रक्ताभितरणं युद्धे जयोनलसमर्चनम् ॥ शिखिहंसरथांगाह्वे रथे स्थानं च मोहनम् । आरोहणं [illegible] धरा लाभश्च निम्नगा ॥ प्रासादः स्यन्दनः पद्मं छत्रं कन्या द्रुमः फली । नागो द्वीपी हयः पुष्पं वृषभोदवत्रश्च पर्वतः॥ सुरावटो ग्रहास्तारा नारी सूर्य्योदयोप्सराः । हर्म्यशैलविमानानामारोहो गगने गमः ॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् । दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥ सिंहः सिंहासनं शंखो वादित्रं रोदना देभिः । चन्दनं तर्पणं चैषां स्वप्ने संदर्शनं शुभम् ॥ तैलाभ्यक्तः कृष्णवर्णो नग्नोनागर्तवायसौ । शुष्ककंटकिवृक्षश्च चांडालो दीर्घकंधरः ॥ प्रासादस्तलहीनश्च नैते स्वप्ने शुभावहाः ॥ इति विचारयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वकृत्यम्॥ अथ प्रातःकृत्यम्॥पुश्चरणादिवसे श्रीमत्साधकेन्द्रः प्रातःकालात्पूर्वं दंडद्वयात्मके ब्राह्मे मुहूर्तें चोत्थाय निद्रास्थानाद्बहिर्निर्गत्य हस्तौ पादौ प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्यान्यवस्त्रं पारिधाय शुद्धासन उपविश्य स्वशिरसि सहस्रदलपंकजे कोटींदुप्रकाशपीठे श्रीगुरुं ध्यायेत ॥ तथा च-आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ॥ योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि ॥ ३ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य॥ प्रातःप्रभृतिसायांतं सायादिप्रातरंततः ॥ यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ॥ १ ॥ इत्यनेन मंत्रेण सर्वं गुरवे निवेद्य तदाज्ञां गृहीत्वा मूलमंत्रदेवतायाः प्रातः स्मरणं कुर्य्यात् ॥ प्रातः स्मरणं कृत्वा गुरुमंत्रदेवतात्मनामैक्यं विभाव्य अजपाजपं गुरवे समर्पयेत् ॥ (अथाजपाजपसंकल्पः संक्षेपतः) आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के ॥ वासांते बालमध्ये डफकठसहिते आदियुक्ते स्वराणां हंक्षंतत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ ॥ १ ॥ षट्शतं तु गणेशस्य षट्सहस्रं प्रजापतेः ॥ षट्सहस्रं गदापाणेः षट्सहस्रं पिनाकिनः ॥ २ ॥ आत्मनस्तत्सहस्रं च सहस्रं परमात्मनः ॥ सहस्रं श्रीगुरुभ्यश्च ह्येवं तानि नियोजयेत् ॥ ३ ॥ हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शंभुः ॥ हंसोपि जीवः परमात्महंसो हंसो गुरुर्हंसमयश्च शंभुः ॥ ४ ॥ इति पठित्वा अहोरात्रोच्चारितं षट्शताधिकमेकविंशतिसहस्रमुच्छ्वासनिश्वासात्मकमजपा गायत्रीमंत्रजपं श्रीगणेशब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुभ्यो यथासंख्यं समर्पयामि ॥ इत्युक्त्वाष्टोत्तरशतावृत्तिं हंसगायत्रीं जपेत् ॥ अथ हंसगायत्रीमंत्रः ॥ हरिः ॐ हंसो हंसस्य विद्महे हंसो हंसस्य धीमहि ॥ हंसो हंसः प्रचोदयात् ॥ इति जपित्वा त्रैलोक्यचैतन्यमयि त्रिशक्ते श्रीविश्वमातर्भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयामि ॥ १ ॥ इति संप्रार्थ्य भूमिं प्रार्थ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येत् ॥ तत्र मंत्रः-समुद्रमेखले देवि पर्वतस्तनमण्डले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥ १॥ इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पादं दत्त्वा बहिर्व्रजेत् ॥ इति प्रातःकृत्यम् । ततो ग्रामाद्बहिः नैर्ऋत्यकोणे जनवर्जिते उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरः प्रावृत्य मलमोचनं कृत्वा मृत्तिकया जलेन यथासंख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गंडूषं च कृत्वा दंतधावनं कुर्यात् । तथा च-आम्रचम्पकापामार्गाद्यन्यतमं द्वादशांगुलं दन्तकाष्ठं गृहीत्वा प्रार्थयेत् । आयुर्बलं यशो वर्चः प्रजापशुधनानि च ॥ श्रियं प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥ १ ॥ इति संप्रार्थ्य । 'ॐ ह्रीं तडित् स्वाहा' इति मंत्रेण काष्ठं छित्त्वा 'ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः' । इत्यनेन दंतान् संशोध्य 'ऐं' मंत्रेण जिह्वामुल्लिख्य दन्तकाष्ठं क्षालयित्वा नैर्ऋत्यां शुद्धदेशे निक्षिपेत् । मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्य्यात् ॥ तत्रादौ तीर्थस्नानप्रयोगः । गंगायमुनादिनद्यभावेतडागादिकं गत्वा ततः पाणिपादं प्रक्षाल्य नाभिमात्रे जले गत्वा शिखां बद्ध्वा आचम्य देशकालौ संकीर्त्य मम ज्ञाताज्ञातसमस्तपापक्षयार्थं करिष्यमाणामुकदेवतामंत्रपुरश्चरणाधिकारार्थं शरीरशुद्ध्यर्थं चा मुकप्रायश्चित्तांगभूतमादौ तीर्थस्नानमहं करिष्ये । इति संकल्प्य स्नात्वा पुनः आचम्य देवर्षिपितृतर्पणं कृत्वा ततो यक्ष्मणे तिलजलं दद्यात् तथा च-ॐ यन्मया दूषितं तोयं मलैः शारीरसम्भवैः॥तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकम् ॥ १ ॥ इति यक्ष्मणे तिलो दकं दत्त्वा ततस्तीरमागत्य-ॐ अग्निदग्धाश्च ये जीवा येप्यदग्धाः कुले मम॥ भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिम्॥ १॥इति जलांजलिं तटे निक्षिप्य पुनराचम्य सूर्य्यायार्घ्यं दद्यात् । तथा च-ॐ एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते ॥ १ ॥ इति सूर्यायार्घ्यं दत्त्वा जलाद्बहिर्निष्क्रम्य शुष्कं शुभं कार्पासोत्पन्नवस्त्रं श्वेतवर्णं प्रयोगोक्तं वा परिधाय स्नायी वस्त्रं परिपीड्य गृहं गच्छेत् ॥ इति तीर्थस्नानप्रयोगः ॥ ॥ ॥ ॥ ॥ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ गृहस्नानप्रयोगः ॥ तात्कालिकोद्धृतोदकेन उष्णोदकेन वा स्नानं कृत्वा न तु पर्युषितशीतोदकेन, ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् ॥ तत्र मंत्रः-ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ १ ॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ २ ॥ आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि ॥ एहि गंगे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ ३ ॥ ॐ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ आगच्छंतु पवित्राणि स्नानकाले सदा मम ॥ ४ ॥ इति तीर्थान्यावाह्य । ॐ ऋतं च सत्यमित्यघमर्षणमंत्रेणाभिमंत्र्य वरुणमंत्रेण स्नात्वा वक्ष्यमाणैश्चतुर्भि मंत्रैः कुशत्रयेण शिरसि जलं प्रक्षिपेत् ॥ तत्र मंत्रः-ॐ सिसृक्षोर्निखिलं विश्वं मुहुश्शुक्रं प्रजापते ॥ मातरः सर्वभूतानामापो देव्यः पुनंतु माम् ॥ १ ॥ अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता ॥ क्षालयंती निजस्पर्शादापो देव्यः पुनंतु माम् ॥ २ ॥ यन्मे केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु वो नमः ॥ ३ ॥ आयुरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम॥ संतोषः क्षांतिरास्तिक्यं विद्या भवतु वो नमः ॥४॥ इति शिरः प्रोक्ष्य हस्तेन जलमादाय नासिकायां संयोज्य ॐ ऋतं च सत्यमित्यघमर्षणमंत्र पठित्वा जलं वामभागे निक्षिपेत् ॥ एवं स्नात्वा शुष्कं शुभ्रं कर्पासोत्पन्नवस्त्रं परिधाय सूर्यमंत्रेण सूर्यायार्घ्यं दत्त्वा स्नानीयवस्त्रं परिपी ड्याचम्य शैवः पंचत्रिपुंड्रं वैष्णवो द्वादशोर्द्ध्वपुण्ड्रं तिलकं कुर्य्यात् ॥ अथ तिलकधारणप्रकारः ॥ तत्रादौ शैवे भस्मत्रिपुंड्रप्रकारः ॥ वामहस्ते दक्षिणहस्तेनाग्निहोत्रोत्थितं भस्मादाय उदकमिश्रणानन्तरम् ॐअग्निरिति भस्म, ॐ वायुरिति भस्म,ॐ जलमिति भस्म, ॐ स्थल मिति भस्म, ॐ व्योमेति भस्म, सर्वं ह वा इदंभस्म मन एतानि चक्षूंषि भस्मानीति भस्माभिमंत्र्य ॐत्र्यंबकं पठित्वा ॐ तत्पुरुषाय नमः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति मंत्रेण भाले त्रिपुंड्रं कुर्य्यात् ॥ १ ॥ पुनः ॐ त्र्यंबकं पठित्वा ॐ अघोराय नमः इति दाक्षिणांसे तिलकं कुर्य्यात् ॥२॥ पुनः ॐ त्र्यंबकं पठित्वा ॐ सद्योजाताय नमः इति मंत्रेण वामांसे तिलकं कुर्य्यात् ॥ ३ ॥ पुनः ॐ त्र्यंबकं पठित्वा ॐ वामदेवाय नमः इति मंत्रेण जठरे तिलकं कुर्य्यात् ॥४॥ पुनः ॐ त्र्यंबकं पठित्वा ॐ ईशानाय नमः इति मंत्रेण वक्षसि च त्रिपुंड्रं कुर्य्यात् ॥ ५ ॥ इति पंचत्रिपुंड्रं कृत्वा रुद्राक्ष मालां च धारयन् सन्ध्यावन्दनादि कर्म कुर्यात् ॥ इति भस्मत्रिपुंड्रप्रकारः॥ अथ वैष्णवानामूर्ध्वपुंड्रविधानम्॥ गोपीचंदनतुलसीमूलसिंधुजाह्नवीतीरोद्भवमृदा केशवादिद्वादशनामभिर्ललाटादिषु द्वादशस्थानेषु उर्द्ध्वपुंड्रतिलकं कुर्य्यात् ॥ तत्र क्रमः॥ ॐकेशवाय नमः इति ललाटे कार्य्यम्॥१॥ ॐ नारायणाय नमः इति उदरे कार्यम्॥२॥ ॐ माधवाय नमः इति हृदये कार्यम् ॥ ३॥ ॐ गोविंदाय नमः इति कण्ठे कार्यम्॥४॥ ॐ विष्णवे नम इति दक्षिणपार्श्वे कार्यम्॥५॥ ॐमधुसूदनाय नमः इति दक्षबाहौ कार्यम्॥६॥ ॐ त्रिविक्रमाय नमः इति दक्षिणकर्णे कार्यम्॥७॥ ॐ वामनाय नमः इति वामपार्श्वे कार्यम्॥८॥ ॐ श्रीधराय नमः इति वामबाहौ कार्यम् ॥९॥ ॐ हृषीकेशाय नमः इति वामकर्णे कार्यम् ॥१०॥ ॐ पद्मनाभाय नमः इति पृष्ठे कार्यम् ॥ ११ ॥ ॐ दामोदराय नमः इति ककुदि कार्यम् ॥ १२ ॥ एवं द्वादशस्थानेषु तिलकं कुर्य्यात् ॥ इति वैष्णवोर्ध्वपुंड्रविधानम् ॥ इति तिलकं कृत्वा वैदिकीं संध्यां विधाय शिवमंत्रेण तांत्रिकीं कुर्य्यात् ॥ अथ तांत्रिकसंध्याप्रयोगः ॥ देशकालौ संकीर्त्य श्रीअमुकदेवताराधनयोग्यताजननार्थं मंत्रसंध्यामहं करिष्ये । इति संकल्प्य ॐ ह्रां आत्मतत्त्वाय स्वाहा ॥ १ ॥ ॐ ह्रीं विद्यातत्त्वाय स्वाहा ॥ २ ॥ ॐ ह्रूं शिवतत्त्वाय

---

१ ललाटे तु गदां कुर्याद्धृदये नंदकं पुनः । शंखं चक्रं भुजद्वंद्वे शार्ङ्गं बाणं च मूर्द्धनि ॥ एतानि चिह्नानि धारयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाहा ॥ ३ ॥ इति त्रिराचम्य मूलेन प्राणानायम्य ऋष्यादिकरांगन्यासौ कृत्वा मूलेन जलं संवीक्ष्य अस्त्राय फट् इति संप्रोक्ष्य अनेनैव दर्भेण संताड्य कवचाय हुम् इत्यभ्युक्ष्य तज्जलेन कुंभमुद्रया मूर्द्धि सिंचेत् ॥ ततो वामपाणौ दक्षेण तीर्थजलमादाय हृदयादिषडंगमंत्रेणाभिमंत्र्य तद्गलितोदकबिंदुभिर्दक्षहस्तेन हृदयादिषडंगन्यासमंत्रद्वारा षड्भिः शिरसि मार्जयेत् ॥६ ॥ पुनः ॐ आं ह्रां व्योमव्यापिने नमः इति मार्जयेत् ॥ ७ ॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमः भवेभवेनातिभवेभवस्वमांभवोद्भवाय नमः ॥ ८ ॥ ॐ वामदेवाय नमः । ज्येष्ठाय नमः । श्रेष्ठाय नमः । रुद्राय नमः । कालाय नमः । कलविकरणाय नमः । बलाय नमः। बलविकरणाय नमः । बलप्रमथनाय नमः । सर्वभूतदमनाय नमः । मनोन्मनाय नमः ॥ ९ ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः शर्वेभ्यःशर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः॥ १०॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात ॥ ११ ॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मेस्तु सदाशिवोम ॥ ओ ३म ह्रांह्रींह्रूंमूलमंत्रैश्च एतैर्मंत्रैर्मार्जयेत् । वामहस्तस्थजलं वामनासासमीपमानीय इडया देहांतरादाकृष्यपापौघं प्रक्षाल्य कृष्णवर्णं तदुदकं दक्षिणया विरेच्य वामहस्तस्थं दक्षिणेनादाय पुरःकल्पितवज्रशिलायामस्त्रमंत्रेण क्रोधादास्फालयेत् ॥ ततः पूर्ववदाचम्य करांगन्यासौ कृत्वा अर्घपात्रे जलं कृत्वा तदादाय मूलमुच्चार्य्य शिवरूपाय सूर्याय इममर्घ्यं स्वाहा इति त्रिरर्घ्यं दत्वा मूलेनोपस्थाय गायत्रीमूलमंत्रं जपेत् ॥ गायत्रीमंत्रो यथा-ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ इति गायत्रीमष्टाविंशतिमष्टोत्तरशतं वा मूलं च संजप्य जपं निवेद्य नमस्कुर्य्यात् ॥ इति तांत्रिकसंध्याप्रयोगः ॥ अथ द्वारपूजाप्रयोगः ॥ पूजागृहद्वारमागत्यास्त्राय फडिति द्वारं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संप्रोक्ष्य दक्षिणशाखायाम्-ॐ गं गणपतये नमः ॥ १ ॥ ॐ दुं दुर्गायै नमः ॥ २ ॥ वामशाखायाम्-ॐ वं वटुकाय नमः ॥ १ ॥ ॐ क्षं क्षेत्रपालाय नमः ॥ २ ॥ द्वारोपरि-ॐ सं सरस्वत्यै नमः ॥ १ ॥ देहल्याम्-ॐ अस्त्राय फट् इति पूजयेत् ॥ इति द्वार पूजाप्रयोगः ॥ अथ क्षेत्रकीलनम् ॥ जपस्थाने गत्वा पृथ्वीग्रहणं कुर्य्यात् ॥ तद्यथा-गृहीतस्यास्य मंत्रस्य पुरश्चरणसिद्धये ॥ मयेयं गृह्यते भूमिर्मंत्रोयं सिद्धिमाप्नुयात्॥ १ ॥ इति भूमिं संगृह्य अश्वत्थोदुंबरप्लक्षाणामन्यतमवितस्तिमात्रान् दशकीलान् । ॐ नमः सुदर्शनायास्त्राय फट् इति मंत्रेण अष्टोत्तरशतकृत्वोऽभिमंत्रितान्-ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्यसिद्धिषु॥ १ ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्ना सिद्धिरस्तु मे॥ २ ॥ इति मंत्रद्वयेन दशदिक्षु दशकीलान् निखनेत्॥ ततस्तेषु ॐ सुदर्शनायास्त्राय फट् इति मंत्रेण प्रत्येककीलान् संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिलोकपालानावाह्य पंचोपचारैः संपूज्य जपस्थानमध्ये गणेशं कूर्म्मानंतवसुधाक्षेत्रपालांश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालगणपतिभ्यश्च माषभक्तबलिं दत्त्वा तद्बाह्ये भूतबलिं दद्यात्॥ तत्र मंत्रः-ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च मे ॥ १ ॥ भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः ॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥ २ ॥ इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दद्यात् ॥ ततो वामकरांगुलिभिरर्घ्यजलेनोत्सृज्य पुष्पांजलिं गृहीत्वा । ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ संतोषमासाद्य व्रजंतु सर्वे क्षमंतु तान्यत्र नमोस्तु तेभ्यः ॥ १ ॥ इति पुष्पांजलिं दत्त्वा प्रणम्य हस्तौ पादौ प्रक्षाल्याचामेत् ॥ इति क्षेत्रकीलनम् ॥

---

१ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ॥ इति पाठान्तरम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ प्रयोगविधानम् ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं सबाह्याभ्यंतरः शुचिः ॥ १ ॥ इति मंत्रेण मंडपांतरं प्रोक्ष्य तत्र तावत् आसनभूमौ कूर्मशोधनं कार्यम् ॥ यत्र जपकर्ता एक एव तत्र कूर्ममुखे उपविश्य जपं तत्रैव दीपस्थापनं च कुर्यात ॥ यत्र बहवो जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् । एवं कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा तत्र ॐ कूर्म्माय नमः ॥ १ ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥ २ ॥ ॐ पृथिव्यै नमः ॥ ३ ॥ इति गंधाक्षत पुष्पैः संपूज्य तदुपरि कुशासनं तदुपरि मृगाजिनं तदुपरि कंबलाद्यासनमास्तीर्य्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण ॐ अनंतासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥ इति मंत्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य आसनं शोधयेत् । तत्र मंत्रः-ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठऋषिः, कूर्मो देवता, सुतलं छंदः आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥ १ ॥ इति मंत्रेणासनं प्रोक्षयेत् । ततः मूलमंत्रेण शिखां बद्ध्वा-ॐ केशवाय नमः ॥ १ ॥ नारायणाय नमः ॥ २ ॥ माधवाय नमः ॥ ३ ॥ इति त्रिराचम्य प्राणायामं कुर्य्यात् । तद्यथा-दक्षिणहस्तांगुष्ठेन दक्षनासापुटं निरुध्य वामनासापुटेन मूलं षोडशवारं जपन् शनैःशनैः प्राणाख्य वायुमाकृष्य शिरसि सहस्रारे धारयेदिति पूरकम् ॥ १ ॥ पुनः दक्षहस्तानामिकातर्जन्यंगुष्ठैर्नासापुटद्वयं निरुध्य मूलं चतुःषष्टिवारं जपन् कुंभयेत ॥ २ ॥ पुनर्दक्षनासापुटांगुष्ठनिरोधनं त्यक्त्वा मूलं द्वात्रिंशद्वारं जपन् शनैःशनैस्तद्वायुं रेचयेत् ॥ ३ ॥ इति प्राणायाम त्रयं कृत्वा देशकालौ संकीर्त्य अमुकगोत्रः श्रीअमुकदेवशर्म्माहममुकदेवताया अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकामुकमंत्र

११

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धिकामोऽयारभ्य यावता कालेन सेत्स्यति तावत्कालममुकमंत्रस्येयत्संख्याकजपतद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्रा
ह्मणभोजनरूपपुरश्चरणं जपरूपपुरश्चरणं वा करिष्ये इति संकल्प्य ॐ सुदर्शनायास्त्राय फट् इति मंत्रेण तालत्रयेण दिग्बंधनं
कृत्वा भूतशुद्धिं कुर्यात् ॥ अथ भूतशुद्धिप्रकारः ॥ ॐ सूर्यः सोमो यमः कालः संध्या भूतानि पंच च ॥ एते शुभाशुभस्येह कर्मणो
मम साक्षिणः ॥ १ ॥ भो देव प्राकृतं चित्तं पापाक्रांतमभून्मम ॥ तन्निस्सारय चित्तान्मे पापं तेस्तु नमोनमः ॥ २ ॥ इति प्रार्थ्य
दक्षिणभागे-श्रीगुरुभ्यो नमः ॥ १ ॥ वामभागे-ॐ गणेशाय नमः ॥ २ ॥ इति नत्वा भूतशुद्धिं कुर्यात् । तथा च कुंभकप्राणायामे
मूलाधारात् कुण्डलनीं परदेवतां बिसतंतुनिभां समुत्थाप्य ब्रह्मरंध्रगतां स्मृत्वा हृदयस्थं जीवं प्रदीपं कलिकाकारं गृहीत्वा सुषुम्नामार्गेण ब्रह्म
रंध्रं गत्वा ॐ हंसः सोहं इति मंत्रेण जीवं ब्रह्मणि संयोजयेत् । ततः पादादिजानुपर्यंतं चतुष्कोणं वज्रलांछितं स्वर्णवर्णं पृथ्वीमंडलं
(ॐ लं) इति भूबीजाढ्यं स्मरेत् ॥ १ ॥ जान्वादिनाभिपर्यंतमर्द्धचन्द्राकारं पद्मद्वयांकितं श्वेतवर्णमपां स्थानं सोममंडलम् (ॐ वँ) इति
वरुणबीजाढ्यं स्मरेत् ॥ २ ॥ नाभ्यादिहृदयपर्यंतं त्रिकोणं स्वस्तिकांकितं रक्तवर्णमाग्निमंडलम् (ॐ रँ) इति वह्निबीजाढ्यं स्मरेत् ॥ ३ ॥
हृदयादिभ्रूमध्यपर्यंतं वृत्तं षड्बिंदुलांछितं धूम्राभं वायुमंडलम् (ॐ यं) बीजाढ्यं स्मरेत् ॥ ४ ॥ भ्रूमध्यादारभ्य ब्रह्मरंध्रांतं वृत्तं स्वच्छं
मनोहरमाकाशमण्डलम् (ॐ हँ) बीजाढ्यं स्मरेत् ॥ ५ ॥ एवं भूतगणं स्मृत्वा ततः पूर्वोक्तभूमंडले-पादेन्द्रियं १ गगनं २ घ्राणं ३
गंधः ४ ब्रह्मा ५ निवृत्तिः ६ समानः ७ गंतव्यदेश ८ श्च एवमष्टौ पदार्थाश्चिंत्याः ॥ १ ॥ जलमंडले-हस्तेन्द्रिय १ ग्रहण २ गाह्य ३

---

१ यामले-भूतशुद्धिलिपिन्यासौ विना यस्तु मपूजयेत् । विपरीतं फलं दद्यादभक्त्या पूजने यथा ॥

For Private And Personal Use Only

रसना ४ रस ५ विष्णु ६ प्रतिष्ठो ७ दानाः ध्येयाः ॥ २ ॥ तेजोमंडले-वायु १ विसर्ग २ विसर्ज्जनीय ३ चक्षू ४ रूप ५ शिव ६ विद्या ७ व्यानाः ८ ध्येयाः ॥ ३ ॥ वायुमंडले-उपस्था १ नन्द २ स्त्री ३ स्पर्शन ४ स्पर्श ५ ईशान ६ शांत्य ७ पानाः ८ ध्येयाः ॥ ४ ॥ आकाशमंडले-वाग् १ वक्तव्य २ वदन ३ श्रोत्र ४ शब्द ५ सदाशिव ६ शांत्यतीताः ७ प्राणा ८ इत्यष्टौ चिंत्याः ॥ ५ ॥ एवं भूतानि संचिंत्य पूर्वपूर्वकार्यस्योत्तरोत्तरं कारणे विलापनं ब्रह्मपर्य्यंतं कार्य्यम् तथा च-ॐ लं फट् इत्यनेन पंचगुणां पृथ्वीमप्सु उपसंहरामीति जले भुवं विलापयेत् ॥ १ ॥ ॐ वँ हुं फट् इति चतुर्गुणा अपोग्नौ उपसंहरामीति वह्नौ जलं विलापयेत् ॥ २ ॥ ॐ हँ हुँ फट् इति त्रिगुणं तेजो वायावुपसंहरामीति वह्निं वायौ विलापयेत् ॥ ३ ॥ ॐ य हु फट् इति द्विगुणं वायुमाकाश उपसंहरामीति वायुमाकाशे विलापयेत् ॥ ४ ॥ ॐ हँ हुँ फट् इत्येकगुणमाकाशमहंकार उपसंहरामीत्याकाशमहंकारे विलापयेत् ॥ ५ ॥ ॐ अहंकारं महत्तत्त्व उपसंहरामीत्यहंकारं महत्तत्वे विलापयेत् ॥ ६ ॥ ॐ महत्तत्वं प्रकृतावुपसंहरामीति महत्तत्वं प्रकृतौ विलापयेत् ॥ ७ ॥ ॐ प्रकृतिमात्मन्युपसंहारामीत्यनेन मायामात्मनि विलापयेत्॥८॥ एवं शुद्धसच्चिन्मयो भूत्वा पापपूरुषं चिंतयेत्। तथा च वासनामयं वामकुक्षिस्थितं कृष्णमंगुष्ठपरिमाणकं ब्रह्महत्याशिरोयुक्तं कनकस्तेयबाहुकं मदिरापानहृदयं गुरुतल्पकटियुतं तत्संसर्गिपदद्वंद्वमुपपातकमस्तकं खड्गचर्मधरं दुष्टमधोवक्त्रं सुदुःसहमेवं पापपुरुषं चिन्तायित्वा पूरकप्राणायामे (ॐ यँ) इति वायुबीजेन द्वात्रिंश[३२]द्वारं षोडशवारं वा आवर्तितेन पापपुरुषं शोषयेत् ॥ १ ॥ ततः स्वशरीरयुतं पापं कुंभके (ॐ रं) इति वह्निबीजेन चतुःषष्टि ६४ वारमावर्तितेन तदुत्थानाग्निना दहेत् ॥ २ ॥ ततो रेचकप्राणायामे (ॐ यँ) इति वायुबीजं षोडश[१६]वारं द्वात्रिंश[३२]द्वारं वा जपित्वा दक्षिणनाड्या तद्भस्म स्वशरीरा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वहिः रेचयेत ॥ ३ ॥ ततो देहोत्थं भस्म (ॐ वँ) इत्युच्चारितेन सुधाबीजेन तदुत्थाऽमृतेन संप्लाव्य पश्चात् (ॐ लँ) इति भूबीजेन तद्भस्म घनीभूतं पिंडं कृत्वा कनकांडवद्भावयेत् ॥ ४ ॥ ततः (ॐ हँ) इति आकाशबीजं जपन् तत्पिण्डं मुकुराकारं भावयित्वा तस्य मूर्द्धादिनखांता अवयवा मनसा रचनीयाः ॥ ५ ॥ ततः पुनरपि सृष्टिमार्गेण ब्रह्मणः सकाशादाकाशादीनि भूतान्युत्पादयेत् । तथा च ब्रह्मणः प्रकृतिः १ प्रकृतेर्महत् २ महतोऽहंकारः ३ अहंकारादाकाशः ४ आकाशाद्वायुः ५ वायोरग्निः ६ अग्नेरापः ७ अद्भ्यः पृथिवी ८ पृथिव्या ओषध्यः ९ ओषधीभ्योऽन्नम् १० अन्नाद्रेतः ११ रेतसः पुरुषः १२ इत्युत्पाद्य ॐ हंसः सोहम् इति मंत्रेण ब्रह्मणे कंभूतं जीवं स्वहृदयांबुजे संस्थाप्य कुंडलीं मूलाधारगतां स्मरेत् । अथ ध्यानम् ॥ रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवगुणमथ चाप्यंकुशं पंचबाणान् ॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥१॥ इति भूतशुद्धिप्रकारः ॥ एवं भूतशुद्धिं कृत्वा स्वशरीरे स्वेष्टदेवतायाः प्राणान् प्रतिष्ठापयेत् ॥ अथ स्वप्राणप्रतिष्ठाप्रकारः॥ अस्य स्वप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुःसामानि च्छन्दांसि, प्राणशक्तिर्देवता, आँ बीजम्॥ ह्रीं शक्तिः, क्रौं कीलकम्, स्वशरीरेऽमुकदेवताप्राणप्रतिष्ठापने विनियोगः॥ ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि ॥१॥ ॐ ऋग्यजुःसामच्छंदोभ्यो नमो मुखे॥२॥ ॐ प्राणशक्त्यै नमः॥३॥ ॐ बीजाय नमः गुह्ये॥४॥ ह्रीं शक्त्ये नमः पादयोः॥५॥ क्रौं कीलकाय नमः सर्वांगे ॥६॥ इति ऋष्यादिन्यासः ॥ ॐ ङंकंखंघंगं नाभौ वाय्वग्निवाभूम्यात्मने हृदयाय नमः ॥१॥ ॐ ञंचंछंझंजं शब्दस्पर्शरूपरसगंधात्मने शिरसे स्वाहा ॥ २ ॥ ॐ णंटंठंढंडं श्रोत्रत्वङ्नयनजिह्वाघ्राणात्मने शिखायै वषट् ॥ ३ ॥ ॐ नंतंथंधंदं वाक्पाणिपायूपस्थात्मने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कवचाय हुँ ॥ ४ ॥ ॐ भंपंफंभंवं वक्तव्यादानगमनविसर्गानंदात्मने नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ शंयंरंवंलंहंषंक्षंसंलं बुद्धिमनोहंकार
चित्तात्मने अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासं कृत्वा नाभेरारभ्य पादांतम् (आँ) इति पाशबीजं विन्यसेत् ॥ १ ॥
हृदयादारभ्य नाभ्यंतम् (ह्रीं) इति शक्तिबीजं न्यसेत् ॥ २ ॥ मस्तकादारभ्य हृदयांतं (क्रौं) इति सृणिबीजं न्यसेत् ॥ ३ ॥
ॐ यं त्वगात्मने नमः ॥ ॐ रं असृगात्मने नमः ॥ ॐ लं मांसात्मने नमः ॥ ॐ वं मेदात्मने नमः ॥ ॐ शं अस्थ्यात्मने नमः ॥
ॐ षं मज्जात्मने नमः ॥ ॐ सं शुक्रात्मने नमः ॥ ॐ ह्रों ओजात्मने नमः ॥ ॐ हँ प्राणात्मने नमः ॥ ॐ सं जीवात्मने नमः इति
दशि हृदि विन्यसेत् ॥ ४ ॥ ॐ यंरंलंवंशंषंसंहंलंक्षं इति मूर्द्धादिचरणावधि व्यापकं कुर्य्यात् ॥ ५ ॥ ततः मंडूकादिपरतत्त्वांतपीठ
देवताभ्यो नमः ॥ १ ॥ ॐ जयादिपीठशक्तिभ्यो नमः ॥ २ ॥ इति नत्वा ॐ आँह्रींक्रौं पीठाय नमः ॥ इति पीठे प्राणशक्तिं देवीं
ध्यायेत् ॥ अथ ध्यानम् ॥ पाशं चापासृक्कपाले सृणीपुङ्गूलं हस्तैर्बिभ्रतीं रक्तवर्णम् ॥ रक्तोदन्वेत्पातरक्तांबुजस्थां देवीं ध्यायेत्प्राण
शक्तिं त्रिनेत्राम् ॥ १ ॥ इति ध्यात्वा हृदि करं निधाय ॐ आँह्रींक्रौंयँरँलँवँशँषँसँहँक्षँहँसःह्रीं ॐ मम शरीरेऽमुकदेवतायाः प्राण इह
प्राणः ॥१॥ पुनः ॐआँह्रींक्रौंयँरँलँवँशँषँसँहँक्षँहँसः ह्रीं ॐ मम शरीरेऽमुकदेवतायाः जीव इह स्थितः ॥२॥ पुनः ॐ आँह्रींक्रौंयँरँलँवँ
शँषँसँक्षँहँसःह्रीं ॐ मम शरीरेऽमुकदेवतायाः सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपादपायूपस्थानि इहैवागत्य सुखं
चिरं तिष्ठंतु स्वाहा ॥ ३ ॥ इति वारत्रयेण स्वशरीरे स्वेष्टदेवतायाः प्राणं प्रतिष्ठाप्य ततः (ॐ) इति प्रणवेन १५ पंच
दशावृत्तिं कृत्वा अनेन मम देहस्य गर्भाधानादिपंचदशसंस्कारान् संपादयामि इति वदेत् इति स्वप्राणप्रतिष्ठाप्रयोगः ॥ एवं

For Private And Personal Use Only

प्रतिष्ठाप्य देवतारूपमात्मानं भावयन् प्राणायामं कृत्वा देवं यजेत् ॥ अथांतर्मातृकान्यासः ॥ ॐ अस्यान्तर्मातृकान्या समंत्रस्य ब्रह्मा ऋषिः, गायत्री छंदः, मातृकासरस्वती देवता, हलो बीजानि, स्वराः शक्तयः, क्षं कीलकम् अखिलाप्तये न्यासे विनियोगः ॥ इति जलं भूमौ निक्षिप्य प्राणायामं कुर्यात् । तथा च इडया अइउऋऌएऐओऔ एभिः स्वरैः पूरयेत् । पुनः कुचुटुतुपु इति वर्गपंचकेन कुंभयेत् ॥ पुनः यरलवशषसह एभिरष्टभिर्वर्णै रेचयेत् । इति प्राणायामं कृत्वा ऋष्यादिन्यासादिकं कुर्यात् । तथा च ॐ अं ब्रह्मणे ऋषये नमः आं शिरसि १, ॐ इं गायत्रीछंदसे नमः ईं मुखे २, ॐ उं सरस्वतीदेवतायै नमः ऊं हृदये ३, ॐ एँ हल्भ्यो बीजेभ्यो नमः ऐं गुह्ये ४, ॐ ओं स्वरेभ्यः शक्तिभ्यो नमः औं पादयोः ५, ॐ अं क्षं कीलकाय नमः अः सर्वाङ्गे ६, इति ऋष्यादिन्यासः ॥ ॐ अंकंखंगंघंङंआँ अंगुष्ठाभ्यां नमः १, ॐचंइंछंजंझंञंई तर्जनीभ्यां नमः २, ॐ उंटंठंडंढंणंऊँ मध्यमाभ्यां नमः ३, ॐ एंतंथंदंधंनंएँ अनामिकाभ्यां नमः४,ॐ ओंपंफंबंभंमंओंकनिष्ठिकाभ्यां नमः५,ॐ अंयंरंलंवंशंषंसंहंलंक्षंअः करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ ॐ अंकंखंगंघंङंआँ हृदयाय नमः १, ॐ इंचंछंजंझंञंई शिरसे स्वाहा २, ॐ उंटंठंडंढंणंऊँ शिखायै वषट् ३, ॐ एंतंथंदंधंनंऐंकवचाय हुं ४, ॐ ओंपंफंबंभंमंऔं नेत्रत्रयाय वौषट् ५, ॐ अंयंरंलंवंशंषंसंहंलंक्षंअःअस्त्राय फट् ६ इति हृदयादिषडंगन्यासः॥ ततः कण्ठस्थषोडशदलपद्मे-ॐ अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः इति षोडशस्वरान् न्यसेत्॥ १ ॥ पुनः हृदयस्थे द्वादशदले-ॐ कं नमः। ॐ खं नमः। ॐ गं नमः। ॐ घं नमः। ॐ ङं नमः। ॐ चं नमः। ॐ छं नमः। ॐ जं नमः। ॐ झं नमः। ॐ ञं

१ देवो भूत्वा देवं यजेत् । इति वचनात् । २ यथा पर्वतधातूनां दोषान् दहति पावकः । एवमंतर्गतं पापं प्राणायामेन दह्यते । ३ स्त्रीलिंगपूजने स्त्रीलिंगे न्यसेत् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः। ॐ टं नमः । ॐ ठं नमः । इति द्वादशवर्णान् विन्यसेत्॥२॥ ततः नाभौ दशदले-ॐ डं नमः । ॐ ढं नमः । ॐ णं नमः । ॐ तं नमः। ॐ थं नमः । ॐ दं नमः । ॐ धं नमः । ॐ नं नमः । ॐ पं नमः । ॐ फं नमः। इति दशवर्णान् विन्यसेत् ॥ ३॥ तदधोलिंगे षड्दले-ॐ बं नमः । ॐ भं नमः । ॐ मं नमः । ॐ यं नमः । ॐ रं नमः । ॐ लं नमः । इति बादिलांतान्षड्वर्णान् विन्यसेत् ॥ ४ ॥ आधारे गुदे चतुर्दले-ॐ वं नमः । ॐ शं नमः । ॐ षं नमः । ॐ सं नमः । इति वादिसांतांश्चतुर्वर्णान् विन्यसेत् ॥ ५ ॥ ललाटे द्विदले-ॐ हं नमः । ॐ क्षं नमः इति द्वौ वर्णौ विन्यसेत् ॥ ६ ॥ इति न्यासं कृत्वा ध्यायेत् ॥ आधारे लिंगनाभौ प्रकटित हृदये तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के ॥ वासान्ते वालमध्ये डफकटसहिते कण्ठदेशे स्वराणां हंक्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ १ ॥ इत्यंतर्मातृकान्यासः ॥ इत्यंतर्मातृकान्यासं कृत्वा बहिर्मातृकान्यासं कुर्य्यात् ॥

॥ अथ बहिर्मातृकान्यासप्रयोगः ॥ ॐ अस्य श्रीबहिर्मातृकान्यासमंत्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, मातृका सरस्वती देवता । हलो बीजानि, स्वराः शक्तयः, क्षं कीलकम्, अखिलाप्तये न्यासे विनियोगः ॥ इति जलं भूमौ निःक्षिप्य प्राणायामं कुर्य्यात् । तथा च इडया अइउऋऌएऐओऔ एभिः स्वरैः पूरयेत् । पुनः कुचुटुतुपु इति वर्गपंचकेन कुंभयेत् । पुनः यरलवशषसह एभिरष्टभिर्वर्णै रेचयेत् । इति प्राणायामं कृत्वा ऋष्यादिन्यासादिकं कुर्य्यात् । तथा च । ॐ अं ब्रह्मणे ऋषये नमः आं शिरसि १, ॐ इं गायत्रीछन्दसे नमः ईं मुखे २, ॐ उं सरस्वतीदेवतायै नमः ऊं हृदये ३, ॐ एं हलभ्यो बीजेभ्यो नमः ऐं गुह्ये ४, ॐ ओं स्वरेभ्यः शक्तिभ्यो नमः औं पादयोः ५,

१ जपार्थं सर्वदेवानां विन्यासे च लिपिं विना । कृते तद्विफलं विद्यात्तस्मादादौ लिपिं न्यसेत् ॥ २ स्त्रीलिंगपूजने स्त्रीलिंगं न्यसेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अंक्षंकीलकाय नमः अः सर्वांगे ६ इति ऋष्यादिन्यासः ॥ ॐ अंकंखंगंघंङंआं अंगुष्ठाभ्यां नमः १, ॐ इंचंछंजंझंञंई तर्जनीभ्यां नमः २, ॐ उंटंठंडंढंणंऊं मध्यमाभ्यां नमः ३, ॐ एंतंथंदंधंनंऐं अनामिकाभ्यां नमः ४, ॐ ओंपंफंबंभंमंऔं कनिष्ठिकाभ्यां नमः ५, ॐ अंयंरंलंवंशंषंसंहंलंक्षंअः करतलकरपृष्ठाभ्यां नमः । इति करन्यासः ॥ ॐ अंकंखंगंघंङंआं हृदयाय नमः १, ॐ इंचंछंजंझंञंई शिरसे स्वाहा २, ॐ उंटंठंडंढंणंऊं शिखायै वषट् ३, ॐ एंतंथंदंधंनंऐं कवचायहुं ४ः ॐ ओंपंफंबंभंमंऔं नेत्रत्रयाय वौषट् ५, ॐ अंयंरंलंवंशंषंसंहंलंक्षंअः अस्त्राय फट् ६ इति हृदयादिषडंगन्यासः ॥ इति विन्यस्य मातृकान्यासं कुर्यात् । तथा च । ॐ अं नमः शिरसि[1] १, ॐ आं नमः मुखे २, ॐ इं नमः दक्षिणनेत्रे ३, ॐ ईं नमः वामनेत्रे ४, ॐ उं नमः दक्षिणकर्णे ५, ॐ ऊं नमः वामकर्णे ६, ॐ ऋं नमः दक्षिणनासापुटे ७, ॐ ॠं नमः वामनासापुटे ८, ॐ ऌं नमः दक्षिणकपोले[2] ९, ॐ ॡं नमः वामकपोले[3] १०, ॐ एं नमः उर्ध्वोष्ठे ११, ॐ ऐं नमः अधरोष्ठे १२, ॐ ओं नमः ऊर्ध्वदंतपंक्तौ १३, ॐ औं नमः अधोदंतपंक्तौ १४, ॐ अं नमः मूर्द्धि[4] १५, ॐ अः नमः मुखवृत्ते[5] १६, ॐ कं नमः दक्षिणबाहुमूले १७, ॐ खं नमः दक्षिणकूर्परे १८, ॐ गं नमः दक्षिणमणिबंधे १९, ॐ घं नमः दक्षिणहस्तांगुलिमूले २०, ॐ ङं नमः दक्षिणहस्तांगुल्यग्रे २१, ॐ चं नमः वामबाहुमूले २२, ॐ छं नमः वामकूर्परे २३, ॐ जं नमः वामणिबंधे २४, ॐ झं नमः वामहस्तांगुलिमूले २५, ॐ ञं नमः वामहस्तांगुल्यग्रे २६, ॐ टं नमः दक्षिणपादमूले २७, ॐ ठं नमः दक्षिणजानुनि २८, ॐ डं नमः दक्षिणगुल्फे २९, ॐ ढं नमः दक्षिणपादांगुलिमूले ३०, ॐ णं नमः दक्षिणपादांगुल्यग्रे ३१, ॐ तं नमः

१ तंत्रसारे तु ललाटे ॥ २ दक्षिणगण्डे ॥ ३ वामगण्डे ॥ ४ कण्ठे इति वा पाठः ॥ ५ जिह्वाग्रे ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वामपादमूले ३२ ॐ थं नमः वामजानुनि ३३ ॐ दं नमः वामगुल्फे ३४ ॐ धं नमः वामपादांगुलिमूले ३५ ॐ नं नमः वामपादांगुल्यग्रे ३६ ॐ पं नमः दक्षिणपार्श्वे ३७ ॐ फं नमः वामपार्श्वे ३८ ॐ बं नमः पृष्ठे ३९ ॐ भं नमः नाभौ ४० ॐ मं नमः उदरे ४१ ॐ यं त्वगात्मने नमः हृदि ४२ ॐ रं असृगात्मने नमः दक्षांसे ४३ ॐ लं मांसात्मने नमः कुकुदि ४४ ॐ वं मेदआत्मने नमः वामांसे ४५ ॐ शं अस्थ्यात्मने नमः हृदयादिदक्षहस्तांतम् ४६ ॐ षं मज्जात्मने नमः हृदयादिवामहस्तांतम् ४७ ॐ सं शुक्रात्मने नमः हृदयादिदक्षपादांतम् ४८ ॐ हं आत्मने नमः हृदयादिवामपादांतम् ४९ ॐ लं परमात्मने नमः जठरे ५० ॐ क्षं प्राणात्मने नमः मुखे ५१ इति विन्यस्य ध्यायेत । पंचाशल्लिपिभिर्विभक्तमुखदोःपत्संधिवक्षस्स्थलां भास्वन्मौलिनिबद्धचन्द्रशकलामापीनतुंगस्तनीम् ॥ मुद्रामक्षगुणं सुदाढ्यं कलशं विद्यां च हस्तांबुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये ॥ १ ॥ इति बहिर्मातृकान्यासप्रयोगः ॥ अथ सृष्टिक्रमः ॥ तत्र तु विसर्गान्वितः प्रणवपुटितो वा मायालक्ष्मीबीजपूर्वो वा वाग्भवाद्यो वा न्यस्तव्यः । तत्र वाग्भवाद्यो यथा ऐं अं नमः जिह्वाग्रे १ ऐं अः नमः कंठे २ ऐं कं नमः दक्षिणबाहुमूले ३ ऐं खं नमः दक्षिणकूर्परे ४ ऐं गं नमः दक्षिणमणिबंधे ५ ऐं घं नमः दक्षिणहस्तांगुलिमूले ६ ऐं ङं नमः दक्षिणहस्तांगुल्यग्रे ७ ऐं चं नमः वामबाहुमूले ८ ऐं छं नमः वामकूर्परे ९ ऐं जं नमः वाममणिबंधे १० ऐं झं नमः वामहस्तांगुलिमूले ११ ऐं ञं नमः वामहस्तांगुल्यग्रे १२ ऐं टं नमः दक्षिणपादमूले १३ ऐं ठं नमः दक्षिणजानुनि १४ ऐं डं नमः दक्षिणगुल्फे १५ ऐं ढं नमः दक्षिणपादांगुलिमूले १६ ऐं णं नमः दक्षिणपादांगुल्यग्रे १७ ऐं तं नमः वामपादमूले १८ ऐं थं नमः वामजा

१–मतांतरे-हृदयान्मस्तकांतम् ॥

For Private And Personal Use Only

नुनि १९ ऐं दं नमः वामगुल्फे २० ऐं धं नमः वामपादांगुलिमूले २१ ऐं नं नमः वामपादांगुल्यग्रे २२ ऐं पं नमः दक्षिणपार्श्वे २३ ऐं फं नमः वामपार्श्वे २४ ऐं बं नमः पृष्ठे २५ ऐं भं नमः नाभौ २६ ऐं मं नमः उदरे २७ ऐं यं त्वगात्मने नमः हृदि २८ ऐं रं असृगात्मने नमः दक्षांसे २९ ऐं लं मांसात्मने नमः ककुदि ३० ऐं वं मेदआत्मने नमः वामांसे ३१ ऐं शं अस्थ्यात्मने नमः हृदयादिदक्षभुजांतम् ३२ ऐं षं मज्जात्मने नमः हृदयादिवामभुजांतम् ३३ ऐं सं शुक्रात्मने नमः हृदयादिदक्षपादांतम् ३४ ऐं हं आत्मने नमः हृदयादिवामपादांतम् ३५ ऐं लं परमात्मने नमः हृदयादिमस्तकांतम् ३६ इति विन्यसेत् । इति सृष्टिक्रमः ॥ अथ स्थितिक्रमः॥ तत्रादौ ध्यानम् ॥ सिन्दूरकांतिमसिताभरणां त्रिनेत्रां विद्याक्षसूत्रमृगपोतवरं दधानाम् ॥ पार्श्वस्थितां भगवतीमपि काञ्चनाङ्गीं ध्यायेत्कराब्जधृतपुस्तकवर्णमालाम् ॥ १ ॥ एवं ध्यात्वा न्यसेत् । टंठंडं नमः ललाटे १ टंठंडं नमः मुखवृत्ते २ टंठंडं नमः दक्षनेत्रे ३ टंठंडं नमः वामनेत्रे ४ टंठंडं नमः दक्षकर्णे ५ टंठंडं नमः वामकर्णे ६ टंठंडं नमः दक्षनासायाम् ७ टंठंडं नमः वामनासायाम् ८ टंठंडं नमः दक्षगंडे ९ टंठंडं नमः वामगंडे १० टंठंडं नमः ऊर्ध्वोष्ठे ११ टंठंडं नमः अधरोष्ठे १२ टंठंडं नमः ऊर्ध्वदंतपंक्तौ १३ टंठंडं नमः अधोदंतपंक्तौ १४ टंठंडं नमः शिरसि १५ टंठंडं नमः मुखे १६ टंठंडं नमः जिह्वाग्रे १७ टंठंडं नमः कंठदेशे १८ टंठंडं नमः दक्षिणबाहुमूले १९ टंठंडं नमः दक्षिणकूर्परे २० टंठंडं नमः दक्षिणमणिबंधे २१ टंठंडं नमः दक्षिणहस्तांगुलिमूले २२ टंठंडं नमः दक्षिणहस्तांगुल्यग्रे २३ टंठंडं नमः वामबाहुमूले २४ टंठंडं नमः वामकूर्परे २५ टंठंडं नमः वाममणिबंधे २६ टंठंडं नमः वामहस्तांगुलिमूले २७ टंठंडं नमः वामहस्तांगुल्यग्रे २८ टंठंडं नमः दक्षिणपादमूले २९ टंठंडं नमः दक्षिणजानुनि ३० टंठंडं नमः

दक्षिणगुल्फे ३१ टंठंडं नमः दक्षिणपादांगुलिमूले ३२ टंठंडं नमः दक्षिणपादांगुल्यग्रे ३३ टंठंडं नमः वामपादमूले ३४ टंठंडं नमः वामजानुनि ३५ टंठंडं नमः वामगुल्फे ३६ टंठंडं नमः वामपादांगुलिमूले ३७ टंठंडं नमः वामपादांगुल्यग्रे ३८ टंठंडं नमः दक्षपार्श्वे ३९ टंठंडं नमः वामपार्श्वे ४० टंठंडं नमः पृष्ठे ४१ टंठंडं नमः उदरे ४२ टंठंडं नमः हृदये ४३ टंठंडं नमः दक्षांसे ४४ टंठंडं नमः ककुदि ४५ टंठंडं नमः वामांसे ४६ टंठंडं नमः हृदयादिदक्षहस्तांतम् ४७ टंठंडं नमः हृदयादिवामहस्तांतम् ४८ टंठंडं नमः हृदयादिदक्षपादांतम् ४९ टंठंडं नमः हृदयादिवामपादांतम् ५० टंठंडं नमः हृदयादिमस्तकांतम् ५१ इति विन्यसेत् ॥ इति स्थितिक्रमः॥ अथ संहारक्रमः ॥ तत्रादौ ध्यानम्॥ अक्षस्रजं हरिणपोतमुदग्रटंकं विद्यां करैरविरतं दधतीं त्रिनेत्राम्॥ अर्द्धेन्दुमौलिमरुणामरविंदवासां वर्णेश्वरीं च प्रणुमस्स्तनभारखिन्नाम् ॥ १ ॥ इति ध्यात्वा न्यसेत् । ॐ क्षं नमः ललाटे १ ॐ हं नमः मुखवृत्ते २ ॐ सं नमः दक्षनेत्रे ३ ॐ षं नमः वामनेत्रे ४ ॐ शं नमः दक्षकर्णे ५ ॐ वं नमः वामकर्णे ६ ॐ लं नमः दक्षनासायाम् ७ ॐ रं नमः वामनासायाम् ८ ॐ यं नमः दक्षगंडे ९ ॐ मं नमः वामगंडे १० ॐ भं नमः ऊर्ध्वोष्ठे ११ ॐ बं नमः अधरोष्ठे १२ ॐ फं नमः ऊर्ध्वदंतपंक्तौ १३ ॐ पं नमः अधोदंतपंक्तौ १४ ॐ नं नमः शिरसि १५ ॐ धं नमः मुखे १६ ॐ दं नमः दक्षिणबाहुमूले १७ ॐ थं नमः दक्षिणकूर्परे १८ ॐ तं नमः दक्षिणमणिबंधे १९ ॐ णं नमः दक्षहस्तांगुलिमूले २० ॐ ढं नमः दक्षिणहस्तांगुल्यग्रे २१ ॐ डं नमः वामबाहुमूले २२ ॐ ठं नमः वामकूर्परे २३ ॐ टं नमः वाममणिबंधे २४ ॐ ञं नमः वामहस्तांगुलिमूले २५ ॐ झं नमः वामहस्तांगुल्यग्रे २६ ॐ जं नमः दक्षिणपादमूले २७ ॐ छं नमः दक्षिणजानुनि २८ ॐ चं नमः दक्षिणगुल्फे २९ ॐ ङं नमः दक्षिणपादांगुलि

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूले ३० ॐ घं नमः दक्षिणपादांगुल्यग्रे ३१ ॐ गं नमः वामपादमूले ३२ ॐ खं नमः वामजानुनि ३३ ॐ कं नमः वामगुल्फे ३४ ॐ अः नमः वामपादांगुलिमूले ३५ ॐ अं नमः वामपादांगुल्यग्रे ३६ ॐ औं नमः दक्षपार्श्वे ३७ ॐ ओं नमः वामपार्श्वे ३८ ॐ ऐं नमः पृष्ठे ३९ ॐ एं नमः नाभौ ४० ॐ ॡं नमः उदरे ४१ ॐ ऌं नमः हृदये ४२ ॐ ॠं नमः दक्षांसे ४३ ॐ ऋं नमः ककुदि ४४ ॐ ऊं नमः वामांसे ४५ ॐ उं अस्थ्यात्मने नमः हृदयादिदक्षहस्तांतम् ४६ ॐ ईं मज्जात्मने नमः हृदयादिवामहस्तांतम् ४७ ॐ इं शुक्रात्मने नमः हृदयादिदक्षपादांतम् ४८ ॐ आं आत्मने नमः हृदयादिवामपादांतम् ४९ ॐ अं परमात्मने नमः हृदयादिमस्तकांतम् ५० इति विन्यसेत् इति संहारक्रमः ॥ इति न्यासं कृत्वा विष्णुमंत्रे विष्णुकलामातृकान्यासः १ शैवमंत्रे श्रीकण्ठादिकलामातृकान्यासः २ गणेशमंत्रे गणेशकलामातृकान्यासः ३ देवीमंत्रे देवीकलामातृकान्यासः ४ सूर्यमंत्रे सूर्यकलामातृकान्यासः ५ एवं तत्तत्प्रयोगेणावलोक्य न्यासं कुर्य्यात्। ततः ऋष्यादिन्यासं करन्यासं हृदयादिषडंगन्यासं च प्रयोगोक्तं कृत्वा मूलदेवतां ध्यात्वा ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति सर्वाङ्गे व्यापकं कृत्वा पीठपूजां कुर्य्यात॥ अथ पीठपूजाप्रयोगः॥ पीठादौ रचिते सर्वतोभद्रमंडले प्रयोगोक्तमंडले वा तन्मध्ये मंडूकादिपरतत्त्वांतपीठदेवताः संस्थापयेत । तत्र क्रमः-पुष्पाक्षतानादाय स्ववामभागे श्रीगुरुभ्यो नमः । दक्षिणे गणपतये नमः । मध्ये स्वेष्टदेवतायै नमः । इति नत्वा पीठमध्ये ॐ मं मंडूकाय नमः१ ॐ कं कालाग्निरुद्राय नमः२ ॐ अं आधारशक्त्यै

---

१ आगमोक्तेन विधिना नित्यं न्यासं करोति यः । देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते ॥ न्यासांगुलीनियमस्तु यामले-हृदयं मध्यमानामतर्जनीभिः स्मृतं शिरः । मध्यमातर्जनीभ्यां स्यादंगुष्ठेन शिखा स्मृता ॥ दशभिः कवचं प्रोक्तं तिसृभिर्नेत्रमीरितम् । अस्त्रादिकद्वयं प्रोक्तं तदा तर्जनीमध्यमे ॥ इति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः ३ ॐ कूं कूर्म्माय नमः ४ ॐ अं अनंताय नमः५ ॐ पृं पृथिव्यै नमः६ ॐ क्षीं क्षीरसागराय नमः७ ॐ रं रत्नदीपाय नमः८ ॐ रं रत्नमंडपाय नमः९ ॐ कं कल्पवृक्षाय नमः १० ॐ रं रत्नवेदिकायै नमः ११ ॐ रं रत्नसिंहासनाय नमः १२ आग्नेय्याम्-ॐ धं धर्म्माय नमः १३ नैर्ऋत्याम्-ॐ ज्ञां ज्ञानाय नमः १४ वायव्याम्-ॐ वैं वैराग्याय नमः १५ ऐशान्याम्-ॐ ऐं ऐश्वर्य्याय नमः १६ पूर्वे-ॐ अं अधर्म्माय नमः १७ दक्षिणे-ॐ अं अज्ञानाय नमः १८ पश्चिमे-ॐ अं अवैराग्याय नमः १९ उत्तरे-ॐ अं अनैश्वर्य्याय नमः २० पुनः पीठमध्ये-ॐ आँ आनंदकंदाय नमः २१ ॐ सं संविन्नालाय नमः २२ ॐ सं सर्वतत्त्वकमलासनाय नमः २३ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः २४ ॐ विं विकारमयकेसरेभ्यो नमः २५ ॐ पं पञ्चाशद्वर्णाढ्यकर्णिकाभ्यो नमः २६ ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः २७ ॐ सों सोममंडलाय षोडशकलात्मने नमः २८ ॐ वं वह्निमंडलाय दशकलात्मने नमः २९ ॐ सं सत्त्वाय नमः ३० ॐ रं रजसे नमः ३१ ॐ तं तमसे नमः ३२ ॐ आँ आत्मने नमः ३३ ॐ पं परमात्मने नमः ३४ ॐ अं अंतरात्मने नमः ३५ ॐ ह्रीं ज्ञानात्मने नमः ३६ ॐ मं मायातत्त्वाय नमः ३७ ॐ कं कलातत्त्वाय नमः ३८ ॐ विं विद्यातत्त्वाय नमः ३९ ॐ पं परतत्त्वाय नमः ४० इति पीठदेवताः संस्थाप्य प्रयोगोक्तनवपीठशक्तीः पूजयेत् ॥ अथ यात्रा साधनप्रयोगः ॥ (तत्रादौ कलशस्थापनप्रयोगः) देवदक्षिणतः त्रिकोणं मंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां (ह्रीं) विलिख्य ॐ ह्रीं आधारशक्त्यै नमः इति मंत्रेण संपूज्य मूलेन फट् इति मंत्रेण त्रिपदाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य मूलेन नमः इति संपूजयेत् । ततः सुदर्शनायास्त्राय फट् इति मंत्रेण ताम्रादिकलशं प्रक्षाल्य आधारोपरि हस्तद्वयेन संस्थाप्य रक्तवस्त्रमाल्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिना भूषयित्वा मूलेन. नमः इति मंत्रेणापूर्य ॐ भुभूर्वः स्वः वरुण इहागच्छ इह तिष्ठ इति वरुणमावाह्य तन्मध्ये स्वेष्टदेवतां ध्यात्वा गंधाक्षतपुष्पैः संपूजयेत ॥ इति कलशस्थापनप्रयोगः १ (अथ त्रिरर्घ्यस्थापनं तत्रादौ शंखस्थापनम्) देववामतः त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां विलिख्य ॐ ह्रीं आधारशक्त्यै नमः इति मंत्रेण संपूजयेत् ततः मूलेन फट् इति त्रिपदमाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य ॐ मं वह्निमण्डलाय दशकलात्मने अमुकपात्रासनाय नमः इत्याधारं संपूज्य आधारे पूर्वादिषु दशाग्निकलाः पूजयेत । तथा च । ॐ यं धूम्रार्चिषे नमः१ ॐ रं ऊष्मायै नमः २ ॐ लं ज्वलिन्यै नमः ३ ॐ वं ज्वालिन्यै नमः ४ ॐ शं विष्फुलिङ्गिन्यै नमः ५ ॐ षं सुश्रियै नमः ६ ॐ सं सुरूपायै नमः ७ ॐ हं कपिलायै नमः ८ ॐ लं हव्यवाहायै नमः ९ ॐ क्षं कव्यवाहायै नमः१० इति पूजयेत्। ततः ।ॐ क्रीं महाजलचराय हुं फट् स्वाहा पांचजन्याय नमः। इति मंत्रेण क्षालितं शंखमाधारोपरि संस्थाप्य ॐ अं सूर्यमंडलाय द्वादशकलात्मने अमुकपात्राय नमः इति संखं संपूज्य पात्रे स्वाग्रादि प्रादक्षिण्येन द्वादश सूर्य्यकलाः पूजयेत् । तथा च-ॐ कंभं तपिन्यै नमः १ ॐ खंबं तापिन्यै नमः २ ॐ गंफं धूम्रायै नमः ३ ॐ घंपं मरीच्यै नमः ४ ॐ ङंनं ज्वालिन्यै नमः ५ ॐ चंधं रुच्यै नमः ६ ॐ छंदं सुषुम्नायै नमः ७ ॐ जंथं भोगदायै नमः ८ ॐ झंतं विश्वायै नमः ९ ॐ ञंणं बोधिन्यै नमः १० ॐ टंढं धारिण्यै नमः ११ ॐ ठंडं क्षमायै नमः १२ इति पूजयेत् ततः ॐ क्षँलँहँषँशँसँ

---

१ वामे शंखं प्रतिष्ठाप्य मध्ये चार्घ्यं प्रकल्पयेत् । दक्षिणे प्रोक्षणीपात्रमर्घत्रयं विकल्पयेत् ॥ दृष्ट्वार्घपात्रं देवेशि ब्रह्माद्या देवताः सदा । नृत्यंति सर्वयोगिन्यः प्रीताः सिद्धिं ददत्यपि । २ माया-ह्रीँ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वँलँरँयँमँभँबँफँपँनँधँदँथँतँणँढँडँठँटँञँझँजँछँचँङँघँगँखँकँअँःअँआँऔँएँऐँलृँलॄँॠँऋँऊँउँईँइँआँअँ इत्येकाधिकपंचाशद्विलोममातृकामुच्चार्य मूलेन नमः इति मंत्रेण शंखे जलमापूर्य ॐ सोममंडलाय षोडशकलात्मने अमुकपात्रामृताय नमः इति गंधादिभिः संपूज्य जले षोडश चन्द्रकलाः पूजयेत् तथा च ॐ अँ अमृतायै नमः १ ॐ आँ मानदायै नमः २ ॐ इँ पूषायै नमः ३ ॐ ईँ तुष्ट्यै नमः ४ ॐ उँ पुष्ट्यै नमः ५ ॐ ऊँ वृत्त्यै नमः ६ ॐ ऋँ धृत्यै नमः ७ ॐ ॠँ शशिन्यै नमः ८ ॐ लृँ चन्द्रिकायै नमः ९ ॐ लॄँ कान्त्यै नमः १० ॐ एँ ज्योत्स्नायै नमः ११ ॐ ऐँ श्रियै नमः १२ ॐ ओँ प्रीत्यै नमः १३ ॐ औँ अंगदायै नमः १४ ॐ अं पूर्णायै नमः १५ ॐ अः पूर्णामृतायै नमः १६ इति संपूज्याभिमंत्रयेत् । तथा च-ॐ शंखादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैवमग्रे गङ्गा सरस्वती ॥ १ ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत्॥ २॥ इत्यभिमंत्र्य प्रार्थयेत् । तथा च-ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते ॥ १॥ इति संप्रार्थ्य ॐ पांचजन्याय विद्महे पावमानाय धीमहि तन्नः शंखः प्रचोदयात् ॥ इति शंखगायत्रीमष्टधा जपित्वा शंखमुद्राः प्रदर्शयेत् इति शंखस्थापनम् । ततो देवस्याग्रे आर्घ्यं देवदक्षिणतः प्रोक्षणीपात्रं च एवमेव विधिना संस्थापयेत् । (शिवसूर्य्यार्चने शंखस्थाने ताम्रादिपात्रं स्थापयेत्) इति त्रिरर्घ्यस्थापनम् ॥ ततो विशेषार्घाद्वामतः श्रीपात्रम् १ गुरुपात्रम् २ देवपात्रम् ३ शक्तिपात्रम् ४ योगिनीपात्रम् ५ भोगपात्रम् ६ वीरपात्रम् ७ आत्मपात्रम् ८ बलिपात्रम् ९ एतानि नवपात्राणि पूर्ववत् संस्थाप्य दक्षिणे पाद्यार्घ्याचमनीयमधुपर्का इति चत्वारि पात्राणि

१-आदौ कुंभं तथा शंखं श्रीपात्रं शक्तिपात्रकम् । गुरुपात्रं वीरपात्रं बलिपात्रं तथैव च ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्ववत् संस्थापयेत् । अशक्तश्चेद्गुरुवरात्मबलिभोगा इति पंच पात्राणि पाद्याद्युपचारार्थमेकं वा पात्रं स्थापयेत । तत्राप्यशक्तश्चेत्तदेकमेव शंखं संस्थापयेत् ॥ अथ घंटास्थापनम् ॥ देवदक्षिणतः घंटां संस्थाप्य नादं कृत्वा पूजयेत् तद्यथा-ॐ भूर्भुवः स्वः गरुडाय नमः आवाहयामि सर्वोपचारार्थं गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि इत्यावाह्य "जगद्ध्वनिमंत्रमातः स्वाहा" इति मंत्रेण घंटास्थितगरुडं घंटां च संपूज्य गरुडमुद्रां प्रदर्शयेत । इति घंटास्थापनम ॥ ततः गंधाक्षतपुष्पादींश्च पूजोपकरणार्थं स्वदक्षिणपार्श्वे संस्थाप्य मूलेन नमः इति जलेन प्रोक्ष्य जलार्थं बृहत्पात्रं व्यजनं छत्रादर्शचामराणि च स्ववामे स्थापयेत ॥ अथाखंडदीपस्थापनम् ॥ देवस्य दक्षिणभागे घृतदीपं वामे तैलदीपं च स्थापयेत । तत्र क्रमः । दीपपात्रं गोघृतेन तैलेन वाऽऽपूर्य मंत्रवर्णतंतुभिर्वर्तिं निक्षिप्य प्रणवेन प्रज्वाल्य सुदर्शन मंत्रेण घृतदीपं पूजयेत । तत्र मंत्रः "ॐ रां री रूं रें रौं रः ॐ सहस्रार हुं फट् स्वाहा" इति मंत्रेण गंधपुष्पाभ्यां संपूजयेत् । तैलदीपं पाशुपतास्त्र मंत्रेण पूजयेत् । तत्र मंत्रः-"ॐ श्लौं पशु हुं फट् स्वाहा" इति मंत्रेण गंधपुष्पाभ्यां संपूजयेत् । इति संपूज्य हस्तद्वयेन दीपशिखां स्पृष्ट्वा मंत्रं पठेत् तथा च "ॐ घोराय घोरतमाय महारौद्राय वीरभद्राय ज्वालामालिने सर्वदुष्टोपसंहर्त्रे हुं फट् स्वाहा" इति मंत्रं पठित्वा पश्चात्तेज आत्मने समर्प्य ततो वाक्कायचित्तशोधनं कुर्यात । ॐ हुं फट् स्वाहेति मुखे । ॐ रक्षरक्ष हुं फट् स्वाहेति हृदि हस्तं दत्त्वात्मरक्षां विधाय (आम्) इति मंत्रेण चंदनपुष्पाणि कराभ्यां मर्दयित्वा पुष्पाक्षतानादाय॥ ते सर्वे विलयं यांतु ये मां हिंसंति हिंसकाः

---

१ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् घंटानादं प्रकुर्वीत पश्चाद् घंटां प्रपूजयेत ॥ २ दीपं घृतयुतं दक्षे तैलयुक्तं च वामतः । दक्षिणे च सितां वर्तिं वामतो रक्तवर्तिकाम् ॥ ॥ ॥ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके ॥ १ ॥ इति मंत्रेणैशान्यां दिशि दूरतः पुष्पं क्षिप्त्वा हस्तौ प्रक्षाल्याचमेत् । ततः कूर्मपुखे स्वनामाक्षरस्थितकोष्ठे वा दीपं संस्थाप्य पूजनं कुर्य्यात् ॥ अथ पूजाप्रकारः ॥ तत्रादावग्न्युत्तारणप्रयोगः ॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकदेवतानूतनयंत्रमूर्तीनां टंकघनादिदोषपरिहारार्थमग्न्युत्तारणं करिष्ये इति संकल्प्य स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां चाधोलिखितमंत्रैः कुर्यात् । तत्र मंत्राः । ॐ समुद्रस्य त्वावकयाऽग्ने परिव्ययामसि ॥ पावकोऽअस्मभ्यंठं शिवो भव ॥ १ ॥ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि ॥ पावकोऽअस्मभ्यंठं शिवो भव ॥ २ ॥ उपज्मन्नुप वेतसेवतरं नदीष्वा ॥ अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमं नो ॥ यज्ञं पावकवर्णंठं शिवं कृधि ॥ ३ ॥ अपामिदं न्ययनंठं समुद्रस्य निवेशनम् ॥ अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यंठं शिवो भव ॥ ४ ॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ॥ आ देवान्वक्षि यक्षि च ॥ ५ ॥ स नः पावक दीदिवोऽग्ने देवाँ २ इहावह ॥ उप यज्ञंठं हविश्च नः ॥ ६ ॥ पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना ॥ तूर्वन्न यामन्नेतशस्य नूरण ऽआ यो घृणे न ततृषाणो ऽअज

१ लिंगस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च । मंडलस्थां महामायां यंत्रस्थां प्रतिमासु च ॥ सौवर्णे राजते ताम्रे पट्टे भूर्जेथ वा भुवि ॥ विना यंत्रेण चेत्पूजा देवता न प्रसीदति ॥ अन्यत्रापि—यंत्रमित्याहुरेतस्मिन्देवः प्रीणाति पूजितः । विना यंत्रेण पूजायां देवता न प्रसीदति ॥ यंत्रं मंत्रमयं प्रोक्तं मंत्रात्मा देवतेति च । देहात्मनोर्यथा भेदो मंत्रदेवतयोस्तथा ॥

१३

For Private And Personal Use Only

रैः॥ ७ ॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावकोऽअस्मभ्यंशिवोभव ॥८॥ नृषदेव्वेड
प्सुषदेव्वेड्बर्हिषदे व्वेड्वनसदे व्वेड्स्वर्विदेव्वेट् ॥९॥ येदेवा देवानांय्यज्ञियायज्ञियानाᳪसंव्वत्सरीणमुप भागमासते ॥ अहुतादो हविषो
यज्ञेऽअस्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ॥ १०॥ येदेवादेवेष्वधिदेवत्वमायन्येब्रह्मणः पुरऽएतारोऽअस्य ॥ येभ्योनऽऋतेपवते धामकिं
चन न ते दिवो न पृथिव्याऽअधिस्नुषु ॥ ११ ॥ प्राणदाऽअपानदाव्व्यानदाव्वर्चोदाव्वरिवोदाः ॥ अन्याँस्तेऽअस्मत्तपन्तु हेतयः
पावको ऽअस्मभ्यंशिवोभव॥ १२॥इत्यग्न्युत्तारणं कृत्वा स्वच्छवस्त्रेण संशोध्य मूलमन्त्रोक्तासनमन्त्रेण पुष्पासनं दत्वा पीठमध्ये
संस्थाप्य प्राणप्रतिष्ठां च कुर्यात् ॥अथ प्राणप्रतिष्ठाप्रयोगः॥ देशकालौ संकीर्त्य ममामुकदेवतानूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठां करिष्ये इति
संकल्प्य प्रतिष्ठां कुर्य्यात् । अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि छंदांसि । क्रियामयवपुः प्राणाख्या
देवता । आँ बीजम्॥ ह्रीं शक्तिः। क्रौं कीलकम्।अस्मिन्नूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठापने विनियोगः।इति जलं क्षिपेत्। ततः करेणाच्छाद्य
ॐ आँह्रींक्रौंयँरँलँवँशँ षँसँहंसः सोहं अस्याऽमुकदेवतासपरिवारयंत्रस्य प्राणा इह प्राणाः । पुनः ॐ आँ ह्रींक्रौंयँरँलँवँशँषँसँहंसः सोहं
अस्यामुकदेवतासपरिवारयंत्रस्य जीव इह स्थितः। पुनः ॐ आँह्रींक्रौंयँरँलँवँशँषँसँहंसः सोहं अस्यामुकदेवतासपरिवारयंत्रस्य सर्वेन्द्रियाणि
इह स्थितानि । पुनः ॐ आँह्रींक्रौंयँरँलँवँशँषँसँहंसः सोहं अमुकदेवतासपरिवारयंत्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायू

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा । इति प्राणान् प्रतिष्ठाप्य । यःप्राणतोनिमिषतो महित्वे विधेम इति सान्निति त्रिवारं पठेत्॥ मनोजूतिर्जुषता सुप्रतिष्ठा प्रतिष्ठा इत्युक्त्वा संस्कारासिद्धये पंचदशप्रणवावृत्तीः कृत्वा अनेन अमुकदेवतासपरिवारयंत्रस्य गर्भाधाना दिपंचदशसंस्कारान्संपादयामि इति वदेत् । ततः ॐ यंत्रराजाय विद्महे महायंत्राय धीमहि तन्नो यंत्रः प्रचोदयात् ॥ इत्यष्टोत्तरशताभिमंत्र्य मूलदेवतां ध्यात्वा मूलेन मूर्ति प्रकल्प्यावाहयेत् ॥ अथ पाद्यादिपूजनम्[1] ॥ अक्षतानादाय-देवेश भक्तिसुलभ परिवारसमन्वित ॥ यावत्त्वां पूजयिष्यामि तावद्देव इहावह ॥ १ ॥ आगच्छ भगवन् देव स्थाने चात्र स्थितो भव ॥ यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव ॥ २ ॥ मूलं पठित्वा-ॐ भूर्भुवः स्वः अमुकदेव इहागच्छ इह तिष्ठ । इत्यक्षतान्निःक्षिप्य आवाहनीं मुद्रां प्रदर्शयेत् । इत्यावाहनम्॥ ॥ १ ॥ तवेयं महिमामूर्तिस्तस्यां त्वं सर्वग प्रभो ॥ भक्तिस्नेहसमाकृष्टदीपवत्स्थापयाम्यहम् ॥ १ मूलं पठित्वा । ॐ भूर्भुवः स्वः अमुक देव इहतिष्ठ इत्यक्षतान्निःक्षिप्य स्थापनीं मुद्रां प्रदर्शयेत् । इति स्थापनम् ॥ २ ॥ अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो ॥ सान्निध्यं कुरु तस्यां त्वं भक्त्यानुग्रहतत्परः ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीअमुकदेवते इह सन्निधेहि । इत्यक्षतान्निःक्षिप्य सान्निधापनीं मुद्रां प्रदर्शयेत् इति सान्निधापनम् ॥ ३ ॥ आज्ञया तव देवेश कृपांभोधे गुणांबुधे ॥ आत्मानंदैकतृप्तं त्वां निरुणध्मि पितर्गुरो ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेव इह सन्निरुध्य इत्यक्षतान्निःक्षिप्य सन्निरोधनीं मुद्रां प्रदर्शयेत् । इति सन्निरोधनम् ॥ ४ ॥ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यदपूर्णं भवेत्कृत्यं तदप्यभिमुखो भव ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवता

---

१ अत्र स्वेष्टदेवतानामोच्चारणं कुर्यात् । आवाह्य देवतामेकामर्चयेच्चान्यदेवताम् । उभाभ्यां लभते शापं मंत्री चञ्चलमानसः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इह सम्मुखो भव । इत्यक्षतान्निःक्षिप्य सम्मुखीकरणमुद्रां प्रदर्शयेत् । इति सम्मुखीकरणम् ॥ ५ ॥ अभक्तवाङ्मनश्चक्षुःश्रोत्रदूराति
गयुते ॥ स्वतेजःपञ्जरेणाशु वेष्टितो भव सर्वतः ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेव अवगुंठितो भव । इत्यक्षतान्निःक्षिप्य
अवगुंठिनीमुद्रां प्रदर्शयेत् । इत्यवगुंठनम् ॥ ६ ॥ यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये ॥ तस्मै ते परमेशाय स्वागतं स्वागतं च मे ॥
॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवते सुस्वागतं समर्पयामि । इति सुस्वागतम् ॥ ७ ॥ देवदेव महाराज प्रियेश्वर प्रजापते ॥
आसनं दिव्यमीशानाद्दास्येहं परमेश्वर ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः आसनं समर्पयामि ॥ ८ ॥ इत्यासनं
दत्वा करौ बद्ध्वा प्रार्थयेत् । स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥ १ ॥ मूलं पठित्वा
ॐ भूर्भुवः स्वः अमुकदेवाय नमः प्रार्थनां समर्पयामि नमस्करोमि ॥ ८ ॥ इति प्राध्यं पाद्याद्युपचारैः पूजयेत् । तद्यथा--यद्भक्ति
लेशसंपर्कात्परमानंदविग्रह । तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः पाद्यं
समर्पयामि । इति सामान्यार्घोदकेन शंखोदकेन वा पाद्यं दद्यात् ॥ इति पाद्यम् ॥ ९ ॥ तापत्रयहरं दिव्यं परमानन्दलक्षणम् ॥ तापत्रय
विनिर्मुक्तस्तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवःस्वःअमुकदेवाय नमःइदमर्घ्यं समर्पयामि । अर्घ्योदकेनार्घ्यं दद्यात् ॥ इत्यर्घ्यम्
॥ १० ॥ सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ॥ मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥ १ ॥ मूलं पठित्वा अमुकदेवाय नमः मधुपर्कं

१-रुद्रयामले निवेदयेत्पुरोभागे गंधं पुष्पं च भूषणम् । दीपं दक्षिणतो दद्यात्पुरतो वा न वामतः ॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे । नैवेद्यं
दक्षिणे भागे पुरतो वा न पृष्ठतः ॥ धूपदीपौ सुभोज्यं च देवताग्रे निवेदयेत् ॥ २ शक्तिपूजायां सर्वमंत्राणां स्त्रीलिंगेनोच्चारणं कुर्यात् ॥

For Private And Personal Use Only

समर्पयामि इति मधुपर्कम् ॥ ११ ॥ वेदानामपि वेदाय देवानां देवतात्मने । आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे॥ १ ॥मूलं पठित्वा ॐ भूर्भुवःस्वः अमुकदेवाय नमः आचमनं समर्पयामि ॥ इत्याचमनम् ॥ १२ ॥ ॐ स्नेहं गृहाण स्नेहेन लोकनाथ महाशय ॥ सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम् ॥ मूलं पठित्वा अमुकदेवाय नमः इति सुगंधतैलं समर्पयामि । इति सुगंधतैलम् ॥ १३ ॥ ॐ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः॥ स्नापितोऽसि मया देव तथा शांतिं कुरुष्व मे॥ १ ॥मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः जलस्नानं समर्पयामि ॥ इति जलस्नानम् ॥ १४ ॥ कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ १ ॥ मूलं पठित्वा अमुकदेवाय नमः पयःस्नानं समर्पयामि ॥ इति पयःस्नानम् ॥ १५ ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा अमुकदेवाय नमः दधि स्नानं समर्पयामि ॥ इति दधिस्नानम् ॥ १६ ॥नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ॥ घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥मूलं पठित्वा अमुकदेवाय नमः घृतस्नानं समर्पयामि॥ इति घृतस्नानम् १७ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥मूलं पठित्वा ॐ भूर्भुवःस्वः अमुकदेवाय नमः मधुस्नानं समर्पयामि ॥ इति मधुस्नानम् ॥ १८ ॥ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ॥ मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः शर्करोदकस्नानं समर्पयामि ॥ इति शर्करोदकस्नानम् ॥ १९ ॥ पयो दधि घृतं चैव मधु च शर्करायुतम् ॥ पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः पंचामृतस्नानं समर्पयामि । इति पञ्चामृतस्नानम् ॥ २० ॥ मलयाचलसंभूतं चन्दनागरुसंभवम् ॥ चन्दनं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥मूलं पठित्वा ॐ भूर्भुवः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वः अमुकदेवाय नमः गन्धोदकस्नानं समर्पयामि । इति गंधोदकस्नानम् ॥ २१ ॥ इति स्नापयित्वा पूर्वोक्तशुद्धोदकस्नानं कारयेत् ।
एवं स्नानं समर्प्य शिवसूर्यातिरिक्तदेवेषु शंखेन तत्तन्मूलमंत्रेण यथाशक्त्याभिषेकं कृत्वा ॐ अनेन अभिषेककर्मणाऽमुकदेवता प्रीयताम्
इति समर्प्य आचमनं दद्यात् ॥ ततः-सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ मूलं पठित्वा
ॐ भूर्भुवः स्वः अमुकदेवाय नमः वस्त्रं समर्पयामि ॥ इति वस्त्रम् ॥ २२ ॥ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं चोत्तरी
यं गृहाण परमेश्वर ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः यज्ञोपवीतं समर्पयामि इति यज्ञोपवीतम् ॥ २३ ॥
ॐ स्वभावसुंदरांगाय नानाशक्त्याश्रित शिव ॥ भूषणानि विचित्राणि कल्पयाम्यमरार्चित ॥ मूलं पठित्वा अमुकदेवाय नमः आभूषणं
समर्पयामि इत्युक्त्वा दक्षहस्तांगुष्ठस्पृष्टानामिकाल्पिकया मुद्रया भूषणानि दद्यात् ॥ इत्याभूषणम् ॥ २४ ॥ श्रीखण्डं चन्दनं
दिव्यं गंधाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः गंधं समर्प
यामि ॥ अंगुष्ठकनिष्ठामूललग्ना गंधमुद्राः । इति गन्धम् ॥ २५ ॥ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः अक्षतान्समर्पयामि इत्यक्षता
न्सर्वांगुलीभिर्दद्यात् ॥ ॥ २६ ॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥ मूलं
पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः पुष्पं समर्पयामि तर्जन्यावंगुष्ठमूललग्ने पुष्पमुद्रा ॥ २७ ॥ इति पुष्पम् ॥ एवं पुष्पांतं पूज

१ पीतं विष्णौ सितं शंभौ रक्तं विघ्नार्कशक्तिषु ॥ सच्छिद्रमलिनं जीर्णं त्यजेत्तैलादिदूषितम् ॥ २ स्त्रीपूजने न तु दद्यात् ॥ ३ शक्तिश्चेत् रक्तचन्दनं दद्यात् ॥
४ पत्रं पुष्पं फलं देवे न च दद्यादधोमुखम् । पुष्पांजलौ न तद्दोषस्तथा पर्युषितस्य च ॥

For Private And Personal Use Only

यित्वा देवाज्ञया प्रयोगोक्तामावरणपूजां कुर्य्यात् । तत्र क्रमः । पुष्पांजलिमादाय संविन्मयः परो देवः परामृतरसप्रियः॥ अनुज्ञां देहि मे देव परिवारार्चनाय च ॥ १ ॥ इति पठित्वा पुष्पांजलिं देवोपरि दत्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इत्याज्ञां गृहीत्वा पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण प्रयोगोक्तावरणपूजां कुर्य्यात् तत्र क्रमः। श्रीपदं पूर्वमुच्चार्य्य पादुकापदमुच्चरेत्॥ पूजयामि नमः पश्चात् पूजयेदंगदेवताः॥ इत्युच्चरन् आवरणदेवताः पूजयेत् ॥ तत्सर्वं तत्तत्प्रयोगे ज्ञेयम् ॥ अथ धूपादिपूजनम्॥ फडिति धूपपात्रं संप्रोक्ष्य नमः इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय (रं) इति वह्निबीजेन उपरि अग्निं संस्थाप्य तदुपरि मूलेन दशांगं दत्वा घंटां वादयन् । वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ १॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवाराय अमुकदेवाय नमः धूपं समर्पयामि । इति पठित्वा देवस्य वामभागे धूपपात्रं संस्थाप्य तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा तां प्रदर्शयेत् । इति धूपम् ॥२८॥ ततो दीपपात्रं गोघृतेनापूर्य मंत्राक्षरतंतुनिर्मितांनिःक्षिप्य प्रणवेन प्रज्वाल्य घंटां वादयन् नेत्रादिपादपर्यंतं दीपं प्रदर्शयन् ॥ ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः॥ सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवाराय अमुकदेवाय नमः दीपं समर्पयामि । इति पठित्वा देवस्य दक्षिणभागे निधाय ततः शंखजलमुत्सृज्य मध्यमांगुष्ठलग्ना दीपमुद्रां प्रदर्शयेत् ॥ इति दीपम् ॥ २९ ॥ ततो देवस्याग्रे देवदक्षिणतो वा जलेन चतुरस्रं मण्डलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं

---

१ धूपयेद्दक्षहस्तेन देवता नाभिदेशतः । जलपुष्पांजलिं दद्याद्दीपदानमतीदृशम् ॥ २ ॥ मंत्राक्षराणां संख्याकैस्तंतुभिर्ब्रह्मसूत्रजैः । वर्तीं कृत्वा घृतेनैव दीपं तत्र प्रदापयेत् ॥ ॐकारेण गौतमीये दाक्षिण्यं तु परित्यज्य वामं चैवानधारयेत् । अभोज्यं तद्भवेदन्नं पानीयं च सुरोपमम् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संस्थाप्य तन्मध्ये षड्रसोपेतं विविधप्रकारं वा नैवेद्यं निधाय ॐ ह्रीं नमः इति मंत्रेण अर्घ्यजलेन संप्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिण हस्तोपरि तादृशं वामं निधाय नैवेद्येनाच्छाद्य (ॐ यं) इति वायुबीजेन षोडशधा संजप्य वायुना तद्गतदोषान् संशोष्य दक्षिणकरतले तत्पृष्ठलग्ने वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य-(ॐ रँ) इति वह्निबीजेन षोडशवारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा वामकरतले (ॐ वं) इत्यमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य-(ॐ वं) इति सुधाबीजं षोडशवारं संजप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य देवस्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा ॥ ॐ सत्पात्रसिद्धं सुहविर्विधानेनैकभक्षणम् ॥ निवेदयामि देवेश सानुगाय गृहाण तत् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवाराय अमुकदेवाय नमः नैवेद्यं समर्पयामि । इति भूतले देवदक्षिणे जलं क्षिप्त्वा वामहस्तेन अनामामूलयोरंगुष्ठयोगे ग्रासमुद्रां तां प्रदर्श्य देवं भुक्तवंतं विभाव्य जलं दद्यात् ॥ इति नैवेद्यम् ॥ ३० ॥ नमस्ते देवदेवेश सर्वतृप्तिकरं वरम् ॥ परमानन्दपूर्ण त्वं गृहाण जलमुत्तमम् ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवाराय अमुकदेवाय नमः जलं समर्पयामि । इति मंत्रेण स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य देवेन तज्जलं प्राशितमिति भावयन् अंतःपटं दद्यात् ॥ ३१ ॥ अथ अंतःपटम् ॥ ब्रह्मेशाद्यैः परित उरुभिः सूपविष्टैः समेतैर्लक्ष्म्या शिंजद्वलयकरया सादरं वीज्यमानः ॥ नर्मक्रीडाप्रहसनपरान्पंक्तिभोक्तॄन् हसन्स भुंक्ते पात्रे कनकघटिते षड्रसान् देवदेवः ॥ १ ॥ शालीभक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतफलं पूरिकाद्यं सुखाद्यम् ॥ आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीचस्वादीयः शाकराजीपरिकरममृताहारजोषं

For Private And Personal Use Only

जुषस्व ॥ २ ॥ इति अंतःपटं दत्त्वाचमनं दयात् ॥ तत्र मंत्रः ॥ ३१ ॥ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः आचमनं समर्पयामि ॥ ३२ ॥ इत्याचमनं दत्त्वा मूलेन गंडूषार्थं जलं दयात् ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिसंयुक्तं तांबूलं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः तांबूलं समर्पयामि । इति तांबूलम् ॥ ३३ ॥ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः फलं समर्पयामि ॥ इति फलम् ॥ ३४ ॥ बुद्धिः सवासना कृता दर्पणं मंगलानि च ॥ मनोवृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता ॥ १ ॥ ध्यानं संगीतरूपेण शब्दा वाद्यप्रभेदतः ॥ छत्राणि नवपद्मानि कल्पितानि मया प्रभो ॥ २ ॥ सुषुम्नाध्वजरूपेण प्राणाद्याश्चामरा मताः ॥ अहंकारो गजत्वेन वेगः कृतो रथात्मना ॥ ३ ॥ इन्द्रियाणि च रूपाणि शब्दादिरथवर्त्मना ॥ मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥ ४ ॥ सर्वमन्यत्तथा कृतं तवोपकरणात्मना ॥ एवं सार्द्धचतुः श्लोकान् पठित्वा छत्रादि समर्पयेत । इति छत्राद्यर्पणम् ॥ ३५ ॥ हिरण्यगर्भगर्भस्थहेमबीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः दक्षिणां समर्पयामि । इति हिरण्यादिदक्षिणां दयात् ॥ ३६ ॥ शालिगोधूमपिष्टेन त्रिकोणाकारं प्रयोगोक्तं वा अमुकसंख्यापरिमितदीपं निर्माय सुवर्णादिस्थालीमध्ये संस्थाप्य घृतेनापूर्य कर्पूरादिवर्त्तीं निक्षिप्य (ह्रीं) इति मायाबीजेन प्रज्वाल्य मूलेनार्तिक्यं संपूज्य मूलं पठित्वा देवोपरि नेत्रादिपादपर्यंतं नववारं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिवारं वा भ्रामयेद्घंटां च नादयेत् । तत्र मंत्रः । अंतस्तेजो बहिस्तेज एकीकृत्य निरंतरम् ॥ त्रिधा देवोपरि भ्राम्य कुलदीपं निवेदयेत् ॥ १ ॥ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥त्वमेव सर्वज्योतिस्त्वमार्तिक्यं प्रतिगृह्यताम् ॥२॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः नीराजनं समर्पयामि । इत्युच्चरन् देवदक्षिणतः निधाय शंखजलमुत्सृजेत् । इति नीराजनम् ॥ ३७ ॥ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव॥ १॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः कर्पूरार्तिक्यं प्रदर्शयामि । इति कर्पूरार्तिक्यम् ॥३८॥ यानि कानि च पापानि जन्मांतरकृतानि वै ॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदेपदे ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः प्रदक्षिणां समर्पयामि । इत्युच्चरन् विष्णौ चतस्रः४ शिवे तिस्रः ३ दुर्गाया एका १ गणेशे तिस्रः३ रवौ सप्त७ प्रदक्षिणाः कार्याः । इति प्रदक्षिणा॥ ३९॥प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात॥इति वदन् साष्टांगं प्रणमेत्॥इति साष्टांगप्रणामः॥ ४०॥ नानासुगंधपुष्पाणि यथाकालोद्भवानि च ॥ पुष्पांजलिं मया दत्तं गृहाण परमेश्वर ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकदेवाय नमः पुष्पांजलिं समर्पयामि । इति पुष्पांजलिः॥ ४१॥इति पुष्पांजलिं दत्त्वा ततःस्तुतिपाठेन देवं स्तुत्वा बद्धांजलिपूर्वकं प्रार्थयेत्॥तद्यथा-ज्ञानतोऽज्ञानतो वाऽथ यन्मया क्रियते शिव ॥ मम कृत्यमिदं सर्वमिति देव क्षमस्व मे॥ १॥अपराधसहस्राणि क्रियंतेऽहर्निशं मया॥ दासोयमिति मां मत्वा क्षमस्व परमेश्वर॥ २॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना॥ ३॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं शिव ॥४॥ इति बद्धांजलिपूर्वकं संप्रार्थ्य ततः-यदुक्तं यद्य भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं च नैवेद्यं गृहाण मानुकंपय ॥ इति पठित्वा देवस्य दक्षिणकरे पूजार्पणजलं दत्त्वा मालायाः संस्कारान् कुर्यात्॥ अथ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मालायाः संस्कारा:॥ तत्रादौ कुशोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अश्वत्थपत्रनवकराचिते कमले स्थापयित्वा ॐ ह्रीं अँआँइँईँउँऊँऋँ ॠँऌँॡँएँऐँओँऔँअँअः कँखँगँघँङँचँछँजँझँञँटँठँडँढँणँतँथँदँधँनँपँफँबँभँमँयँरँलँवँशँषँसँहँळँक्षँ इत्येतानि मातृकाक्षराणि मूलमंत्रं च मालायां विन्यस्य पुनः पंचगव्येन प्रोक्ष्य ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः॥ भवेभवे नातिभवेभवस्व मां भवोद्भवाय नमः ॥ १ ॥ इति मंत्रेण शीतजलेन प्रक्षालयेत्। पुनः ॐ वामदेवाय नमो ज्येष्ठाय नमःश्रेष्ठाय नमो रुद्राय नमःकालाय नमः कलविकरणाय नमो बलविकरणाय नमः इति मंत्रेण चन्दनागुरुकर्पूरादिसुगंधद्रव्यैर्घर्षयेत् ॥ २॥ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ इति मंत्रेण तां धूपयेत् ॥ ३॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि॥तन्नो रुद्रः प्रचोदयात् ॥ इति मंत्रेण मालायाश्चंदनं लेपयेत् ॥ ४ ॥ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ इति मंत्रेण मेरुसहितं प्रत्येकमणिं सकृत्सकृद्वाभिमंत्रयेत् ॥ ५ ॥ ततः अस्या मालायाः इति शब्दं संयोज्य पूर्ववत् प्राणप्रतिष्ठामंत्रप्रयोगेण मालायाः प्राणप्रतिष्ठां कृत्वा ध्यायेत् ॥ ॐ ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मे सिद्धिदा भव ॥ १॥ इति मालां संप्रार्थ्य ॐ अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा ॥ इति मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् प्रातःकालमारभ्य मध्यंदिनं यावत् यथाशक्ति

१ अप्रतिष्ठितमालाभिर्मंत्रं जपति यो नरः। सर्वं तद्विफलं विद्यात् क्रुद्धा भवति देवता॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलमंत्रं जपेत् । नित्यमेव समानो जपः कार्य्यो न तु न्यूनाधिकः । ततो जपांते ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम॥शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥ तेन सत्येन सिद्धिं मे देहि मातर्नमोस्तु ते ॐ ह्रीं सिद्ध्यै नमः। इति मालां शिरसि निधाय गोमुखीरहस्ये स्थापयेत् नाशुचिः स्पर्शयेत् नान्यं दद्यात् अशुचिस्थाने न निधापयेत् स्वयोनिवत् गुप्तं कुर्य्यात्। ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनःमूलमंत्रोक्तऋष्यादिन्यासं हृदयादिषडंगन्यासं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं च दत्त्वा जपदेवार्पणं कुर्य्यात्। तथा च अर्घोदकेन चुलुकमादाय ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मृत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः॥ १ ॥ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्म्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्म्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मां मदीयं च सकलममुकदेवाय समर्पयामि नमः॥ ॐ तत्सदिति ब्रह्मार्पणं भवतु । इति देवदक्षिणकरे जलसमर्पणं कृत्वा कृतांजलिपूर्वकं क्षमापनं पठेत्। अथ क्षमापनम्। आवाहनं न जानामि न जानामि विसर्जनम्॥पूजाभागं न जानामि त्वं गतिःपरमेश्वर॥ १ ॥मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अंतश्चरसि भूतानामि इष्टस्त्वं परमेश्वर ॥ ४ ॥अन्यथा शरणं नास्ति त्वमेव शरण मम ॥ तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर ॥५॥ मातृयोनिसहस्रेषु सहस्रेषु व्रजाम्यहम् ॥ तेषु चेष्वचला

---

१ जपस्थानार्चनस्थानं मालापुस्तकदर्शनम् । स्वभक्तेषु महेशानि दर्शनं नैव कारयेत ॥ २ यथाशक्ति जपित्वा तं मंत्रेण विनिवेदयेत् । क्षिपन्नर्घस्य पानीयं देवतादक्षिणे करे ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भक्तिरच्युतेस्तु सदा त्वयि ॥ ६ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्याच्च तव दर्शनात ॥७॥ देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवं जपति सर्वत्र यो देवः सोहमेव हि॥८॥ क्षमस्व देव देवेश क्षम्यते भुवनेश्वर॥तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे ॥ ९ ॥ इति कृतांजलिः प्रार्थयित्वा शंखमुद्धृत्य देवोपरि भ्रामयित्वा--साधु वासाधु वा कर्म्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम ॥ १ इत्युच्चरन् देवस्य दक्षिणहस्ते किंचिज्जलं दत्वा प्राग्वदर्घ्यं देवशिरसि दत्वा शंखं यथास्थाने निवेश्य ततो गतसारनैवेद्यं देवस्योच्छिष्टं किंचिदुद्धृत्य तत्तदुच्छिष्टभोजिने विनिवेदयेत्। तद्यथा विष्णोरुच्छिष्टं विष्वक्सेनाय १ शिवस्योच्छिष्टं चंडेश्वराय २ सूर्यस्योच्छिष्टं चंडांशवे ३ गणेशोच्छिष्टं वक्रतुंडाय ४ शक्तेरुच्छिष्टमुच्छिष्टचांडाल्यै इत्युच्छिष्टाधिकारिणे ऐशान्यां दिशि दद्यात् । तच्छेषनैवेद्यं शिरसि धृत्वा नैवेद्यादिकं देवभक्तेषु विभज्य स्वयं भुक्त्वा विसर्जनं कुर्य्यात् । तथा च गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर ॥ पूजाराधनकाले च पुनरागमनाय च ॥ इत्यक्षतान्निक्षिप्य विसर्ज्जनं कृत्वा देवं स्वहृदये स्थापयेत् । तथा च तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवा सर्वे तिष्ठंति मे हृदि ॥ १ ॥ इति हृदयकमले हस्तं दत्वा देवं संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् । एवमेव विधिना जपं समाप्य जपान्ते तत्तद्दशांशतो

---

१ नैवेद्यलक्षणम् । अर्व्वाग्विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते । विसर्जिते जगन्नाथे निर्माल्यंभवति क्षणात ॥ २ नैवेद्यत्याज्यनिषेधः (आह्निकतत्वे) तृषार्ताः पशवो रुद्राः कन्यका च रजस्वला । देवता च सनिर्माल्या हंति पुण्यं पुराकृतम् ॥ (रुद्रयामले विशेषः) निवेदितं च यद्द्रव्यं भोक्तव्यं तद्विधानतः । तन्नचेद्भुज्यते मोहाद्भोक्तुमायांति देवताः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यहोमं वा कुर्य्यात् ॥ अथ मखोत्सवप्रारंभः ॥ यागभूमिं संशोध्य षोडशस्तंभसहितं मंडपं सवितानं चतुर्द्वारे तोरणवेष्टितं कृत्वा दिव्यवस्त्रपट्टदुकूलादिभिर्देवतागारं श्रीगिरिं कृत्वा कदलीस्तंभविराजितं सुमनोहरं पुष्पमालोपशोभितं मंडपं विधाय तन्मध्ये होमानुसारतः कुंडं चतुरस्रं प्रयोगोक्तं वा मेखलात्रययुतं योनिसहितं यथोक्तं कुर्यात्। अथवा स्थंडिलं कुर्यात्। कुंडं ऐशान्यां चंडिकापीठं पूर्वे ग्रहपीठं आग्नेय्यां-मातृकापीठं नैर्ऋत्ये-वास्तुपीठं कुंडात्पश्चिमे-स्वस्तिवाचनवेदिकां च हस्तोच्चमानं सर्वं कुर्यात्। ततो यजमानः सुस्नातः कलत्र पुत्रादियुतः शुचिः स्त्रियः वस्त्राभरणगंधपुष्पैरलंकृत्य गलितस्वादुजलेन कलशं संपूर्य तन्मुखे महाफलं प्रतिष्ठाप्य पाणिभ्यां गृहीत्वा मंत्रवाद्यघोषणकर्ताऽभीष्टदेवतां ध्यात्वा यागभूमिमागत्य पश्चिमद्वारमंडपं प्रविशेत्। (अथ शान्तिकलशस्थापनम्) कलशं कुंडात्पश्चिमे तंदुलाष्टदलोपरि संस्थाप्य गंधादिभिः शांतिकलशं संपूज्य तत्र देवता विन्यसेत्। ॐ गं गणपतये नमः १ ॐ दुं दुर्गायै नमः २ ॐ सं सरस्वत्यै नमः ३ ॐ क्षं क्षेत्रपालाय नमः ४ ॐ वां वास्तुपुरुषाय नमः ५ एवं पंचदेवताः संपूज्य स्थिरासनं संभाव्य गणपतिपूजना

---

१ ऐशान्यादिचतुर्दिक्षु चतुरस्तद्बहिः पुनरैशान्यादिचतुर्दिक्षु चतुरः ऐशानप्राच्यांतराले एकः पूर्वाग्नेय्यांतराले एकः आग्नेययाम्यांतराले एकः याम्यनैर्ऋत्यं तराले एकः नैर्ऋत्यवरुणांतराले एकः पश्चिमवायव्यांतराले एकः वायव्योदीच्यांतराले एकः उत्तरैशान्यांतराले एकः एवं षोडशकदलीस्तभांस्थापयेत। ततः पूर्वे न्यग्रोधपत्रतोरणं दक्षिणे औदुम्बरं पश्चिमे अश्वत्थपत्रतोरणम् उत्तरे प्लक्षपत्रतोरणं बध्नीयात् पूर्वद्वारदक्षिणवामशाखयोः धनुषाकारपताका रक्तं ध्वजं च अग्निकोणे तादृशं दक्षिणद्वारे धूम्रवर्णपताकाः कृष्णवर्णध्वजं च नैर्ऋत्ये पताकां कृष्णां नीलध्वजं च पश्चिमद्वारे पताकां श्वेतां पीतध्वजं च वायव्ये तादृशम् उत्तरे श्वेतवर्णपताकां पाद्मभवध्वजं च ऐशान्ये पताकां श्वेतां ध्वजं च ईशानपूर्वमध्ये पताकां ध्वजं च सर्ववर्णिकां पश्चिमनैर्ऋत्ययोर्मध्ये पताकां पंचवर्ण ध्वजं च मंडपमध्ये चित्ररत्नाकारध्वजं पताकां च स्थापयेत ॥ २ ऐशान्ये चण्डिकापीठं ग्रहपीठं तु पूर्वतः ॥ आग्नेय्यां मातृकापीठं हस्तमुच्चं समंततः। नैर्ऋत्ये वास्तुपीठं तु सर्वयज्ञेष्वयं विधिः ॥ कुंडात्पश्चिमतः कार्या स्वस्तिवाचनवेदिका। यथोक्तोच्छ्रायविस्तारवेदिकानामयं क्रमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिकं कुर्यात् । तद्यथा पूर्वोक्तासने कर्मभूमावुपविश्य पूर्वोक्तप्रकारेण गणेशादीन् नमस्कृत्य ऐं आत्मतत्त्वं शोधयामि नमः १ ह्रीं विद्या तत्त्वं शोधयामि स्वाहा २ क्लीं शिवतत्त्वं शोधयामि स्वाहा ३ इति तत्त्वत्रयेणाचम्य मूलेन प्राणानायम्य देशकालौ संकीर्त्य अस्मिन् पुण्याहे अमुकदेवताप्रीतये मया अमुककामनया ब्राह्मणद्वारा कृतजपदशांशेन क्रियमाणामुकदेवतायागसिद्ध्ये होममहं करिष्ये ॥ इत्यक्षतोदकेन संकल्प्य तदंगभूतमादौ गणेशपूजनं भूमिपूजनं पुण्याहवाचनं मातृकापूजनं ब्राह्मणप्रार्थनापूर्वकं करिष्ये । इति संकल्प्य ब्राह्मणं प्रार्थयेत् । तत्र मंत्रः । ब्राह्मणाः संतु मे शस्ताः पापात्पांतु समाहिताः ॥ देवानां चैव दातारस्त्रातारः सर्वदेहिनाम् ॥ १ ॥ इति संप्रार्थ्य ततः गणेशपूजनादि क्रमेण कुर्यात् । ततो देशकालौ संकीर्त्य पारिप्सितकर्मणोंगभूतं मंडपशुद्धिं कुंडशुद्धिं च करिष्ये । इति संकल्प्य । ततः स्थापितकलशोदकमन्यपात्रे गृहीत्वा औदुम्बरशमीदूर्वासहितजलेन भूमिं त्रिवारं प्रोक्ष्य तेनोदकेन मंडपं प्रोक्ष्य अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ इति मंत्रेण गौरसर्षपान्ः सर्वतो मंडपांतः विकिरेत् ॥ ॐ मूलेनास्त्राय फट्" इत्यस्त्रमंत्रेण तालत्रयं दिग्बंधनं कृत्वा पंचगव्येन मंडपं प्रोक्ष्य कुंडं प्रार्थयेत् । तत्र मंत्रः । हे कुंड तव निर्माणं यथामति मया कृतम् ॥ कृपया भव संपूर्ण कुरु सिद्धिं नमोस्तुते ॥ १ ॥ इति मन्त्रांजलिपूर्वकं संप्रार्थ्य ततः कृतांजलिः स्वस्तिन इति मंत्रं पठेत् । ततः कुंडं गंधादिना संपूज्य कुंडमेखलास्थितं देवतांश्चिंत्य संभाव्य कुंकुमाक्षतसिंदूरैः संपूज्य मंडपदेवताः पूजयेत् । मंडपेषु ॐ रत्नमंडपाय नमः ॥ १ ॥ दक्षिणशाखायाम् ॐ द्वारश्रियै नमः ॥ २ ॥ वामशाखायाम् । ॐ गं गणपतये नमः ॥ ३ ॥ मंडपोपरि ॐ तत्त्वमंडपाय नमः ॥ ४ ॥ देहल्याम् ॐ वास्तुपुरुषाय नमः ॥ ५ ॥ मंडपान्तः ॐ ब्रह्मणे नमः ॥ ६ ॥ इति संपूज्य दध्योदनमाषभक्तस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितदीपपात्राण्यादाय गंधादिपात्रं जलपात्रं च गृहीत्वा मंडपाद्बहिर्बलिदानं कुर्यात् । तत्र मंत्रः । हेरौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ॥ १ ॥ भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः ॥ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥२॥ इति मंत्रद्वयेन पूर्वादिचतुर्दिक्षु तत्र भूमौ कुशानास्तीर्य भूतबलिं दद्यात् ॥ ततः प्राग्द्वारे दक्षिणशाखायां ॐ देवेभ्यो नमः गंधाद्युपचारसहितदीपदध्योदन एष माषभक्तबलिर्नमः इति सर्वत्र ॥ १ ॥ प्राग्द्वारे वामशाखायाम् ॐ आदित्येभ्यो नमः गंधाद्यु० ॥२॥ ततः याम्यद्वारे दक्षिणशाखायाम् ॐ वसुभ्यो नमः गंधाद्यु० ॥ ३ ॥ याम्यद्वारे वामशाखायाम् ॐ मरुद्भ्यो नमः गंधाद्यु० ॥ ४ ॥ततः पश्चिमद्वारे दक्षिणशाखायाम् ॐ अश्विभ्यां देवाभ्यां नमः गंधाद्यु० ॥ ५ ॥पश्चिमद्वारे वामशाखायाम् ॐ सुपर्णेभ्यो नमः गंधाद्युपचा० ॥६॥ तत उत्तरद्वारे दक्षिणशाखायाम् ॐ पन्नगेभ्यो नमः गंधाद्यु० ॥ ७ ॥ उत्तरद्वारे वामशाखायाम् ॐ ग्रहेभ्यो नमः गंधाद्यु० ॥८॥इति क्षेत्रबलिं दत्त्वा पूर्ववद्दिग्देवीनां बलिदानं ग्रहाणां लोकपालानां दिक्पालानां च यथाक्रमेण एवमेव विधिना बलिं दद्यात् ।तत आचम्य प्राणानायम्य वास्तुपीठसमीपे गत्वा वास्तुमंडले वास्तुमूर्तिं प्रतिष्ठाप्य संपूज्य तत्र यथोक्तबलिदानं कृत्वानंतरं साचार्यब्रह्मऋत्विक् सपवित्रकरो यजमानःसपत्नीकः ब्रह्मादीनां प्रार्थनां कुर्यात् । तत्र मंत्रः। ॐ उत्तिष्ठंतु महाभागा अर्चिताः प्रार्थिता मया॥ ऋद्ध्यर्थं कर्मणस्त्वस्य कुरुध्वं मंडपं शुभम् ॥ इति संप्रार्थ्य कुशाक्षतजलमादाय देशकालौ संकीर्त्य श्रीअमुकदेवताप्रीत्यर्थम

---

१ मंडपस्य चतुर्दिक्षु दद्याद्भूतबलिं बहिः ।बलिं गृह्णंत्विमे देवा आदित्या वसवस्तथा॥ मारुतश्चाश्विनौ देवाः सुपर्णाः पन्नगा ग्रहाः । द्वौ द्वौ प्रागादि संपूज्य मम यज्ञसुखावहाः ॥ याम्योत्तरविभागेषु चतुर्द्वारैः पृथक्पृथक् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुकदेवतामहोत्सवसिद्ध्यर्थं षोडशस्तंभप्रतिष्ठां तोरणप्रतिष्ठां ध्वजपताकाप्रतिष्ठां च कृत्वा चतुर्दिक्षु द्वारपालसहितकलशसुप्रतिष्ठां कृत्वा प्रतिष्ठितदेवतानां पूजनं बलिदानं च करिष्ये। इति संकल्प्य मंडपप्रतिष्ठां समारभेत् ॥ तत्रादौ षोडशस्तंभप्रतिष्ठाप्रयोगः॥ऐशान्यस्तंभसमीपे गत्वा तत्र ॐ भूर्भुवःस्वःप्रथमस्तंभे ब्रह्मन्निहागच्छ प्रतिष्ठितो भव इति ब्रह्माणमावाह्य तत्राधिदेवताःपूजयेत् तद्यथा।ॐ सावित्र्यै नमः।ॐ वास्तुपुरुषाय नमः। ॐ ब्राह्मयैनमः। इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः। इति पूजयेत् ततो ब्रह्मजज्ञानं प्रथमं पुरस्तादिति गृत्समद ऋषिः त्रिष्टुप्छंदः। ब्रह्मा देवता पूजने विनियोगः।इति जलं क्षिप्त्वा ॐ ब्रह्मणे नमः। इति संपूज्य ॐ ब्रह्मणे वेदाधिपतये पद्महस्ताय हंसासनसमारूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः। ब्रह्मा प्रीयतां ब्रह्मा सुप्रीतो वरदो भवतु इति कुशानास्तीर्य बलिं दद्यात्॥ १ ॥आग्नेयस्तंभसमीपे गत्वा तत्र ॐ भूर्भुवः स्वः द्वितीयस्तंभे विष्णो इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः संपूजयेत्। तद्यथा । ॐ लक्ष्म्यै नमः। ॐ आदित्यनंदायै नमः। ॐ वैष्णव्यै नमः। इति संपूज्य स्तंभशिरशि ॐ नागमात्रे नमः। इति पूजयेत्। तत इदं विष्णुरिति मेधातिथिर्ऋषिः।गायत्री छंदः।विष्णुर्देवता। पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ विष्णवे नमःइति विष्णुं संपूज्य ॐ विष्णवे यज्ञाधिपतये चक्रहस्ताय गरुडासनसमारूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः । विष्णुःप्रीयताम् विष्णुः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् ॥ २ ॥ तत नैर्ऋत्यस्तंभसमीपे गत्वा तत्र ॐ भूर्भुवः स्वः तृतीयस्तंभे रुद्र इहागच्छ प्रतिष्ठितो भव। इत्यावाह्य तत्राधिदेवताः संपूजयेत्। तद्यथा। ॐ गौर्यै नमः। ॐ शोभनायै नमः। ॐ माहेश्वर्यै

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः। इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः इति पूजयेत्। ततः परिणो रुद्रस्येति गृत्समद ऋषिः। त्रिष्टुप् छंदः। रुद्रो देवता पूजने विनियोगः। इति जलं क्षिप्त्वा । ॐ रुद्राय नमः। इति संपूज्य ॐ रुद्राय विद्याधिपतये त्रिशूलहस्ताय वृषस्कंधमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः रुद्रः प्रीयतां रुद्रः सुप्रीतो वरदो भवतु। इति बलिं दद्यात्॥ ३ ॥ततो वायव्यस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः चतुर्थस्तंभे इन्द्र इहागच्छ प्रतिष्ठितो भव । इत्यावाह्य तत्राधिदेवताः पूजयेत । तद्यथा । ॐ इन्द्राण्यै नमः। ॐ आनंदायै नमः । ॐ विभूत्यै नमः।इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत्। तत इन्द्रआमंनेति अप्रतिरथ ऋषिः। त्रिष्टुप्छंदः । इन्द्रो देवता । पूजने विनियोगः । इति जलं क्षिप्त्वा । ॐ इन्द्राय नमः । इति संपूज्य । ॐ इंद्राय सुराधिपतये वज्रहस्ताय ऐरावतसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः इन्द्रः प्रीयतामिंद्रः सुप्रीतो वरदो भवतु । इति बलिं दद्यात ॥ ४ ॥ पुनस्तद्बहिरीशानकोणस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः पंचमस्तंभे सूर्य इहागच्छ प्रतिष्ठितो भव । इत्यावाह्य तत्राधिदेवताः पूजयेत । ॐ सौर्यै नमः । ॐ भूत्यै नमः । ॐ सावित्र्यै नमः ॐ मंगलायै नमः । इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः इति पूजयेत । ततः चित्रं देवानामिति कुत्सांगिरस ऋषिः। त्रिष्टुप् छंदः। सूर्यो देवता । पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ भास्कराय नमः । इति संपूज्य । ॐ सूर्याय ग्रहाधिपतये पद्महस्ताय अश्वगृष्टिसमाधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः । सूर्यः प्रीयतां सूर्यः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् ॥ ५ ॥ ततः ऐशान्यप्राच्यांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः षष्ठस्तंभे गणपते इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत ।

For Private And Personal Use Only

ॐ सिद्धयै नमः । ॐ बुद्धयै नमः । ॐ विघ्नहारिण्यै नमः । ॐ जयायै नमः । इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत् । गणानां त्वेति गृत्समद ऋषिः। गायत्री छंदः । गणपतिर्देवता । पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ गणपतये नमः। इति संपूज्य ॐ गणपतये अंकुशहस्ताय चतुर्दशविद्याप्रदायकाय विघ्नहराय मूषकसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षत पुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः । गणपतिः प्रीयतां गणपतिः सुप्रीतो वरदो भवतु ॥ ६ ॥ ततः पूर्वाग्नेयांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः सप्तमस्तंभे धर्मराज इहागच्छप्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः संपूजयेत । ॐ धर्मराज्यै नमः । ॐ प्राक्संध्यायै नमः । ॐ अंजनायै नमः ॐ क्रूरायै नमः । इति संपूज्य । स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत । ततः यमाय त्वेति प्रजापतिर्ऋषिः । गायत्री छंदः । यमो देवता पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ यमाय नमः । इति संपूज्य ॐ धर्मराजाय प्रेताधिपतये दंडहस्ताय महिषस्कंधसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चन्दनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः धर्मराजः प्रीयतां धर्मराजः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् ॥ ७ ॥ ततः आग्नेयकोणस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः अष्टमस्तंभे नागराज इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत । ॐ मध्यमसंध्यायै नमः । ॐ पद्मिन्यै नमः । ॐ महापद्मिन्यै नमः । ॐ अंगनायै नमः । इति संपूज्य।स्तंभशिरसि ॐ नागमात्रे नमः इति पूजयेत् । ततः नमोस्तु सर्पेभ्य इति प्रजापतिर्ऋषिः । अनुष्टुप्छन्दः। नागराजो देवता । पूजने विनियोगः। इति जलं क्षिप्त्वा ॐ नागराजेभ्यो नमः । इति संपूज्य ॐ नागाधिपतये नागकन्यासमन्विताय धरापृष्ठिसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नागराजः प्रीयतां नागराजः सुप्रीतो वरदो भवतु ॥ ८ ॥ ततः आग्नेययाम्यांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः नवमस्तंभे स्कंद इहागच्छ प्रतिष्ठितो भव । इत्यावाह्य तत्राधिदेवताः पूजयेत् । ॐ स्कंदप्रियायै नमः । ॐ पाश्चिमसन्ध्यायै नमः । इति संपूज्य स्तंभ शिरसि ॐ नागमात्रे नमः । इति पूजयेत् । ततः यदक्रंदेति भार्गव ऋषिः त्रिष्टुप्छन्दः । स्कन्दो देवता पूजने विनियोगः। इति जलं क्षिप्त्वा ॐ स्कंदाय नमः । इति संपूज्य ॐ स्कंदाय सेनाधिपतये शक्तिहस्ताय मयूरसेनासमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पदध्योदनमाषभक्तबलिर्नमः। स्कन्दः प्रीयतां स्कंदः सुप्रीतो वरदो भवतु । इति बलिं दद्यात्॥ ९ ॥ ततो याम्यनैर्ऋत्यांतरालस्तम्भसमीपे गत्वा ॐ भूर्भुवः स्वः दशमस्तंभे वायो इहागच्छ प्रतिष्ठितो भव । इत्यावाह्य तत्राधिदेवताः पूजयेत् । ॐ वायुप्रियायै वायव्यै नमः । ॐ कौमार्यै नमः । इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत् । ततः वायोयेन इति गृत्समद ऋषिः । गायत्रीछन्दः । वायु देवता । पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ वायवे नमः । इति संपूज्य ॐ वायवे प्राणाधिपतये ध्वजहस्ताय मृगपृष्ठिसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनमाषभक्तबलिर्नमः । वायुः प्रीयतां वायुः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् ॥ १० ॥ ततो नैर्ऋत्यकोणस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः एकादशस्तंभे सोम इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत् । ॐ सोमप्रियायै सौम्यै नमः ॐ अमृतकलायै नमः। ॐ विजयायै नमः। इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत् । ततः वयःसोमेति बंधुर्ऋषिः । गायत्री छन्दः । सोमो देवता पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ सोमाय नमः इति संपूज्य ॐ सोमाय नक्षत्राधिपतये गदाहस्ताय मृगवाहनाय सांगाय साभरणाय सशक्तिकाय एष चन्दनाक्षतपुष्पधूपदीपदध्योदन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मापभक्तबलिर्नमः । सोमः प्रीयतां सोमः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् ॥ ११ ॥ ततो निर्ऋतिवरुणांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः द्वादशस्तंभे वरुण इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत । ॐ वरुणप्रियायै वारुण्यै नमः । ॐ बृहस्पत्यै नमः । इति संपूज्य स्तंभशिरसि । ॐ नागमात्रे नमः । इति पूजयेत् । ततः तत्वायामीति शुनःशेप ऋषिः । त्रिष्टुप्छन्दः । वरुणो देवता । पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ वरुणाय नमः । इति संपूज्य ॐ वरुणाय जलाधिपतये पाशहस्ताय मकरवाहनसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चन्दनाक्षतपुष्पधूपदीपदध्योदनमापभक्तबलिर्नमः । वरुणः प्रीयतां वरुणः सुप्रीतो वरदो भवतु । इति बलिं दद्यात ॥ १२ ॥ ततः पश्चिमवायव्यांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः त्रयोदशस्तंभे वसव इहागच्छत प्रतिष्ठिता भवत इत्यावाह्य तत्राधिदेवताः पूजयेत । ॐ भिध्यमुतायै नमः । वितताये नमः । विभूत्यै नमः । इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत् । ततो निवेशन इत्यग्निर्ऋषिः । त्रिष्टुप्छंदः वसवो देवताः पूजने विनियोगः । इति जलं क्षिप्त्वा ॐ वसुभ्यो नमः । इति संपूज्य ॐ वसुभ्यः उत्कृष्टपराक्रमेभ्यः अष्टसिद्ध्यधिपतिभ्यः शरहस्तेभ्यः सांगेभ्यः साभरणेभ्यः सशक्तिभ्यः एष चंदनाक्षतपुष्पधूपदीपदध्योदनयुक्तमाषभक्तबलिर्नमः । वसवः प्रीयंतां वसवः सुप्रीता वरदा भवंतु । इति बलिं दद्यात ॥ १३ ॥ ततो वायुकोणस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः चतुर्दशस्तंभे बलदेव इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत । ॐ नाभ्रियायै नमः । ॐ अदित्यै नमः । ॐ लधिम्न्यै नमः । ॐ सिनीवाल्यै नमः । इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः । इति पूजयेत् । ततः बण्महानिति जमदग्निर्ऋषिः । बृहती छंदः । बलदेवो देवता । पूजने विनियोगः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति जलं क्षिप्त्वा ॐ बलदेवाय नमः। इति संपूज्य ॐ बलदेवाय ऐश्वर्याधिपतये लांगलहस्ताय रत्नांकितरथयुक्ताश्वसमाधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनसहितमाषभक्तबलिर्नमः। बलदेवः प्रीयतां बलदेवः सुप्रीतो वरदो भवतु। इति बलिं दद्यात् ॥ १४ ॥ ततः वायव्योदीच्यांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः पंचदशस्तंभे बृहस्पते इहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत्। ॐ पौर्णमास्यै नमः। ॐ सावित्र्यै नमः। इति संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः इति पूजयेत्। ततः बृहस्पत इति गृत्समद ऋषिः। त्रिष्टुप् छंदः। बृहस्पतिर्देवता पूजने विनियोगः। इति जलं क्षिप्त्वा ॐ बृहस्पतये नमः इति संपूज्य ॐ बृहस्पतये सर्वदेवेंद्राधिपतये पुस्तकस्रुक्स्रुवहस्ताय हंसपृष्ठिसमधिरूढाय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनसहितमाषभक्तबलिर्नमः बृहस्पतिः प्रीयतां बृहस्पतिः सुप्रीतो वरदो भवतु। इति बलिं दद्यात् ॥ १५ ॥ अथोदीच्यैशान्यांतरालस्तंभसमीपे गत्वा ॐ भूर्भुवः स्वः षोडशस्तंभे विश्वकर्मन्निहागच्छ प्रतिष्ठितो भव इत्यावाह्य तत्राधिदेवताः पूजयेत्। ॐ गायत्र्यै नमः ॐ वास्तव्यै नमः। इति ॐ संपूज्य स्तंभशिरसि ॐ नागमात्रे नमः। इति पूजयेत्। ततः विश्वकर्मन्हविषेति विश्वकर्मा भौवन ऋषिः। त्रिष्टुप् छंदः। विश्वकर्मा देवता पूजने विनियोगः। इति जलं क्षिप्त्वा ॐ विश्वकर्मणे नमः। इति संपूज्य ॐ विश्वकर्मणे विश्वाधिपतये दंडहस्ताय सांगाय साभरणाय सशक्तिकाय एष चंदनाक्षतपुष्पधूपदीपदध्योदनसहितमाषभक्तबलिर्नमः विश्वकर्मा प्रीयतां विश्वकर्मा सुप्रीतो वरदो भवतु इति बलिं दद्यात् ॥ १६ ॥ इति षोडशस्तंभप्रतिष्ठाप्रयोगः ॥ अथ तोरणध्वजापताकाप्रतिष्ठापूजनम् ॥ पूर्वद्वारे गत्वा "सुदृढं तोरणं पूर्वे न्यग्रोधं कांचनप्रभम् ॥ रक्षार्थं चैव बध्नीयाद्देवपूजाख्यकर्मणि॥" इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यग्रोधपत्रतोरणं बद्ध्वा ॐ भूर्भुवः स्वः पूर्वद्वारे सुहृत्प्रीतये इमं न्यग्रोधतोरणं चंदनाक्षतपुष्पधूपदीपघृताक्तक्षीरान्नयुक्तमाषभक्तबलिर्नमः सुहृदः प्रीयतां सुहृदः सुप्रीतो वरदो भवतु। इति बलिं दत्वा तत्रैव दक्षिणवामशाखयोर्ध्वजापताका उच्छ्रयामि स्थपयामि नमः। इति ध्वजापताकां संस्थाप्य तत्र देशे "धनुःप्रभापताकां च सिंदूराहजभं ध्वजम् ॥स्थापयामि महेंद्राय शक्तियुक्ताय वज्रिणे" ॐ भूर्भुवः स्वः ध्वजपताकयोर्महेंद्र इहागच्छ प्रतिष्ठितो भव इति महेंद्रमावाह्य ॐ भूर्भुवः स्वः महेंद्राय ऐरावतसहिताय इमं गंधाद्युपचारसहितक्षीरान्नयुक्तमाषभक्तबलिर्नमः। महेंद्रः प्रीयतां महेंद्रः सुप्रीतो वरदो भवतु। इति बलिं दत्वा तत्राधिदेवताः पूजयेत्। तद्यथा। पूर्वद्वारपार्श्वे ॐ कादंबरि गजारूढे वज्रहस्ते एह्येह्यागच्छागच्छ गंधाक्षतपुष्पधूपदीपसहितमिमं क्षीरान्नबलिं गृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात्। तत्र द्वारदक्षिणांसे "दंडं कमंडलुं पद्मादक्षसूत्रमथाभयाम् ॥ बिभ्रतीं कनकच्छायां ब्राह्मीं बालां च कृष्णभासम्॥" इति ब्राह्मीं ध्यात्वा ह्रीं ऐं ब्राह्मि एह्येह्यागच्छागच्छ इमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात्। तत्र द्वारवामांसे ह्रीं ऐं महेश्वरि एह्येह्यागच्छागच्छ गंधाक्षतपुष्पधूपदीपसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात्। तत्र द्वारे दक्षिणवामशाखयोः कलशद्वयं संस्थाप्य रत्नप्रक्षेपं कृत्वा द्वारस्थितकलशद्वये ॐ गंगायै नमः। ॐ यमुनायै नमः। इति संपूज्य। पूर्वद्वारे शांतिसूक्तजपार्थं सर्वविघ्ननिवारणार्थं च त्वामहं वृणे। इति यज्ञसूत्रं बद्ध्वा भो कलश एह्येहि गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्ण गृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्। तत्रैव पुनर्दक्षिणांसे "आवाहयाम्यहं धात्रे निधीनां पतये प्रभो। इहागत्य बलिं गृह्ण यज्ञविघ्नं निवारय॥" इत्यावाह्य ॐ भूर्भुवः स्वः धात्रे एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाहा । इति बलिं दद्यात । ततोत्तरांसे "विकृतिः प्रकृतिर्यस्य विधाता विश्वकृत्प्रभो ॥ स मे भवतु सुप्रीतो यज्ञविघ्नं निवारय ॥" इति ध्यात्वा ॐ भूर्भुवः स्वः विधात्रे एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् । तत्र पुनर्द्वारस्य दक्षिणभागे "वेदीमध्ये ललितकमले कर्णिकायांतरस्थः सप्ताश्वोर्कोऽरुणरुचिरवपुः सतरज्जुर्द्विबाहुः॥ गोत्रेमेऽस्मिन्बहुविधगुणः काश्यपाख्ये प्रसूतः कालिंगाख्याविषयजानितः प्राङ्मुखः पद्महस्तः॥" इति सूर्यं ध्यात्वा ॐ भूर्भुवः स्वः सूर्य अधिदेवताप्रत्यधिदेवतासहित एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात । तत्र द्वारस्य वामभागे "प्राच्यां भृगुभोजकटे प्रजातः स भार्गवः पूर्वमुखः सिताभः ॥ स पंचकोणे स रथाधिरूढो दंडाक्षमालावरदांकपत्रः॥" इति शुक्रं ध्यात्वा ॐ भूर्भुवः स्वः शुक्र अधिप्रत्यधिदेवतासहित एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् । तत्र द्वारतः दक्षिणभागे ।"पानपात्रं च खड्गं च अक्षमालां कमंडलुम्॥ त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरम्॥" इति दिगंबरं ध्यात्वा ॐ भूर्भुवः स्वः दिगंबर एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् । द्वारतः उत्तरभागे ॐ "ब्रह्माणीशक्तिसंयुक्तं हंसवाहनभूषितम् । श्वेतवर्णमहं वंदे असितांगं च भैरवम्॥" इत्यसितांगभैरवं ध्यात्वा ॐ भूर्भुवः स्वः असितांगभैरव एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दत्वा चिच्छक्त्यादिदेवताः पूजयेत् । तद्यथा । भैरवसमीपे ॐ चिच्छक्त्यै नमः । ॐ मायाशक्त्यै नमः । द्वारपार्श्वे ॐ शंखनिधये नमः । द्वारपुरतः ॐ पद्मनिधये नमः । ऊर्ध्वे ॐ श्रियै नमः । अधो देहल्याम् ॐ वास्तुपुरुषाय नमः । इति संपूज्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रणमेत् । इति पूर्वद्वारे तोरणध्वजपताकादिप्रतिष्ठापूजनम् ॥ १ ॥ आग्नेयकोणे गत्वा प्राणानायम्य ॐ उं उल्के अजारूढे शक्तिहस्ते एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्ण गृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दत्त्वा "पताकामग्नये रक्तां ध्वजं चैवाग्निसन्निभम्॥स्वाहायुक्ताय देवाय स्थापयामि हविर्भुजे॥"अग्निप्रीत्यर्थं रक्तध्वजपताकां च स्थापयामि । इति पताकां रक्तं ध्वजं च पंचहस्तदंडे उच्छ्रयेत तत्रैव ॐ अग्नये नमः इत्यग्निं संपूज्य ॐ भूर्भुवः स्वः अग्नये पुंडरीकदिग्गजसहिताय अयं गंधाद्युपचारसहितः क्षीरान्नयुक्तमाषभक्तबलिर्नमः। अग्निः प्रीयतां अग्निः सुप्रीतो वरदो भवतु इति बलिं दत्त्वा तत्राधिदेवताः पूजयेत् । तद्यथा । प्राङ्मुखचतुरस्रपीठे "अनादिपुरुषो रक्तः सर्वदेवमयो हि यः । धूमकेतू रणाध्यक्षस्तस्मै नित्यं नमोनमः ॥" इति सोमं ध्यात्वा ॐ भूर्भुवः स्वः प्राङ्मुखचतुरस्रपीठे यमुनातीरोद्भव आत्रेयगोत्र सोम अधिदेवताप्रत्यधिदेवतासहित एह्येह्यागच्छागच्छ गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्ण गृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात । तत्रैव "ॐ परश्वायुधधर्तारं खड्गपात्रधरं तथा ॥ त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरम् ॥" इति दिगंबरं ध्यात्वा कुमार दिगंबर एह्येह्यागच्छागच्छ गंधाद्युपचारसहित एप बलिर्नमः कुमारदिगंबरः प्रीयताम् । कुमार दिगंबरः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् । ततः "माहेशी शक्तिसंयुक्तं वृषवाहनभूषितम् शुद्धस्फटिकसंकाशं वंदेहं रुरुभैरवम॥" इति रुरुभैरवं ध्यात्वा ॐ रुरुभैरवाय अयं गंधाद्युपचारसहितक्षीरान्नयुक्तमाषभक्तबलिर्नमः। भैरवः प्रीयतां भैरवः सुप्रीतो वरदो भवतु । इत्यग्निकोणप्रतिष्ठापूजनम् ॥ २ ॥ ततः दक्षिणद्वारे गत्वा "औदुंबरं च विकटं याम्ये तोरणमुत्तमम् । रक्षार्थं चैव बध्नामि देवपूजाख्यकर्मणि॥"इति औदुंबरपत्रतोरणं बद्धा ॐ भूर्भुवः स्वः दक्षिणद्वारे विकटप्रीतये अयमौदुंबरतोरणचंदनाक्षतपुष्पधूपदी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पघृताक्तक्षीरान्नयुक्तमाषभक्तबलिर्नमः। विकटः प्रीयतां सुप्रीतो वरदो भवतु। इति बलिं दत्त्वा तत्रैव दक्षिणवामशाखयोः ध्वजपताके उच्छ्रयामि स्थापयामि नमः। इति ध्वजपताकाः संस्थाप्य तत्र देशे "धूम्रवर्णपताकां च कृष्णवर्णध्वजं तथा॥ यमाय स्थापयामीति निहंत्रे कर्मसाक्षिणे॥" ध्वजपताकयोर्यम इहागच्छ प्रतिष्ठितो भव इति यममावाह्य ॐ भूर्भुव :स्वः यमाय वामनदिग्गजसहिताय अयं गंधाद्युपचारसहितक्षीरान्नयुक्तमाषभक्तबलिर्नमः। यमः प्रीयतांयमः सुप्रीतो वरदो भवतु इति बलिं दत्त्वा तत्राधिदेवताः पूजयेत्। तद्यथा दक्षिणद्वारपार्श्वे ॐ कंकरालि महिषारूढे दंडहस्ते एह्येहि इमं गंधाक्षतपुष्पधूपदीपसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात्। तत्र द्वारदक्षिणांसे ॐ अंकुशं दंडखट्वांगौ पाशं च दधतीं करैः॥ ध्येयां बंधूकसंकाशां कौमारीं कामदायिनीम्॥ इति कौमारीं ध्यात्वा ॐ ह्रीं क्लीं कौमारि एह्येह्यागच्छागच्छ गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्। तत्र द्वारवामांसे ॐ ह्रीं श्रीं वैष्णवि एह्येह्यागच्छागच्छ गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात् तत्र द्वारे दक्षिणवामशाखयोः कलशद्वयं संस्थाप्य रत्नप्रक्षेपं कृत्वा द्वारस्थितकलशद्वये ॐ गोदायै नमः। ॐ कृष्णायै नमः। इति संपूज्य। दक्षिणद्वारे शांतिसूक्तजपार्थं सर्वविघ्ननिवारणार्थं त्वामहं वृणे। इति यज्ञसूत्रं बद्ध्वा भोकलश एह्येहि गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात्। तत्रैव पुनर्दक्षिणांसे "आवाहयाम्यहं धात्रे निधीनां पतये प्रभो॥ इहागत्य गृह्ण बलिं यज्ञविघ्नं निवारय॥" इत्यावाह्य ॐ भूर्भुवः स्वः धात्रे एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्। तत उत्तरांसे "विकृतिः प्रकृतिर्यस्य विधाता विश्वकृत्प्रभो॥ स मे भवतु सुप्रीतो यज्ञविघ्नं निवारय॥" इति ध्यात्वा ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूर्भुवः स्वः विधात्रे एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् तत्र द्वारस्य पुनर्दक्षिणभागे वेदीमध्ये त्रिकोणे त्र्यंगुलमंडले "याम्ये गदाशक्तिगदांश्च शूरो वरप्रदो याम्यमुखोतिरक्तः ॥ कुजोऽस्त्यवंतीविषये त्रिकोणे तस्मिन्भरद्वाजकुले प्रसूतः॥" इति दक्षिणामुखं कुजं ध्यात्वा ॐ भूर्भुवः स्वः अवंतीसमुद्भव भारद्वाजगोत्र दक्षिणमुख भौम अधिदेवताप्रत्यधिदेवतासहित एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् ततः द्वारतो दक्षिणभागे " धनुर्बाणधरं देवं खड्गपात्रधरं तथा ॥ त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरम् ॥"इति दिगंबरम् ध्यात्वा ॐ भूर्भुवः स्वः एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । द्वारत उत्तरभागे"ॐ कौमारीशक्तिसंयुक्तं शिखिवाहनभूषितम्॥ गौरवर्णधरं देवं वंदे श्रीचंडभैरवम्॥"इति चण्डभैरवं ध्यात्वा ॐ भूर्भुवःस्वः चंडभैरव एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दत्त्वा तत्रैव चिच्छक्त्यादि देवताः पूजयेत् तद्यथा। भैरवसमीपे ॐ चिच्छक्त्यै नमः।ॐ मायाशक्त्येनमः। द्वारपार्श्वे ॐ शंखनिधये नमः। द्वारपुरतः ॐ पद्मनिधये नमः।ऊर्ध्वे ॐ श्रियै नमः। अधः देहल्याम् ॐ वास्तुपुरुषाय नमः। इति संपूज्य प्रणमेत् । इति दक्षिणद्वारप्रतिष्ठापूजनम्॥ ३॥ततनैर्ऋतीं दिशमागत्य प्राणानायम्य ॐ रक्ताक्षि प्रेतारूढे खड्गहस्ते एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दत्त्वा "पताकां निर्ऋतिशाय कृष्णनीलमयं ध्वजम्॥ स्थापयामि सदा रक्षोगणाधीशाय चैव हि ॥" निर्ऋतिप्रीत्यर्थं कृष्णनीलध्वजपताकाः स्थापयामि। इति कृष्णं ध्वजं नीलपताकां च पंचहस्तदंडे उच्छ्रयेत् तत्रैव ॐ निर्ऋतये नमः । इति निर्ऋतिं संपूज्य ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भभुवःस्वः निर्ऋतये कुमुदादिग्गजसहिताय अयं गंधाद्युपचारसहितः क्षीरान्नयुक्तमाषभक्तबलिर्नमः।निर्ऋतिः प्रीयतां निर्ऋतिः सुप्रीतो वरदो भवतु। इति बलिं दत्त्वा तत्राधिदेवताः पूजयेत्। तद्यथा। द्वारदक्षिणतो वेदीमध्ये शूर्पाकारमंडले "पैठीनसो बर्बरदेशजातः शूर्पासनः सिंहगमः सुधूम्रः॥ याम्याननो रक्षगणस्तु मह्यं वरप्रदः शूलमचर्मखड्गः॥" इति राहुं ध्यात्वा ॐ भूर्भुवः स्वः याम्यमुख राठिनापुरोद्भव पैठीनसगोत्र राहो अधिदेवताप्रत्यधिदेवतासहित सूर्पाकारपीठे एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्। तत्रैव "शंखचक्रधरं देवं पानपात्रं गदाधरम्॥त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरम्॥"इति दिगंबरं ध्यात्वा कुमार दिगंबर एह्येह्यागच्छागच्छ गंधाद्युपचारसहित एष बलिर्नमः। कुमारदिगंबरः प्रीयतां कुमारदिगंबरः सुप्रीतो वरदो भवतु। इति बलिं दद्यात्। तत्रैव "वैष्णवीशक्तिसंयुक्तं गरुडासनभूषितम्॥ नीलवर्णधरं देवं वंदे श्रीक्रोधभैरवम्॥" इति क्रोधभैरवं ध्यात्वा ॐ क्रोधभैरव अयं गंधाद्युपचारसहितक्षीरान्नयुक्तमाषभक्तबलिर्नमः। भैरवः प्रीयतां भैरवः सुप्रीतो वरदो भवतु। इति बलिं दद्यात्। इति निर्ऋतिकोणप्रतिष्ठापूजनम्॥ ४॥ ततः पश्चिमद्वारे गत्वा "अश्वत्थं पश्चिमे भीमे तोरणं रत्नसन्निभम्॥ रक्षार्थं चैव बध्नामि देवपूजाख्यकर्मणि॥" इत्यश्वत्थतोरणं बद्ध्वा ॐ भूर्भुवः स्वः पश्चिमद्वारे भीमप्रीतये अयमश्वत्थतोरणचन्दनाक्षतपुष्पधूपदीपघृताक्तक्षीरान्नयुक्तमाषभक्तबलिर्नमः। भीमः प्रीयतां भीमः सुप्रीतो वरदो भवतु। इति बलिं दद्यात्। तत्रैव दक्षिणवामशाखयोः ध्वजपताका उच्छ्रयामि स्थापयामि नमः। इति ध्वजपताकाः संस्थाप्य तत्र देशे "श्वेतवर्णपताकां च ध्वजं पीतमयं तथा॥वरुणाय जलेशाय स्थापयामि शुभाय मे॥"ॐ भूर्भुवः स्वः ध्वजपताकयोर्वरुण इहागच्छ प्रतिष्ठितो भव इति वरुणमावाह्य ॐ भूर्भुवः स्वः अयं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गंधाद्युपचारक्षीरान्नसहितमाषभक्तबलिर्नमः। वरुण : प्रीयतां वरुणः सुप्रीतो वरदो भवतु।इति बलिं दत्वा तत्राधिदेवताः पूजयेत् पश्चिमद्वारे वामांसे ॐ कौबेरि श्वेताश्वरूढे पाशहस्ते एह्येह्यागच्छागच्छ गंधाक्षतपुष्पधूपदीपसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्।तत्रद्वारदक्षिणांसे"ॐ मुसलं करवालं च खेटकं दधती हलम्॥ करैश्चतुर्भिर्वाराही ध्येया कालघनच्छविः॥"इति वाराहीं ध्यात्वा ह्रीं हूँ वाराहि एह्येह्यागच्छागच्छ इमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्। तत्र द्वारदेशे दक्षिणवामपार्श्वयोः कलशद्वयं संस्थाप्य रत्नप्रक्षेपं कृत्वा द्वारस्थितकलशद्वये ॐ रेवायै नमः। ॐ तापत्यै नमः।इति संपूज्य पश्चिमद्वारे शांतिसूक्तजपार्थं सर्वविघ्ननिवारणार्थं त्वामहं वृणे।इति यज्ञसूत्रं बध्वा भोकलश एह्येहि गंधाद्युपचारसहितं इमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा।इति बलिं दद्यात्। तत्रैव पुनर्दक्षिणांसे"सामवेदस्तु पिंगाक्षो जाग्रतः शक्रदैवतः॥भारद्वाजस्तु विप्रेंद्र ऋत्विक्त्वं मे मखे भव॥" इति ध्यात्वा ॐ भूर्भुवःस्वः शक्र एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा।इति बलिं दद्यात्।तत उत्तरांसे"वरुणो धवलो विष्णुः पुरुषो निर्मलाननः।पाशहस्तो महाभीमस्तस्मै नित्यं नमोनमः॥" इति वरुण ध्यात्वा ॐभूर्भुवः स्वःवरुणएह्येह्यागच्छागच्छइमं गंधाद्युपचारसहित क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् । तत्रद्वारस्य पुनर्दक्षिणभागे वेदीमध्ये चापाकारमंडले "चापासनो गृध्रमयः सुनीलःप्रत्यङ्मुखःकाश्यपजः प्रतीच्याम्॥सशूलचापेषुवरप्रदश्च सौराष्ट्रदेशप्रभवश्च सौरिः॥"इति शनिश्चरं ध्यात्वा ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्रशनैश्चर अधिदेवताप्रत्यधिदेवतासहित एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा।इति बलिं दद्यात।तत्र द्वारतः दक्षिणभागे"खट्वांगं मुशलं चैव करवालं च पाशकम्॥त्रिनेत्रं वरदं भीमं कुमारं च दिगंबरम्॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति दिगंबरं ध्यात्वा ॐ भूर्भुवः स्वः कुमार दिगंबरं एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात्। उत्तरभागे " हेमवर्णधरं देवं तथा महिषवाहनम्॥वाराहीशक्तिसंयुक्तं वंदे उन्मत्तभैरवम् ॥" इति उन्मत्तभैरवं ध्यात्वा ॐ भूर्भुवः स्वः उन्मत्तभैरव एह्येह्यागच्छागच्छ इमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दत्वा चिच्छ त्यादिदे वताः पूजयेत् । तद्यथा । भैरवसमीपे ॐ चिच्छक्त्यै नमः। ॐ मायाशक्त्यै नमः । द्वारपार्श्वे ॐ शंखनिधये नमः। द्वारपुरतः ॐ पद्मनिधये नमः। ऊर्ध्वं ॐ श्रियै नमः। अधो देहल्याम् ॐ वास्तुपुरुषाय नमः। इति संपूज्य प्रणमेत् । इति पश्चिमद्वारप्रतिष्ठापूजनम्॥

॥५॥ ततः वायव्यकोणे गत्वा प्राणानायम्य ॐ हं हरितमृगवाहिनि अंकुशहस्ते एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दत्वा "पताकां वायवे श्वेतां ध्वजं पीतं भयं तथा ॥ स्थापयाम्यनु च क्षुद्रप्राणादायं सदैव हि॥" वायुप्रीत्यर्थं श्वेतपताकां पीतध्वजं च स्थापयामि।इति पताकां श्वेतं पीतं ध्वजं च पंचहस्तदंडे उच्छ्रयेत्।तत्रैव:"वायुमाकाशगं चैव पवनं वेगमद्गतिम्॥आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यताम् ॥" इति वायुमावाह्य ॐ वायवे नमः । इति वायुं संपूज्य । ॐ भूर्भुवः स्वः वायवे अयं गंधाद्युपचारसघृतक्षीरान्नसहितमाषभक्तबलिर्नमः । वायुः प्रीयतां वायुः सुप्रीतो वरदो भवतु । इति बलिं दत्वा तत्राधि देवताः पूजयेत् । तद्यथा । वायुमुखध्वजाकारमंडले " ध्वजासनो जैमिनिगोत्रजातोंतर्वेद्यधीशोऽथ विचित्रवर्णः ॥ याम्यैर्वृतो वायुदिशी शखड्गचर्मा सुराचामशतोह्यनेकः ॥ " इति केतुं ध्यात्वा ॐ भूर्भुवः स्वः अंतर्वेदिसमुद्भव जैमिनिसगोत्र केतो अधिदेवताप्रत्यधि देवतासहित एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितंघृतक्षीरान्नमाषभक्तबलिर्नमः। केतुः प्रीयतां केतुः सुप्रीतो वरदो भवतु । इति बलिं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दद्यात् । तत्रैव ॐ कुमार दिगंबर एह्येह्यागच्छागच्छ गंधाद्युपचारसहित एषमाषभक्तबलिर्नमः कुमारदिगंबरः प्रीयतां कुमारदिगंबरः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् । ततो कपालभैरव एह्येह्यागच्छागच्छ गंधाद्युपचारसहित एष माषभक्तबलिर्नमः कपालभैरवः प्रीयतां कपालभैरवः सुप्रीतो वरदो भवतु । इति बलिं दद्यात् । इति वायुकोणे प्रतिष्ठापूजनम् ॥ ६ ॥ ततः उत्तरद्वारसमीपं गत्वा आचम्य प्राणानायम्य "सुप्रभं तोरणं प्लक्षमुत्तरे च शशिप्रभम् ॥ रक्षार्थं चैव बध्नामि देवपूजाख्यकर्मणि॥" इति प्लक्षपत्रतोरणं बध्वा ॐ भूर्भुवः स्वः उत्तरद्वारे सुप्रभतोरणाय सुप्रभप्रीतये अयं प्लक्षतोरणचंदनाक्षतपुष्पधूपदीपघृताक्तक्षीरान्नयुक्तमाष भक्तबलिर्नमः। सुप्रभः प्रीयतां सुप्रभः सुप्रीतो वरदो भवतु। इति बलिं दत्त्वा दक्षिणवामशाखयोः ध्वजपताकामुच्छ्रयामि स्थापयामि नमः इति ध्वजपताकां संस्थाप्य तत्र देशे "श्वेतवर्णपताकां च पद्माभवध्वजं तथा ॥ सोमाय स्थापयाम्येव धनधान्यसमृद्धये॥" एवं कुबेरदी त्यर्थं हरितध्वजं हरितपताकां च संस्थाप्य कुबेर इहागच्छ इह तिष्ठ इति कुबेरमावाह्य ॐ भूर्भुवः स्वः कुबेराय सार्वभौमदिग्गजसहिताय अयं गंधाद्युपचारसहितक्षीरान्नमाषभक्तबलिर्नमः। कुबेरः प्रीयतां कुबेरः सुप्रीतो वरदो भवतु । इति बलिं दत्त्वा तत्राधिदेवताः पूजयेत् । तद्यथा।उत्तरद्वारपार्श्वे ॐ यं यक्षिणि सिंहवाहिनि गदाहस्ते एह्येह्यागच्छागच्छ गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । तत्र द्वारदक्षिणांसे " अक्षस्रजं बीजपूरं कपालं पंकजं करैः ॥ वहंतीं हेमसंकाशां महालक्ष्मीं समी समाम् ॥" इति नारसिंहीं ध्यात्वा ॐ ह्रीं क्ष्म्रौं नारसिंहि एह्येह्यागच्छागच्छ गंधाक्षतपुष्पधूपदीपसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । तत्र वामांसे ॐ ह्रीं ख्ये चामुंडे एह्येह्यागच्छागच्छ गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तं कुरुकुरु स्वाहा । इति बलिं दद्यात्। तत्र द्वारदक्षिणवामशाखयोः कलशद्वयं संस्थाप्य रत्नप्रक्षेपं कृत्वा द्वारस्थितकलशद्वये ॐ वाण्यै नमः । ॐ वेण्यै नमः । इति संपूज्य "कर्मनिष्ठौ तपोयुक्तौ ब्राह्मणौ वेदपारगौ॥ सरस्वतीसूक्तपाठार्थं द्वारे भवत ऋत्विजौ॥" अथर्ववेदऋत्विजौ उत्तरद्वारे शांतिसूक्तजपार्थत्वेनाऽहं वृणे। इति यज्ञसूत्रं बद्ध्वा भो कलश एह्येहि गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरु कुरु स्वाहा इति बलिं दद्यात्। तत्रैव पुनर्दक्षिणांसे "बृहन्नेत्रोथर्ववेदोनुष्टुभो रुद्रदैवतः ॥ वैशंपायन विप्रेन्द्र ऋत्विक् त्वं मे मखे भव॥" ॐ भूर्भुवः स्वः वैशंपायन एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् । तत उत्तरांसे "विकृतिः प्रकृतिर्यस्य विधाता विश्वकृत्प्रभो ॥ स मे भवतु सुप्रीतो यज्ञविघ्नं निवारय॥" इति ध्यात्वा ॐ भूर्भुवः स्वः विधात्रे एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । तत्र द्वारस्य पुनर्दक्षिणांसे वेदीमध्ये चतुरस्रपीठे "सौम्येतिदीर्घे चतुरस्रपीठे रथेगिराः सौम्यमुखः सुपीतः ॥ दंडाक्षमालांबुजपात्रहस्तः सिंध्वाख्यदेशो वरदः सुजीवः॥" इति बृहस्पतिं ध्यात्वा ॐ भूर्भुवः स्वः सिंधुदेशोद्भव अंगिरसगोत्र बृहस्पते अधिदेवताप्रत्यधिदेवतासहित एह्येह्यागच्छागच्छ गंधाद्युपचार सहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । तत्र द्वारतः दक्षिणभागे "शूलायुधं चंडमत्तं शक्तिं चैव च पात्रकम्॥ त्रिनेत्रं वरदं शांतं कुमारं च दिगंबरम्॥" इति शांतकुमारदिगंबरं ध्यात्वा ॐ भूर्भुवः स्वःशांतकुमारदिगंबर एह्येह्यागच्छागच्छ गंधाक्षतपुष्पधूपदीपसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । द्वारत उत्तरभागे "चामुंडाशक्तिसंयुक्तं प्रेतवाहनभूषितम् ॥ रक्तवर्णधरं देवं वंदे भीषणभैरवम् ॥ इति भैरवं ध्यात्वा ॐ भूर्भुवः स्वः भीषणभैरव एह्येह्याग

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छागच्छ गंधाद्युपचारसहितमाषभक्तबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दत्त्वा चिच्छक्त्यादिदेवताः पूजयेत्। तद्यथा। भैरवसमीपे ॐ चिच्छक्त्यै नमः। ॐ मायाशक्त्यै नमः। द्वारपार्श्वे ॐ शंखनिधये नमः। द्वारपरतः ॐ पद्मनिधये नमः। ऊर्ध्वे ॐ द्वारश्रियै नमः। अधो देहल्याम् ॥ ॐ वास्तुपुरुषाय नमः। इति संपूज्य प्रणमेत्। इत्युत्तरद्वारप्रतिष्ठापूजनम् ॥७॥ अथैशान्यकोणे गत्वा प्राणानायम्य कंकालि वृषभारूढे शूलहस्ते एह्येह्यागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात् "ईशानाय ध्वजं श्वेतं पताकां चैव वै तथा ॥स्थापयामि महेशाय वृषारूढाय शूलिने॥" ईशानप्रीत्यर्थं श्वेतपताकां च स्थापयामि इति श्वेतपताकां ध्वजं च पंचहस्तदंडे उच्छ्रयेत् तत्र ईशानाय नमः इति संपूज्य ॐ भूर्भुवःस्वःईशानाय वृषारूढाय अयं गंधाद्युपचारसहितक्षीरान्नमाषभक्तबलिर्नमः। ईशानः प्रीयतां ईशानः सुप्रीतो वरदो भवतु। इति बलिं दत्त्वा तत्राधिदेवताः पूजयेत्। तद्यथा उदङ्मुख शरमंडले "उदङ्मुखो मागधजो हरिस्थश्चात्रेयगोत्रः शरमंडलस्थः। सखड्गचर्मोपिगदाधरो ज्ञः स्वीशानभागे वरदः सुप्रीतः॥" इति बुधं ध्यात्वा ॐ भूर्भुवः स्वः मागधदेशोद्भव आत्रेयसगोत्र बुध इहागच्छागच्छ इमं गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् तत्रैव "शूलं डमरुकं चैव शंखचक्रे गदाधरम् ॥ खड्गपात्रं च खट्वांगपाशांकुशधरं तथा ॥" इति ईशानं ध्यात्वा ईशान एह्येह्यागच्छागच्छ गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा इति बलिं दद्यात् तत्रैव दिगंबरं कुमारं च सिंहवाहनभूषितम् ॥दंष्ट्राकरालवदनमष्टैश्वर्यसुखप्रदम्॥" इति दिगंबरकुमारं ध्यात्वा दिगंबरकुमार एह्येह्यागच्छागच्छ गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात्। ततः "धारयंतं मदोन्मत्तं वडवानलभैरवम् ॥ चंडिकाशक्तिसंयुक्तं वंदे संहार

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भैरवम् ॥" इति संहारभैरवं ध्यात्वा ॐ भूर्भुवः स्वः महारभैरव एह्येह्यागच्छागच्छ गंधाद्युपचारसहित एष माषभक्तबलिर्नमः । भैरवः प्रीयताम् भैरवः सुप्रीतो वरदो भवतु।इति ईशानकोणप्रतिष्ठापूजनम् ॥ ८ ॥ ततः ईशानपूर्वयोर्मध्यदेशे गत्वा ईशानपूर्वमध्ये संसर्पराज चक्रहस्त एह्येह्यागच्छागच्छ गंधाद्युपचारसहितमिमं क्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा । इति बलिं दद्यात् । स्थापयाम्यंतरिक्षाय पताकां सार्ववर्णिकाम् ॥ कनकाकाररूपाय निराकाराय च ध्वजम् ॥" ब्रह्मणे सार्ववर्णिकां पताकां कनकरूपं ध्वजं च स्थापयामि । इति सार्ववर्णिकां पताकां कनकरूपं ध्वजं च पंचहस्तदंडे स्थापयेत् । तत्र देशे ॐ ब्रह्मन्निहागच्छागच्छ एष गंधाद्युपचारसहितक्षीरान्न बलिर्नमः।ब्रह्मा प्रीयतां ब्रह्मा सुप्रीतो वरदो भवतु।इति बलिं दद्यात्। इतीशानपूर्वमध्यदेशप्रतिष्ठापूजनम् ॥ ९ ॥ ततः पश्चिमनैर्ऋत्ययोर्मध्ये ग त्वा "भूमे त्वं सर्वलोकानामाधारः षड्रसप्रदे॥ पंचवर्णपताकां च स्थापयामि ध्वजं तथा॥"भूमिप्रीत्यर्थं पंचवर्णपताकां ध्वजं च स्थापयामि । इति पंचवर्णपताकां ध्वजं च पंचवर्णं पंचहस्तदंडे उच्छ्रयेत । तत्रैव विष्णुप्रिये गजहंसवाहने अक्षसूत्रकमंडलुहस्ते एह्येह्यागच्छागच्छ गंधाद्युपचारसहितक्षीरान्नबलिं गृह्णगृह्ण ममेप्सितं कुरुकुरु स्वाहा। इति बलिं दद्यात् । इति पश्चिमनैर्ऋत्यमध्यदेशप्रतिष्ठापूजनम् ॥ १० ॥ ततो मंडपमध्यदेशे गत्वा "आदित्या वसवो रुद्रा वषट्कारः प्रजापतिः ॥ ध्वजं चित्रपताकां च स्थापयामि हि भो सुराः॥" आदित्यादि देवताप्रीत्यर्थं ध्वजं पताकां स्थापयामि । इति ध्वजं चित्रपताकां च सर्वोच्चदंडे स्थापयेत । आदित्यादिदेवताः इहागच्छत अयं गंधाद्युपचारसहितक्षीरान्नबलिर्नमः। आदित्यादिदेवताः प्रीयंताम् आदित्याद्या देवताः सुप्रीता वरदा भवंतु । इति बलिं दत्त्वा प्रार्थयेत् । "यज्ञभागभुजो देवाः सर्वकर्मफलप्रदाः ॥ यज्ञं पातुमिहागत्य नमस्तेभ्यो ममाय वै ॥" इति प्रार्थयेत् । इति डामरतंत्रादितंत्रे देवता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महोत्सवे षोडशस्तंभप्रतिष्ठातोरणध्वजपताकाप्रतिष्ठापूजनम् ॥ ११ ॥ अथाग्निस्थापनप्रयोगः ॥ तत्रादौ कुंडेऽष्टसंस्काराः ॥ कुंडं सव्यं प्रदक्षिणीकृत्य कुंडस्य पश्चिमभागे उपविश्य आचम्य मूलेन प्राणानायम्य मूलेन षडंगं कृत्वा कुंडे स्थंडिले वा अष्टौ संस्कारान् कुर्यात् । तद्यथा । देशकालौ संकीर्त्य मया सह ब्राह्मणैः कृतानां कारितानां चामुकदेवताजपानां संपूर्णतासिद्ध्यर्थं जपदशांशेनोक्तहविर्द्रव्यैर्होममहं करिष्ये। तदंगभूतमादावस्मिन्कृतस्य विध्युक्तमार्गेण परिसमूहनादिसंस्कारान्करिष्ये । इति संकल्प्य । तत आचार्यो मूलमंत्रेण कुंडं वीक्ष्य १ तेनैव कुशत्रयेण संताड्य २ ॐ मूलेन अस्त्रायफडित्यस्त्रमंत्रेण गोमयोदकं संप्रोक्ष्य तेनैव संलिप्य ३ मूलेन इति वर्म्मणा मुष्टिनासिंच्य४ ॐ मूलेन हृदयाय नमः इति हृदयमंत्रेण स्रुवेण कुशमूलेन वा प्रागग्रा उत्तरोत्तरक्रमेण तिस्रो रेखाः कुंडे स्थंडिलपरिमाणाः प्रादेशमात्रा वा कृत्वा तदुपरिगा उदगग्राः प्राक्प्राक्क्रमेण तिस्रो रेखाः कुर्यात् । ततस्तासु प्रागग्रासु क्रमेण ॐ मुकुंदाय नमः। ॐ ईशानाय नमः । ॐ पुरंदराय नमः । इति गंधादिभिः संपूज्य उदगग्रासु ॐ ब्रह्मणे नमः । ॐ वैवस्वताय नमः । ॐ इंदवे नमः । इति पूजयेत् । एवं पंच भूसंस्काराः ५ ततः माया (ह्रीं) इति बीजेन कुंडं गंधादिना संपूज्य इति षष्ठः ६ तत आवाहनादिसप्त मुद्राः प्रदर्शयेदिति सप्तमः ७ अस्त्रेणावगुंठ्य इति कुंडेऽष्ट संस्काराः ततः। कुंडे स्थंडिले वा तन्मध्ये त्रिकोणषट्कोणवृत्त साष्टपत्रचतुरस्रयंत्रं लिखित्वा तत्र त्रिकोणे ॐ ह्रीं ॐ इति मंत्रं लिखेत् । तत्र देशे ॐ मंडूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः । ॐ तत्त्वाम्न नवपीठशक्तिभ्यो नमः। इति संपूज्य तदुपरि सुवर्णस्य कलशं निधाय ॐ ह्रीं वागीशीवागीश्वरयोगपीठात्मने नमः। इत्यासनं दत्त्वा मूलेन हुं इति वर्मणा अभ्युक्ष्य ॐ आग्नेययोगपीठाय नमः । इति पीठं संपूज्य "शय्यागताम् ऋतुस्नातां नीलेन्दीवरधारणीम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवेन भुज्यमानां तु स्मरेत्तद्योनिमण्डले॥" इति वागीश्वरीं ध्यात्वा ॐ कुंडाय नमः । इति कुंडं गंधादिभिः संपूजयेत् । इति कुंडं संस्कृत्याग्निं प्रतिष्ठापयेत् ॥ अथाग्निस्थापनम् ॥ सूर्यकांतमणेः सकाशात् वा अरणितः श्रोत्रियागारतो वा कांस्यपात्रेण पिहितमग्निं मूलेन फट् इत्यस्त्रमंत्रेणादाय कुंडबाह्ये आग्नेय्यां निधाय मूलेन हुं इति वर्मणा उद्घाट्य ज्वलितकुशेन मूलेन फट् इत्यस्त्रमंत्रेण नैर्ऋत्ये क्रव्यादांशं परित्यजेत् । ततो मूलमंत्रेणाग्निं पुरतो धृत्वा तेनैव वीक्ष्य अस्त्रेणाल्पं प्रोक्ष्य तेनैव कुशत्रयेण संताड्य ॐ हुं इति वर्म्मणा संसिच्य ॐ रँ इति वह्निबीजेन चैतन्यं संयोज्य ॐ इति तारेणाभिमंत्र्य धेनुमुद्रया ॐ वं इति सुधाबीजेन अमृतीकृत्य ॐ फट् इत्यस्त्रेण संरक्ष्य अवगुंठन्या मुद्रया ॐ हुँ इति कवचेनावगुंठ्य ततो बाहुभ्यां वह्निपात्रं समुद्धृत्य ॐ इति प्रणवेन कुंडोपरि त्रिर्भ्रामयित्वा "शय्यागतामृतुस्नातां नीलेन्दीवरधारिणीम् ॥ देवेन भुज्यमानां तां स्मरेत्तद्योनिमण्डले ॥" इति ध्यात्वा जानुस्पृष्टधरातलो मूलमंत्रेण योनौ शिवरेतोधिया आत्मसंमुखं वह्निं धृत्वा ॐ हूँ वह्निचैतन्याय नमः । इति मंत्रेण कुण्डमध्ये स्थापयेत् । ततः ॐ वागीशीवागीश्वराभ्यां नमः । इत्याचमनं दत्त्वा ॐ चितपिंगल हन२ दह २ पच २ सर्वज्ञाज्ञापय स्वाहा । इति मंत्रेणाग्निं प्रज्वालयेत् । ततो ज्वालिनीमुद्रां प्रदर्श्य उत्थाय "ॐ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनम्॥ सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्॥" इति प्रार्थयेत्। ततोऽग्नेऽमुकनामासि इति नाम कृत्वा वैश्वानरेति मंत्रस्य भृगुर्ऋषिः। गायत्री छन्दः। अग्निर्देवता। रँ बीजम्। स्वाहा शक्तिः हवने प्रार्थनायां च विनियोगः। ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा" इति मंत्रेणाग्निं पाद्यादिभिः संपूज्य न्यासं कुर्य्यात्। तद्यथा। ॐ स्प्रं हिरण्यायै नमः लिंगे १ ॐ ष्प्रं गगनायै नमः गुदे २ ॐ श्यं रक्तायै नमो मूर्ध्नि ३ ॐ व्प्रूँ कृष्णायै नमः वक्त्रे ४ ॐ ल्यूँ सुप्रभायै नमो नासिकायाम् ५ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऱ्यै बहुरूपायै नमः नेत्रे ६ ॐ यूँ अतिरिक्तायै नमः सर्वांगे ७ इत्यग्निजिह्वान्यासः ॥ ॐ देवताभ्यो नमो लिंगे १ ॐ पितृभ्यो नमो गुदे २ ॐ गंधर्वेभ्यो नमो मूर्द्धि ३ ॐ यक्षेभ्यो नमो वक्त्रे ४ ॐ नागेभ्यो नमो नासिकायाम् ५ ॐ पिशाचेभ्यो नमः नेत्रे ६ ॐ राक्षसेभ्यो नमः सर्वांगे ७ इत्यग्निजिह्वदेवतान्यासः ॥ ॐ सहस्रार्चिषे हृदयाय नमः स्वाहा १ ॐ स्वतिपूर्णाय शिरसे स्वाहा २ ॐ उत्तिष्ठपुरुषाय शिखायै वषट् स्वाहा ३ ॐ धूमव्यापिने कवचाय हुँ स्वाहा ४ ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा ५ धनुर्धराय अस्त्राय फट् स्वाहा ६ इति विन्यसेत् ॥ ॐ अग्नये जातवेदसे नमो मूर्द्धि १ ॐ अग्नये सप्तजिह्वाय नमो वामांसे २ ॐ अग्नये हव्यवाहनाय नमो वामपार्श्वे ३ ॐ अग्नये अश्वोदरजाय नमो वामकट्याम् ४ ॐ अग्नये वैश्वानराय नमो लिंगे ५ ॐ अग्नये कौमारतेजसे नमो दक्षिणकट्याम् ६ ॐ अग्नये विश्वमुखाय नमो दक्षिणपार्श्वे ७ ॐ अग्नये देवमुखाय नमो दक्षांसे ८ एवं न्यासं कृत्वा ध्यायेत् । अथ ध्यानम् ॥ " इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतं जपाभम् ॥ हेमाकल्पं पद्मसंस्थं त्रिनेत्रं ध्यायेद्वह्निं बद्धमौलिं जटाभिः ॥१॥" इति ध्यात्वा मानसोपचारैः संपूज्य शुद्धोदकेन कुंडं स्थंडिलं वा परिषिंच्य प्राचीवर्जदक्षिणे प्रागग्रैः पश्चिमे उदगग्रैः उत्तरे प्रागग्रैश्च दर्भैरगर्भैर्मध्यस्थमेखलायां परिस्तीर्य्य त्रीन् परिधीन् क्रमान्निक्षिपेत् । ततस्तेषूपरि मेखलाक्रमेण ॐ ब्रह्मणे नमः १ ॐ विष्णवे नमः २ ॐ शिवाय नमः ३ इति गंधादिभिः संपूज्य योन्यां ॐ गौर्यै नमः । इति गौरीं संपूजयेत् । ततः " ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा" इति वह्निं मध्ये गंधादिभिः संपूज्य कुंडयोनिं वस्त्रेणाच्छाद्य कुंडं नवसूत्रेण संवेष्ट्य कुशकंडिकां कुर्य्यात् । इत्यग्निस्थापनम् ॥ अथ कुशकंडिकाप्रकारः ॥ स्ववामे कुशानास्तीर्य्य तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रमेण प्रणीतां १ प्रोक्षणीं २ आज्यस्थालीं ३ स्रुवं ४ स्रुचं ५ अन्यदप्युपयोगि यत् तन्निधाय पवित्रे कृत्वा मूलमंत्रेण शुद्धांभसा तानि प्रोक्ष्य उत्तानानि विधाय प्रणीतां जलेन पूरयेत् । तत्र " ॐ गंगे च यमुने० " इति मंत्रेण कुशमुद्रया तीर्थान्यावाह्य पवित्रे अक्षतांश्च तत्र निःक्षिप्य उत्पवनं चरेत् । तत उदीच्यां प्रणीतां निधाय प्रोक्षण्यां तज्जलं क्षिप्त्वा पवित्राभ्यां जलमानीय हवनीयं द्रव्यजातं प्रोक्षयेत् । ततो मूलमंत्रेण मूलगायत्र्या वा दक्षिणे पीठमासाद्य । तत्र ॐ अणिमादिपीठदेवताभ्यो नमः । इति पीठशक्तीः संपूज्य ॐ ब्रह्मणे नमः १ इति ब्रह्माणं षोडशोपचारैः पूजयेत् । ततो हस्ताभ्यां स्रुक्स्रुवौ धृत्वाधोमुखौ वह्नौ त्रिवारं तापयित्वा वामहस्तेन तौ धृत्वा दक्षिणहस्तेन दर्भैर्यथाक्रमं तदग्रमूलमध्यानि शोधयित्वा प्रोक्षणीजलेन संप्रोक्ष्य पूर्ववत् पुनः प्रताप्य दर्भानग्नौ निक्षिप्य शक्तित्रयं न्यसेत् । मूले ॐ ह्रां इच्छाशक्त्यै नमः १ मध्ये ॐ ह्रीं ज्ञानशक्त्यै नमः २ अंते ॐ ह्रूं क्रियाशक्त्यै नमः ३ ततः ॐ स्रुवे नमः १ शक्त्यै नमः २ शंभवे नमः ३ इति विन्यस्य तौ सूत्रत्रयेण संवेष्ट्य कुंकुमपुष्पादिभिः संपूज्य आत्मदक्षिणभागे कुशोपरि स्थापयेत् । इति कुशकंडिका ॥ अथ घृतसंस्काराः । आज्यस्थालीमानीय ॐ फट् इति वारिणा प्रोक्ष्य तस्यामाज्यं निक्षिप्य मूलमंत्रेण गोमुद्रयाऽमृतीकृत्य षट्संस्कारांश्चरेत । तद्यथा । कुंडोद्धृते वायुकोणे स्थितेंगारे ॐ नमः । इति मंत्रेणाज्यस्थालीं निधाय तापनं कृत्वा दर्भयुगलं संदीप्य ॐ नमः । इत्याज्ये विनिक्षिपेत् । पुनर्दर्भयुग्मं प्रदीप्य ॐ हूं इति वर्म्मणा आज्योपरि भ्रामयित्वा दर्भयुग्ममग्नौ विसर्जयेत् । ततः ॐ फडिति मंत्रेण घृते प्रज्वलितं दर्भत्रयं प्रदर्श्य तानग्नौ न्यस्य घृतस्थालीं गृहीत्वा तदंगारान् वह्नौ संयोज्य जलं संस्पृशेत् । ततः अंगुष्ठानामिकाभ्यां प्रादेशसंमितौ दर्भौ गृहीत्वा ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फट् । इत्यस्त्रेण घृतमुत्पूय ॐ नमः । इति मंत्रेणात्मसंमुखं कृत्वा घृतसंप्लवनं कुर्य्यात् । इति घृतस्य षट् संस्काराः ॥ ततः प्रादेशमान मात्रं संग्रंथिदर्भयुग्मं घृतमध्ये निक्षिप्य आज्यस्य द्वौ भागौ कृत्वा कृष्णशुक्लौ पक्षौ स्मरेत् । ततो वामे इडां नाडीं दक्षिणे पिंगलां मध्ये सुषुम्णां ध्यात्वा होमं कुर्य्यात् । अथ होमप्रकारः । ॐ नमः । इति मंत्रेण स्रुवेण दक्षिणभागादाज्यं गृहीत्वा (अग्नेर्दक्षिणे लोचने) ॐ अग्नये स्वाहा इदमग्नये १ पुनः तद्वद्वामभागादाज्यमादाय (अग्नेर्वामलोचने) ॐ सोमाय स्वाहा इदं सोमाय २ पुनः तन्मध्याज्यं गृहीत्वा (अग्नेर्भाललोचने) ॐ अग्नीषोमाभ्यां स्वाहा ३ इति जुहुयात् । ततः ॐ नमः इति स्रुवेणाज्यं दक्षिणभागादादाय वह्निमुखे ॐ अग्नये स्विष्टकृते स्वाहा इति हुत्वा व्याहृतिहोमं कुर्य्यात् । तद्यथा । ॐ भूः स्वाहा १ ॐ भुवः स्वाहा २ ॐ स्वः स्वाहा ३ इति व्याहृतिहोमं कृत्वा ततो वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति । मंत्रेण त्रिवारं हुनेत् । ततः प्रणवेन घृताहुतिभिरेकैकवारमग्नेर्गर्भाधानादिषोडशसंस्कारान् कुर्य्यात् । शुभे कर्मणि गर्भाधानादिविवाहांतं क्रूरकर्मणि गर्भाधानादिमरणांतं संस्कारान् कुर्य्यात । तत्र क्रमः।ॐ अस्याग्नेर्गर्भाधानसंस्कारं करोमि स्वाहा॥ १ ॥ ॐ अग्नेर्पुंसवनं संस्कारं करोमि स्वाहा॥ २॥ॐ अग्नेः सीमंतोन्नयनं संस्कारं करोमि स्वाहा ॥ ३॥ ॐ अग्नेजातकर्मसंस्कारं करोमि स्वाहा॥ ४ ॥ॐ अग्नेरमुकनामकर्मसंस्कारं करोमि स्वाहा॥ ५॥ॐ अग्नेर्निष्क्रामणं संस्कारं करोमि स्वाहा ॥ ६ ॥ ॐ अग्नेः कर्णवेधं संस्कारं करोमि स्वाहा ॥ ७ ॥ ॐ अग्नेरन्नप्राशनं संस्कारं करोमि स्वाहा ॥ ८ ॥ ॐ अग्नेश्चौलसंस्कारं करोमि स्वाहा ॥९॥ ॐ अग्नेरुपनयनं संस्कारं करोमि स्वाहा ॥ १० ॥ ॐ अग्नेर्वेदारंभं संस्कारं करोमि स्वाहा ॥ ११ ॥ ॐ अग्नेर्महानाम्नि महाव्रतं संस्कारं करोमि स्वाहा ॥ १२ ॥ ॐ अग्नेरुपानिषद्व्रतं संस्कारं करोमि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाहा ॥ १३ ॥ ॐ अग्नेर्वतविसर्गं संस्कारं करोमि स्वाहा ॥ १४ ॥ ॐ अग्नेः केशांतगोदानं संस्कारं करोमि स्वाहा ॥ १५ ॥ ॐ अग्नेर्विवाहसंस्कारं करोमि स्वाहा ॥ १६ ॥ (क्रूरकर्मणि ॐ अग्नेर्मृतिसंस्कारं करोमि स्वाहा ॥ १६ ॥) एवं संस्कारान् संपाद्य वह्नेः पितरौ ॐ पार्वतीपरमेश्वराभ्यां नमः। इति मंत्रेणसंपूज्य आत्मनि योजयित्वा मूलाग्रघृतसंप्लुताः पंच समिधो मनसा ध्यात्वा जुहुयात्। ततः अग्नेः सप्तजिह्वादिभूतिभ्यस्तत्तन्मंत्रेणैकैकामाज्याहुतिं जुहुयात् । तत्र क्रमः ॐ य्यूं हिरण्यायै अग्निजिह्वायै नमः स्वाहा इदं हिरण्यायै अग्निजिह्वायै न मम १ ॐ ष्यूं गगनायै अग्निजिह्वायै नमः । स्वाहा । इदं गगनायै अग्निजिह्वायै न मम २ ॐ श्यूं रक्तायै अग्निजिह्वायै नमः । स्वाहा इदं रक्तायै अग्निजिह्वायै न मम ३ ॐ व्यूं कृष्णायै अग्निजिह्वायै नमः।स्वाहा । इदं कृष्णायै अग्निजिह्वायै न मम ४ ॐ ल्यूं सुप्रभायै अग्निजिह्वायै नमः स्वाहा । इदं सुप्रभायै अग्निजिह्वायै न मम ५ ॐ र्यूं बहुरूपायै अग्निजिह्वायै नमः स्वाहा । इदं बहुरूपायै अग्निजिह्वायै न मम ६ ॐ यूं अतिरिक्तायै अग्निजिह्वायै नमः । स्वाहा । इदं अतिरिक्तायै अग्निजिह्वायै न मम ७ इत्यग्निजिह्वाहोमः ॥ ॐ अमर्त्यायें नमः। स्वाहा इदममर्त्याय न मम १ ॐ पितृभ्यो नमः स्वाहा इदं पितृभ्यो न नम २ ॐ गंधर्वेभ्यो नमः स्वाहा इदं गंधर्वेभ्यो न मम ३ ॐ यक्षेभ्यो नमः स्वाहा इदं यक्षेभ्यो न मम ४ ॐ नागेभ्यो नमः स्वाहा इदं नागेभ्यो न मम ५ ॐ पिशाचेभ्यो नमः स्वाहा । इदं पिशाचेभ्यो न मम ६ ॐ राक्षसेभ्यो नमः स्वाहा इदं राक्षसेभ्यो न मम ७॥ इत्यग्निजिह्वादिदेवताहोमः॥ अथाग्न्यंगदेवताहोमः । ततः केसरेषु अग्न्यादिकोणमध्ये दिक्षु च । ॐ सहस्रार्चिषे हृदयाय नमः स्वाहा १ ॐ स्वस्तिपूर्णाय शिरसे स्वाहा २ ॐ उत्तिष्ठपुरुषाय शिखायै वषट् स्वाहा ३ ॐ धूम्रव्यापिने कवचाय हुँ स्वाहा ४ सप्तजिह्वाय नेत्रत्रयाय वौषट् स्वाहा ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ धनुर्धरायास्त्राय फट् स्वाहा ६ इत्यस्त्र्यंगदेवताहोमः । ततः पूर्वादिदलेषु । ॐ अग्नये जातवेदसे नमः स्वाहा १ ॐ अग्नये सप्तजिह्वाय नमः स्वाहा २ ॐ अग्नये हव्यवाहनाय नमः स्वाहा ३ ॐ अग्नये अश्वोदरजाय नमः स्वाहा ४ ॐ अग्नये वैश्वानराय नमः स्वाहा ५ ॐ अग्नये कौमारतेजसे नम स्वाहा ६ ॐ अग्नये विश्वमुखाय नमः स्वाहा ७ ॐ अग्नये देवमुखाय नमः स्वाहा ८ इत्यग्न्यष्टमूर्त्तिहोमः । ॐ लं इन्द्राय सुराधिपतये वज्रहस्ताय नमः स्वाहा १ ॐ रं वह्नये तेजोधिपतये छागवाहनाय शक्तिहस्ताय नमः स्वाहा २ ॐ यं यमाय प्रेताधिपतये दंडहस्ताय नमः स्वाहा ३ ॐ क्षं नैर्ऋतये रक्षोधिपतये खड्गहस्ताय नमः स्वाहा ४ ॐ वं वरुणाय जलाधिपतये पाशहस्ताय नमः स्वाहा ५ ॐ यं वायवे प्राणाधिपतये ध्वजहस्ताय नमः स्वाहा ६ ॐ सों सोमाय क्षेत्राधिपतये गदाहस्ताय नमः स्वाहा ७ ॐ हं ईशानाय विद्याधिपतये त्रिशूलहस्ताय नमः स्वाहा ८ ॐ आं ब्रह्मणे त्रैलोक्याधिपतये पद्महस्ताय नमः स्वाहा ९ ॐ ह्रीं अनंताय नागाधिपतये चक्रहस्ताय नमः स्वाहा १० इति सायुधदिक्पालहोमः ॥ एवं सायुधदिक्पालहोमं कृत्वा ततः स्रुवेण चतुर्वारमाज्यमादाय स्रुचि निधाय स्रुवेण तां पिधाय उत्तिष्ठन् "ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा वौषट्" इत्यनेन जुहुयात् । ततो विघ्नेश्वरमंत्रेण दशाहुतीर्जुहुयात् । तत्र क्रमः । ॐ स्वाहा १ ॐ श्रीं स्वाहा २ ॐ श्रीं ह्रीं स्वाहा ३ ॐ श्रीं ह्रीं क्लीं स्वाहा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ५ ॐ श्रींह्रींक्लींग्लौंगं स्वाहा ६ ॐ श्रींह्रींक्लींग्लौंगं गणपतये स्वाहा ७ ॐ श्रींह्रींक्लींग्लौंगं गणपतये वरवरद स्वाहा ८ ॐ श्रींह्रींक्लींग्लौंगं गणपतये वरवरद सर्वजनं मे स्वाहा ९ ॐ श्रींह्रींक्लींग्लौंगं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा १० एवं दशाहुतीर्हुत्वा पुनः समस्तमंत्रैश्चतुर्वारं जुहुयात् । एवं गणपति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

होमं कृत्वा देवतायाः पीठं पूजयेत् । ततो हुताशने इष्टदेवतामावाह्य अवाहनादिकां मुद्रां प्रदर्श्य वह्निरूपां तां देवतां संपूज्य ततो वह्निरूपां देवतां भावयन् देवस्य मुखे मूलमंत्रेण पंचविंशतिसंख्यया घृताहुतीर्हुत्वा वह्निदैवतयोरात्मना सहैक्यं विभाव्य मूलमंत्रेण नाडीसंधानार्थ मेकादशाहुतीराज्येन जुहुयात् । तत इष्टदेवताया आवरणदेवताभ्य एकैका घृताहुतीर्हुत्वा पुनर्मूलमंत्रेण दशधा घृतं जुहुयात् । इत्याज्यहोमं कृत्वा कल्पोक्तद्रव्येण जपदशांशं प्रयोगोक्तसंख्यं वा मूलमंत्रेण हुत्वा होमं समाप्य पूर्णाहुतिं दद्यात् । तत्र क्रमः । होमावशिष्टेनाज्येन स्रुचं पूरयित्वा तदग्रे पुष्पं फलं निधाय तां स्रुवेणाच्छाद्य उत्थाय तयोर्मूलं नाभौ कृत्वा मूलमंत्रं वौषडंतं पठित्वा ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा "मां मदीयं च सकलं हरये ते समर्पये ।" ॐ तत्सदिति मंत्रेण पूर्णाहुतिं दद्यात्॥ एवं पूर्णाहुतिं दत्त्वा संहारमुद्रया देवतां स्वात्मनि उद्वास्य पुनर्व्याहृतिभिर्हुत्वा अग्नेर्जिह्वादीनां पूर्ववत् एकैकाहुतिं दत्त्वा मेखलोपरि अद्भिः परिषिंच्यात्मनि पावकं योजयित्वा भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक ॥ कर्मांतरेपि संप्राते सान्निध्यं कुरु सादरम् ॥ १ ॥ इत्यग्निं संप्रार्थ्य विसृजेत् । इति होमं कृत्वा दक्षिणां[1] च दत्त्वा वह्नौ पवित्रे निक्षिप्य प्रणीतांबु भुवि क्षिप्त्वा सकुशान्परिधीनग्नौ क्षिपेत् । इति होमविधानम् ॥ अथ तर्पणादिविधानम् ॥ एवं होमं समाप्य होमदशांशतो दुग्धमिश्रितजलेन मूलमंत्रांते ॐ अमुकदेवतां तर्पयामि । इति तर्पणं कृत्वा तर्पणदशांशेन मूलमंत्रांते

१ सुवर्णमयुते दद्याल्लक्षे दशसुवर्णकम् । दक्षिणा तु प्रदातव्या यथा होमे तथा जपे ॥ २ तंत्रांतरेपि-तीर्थतोयेन दुग्धेन सर्पिषा मधुनापि वा । गंधोदकेन वा कुर्यात्सर्वत्र साधकोत्तमः ॥ ३ मूलांते नाम चोच्चार्य तर्पयामि ततः परम् । स्वाहांते तर्पयेन्मंत्री यथासंख्यं विधानतः ॥ तर्पणं च प्रकुर्वीत द्वितीयांतमथोच्चरन् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिंचामीत्यभिषेकं कुर्यात् । ततो नानाविधैरन्नैर्द्विजसत्तमान्भोजयित्वा तेभ्यो दक्षिणां दत्त्वा न्यूनसम्पूर्णतां वाचयेत् । इति पंचांग कल्पेन मंत्रः सिद्धो भवति । सिद्धे तु मंत्रे मंत्री प्रयोगोक्तकार्याणि साधयेत् । इति शारदातिलकमंत्रमहोदधिप्रोक्तं तांत्रिकहवनादिविधानम् ॥ अथ कुमारीपूजाप्रयोगः ॥ (रुद्रयामले) एकवर्षा भवेत्संध्या द्विवर्षा च सरस्वती ॥ त्रिवर्षा च त्रिधा मूर्तिश्चतुर्वर्षा तु कालिका ॥ १ ॥ शुभगा पंचवर्षा तु षड्वर्षा च ह्युमा भवेत् । सप्तभिर्मालिनी प्रोक्ता ह्यष्टवर्षा च कुब्जिका ॥ २ ॥ नवभिः कालसंदर्भा दशभिश्चापराजिता ॥ एकादशा तु रुद्राणी द्वादशाब्दा तु भैरवी ॥ ३ त्रयोदशा महालक्ष्मीर्द्विसप्ता पीठनायिका ॥ क्षेत्रज्ञा पंचदशभिः षोडशे चांबिका

---

१ मूलविद्यां समुच्चार्य तदंते देवताभिधाम् । तदंते चाभिषिंचामि नमोंते चाभिषेचनम् ॥ इत्युच्चार्य्य मूर्द्धि देशे चिंतयित्वा स्वमंत्रकम् । अभिषेकं त्रिसंख्याभिर्विधाय तदनन्तरम् ॥ तत्र संचिन्तयेद्देवीं सांगावरणदेवताम् । क्षिपेत्तोयं यथासंख्यं गणान् सिंचेत्सकृत्सकृत ॥ २ अभिषेकं समाप्यैवमभिषेकदशांशतः । ब्राह्मणान्देवताबुद्ध्या भोजयेत्साधकोत्तमः ॥ तन्त्रांतरे-विभवे सति यो मोहान्न कुर्याद्विधिविस्तरम् । न तत्फलमवाप्नोति देवद्रोही स उच्यते ॥ ३ ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजाम् । लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥ दारुणे चांत्यजातीनां पूजयेद्विधिना नरः । वर्जयेत्सर्वकार्येषु दासीगर्भसमुद्भवाम् ॥ (रुद्रयामले विशेषः) नटीकन्यां हीनकन्यां तथा कापालिकन्यकाम् । रजकस्यापि कन्यां च तथा नापितकन्यकाम् ॥ गोपालकन्यकां चैव ब्राह्मणस्यापि कन्यकाम् । शूद्रकन्यां वैद्यकन्यां तथा वैश्यस्य कन्यकाम् ॥ चाण्डालकन्यकां वापि यत्र कुत्राश्रमे स्थिताम् । मृहद्वर्गस्य कन्यां च समानीय प्रयत्नतः ॥ (योगिनीतंत्रे) यदि भाग्यवशाद्देवि वैश्यकुलसमुद्भवा ॥ कुमारी लभ्यते कांते सर्वस्वेनापि साधकः ॥ यत्नतः पूजयत्तां तु स्वर्णरौप्यादिभिर्मुदा । तदा तस्य महासिद्धिर्जायते नात्र संशयः ॥ तस्मात्तां पूजयेद्बालां सर्वजातिसमुद्भवाम् । जातिभेदो न कर्त्तव्यः कुमारी पूजनेशिवे ॥ जातिभेदान्महेशानि नरकान्न निवर्तते । विचिकित्सापरो मंत्री ध्रुवं स पातकी भवेत ॥ एषा प्रशस्ता, कुमारी तु सर्वजातीयैव पूज्या ॥ ४ (कुब्जिकातंत्रे) पंचवर्षात्समारभ्य यावद्वादशवार्षिकी । कुमारी सा भवेद्देवि निजरूपप्रकाशिनी ॥ षड्वर्षाच्च समारभ्य यावच्च नववार्षिकी । तावच्चैव महेशानि साधकाभीष्टसिद्धये ॥ अष्टवर्षात्समारभ्य यावत्त्रयोदशाब्दिकी । कुलजां तां विजानीयात्तत्र पूजां समाचरेत ॥ दशवर्षात्समारभ्य यावत्षोडशवार्षिकी । युवतीं तां विजानीयाद्देवतां तां विचिन्तयेत् ॥ (विश्वसारतंत्रे) अष्टवर्षा तु सा कन्या भवेद्गौरी वरानने । नववर्षा रोहिणी सा दशवर्षा तु कन्यका ॥ अत ऊर्ध्वं महामाया भवेत्सैव रजस्वला ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवेत् ॥४॥ एवं क्रमेण संपूज्य यावत्पुण्यं न विद्यते ॥ प्रतिपदादिपूर्णांतं वृद्धिभेदेन पूजयेत् ॥५॥ महापर्वसु सर्वेषु विशेषाच्च पवित्रके॥ महानवम्यां देवेशि कुमारीश्च प्रपूजयेत् ॥ ६ ॥ अथ पूजाप्रयोगः॥ पूजादिनात्पूर्वदिने गंधपुष्पाक्षतादिभिर्मूलेन 'भगवति कुमारि पूजार्थं त्वं मया निमंत्रितासि मां कृतार्थये,ति निमंत्रितां प्रातराहूय प्रदक्षिणीकृत्योक्तनाद्यैः स्नापयित्वा गंधतैलेन शरीरं संस्कार्यांकेशं परिष्कृत्य ललाटे सिंदूरं नयनयोः कज्जलं सर्वांगे चन्दनं वस्त्रालंकारैराभूष्य पूजागृहे चानीय पादौ प्रक्षाल्य अष्टदलपीठोपरि समावेश्य तांबूलेन मुखं संशोध्य देशकालौ स्मृत्वामुकसिद्ध्यर्थममुककर्मणि अमुकदेवताप्रीत्यर्थं कुमारीणां पूजनं करिष्ये । इति संकल्प्य न्यासं कुर्यात् । ॐ क्रां कुमारिके हृदयाय नमः १ ॐ क्रीं कुमारिके शिरसे स्वाहा २ ॐ क्रूं कुमारिके शिखायै वषट् ३ ॐ क्रैं कुमारिके कवचाय हुं ४ ॐ क्रौं कुमारिके नेत्रत्रयाय वौषट् ५ ॐ क्रः कुमारिके अस्त्राय फट् ६ इति हृदयादिषडंगन्यासः ॥ एवमेव करन्यासं कुर्यात् । एवं न्यासं कृत्वा ध्यायेत् । अथ ध्यानम्-बालरूपां च त्रैलोक्यसुंदरीं वरवर्णिनीम् ॥ नानालंकारनम्रांगीं भद्रविद्याप्रकाशिनीम् ॥ १ ॥ चारुहास्यां महानंदहृदयां शुभदां शुभाम् ॥ शंखकुंदेन्दुधवलां द्विभुजां वरदाभयाम् ॥२॥ एवं ध्यात्वात्मशिरसि पुष्पं दत्त्वावाहयेत् ॥ मंत्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम्॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥३॥ इत्यावाह्य ॐ ह्रीं कुलकुमारिकायै नमः इदं पाद्यमेवामिदमर्घ्यमिदमाचमनीयमिदमनुलेपनमेतेऽक्षता एतानि पुष्पाणि एष धूप एष दीप इदं नैवेद्यमिदं तांबूलमिति पूजयित्वा षडंगानि पूजयेत् । ॐ क्रां कुमारिके हृदयाय नमः १ ॐ क्रीं कुमारिके शिरसे स्वाहा २ ॐ क्लूं कुमारिके शिखायै वषट् ३ ॐ क्रैं कुमारि

१ वाग्भवेन वपुःक्षोभं मायाबीजे गुणाष्टकम् । श्रियो बीजे श्रियो लाभो मायाबीजे रिपुक्षयः ॥ भैरवेण तु बीजेन खेचरत्वं सुरादिभिः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

के कवचाय हुं ४ ॐ क्लौं कुमारिके नेत्रत्रयाय वौषट् ५ ॐ क्रः कुमारिके अस्त्राय फट् ६ इति गंधादिभिः संपूज्य ॐ ह्रीं हंसः कुल कुमारिके श्रीपादुकां पूजयामि। इति पुष्पांजलित्रयं दत्त्वा नवनामभिः पूजयेत्। तद्यथा--ॐ ह्रीं कौमार्य्यै नमः १ ॐ ह्रीं त्रिपुरायै नमः २ ॐ ह्रीं कल्याण्यै नमः ३ ॐ ह्रीं रोहिण्यै नमः ४ ॐ ह्रीं कामिन्यै नमः ५ ॐ ह्रीं चंडिकायै नमः ६ ॐ ह्रीं शांकर्यै नमः ७ ॐ ह्रीं दुर्गायै नमः ८ ॐ ह्रीं सुभद्रायै नमः ९. इति संपूज्य मूलेन पुष्पांजलित्रयं दत्त्वा प्रदक्षिणीकृत्य प्रणमेत्। तत्र मंत्रः--ॐ जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते॥ १ ॥ त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम् । त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ २ ॥ कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम्। कारुण्यजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥ ३ ॥ अणिमादिगुणोपेतामकारादिस्वरात्मिकाम् ॥ शक्तिभेदात्मिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ ४ ॥ कलाधारां कलारूपां कालचण्डस्वरूपिणीम् ॥ कामदां करुणाधारां कामिनीं पूजयाम्यहम् ॥ ५ ॥ चण्डधारां चण्डमायां चण्डमुण्डविनाशिनीम् ॥ प्रणमामि च देवेशीं चण्डिकां पूजयाम्यहम् ॥ ६ ॥ सुखानंदकरीं शांतां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकां देवीं शांकरीं पूजयाम्यहम् ॥ ७ ॥ दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम् ॥ ८ ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥ सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम् ॥ ९ ॥ इति संप्रार्थ्य साष्टांगं प्रणम्य दक्षिणां च दत्त्वा तत्राग्रे स्वेष्टदेवतां ध्यात्वा तन्नामभिः पूजयेत्॥ अस्य फलादेशः-पूजोपकरणानीह कुमार्यै यो ददाति हि॥ संतुष्टा देवता तस्य पुत्रत्वे सानुकल्प्येत ॥ १ ॥ (योगिनी तंत्रे) कुमारीपूजनफलं वक्तुं नार्हामि सुंदरि ॥ जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुमारी पूज्यते यत्र स देशः क्षितिपावनः॥ महापुण्यतमो भूयात् समंतात्कोशपंचकम् ॥ ३॥ (रुद्रयामले) महापूजादिकं कृत्वा वस्त्रालं
कारभोजनैः॥पूजनान्मन्दभाग्योऽपि लभते जयमंगलम् ॥४॥ पूजया लभते पुत्रान् पूजया लभते श्रियम् ॥ पूजया धनमाप्नोति पूजया लभते
महीम् ॥५॥ पूजया लभते लक्ष्मीं सरस्वतीं महोजसम्॥महाविद्याः प्रसीदंति सर्वे देवा न संशयः॥६॥कालभैरवब्रह्मेन्द्रब्राह्मणा ब्रह्मवेदिनः॥
रुद्रश्च देववर्गाश्च वैष्णवा ब्रह्मरूपिणः ॥ ७ ॥ अवताराश्च द्विभुजा वैष्णवा मनुशोभिताः ॥ अन्ये दिक्पालदेवाश्च चराचरगुरुस्तथा ॥
॥८॥नानाविद्याश्रिताः सर्वे दानवाः कूटशालिनः॥उपसर्गास्थिता येये तेते तुष्टा न संशयः॥९॥कुमारी योगिनी साक्षात्कुमारी परदेवता॥
असुरा दुष्टनागाश्च येये दुष्टग्रहा अपि ॥ १० ॥ भूतवेतालगंधर्वा डाकिन्यक्षराक्षसाः॥ याश्चान्या देवताः सर्वा भूर्भुवः स्वश्च भैरवाः॥
॥११॥पृथिव्यादीनि सर्वाणि ब्रह्माण्डे सचराचरम्॥ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥१२॥संतुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूज
येत् ॥ अथाहं शुद्धरूपा हि अन्यलोके च का कथा ॥ कुमारीपूजनं कृत्वा त्रैलोक्यं वशमानयेत् ॥ १३ ॥ महाकांतिर्भवेत्क्षिप्रं सर्व
पुण्यफलप्रदम् ॥ १४ ॥ (नीउतंत्र) महाभयातिदुर्भिक्षाद्युत्पातानि कुलेश्वरि ॥ दुःस्वप्नमपमृत्युश्च ये चान्ये च समुद्भवाः ॥ १५ ॥
कुमारीपूजनादेव न ते च प्रभवंति हि ॥ नित्यं क्रमेण देवेशि पूजयेद्विधिपूर्वकम् ॥१६॥ घ्नंति विघ्नान्पूजिताश्च भयं शत्रून्महोत्कटान् ॥
ग्रहा रोगाः क्षयं यांति भूतवेतालपन्नगाः ॥ १७ ॥ तावज्जप्त्वा पूजयित्वा कन्यां सुंदरमोहिनीम् ॥ दिव्यभावास्थितं साक्षात्तंत्रमंत्रफलं
लभेत् ॥ १८ ॥ महाविद्या महामंत्रं सिद्धिमंत्रं न संशयः॥ विधियुक्तां कुमारीं तु भोजयेच्चैव भैरव ॥१९॥पाद्यार्घ्यं च तथा धूपं कुंकुमं
चंदनं शुभम् ॥ भक्तिभावेन संपूज्य कुमारीभ्यो निवेदयेत् ॥२०॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे सर्वदेवोपयोगिपद्धतिचतुर्थस्तरंगः ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ऋद्धिसिद्धी-- श्वरा नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशाय नमः ॥ अथ गणेशतंत्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ अथ षडक्षरवक्रतुंडमंत्रप्रयोगः ॥ (मंत्रो यथा-मंत्रमहोदधौ) 'वक्रतुंडाय हुं' इति षडक्षरो मंत्रः ॥ अस्य विधानम् । प्रातः कृतक्रियश्चन्द्रतारादिबलान्विते मुहूर्ते विविक्ते देशे जपस्थानं प्रकल्प्य गणपतिपूजनादिनांदीश्राद्धांतं विधाय जपस्थानमागत्य कूर्म्मशोधिते स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य मूलेनाचम्य प्राणानायम्य भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकान्यासं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा पूर्ववत् गणेशकलामातृकान्यासं विधाय प्रयोगोक्त न्यासादिकं कुर्यात् तत्र क्रमः--ॐ अस्य श्रीगणेशमंत्रस्य भार्गवऋषिः, अनुष्टप् छंदः, विघ्नेशो देवता, वं बीजम्, यं शक्तिः, ममाभीष्टसिद्धये जपे विनियोगः ॥ ॐ भार्गवर्षये नमः शिरसि॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥२॥ ॐ विघ्नेशदेवतायै नमः हृदि ॥३॥ ॐ वं बीजाय नमः गुह्ये ॥४॥ ॐ यं शक्तये नमः पादयोः ॥५॥ ॐ विनियोगाय नमः सर्वांगे ॥६॥ इति ऋष्यादिन्यासः ॥ ॐ वं नमः अंगुष्ठाभ्यां नमः॥ १॥ॐ क्रँ नमः तर्जनीभ्यां नमः ॥२॥ ॐ तुँ नमः मध्यमाभ्यां नमः॥ ३॥ ॐ डाँ नमः अनामिकाभ्यां नमः॥ ॥४॥ ॐ यँ नमः कनिष्ठिकाभ्यां नमः ॥५॥ ॐ हुँ नमः करतलकरपृष्ठाभ्यां नमः॥६॥ इति करन्यासः ॥ ॐ वँ नमः हृदयाय नमः॥ ॥ १॥ ॐ क्रँ नमः शिरसे स्वाहा ॥२॥ ॐ तुँ नमः शिखायै वषट् ॥ ३॥ ॐ डाँ नमः कवचाय हुँ ॥ ४ ॥ ॐ यँ नमः नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हुँ नमः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ वँ नमः भ्रूमध्ये ॥ १ ॥ ॐ क्रं नमः कंठे ॥ २ ॥ ॐ तुँ नमः हृदये ॥ ३ ॥ ॐ डाँ नमः नाभौ ॥ ४॥ ॐ यं नमः लिंगे ॥५॥ ॐ हुँ नमः पादयो ॥६॥इति वर्णन्यासः॥एवं न्यासं कृत्वा ध्यायेत् ॥ ध्यानम्-उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः पाशांकुशाभयवरान्दधतं गजास्यम् ॥रक्तांबरं सकलदुःखहरं गणेशं ध्यायेत्प्रस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्नमखिलाभरणाभिरामम् ॥१॥ इति ध्यायेत् ततः पीठादौ रचिते सर्वतोभद्रमण्डले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः पद्धति मार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति संपूज्य नव पीठशक्तीः पूजयेत् । तद्यथा । पूर्वादिक्रमेण ॐ तीव्रायै नमः१ ॐ चालिन्यै नमः२ ॐ नन्दायै नमः३ ॐ भोगदायै नमः ४ ॐ कामरूपिण्यै नमः ५ ॐ उग्रायै नमः ६ ॐ तेजोवत्यै नमः ७ ॐ सत्यायै नमः ८ मध्ये ॐ विघ्ननाशिन्यै नमः ९. इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य ॐ ह्रीं सर्वशक्तिकमलासनाय नमः । इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पद्धतिमार्गेण प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः ॥ पुष्पांजलिमादाय" ॐ संविन्मयः परो देवः परामृतरसप्रियः॥ अनुज्ञां देहि गणप परिवारार्चनाय मे ॥१॥" इति पठित्वा पुष्पांजलिं गणेशोपरि दत्त्वा पूजितस्तर्पितोऽस्तु इति वदेत ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु षडंगानि पूजयेत् । तथा च ॥ आग्न्येय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॥ ॐ वँ नमः हृदयाय नमः हृदये श्री पादुकां पूजयामि तर्पयामि नमः इति सर्वत्र ॥ १ ॥ ॐ कँ नमः शिरसे स्वाहा शिरसि श्रीपा० ॥ २ ॥ ॐ तँ नमः शिखायै वषट् शिखायां श्रीपा० ॥ ३ ॥ ॐ डँ नमः कवचाय हुँ कवचं श्रीपा० ॥ ४ ॥ ॐ यँ नमः नेत्रत्रयाय वौषट् नेत्रत्रये श्रीपा० ॥ ५ ॥ ॐ हुँ नमः अस्त्राय फट् अस्त्रे श्रीपा० ॥६॥ इति षडंगानि पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य ॥ "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ ततोऽष्ट

For Private And Personal Use Only

दले पूज्यपूजकयोरंतरालं प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य दक्षहस्ते
तर्जन्यंगुष्ठाभ्यां गंधाक्षतपुष्पाणि गृहीत्वा प्राचीक्रमेण अष्टसु दिक्षु ॐ विद्यायै
नैंमः विद्याश्रीपा० १ ॥ॐ विधात्र्यै नैंमः विधात्री श्रीपा० २ ॥ॐ भो
गदायै नैंमः भोगदश्रीपा० ३॥ॐ विघ्नघातिन्यै नैंमः विघ्नघातिनि श्रीपा०
४॥ॐ निधिप्रदीपायै नैंमः निधिप्रदीपश्रीपा० ५॥ॐ पापघ्न्यै नैंमः पाप
घ्नीश्रीपा० ६॥ ॐ पुण्यायै नैंमः पुण्यश्रीपा० ७॥ ॐ शशिप्रभायै नैंमः
शशिप्रभश्रीपा० ८ ॥ इत्यष्टौ शक्तीः पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा
मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं द्वि
तीयावरणार्चनम् १॥" इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्यबिंदुं निक्षि
प्य पूजितास्तर्पिताः संतु इति वदेत्॥ इति द्वितीयावरणम्॥ ततो दलाग्रेषु ॐ
वक्रतुंडाय नैंमः वक्रतुंड श्रीपा० १॥ ॐ एकदंष्ट्राय नैंमः एकदंष्ट्र श्रीपा० २॥
ॐ महोदराय नैंमः महोदर श्रीपा० ३॥ ॐ हस्तिमुखाय नैंमः हस्तिमुख
श्रीपा० ४॥ॐ लम्बोदराय नैंमः लम्बोदर श्रीपा० ५॥ ॐ विकटाय नैंमः

वक्रतुंडगणेशयंत्रम् ।



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकटश्रीपा० ६ ॥ ॐ विघ्नराजाय नमः विघ्नराज श्रीपा० ७ ॥ ॐ धूम्रवर्णाय नमः धूम्रवर्णश्रीपा० ८ ॥ इत्यष्टौ पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य्य ॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् १ ॥" इति पठित्वा पुष्पांजलिं च दत्वा विशेषार्घोद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण-ॐ लं इंद्राय नमः १ ॥ ॐ रं अग्नये नमः २॥ ॐ मं यमाय नमः ३॥ ॐ क्षं निर्ऋतये नमः ४ ॥ ॐ वं वरुणाय नमः ५॥ ॐ यं वायवे नमः ६ ॥ ॐ कुं कुबेराय नमः ७ ॥ ॐ हं ईशानाय नमः ८ ॥ पूर्वेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः ९ ॥ वरुणनैर्ऋतयोर्मध्ये ॐ ह्रीं अनंताय नमः १० ॥ इति दशदिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात् । इति चतुर्थावरणम् ४ ॥ ततः इन्द्रादिसमीपे ॐ वं वज्राय नमः १ ॥ ॐ शं शक्तये नमः २ ॥ ॐ दं दंडाय नमः ३ ॥ ॐ खं खड्गाय नमः ४ ॥ ॐ पां पाशाय नमः ५ ॥ ॐ अं अंकुशाय नमः ६ ॥ ॐ गं गदायै नमः ७ ॥ ॐ त्रिं त्रिशूलाय नमः ८ ॥ ॐ पं पद्माय नमः ९ ॥ ॐ चं चक्राय नमः १० ॥ इति वज्राद्यस्त्राणि पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं षड्लक्षजपः अष्टद्रव्यैर्दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कारयेत् ॥ एवं कृते मंत्रः सिद्धो भवति सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । "ऋतुलक्षं जपेन्मंत्रमष्टद्रव्यैर्दशांशतः ॥ जुहुयान्मंत्रसंसिद्ध्यै वाडवान्भोजयेच्छुचीन् ॥ १ ॥ ततः सिद्धे मनौ काम्यान्प्रयोगान्साधयेन्निजान् ॥ ब्रह्मचर्यरतो मंत्री जपेद्द्विसहस्रकम् ॥ षण्मासमध्याद्दारिद्र्यं नाशयत्येव निश्चितम् ॥ चतुर्थ्यादिचतुर्थ्यंतं जपेद्दशसहस्रकम् ॥ ३ ॥ प्र

१—इक्षवः सक्तवो रंभाफलानि चिपिटास्तिलाः ॥ मोदका नारिकेलानि लाजा द्रव्याष्टकं स्मृतम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यहं जुहुयादष्टोत्तरं शतमतंद्रितः ॥ पूर्वोक्तं फलमाप्नोति षण्मासाद्भक्तितत्परः ॥ ४ ॥ आज्याक्तान्नस्य होमेन भवेद्धनसमृद्धिमान् ॥
पृथुकैर्नारिकेलैर्वा मरिचैर्वा सहस्रकम् ॥ ५ ॥ प्रत्यहं जुह्वतो मासाज्जायते धनसंचयः ॥ जीरसिंधुमरीचाक्तैरष्टद्रव्यैः सहस्रकम् ॥ ६ ॥
जुहुयात्प्रतिदिनं पश्चात्स्यात्कुबेर इवार्थवान् ॥ चतुःशतं ४४४ चतुश्चत्वारिंशदाढ्यं दिनं प्रति ॥ तर्पयेन्मूलमंत्रेण मंडलादि
ष्टमाप्नुयात् ॥७॥ इति वक्रतुंडषडक्षरमंत्रप्रयोगः ॥ १ ॥ अथ मंत्रभेदः (मंत्रमहोदधौ) मंत्रो यथा ॥ मेघोल्काय स्वाहा ॥ इति षडक्ष
रो मंत्रः ॥ अस्य विधानं सर्वं पूर्ववज्ज्ञेयम् ॥ तथा च ॥ "षडक्षरोयमादिष्टो भजतामिष्टदो मनुः ॥ पूर्ववत्सर्वमेतस्य समाराधनमीरितम् १ ॥"
इति द्वितीयषडक्षरमंत्रप्रयोगः ॥ अथैकात्रिंशदक्षरवक्रतुंडमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा ॥ "रायस्पोषस्य ददिता निधिदो रत्न
धातुमान् ॥ रक्षोहणोबलगहनोवक्रतुंडायहुं ॥" इत्येकात्रिंशदक्षरमंत्रः ॥ अस्य विधानम् ॥ अस्य श्रीवक्रतुंडगणेशमंत्रस्य भार्गवऋषिर
नुष्टुप् छंदः ॥ विघ्नेशो देवता ॥ वं बीजम् ॥ यं शक्तिः ममाभीष्टसिद्धये जपे विनियोगः ॥ ॐ भार्गवर्षये नमः शिरसि ॥ १ ॥ अनुष्टुप्
छंदसे नमः मुखे ॥ २ ॥ विघ्नेशदेवतायै नमः हृदि ॥ ३ ॥ वं बीजाय नमः गुह्ये ॥ ४ ॥ यं शक्तये नमः पादयोः ॥ ५ ॥ वि
नियोगाय नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ रायस्पोषस्य अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ददिता तर्जनीभ्यां नमः ॥ २ ॥
ॐ निधिदोरत्नधातुमान् मध्यमाभ्यां नमः ॥ ३ ॥ ॐ रक्षोहणो अनामिकाभ्यां नमः ॥ ४ ॥ ॐ बलवाहनो कनिष्ठिकाभ्यां
नमः ॥ ५ ॥ वक्रतुंडाय हुं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः। एवमेव हृदयादिषडंगन्यासं कुर्य्यात् ॥ एवं न्यासं कृत्वा
ध्यायेत् ॥ अथ ध्यानम्--उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः पाशांकुशाभयवरान्दधतं गजास्यम् ॥ रक्तांबरं सकलदुःहरं गणेशं ध्यायेत्प्रस

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्नमखिलाभरणाभिरामम् ॥ १ ॥ इति ध्यायेत् । अन्यत् सर्वं षडक्षरवत्॥ इत्येकत्रिंशदक्षरवक्रतुंडमंत्रप्रयोगः ॥ २ ॥ अथोच्छिष्टगणपतिनवार्णमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा ॥ हस्तिपिशाचिलिखेस्वाहा ॥ इति नवार्णमंत्रः । अस्य विधानम्-ॐ अस्यश्र्युच्छिष्टगणेशनवार्णमंत्रस्य कंकोल ऋषिः विराट्छंदः । उच्छिष्टगणपतिर्देवता । अखिलाप्तये जपे विनियोगः ॥ ॐ कंकोलर्षये नमः शिरसि १ ॥ ॐ विराट्छंदसे नमः मुखे २ ॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदि ३ ॥ विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः॥ ॐ हस्ति अंगुष्ठाभ्यां नमः १ ॥ ॐ पिशाचि तर्जनीभ्यां नमः २ ॥ ॐ लिखे मध्यमाभ्यां नमः ३ ॥ ॐ स्वाहा अनामिकाभ्यां नमः ४ ॥ ॐ हस्तिपिशाचिलिखे कनिष्ठिकाभ्यां नमः५ ॥ ॐ हस्तिपिशाचि लिखे स्वाहा करतलकरपृष्ठाभ्यां नमः६ ॥ इति करन्यासः ॥ ॐ हस्ति हृदयाय नमः १ ॥ ॐ पिशाचि शिरसे स्वाहा २ ॥ ॐ लिखे शिखायै वषट् ३ ॥ ॐ स्वाहा कवचाय हुं ४ ॥ ॐ हस्तिपिशाचि लिखे स्वाहा अस्त्राय फट् ५ इति हृदयादिपंचांगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् अथ ध्यानम् ॥ चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशांकुशौ मोदकपात्रदंतौ ॥ करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे १ ॥ इति ध्यायेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः पद्धतिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति संपूज्य नवपीठशक्तीः पूजयेत् । तद्यथा । पूर्वादिक्रमेण ॐ तीव्रायै नमः १ ॐ चालिन्यै नमः २ ॐ नंदायै नमः ३ ॐ भोगदायै नमः ४ ॐ कामरूपिण्यै नमः ५ ॐ उग्रायै नमः ६ ॐ तेजोवत्यै नमः ७ ॐ सत्यायै नमः ८ मध्ये ॐ विघ्ननाशिन्यै नमः ९ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य ॥ ॐ ह्रीं सर्वशक्ति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमलासनाय नमः ॥ इति मंत्रेण पुष्पायासनं दत्त्वा पीठमध्ये संस्थाप्य पद्धतिमार्गेण प्रतिष्ठां च कृत्वा मूलेन मूर्त्तिं प्रकल्प्य पाद्यादि पुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात । तत्र क्रमः ॥ पुष्पांजलिमादाय "ॐ संविन्मयः परोदेवपरामृतरसप्रिय । अनुज्ञां देहि गणप परिवारार्चनाय मे ॥ १ ॥" इति पठित्वा पुष्पांजलिं गणेशोपरि दत्त्वा पूजितस्तर्पितोऽस्तु इति वदेत् । इत्याज्ञां गृहीत्वा षट्कोणे षडंगानि पूजयेत ॥ तथा च ॥ अग्निकोणे ※ ॐ हस्ति हृदयाय नमः १ ॥ हृदयश्रीपादुकां पूजयामि । तर्पयामि नमः । इति सर्वत्र पठेत् ॥ नैर्ऋत्ये ॥ ॐ गीं पिशाचि शिरसे स्वाहा शिरसि श्रीपा० २ ॥ वायव्ये ॥ ॐ गूं लिखे शिखायै वषट् शिखा श्रीपा० ३ ॥ ऐशान्ये० ॥ ॐ अ स्वाहा कवचाय हुं कवचं श्रीपादुकां पूजयामि त० ४ ॥ मध्ये ॐ गौं हस्तिपिशाचिलिखे स्वाहा नेत्रत्रयाय वौषट् नेत्रत्रये श्रीपा० ५ ॥ दिक्षु ॐ गः हस्तिपिशाचिलिखे स्वाहा । अस्त्राय फट् अस्त्रे श्रीपादुकां पू० त० नमः ६ ॥ इति पूजयेत ॥ ततो पुष्पांजलिमादाय मूलं पठित्वा । "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥" ॥ १ ॥ इति पुष्पांजलिं दत्त्वा विशेषार्घ्यबिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधाक्षतपुष्पाणि गृहीत्वा प्राच्यादिक्रमेण अष्टसु दिक्षु ॥ प्राच्याम् । ॐ ब्राह्मयै नमः ब्राह्मीश्रीपादुकां पूजयामि तर्पयामि नमः १ ॥ आग्नेय्याम ॥ ॐ माहेश्वर्यै नमः । माहेश्वरीश्रीपा० २ ॥ दक्षिणे ॐ कौमार्यै नमः । कौमारीश्रीपा० ३ ॥ नैर्ऋत्ये ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ ॥ पश्चिमे ॐ

※ तन्त्रांतरे तु हस्तिपिशाचिनि खे स्वाहेति नवार्णमंत्रः । ॐ हस्तिपिशाचिलिखे स्वाहा गं हस्तिपिशाचिलिखे स्वाहा नवार्णभेदेन दशाक्षरीमंत्रः ॥

For Private And Personal Use Only

वाराह्यै नमः । वाराहीश्रीपादुकां पू०त० ५ ॥ वायव्ये ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ ॥ उत्तरे ॐ चामुंडायै नमः । चामुंडाश्रीपा० ७ ॥ ऐशान्ये ॐ महालक्ष्म्यै नमः । लक्ष्मीश्रीपा० ८ ॥ इत्यष्टौ शक्तीः पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलं पठित्वा "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥ ॥ १ ॥ " इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घबिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततः अष्टदलाद्बहिः चतुरस्राभ्यंतरे प्राच्याम् ॐ वक्रतुंडाय नमः वक्रतुंडश्री पादुकां पूजयामि तर्पयामि नमस्करोमि १ ॥ आग्नेय्याम् ॐ एकदंष्ट्राय नमः । एकदंष्ट्रश्रीपा० २ ॥ दक्षिणे ॐ लम्बोदराय नमः । लम्बोदर श्रीपा० ३ ॥ नैर्ऋत्ये ॐ विकटाय नमः । विकटश्रीपा० ४ ॥ पश्चिमे ॐ धूम्रवर्णाय नमः । धूम्रवर्णश्रीपा० ५ ॥ वायव्ये ॐ विघ्नराजाय नमः विघ्नराजश्रीपा० ६ ॥ उत्तरे ॐ गजाननाय नमः गजाननश्रीपा० ७ ॥

उच्छिष्टगणपतिनवार्णयंत्रम् ।



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऐशान्ये ॐ विनायकाय नमः । विनायकश्रीपा० ८ ॥प्राच्येशानयोर्मध्ये ॐ गणपतये नमः । गणपतिश्रीपा० ९ ॥ पश्चिमानिर्ऋतयोर्मध्ये ॐ हस्तदंताय नमः हस्तदंतश्रीपा०१० ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलं पठित्वा "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥ १ ॥" इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति तृतीयावरणम् ॥३॥ भूपुराद्बहिः पूर्वादिक्रमेण पूर्वे ॐ लं इन्द्राय नमः । इन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥ आग्नेय्याम् ॥ ॐ रं अग्नये नमः अग्निश्रीपा० ॥ २ ॥ दक्षिणे ॥ ॐ मं यमाय नमः । यमश्रीपा०॥ ३ ॥ नैर्ऋत्ये ॐ क्षं निर्ऋतये नमः । निर्ऋतिश्रीपा० ॥ ४ ॥ पश्चिमे ॐ वं वरुणाय नमः । वरुणश्रीपा० ५ ॥ वायव्ये ॐ यं वायव्ये नमः । वायुश्रीपा० ६ ॥ उत्तरे ॐ कुं कुबेराय नमः । कुबेरश्रीपा० ७ ॥ ऐशान्ये ॐहं ईशानाय नमः । ईशानश्रीपा०८ ॥ इंद्रेशानयोर्मध्ये ॐ आँ ब्रह्मणे नमः । ब्रह्मश्रीपा० ९ ॥ वरुणनैर्ऋतयोर्मध्ये ॐ ह्रीं अनंताय नमः अनंतश्रीपा० १० ॥ इति दशदिक्पालान् संपूज्य पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्॥ १॥" इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति चतुर्थावरणम् ततः पूर्वादिक्रमेण तत्तत्समीपे ॐ वं वज्राय नमः ॥१॥ ॐ शं शक्तये नमः ॥२॥ ॐ दं दंडाय नमः ॥३॥ ॐ खं खड्गाय नमः ॥४॥ ॐ पाँ पाशाय नमः ॥ ५॥ ॐ अं अंकुशाय नमः ॥६॥ ॐ गं गदायै नमः ॥७॥ ॐ त्रिं त्रिशूलाय नमः॥८॥ ॐ पं पद्माय नमः ॥९॥ ॐ चं चक्राय नमः ॥१०॥ इत्यस्त्राणि पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥भक्त्या समर्पये तुभ्यं पंचमावरणार्चनम्॥ १॥"

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्त्वा पुष्पांजलिं च दत्त्वा विशेषार्घोदकं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं सं
पूज्य पिशितं वा फलं मोदकं वा गुडपायसं वा बलिं दद्यात् ॥ तत्र मंत्रः ॥ ॐ गँह्रैंक्लौंग्लौँ उच्छिष्टगणेशाय महायक्षाय यं बलिः ॥
इति मंत्रेण निवेदयेत् । ततः देवतानिवेदितमोदकं तांबूलं वा स्वयं भुक्त्वा उच्छिष्टमुखेन जपं कुर्य्यात् ॥ अस्य पुरश्चरणमेकलक्षजपः ।
तद्दशांशतस्तिलहोमः। तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति। एतत्सिद्धे मंत्रे मंत्री प्रयोगान् साध
येत् । तथा च ॥"लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः॥ एवं सिद्धे मनौ मंत्री प्रयोगान्कर्तुमर्हति ॥ १ ॥ स्वांगुष्ठप्रतिमां कृत्वा कंपि
ना सितभानुना ॥ गणेशप्रतिमां रम्यांशुक्लक्षणलक्षिताम् ॥२॥ प्रतिष्ठाप्य विधानेन मधुना स्नापयेच्च ताम् ॥ आरभ्य कृष्णभूतादि याव
च्छुक्लाचतुर्दशी ॥३॥ सगुडं पायसं तस्मै निवेद्य प्रजपेन्मनुम्॥सहस्रं प्रत्यहं तावज्जुहुयात्सघृतैस्तिलैः॥४॥गणेशोहमिति ध्यायन्नुच्छि
ष्टेनावृतो रहः ॥ पश्चाद्राज्यमवाप्नोति नृपजोन्योपि वा नरः ॥ ५ ॥ कुलालमृत्स्नाप्रतिमा पूजितैवं सुराज्यदा ॥ वल्मीकमृत्कृता लाभ
मेवमिष्टान्प्रयच्छति ॥ ६ ॥ गौडी सौभाग्यदा सैवं लावणी क्षोभयेदरीन् ॥ निंबजा नाशयेच्छत्रून्प्रतिमैवं समर्चिता ॥ ७ ॥ मेध्वा
क्तहोमतो लाजैर्वशयेदखिलं जगत् ॥ सुप्तोधिशय्यमुच्छिष्टो जपञ्छत्रून् वशं नयेत् ॥ ८ ॥ कटुतैलान्वितैराजीपुष्पैर्विद्वेषयेदरीन् ॥
द्यूते विवादे समरे जपोयं जयमावहेत् ॥ ९ ॥ कुबेरोस्य मनोर्जापान्निधीनां स्वामितामयात् ॥ लेभाते राज्यमनारि
वानरेशविभीषणौ ॥१०॥ रक्तवस्त्रांगगाराढ्यतांबूलं निश्यदञ्जपेत् ॥ यद्वा निवेदितं तस्मै मोदकं भक्षयञ्जपेत् ॥ पिशितं वा फलं

१ रक्तचन्दनेन ॥ २ श्वेतार्केणवा ॥ ३ घृतमधुशर्करान्कैः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वापि तेनतेन बालिं हरेत् ॥ (रुद्रयामलतंत्रे प्रयोगविशेषः) कृष्णां चतुर्थीमारभ्य यावच्छुक्ला चतुर्थिका ॥ सहस्रं प्रजपेन्नित्यं योषिन्नियमपूर्वकम् ॥ स्नापयेन्मधुना नित्यं नैवेद्यं गुडपायसम् ॥ भुक्तोच्छिष्टो जपेन्नित्यं गणेशोयं सदा प्रियः ॥ १२ ॥ श्वेतार्कनाकृतिं कृत्वा रक्तचंदनकेन वा ॥ अंगुष्ठमात्रां प्रतिष्ठाप्य द्विजाग्निगुरुसन्निधौ ॥ १३ ॥ जप्त्वा षोडशसाहस्रं सिद्धमंत्रो भवेद्ध्रुवम् ॥ सदोच्छिष्टो गणेशानो यक्षराजेन धीमता ॥ १४ ॥ ॥ आराधितः सोपहारैः सम्यगिष्टफलप्रदः ॥ एवं कृत्वा व्यवस्थां तु तद्धनेश्वरतां गतः ॥ १५ ॥ अपामार्गसमिद्धोमैः सौभाग्यं लभते ध्रुवम् ॥ अष्टोत्तरशतैर्मंत्री एतान्मंत्राभिमंत्रितान् ॥ १६ ॥ कीशाश्वास्थिसमुद्भूतं कीलं मंत्राभिमंत्रितम् ॥ निखनेन्मंदिरे यस्य भवेदुच्चाटनं परम् ॥ १७ ॥ मनुष्यास्थिसमुद्भूतं कीलं मंत्राभिमंत्रितम् ॥ निखनेन्मंदिरे यस्य मरणं तस्य निश्चितम् ॥ १८ ॥ उद्धृते तु भवेत्स्वस्थमिति सर्वस्य निश्चितम् ॥ यद्यन्नाम्ना जपेन्मंत्रं सहस्रं स वशी भवेत् ॥ १९ ॥ पंचसाहस्रहोमेन उद्धरेच्च वरां स्त्रियम् ॥ सहस्रदशहोमेन राजा सद्यो वशी भवेत् ॥ २० ॥ लक्षजाप्येन राजानौ द्विलक्षं राजपंक्तयः ॥ दशलक्षेण तद्दिष्टं वश्यं तस्य च सर्वथा ॥ २१ ॥ अणिमादिमहासिद्धिः कोटिजाप्यान्न संशयः ॥ खेचरत्वं भवेन्नित्यं सर्वज्ञत्वं च जायते ॥ २२ ॥ मंत्रं लिखित्वा शिरसि कंठे वा धारयेद्धृदि ॥ सौभाग्यं सर्वरक्षा च भवेत्तत्र सुनिश्चितम् ॥ २३ ॥ सारभूतमिदं मंत्रं न देयं यस्य कस्यचित् ॥ गुह्यं सर्वागमेष्वेवं हितबुद्ध्याप्रकाशितम् ॥ २४ ॥ न तिथिर्न च नक्षत्रं नोपवासो विधीयते ॥ यथेष्टं चिंतयेन्मंत्रं सर्वकामफलप्रदम् ॥ २५ ॥ इत्युच्छिष्टगणपतिनवार्णमंत्रप्रयोगः ॥ १ ॥ अथ द्वादशाक्षरोच्छिष्टगणेशमंत्रप्रयोगः (मंत्रमहोदधौ) मंत्रो यथा ॥ ॐ ह्रीं गं हस्तिपिशाचिलिखेस्वाहा ॥ ॐ अस्य श्रीद्वादशाक्षरोच्छिष्टगणेशमंत्रस्य मनुर्ऋषिः विराट् छंदः ।

For Private And Personal Use Only

उच्छिष्टगणपतिर्देवता । गं बीजम् । स्वाहा शक्तिः। ह्रीं कीलकम् । ह्रीं अखिलाप्तये जपे विनियोगः ।। ॐ मनुऋषये नमः शिरसि॥ १॥ विराट्छंदसे नमः मुखे ॥ २ ॥ उच्छिष्टगणपतिदेवतायै नमः हृदि ॥ ३ ॥ गं बीजाय नमः गुह्ये ॥ ४ ॥ स्वाहाशक्तये नमः पादयोः ॥ ५ ॥ ह्रीं कीलकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं अंगुष्ठाभ्यां नमः ॥ १॥ ॐ गं तर्जनीभ्यां नमः ॥ २ ॥ ॐ हस्ति मध्यमाभ्यां नमः ॥ ३ ॥ ॐ पिशाचि अनामिकाभ्यां नमः ॥ ४ ॥ ॐ लिखे कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रीं हृदयाय नमः ॥ १ ॥ ॐ गं शिरसे स्वाहा ॥ २ ॥ ॐ हस्ति शिखायै वषट् ॥ ३ ॥ ॐ पिशाचि कवचाय हुं॥ ४ ॥ ॐ लिखे नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ स्वाहा अस्त्राय फट् ६ ॥ एवं न्यासं कुर्य्यात् ॥ अन्यत् सर्व पूर्ववत् ॥ इति द्वादशाक्षरोच्छिष्टगणेशमंत्रप्रयोगः ॥ २ ॥ अथैकोनविंशत्यक्षरोच्छिष्टगणेशमंत्रप्रयोगः । (मंत्रमहोदधौ) मंत्रो यथा ॐ नमः उच्छिष्टगणेशाय हस्तिपिशाचि लिखे स्वाहा ॥ इत्येकोनविंशत्यक्षरो मंत्रः। अस्य विधानम्। ॐ अस्य श्रीउच्छिष्टगणेशमंत्रस्य कंकोल ऋषिः। विराट् छन्दः। उच्छिष्टगणपतिर्देवता । अखिलाप्तये जपे विनियोगः ॥ ॐ कंकोलऋषये नमः शिरसि १॥ विराट्छन्दसे नमः मुखे २ ॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदि३ ॥ विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ नमः ॐ अगुष्ठाभ्यां नमः१ ॥ ॐ उच्छिष्टगणेशाय तर्जनीभ्यां नमः२ ॥ ॐ हस्ति मध्यमाभ्यां नमः ३ ॥ ॐ पिशाचि अनामिकाभ्यां नमः ४ ॥ ॐ लिखे कनिष्ठिकाभ्यां नमः ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ नमः हृदयाय नमः १ ॥ ॐ उच्छिष्टगणेशाय शिरसे स्वाहा २ ॥ ॐ हस्ति शिखायै वषट्

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३ ॥ ॐ पिशाचि कवचाय हुं ४ ॥ ॐ लिखे नेत्रत्रयाय वौषट् ५ ॥ ॐ स्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कुर्य्यात् । अन्यत् सर्वं पूर्ववत् ॥ इत्येकोनविंशत्यक्षरोच्छिष्टगणेशमंत्रप्रयोगः ३ ॥ अथ सप्तत्रिंशदक्षरोच्छिष्टगणेशमंत्रप्रयोगः मंत्रो यथा ॥ ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आंक्रोंह्रींगंघेघे स्वाहा ॥ इति सप्तत्रिंशदक्षरो मंत्रः ॥ अस्य विधानम् ॥ ॐ अस्य श्रीउच्छिष्टगणेशमंत्रस्य गणक ऋषिः । गायत्री छन्दः । उच्छिष्टगणपतिर्देवता । गं बीजं । ह्रीं शक्तिः । आँ क्रों कीलकं । ममाभीष्टसिद्धये जपे विनियोगः ॥ ॐ गणकर्षये नमः शिरसि १ ॥ गायत्रीछन्दसे नमः मुखे २ ॥ उच्छिष्टगणपतिदेवतायै नमः हृदि ३ ॥ गँ बीजाय नमो गुह्ये ४ ॥ ह्रीं शक्त्यै नमः पादयोः ५ ॥ आँ क्रौँ कीलकाय नमो नाभौ ६ ॥ विनियोगाय नमः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ नमो भगवते एकदंष्ट्राय अंगुष्ठाभ्यां नमः १ ॥ हस्तिमुखाय तर्जनीभ्यां नमः २ ॥ लम्बोदराय मध्यमाभ्यां नमः ३ ॥ उच्छिष्टमहात्मने अनामिकाभ्यां नमः ४ ॥ आँक्रोँह्रींगँ कनिष्ठिकाभ्यां नमः ५ ॥ घेघे स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ नमो भगवते एकदंष्ट्राय हृदयाय नमः १ ॥ हस्तिमुखाय शिरसे स्वाहा २ ॥ लंबोदराय शिखायै वषट् ३ ॥ उच्छिष्टमहात्मने कवचाय हुं ४ ॥ आँक्रोँह्रीँगँ नेत्रत्रयाय वौषट् ५ ॥ घेघेस्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः एवं ॥ न्यासं कृत्वा ध्यायेत ॥ अथ ध्यानम् ।

ॐ शरान्धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थम् ॥ विवस्त्रपत्न्यां सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥ १ ॥ एवं ध्यात्वा पूर्वोक्तपीठपूजां विधाय पूर्वोक्तावरणपूजां च कृत्वा जपं कुर्य्यात् ॥ अस्य पुरश्चरणमेकलक्षजपः । तद्दशांशतो घृतहोमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्य्यात् । एवं कृते मंत्रः सिद्धो भवति सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत । तथा च ॥ लक्षं जपेद्घृतैर्हुत्वा तद्दशांशं प्रपूजयेत् ॥ पूर्वोक्तपीठे स्वाभीष्टसिद्धये पूर्ववद्विभुम् ॥ १ ॥ कृष्णाष्टम्यादि भूतांतं यावत्तावज्जपेन्मनुम् ॥ प्रत्यहं साष्टसाहस्रं जुहुयात्तद्दशांशतः ॥ २ ॥ तर्पयेदपि मंत्रोयं सिद्धिमेवं प्रयच्छति ॥ धनं धान्यं सुतान्पौत्रान्सौभाग्यमतुलं यशः ॥ ३ ॥ मूर्तिं कुर्याद्गणेशस्य शुभाहे निम्बदारुणा ॥ प्राणप्रतिष्ठां कृत्वाथ तदग्रे मंत्रमाजपेत् ॥ ४ ॥ यं ध्यात्वा दासवत्सोपि वश्यो भवति निश्चितम् ॥ नदीजलं समादाय सप्तविंशतिसंख्यया ॥ ५ ॥ मंत्रयित्वा मुखं तेन प्रक्षाल्येशसभां व्रजेत् ॥ पश्येयं दृश्यते येन स वश्यो जायते क्षणात् ॥ ६ ॥ चतुःसहस्रं धत्तूरपुष्पाणि मनुनार्पयेत् ॥ गणेशाय नृपादीनां जनानां वश्यताकृते ॥ ७ ॥ सुंदरीवामपादस्य रेणुमादाय तत्र तु ॥ संस्थाप्य गणनाथस्य प्रतिमां प्रजपेन्मनुम् ॥ ८ ॥ तां ध्यात्वा रविसाहस्रं सा समायाति दूरतः ॥ श्वेतार्केणाथ निम्बेन कृत्वा मूर्तिं घृतांशुकाम् ॥ ९ ॥ चतुर्थ्यां पूजयेद्रात्रौ रक्तैः कुसुमचन्दनैः॥ जप्त्वा सहस्रं तां मूर्तिं क्षिपेद्रात्रौ सरित्तटे ॥ १० ॥ स्वेष्टं कार्यं समाचष्टे स्वप्ने तस्य गणाधिपः ॥ सहस्रं निम्बकाष्ठानां होमादुच्चाटयेदरीन्॥ ११ ॥ वैजिणासमिधा होमाद्रिपुर्य्येसपुरं व्रजेत् ॥ वानरस्यास्थि संजप्तं क्षिप्तमुच्चाटयेद्गृहे ॥ १२ ॥ जप्तं नरास्थि कन्याया गृहे क्षिप्तं तदाविकृत॥ कुलालस्य मृदा स्त्रीणां वामपादस्य रेणुना ॥ कृत्वा पुत्तलिकां तस्या हृदि स्त्रीनाम संलिखेत्॥ निखनेन्मंत्रसंजप्तैर्निम्बकाष्ठैः क्षिताविमाम् ॥ सोन्मत्ता भवति क्षिप्रमुद्धृतायां सुखं भवेत् ॥ शत्रोरेवं कृता सा तु लशुनेन समाचिता ॥ १५॥ शरावान्तर्गता सम्यक् पूजिता द्वारि विद्विषः॥ निखाता पक्षमात्रेण शत्रूच्चाटनकृत्स्मृता ॥ १६ ॥ विषमे समनुप्राप्ते सितार्कारिष्टदारुजम् ॥ गणपं पूजितं सम्यक् कुसुमै रक्तचन्दनैः ॥ १७ ॥

१ हुर हुर !

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयभाण्डास्थितं हस्तमात्रे तं निखनेत्स्थले ॥ तत्रोपविश्य प्रजपेन्मंत्री नक्तं दिवा मनुम् ॥ १८ ॥ सप्ताहमध्ये नश्यंति सर्वे घोरा उपद्रवाः ॥ शत्रवो वश्यतां यांति वर्द्धंते धनसंपदः ॥ १९ ॥ दुष्टस्त्रीवामपादस्य रजसा निजदेहजैः ॥ मलैर्मूत्रपुरीषाद्यैः कुंभकारमृदापि च ॥ २० ॥ एतैः कृत्वा गणेशस्य प्रतिमां मयभाण्डगाम् ॥ संपूज्य निखनेद्भूमौ हस्तार्द्धे पूरिते पुनः ॥ २१ ॥ संस्थाप्य वह्निं जुहुयात् कुसुमैर्हयमारजैः॥ सहस्रं सा भवेद्दासी तन्वा च मनसा धनैः ॥२२॥ एवमादिप्रयोगांस्तु नवार्णेनापि साधयेत् ॥ परीक्षिताय शिष्याय प्रदेया निजसूनवे ॥ २३ ॥ इति सप्तत्रिंशदक्षरमंत्रप्रयोगः॥ (प्रकारांतरेणैकाधिकचत्वारिंशदक्षरमंत्रभेदो रुद्रयामलतंत्रे) मंत्रो यथा ॥ ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आँ क्रौँ ह्रींगँघेघे उच्छिष्टाय स्वाहा ॥ इति मंत्रः॥ ॐ अस्य श्रीउच्छिष्टमहागणपतिमंत्रस्य मतंगभगवान् ऋषिः। गायत्री छंदः। उच्छिष्टमहागणपतिर्देवता। गं बीजम् । स्वाहा शक्तिः। ह्रीं कीलकम् ॥ ममाभीष्टसिद्धये जपे विनियोगः ॥ इति विनियोगं कुर्यात् अन्यत्सर्वं पूर्ववत ॥ (मंत्रमहोदधौ) द्वात्रिंशदक्षरमंत्रभेदः ॥ मंत्रो यथा ॥ ॐ हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने आँक्रोंह्रींक्लींह्रींहुँघेघे उच्छिष्टाय स्वाहा ॥ ॐ अस्य श्रीउच्छिष्टगणपतिमंत्रस्य गणक ऋषिः। गायत्री छंदः । उच्छिष्टगणपतिर्देवता । ममाभीष्टसिद्धये जपे विनियोगः ॥ ॐ गणकऋषये नमः शिरसि ॥१॥ ॐ गायत्रीछंदसे नमः मुखे ॥ २ ॥ ॐ उच्छिष्टगणपतिदेवतायै नमः हृदि ॥ ३ ॥ ॐ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति ऋष्यादिन्यासः ॐ हस्तिमुखाय अंगुष्ठाभ्यां नमः ॥ १ ॥ लंबोदराय तर्जनीभ्यां नमः ॥ २ ॥ उच्छिष्टमहात्मने मध्यमाभ्यां नमः ॥ ३ ॥ आँक्रोंह्रींक्लींह्रींहुँ अनामिकाभ्यां नमः ॥ ४ ॥ घेघे उच्छिष्टाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ स्वाहा करतलकरपृष्ठा

१ करवीरोद्भवैः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यां नमः ॥ ६ ॥ इति करन्यासः॥ एवमेव हृदयादिषडंगन्यासं च कुर्य्यात् ॥ अन्यत् सर्वं पूर्ववत् तथा च ॥ द्वात्रिंशदक्षरो मंत्रो यजनं पूर्ववत्स्मृतम् ॥ उच्छिष्टगजवक्त्रस्य मंत्रेष्वेषु न शोधयेत् ॥ १ ॥ सिद्धादि चात्रमासादेः प्राप्तास्तेसिद्धिदा गुरोः ॥ मनवोमी सदा गोप्या न प्रकाश्या यतः कृतः ॥ परीक्षिताय शिष्याय प्रदेया निजसूनवे ॥ २ ॥ इति ॥ अथ प्रकृतग्रंथैकत्रिंशदक्षरमंत्रभेदः ॥ मंत्रो यथा ॥ ॐ नमो हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने क्राँक्रीं ह्रीं घेघे उच्छिष्टाय स्वाहा ॥ अस्य विधानम्॥ कटुनिंबमूलस्य पर्वमानां गणेशप्रतिमां कृत्वा कृष्णाष्टमीमारभ्यामावस्यापर्यंतं पंचशतसंख्याकं जपं प्रतिदिनं कुर्य्यात् ॥ स्वयमुच्छिष्टमुखो भूत्वा गणेशाग्रे स्थाल्यां रक्तचन्दनाक्षतपुष्पाणि धृत्वा समभ्यर्च्य स्वोच्छिष्टमुखेन जपः कर्तव्यः ॥ एवं दिनसप्तकं कृत्वाष्टमे दिवसे स्वयमुच्छिष्टमुखो भूत्वैव भक्ष्यखाद्येन पंचशतं जुहुयात् ॥ ततोभिलषितं ददाति महिमा भवति ॥ १ ॥ अभिलषितबालाचित्रोपरि गणेशं संस्थाप्य प्रत्यहमष्टोत्तरशतं जपेत् दिनत्रयादाकर्षयति ॥ २ ॥ तं गणेशं तत्कपाले संस्थाप्य सा पुनर्गच्छति पुनरानयनायाष्टोत्तरशतं जपेत यदि सा पुनर्नायाति तर्हि तं गणेशमुच्छिष्टमुखाग्रे निधायाष्टोत्तरशतं जपेत् राजा वशी भवति॥ ३ ॥ तं गणेशं नद्यां नीत्वा प्रक्षाल्य स्वमुखाद्वारचतुष्टयं प्रक्षाल्य तस्मात् पतितं किंचिदुदकं भांडे निःक्षिपेत् । तदुदकं ये पिबंति ते सर्वे वश्या भवंति ॥ ४ ॥ तं गणेशं द्वारे तरुवरशाखायां निक्षिप्य संपूज्याष्टोत्तरशतं जपेत् गृहे ह्यखण्डितमन्नं भवति॥ ५ ॥ तं गणेशं ताम्रे रौप्ये वा निक्षिप्य कटिबंधनात् स्त्रियो वश्या भवन्ति शत्रुगणः स्तंभी भवति ॥ ६ ॥ तं गणेशं करतले धृत्वा कनकपुष्पैरर्चयेत पश्चात् करेण करवाले धृते सति संग्रामे जयो भवति दशशतं जपति ॥ ७॥ तं गणेशमन्नोपरि संस्थाप्याष्टोत्तरशतं जपेत् उदरपूर्णार्थमन्नप्राप्तिर्भवति॥ ८ ॥ तं गणेशं पाणौ प्रक्षाल्य

For Private And Personal Use Only

तदुदकपानाच्छत्रुनामग्रहणाद्रिपुनाशः स्यात् ॥ ९ ॥ इत्येकाधिकत्रिंशदक्षरोच्छिष्टगणेशमंत्रप्रयोगः ॥ अथ शक्तिविनायकचतुरक्षर
मंत्रप्रयोगः। (मंत्रमहोदधौ) ॐ ह्रीं ग्रीं ह्रीं ॥ इति चतुरक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य शक्तिगणाधिपमंत्रस्य भार्गव ऋषिः ।
विराट् छंदः । शक्तिगणाधिपो देवता । ग्रीं बीजम् । ह्रीं शक्तिः । ममाभीष्टसिद्धये जपे विनियोगः ॥ ॐ भार्गवर्षये नमः शिरसि १ ॥
विराट्छंदसे नमः मुखे २ ॥ शक्तिगणाधिपदेवतायै नमः हृदि ३ ॥ ग्रीँ बीजाय नमः गुह्ये ४ ॥ ह्रीँ शक्तये नमः पादयोः ५ ॥
विनियोगाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ ग्राँ अंगुष्ठाभ्यां नमः १ ॥ ॐ ग्रीँ तर्जनीभ्यां नमः २ ॥ ॐ ग्रूँ मध्यमाभ्यां नमः
३ ॥ ॐ ग्रैं अनामिकाभ्यां नमः ४ ॥ ॐ ग्रौँ कनिष्ठिकाभ्यां नमः ५ ॥ ॐ ग्रः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥
ॐ ग्राँ हृदयाय नमः १ ॥ ॐ ग्रीं शिरसे स्वहा २ ॥ ॐ ग्रूँ शिखायै वषट् ३ ॥ ॐ ग्रैं कवचाय हुं ४ ॥ ॐ ग्रौँ नेत्रत्रयाय वौषट्
५ ॥ ॐ ग्रः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ इति न्यासं कृत्वा ध्यायेत ॥ अथ ध्यानम्-विषाणांकुशावक्षसूत्रं च पाशं
दधानं करैर्मोदकं पुष्करेण ॥ स्वपत्न्या युतं हेमभूषाभराढ्यं गणेशं समुद्यद्दिनेशाभमीडे ॥ १ ॥ इति ध्यायेत् । ततः पीठादौ रचिते सर्वतो
भद्रमंडले गणेशमंडले वा पद्धतिमार्गेण मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति संपूज्य
नव पीठशक्तीः पूजयेत् । तद्यथा । पूर्वादिक्रमेण ॐ तीव्रायै नमः १ ॥ ॐ चालिन्यै नमः २ ॥ ॐ नंदायै नमः ३ ॥ ॐ भोगदायै नमः ४ ॥ ॐ
कामरूपिण्यै नमः ५ ॥ ॐ उग्रायै नमः ६ ॥ ॐ तेजोवत्यै नमः ७ ॥ ॐ सत्यायै नमः ८ ॥ मध्ये ॐ विघ्ननाशिन्यै नमः ९ ॥ इति पूजयेत्
ततः स्वर्णादिनिर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य ॥ ॐ ह्रीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वशक्तिकमलासनाय नमः॥इति मंत्रेण पुष्पासनं दत्वा पीठमध्ये संस्थाप्य पद्धतिमार्गेण प्रतिष्ठां च कृत्वा मूलेन मूर्ति प्रकल्प्य पाद्या दिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात्॥तथा च पुष्पांजलिमादाय "ॐ संविन्मयःपरोदेवपरामृतरसप्रिय ॥ अनुज्ञां देहि गणप परिवारार्चनाय मे॥ १॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजितस्तर्पितोऽस्तु इति वदेत् ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्षु दिक्षु मध्ये दिक्षु च॥ॐ गाँ हृदयाय नमः ॥ १ ॥ ॐ गीं शिरसे स्वाहा ॥ २ ॥ ॐ गूँ शिखायै वषट् ॥ ३॥ ॐ गैं कवचाय हुं ॥ ४ ॥ ॐ गौं नेत्रत्रयाय वौषट् ॥ ५॥ ॐ गः अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ६ ॥ ततः पुष्पां जलिमादाय मूलमुच्चार्य ॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्" ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥

शक्तिविनायकयंत्रम् ।



१ अत्र त्रयोविंशत्यांकितस्थलेषु पंचविंशत्यांकितशब्दा उच्छिष्टगणपतियंत्रतो ज्ञेयाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति प्रथमावरणम्॥ततोष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधाक्षतपुष्पाणि गृहीत्वा प्राचीक्रमेण अष्टसु दिक्षु ॥ ❀ ॐ वक्रतुंडाय नमः । वक्रतुंडश्रीपादुकां पूजयामि तर्पयामि नमः॥ १ ॥इति सर्वत्र ॥ एकदंष्ट्राय नमः एकदंष्ट्रश्रीपा०॥२॥ ॐ महोदराय नमः । महोदरश्रीपादुकां पूजयामि तर्पयामि नमः ॥३॥ ॐ हस्तिमुखाय नमः । हस्तिमुख श्रीपादुकां०॥४ ॥ ॐ लम्बोदराय नमः लम्बोदरश्रीपादुकां०॥ ५ ॥ ॐ विकटाय नमः । विकटश्रीपा० ॥ ६ ॥ ॐ विघ्नराजाय नमः । विघ्नराजश्रीपा०॥ ७ ॥ ॐ धूम्रवर्णाय नमः । धूम्रवर्णश्रीपा०॥८॥ इत्यष्टौ पूजयेत् ॥ ततः पुष्पांजलिं दत्वाष्टदलाग्रेषु प्राचीक्रमेण ॥ ॐ ब्राह्म्यै नमः। १ ॥ ब्राह्मीश्रीपा० १ ॥ ॐ माहेश्वर्य्यै नमः २॥ माहेश्वरीश्रीपा०२॥ ॐ कौमार्यै नमः ३ कौमारीश्रीपा० ३ ॥ ॐ वैष्णव्यै नमः ४ ॥ वैष्णवीश्रीपा० ४ ॥ ॐ वाराह्यै नमः ५ ॥ वाराहीश्रीपा० ५ ॥ ॐ इन्द्राण्यै नमः ६ ॥ इन्द्राणीश्रीपा० ६ ॥ ॐ चामुंडायै नमः७॥ चामुंडाश्रीपा०७॥ ॐ महालक्ष्म्यै नमः ८ ॥ महालक्ष्मीश्रीपा० ८॥ इत्यष्टौ पूजयेत् ॥ ततः पुष्पांजलिं दत्वा भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां च कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं चतुर्लक्षजपः। अपूपैर्दशांशतो होमः। मध्वक्तैर्दशांशतस्तर्पणं तद्दशांशेन मार्जनं ब्राह्मणभोजनं च कुर्य्यात्। एवं कृते मंत्रः सिद्धो भवति सिद्धे एतन्मंत्रे मंत्री प्रयोगान् साधयेत्॥ तथा च ॥ "एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः ॥ अपूपैर्जुहुयाद्वह्नौ मध्वक्तैस्तर्पयेच्च तम् ॥ १ ॥ घृताक्तमन्नं जुहुयादावर्षादन्नवान्भवेत् ॥ परमान्नैर्हुता लक्ष्मीरिक्षुदंडैर्नृप

❀ शिरःस्थांकपदैस्तुल्यांकस्थलेषु यंत्रपूर्तिर्विधेया ॥

For Private And Personal Use Only

श्रियः ॥ २ ॥ रम्भाफलैर्नारिकेलैः पृथुकैर्वश्यता भवेत् ॥ घृतेन धनमाप्नोति लवणैर्मधुसंयुतैः ॥ ३ ॥ वामनेत्रां वशी कुर्यादपूपैः पृथिवीपतिम् ॥" इति शक्तिविनायकचतुरक्षरमंत्रप्रयोगः ॥ अथ लक्ष्मीविनायकमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा ॥ ॐ श्रींगँ सौम्याय गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा ॥ इत्यष्टाविंशत्यक्षरमंत्रः ॥ अस्य विधानम् ॥ अस्य लक्ष्मीविनायकमंत्रस्य अन्तर्यामी ऋषिः।गायत्री छंदः। लक्ष्मीविनायको देवता । श्रीं बीजम् । स्वाहा शक्तिः । ममाभीष्टसिद्धये जपे विनियोगः॥ ॐ अन्तर्यामिऋषये नमः शिरसि ॥ १ गायत्रीछंदसे नमः मुखे ॥ २ ॥ लक्ष्मीविनायकदेवतायै नमः हृदि ॥ ३ ॥ श्रीं बीजाय नमः गुह्ये ॥ ४ ॥ स्वाहा शक्तये नमः पादयोः ॥ ५ ॥ विनियोगाय नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ श्राँ गाँ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ श्रीं गीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ श्रूँ गूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ श्रैं गैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ श्रौं गौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ श्रः गः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ श्राँ गाँ हृदयाय नमः॥ १ ॥ ॐ श्रीं गीं शिरसे स्वाहा ॥ २ ॥ ॐ श्रूँ गूँ शिखायै वषट् ॥ ३ ॥ ॐ श्रैं गैं कवचाय हुं ॥ ४ ॥ ॐ श्रौं गौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ श्रः गः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः॥ एवं न्यासं कृत्वा ध्यायेत ॥ अथ ध्यानम्-"दन्ताभये चक्रवरौ दधानं कराग्रगं स्वर्णघटं त्रिनेत्रम् ॥ धृताब्जयालिङ्गितमब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीडे ॥ १ ॥" इति ध्यायेत-ततः पीठादौ रचिते सर्वतोभद्रमंडले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः पद्धतिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः। इति संपूज्य नव पीठशक्तीः पूजयेत। तद्यथा। ॐ तीव्रायै नमः॥ १ ॥ ॐ चालिन्यै नमः॥ २ ॥ ॐ नंदायै नमः॥ ३ ॥ ॐ भोगदायै नमः ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ कामरूपिण्यै नमः ॥५॥ ॐ उग्रायै नमः ॥ ६ ॥ ॐ तेजोवत्यै नमः ॥७ ॥ ॐ मत्यायै नमः ॥ ८ ॥ मध्ये ॐ विघ्ननाशिन्यै नमः ॥९॥ इति पूजयेत । ततः स्वर्णादिनिर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणा शोष्य ॐ ह्रीं सर्वशक्तिकमलासनाय नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पद्धतिमार्गेण प्रतिष्ठां च कृत्वा मलेन मूर्ति प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तथा च पुष्पांजलिमादाय ॐ संविन्मयः परेश त्वं परामृतरस प्रिय ॥ अनुज्ञां देहि गणप परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजितस्तर्पितोऽस्तु इति वदेत् ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॥ ॐ श्रां गां हृदयाय नमः ॥ १ ॥ ॐ श्रीं गीं शिरसे स्वाहा ॥ २ ॥ ॐ श्रूं गूं शिखायै वषट् ॥ ३ ॥ ॐ श्रैं गैं

लक्ष्मीविनायकयंत्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कवचाय हुँ ॥ ४ ॥ ॐ श्रौं गौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ श्रः गः अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत्॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य्य ॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्विंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ देवदक्षिणपार्श्वे ॐ शंखाय नमः शंखश्रीपा० १ ॥ देवतावामे०॥ ॐ पद्मनिधये नमः । पद्मनिधिश्रीपा० २ ॥ इति पूजयेत् ॥ ततोऽष्टदले पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधाक्षतपुष्पाणि गृहीत्वा प्राचीक्रमेण अष्टसु दिक्षु ॥ ॐ बलायै नमः । बलाश्रीपादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र ॥ १ ॥ ॐ विमलायै नमः। विमलाश्रीपा०२॥ ॐ कमलायै नमः । कमलाश्रीपा० ३॥ ॐ वनमालिकायै नमः। वनमालिकाश्रीपा० ४ ॥ ॐ विभीषिकायै नमः। विभीषकाश्रीपा० ५ ॥ ॐ मालिकायै नमः। मालिकाश्रीपा० ६ ॥ ॐ शांकर्यै नमः। शांकरीश्रीपादुकां पू०७ ॥ ॐ वसुवालिकायै नमः। वसुवालिकाश्रीपा०८॥ इत्यष्टौ शक्तीः पूजयेत्। ततः पुष्पांजलिमादाय मूलमुच्चार्य॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्॥ २ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत्॥ इति द्वितीयावरणम्॥ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्रायुधानि च पूजयेत्॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं चतुर्लक्षजपः ॥ बिल्वसमिद्भिर्दशांशतो होमः ॥ तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति सिद्धे चेतस्मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च ॥ "चतुर्लक्षं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जपेन्मंत्रं समिद्भिर्बिल्वशाखिनः ॥ दशांशं जुहुयात्पीठे पूर्वोक्ते तं प्रपूजयेत् ॥ १ ॥ एवं सिद्धे मनौ मंत्री प्रयोगान्कर्तुमर्हति ॥ उरोमात्रे जले स्थित्वा मंत्री ध्यात्वार्कमंडले ॥ २ ॥ एवं त्रिलक्षजप्तो धनवृद्धिः प्रजायते ॥ बिल्वमूलं समास्थाय तावज्जपे फलं हि तत् ॥ ३ ॥ अशोककाष्ठैर्ज्वलिते वह्नावाज्याक्ततण्डुलैः ॥ होमतो वशयेद्विश्वमर्ककाष्ठस्रुचा ध्रुवम् ॥ ४ ॥ खदिराग्नौ नरपतिं लक्ष्मीं पायसहोमतः ॥" इति लक्ष्मीविनायकमंत्रप्रयोगः ॥ अथ त्रैलोक्यमोहनकरगणेशमंत्रप्रयोगः ॥ मंत्रमहोदधौ । मंत्रो यथा ॥ वक्रतुंडैकदंष्ट्राय क्लींह्रींश्रींगं गणपते वर वरद सर्वजनं मे वशमानय स्वाहा ॥ इति त्रयस्त्रिंशदक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य श्रीत्रैलोक्यमोहनकरगणेशमंत्रस्य गणक ऋषिः । गायत्री छंदः । त्रैलोक्यमोहनकरो गणेशो देवतामभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ गणकऋषये नमः शिरसि १ ॥ गायत्रीछंदसे नमः मुखे २ ॥ त्रैलोक्यमोहनकरगणेशदेवतायै नमः हृदि ३ ॥ विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॐ वक्रतुंडैकदंष्ट्राय क्लींह्रींश्रींगं अंगुष्ठाभ्यां नमः १ ॥ ॐ गणपते तर्जनीभ्यां नमः २ ॥ ॐ वर वरद मध्यमाभ्यां नमः ३ ॐ सर्वजनम् अनामिकाभ्यां नमः ४ ॥ ॐ मे वशमानय कनिष्ठिकाभ्यां नमः ५ ॥ ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॐ वक्रतुंडैकदंष्ट्राय क्लींह्रींश्रींगं हृदयाय नमः १ ॥ ॐ गणपते शिरसे स्वाहा २ ॥ ॐ वर वरद शिखायै वषट् ३ ॥ ॐ सर्वजने कवचाय हुं ४ ॥ ॐ मे वशमानय नेत्रत्रयाय वौषट् ५ ॥ ॐ स्वाहा अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् । गदाबीजपूरे धनुः शूलचक्रे सरोजोत्पले पाशधान्याग्रदन्तान् ॥ करैः संदधानं स्वशुंडाग्रराजन्मणीकुम्भमङ्काधिरूढं स्वपत्न्या १ ॥ सरोजन्मना भूषणानां भरेणोज्ज्वलद्धस्ततन्व्या समालिङ्गिताङ्गम् ॥ करीन्द्राननं चन्द्रचूडं त्रिनेत्रं जगन्मोहनं रक्तकांतिं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भजेत्तम्॥ २॥इति ध्यायेत्। ततः पीठादौ रचिते सर्वतोभद्रमंडले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः पद्धतिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः।इति संपूज्य नव पीठशक्तीः पूजयेत् ।तद्यथा। पूर्वादिक्रमेण ॐ तीव्रायै नमः१ ॐ चालिन्यै नमः २ ॐ नंदायै नमः ३ ॐ भोगदायै नमः ४ॐ कामरूपिण्यै नमः ५ ॐ उग्रायै नमः६ ॐ तेजोवत्यै नमः७ ॐ सत्यायै नमः८ मध्ये । ॐ विघ्ननाशिन्यै नमः ९ इति पूजयेत् । ततः स्वर्गादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य । ॐ ह्रीं सर्वशक्तिकमलासनाय नमः ॥ इति मंत्रेण पुष्पायासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तथा च । पुष्पांजलिमादाय ॥ संविन्मयः परेश त्वं परामृतरसप्रिय॥ अनुज्ञां देहि गणप परिवारार्चनाय मे॥ १॥"इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितस्तर्पितोऽस्तु इति वदेत्॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्षु दिक्षु च। दिक्षु ॐ वक्रतुंडैकदंष्ट्राय क्लींह्रींश्रींगं हृदयाय नमः १ ॥ ॐ गणपते शिरसे स्वाहा २॥ ॐ वर वरद शिखायै वषट् ३॥ ॐ सर्वजनं कवचाय हुं ४॥ ॐ मे वशमानय नेत्रत्रयाय वौषट् ५॥ ॐ स्वाहा अस्त्राय फट् ६ इति षडंगानि पूजयेत्॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य॥"ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् १॥"इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत्॥ इति प्रथमावरणम् ॥ ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधाक्षतपुष्पाणि गृहीत्वा प्राचीक्रमेण ॥ अष्टसु दिक्षु ॐ वामायै नमः । वामाश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ ॥ ॐ ज्येष्ठायै नमः । ज्येष्ठाश्रीपा० २ ॥ ॐ रौद्र्यै नमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रौद्रीश्रीपा० ३ ॥ ॐ काल्यै नमः। कालीश्रीपा० ४ ॥ ॐ कलपदा
दिकायै नमः। कलपदादिकाश्रीपा० ५ ॥ ॐ विकरिण्यैनमः । विक
रिणीश्रीपा० ६॥ ॐ बलायै नमः। बलाश्रीपा० ७ ॥ ॐ प्रमथिन्यै
नमः । प्रमथिनीश्रीपा० ८ ॥ देवस्याग्रे ॥ ॐ सर्वभूतदमन्यै नमः ।
सर्वभूतदमनीश्रीपा० १ ॥ ॐ मनोन्मन्यै नमः । मनोन्मनीश्रीपा० २॥
चतुर्षु दिक्षु ॥ ॐ प्रमोदाय नमः । प्रमोदश्रीपा० १ ॥ ॐ सुमुखाय
नमः । सुमुखश्रीपा० २ ॥ ॐ दुर्मुखाय नमः । दुर्मुखश्रीपा० ३ ॥
ॐ विघ्ननाशाय नमः विघ्ननाशश्रीपा० ४ ॥ इति पूजयेत् ॥ ततः
पुष्पांजलिमादाय मूलमुच्चार्य्य॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् २ ॥" इति पठित्वा पुष्पांजलिं
च दत्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत ।
इति द्वितीयावरणम्॥ ततोष्टदलाग्रेषु॥ ॐ आं ब्राह्म्यै नमः । ब्राह्मीश्रीपा०
१॥ ॐ ईं माहेश्वर्य्यै नमः। माहेश्वरीश्रीपा०२॥ ॐ ऊं कौमार्य्यै नमः।

॥ श्रीसर्वमोहनकरगणेशयंत्रम् ।



For Private And Personal Use Only

कुमारीश्रीपा० ३ ॥ ॐ क्रँ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ ॥ ॐ ह्रूँ वाराह्यै नमः । वाराहीश्रीपा० ५ ॥ ॐ ऐं इन्द्राण्यै नमः। इन्द्राणीश्रीपा० ६ ॥ ॐ औं चामुंडायै नमः । चामुंडाश्रीपा० ७ ॥ ॐ अः महालक्ष्म्यै नमः। महालक्ष्मीश्रीपा० ८ ॥ इति पूजयेत् । ततः पुष्पांजलिमादाय मूलमचार्य्य ॥ अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥१॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् इति तृतीयावरणम् ॥ ३ ॥ ततः भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात्। अस्य पुरश्चरणं चतुर्लक्षजपः॥ अष्टद्रव्यैर्दशांशतो होमः। एवंकृते मंत्रः सिद्धो भवति सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च ॥ " वेदलक्षं जपेन्मंत्रमष्टद्रव्यैर्दशांशतः ॥ हुत्वा पूर्वोदितं पीठे पूजयेद्गणनायकम् ॥ १ ॥ एवं सिद्धे मनौ कुर्य्यात्प्रयोगानिष्टसिद्धये । वशयेत्कमलैर्भूपान्मंत्रिणः कुमुदैर्हुतैः ॥ २ ॥ समिद्भिरश्वत्थदलसमुद्भूतैर्द्धरासुरान् ॥ उदुम्बरोत्थैर्नृपतीन्प्लक्षैर्वाटैर्विशोन्तिमान ॥ ३ ॥ क्षौद्रेण कनकप्राप्तिर्गोप्राप्तिः पयसा गवाम् ॥ ऋद्धिर्दध्नोदनैरन्नं घृतैः श्रीर्वेतसैर्जलम् ॥ ४ ॥" इति श्रीत्रैलोक्यमोहनकरगणेशमंत्रप्रयोगः ॥ अथ हारिद्रागणेशमंत्रप्रयोगः । (मंत्रमहोदधौ) मंत्रो यथा ॥ ॐ हुँगँग्लौँ हारिद्रागणपतये वर वरद सर्वजनहृदयं स्तंभय स्तंभय स्वाहा ॥ इति द्वात्रिंशदक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य हारिद्रागणनायकमंत्रस्य मदन ऋषिः। अनुष्टुप् छंदः । हारिद्रागणनायको देवता ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥ ॐ मदनऋषये नमः शिरसि १ ॥ अनुष्टुप्छंदसे

१ चलदलोश्वत्थस्तत्प्रसमिद्भिर्धरासुरान्विप्रान् वशयेत्-प्लक्षसमिद्भिः वैश्यान्-वटजाभिरंतिमान् (शूद्रान्)।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः मुखे २ ॥ हरिद्रागणनायकदेवतायै नमः हृदि ३ ॥ विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ हुँगँलौँ अंगुष्ठाभ्यां नमः १ ॥ हरिद्रागणपतये तर्जनीभ्यां नमः २ ॥ वर वरद मध्यमाभ्यां नमः ३ ॥ सर्वजनहृदयम् अनामिकाभ्यां नमः ४ ॥ स्तंभय स्तंभय कनिष्ठिकाभ्यां नमः ५ ॥ स्वाहा करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः॥ॐ हुँगँग्लौँ हृदयाय नमः १ ॥ हरिद्रागणपतये शिरसे स्वाहा २ ॥ वर वरद शिखायै वषट् ३ ॥ सर्वजनहृदयं कवचाय हुँ ॥ स्तंभय स्तंभय नेत्रत्रयाय वौषट् ५ ॥ स्वाहा अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत ॥ अथ ध्यानम्-पाशाङ्कुशौ मोदकमेकदंतं करैर्दधानं कनकासनस्थम् ॥ हारिद्रखण्डप्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥ १ ॥ इति ध्यात्वा पीठादौ रचिते सर्वतोभद्रमंडले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः पद्धतिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति संपूज्य नव पीठशक्तीः पूजयेत । तद्यथा । पूर्वादिक्रमेण ॐ तीव्रायै नमः १ ॐ चालिन्यै नमः २ ॐ नंदायै नमः ३ ॐ भोगदायै नमः ४ ॐ कामरूपिण्यै नमः ५ ॐ उग्रायै नमः ६ ॐ तेजोवत्यै नमः ७ ॐ सत्यायै नमः ८ मध्ये ॐ विघ्ननाशिन्यै नमः ९ इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य॥ ह्रीं सर्वशक्तिकमलासनाय नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः ॥ पुष्पांजलिमादाय ॥"ॐ संविन्मय परेश त्वं परामृतरसप्रिय ॥ अनुज्ञां देहि गणप परिवारार्चनाय मे॥ १॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत॥इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्ने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्यादिपु चतसृषु दिक्षु मध्ये दिक्षु च॥ ॐ हुँ गँ ग्लौँ हृदयाय नमः हृदये श्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र १ ॥ ॐ हारिद्रागणपतये शिरसे स्वाहा शिरसि श्रीपा० २॥ ॐ वर वरद शिखायै वषट् शिखायां श्रीपा० ३॥ ॐ सर्वजनहृदयं कवचाय हुं ४॥ ॐ स्तंभयस्तंभय नेत्रत्रयाय वौषट् ५ ॥ ॐ स्वाहा अस्त्राय फट् इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य्य ॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधाक्षनपुष्पाणि गृहीत्वा प्राचीक्रमेण अष्टसु दिक्ष ॥ ॐ वामायै नमः वामाश्रीपा० १॥ ॐ ज्येष्ठायै नमः ज्येष्ठाश्रीपा० २ ॥ ॐ रौद्रयै नमः रौद्रीश्रीपा० ३ ॥ ॐ काल्यै नमः कालीश्रीपा० ४॥ ॐ कलपदादिकायै नमः कलपदादिकाश्रीपा० ५॥ ॐ विकरिण्यै नमः विकरिणीश्रीपा० ६ ॥ ॐ बलायै नमः बलाश्रीपा० ७ ॥ ॐ प्रमथिन्यै नमः प्रमथिनीश्रीपा० ८ ॥ इत्यष्टौ पूजयेत् ॥ देवस्याग्रे ॥ ॐ सर्वभूतदमन्यै नमः सर्वभतदमनीश्रीपा० १ ॥ ॐ मनोन्मन्यै नमः मनोन्मनीश्रीपा० २ ॥ इति पूजयेत् । ततः चतसृषु दिक्षु प्राचीक्रमेण ॥ ॐ प्रमोदाय नमः प्रमोदश्रीपा० १ ॥ ॐ सुमुखाय नमः सुमुखश्रीपा० २॥ ॐ दुर्मुखाय नमः दुर्मुखश्रीपा० ३ ॥ ॐ विघ्ननाशाय नमः विघ्ननाशश्रीपा० ४ ॥ इति पूजयेत्। ततः पुष्पांजलिमादाय मलमुच्चार्य॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम॥ १॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत्॥ इति द्वितीयावरणम् ॥ २॥ ततोष्टदलाग्रेषु ॥ ॐ आँ ब्राह्म्यै नमः ब्राह्मीश्रीपा० १ ॥ ॐ ई माहेश्वर्यै नमः महेश्वरीश्रीपा० २ ॥ ॐ ऊं कौमार्यै नमः कौमारीश्रीपा० ३ ॥ ॐ

For Private And Personal Use Only

ॐ वैष्णव्यै नमः वैष्णवीश्रीपा० ४ ॥ ॐ ह्रूँ वाराह्यै नमः वाराहीश्री
पा० ५ ॥ ॐ ऐं इन्द्राण्यै नमः इंद्राणीश्रीपा० ६ ॥ ॐ औं चामुंडायै
नमः चामुंडाश्रीपा० ७ ॥ ॐ अः महालक्ष्म्यै नमः महालक्ष्मीश्रीपा०
८ ॥ इत्यष्टौ पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॥ "अभी
ष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्च
नम ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य
पूजितास्तर्पिताः संतु इति वदेत् ॥ इति तृतीयावरणम् ॥ ततः भूपुरे पूर्वा
दिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूजयेत् ॥ इत्या
वरणपूजां कृत्वा धूपादिनमस्कारान्तं संपूज्य जपं कुर्यात् ॥ अस्य
पुरश्चरणं चतुर्लक्षजपः। हरिद्राचूर्णमिश्रिताज्यतंडुलैश्च दशांशतो होमः।
तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ एवंकृते मंत्रः सिद्धो
भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्॥तथा च-वेदलक्षं जपित्वान्ते
हरिद्राचूर्णमिश्रितैः ॥ दशांशं तण्डुलैर्हुत्वा ब्राह्मणानपि भोजयेत् ॥ १ ॥

हरिद्रागणेशयंत्रम्।



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमाराधितो मंत्रस्सिद्धो यच्छेन्मनोरथान्॥ शुक्लपक्षे चतुर्थ्यां तु कन्यापिष्टहरिद्रया ॥ २॥ विलिप्यांगं जले स्नात्वा पूजयेद्गणनायकम्॥ तर्पयित्वा पुरस्तस्य सहस्रं साष्टकं जपेत् ॥ ३ ॥ शतं हुत्वात्वाज्यपूपैर्भोजयेद्ब्रह्मचारिणः ॥ कुमारीरपि संतोष्य गुरुं प्राप्नोति वांछितम् ॥ ४ ॥ लाजैः कन्यामवाप्नोति कन्यापि लभते वरम् ॥ वंध्या नारी रजःस्नाता पूजयित्वा गणाधिपम् ॥ ५ ॥ पलप्रमाणगोमूत्रे पिष्ट्वा सिंधुवचानिशाः॥ सहस्रं मंत्रयेत्कन्या वटून्संभोज्य मोदकैः ॥ ६ ॥ पीत्वा तदौषधं पुत्रं लभते गुणसागरम् ॥ वाणीस्तंभं रिपुस्तंभं कुर्य्यान्मनुरुपासितः ॥ ७ ॥ जलाग्निचौरसिंहाद्यसमुत्थानपि रोधयेत् ॥ शार्ङ्गीमांतस्थितः सेन्दुर्बीजमुक्तं गणेशितुः ॥ हारिद्राख्यस्य यजनं पूर्ववत्प्रोदितं मनोः ॥ ८ ॥ प्रोक्ता ये ते गणेशस्य मंत्रा इष्टसमीप्सिताः ॥ गोपनीया न दुष्टेभ्यो वदनीयाः कथंचन ॥९॥" इति श्रीहारिद्रागणेशमंत्रप्रयोगः ॥ अथ ऋणहर्तृगणेशमंत्रविधानम्॥ (कृष्णयामलतंत्रे) तत्रादौ ऋणहर्तृगणेशस्तोत्रप्रारंभः ॥ "कैलासे पर्वते रम्ये शंभुं चन्द्रार्द्धशेखरम् ॥ षडाम्नायसमायुक्तं पप्रच्छ नगकन्यका ॥ १॥ पार्वत्युवाच ॥ देवेश परमेशान सर्वशास्त्रार्थपारग ॥ उपायमृणनाशस्य कृपया वद सांप्रतम् ॥ २ ॥ शिव उवाच ॥ सम्यक्पृष्टं त्वया भद्रे लोकानां हितकाम्यया ॥ तत्सर्वं संप्रवक्ष्यामि सावधानावधारय ॥३॥ ॐ अस्य श्रीऋणहरणकर्तृगणपतिस्तोत्रमंत्रस्य सदाशिव ऋषिः अनुष्टुप् छंदः । श्रीऋणहर्तृगणपतिर्देवता ग्लौं बीजम्। गः शक्तिः।गों कीलकम्। मम सकलर्णनाशने जपे विनियोगः॥ॐ सदाशिवर्षये नमः शिरसि १।अनुष्टुप् छंदसे नमः मुखे २। श्रीऋणहर्तृगणेशदेवतायै नमः हृदि ३। ग्लौं बीजाय नमः गुह्ये ४। गः शक्तये नमः पादयोः ५। गों कीलकाय नमः सर्वाङ्गे ६। इति ऋष्यादिन्यासः॥ॐ गणेश अंगुष्ठाभ्यां नमः १। ऋणं छिंधि तर्जनीभ्यां नमः २। वरेण्यं मध्यमाभ्यां नमः३। हुं अनामिकाभ्यां नमः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

४। नमः कनिष्ठिकाभ्यां नमः५। फट् करतलकरपृष्ठाभ्यां नमः ६। इति करन्यासः ॥ ॐ गणेश हृदयाय नमः१ । ऋणं छिन्धि शिरसे स्वाहा २। वरेण्यं शिखायै वषट् ३। हुं कवचाय हुं ४। नमः नेत्रत्रयाय वौषट् ५। फट् अस्त्राय फट् ६। इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् । "ॐ सिंदूरवर्णं द्विभुजं गणेशं लम्बोदरं पद्मदले निविष्टम्॥ब्रह्मादिदेवैः परिसेव्यमानं सिद्धैर्युतं तं प्रणमामि देवम् ॥४॥ सृष्ट्यादौ ब्रह्मणा सम्यक् पूजितः फलसिद्धये ॥ सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥५॥ त्रिपुरस्य वधात्पूर्वं शंभुना सम्यगर्चितः ॥ सदैव० ॥६ ॥ हिरण्यकश्यप्वादीनां वधार्थे विष्णुनार्चितः ॥सदैव० ॥७॥ महिषस्य वधे देव्या गणनाथः प्रपूजितः॥सदैव०॥८॥ तारकस्य वधात्पूर्वं कुमारेण प्रपूजितः॥ सदैव०॥९॥ भास्करेण गणेशो हि पूजितश्छविसिद्धये ॥ सदैव०॥ १०॥ तश्छनि०॥ शशिना कांतिवृद्ध्यर्थं पूजितो गणनायकः ॥ सदैव०॥ ११॥ पालनाय च तपसां विश्वामित्रेण पूजितः॥ सदैव० ॥१२ ॥ इदंत्वृणहरस्तोत्रं तीव्रदारिद्र्यनाशनम् ॥ एकवारं पठेन्नित्यं वर्षमेकं समाहितः ॥ १३ ॥ दारिद्र्यं दारुणं त्यक्त्वा कुबेरसमतां व्रजेत् ॥ फडंतोयं महामंत्र सार्द्धपंचदशाक्षरः ॥१४॥ मंत्रो यथा "ॐ गणेश ऋणं छिंधि वरेण्यं हुँ नमः फट् " इति सार्द्धपंचदशाक्षरो मंत्रः ॥ इमं मंत्रं पठेदन्ते ततश्च शुचिभावनः ॥ एकविंशतिसंख्याभिः पुरश्चरणमीरितम् ॥ १५ ॥ सहस्रावर्तनात्सम्यक् षण्मासं प्रियतां व्रजेत् ॥ बृहस्पतिसमो ज्ञाने धने धनपतिर्भवेत् ॥ १६ ॥ अस्यैवायुतसंख्याभिः पुरश्चरणमीरितम ॥ लक्षमावर्तनात्सम्यग् वांछितं फलमाप्नुयात ॥ १७ ॥ भूतप्रेतपिशाचानां नाशनं स्मृतिमात्रतः ॥ १८ ॥ इति श्रीकृष्णयामलतंत्रे उमामहेश्वरसंवादे ऋणहरणकर्तृगणेशस्तोत्रं समाप्तम् ॥ अथ सिद्धविनायकमन्त्रप्रयोगः॥ (प्राकृतग्रंथे) मंत्रो यथा "ॐ नमो सिद्धविनायकाय सर्वकार्यकर्त्रे सर्वविघ्नप्रशमनाय सर्वराज्यवश्यकरणाय

For Private And Personal Use Only

सर्वजनसर्वस्त्रीपुरुषाकर्षणाय श्रीँ ॐ स्वाहा॥ अस्य विधानम्॥ अष्टोत्तरशतं प्रतिदिनं जपेत् कार्यं सिद्धं भवति। यात्रासमये जपित्वा मार्गभयं नाशयति सर्वकार्याणि सिद्ध्यंति॥ "अन्यत्॥ ॐ ह्रीं क्लीं वीरवरगणपतये वः वः इदं विश्व मम वशमानय ॐ ह्रीं फट्" अस्य विधानम्॥ रक्तवस्त्रं परिधाय रक्तचंदनेन त्रिपुंड्रं कृत्वा गणपतिं ध्यात्वा द्वादशसहस्रं जपेत्। ततः प्रत्यक्षो भूत्वा वरं ददाति। पुनः प्रतिदिनं पंचामृतेन स्नात्वा अष्टोतरशतं जपेत्। तावत् होमयेत् यावदष्टसिद्धिप्राप्तिर्भवेत्॥ अन्यत् "ॐ गीं गूं गणपतये नमः स्वाहा" अस्य विधानम्॥ भूशय्याब्रह्मचर्येण लक्षं जपेत्। पंचखाद्येन दशांशतो होमः ऋद्धिसिद्धिप्राप्तिर्भवति विघ्नान्नाशयति॥ अन्यत्॥ (वीरभद्रोड्डीशतन्त्रे) "ॐ गं गणपतये नमः" अस्यविधानम्। कुंभकारस्य मृदमानीय गणेशप्रतिमां कृत्वा पंचोपचारैः संपूज्य तदग्रे प्रतिदिनं सहस्रं जपेत्। तदा सप्तदिनांतरे सिद्धो भवति। पुनः प्रतिदिनं जपित्वा बुद्धिं वर्द्धयति मासैकेन स्त्रीलाभो भवति षट्मासांतरे धनं प्राप्नोति। तथा च "संध्यायां जपमानस्य सहस्रैकं स्वशक्तितः॥ शताधिकसहस्रेण इच्छासिद्धिं ददाति च॥३॥ अपराह्णे च देवेशि शुभां मतिं लभेन्नरः॥ मासैनेकेन देवेशि श्रियं च लभते ध्रुवम्॥ षण्मासेन वरारोहे महाधनपतिर्भवेत्॥" अन्यत्॥ (वीरभद्रोड्डीशतंत्रे) मंत्रो यथा॥ "ॐ गं गणपतये सर्वविघ्नहराय सर्वाय सर्वगुरवे लंबोदराय ह्रीं गं नमः।" अस्य विधानम्॥ पुष्यार्के श्वेतार्कमयं लंबोदरं निर्माय चतुर्भुजं कृत्वार्चयेत्। स्वगृहे स्थापयेत्। श्वेतपदार्थैरर्चयेत्। अष्टोत्तरशतं जपेत्। क्षीरमध्ये स्थापयेत्। स्वयं पूजयेत्। तद्विधानात्संध्यायामष्टोत्तरशतं जप्त्वा संग्रामकाले एकांते महती पूजा कार्या सहस्रैकं जपेत् शिरसा धारयेत्। संग्रामे अस्त्रं निवारयति रक्षां करोति लंबोदरः। मूलनक्षत्रे सूर्यप्रभेन अंगुलमात्रं लंबोदरं निर्माय पूजयेत्। सिंदूरभाजने संस्थाप्य तद्दिने प्रतिष्ठापयेत्। त्रिसंध्यं सहस्रंसहस्रं जपं कार्यं वस्त्रं च स्थापयेत्। यत्प्रार्थयति तं प्राप्नोति

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यह शतमष्टोत्तरं जप्त्वा मासेन मनोभीष्टं ददाति ॥ इति सिद्धिविनायकनामामंत्रप्रयोगः ॥ इति श्रीगणेशपटल समाप्तम् ॥

॥ अथ गणेशपद्धतिप्रारम्भः ॥ तत्रादौ पूर्वकृत्यम् ॥ पुरश्चरणात् प्राक् तृतीयदिवसे क्षौरादिकं विधाय ततः प्रायाश्चित्तांगभूत विष्णुपूजां विष्णुतर्पणंविष्णुश्राद्धं होमं चांद्रायणादिव्रतं च कुर्यात । व्रताशक्तौ गोदानं द्रव्यदानं च कुर्यात । यदि सर्वकर्मा शक्तस्ततः प्रायश्चित्तांगभूतपंचगव्यप्राशनं कुर्यात् । तत्र मंत्रः । "यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके । प्राशनात्पंचगव्यस्य दहत्यग्निरिवेन्धनम् ॥ १ ॥" इति पठित्वा प्रणवेन पंचगव्यं पिबेत । तद्दिने उपवासं कृत्वा अशक्तश्चेत पयःपानं हविष्यान्नेनैकभक्तव्रतं कृत्वा ततः पुरश्चरणात पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थं चायुतगायत्रीजपं कुर्यात। तद्यथा। देशकालौ संकीर्त्य ज्ञाताज्ञात पापक्षयार्थं करिष्यमाणामुकगणेशपुरश्चरणाधिकारार्थममुकमंत्रेण सिद्ध्यर्थं च गायत्र्ययुतजपमहं करिष्ये इति संकल्प्य गायत्र्ययुतं जपेत्।ततः गायत्र्या आचार्य्यऋषिं विश्वामित्रं तर्पयामि १ गायत्रीछंदस्तर्पयामि२ सवितारं देवतां तर्पयामि ३ इति तर्पणं कृत्वा ततोऽस्यां रात्रौ देवतोपास्ति शुभाशुभस्वप्नं विचारयेत्।तद्यथा स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं स्थित्वा वृषभ ध्वजं प्रार्थयेत्।तत्र मंत्रः "ॐ भगवन्देव देवेश शूलभृद् वृषवाहन ॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वत॥ १॥ॐ नमोऽजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ २ ॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधा स्यामि त्वत्प्रसादान्महेश्वर॥ ३॥" इति मंत्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य निद्रां कुर्य्यात्। ततः स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवा स्वयं स्वप्नं विचारयेत् । इति पूर्वकृत्यम् । ततश्चन्द्रतारादिबलान्विते सुमुहूर्ते विविक्ते देशे जपस्थानं प्रकल्प्य पुरश्चरणदिवसे ब्राह्मे मुहूर्ते चोत्थाय प्रातःस्मरणं कुर्यात्। अथ गणेशप्रातःस्मरणम्॥ "ॐ प्रातः स्मरामि गणनाथमनाथबंधुं सिंदूरपूर्णपरिशोभितगंडयुग्मम्॥ उद्दण्डविघ्नपरिखण्डनचण्डदण्डमाखण्डलादिसुरनायकवृन्दवंद्यम् ॥ १ ॥ प्रातर्नमामि चतुराननवंद्यमानमिच्छानुकूलमखिलं च वरं ददानम् ॥ तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं पुत्रं विलासचतुरं शिवयोः शिवाय ॥ २ ॥ प्रातर्भजाम्यभयदं खलु भक्तशोकदावानलं गणविभुं वरकुंजरास्यम ॥ अज्ञानकाननविनाशनहव्यवाहमुत्साहवर्धनमहं सुतमीश्वरस्य ॥ ३ ॥" श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ॥ प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ४ इति स्मरणं कृत्वा भूमिं प्रार्थयेत् । तत्र मंत्रः । "समुद्रमेखले देवि पर्वतस्तनमंडले॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥" इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पादं दत्त्वा बहिर्व्रजेत् । इति प्रातःकृत्यम् । ततो ग्रामाद्बहिर्नैर्ऋत्यकोणे जनवर्जिते उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरः प्रावृत्य मलमोचनं कृत्वा मृत्तिकया जलेन च यथासंख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गंडूषं कृत्वा दंतधावनं च कुर्यात् । तद्यथा--आम्रचंपकापामार्गान्यतमं द्वादशांगुलं दंतकाष्ठं गृहीत्वा

---

१ लिंगं चंद्रार्कयोर्बिंबं भारतीं जाह्नवीं गुरुम्। रक्ताभिषतरणं युद्धे जयोऽनलस्य मर्चनम्॥ शिखिहंसरथांगाढ्ये रथे स्थानं च मोहनम् । आरोहणं सारसस्य धनलाभश्च निम्नगाम्॥ प्रासादः स्यंदनं पद्मं छत्रं कन्या द्रुमः फली। नागो दीपो हयः पुष्पं वृषभोश्वश्च पर्वतः॥ सुराघटो ग्रहस्तारा नारी सूर्योदयोप्सराः। हर्म्यशैलविमानानामारोहो गगने गमः॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् । दध्योदनादनं राज्याभिषेको गोवृषध्वजाः॥ सिंह सिंहासनं शंखो वादित्रं रोचनादिभिः । चंदनं तर्पणं चैषां स्वप्ने वै दर्शनं शुभम्॥ तैलाभ्यक्तः कृष्णवर्णो नग्नो नागर्तवायसौ॥ शुष्ककंटकिवृक्षश्च चांडालो दीर्घकन्धरः। प्रासादस्थलहीनश्च नैत स्वप्ने शुभावहाः॥ इति स्वयं स्वप्नं विचारयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रार्थयेत् । तत्र मंत्रः । "आयुर्बलं यशो वर्चः प्रजापशुधनानि च॥श्रियं प्रज्ञां च मेधां च त्वं नो देहि वनस्पते॥ १॥" इति संप्रार्थ्य ॐ ह्रीं तडित् स्वाहा इति मंत्रेण काष्ठं छित्त्वा ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः इत्यनेन दंतान् संशोध्य ऐं इति बीजेन जिह्वामुल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्ऋत्ये शुद्धदेशे निक्षिपेत् । मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्यात्।इति शौचक्रिया॥ततः तीर्थस्नानं मंगलस्नानं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा गृहस्नानं कुर्यात अथ गृहस्नानप्रयोगः॥ तात्कालिकोद्धृतोदकेन उष्णोदकेन वा कृत्वा न तु पर्युषितशीतोदकेन ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् ॥ तत्र मंत्रः॥ "गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥ १ ॥ ॐ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ २ ॥ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ ३ ॥" इति तीर्थान्यावाह्य ॥ ऋतं च सत्यमिति मंत्रेणाभिमंत्र्य स्नानं कुर्य्यात॥ एवं स्नानं कृत्वा शुष्कं शुभ्रं रक्तं वा कार्पास वस्त्रं परिधाय सूर्यायार्घ्यं दद्यात॥ तत्र मंत्रः॥ "एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते ॥" इत्यर्घ्यं दत्त्वा स्नायी वस्त्रं परिपीड्य आचम्य पंचत्रिपुंड्रं कृत्वा रुद्राक्षमालां धारयेत् । ततो जपस्थाने गत्वा । नित्यनैमित्तिकं समाप्य अश्वत्थोदुम्बरप्लक्षानामन्यतमान वितस्तिमात्रान् दश कीलान॥ॐ नमः सुदर्शनायास्त्राय फट् इति मंत्रेणाष्टोत्तरशताभिमंत्रितान् ॥ " ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः ॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु ॥ १ ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः । अपसर्प्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥ २ ॥" इति मंत्रद्वयेन दशदिक्षु दशकीलान् निखनेत॥ततस्तेषु॥ॐ सुदर्शनायास्त्राय फट्॥इति मंत्रेण प्रत्येककीलान् संपूज्य तद्बाह्ये भूतबलिं दद्यात्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र मंत्रः॥ "ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः॥मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ॥ १॥ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥ २ ॥" इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दद्यात् ॥ इति भूतेभ्यो बलिं दत्त्वा हस्तौ पादौ प्रक्षाल्याचामेत् ॥ ततः "ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा॥यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ १॥" इति मंत्रेण मंडपांतरं प्रोक्ष्य तत्र तावत् आसनभूमौ कूर्मशोधनं कार्यम् ॥ यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य जपं तत्रैव दीपस्थानं च कुर्यात् ॥ यत्र बहवः जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् ॥ एवं कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा तत्र ॥ ॐ कूर्माय नमः ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥ २ ॥ ॐ पृथिव्यै नमः ॥ इति गंधाक्षतपुष्पैः संपूज्य तदुपरि कुशासनं तदुपरि मृगाजिनं तदुपरि कंबलाद्यासनमास्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण ॐ अनंतासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥ इति मंत्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् ॥ एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य आसनशोधनं कुर्यात् ॥ तत्र मंत्रः ॥ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः कूर्मो देवता । सुतलश्छंदः । आसने विनियोगः ॥ "ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥" इति मंत्रेण आसनं प्रोक्ष्य ॥ ततो मूलमंत्रेण शिखां बद्ध्वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्री अमुकगणपतिदेवताप्रीतये अमुकमंत्रसिद्धये अमुकसंख्याजपं तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये ॥ इति संकल्प्य भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा गणेशकलामातृ

For Private And Personal Use Only

कान्यासं च कुर्यात ॥ तथा च तत्र क्रमः ॥ ॐ अस्य विघ्नेशादिकलामातृकान्यासस्य गगक ऋषिः । निवृद्गायत्री छंदः । विनायको देवता । हलो बीजानि । स्वराः शक्तयः । सर्वेष्टसिद्धये न्यासे विनियोगः ॥ ॐ गाँ हृदयाय नमः १ ॥ ॐ गीं शिरसे स्वाहा २ ॥ ॐ गूँ शिखायै वषट् ३ ॥ ॐ गैं कवचाय हुं ४ ॥ ॐ गौं नेत्रत्रयाय वौषट् ५ ॥ ॐ गः अस्त्राय फट् ॥ ६ ॥ एवं षडंगन्यासं कृत्वा गजाननं ध्यायेत ॥ अथ ध्यानं ॥ "गुणांकुशवराभीतिपाणिरक्ताब्जहस्तया ॥ प्रिययालिंगितं रक्तं त्रिनेत्रं गणपं भजे ॥ १ ॥" एवं ध्यात्वा न्यासं कुर्यात ॥ तथा च तत्र क्रमः ॥ ॐ अं विघ्नेशह्रीभ्यां नमः ललाटे १ ॐ आँ विघ्नराजश्रीभ्यां नमः मुखवृत्ते २ ॐ इं विनायकपुष्टिभ्यां नमः दक्षिणनेत्रे ३ ॐ ईं शिवोत्तमशान्तिभ्यां नमः वामनेत्रे ४ ॐ उं विघ्नकृत्स्वास्तिभ्यां नमः दक्षिणकर्णे ५ ॐ ऊं विघ्नहर्तृसरस्वतीभ्यां नमः वामकर्णे ६ ॐ ऋं गणस्वाहाभ्यां नमः दक्षिणनासापुटे ७ ॐ ॠं एकदंतसुमेधाभ्यां नमः वामनासापुटे ८ ॐ ऌं द्विदंतकांतिभ्यां नमः दक्षिणगंडे ९ ॐ ॡं गजवक्त्रकामिनीभ्यां नमः वामगंडे १० ॐ एं निरंजनमोहिनीभ्यां नमः ऊर्ध्वोष्ठे ११ ॐ ऐं कपर्दिनटीभ्यां नमः अधरोष्ठे १२ ॐ ओं दीर्घजिह्वपार्वतीभ्यां नमः ऊर्ध्वदंतपंक्तौ १३ ॐ औं शंकुकर्णज्वालिनीभ्यां नमः अधोदंतपंक्तौ १४ ॐ अं वृषभध्वजनंदाभ्यां नमः शिरसि १५ ॐ अः गणेशसुरेशीभ्यां नमः मुखे १६ ॐ कं गजेन्द्रकामरूपिणीभ्यां नमः दक्षिणबाहुमूले १७ ॐ खं शूर्पकर्णोमाभ्यां नमः दक्षिणकूर्परे १८ ॐ गं त्रिलोचनतेजोवतीभ्यां नमः दक्षिणमणिबंधे १९ ॐ घं लंबोदरसत्याभ्यां नमः दक्षांगुलिमूले २० ॐ ङं महानंदविघ्नेशीभ्यां नमः दक्षांगुल्यग्रे २१ ॐ चं चतुर्मूर्तिस्वरूपिणीभ्यां नमः वामबाहुमूले २२ ॐ छं सदाशिवकामदाभ्यां नमः वामकूर्परे २३ ॐ जं आमोदमदजिह्वाभ्यां नमः वाममणिबंधे २४ ॐ झं दुर्मु

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खभूतिभ्यां नमः वामांगुलिमूले २५ ॐ ञं सुमुखभौतिकाभ्यां नमः वामांगुल्यग्रे २६ ॐ टं प्रमोदसिताभ्यां नमः दक्षपादमूले २७ ॐ ठं एकपादरमाभ्यां नमः दक्षिणजानुनि २८ ॐ डं द्विजिह्वमहिषीभ्यां नमः दक्षिणगुल्फे २९ ॐ ढं शूरभंजनीभ्यां नमः दक्षिणपादांगुलिमूले ३० ॐ णं वीरविकरणाभ्यां नमः दक्षिणापादांगुल्यग्रे ३१ ॐ तं षण्मुखभृकुटीभ्यां नमः वामपादमूले ३२ ॐ थं वरदलज्जाभ्यां नमः वामजानुनि ३३ ॐ दं वामदेवदीर्घघोणाभ्यां नमः वामगुल्फे ३४ ॐ धं वक्रतुंडधनुर्धराभ्यां नमः वामपादांगुलिमूले ३५ ॐ नं द्विरदयामिनीभ्यां नमः वामपादांगुल्यग्रे ३६ ॐ पं सेनानीरात्रिभ्यां नमः दक्षिणपार्श्वे ३७ ॐ फं कामांधग्रामणीभ्यां नमः वामपार्श्वे ३८ ॐ बं मत्तशशिप्रभाभ्यां नमः पृष्ठे ३९ ॐ भं विमत्तलोललोचनाभ्यां नमः नाभौ ४० ॐ मं मत्तवाहनचंचलाभ्यां नमः जठरे ४१ ॐ यं त्वगात्मभ्यां जटिदीप्तिभ्यां नमः हृदि ४२ ॐ रं असृगात्मभ्यां मुंडिसुभगाभ्यां नमः दक्षांसे ४३ ॐ लं मांसात्मभ्यां खड्गिदुर्भगाभ्यां नमः ककुदि४४ ॐ वं मेदआत्मभ्यां वरेण्यशिवाभ्यां नमः वामांसे ४५ ॐ शं अस्थ्यात्मभ्यां वृषकेतनभगाभ्यां नमः हृदयादिदक्षहस्तांतम् ४६ ॐ षं मज्जात्मभ्यां भक्तिप्रियभगिनीभ्यां नमः हृदयादिवामहस्तांतम् ४७ ॐ सं शुक्रात्मभ्यां गणेशभोगिनीभ्यां नमः हृदयादिदक्षपादांतम् ४८ ॐ हं प्राणात्मभ्यां मेघनादसुभगाभ्यां नमः हृदयादिवामपादांतम् ४९ ॐ लं शक्त्यात्मभ्यां व्यापिकालरात्रिभ्यां नमः जठरे ५० ॐ क्षं परमात्मभ्यां गणेश्वरकालिकाभ्यां नमः मुखे ५१ इति सर्वगणेशमंत्रांगभूतविघ्नेशादिकलामातृकान्यासः ॥ एवं कलान्यासं कृत्वा प्रयोगोक्तन्यासादिकं कुर्य्यात्॥ततः पीठादौ रचिते सर्वतोभद्रमंडले गणेशमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः स्थापयेत् ॥ तथा च ॥ पुष्पाक्षतानादाय स्ववामभागे श्रीगुरुभ्यो नमः १॥ दक्षिणे गणपतये नमः २ ॥ मध्ये स्वेष्टदेवतायै नमः३ ॥ इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नत्वा पीठमध्ये ॐ मं मंडूकाय नमः ४ ॥ ॐ कं कालाग्निरुद्राय नमः ५ ॥ ॐ आँ आधारशक्तये नमः६ ॥ ॐ कूं कूर्माय नमः ७ ॐ अं अनंताय नमः ८ ॐ पृं पृथिव्यै नमः ९ ॐ क्षीं क्षीरसागराय नमः १० ॐ रं रत्नदीपाय नमः ११ ॐ रं रत्नमंडपाय नमः १२ ॐ कं कल्पवृक्षाय नमः १३ ॐ रं रत्नवेदिकायै नमः१४ ॐ रं रत्नसिंहासनाय नमः१५ इत्युपर्युपरिसंपूज्य॥आग्नेय्याम् ॐ धं धर्माय नमः १६ नैर्ऋत्यां ॐ ज्ञां ज्ञानाय नमः १७ वायव्ये ॐ वैं वैराग्याय नमः १८ ऐशान्ये ॐ ऐं ऐश्वर्याय नमः १९ पूर्वे ॐ अं अधर्माय नमः २० दक्षिणे ॐ अं अज्ञानाय नमः २१ ॥ पश्चिमे । ॐ अं अवैराग्याय नमः २२ उत्तरे ॐ अं अनैश्वर्याय नमः २३ इति पूजयेत् ॥ ततः पुनः पीठमध्ये ॥ ॐ आं आनंदकंदाय नमः २४ ॐ सं संविन्नालाय नमः २५ ॐ सं सर्वतत्त्वकमलासनाय नमः २६ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः २७ ॐ विं विकारमयकेसरेभ्यो नमः २८ ॐ पं पञ्चाशद्वर्णाढ्यकर्णिकाभ्यो नमः २९ ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः ३० ॐ सों सोममंडलाय षोडशकलात्मने नमः ३१ ॐ वं वह्निमण्डलाय दशकलात्मने नमः ३२ ॐ सं सत्त्वाय नमः ३३ॐ रं रजसे नमः ३४ॐ तं तमसे नमः ३५ ॐ आं आत्मने नमः ३६ ॐ पं परमात्मने नमः ३७ ॐ अं अंतरात्मने नमः ३८ ॐ ह्रीं ज्ञानात्मने नमः ३९ॐ मं मायातत्त्वाय नमः ४० ॐ कं कलातत्त्वाय नमः ४१ ॐ विं विद्यातत्त्वाय नमः ४२ॐ पं परतत्त्वाय नमः४३ एवं पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत्॥तद्यथा । पूर्वे ॐ तीव्रायै नमः१अग्नये ॐ चालिन्यै नमः२ दक्षिणे ॐ नंदायै नमः३ नैर्ऋत्ये ॐ भोगदायै नमः ४पश्चिमे ॐ कामरूपिण्यै नमः ५वायव्ये ॐ उग्रायै नमः ६ उत्तरे ॐ तेजोवत्यै नमः ७ ऐशान्ये ॐ सत्यायै नमः ८ पीठमध्ये ॐ विघ्ननाशिन्यै नमः ९ इति पीठशक्तीः संपूज्य पात्रासादनं कुर्यात्॥ अथ पात्रासादनप्रयोगः॥

For Private And Personal Use Only

तत्र पात्रासादनं सर्वदेवोपयोगिपद्धतिमार्गेण सविस्तरं कृत्वा अशक्तश्चेत्साधारणं कुर्यात्॥ तत्र क्रमः॥ तत्रादौ गंधाक्षतादिपूजोपकरणानि स्वदक्षिणपार्श्वे संस्थाप्य जलार्थं बृहत्पात्रं व्यजनं छत्रादर्शचामराणि वामपार्श्वे स्थापयित्वा कलशस्थापनं कुर्यात्॥ अथ कलशस्थापन प्रयोगः॥ स्ववामभागे त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां विलिख्य॥ ॐ ह्रीं आधारशक्त्यै नमः इति संपूज्य ततो मूलेन नमः इति त्रिपदाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य तत्र सुदर्शनायास्त्राय फट् इति मंत्रेण कलशं प्रक्षाल्य आधारोपरि हस्तद्वयेन संस्थाप्य रक्तवस्त्रमाल्यादिना भूषयित्वा मूलेन नमः इति जलेनापूर्य ॥ ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ ॥ इति वरुणमावाह्य स्वेष्टदेवं ध्यात्वा गंधपुष्पैः संपूजयेत् इति कलशस्थापनम् । अथ शंखस्थापनप्रयोगः ॥ स्वदक्षिणे कलशोक्तविध्यनुसारेणाधारं संस्थाप्य ॐ सुदर्शनायास्त्राय फट् ॥ इति शंखं प्रक्षाल्य आधारोपरि संस्थाप्य मूलेन नमः इति जलेनापूर्य ॥ प्रणवेन गंधादिभिः संपूज्याभिमंत्रयेत ॥ "ॐ शंखादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैवमग्रे गंगा सरस्वती ॥ १ ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत् ।" इत्यभिमंत्र्य प्रार्थयेत ॥ "ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तुते ॥ २ ॥ पांचजन्याय विद्महे पावमानाय धीमहि तन्नः शंखः प्रचोदयात् ॥" इति प्रार्थयित्वा शंखमुद्रां प्रदर्शयेत् । इति शंखस्थापनम् ॥ अथ घंटास्थापनप्रयोगः ॥ स्ववामभागे घंटां संस्थाप्य "आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्॥ घंटानादं प्रकुर्वीत पश्चाद् घंटां प्रपूजयेत् ॥ १ ॥" ॐ भूर्भुवः स्वः गरुडाय नमः। आवाहयामि सर्वोपचारार्थं गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि। इत्यावाह्य । ॐ जगद्ध्वनिमंत्रमातः स्वाहा ॥ इति मंत्रेण घंटास्थितगरुडं घंटां च संपूज्य ॥ प्रणम्य गरुडमुद्रां

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदर्शयेत् ॥ इति घंटास्थापनम् । ततः शंखात्पूर्वादिप्रादक्षिण्येन पाद्यार्घ्याचमनीयमधुपर्कस्नानार्थं पंचपात्राणि अशक्तश्चेत्तर्हि एकमेव पात्रं संस्थाप्य सामान्यविधिना पूजयेत्॥एवं पूजापात्राणि संपाद्य॥प्रयोगोक्ते यंत्रे मूर्तौ वा अग्न्युत्तारणपूर्वकं प्राणान् प्रतिष्ठापयेत् । अथ प्राणप्रतिष्ठाप्रयोगः ॥ आचम्य देशकालौ संकीर्त्य ममामुकगणपतिदेवतानूतनयंत्रे (मूर्तौ वा) प्राणप्रतिष्ठां करिष्ये॥इति संकल्प्य अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः।ऋग्यजुःसामानि च्छंदांसि क्रियामयवपुःप्राणाख्या देवता । आँ बीजम्।ह्रीं शक्तिः। क्रों कीलकम्। अस्यां नूतनमंत्रे(मूर्तौ वा) प्राणप्रतिष्ठापने विनियोगः।इति जलं क्षिपेत्॥करेणाछाद्य।ॐ आँह्रींक्रोंयँरँलँवँशँषँसँहँसः सोहं अस्यामुकगणपतेः सपरिवारयंत्रस्य (प्रतिमाया वा) प्राणा इह प्राणाः पुनः ॐ आँह्रींक्रोंयँरँलँवँशँषँसँहँसः सोहँ अस्यामुकगणपतेः सपरिवारयंत्रस्य (मूर्तेर्वा) जीव इह स्थितः॥२॥ ॐ आँह्रींक्रोंयँरँलँवँशँषँसँहँसः सोहं अस्यामुक गणपतेः सपरिवारयंत्रस्य (मूर्तेर्वा) सर्वेन्द्रियाणीह स्थितानि ॥३॥ ॐ आँह्रींक्रोंयँ रँलँवँशँषँहँसः सोहं अस्यामुकगणपतेः सपरिवार यंत्रस्य (मूर्तेर्वा)वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥४॥ इति प्राणान् प्रतिष्ठाप्य संस्कारसिद्धये पंचदश प्रणवावृत्तीः कृत्वा । अनेनामुकगणपतेः सपरिवारयंत्रस्य (मूर्तेर्वा) गर्भाधानादिपंचदशसंस्कारान्संपादयामि इति वदेत् ॥ एवं प्राणप्रतिष्ठाप्रयोगः ॥ तद्यथा ॥ अथावाहनम् । अक्षतानादाय "देवेश भक्तिसुलभ परिवारसमन्वित ॥ यावत्त्वां पूजयिष्यामि तावद्देव इहावह ॥ १ ॥ आगच्छ भगवन्देव स्थाने चात्र स्थितोभव॥यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव ॥२॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतिदेवतामावाहयामि ॥ इत्यावाहनम् ॥ १ ॥ तवेयं महिमामूर्तिस्तस्यां त्वं सर्वगः प्रभो ॥ भक्तिस्नेहसमाकृष्टदीपवत्स्थापयाम्यहम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः

For Private And Personal Use Only

अमुकगणपतिदेव इह तिष्ठ ॥ इति स्थापनम् ॥२॥ "अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो ॥ सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्पर ॥ १॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतिदेवते इह सन्निधेहि ॥ इति सन्निधापनम् ॥३॥ "आज्ञया तव देवेश कृपांभोधे गुणांबुधे ॥ आत्मानंदैकतृप्तं त्वां निरुणध्मि पितर्गुरो ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतिदेवते इह सन्निरुध्य ॥ इति सान्निरोधनम् ॥ ४ ॥ "अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यदपूर्णं भवेत्कृत्यं तदप्यभिमुखो भव ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतिदेव इह सम्मुखो भव ॥ इति सम्मुखीकरणम् ॥५॥ "अभक्तवाङ्मनश्चक्षुःश्रोत्रदूरातिगद्युते ॥ स्वतेजःपञ्जरेणाशु वेष्टितो भव सर्वतः ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतिदेव अवगुंठितो भव ॥ इत्यवगुंठनम् ॥ ६ ॥ "यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये ॥ तस्मै ते परमेशाय स्वागतंस्वागतं च ते ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः सुस्वागतं समर्पयामि ॥ इति सुस्वागतम् ॥ ७ ॥ "देवदेव महाराज प्रियेश्वर प्रजापते ॥ आसनं दिव्यमीशाल दास्येऽहं परमेश्वर ॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना ॥ १ ॥ "मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः आसनं समर्पयामि ॥ ८ ॥ इत्यासनं दत्त्वा प्रार्थयेत् ॥ तत्र मंत्रः ॥" स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वं च दृष्ट्वा मां बालवत्परिपालय ॥ १॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः प्रार्थनां समर्पयामि नमस्करोमि ॥ इति प्रार्थयेत् ॥९॥१०॥अथ पाद्यादिपूजाप्रयोगः॥"यद्भक्तिलेशसंपर्कात् परमानंद सम्भवः॥तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पयेत् ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः पाद्यं समर्पयामि॥ इति पाद्यम् ॥ ११ ॥ "तापत्रय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरं दिव्यं परमानंदलक्षणम् ॥ तापत्रयविनिर्मुक्त तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः इदमर्घ्यं समर्पयामि ॥ इत्यर्घः ॥ १२ ॥ "वेदानामपि देवाय वेदानां देवतात्मने ॥ आचमं कल्पयामीश शुद्धानां शुद्धिहेतवे॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः आचमनीयं समर्पयामि ॥ इत्याचमनम् ॥ १३॥ इत्याचमनं दत्वा मधुपर्कपञ्चामृतस्नानादि च सर्वदेवोपयोगिपद्धतिमार्गेण कुर्यात् । अशक्तश्चेज्जलस्नानं मधुस्नानं शुद्धोदकस्नानं च कुर्यात् ॥ तद्यथा ॥ "गंगासरस्वतीरेवापयोष्णी नर्मदाजलैः ॥ स्नापितोऽसि मया देव तथा शांतिं कुरुष्व मे ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः जलस्नानं समर्पयामि॥ इति जलस्नानम् ॥ १४ ॥ "तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु ॥ तेजःपुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः मधुस्नानं समर्पयामि ॥ इति मधुस्नानम् १ ॥ १५ ॥ "गंगासरस्वतीरेवापायोष्णीनर्मदाजलैः ॥ स्नापितोऽसि मया देव तथा शांतिं कुरुष्व मे ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः शुद्धोदकस्नानं समर्पयामि ॥ इति शुद्धोदकस्नानम् ॥ १६ ॥ एवं स्नानं समपर्याचमनं दद्यात् ॥ ततः । "सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥ मयैवापादिते तुभ्यं वास सी प्रतिगृह्यताम् ॥ १ ॥" मूलं पठित्वा ॐ भर्भुवः स्वः अमुकगणपतये नमः रक्तवस्त्रं समर्प्ययामि ॥ इति रक्तवस्त्रम् ॥ १७॥ "नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः यज्ञोपवीतं समर्पयामि ॥ इति यज्ञोपवीतम् ॥ १८॥ "श्रीखण्डं चन्दनं दिव्यं गंधाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः गंधं समर्पयामि ॥ अंगुष्ठौ कनिष्ठामूललग्नौ गंधमुद्रा ॥ इति गंधम् ॥ १९ ॥ "अक्ष

ताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः अक्षतान्समर्पयामि ॥" सर्वांगुलीभिर्दद्यात् इत्यक्षतान् ॥ २० ॥ "माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥ १॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः रक्तपुष्पं समर्पयामि ॥ तर्जन्यंगुष्ठमूललग्ने पुष्पमुद्रा इति पुष्पम् ॥ २१ ॥ एवं पुष्पांतं पूजयित्वा प्रयोगोक्तावरणपूजां च कृत्वा धूपादिपूजनं कुर्यात ॥ ॥ अथ धूपादिपूजाप्रयोगः ॥ फडिति धूपपात्रं संप्रोक्ष्य नम इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय रं इति वह्निबीजेन उपरि अग्निं संस्थाप्य तदुपरि दशांगं दत्वा घंटा च नादयन् ॥ "ॐ वनस्पतिरसोद्भूतो गंधाढ्यो गन्ध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः धूपं समर्पयामि ॥ इति पठित्वा देवस्य वामभागे धूपपात्रं संस्थाप्य तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा तां प्रदर्शयेत् ॥ इति धूपम् ॥ २२ ॥ ततो दीपपात्रं गोघृतेनापूर्य वर्णाक्षरतंतुभिर्वर्तिं निक्षिप्य प्रणवेन प्रज्वाल्य घंटां वादयन् मंत्रं पठेत् ॥ "ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥ स बाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यताम् ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः दीपं समर्पयामि ॥ इति पठित्वा देवस्य दक्षिणभागे निधाय मध्यमे अंगुष्ठलग्ने दीपमुद्रा तां प्रदर्शयेत ॥ इति दीपम् ॥ २३ ॥ अथ नैवेद्यम् ॥ देवस्याग्रे जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं संस्थाप्य तन्मध्ये मोदकं गुडमिश्रितपायसं वा निधाय ॐ यं इति वायुबीजेन द्वादशवाराभिमंत्रिताऽर्घजलेन संप्रोक्ष्य मलेन संवीक्ष्य अधोमुखदक्षिण

१ पुष्पं पत्रं फलं देवे न च दद्यादधोमुखम् ॥ पुष्पांजलौ न तद्दोषस्तथा पर्युषितस्य च ॥

हस्तोपरि तादृशं वामं नैवेद्येनाच्छाय ॐ यं इति वायुबीजं षोडशधा संजप्य वायुना तद्गतदोषान् संशोष्य दक्षिणकरतले ॐ रं इत्यग्नि बीजं विचिंत्य तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य ॐ रं इति वह्निबीजेन षोडशवारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा वामकर तले ॐ वं इति अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य ॥ पुनः ॐ वं इति सुधाबीजं षोडशवारं जपित्वा तदुत्थामृतधारया प्लावितं विभाव्य मूलमंत्रेण प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य । वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा “ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ॥ निवेदयामि देवेश सानुगाय गृहाण तत् ॥ १ ॥” मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवारायामुकगणपतये नमः नैवेद्यं समर्पयामि इति जलमुत्सृज्य अनामामूलयोरंगुष्ठयोगे नैवेद्यमुद्रा तां प्रदर्श येत् ॥ इति नैवेद्यम् ॥२४॥ अथांतः पटम् ॥“श्लेशाद्यैः सरसमभितः सोपविष्टैः समंतात्सिंजद्वालव्यजननिकरैर्वीज्यमानः सखीभिः॥नर्म क्रीडाप्रहसनपरान्पंक्तिभोक्तॄन्हसन्वै भुंक्ते पात्रे कनकघटिते षड्रसान्श्रीगणेशः ॥१॥ शालीभक्तं सुपक्वं शिशिरकरासितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतफलं द्वारिकाद्यं सुखाद्यम् ॥ आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीचस्वादीयः शाकरा जीपरिकरममृताहारजोषं जुषस्व ॥ २ ॥” इत्यंतःपटम् ॥२५॥ “नमस्ते देवदेवेश सर्वतृप्तिकरं परम् ॥ अखंडानन्दसंपूर्णं गृहाण जल मुत्तमम् ॥ ” मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः जलं समर्पयामि इति जलम् ॥ २६ ॥ पुनर्गंडूषार्थं जलं दत्त्वा मूलेन शुद्धाचमनं च दद्यात् ॥ अथ तांबूलम् ॥ “पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिभिर्युक्तं तांबूलं प्रतिगृह्यताम् ॥ ॥ १ ॥” मूलं पठित्वाॐ भूर्भुवःस्वः अमुकगणपतये नमः तांबूलं समर्पयामि ॥ इति तांबूलम् ॥ २७ ॥ अथ फलम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः फलं समर्पयामि ॥ २८ ॥ इति फलं समर्प्य शक्त्येत क्षेत्रादिदक्षिणापर्यंतं सर्वदेवोपयोगिरद्धतिमार्गेण दत्त्वा आरात्रिकं कुर्यात् ॥ अथ कर्पूरारात्रिकम् ॥ "कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरात्रिकमहं कुर्वे पश्य मे वरदो भव ॥ १ ॥" इति पठित्वा मूलेन देवोपरि नेत्रादिपादपर्यंतं नववारं त्रिवारं वा भ्रामयेत् घंटां नादयेत ॥ इति कर्पूरारात्रिकम् ॥ २९ ॥ अथ प्रदक्षिणा ॥ "यानि कानि च पापानि जन्मांतरकृतानि वै ॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदेपदे ॥ १ ॥" इति मंत्रेण तिस्रः प्रदक्षिणा दद्यात् ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः प्रदक्षिणां समर्पयामि ॥ ३० ॥ अथ पुष्पांजलिः ॥ "नानासुगंधपुष्पाणि यथाकालोद्भवानि च ॥ पुष्पांजलिं मया दत्तं गृहाण परमेश्वर ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः अमुकगणपतये नमः पुष्पांजलिं समर्पयामि ॥ इति पुष्पांजलिः ॥ ३१ ॥ अथ साष्टांगप्रणामम् ॥ "प्रसन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥" इति वदन् साष्टांग प्रणामं नाम निवेदयेत् ॥ ३२ ॥ तत्स्तुतिपाठेन देवं स्तुत्वा बद्धाञ्जलिपूर्वकं क्षमापयेत् ॥ "ज्ञानतोऽज्ञानतो वाथ यन्मया क्रियतेऽशिवम् ॥ मम कृत्यमिदं सर्वमिति देव क्षमस्व मे ॥ १ ॥" अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोहमिति मां मत्वा क्षमस्व परमेश्वर ॥ २ ॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना ॥ ३ ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं शिव ॥ ४ ॥" इति बद्धांजलिपूर्वकं क्षमाप्य ॥ "यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं

च नैवेद्यं गृहाण त्वनुकंपया ॥ १ ॥ " इति प्रार्थ्य देवस्य दक्षिणकरे किंचिज्जलं दत्त्वा पश्चात्सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान् कुर्यात ॥ अशक्तश्चेत्साधारणसंस्कारं कुर्य्यात् ॥ तथा च जपमालामानीय क्वचित्पात्रे वामहस्तेनाच्छाद्य मूलेनार्घ्योदकेनाभ्युक्ष्य "ॐ मालेमाले महामाये सर्वशक्तिस्वरूपिणी । चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्त्वं सिद्धिदा भव ॥ १ ॥" इत्यनेन गंधपुष्पाभ्यां संपूज्य ततो देवतानिवेदितमोदकं तांबूलं वा स्वयं भुक्त्वा पुनः "अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा ॥" इति मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् यथाशक्ति मूलमंत्रं जपेत ॥ "जपांते ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ १ ॥" ॐ ह्रीं सिद्ध्यै नमः ॥ इति मालां शिरसि निधाय गोमुखीं रहसि स्थापयेत् नाशुचिः स्पर्शयेत् नान्यं दद्यात् अशुचिस्थाने न निधापयेत् स्वयोनिवद्गुप्तां कुर्य्यात् । ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमंत्रस्य ऋष्यादि न्यासं करन्यासं च हृदयादिषडंगन्यासं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं च दद्यात् । ततः अर्घोदकेन चुलुकमादाय "ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ १ ॥" ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा । मां मदीयं च सकलं श्रीमदमुकगणपतिदेवतायै समर्पयामि नमः ॥ ॐ तत्सदिति ब्रह्मार्पणं भवतु । इति देवदक्षिणकरे जपसमर्पणजलं दत्त्वा कृताञ्जलिपूर्वकं क्षमापनं कुर्यात् ॥ अथ क्षमापनम् ॥ "आवाहनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ १ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अंतश्चरसि भूतानामिष्टस्त्वं परमेश्वर ॥ २ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन रक्षस्व परमेश्वर ॥ ३ ॥ शतयोनिसहस्राणां सहस्रेषु व्रजाम्यहम् ॥ तेषु चेष्टाचला भक्तिरच्युतास्तु सदा त्वयि ॥ ४ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्याच्च तव दर्शनात् ॥ ५ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ ॥ ६ ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ७ ॥ देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवं जपति सर्वत्र यो देवः सोऽहमेव हि ॥ ८ ॥ अमस्व देवदेवेश क्षम्यते भुवनेश्वर ॥ तव पादांबुज नित्यं निश्चला भक्तिरस्तु मे ॥ ॥ ९ ॥ इति कृतांजलिः प्रार्थयित्वा ततः शंखमुद्धृत्य देवोपरि भ्रामयित्वा ॥ साधु वासाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम ॥ १ ॥ इत्युच्चरन् देवस्य दक्षिणहस्ते किंचिज्जलं दत्त्वा प्राग्वदर्घ्यं देवशिरसि दत्त्वा शंखं यथास्थाने निवेश्य मूलेन देवोच्छिष्टनैवेद्यादिकं शिरसि धृत्वा देवभक्तेषु विभज्य स्वयं भुक्त्वा बलीत्यादिकं गतसारनैवेद्यं च तदुच्छिष्टभोजिने इति निवेदयेत् ॥ अथ विसर्जनम् । गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर ॥ यं हि ब्रह्मादयो देवा न विदुःपरमं पदम् ॥ १ ॥ इत्यक्षतान्निक्षिप्य देवं स्वहृदयमध्ये स्थापयेत् ॥ तद्यथा “ तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवा सर्वे तिष्ठंति मे हृदि ॥ १ ॥ इति देवं हृदये संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् ॥ इति गणेशपूजापद्धतिः समाप्ताः ॥

For Private And Personal Use Only

म० म० ॥ श्रीगणेशाय नमः ॥ अथ वक्रतुंडगणेशकवचप्रारंभः ॥"मौलिं महेशपुत्रोऽव्याद्भालं पातु विनायकः॥ त्रिनेत्रः पातु मे नेत्र शूर्पकर्णोऽ पृ०खं १
॥ ९६ ॥ वतु श्रुती ॥ १ ॥ हेरंबो रक्षतु घ्राणं मुखं पातु गजाननः । जिह्वां पातु गणेशो मे कंठं श्रीकण्ठवल्लभः ॥२॥ स्कंधौ महाबलः पातु ग०तं०
विघ्नहा पातु मे भुजौ ॥ करौ परशुभृत्पातु हृदयं स्कंदपूर्वजः ॥ ३ ॥ मध्यं लंबोदरः पातु नाभिं सिंदूरभूषितः ॥ जघनं पार्वतीपुत्रः तरं०५
सक्थिनी पातु पाशभृत् ॥ ४ ॥ जानुनी जगतां नाथो जंघे मूषकवाहनः ॥ पादौ पद्मासनः पातु पादाधो दैत्यदर्पहा ॥ ५ ॥ एक
दंतोऽग्रतः पातु पृष्ठे पातु गणाधिपः ॥ पार्श्वयोर्मोदकाहारो दिग्विदिक्षु च सिद्धिदः ॥ ६ ॥ व्रजतस्तिष्ठतो वापि जाग्रतः स्वपतोऽश्नतः॥
चतुर्थीवल्लभो देवः पातु मे भुक्तिमुक्तिदः ॥ ७ ॥ इदं पवित्रं स्तोत्रं च चतुर्थ्यां नियतः पठेत् ॥ सिंदूररक्तः कुसुमैर्दूर्वयापूज्य
विघ्नम् ॥ ८ ॥ राजा राजसुतो राजपत्नी मंत्री कुलं चलम् ॥ तस्यावश्यं भवेद्वश्यं विघ्नराजप्रसादतः ॥ ९ ॥ समंत्रयंत्रं यः स्तोत्रं
करे संलिख्य धारयेत् ॥ धनधान्यसमृद्धिः स्यात्तस्य नास्त्यत्र संशयः ॥१०॥" अस्य मंत्रः ॥ ऐं क्लीं ह्रीं वक्रतुंडाय हुं ॥ "रसलक्षं
सदैकाग्र्यः षडंगन्यासपूर्वकम् ॥ हुत्वा तदंते विधिवदष्टद्रव्यं पयोघृतम् ॥११॥ यं यं काममभिध्यायन् कुरुते कर्म किंचन ॥ तं तं सर्वम
वाप्नोति वक्रतुंडप्रसादतः ॥ १२ ॥ भृगुप्रणीतं यः स्तोत्रं पठते भुवि मानवः ॥ भवेदव्याहतैश्वर्यः स गणेशप्रसादतः ॥ १३ ॥" इति
गणेशरक्षाकरं स्तोत्रं समाप्तम् ॥ अथ वक्रतुंडगणेशस्तवराजप्रारंभः ॥ अस्य गायत्रीमंत्रः ॥ ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि
तन्नो दंतिः प्रचोदयात् ॥ "ॐ कारमाद्यं प्रवदंति संतो वाचः श्रुतीनामपि यं गृणंति ॥ गजाननं देवगणानतांघ्रिं भजेऽहमर्धेंदुकृतावतंसम् ॥ ९६ ॥
॥ १ ॥ पादारविंदार्चनतत्पराणां संसारदावानलभंगदक्षम् ॥ निरंतरं निर्गलदानतोयैस्तं नौमि विघ्नेश्वरमंबुदाभम् ॥ २ ॥ कृतांगरागं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नवकुंकुमेन मत्तालिजालं मदपंकमग्रम् ॥ निवारयंतं निजकर्णतालैः को विस्मरेत्पुत्रमनंगशत्रोः ॥ ३ ॥ शंभोर्जटाजूटनिवासि
गंगाजलं समानीय करांबुजेन ॥ लीलाभिराराच्छिवमर्चयंतं गजाननं भक्तियुता भजंति ॥४॥ कुमारमुक्तौ पुनरात्महेतोः पयोधरौ पर्वत
राजपुत्र्याः ॥ प्रक्षालयंतं करशीकरेण मौग्ध्येन तं नागमुखं भजामि ॥५॥ तया समुद्धूतगजास्यहस्ताग्रे शीकराः पुष्कररंध्रमुक्ताः ॥
व्योमांगणे ते विचरंति ताराः कालात्मना मौक्तिकतुल्यभासः ॥ ६ ॥ क्रीडारते वारिनिधौ गजास्ये वेलामतिक्रामति वारिपूरे ॥ कल्पा
वसानं परिचिंत्य देवाः कैलासनाथं श्रुतिभिः स्तुवंति ॥ ७ ॥ नागानने नागकृतोत्तरीये क्रीडारते देवकुमारसंघैः ॥ त्वयि क्षणं काल
गतिं विहाय तौ प्रापतुः कंदुकतामिनेंदू ॥ ८ ॥ मदोल्लसत्पंचमुखैरजस्रमध्यापयंतं सकलागमार्थम् ॥ देवानृषीन्भक्तजनैकमित्रं हेरंबम
र्कारुणमाश्रयामि ॥ ९ ॥ पादांबुजाभ्यामतिवामनाभ्यां कृतार्थयंतं कृपया धरित्रीम् ॥ अकारणं कारणमाप्तवाचां तन्नागवक्त्रं न जहाति
चेतः ॥ १० ॥ येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या ॥ तं चंद्रमौलेस्तनयंतपोभिराराध्यमानंदघनं भजामि ॥ ११ ॥
पदं श्रुतीनामपदं स्तुतीनां लीलावतारं परमात्ममूर्तेः ॥ नागात्मकं वा पुरुषात्मकं वा त्वभेदमाद्यं भज विघ्नराजम् ॥ १२ ॥ पाशांकुशौ
भग्नरदं त्वभीष्टं करैर्दधानं कररंध्रमुक्तैः ॥ मुक्ताफलाभैः पृथुशीकरौघैः सिंचंतमंगं शिवयोर्भजामि ॥ १३ ॥ अनेकमेकं गजमेकदंतं चैत
न्यरूपं जगदादिबीजम् ॥ ब्रह्मेति यं वेदविदो वदंति तं शंभुसूनुं सततं भजामि ॥ १४ ॥ स्वांकस्थिताया निजवल्लभाया मुखांबुजालोक
नलोलनेत्रम् ॥ स्मेराननाब्जं मदवैभवेन रुद्धं भजे विश्वविमोहनं तम् ॥ १५ ॥ ये पूर्वमाराध्य गजाननं त्वां सर्वाणि शास्त्राणि पठंति
तेषाम् ॥ त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्तदास्ति चेत्सर्वमसत्यकल्पम् ॥ १६ ॥ हिरण्यवर्णं जगदीशितारं कविं पुराणं रविमंडल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थम् ॥ गजाननं यं प्रविशंति संतस्तत्कालयोगैस्तमहं प्रपद्ये ॥ १७ ॥ वेदांतगीतं पुरुषं भजेहमात्मानमानंदघनं हृदिस्थम् ॥
गजाननं यन्महसा जनानां विघ्नांधकारो विलयं प्रयाति ॥ १८ ॥ शंभोः समालोक्य जटाकलापे शशांकखंडं निजपुष्करेण ॥
स्वभग्नदंतं प्रविचिंत्य मौग्ध्यादाकष्टुकामः श्रियमातनोतु ॥ १९ ॥ विघ्नार्गलानां विनिपातनार्थं यं नारिकेलैः कदलीफलाद्यैः ॥
प्रमादयंते मदवारणास्यं प्रभुं सदाभीष्टमहं भजेयम् ॥ २० ॥ यज्ञैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं गजराजवक्त्रम् ॥ स्तुत्यानया
ये विधिवत्स्तुवंति ते सर्वलक्ष्मीनिलया भवंति ॥ २१ ॥ इति गणेशस्तवराजः समाप्तः ॥ अथ वक्रतुंडगणेशसहस्रनामस्तो
त्रप्रारम्भः ॥ व्यास उवाच ॥ कथं नाम्नां सहस्रं स्वङ्गणेश उपदिष्टवान् ॥ शिवाय तन्ममाचक्ष्व लोकानुग्रहतत्पर ॥ १ ॥
ब्रह्मोवाच ॥ देवदेवः पुरारातिः पुरत्रयजयोद्यमे ॥ अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल ॥ २ ॥ मनसा स विनिर्धार्य
ततस्तद्विघ्नकारणम् ॥ महागणपतिं भक्त्या समभ्यर्च्य यथाविधि ॥ ३ ॥ विघ्नप्रशमनोपायमपृच्छदपराजितः ॥ संतुष्टः
पूजया शम्भोर्महागणपतिः स्वयम् ॥ ४ ॥ सर्वविघ्नैकहरणं सर्वकामफलप्रदम् ॥ ततस्तस्मै स्वकं नाम्नां सहस्रमिदमब्रवीत् ॥ ५ ॥
ॐ अस्य श्रीमहागणपतिसहस्रनाममालामंत्रस्य । गणेश ऋषिः । नानाविधानि च्छन्दांसि । महागणपतिर्देवता । गमिति बीजम् । तुण्ड
मिति शक्तिः । स्वाहेति कीलकम् । सकलविघ्ननाशनद्वारा महागणपतिप्रीत्यर्थे जपे विनियोगः ॥ ॐ गणेशऋषये नमः शिरसि १ ॥
नानाविधच्छन्दसे नमः मुखे २ ॥ महागणपतिदेवतायै नमः हृदि ३ ॥ गं बीजाय नमः गुह्ये ४ ॥ तुण्डशक्तये नमः पादयोः ५ ॥
स्वाहाकीलकाय नमः नाभौ ६ ॥ विनियोगाय नमः सर्वांगे ७॥ इति ऋष्यादिन्यासः॥ महागणपतिरुवाच ॥ ॐ गणेश्वरो गणक्रीडो ॥ ९७ ॥

For Private And Personal Use Only

गणनाथो गणाधिपः ॥ एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥६॥ लम्बोदरो धूम्रवर्णो विकटो विघ्ननायकः ॥ सुमुखो दुर्मुखो बुद्धो
विघ्नराजो गजाननः ॥ ७ ॥ भीमः प्रमोद आमोदः सुरानन्दो मदोत्कटः॥ हेरम्बः शम्बरः शम्भुर्लम्बकर्णो महाबलः ॥८॥ नन्दनो
लम्पटोऽभीरुर्मेघनादो गणंजयः ॥ विनायको विरूपाक्षो धीरः शूरो वरप्रदः ॥ ९ ॥ महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ॥ रुद्रप्रियो
गणाध्यक्ष उमापुत्रोऽघनाशनः ॥१०॥ कुमारगुरुरीशानपुत्रो मूषकवाहनः ॥ सिद्धिप्रियः सिद्धिपतिः सिद्धः सिद्धिविनायकः॥ ११ ॥
अविघ्नस्तुम्बुरुः सिंहवाहनो मोहिनीप्रियः ॥ कटंकटो राजपुत्रः शालकः सम्मितो मितः ॥ १२ ॥ कूष्माण्डसामसम्भूतिर्दुर्जयो धूर्जयो
जयः ॥ भूपतिर्भुवनपतिर्भूतानाम्पतिरव्ययः ॥ १३ ॥ विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः ॥ कविः कवीनामृषभो ब्रह्मण्यो
ब्रह्मणस्पतिः ॥१४॥ ज्येष्ठराजो निधिपतिर्निधिप्रियपतिप्रियः ॥ हिरण्मयपुरान्तस्थस्सूर्यमण्डलमध्यगः ॥१५॥ कराहतिध्वस्तसिन्धु
सलिलः पूषदन्तहृत् ॥ उमांककेलिकुतुकी मुक्तिदः कुलपालनः ॥ १६ ॥ किरीटी कुण्डली हारी वनमाली मनोमयः ॥ वैमुख्य
हतदैत्यश्रीः पादाहतजितक्षितिः ॥ १७ ॥ सद्योजातः स्वर्णमुञ्जमेखली दुर्निमित्तहृत् ॥ दुस्स्वप्नहृत्प्रसहनो गुणिनादप्रतिष्ठितः॥ १८॥
सुरूपः सर्वनेत्राधिवासो वीरासनाश्रयः ॥ पीताम्बरः खण्डरदः खण्डेन्दुकृतशेखरः ॥ १९. ॥ चित्रांकः श्यामदशनो भालचन्द्रश्चतु
र्भुजः ॥ योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ॥ २० ॥ गणाधिराजो विजयस्थिरो गजपतिर्ध्वजी ॥ देवदेवः स्मरप्राणो दीपको
वायुकीलकः॥ २१ ॥विपश्चिद्वरदो नादो नादभिन्नवलाहकः॥वराहरदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः ॥ २२॥ इच्छाशक्तिधरो देवत्राता
दैत्यविमर्दनः॥शम्भुवक्त्रोद्भवः शम्भुकोपहा शम्भुहास्यभूः ॥ २३ ॥शम्भुतेजाः शिवाशोकहारी गौरीसुखावहः ॥ उमांगमलजो गौरीतेजोभूः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वर्धुनीभवः ॥ २४ ॥ यज्ञकायो महानादो गिरिवर्ष्मा शुभाननः ॥ सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्श्रुतिः ॥ २५ ॥ ब्रह्मा
ण्डकुम्भश्चिद्व्योमभालः सत्यशिरोरुहः ॥ जगज्जन्मलयोन्मेषनिमिषोऽग्न्यर्कसोमदृक् ॥ २६ ॥ गिरीन्द्रैकरदो धर्मो धर्मिष्ठः
सामबृंहितः ॥ ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥ २७ ॥ भ्रूमध्यसंस्थितकरो ब्रह्मविद्यामदोत्कटः ॥ कलाच
लांसः सोमार्कघण्टो रुद्रशिरोधरः ॥ २८ ॥ नदीनदभुजः सर्पांगुलीकस्तारकानखः ॥ व्योमनाभिः श्रीहृदयो मेरु
पृष्ठोऽर्णवोदरः ॥ २९ ॥ कुक्षिस्थयक्षगंधर्वरक्षःकिन्नरमानुषः ॥ पृथ्वीकटिः सृष्टिलिंगः शैलोरुर्दस्रजानुकः ॥ ३० ॥
पातालजंघो मुनिपात्कालाङ्गुष्ठस्त्रयीतनुः॥ ज्योतिर्मण्डललांगूलो हृदयालाननिश्चलः ॥ ३१ ॥ हृत्पद्मकर्णिकाशाली वियत्केलिसरोवरः॥
सद्भक्तध्याननिगडः पूजावारिनिवारितः ॥ ३२ ॥ प्रतापी कश्यपसुतो गणपो विष्टपी बली ॥ यशस्वी धार्मिकः स्वोजाः प्रथमः प्रमथे
श्वरः ॥ ३३ ॥ चिंतामणिर्द्वीपपतिः कल्पद्रुमवनालयः ॥ रत्नमंडपमध्यस्थो रत्नसिंहासनाश्रयः ॥ ३४ ॥ तीव्राशिरोधृतपदो ज्वालि
नीमौलिलालितः ॥ नन्दानन्दितपीठश्रीर्भोगदो भूषितासनः ॥ ३५ ॥ सकामदायिनीपीठःस्फुरदुग्रासनाश्रयः ॥ तेजोवतीशिरोरत्नं
सत्या नित्यावतंसितः ॥ ३६ ॥ सविघ्ननाशिनीपीठः सर्वशक्त्यम्बुजाश्रयः ॥ लिपिपद्मासनाधारो वह्निधामत्रयाश्रयः ॥ ३७ ॥
उन्नतप्रपदो गूढगुल्फसंवृतपार्ष्णिकः ॥ पीनजंघः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः॥ ३८॥ निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ॥
पीनस्कंधः कम्बुकंठो लम्बोष्ठो लम्बनासिकः ॥ ३९ ॥ भग्नवामरदस्तुङ्गसव्यदन्तो महाहनुः॥ ह्रस्वनेत्रत्रयः शूर्पकर्णो निबिडमस्तकः॥
॥ ४० ॥ स्तबकाकारकुम्भाग्रो रत्नमौलिर्निरंकुशः ॥ सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान् ॥ ४१ ॥ सर्पकोटीरकटकः सर्पग्रै

For Private And Personal Use Only

वेयकागदः ॥ सर्पकक्ष्योदराबन्धः सर्पराजोत्तरीयकः ॥ ४२ ॥ रक्तो रक्ताम्बरधरो रक्तमाल्यविभूषणः ॥ रक्तेक्षणो रक्तकरो रक्त
ताल्वोष्ठपल्लवः॥ ४३ ॥ श्वेतः श्वेताम्बरधरः श्वेतमाल्यविभूषणः ॥ श्वेतातपत्ररुचिरः श्वेतचामरवीजितः ॥ ४४ ॥ सर्वावयवसम्पूर्णः
सर्वलक्षणलक्षितः ॥ सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः ॥४५॥ सर्वमंगलमांगल्यः सर्वकारणकारणम् ॥सर्वदैककरश्शार्ङ्गी बीजपूरी
गदाधरः॥४६॥इक्षुचापधरश्शूली चक्रपाणिस्सरोजभृत्॥पाशी धृतोत्पलः शालिमञ्जरीभृत्स्वदन्तभृत् ॥४७॥ कल्पवल्लीधरो विश्वाभय
दैककरो वशी ॥ अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः ॥४८॥ पूर्णपात्री कम्बुधरो विधृतालिसमुद्गकः ॥ मातुलुंगधरश्चूतकलिकाभृ
त्कुठारवान् ॥ ४९ ॥ पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः ॥ भारतीसुंदरीनाथो विनायकरतिप्रियः ॥ ५० ॥ महालक्ष्मीप्रियतम
स्सिद्धलक्ष्मीमनोरमः ॥ रमारमेशपूर्वांगो दक्षिणोमामहेश्वरः ॥ ५१ ॥ महीवराहवामांगो रतिकन्दर्पपश्चिमः ॥ आमोदमोदजननः
सप्रमोदप्रमोदनः ॥ ५२ ॥ समेधितसमृद्धश्रीर्ऋद्धिसिद्धिप्रवर्तकः ॥ दत्तसौमुख्यसुमुखः कांतिकन्दलिताश्रयः ॥ ५३ ॥ मदना
वत्याश्रितांघ्रिः कृतदौर्मुख्यदुर्मुखः ॥ विघ्नसम्पल्लवोपघ्नः सेवोन्निद्रमदद्रवः॥५४॥विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः॥तीव्राप्र
सन्ननयनो ज्वालिनीपालितैकदृक् ॥ ५५ ॥ मोहिनीमोहनो भोगदायिनीकांतिमंडितः॥ कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः॥५६॥
वसुंधरामदोन्नद्धमहाशंखनिधिः प्रभुः ॥ नमद्वसुमतीमौलिमहापद्मनिधिप्रभुः॥५७ ॥ सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥ ईशानमूर्द्धा
देवेन्द्रशिखः पवननन्दनः ॥ ५८ ॥ अग्रप्रत्यग्रनयनो दिव्यास्त्राणाम्प्रयोगवित् ॥ ऐरावतादिसर्वाशावारणावरणप्रियः ॥ ५९॥ वज्राद्य
स्त्रपरीवारो गणचण्डसमाश्रयः ॥ जयाजयपरीवारो विजयाविजयावहः ॥ ६० ॥ अजिताजितपादाब्जो नित्यानित्यावतंसितः ॥ विला

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिनीकृतोल्लासः शौण्डिसौन्दर्य्यमण्डितः॥ ६१ ॥अनंतानन्तसुखदः सुमंगलसुमंगलः॥ इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिनिषेवितः॥ ६२॥
सुभगासंश्रितपदो ललितालिताश्रयः ॥ कामिनीकामनः काममालिनीकेलिलालितः॥ ६३ ॥सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः॥
गुरुगुप्तपदो वाचा सिद्धो वागीश्वरीपतिः॥ ६४ ॥नलिनीकामुको वामारामो ज्येष्ठामनोरमः॥रौद्रीमुद्रितपादाब्जो हुँबीजस्तुङ्गशक्तिकः ६५॥
विश्वादिजननत्राणः स्वाहाशक्तिः सकीलकः ॥ अमृताब्धिकृतावासो मदघूर्णितलोचनः ॥६६॥उच्छिष्टगण उच्छिष्टगणेशो गणनायकः॥
सर्वकालिकसंसिद्धिर्नित्यशैवो दिगम्बरः ॥६७॥ अनपायोनन्तदृष्टिरप्रमेयोजरामरः ॥ अनाविलोप्रतिरथो ह्यच्युतोऽमृतमक्षरम ॥ ६८ ॥
अप्रतर्क्योऽक्षयोऽजय्योऽनाधारोऽनामयोऽमलः ॥ अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः ॥ ६९ ॥ अनाकारोऽब्धिभूम्यग्निबलघ्नोऽव्यक्तल
क्षणः ॥ आधारपीठ आधार आधाराधेयवर्जितः ॥ ७० ॥ आखुकेतन आशापूरक आखुमहारथः ॥ इक्षुसागरमध्यस्थ इक्षुभक्षण
लालसः ॥ ७१ ॥ इक्षुचापातिरेकश्रीरिक्षुचापनिषेवितः ॥ इन्द्रगोपसमानश्रीरिन्द्रनीलसमद्युतिः ॥ ७२ ॥ इन्दीवरदलश्याम इन्दुम
ण्डलनिर्मलः ॥ इध्मप्रिय इडाभाग इडाधामेन्दिराप्रियः ॥ ७३ ॥ इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः ॥ ईशानमौलिरीशान
ईशानसुत ईतिहा ॥ ७४ ॥ ईषणात्रयकल्पान्त ईहामात्रविवर्जितः ॥ उपेन्द्र उडुभृन्मौलिरुण्डेरकबलिप्रिय ॥ ७५ ॥ उन्नतानन
उत्तुङ्ग उदारत्रिदशाग्रणीः ॥ ऊर्जस्वानूष्मलमद ऊहापोहदुरासदः ॥ ७६ ॥ ऋग्यजुःसामसंभूतिर्ऋद्धिसिद्धिप्रवर्तकः ॥ ऋजुचित्तैक
सुलभ ऋणत्रयविमोचकः ॥ ७७ ॥ लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषाम् ॥ लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः॥ ७८॥
एकारपीठमध्यस्थ एकपादकृतासनः ॥ एजिताखिलदैत्यश्रीरेजिताखिलसंश्रयः ॥ ७९ ॥ ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऐरम्मदसमोन्मेष ऐरावतनिभाननः ॥ ८० ॥ ओंकारवाच्य ओंकार ओजस्वानोषधीपतिः ॥ औदार्यनिधिरौद्धत्यधुर्य औन्नत्यनिः स्वनः ॥ ८१ ॥ अङ्कुशः सुरनागानामङ्कुशः सुरविद्विषाम् ॥ अःसमस्तविसर्गान्तां पदेषु परिकीर्तितः ॥ ८२ ॥ कमण्डलुधरः कल्पः कपर्दी कलभाननः ॥ कर्म्मसाक्षी कर्म्मकर्ता कर्म्माकर्म्मफलप्रदः ॥ ८३ ॥ कदम्बगोलकाकारः कूष्माण्डगणनायकः ॥ कारुण्यदेहः कपिलः कथकः कटिसूत्रभृत् ॥ ८४ ॥ खर्वः खड्गप्रियः खड्गखातान्तस्थः खनिर्मलः ॥ खल्वाटशृङ्गनिलयः खट्वांगी खदुरासदः ॥ ८५ ॥ गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः ॥ गद्यगानप्रियो गर्जो गीतगीर्वाणपूर्वजः ॥ ८६ ॥ गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः ॥ गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः ॥ ८७ ॥ घण्टाघर्घरिकामाली घटकुम्भो घटोदरः ॥ चण्डश्चण्डेश्वरसुहृच्चण्डेशश्चण्डविक्रमः ॥ ८८ ॥ चराचरपतिश्चिन्तामणिश्चर्वणलालसः ॥ छन्दश्छन्दोवपुश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः ॥ ८९ ॥ जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ॥ जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः ॥९०॥ झलज्झल्लोल्लसद्दानझङ्कारिभ्रमराकुलः ॥ टङ्कारस्फारसंरावष्टङ्कारिमणिनूपुरः ॥ ९१ ॥ ठद्वयी पल्लवान्तस्थः सर्वमंत्रैकसिद्धिदः ॥ डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः ॥ ९२ ॥ ढक्कानिनादमुदितो ढौङ्को ढुण्ढिविनायकः ॥ तत्त्वानां परमं तत्त्वं तत्त्वम्पदनिरूपितः ॥ ९३ ॥ तारकांतरसंस्थानस्तारकस्तारकान्तकः ॥ स्थाणुः स्थाणुप्रियः स्थाता स्थावरञ्जङ्गमञ्जगत् ॥ ९४ ॥ दक्षयज्ञप्रमथनो दानादानवमोहनः ॥ दयावान् दिव्यविभवो दण्डभृद्दण्डनायकः ॥ ९५ ॥ दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः ॥ दंष्ट्रालग्नद्विपघटो देवार्थनृगजाकृतिः ॥ ९६ ॥ धनधान्यपतिर्धन्यो धनदो धरणीधरः ॥ ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः ॥९७॥ नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः ॥

For Private And Personal Use Only

मं० म० निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥ ९८ ॥ परं व्योम परं धाम परमात्मा परम्पदम् ॥ परात्परः पशुपतिः पशुपाशवि पू०खं १
॥१००॥ मोचकः ॥ ९९ ॥ पूर्णानंदः परानन्दः पुराणपुरुषोत्तमः ॥ पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः ॥ १०० ॥ प्रणामप्रत्ययातीतः प्रणता ग०तं०
र्तिनिवारणः ॥ फलहस्तः फणिपतिः फेत्कारः फाणितप्रियः ॥ १०१ ॥ बाणार्चितांघ्रियुगलो बालकेलिकुतूहली ॥ ब्रह्म ब्रह्मार्चि तरं०५
तपदो ब्रह्मचारी बृहस्पतिः ॥ १०२ ॥ बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ॥ बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डवालिमेखलः ॥
॥ १०३ ॥ भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः ॥ भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः ॥ १०४ ॥ भव्यो भूतालयो
भोगदाता भ्रूमध्यगोचरः ॥ मंत्रो मंत्रपतिर्मंत्री मदमत्तो मनोरमः ॥ १०५ ॥ मेखलावान्मन्दगतिर्मतिमान्कमलेक्षणः ॥ महाबलो
महावीर्य्यो महाप्राणो महामनाः ॥ १०६ ॥ यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ॥ यशस्करो योगगम्यो याज्ञिको याजकप्रियः ॥
॥१०७॥ रसो रसप्रियो रस्यो रञ्जको रावणार्चितः ॥ रक्षो रक्षाकरो रत्नगर्भो राज्यसुखप्रदः ॥ १०८ ॥ लक्ष्यालक्षप्रदो
लक्ष्यो लयस्थो लड्डुकप्रियः ॥ लानप्रियो लास्यपरो लाभकृल्लोकविश्रुतः ॥ १०९ ॥ वरेण्यो वह्निवदनो वन्द्यो वेदांतगोचरः ॥
विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः ॥ ११० ॥ वामदेवो विश्वनेता वज्री वज्रनिवारणः ॥ विश्वबंधनविष्कम्भाधारो विश्वेश्वरः
प्रभुः ॥ १११ ॥ शब्दब्रह्म शमप्राप्यः शम्भुशक्तिगणेश्वरः ॥ शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः ॥ ११२ ॥ षड्ऋतुकुसुमस्रग्वी ॥ १०० ॥
षडाधारः षडक्षरः ॥ संसारवैद्यः सर्वज्ञस्सर्वभेषजभेषजम् ॥ ११३ ॥ सृष्टिस्थितिलयक्रीडः सुरकुंजरभेदनः ॥ सिन्दूरितमहाकुंभस्सद
सद्व्यक्तिदायकः ॥ ११४ ॥ साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः ॥ स्वतंत्रः सत्यसंकल्पस्सामगानरतस्सुखी ॥ ११५ ॥ हंसो

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हस्तिपिशाचीशो हवनं हव्यकव्यभुक् ॥ हव्यं हुतप्रियो हर्षो हल्लेखामंत्रमध्यगः ॥ ११६ ॥ क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः ॥
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ॥ ११७ ॥ धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्द्धनः ॥ विद्याप्रदो विभवदो भुक्तिमुक्तिप्रदा
यकः ॥ ११८ ॥ आभिरूप्यकरो वीरः श्रीप्रदो विजयप्रदः ॥ सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ ११९ ॥ मेधादः कीर्तिदः
शोकहारी दौर्भाग्यनाशनः ॥ श्रीशोकहारी दौर्भाग्यनाशनस्सर्वशक्तिभृत ॥ १२० ॥ प्रतिवादिमुखस्तम्भो हृष्टचित्तप्रसादनः ॥
पराभिचारशमनो दुःखभञ्जनकारकः ॥ १२१ ॥ लवस्त्रुटिः कला काष्ठा निमेषस्तत्परः क्षणः ॥ घटी मुहूर्तः प्रहरो दिवा नक्तमहर्निशम्
॥ १२२ ॥ पक्षो मासोऽयनं वर्षं युगकल्पो महालयः ॥ राशिस्तारा तिथिर्योगो वारः करणमंशकम् ॥ १२३ ॥ लग्नं होरा कालचक्रं
मेरुस्सप्तर्षयो ध्रुवः ॥ राहुर्मन्दः कविर्जीवो बुधो भौमश्शशी रविः॥१२४॥कालस्सृष्टिः स्थितिर्विश्वं स्थावरं जङ्गमञ्च यत॥भूरापोऽग्निर्म
रुद्व्योमाहङ्कृतिः प्रकृतिः पुमान् ॥१२५॥ ब्रह्मा विष्णुश्शिवो रुद्र ईशश्शक्तिस्सदाशिवः॥ त्रिदशाः पितरः सिद्धा यक्षरक्षांसि किन्नराः
॥१२६॥ साध्या विद्याधरा भूता मनुष्याः पशवः खगाः ॥ समुद्रास्सरितश्शैला भूतभव्यस्भवोद्भवः॥ १२७ ॥ सांख्यस्पातञ्जलं योगः
पुराणानि श्रुतिः स्मृतिः ॥ वेदाङ्गानि सदाचारो मीमांसा न्यायविस्तरः॥१२८॥आयुर्वेदो धनुर्वेदो गान्धर्वङ्काव्यनाटकम् ॥ वैखानसं
भागवतं सात्वतम्पाञ्चरात्रकम् ॥१२९॥ शैवम्पाशुपतङ्कालमुखं भैरवशासनम् ॥ शाक्तं वैनायकं सौरं जैनमार्हतसंहिता ॥ १३० ॥
सदसव्द्यक्तमव्यक्तं सचेतनमचेतनम् ॥ बन्धो मोक्षः सुखम्भोगोऽयोगस्सत्यमणुर्महान् ॥ १३१ ॥ स्वस्ति हुं फट् स्वधा स्वाहा श्रौषट्
वौषड्वषण्नमः ॥ ज्ञानविज्ञानमानन्दो बोधस्संविच्छमो यमः ॥ १३२॥एक एकाक्षराधार एकाक्षरपरायणः ॥ एकाग्रधीरेकवीर एकाने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कस्वरूपधृक् ॥ १३३ ॥ द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्वीपरक्षकः ॥ द्वैमातुरो द्विवदनो द्वन्द्वातीतो द्वयातिगः ॥ १३४ ॥ त्रिधामा
त्रिकरस्त्रेता त्रिवर्गफलदायकः ॥ त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥ १३५ ॥ चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः ॥
चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः ॥ १३६ ॥ चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः ॥ चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसंभवः ॥ १३७ ॥
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत् ॥ पंचाधारः पञ्चवर्णः पञ्चाक्षरपरायणः॥ १३८॥पञ्चतालः पञ्चकरः पञ्चप्रणवभावितः॥
पञ्चब्रह्ममयस्फूर्तिः पञ्चवारणवारितः॥ १३९॥पंचभक्ष्यप्रियः पञ्चबाणः पञ्चशिवात्मकः॥षट्कोणपीठः षट्चक्रधामा षड्ग्रन्थिभेदकः१४०
षडध्वध्वान्तविध्वंसी षडंगुलमहाह्रदः ॥ षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः॥ १४१॥ षड्वैरिवर्गविध्वंसी षडूर्म्मिभयभञ्जनः॥
षट्तर्कदूरः षट्कर्म्मनिरतः षड्रसाश्रयः ॥ १४२ ॥ सप्तपातालचरणः सप्तद्वीपोरुमण्डलः ॥ सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः
॥ १४३ ॥ सप्तांगराज्यसुखदः सप्तर्षिगणमण्डितः ॥ सप्तच्छन्दोनिधिः सप्तहोता सप्तस्वराश्रयः १४४ ॥ सप्ताब्धिकेलिकासारः
सप्तमातृनिषेवितः ॥ सप्तच्छन्दोमोदमदस्सप्तच्छन्दो मखप्रभुः ॥ १४५ ॥ अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणम् ॥ अष्टांगयोगफल
भूरष्टपत्राम्बुजासनः ॥ १४६ ॥ अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः ॥ अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ॥ १४७ ॥ अष्टभैरवसेव्योष्ट
वसुवन्द्योऽष्टमूर्तिभृत ॥ अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ॥ १४८ ॥ नवनागासनाध्यासी नवनिध्यनुशासिता ॥ नवद्वारपुराधारो
नवद्वारनिकेतनः ॥ १४९ ॥ नवनारायणस्तुत्यो नवदुर्गानिषेवितः ॥ नवनाथमहानाथो नवनागविभूषणः ॥ १५० ॥ नवरत्नविचि
त्रांगो नवशक्तिशिरोधृतः ॥ दशात्मको दशभुजो दशदिक्पतिवन्दितः ॥ १५१ ॥ दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशाक्षरमहामंत्रो दशाशाव्याधिविग्रहः ॥ १५२ ॥ एकादशादिभी रुद्रैः स्तुत एकादशाक्षरः ॥ द्वादशोद्दण्डदोर्दण्डो द्वादशान्तनिकेतनः ॥ १५३ त्रयोदशभिदा भिन्नविश्वेदेवाधिदैवतम् ॥ चतुर्दशेन्द्रवरदश्चतुर्दशमनुप्रभुः॥ १५४ ॥ चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः॥ सामपञ्चदशः पञ्चदशीशीतांशुनिर्म्मलः॥ १५५॥ षोडशाधारनिलयः षोडशस्वरमातृकः॥षोडशान्तपदावासः षोडशेन्दुकलात्मकः ॥ १५६ ॥ कलासप्तदशीसप्तदशः सप्तदशाक्षरः ॥ अष्टादशद्वीपपतिरष्टादशपुराणकृत ॥ १५७ ॥ अष्टादशौषधीसृष्टिरष्टादशविधिः स्मृतः ॥ अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ॥ १५८ ॥ एकविंशः पुमानेकविंशत्यंगुलिपल्लवः ॥ चतुर्विंशतितत्त्वात्मा पञ्चविंशाख्यपूरुषः ॥ १५९ ॥ सप्तविंशतितारेशः सप्तविंशतियोगकृत ॥ द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ॥ १६० ॥ षट्त्रिंशत्तत्त्वसम्भूतिरष्टत्रिंशत्कलातनुः ॥ नमदेकोनपञ्चाशन्मरुद्वर्गोनिरर्गलः ॥ १६१ ॥ पञ्चाशदक्षरश्रेणीः पंचाशद्रुद्रविग्रहः ॥ पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः ॥ १६२ ॥ द्विपञ्चाशद्वपुश्श्रेणीत्रिषष्टयक्षरसंश्रयः॥ चतुष्षष्ट्यर्णनिर्णेता चतुःषष्टिकलानिधिः ॥ १६३॥ चतुःषष्टिमहासिद्धयोगिनीवृन्दवंदितः ॥ अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ॥ १६४॥ चतुर्णवतिमंत्रात्मा षण्णवत्यधिकः प्रभुः॥शतानन्दः शतधृतिः शतपत्रायतेक्षणः ॥ १६५ ॥ शतानीकः शतमुखश्शतधारवरायुधः ॥ सहस्रपत्रनिलयस्सहस्रफलभूषणः ॥ १६६ ॥ सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात ॥ सहस्रनामसंस्तुत्यः सहस्राक्षबलापहः ॥ १६७ ॥ दशसाहस्रफणिभृत फणिराजकृतासनः ॥ अष्टाशीतिसहस्रौघमहर्ष्पिस्तोत्रयंत्रितः ॥ १६८ ॥ लक्षाधीशप्रियाधारो लक्षाधीशमनोमयः ॥ चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ॥ १६९ ॥ चतुरशीतिलक्षाणाञ्जीवानां देहसंस्थितः ॥ कोटिसूर्य्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ॥ १७० ॥ शिवाभवाध्युष्टकोटि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनायकधुरन्धरः ॥ सप्तकोटिमहामंत्रमंत्रितावयवद्युतिः ॥ १७१ ॥ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ अनंतदेवतासेव्यो
ह्यनन्तमुनिसंस्तुतः ॥ १७२ ॥ अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः ॥ इति वैनायकं नाम्नां सहस्रमिदमीरितम ॥ १७३ ॥
इदं ब्राह्मे मुहूर्ते वै यः पठेत्प्रत्यहं नरः ॥ करस्थं तस्य सकलमैहिकामुष्मिकं सुखम ॥ १७४ ॥ आयुरारोग्यमैश्वर्यं धर्म्मः शौर्य्यं बलं
यशः ॥ मेधा प्रज्ञा धृतिः कातिस्सौभाग्यमतिरूपता ॥ १७५ ॥ सत्यं दया क्षमा शांतिर्दाक्षिण्यं धर्म्मशीलता ॥ जगत्संयमनं विश्व
संवादो वादपाटवम॥ १७६ ॥ सत्तापाण्डित्यमौदार्य्यं गाम्भीर्य्यं ब्रह्मवर्चसम ॥ औन्नत्यं च कुलं शीलं प्रतापो वीर्य्यमार्य्यता॥ १७७॥
ज्ञानं विज्ञानमास्तिक्यं धैर्य्यं विश्वातिशायिता ॥ धनधान्याभिवृद्धिश्च सकृदस्य जपाद्भवेत ॥ १७८ ॥ वश्यं चतुर्विधं नृणां जपादस्य
प्रजायते ॥ राज्ञो राजकलत्रस्य राजपुत्रस्य मंत्रिणः ॥ १७९ ॥ जप्यते यस्य वश्यार्थे स दासस्तस्य जायते ॥ धर्म्मा
र्थकाममोक्षाणामनायासेन साधनम ॥ १८० ॥ शाकिनीडाकिनीरक्षोयक्षोरगभयापहम ॥ साम्राज्यसुखदं चैव समस्तरिपुमर्द
नम ॥ १८१ ॥ समस्तकलहध्वंसि दग्धबीजप्ररोहणम ॥ दुःस्वप्नशमनं क्रुद्धस्वामिचित्तप्रसादनम ॥ १८२ ॥ षट्कर्म्माष्टमहासिद्धि
त्रिकालज्ञानसाधनम ॥ परकृत्योपशमनं परचक्रविमर्दनम ॥ १८३ ॥ संग्रामरङ्गे सर्वेषामिदमेकं जयावहम ॥ एवं वंध्यात्वदोषघ्नं
गर्भरक्षैककारणम ॥ १८४ ॥ पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदम ॥ देशे तत्र न दुर्भिक्षमीतयो दुरितानि च ॥ १८५ ॥ न
तद्गेहं जहाति श्रीर्यत्रायं जप्यते स्तवः ॥ क्षयकुष्ठप्रमेहार्शोभगन्दरविषूचिकाः ॥ १८६ ॥ गुल्मं प्लीहानमाध्मानमतिसारं महोदरम ॥
कासं श्वासमुदावर्तं शूलं शोकादिसम्भवम ॥ १८७ ॥ शिरोरोगं वमिं हिक्कां गण्डमालामरोचकम ॥ वातपित्तकफद्वंद्वत्रिदोषजनि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तज्ज्वरम् ॥ १८८ ॥ आगंतुविषमं शीतमुष्णं चैकाहिकादिकम् ॥ इत्याद्युक्तमनुक्तं वा रोगं दोषादिसम्भवम् ॥ १८९ ॥ सर्वं
प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपात् ॥ सकृत् पाठेन संसिद्धिः स्त्रीशूद्रपतितैरपि ॥ १९० ॥ सहस्रनाममंत्रोऽयं जपव्यस्तु शुभाप्तये ॥
महागणपतेः स्तोत्रं सकामः प्रजपन्निदम् ॥ १९१ ॥ इच्छया सकलान्भोगानुपभुज्येह पार्थिवान् ॥ मनोरथफलैर्दिव्यैर्व्योमयानैर्मनो
रमैः ॥ १९२ ॥ चन्द्रेन्द्रभास्करोपेन्द्रब्रह्मरुद्रादिसद्मसु ॥ कामरूपः कामगतिः कामतो विचरन्निह ॥ १९३ ॥ भुक्त्वा यथेप्सिता
न्भोगानभीष्टैस्सह बन्धुभिः ॥ गणेशानुचरो भूत्वा महागणपतेः प्रियः ॥ १९४ ॥ नन्दीश्वरादिसानन्दी नन्दितः सकलैर्गणैः ॥
शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः ॥ १९५ ॥ शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः ॥ जातिस्मरो धर्मपरः सार्वभौमो
ऽभिजायते ॥ १९६ ॥ निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशतत्परः ॥ योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंस्थितः ॥ १९७ ॥
निरंतरोदितानन्दे परमानन्दसंविदि ॥ विश्वोत्तीर्णे परे पारे पुनरावृत्तिवर्जिते ॥ १९८ ॥ लीनो वैनायके धाम्नि रमते नित्यनिर्वृतः ॥
यो नामभिर्हुनेदेतैरर्चयेत्पूजयेन्नरः ॥ १९९ ॥ राजानो वश्यतां यांति रिपवो यांति दासताम् ॥ मंत्राः सिध्यंति सर्वेऽपि सुलभास्तस्य
सिद्धयः ॥ २०० ॥ मूलमंत्रादपि स्तोत्रमिदं प्रियतरं मम ॥ नभस्ये मासि शुक्लायां चतुर्थ्यां मम जन्मनि ॥ २०१ ॥ दूर्वाभिर्नामभिः
पूजां तर्पणं विधिवच्चरेत् ॥ अष्टद्रव्यैर्विशेषेण जुहुयाद्भक्तिसंयुतः ॥ २०२ ॥ तस्येप्सितानि सर्वाणि सिद्ध्यंत्यत्र न संशयः ॥ इदं
प्रजप्तं पठितं पाठितं श्रावितं श्रुतम् ॥ २०३ ॥ व्याकृतं चर्चितं ध्यातं विमृष्टमभिनन्दितम् ॥ इहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकम्
॥ २०४ ॥ स्वच्छन्दचारिणाप्येष येन संधार्यते स्तवः ॥ संरक्ष्यते शिवोद्भूतैर्गणैरध्युष्टकोटिभिः ॥ २०५ ॥ पुस्तके लिखितं स्तोत्रं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंत्रभूतं प्रपूजयेत् ॥ तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निरंतरम् ॥ २०६॥ दानैरशेषैरखिलैर्व्रतैश्च तीर्थैरशेषैस्सकलैर्म्मखैश्च ॥ न तत्फलं विंदति यद्गणेशसहस्रनाम्नां स्मरणेन सद्यः ॥ २०७ ॥ एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने सायम्मध्यन्दिने वा त्रिषवण मथवा संततं वा जनो यः ॥ स स्यादैश्वर्य्यधुर्य्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति प्रत्यूहं हंति विश्वं वशयति सुचिरं वर्द्धते पुत्रपौत्रैः ॥ २०८॥ अकिंचनोप्येकचित्तो नियतो नियताशनः ॥ जपेत्तु चतुरो मासान्गणेशार्चनतत्परः ॥ २०९ ॥ दरिद्रतां समुन्मूल्य सप्तज न्मानुगामपि ॥ लभते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी ॥ २१० ॥ आयुष्यं वीतरोगं कुलमतिविमलं सम्पदश्चार्त्तदानाः कीर्ति र्नित्यावदाता भणितिरभिनवा कांतिरव्याजभव्या ॥ पुत्रास्संतः कलत्रं गुणवदभिमतं यद्यदेतच्च सत्यं नित्यं यः स्तोत्रमेतत्पठति गणपते स्तस्य हस्ते समस्तम् ॥ २११ ॥ ॐ गणंजयो गणपतिर्हेरंबो धरणीधरः ॥ महागणपतिर्लक्षप्रदः क्षिप्रप्रसादनः ॥ २१२ ॥ अमोघ सिद्धिरमितो मंत्रश्चिंतामणिर्निधिः ॥ सुमंगलो बीजमाशापूरको वरदः शिवः ॥ २१३ ॥ काश्यपो नंदनो वाचासिद्धो ढुंढिर्विनायकः॥ मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान् ॥ २१४ ॥ यः स्तौति मद्गतमना ममाराधनतत्परः॥ स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः ॥ २१५ नमोनमस्सुरवरपूजितांघ्रये नमोनमो निरुपममंगलात्मने ॥ नमोनमो विपुलकरैकसिद्धये नमोनमः करिकलभाननाय ते ॥ २१६ ॥ किंकिणिगणरणितस्तवचरणः प्रकटितगुरुमतिचारितविशेषः ॥ मदजललहरीकलितकपोलः शमयतु दुरितं गणपति नामा ॥ २१७ ॥ इति श्रीवक्रतुंडगणेशसहस्रनामस्तोत्रं समाप्तम् ॥ अथ वक्रतुंडशतनामस्तोत्रप्रारंभः ॥ गणेश्वरो गणक्रीडो महागणपतिस्तथा ॥ विश्वकर्ता विश्वमुखो दुर्ज्जयो धूर्ज्जयो जयः ॥ १ ॥ स्वरूपः सर्वनेत्राधिवासो वीरासनाश्रयः ॥ योगाधिपस्तार

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कस्थः पुरुषो गजकर्णकः ॥ २ ॥ चित्रांकः श्यामदशनो भालचंद्रश्चतुर्भुजः ॥ शंभुतेजा यज्ञकायः सर्वात्मा सामबृंहितः ॥ ३ ॥
कुलाचलांसो व्योमनाभिः कल्पद्रुमवनालयः ॥ निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ॥ ४ ॥ पीनस्कंधः कंबुकण्ठो लम्बोष्ठो
लंबनासिकः ॥ सर्वावयवसम्पूर्णः सर्वलक्षणलक्षितः ॥ ५ ॥ इक्षुचापधरः शूली कांतिकंदलिताश्रयः ॥ अक्षमालाधरो ज्ञानमुद्रावान्
विजयावहः ॥ ६ ॥ कामिनीकामनः काममालिनीकेलिलालितः ॥ अमोघसिद्धिराधार आधाराधेयवर्जितः ॥ ७ ॥ इन्दीवरदलश्याम
इन्दुमंडलनिर्मलः ॥ कर्मसाक्षी कर्मकर्ता कर्म्माकर्मफलप्रदः ॥ ८ ॥ कमण्डलुधरः कल्पः कपर्दी कटिसूत्रभृत ॥ कारुण्यदेहः
कपिलो गुह्यागमनिरूपितः ॥ ९ ॥ गुहाशयो गुहाब्धिस्थो घटकुंभो घटोदरः॥ पूर्णानन्दपरानन्दो धनदो धरणीधरः ॥१०॥ बृहत्तमो
ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ॥ भव्यो भवालयो भोगदाता चैव महामनः ॥ ११ ॥ वरेण्यो वामदेवश्च वन्द्यो वज्रनिवारणः ॥
विश्वकर्ता विश्वचक्षुर्हवनं हव्यकव्यभुक् ॥ १२ ॥ स्वतंत्रस्सत्यसंकल्पस्तथा सौभाग्यवर्द्धनः ॥ कीर्तिदः शोकहारी च त्रिवर्गफलदा
यकः ॥ १३ ॥ चतुर्बाहुश्चतुर्दंतश्चतुर्थीतिथिसंभवः॥ सहस्रशीर्ष्णा पुरुषः सहस्राक्षस्सहस्रपात ॥ १४ ॥ कामरूपः कामगतिर्द्विरदो
दीपरक्षकः ॥ क्षेत्राधिपः क्षमाभर्ता लयस्थो लड्डुकप्रियः ॥ १५ ॥ प्रतिवादिमुखस्तंभो दुष्टचित्तप्रसादनः ॥ भगवान् भक्तिसुलभो
याज्ञिको याजकप्रियः ॥ १६ ॥ इत्येवं देवदेवस्य गणराजस्य धीमतः॥ शतमष्टोत्तरं नाम्नां सारभूतं प्रकीर्तितम् ॥१७॥ सहस्रनाम्ना
कृष्य मया प्रोक्तं स्तोत्रं मनोहरम्॥ब्राह्मे मुहूर्ते चोत्थाय स्मृत्वा देवं गणेश्वरम्॥पठेत्स्तोत्रमिदं भक्त्या गणराजः प्रसीदति ॥१८॥इति
श्रीरुद्रयामलतंत्र उमामहेश्वरसंवादे श्रीगणेशस्याष्टोत्तरनामस्तोत्रं समाप्तम् ॥ अथ वक्रतुण्डस्तोत्रप्रारंभः ॥ ॐॐॐकाररूपं हिमकररुचिरं

For Private And Personal Use Only

यत्स्वरूपं तुरीयं त्रैगुण्यातीतलीलं कलयति मनसा तेजसोदारवृत्तिः ॥ योगीन्द्रा ब्रह्मरन्ध्रे सहजगुणमयं श्रीहरेन्द्रं स्वसंज्ञं गँगँगँगँगणेशं गज
मुखमनिशं व्यापकं चिंतयंति॥ १ ॥वँवँवँविघ्नराजं भजति निजभुजे दक्षिणे पाणिशुंडं क्रोंक्रोंक्रोंक्रोधमुद्रादलितरिपुकुलं कल्पवृक्षस्य मूले
दँदँदँदंतमेकं दधतमभिमुखं कामधेन्वादिसेव्यं धँधँधँधारयंतं दधतमतिशयं सिद्धिबुद्धीर्ददंतम् ॥ २ ॥ तुँतुँतुँतुंगरूपं गगनमुपगतं व्याप्नुवन्तं
दिगंतं क्लीँ क्लीँ क्लीँ कामनाथं गलितमददलं लोलमत्तालिमालम् ॥ ह्रीँ ह्रीँ ह्रीँ काररूपं सकलमुनिजनध्येयमद्विशुदंडं श्रीँ श्रीँ श्रीँ संश्रयं
त्वं निखिलनिधिकुलं नौमि हेरंबलंबम् ॥ ३ ॥ ग्लौँग्लौँग्लौँकारमाद्यं प्रणवमयमहामंत्रमुक्तावलीनां सिद्धं विघ्नेशबीजं शशिकरम
दृशं योगिनां ध्यानगम्यम् ॥ डाँडाँडाँडामरूपं दलितभवभयं सूर्यकोटिप्रकाशं यँयँयँयक्षराजं जपति मुनिजनो बाह्यमाभ्यंतरं च ॥ ४ ॥
हुँहुँहुँहेमवर्णं श्रुतिगणितगुणं शूर्पकर्णं कृपालुं ध्येयं यः सूर्यबिंबे उरसि च विलसत्सर्पयज्ञोपवीतम् ॥ स्वाहाहुँफट्नमोंतैः ठठठठसहितैः
पल्लवैः सेव्यमानैर्मंत्राणां सप्तकोटिप्रगुणितमहिमध्यानमीशं प्रपद्ये ॥ ५ ॥ पूर्वं पीठं त्रिकोणं तदुपरिरुचिरं षड्दलं सूपपत्रं तस्योर्द्ध्वं बद्ध
रेखावसुदलकमलं बाह्यतोधश्च तस्य ॥ मध्ये हुंकारबीजं तदनु भगवतो बीजषट्कं पुरोगरष्टौ शुचलेशमिथो बहुलगणपतेविष्टरं चाष्टकं च
॥ ६ ॥ धर्माद्यष्टौ प्रसिद्धा दिशि विदिशि गणा बाह्यतो लोकपालान् मध्ये क्षेत्राधिनाथं मुनिजनतिलकं मंत्रमुद्रापदेशम्॥एवं यो भक्ति
युक्तो जपति गणपतिं पुष्पधूपाक्षताद्यैर्नैवेद्यैर्मोदकानां स्तुतिनटविलसद्गीतवादित्रनादैः ॥ ७ ॥ राजानस्तस्य भृत्या इव युवतिकुलं
दासवत्सर्वदास्ते लक्ष्मीःसर्वाङ्गयुक्ता त्यजति न सदनं किंकराः सर्वलोकाः ॥ पुत्राः पौत्राः प्रपौत्रा रणभुवि विजयो द्यूतवादे प्रवीणो
यस्येशो विघ्नराजो निवसति हृदये भक्तिभाजां स देवः ॥ ८ ॥ इति श्रीशंकराचार्यविरचितं वक्रतुंडस्तोत्रं समाप्तम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथ उच्छिष्टगणेशकवचप्रारंभः ॥ देव्युवाच ॥ " देवदेव जगन्नाथ सृष्टिस्थितिलयात्मक ॥ विना ध्यानं विना मंत्रं विना होमं विना जपम् ॥ १ ॥ येन स्मरणमात्रेण लभ्यते चाशु चिंतितम् ॥ तदेव श्रोतुमिच्छामि कथयस्व जगत्प्रभो ॥ २ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ॥ उच्छिष्टगणनाथस्य कवचं सर्वसिद्धिदम् ॥ ३ ॥ अल्पायासैर्विना कष्टैर्जपमात्रेण सिद्धिदम् ॥ एकांते निर्जनेऽरण्ये गह्वरे च रणांगणे ॥ ४ ॥ सिंधुतीरे च गांगीये कूले वृक्षतले जले ॥ सर्वदेवालये तीर्थे लब्ध्वा सम्यक् जपं चरेत् ॥ ५ ॥ स्नानशौचादिकं नास्ति नास्ति निर्बंधनं प्रिये ॥ दारिद्र्यांतकरं शीघ्रं सर्वतत्त्वं जनप्रिये ॥ ६ ॥ सहस्रशपथं कृत्वा यदि स्नेहोऽस्ति मां प्रति ॥ निंदकाय कुशिष्याय खलाय कुटिलाय च ॥ ७ ॥ दुष्टाय परशिष्याय घातकाय शठाय च ॥ वंचकाय वरघ्नाय ब्राह्मणीगमनाय च ॥ ८ ॥ अशक्ताय च क्रूराय गुरुद्रोहरताय च ॥ न दातव्यं न दातव्यं न दातव्यं कदाचन ॥ ९ ॥ गुरुभक्ताय दातव्यं सच्छिष्याय विशेषतः ॥ तेषां सिध्यंति शीघ्रेण ह्यन्यथा न च सिध्यति ॥ १० ॥ गुरुसंतुष्टिमात्रेण कलौ प्रत्यक्षसिद्धिदम् ॥ देहोच्छिष्टैः प्रजप्तव्यं तथोच्छिष्टैर्महामनुः ॥ ११ ॥ आकाशे च फलं प्राप्तं नान्यथा वचनं मम ॥ एषा राजवती विद्या विना पुण्यं न लभ्यते ॥ १२ ॥ अथ वक्ष्यामि देवेशि कवचं मंत्रपूर्वकम् ॥ येन विज्ञानमात्रेण राजभोगफलप्रदम् ॥ १३ ॥ ऋषिर्मे गणकः पातु शिरसि च निरंतरम् ॥ त्राहि मां देवि गायत्रीछन्दो ऋषिः सदा मुखे ॥ ॥ १४ ॥ हृदये पातु मां नित्यमुच्छिष्टगणदेवता ॥ गुह्ये रक्षतु तद्बीजं स्वाहा शक्तिश्च पादयोः ॥ १५ ॥ कामकीलकसर्वांगे विनियोगश्च सर्वदा ॥ पार्श्वद्वये सदा पातु स्वशक्तिं गणनायकः ॥ १६ ॥ शिखायां पातु तद्बीजं भ्रूमध्ये तारबीजकम् ॥

For Private And Personal Use Only

हस्तिवक्त्रश्च शिरसि लंबोदरो ललाटके ॥ १७ ॥ उच्छिष्टो नेत्रयोः पातु कर्णौ पातु महात्मने ॥ पाशांकुशमहाबीजं नासिकायां च
रक्षतु ॥ १८ ॥ भूतीश्वरः परः पातु आस्यं जिह्वां स्वयंवपुः ॥ तद्बीजं पातु मां नित्यं ग्रीवायां कंठदेशके ॥ १९ ॥ गंबीजं च तथा
रक्षेत्तथा त्वग्रे च पृष्ठके ॥ सर्वकामश्च हृत पातु पातु मां च करद्वये ॥ २० ॥ उच्छिष्टाय च हृदये वह्निबीजं तथोदरे ॥ मयाबीजं
तथा कट्यां द्वौ ऊरू सिद्धिदायकः ॥ २१ ॥ जंघायां गणनाथश्च पादौ पातु विनायकः ॥ शिरसः पादपर्यंतमुच्छिष्टगणना
यकः ॥ २२ ॥ आपादमस्तकांतं च उमापुत्रश्च पातु माम् ॥ दिशोऽष्टौ च तथाकाशे पाताले विदिशाष्टके ॥ २३ ॥ अहर्निशं च मां
पातु मदचंचललोचनः ॥ जलेऽनले च संग्रामे दुष्टकारागृहे वने ॥ २४ ॥ राजद्वारे घोरपथे पातु मां गणनायकः ॥ इदं तु कवचं
गुह्यं मम वक्त्राद्विनिर्गतम् ॥ २५ ॥ त्रैलोक्ये सततं पातु द्विभुजश्च चतुर्भुजः ॥ बाह्यमभ्यंतरं पातु सिद्धिबुद्धिर्विनायकः ॥ २६ ॥
सर्वसिद्धिप्रदं देवि कवचमृद्धिसिद्धिदम ॥ एकांते प्रजपन्मंत्रं कवचं युक्तिसंयुतम् ॥ २७ ॥ इदं रहस्यं कवचमुच्छिष्टगणनायकम् ॥
सर्वधर्मेषु देवेशि इदं कवचनायकम् ॥ २८ ॥ एतत कवचमाहात्म्यं वर्णितुं नैव शक्यते ॥ धर्मार्थकाममोक्षं च नानाफलप्रदं
नृणाम् ॥२९॥ शिवपुत्रः सदा पातु पातु मां च सुरार्चितः ॥ गजाननः सदा पातु गणराजश्च पातु माम् ॥३०॥ सदा शक्तिरतः पातु
पातु मां कामविह्वलः ॥ सर्वाभरणभूषाढ्यः पातु मां सिंदूरार्चितः ॥ ३१ ॥ पंचमोदकरः पातु पातु मां पार्वतीसुतः ॥ पाशांकुशधरः
पातु पातु मां च धनेश्वरः ॥ ३२ ॥ गदाधरः सदा पातु पातु मां काममोहितः ॥ नग्ननारीरतः पातु पातु मां च गणेश्वरः ॥ ३३ ॥
अक्षयं वरदः पातु शक्तियुक्तः सदावतु ॥ भालचंद्रः सदा पातु नानारत्नविभूषितः ॥ ३४ ॥ उच्छिष्टगणनाथश्च मदाघूर्णितलोचनः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नारीयोनिरसास्वादं पातु मां गजकर्णकः ॥ ३५ ॥ प्रसन्नवदनः पातु पातु मां भगवल्लभः ॥ जटाधरः सदा पातु पातु मां च किरी
टिकः ॥ ३६ ॥ पद्मासनस्थितः पातु रक्तवर्णश्च पातु माम् ॥ नग्नसामप्रदोन्मत्तः पातु मां गणदैवतः ॥ ३७ ॥ वामांगे सुंदरीयुक्तः
पातु मां मन्मथप्रभुः ॥ क्षेत्रपः पिशितं पातु पातु मां श्रुतिपाठकः ॥ ३८ ॥ भूषणाढ्यस्तु मां पातु नानाभोगसमन्वितः॥ स्मिताननः
सदा पातु श्रीगणेशकुलान्वितः ॥ ३९ ॥ श्रीरक्तचंदनमयः सुलक्षणगणेश्वरः ॥श्वेतार्कगणनाथश्च हरिद्रागणनायकः ॥ ४० ॥ पारभ
द्रगणेशश्च पातु सप्तगणेश्वरः ॥ प्रवालकगणाध्यक्षो गजदंतो गणेश्वरः ॥ ४१ ॥ हरबीजगणेशश्च भद्राक्षगणनायकः ॥ दिव्यौषधि
समुद्भूतो गणेशश्चिंतितप्रदः ॥ ४२ ॥ लवणस्य गणाध्यक्षो मृत्तिकागणनायकः ॥ तंडुलाक्षगणाध्यक्षो गोमयश्च गणेश्वरः ॥ ४३ ॥
स्फटिकाक्षगणाध्यक्षो रुद्राक्षगणदैवतः ॥ नवरत्नगणेशश्च आदिदेवो गणेश्वरः ॥ ४४ ॥ पंचाननश्चतुर्वक्त्रः षडाननगणेश्वरः ॥
मयूरवाहनः पातु पातु मां मूषकासनः ॥४५॥ पातु मां देवदेवेशः पातु मामृषिपूजितः ॥ पातु मां सर्वदा देवो देवदानवपूजितः ॥४६॥
त्रैलोक्यपूजितो देवः पातु मां च विभुः प्रभुः ॥ रंगस्थं च सदा पातु सागरस्थं सदाऽवतु ॥ ४७ ॥ भूमिस्थं च सदा पातु पातालस्थं
च पातु माम् ॥ अंतरिक्षे सदा पातु आकाशस्थं सदावतु ॥ ४८ ॥ चतुःष्पथे सदा पातु त्रिपथस्थं च पातु माम् ॥ बिल्वस्थं
च वनस्थं च पातु मां सर्वतस्तनम् ॥ ४९ ॥ राजद्वारस्थितं पातु पातु मां शीघ्रसिद्धिदः ॥ भवानीपूजितः पातु ब्रह्मविष्णु
शिवार्चितः ॥ ५० ॥ इदं तु कवचं देवि पठनात्सर्वसिद्धिदम् ॥ उच्छिष्टगणनाथस्य समंत्रं कवचं परम् ॥ ५१ ॥ स्मरणाद्भू
भुजत्वं च लभते सांगतां ध्रुवम् ॥ वाचःसिद्धिकरं शीघ्रं परसैन्यविदारणम् ॥ ५२ ॥ प्रातर्मध्याह्नसायाह्ने दिवा रात्रौ पठेन्नरः ॥

चतुर्थ्यां दिवसे रात्रौ पूजने मानदायकम् ॥ ५३ ॥ सर्वसौभाग्यदं शीघ्रं दारिद्र्यार्णवघातकम् ॥ सुदारसुप्रजासौख्यं सर्वसिद्धिकरं नृणाम् ॥ ५४ ॥ जलेऽथवाऽनलेऽरण्ये सिंधुतीरे सरित्तटे ॥ श्मशाने दूरदेशे च रणे पर्वतगह्वरे ॥ ५५ ॥ राजद्वारे भये घोरे निर्भयो जायते ध्रुवम् ॥ सागरे च महाशीते दुर्भिक्षे दुष्टसंकटे ॥ ५६ ॥ भूतप्रेतपिशाचादियक्षराक्षसजे भये ॥ राक्षसीयक्षिणीक्रूराशाकिनीडाकिनीगणाः॥ ५७ ॥ राजमृत्युहरं देवि कवचं कामधेनुवत् ॥ अनंतफलदं देवि गति मोक्षं च पार्वति ॥ ५८ ॥ कवचेन विना मंत्रं यो जपेद्गणनायकम् ॥ इह जन्मनि पापिष्ठो जन्मांते मूषको भवेत् ॥ ५९ ॥ इति परमरहस्यं देवदेवार्चनं च कवचपरमदिव्यं पार्वती पुत्ररूपम् ॥ पठति परमभोगैश्वर्यमोक्षप्रदं च लभति सकलसौख्यं शक्तिपुत्रप्रसादात् ॥ ६० ॥" इति श्रीरुद्रयामलतंत्रे उमामहेश्वरसंवादे उच्छिष्टगणेशकवचं समाप्तम् ॥ शुभमस्तु ॥ अथोच्छिष्टगणेशसहस्रनामस्तोत्रं लिख्यते ॥ उक्तं च रुद्रयामलतंत्रे ॥ श्रीभैरव उवाच ॥ शृणु देवि रहस्यं मे यत्पुरा सूचितं मया॥तव भक्त्या गणेशस्य वक्ष्ये नामसहस्रकम् ॥ १ ॥देव्युवाच॥ "ॐ भगवन्गणनाथस्य उच्छिष्टस्य महात्मनः ॥ श्रोतुं नामसहस्रं मे हृदयश्चोत्सुकायते ॥ २ ॥ भैरव उवाच ॥ प्राङ्मुखे त्रिपुरानाथे जातविघ्नाकुलेशिवे ॥ मोहने मुच्यते चेतस्ते सर्वे बलदर्पिताः॥ ३ ॥ तदा प्रभुं गणाध्यक्षं स्तुत्वा नामसहस्रम्॥ विघ्ना दूरात्पलायंते कालरुद्रादिव प्रजाः॥४॥ तस्यानुग्रहतो देवि जातोऽहं त्रिपुरांतकः ॥ तमद्यापि गणेशानं स्तौत्रं नामसहस्रकैः ५ तमेव तव भक्त्याहं साधकानां हिताय च ॥ महागणपतेर्वक्ष्ये दिव्यं नामसहस्रकम् ॥ ६ ॥ ॐ अस्य श्रीउच्छिष्टगणेशसहस्रनामस्तोत्रमंत्रस्य श्रीभैरव ऋषिः । गायत्री छंदः । श्रीमहागणपतिर्देवता । गं बीजम्।ह्रीं शक्तिः।कुरुकुरु कीलकम् । मम धर्मार्थकाममोक्षार्थे जपे विनियोगः॥"ॐ ह्रीं श्रीं श्रीगणाध्यक्षो ग्लौं गं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गणपतिर्गुणी ॥ गुणाढ्यो निर्गुणो गोप्ता गजवक्त्रो विभावसुः॥ ७ ॥ विश्वेश्वरो विभादीप्तो दीपनो धीवरो धनी ॥ सदा शांतो जगत्राता
विश्वावर्तो विभाकरः ॥ ८ विश्रंभी विजयो वैद्यो वारांनिधिरनुत्तमः ॥ अणिमाविभवः श्रेष्ठो ज्येष्ठो गाथाप्रियो गुरुः ॥ ९ ॥ सृष्टिकर्ता
जगद्धर्ता विश्वभर्ता जगन्निधिः ॥ पतिः पीतविभूषांको रक्तास्यो लोहितांबरः ॥ १० ॥ द्विपाक्षोच्चविमानस्थो विनयः सदयः
सुखी ॥ सुरूपः सात्त्विकः सत्यः शुद्धश्शंकरनंदनः ॥ ११ ॥ नंदीश्वरो जयानंदी बंधस्तुत्यो विचक्षणः ॥ दैत्यमर्दी सदाक्षीबो मदि
रारुणलोचनः ॥ १२ ॥ सारात्मा विश्वसारश्च विश्वसारो विलेपनः ॥ परं ब्रह्म परं ज्योतिः साक्षी त्र्यक्षो विकस्थितः ॥ १३ ॥
विश्वेश्वरो वीरहर्ता सौभाग्यो भाग्यवर्द्धनः ॥ भृंगीरिटी भृंगमाली भृंगकूजितनादितः ॥१४॥ विवर्तको विनीतोपि नयनानंदनार्चितः ॥
गंगाजलपानप्रियो गंगातीरविहारिणः ॥ १५ ॥ गंगाप्रियो गंगजश्च वाहनानि पुरः सदा ॥ गंधमादनसंवासो गंधमादनकेलिकृत
॥ १६ ॥ गंधानुलिप्तपूर्वांगः सर्वदेवस्मरः सदा ॥ गणगंधर्वराजेशो गणगंधर्वसेवितः ॥ १७ ॥ गंधर्वपूजितो नित्यं सर्वरोगविनाशकः॥
गंधर्वगणसंसेव्यो गंधर्ववरदायकः ॥ १८ ॥ गंधर्वो गंधमातंगो गंधर्वकुलदैवतः ॥ गंधर्वगर्वसंवेगो गंधर्ववरदायकः ॥ १९ ॥ गंधर्व
प्रबलासत्वं गंधर्वगणसंयुतः ॥ गंधर्वादिगुणानंदो नंदोनंतगुणात्मकः ॥ २० ॥ विश्वमूर्तिर्विश्वधाता विनतास्यो विनर्तकः ॥ करालः
कामदः कांतः कमनीयः कलानिधिः ॥ २१ ॥ कारुण्यरूपः कुटिलः कुलाचारी कुलेश्वरः ॥ विकरालो रणः श्रेष्ठः संहारो हारभू
षणः ॥ २२ ॥ ऊरूरम्यमुखो रक्तो देवतादयितो रसः ॥ महाकालो महादंष्ट्रो महोरगभयानकः ॥ २३ ॥ उन्मत्तरूपः कालाग्निरग्नि
सूर्येन्दुलोचनः ॥ सितास्यश्चासितात्मा भैरवसौभाग्यवान्भगः ॥ २४ ॥ भर्गात्मजो भगावासो भगदो भगवर्द्धनः ॥ शुभंकरः शुचिः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शांतः श्रेष्ठः श्रव्यः शचीपतिः ॥ २५ ॥ वेदाद्यो वेदकर्ता च वेदवेद्यः सनातनः ॥ विद्याप्रदो वेदरसो वैदिको वेदपारगः ॥ २६ ॥
वेदध्वनिरतो वीरो वेदवेदांगस्वर्थवित् ॥ तत्त्वज्ञः सर्वगः साधुः सदयः सदसन्मयः ॥ २७ ॥ शिवंकरः शिवसुतः शिवानंदविवर्द्धनः ॥
सैन्यः श्वेतः शतमुखो मुग्धो मोदकभंजनः ॥ २८ ॥ देवदेवो दिनकरो धृतिमान्द्युतिमान्धनः ॥ शुद्धात्मा शुद्धमतिमाञ् शुद्धदीप्तिः
शुचिव्रतः ॥ २९ ॥ शरण्यः शौनकः शूरः शब्ददर्भाजटोरुकः ॥ दारकः शिखिवाहेष्टः सितः शंकरवल्लभः ॥ ३० ॥ शंकरो निर्भ
यो नित्यो लयकृल्लास्यतत्परः ॥ लूतो लीलारसोल्लासी विलासी विभ्रमो भ्रमः ॥ ३१ ॥ भ्रमणः शशिभृत्सूर्यः शनिर्धरणिनंदनः ॥ बुधो
विबुधसेव्यश्च बुधराजो बलंधरः॥ ३२ ॥ जीवो जीवप्रदो जेता स्तुत्यो नित्यो रतिप्रियः ॥ बुधो विबुधसेव्यश्च जनरक्षणतत्परः॥ ३३ जनानंद
प्रदाता च जनकाह्लादकारकः॥ गच्छो गणपतिर्गच्छनायको गच्छगर्वहा ॥ ३४ ॥ गच्छराजोथ गच्छेशो गच्छराजनमस्कृतः॥ गच्छप्रियो
गच्छगुरुर्गच्छत्राक्ययमातुरः ॥ ३५ ॥ गच्छप्रभुर्गच्छचरो गच्छप्रियकृतोद्यमः ॥ गच्छगीतगुणो गर्तो मर्यादाप्रतिपालकः ॥ ३६ ॥
गीर्वाणागमसारस्य नभो गीर्वाणदेवता ॥ संपत्तिसदनाकारः संपत्तिसुखदायकः ॥ ३७ ॥ संपत्तिसुखकर्ता च संपत्तिसुभगाननः ॥
संपत्तिशुभदो नित्यं संपत्तिश्चतपोधनः ॥ ३८ ॥ रुचको मेचकस्तुष्टः प्रभुस्तोमरघातकः ॥ दंडी चंडांशुरव्यक्तः कमंडलुधरोऽनघः
॥ ३९ ॥ कामी कर्मरतः कालकोलः क्रंदितदिक्तटः ॥ भ्रामको जातिपूज्यश्च जाड्यहा जडसूदनः ॥ ४० ॥ जालंधरो जग
द्धासी हासकृद्दहनो गुहः ॥ हविष्मान्हव्यवाहाक्षो हाटको हाटकांगदः ॥ ४१ ॥ सुमेरुर्हिमवान्होता हरपुत्रो हलांकपः ॥ हालाप्रियो
हृदा शांतः कांताहृदयपोषणः ॥ ४२ ॥ शोषणः क्लेशहा क्रूरः कुबेरः कविताकृतिः ॥ कुबेरो धीमयो धीता ध्येयो धीमान्दया

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निधिः ॥ ४३ ॥ दविष्ठो दमनो हृष्टो दाता त्राता मिता समः ॥ निर्गतो नैगमो गम्यो निर्जयो जटिलोऽजरः ॥ ४४ ॥ जनजीवो जितारातिर्जगद्व्यापी जगन्मयः ॥ चामीकरनिभो नाभ्यो नलिनायतलोचनः ॥ ४५ ॥ रोचनामोचको मंत्री मंत्रकोटिसमाश्रितः ॥ पंचभूतात्मकः पंचमायकः पंचवक्त्रकः ॥ ४६ ॥ पंचमः पश्चिमः पूर्वः पूर्णः कीर्णालकः कुणिः ॥ कठोरहृदयग्रीवोलंकृतो ललिताशयः ॥ ४७ ॥ लोलचित्तो बृहन्नामो मासपक्षर्तुरूपवान् ॥ ध्रुवो द्रुतगतिर्ध्येयो धर्मवाग्मिकिप्रियो नलः ॥ ४८ ॥ अगस्त्यग्रस्तभुवनो भुवनैकमलापहः ॥ सासरः स्वर्गतिः स्वक्षः मानंदः साधुपूजितः ॥ ४९ ॥ सतीपतिः समरसः सनकः सरलः सरः ॥ सुरप्रियो वसुमतिर्वासवो वसुपूजितः ॥ ५० ॥ वित्तदो वित्तनाथश्च धनिनां धनदायकः ॥ राजीवनयनः स्मार्तो स्मृतिहा कृत्तिकांबरः॥ ५१ ॥अश्विनोश्विमुखः शुभ्रो भरणो भरणीप्रियः॥कृत्तिकासनकः कोलो रोहिणी रोहिणोपमः ॥५२॥ कतवो शोरिसंदी च रोहिणीमोहिनीभूतः ॥ मृगराजो मृगशिरो माधवो मधुरध्वनिः ॥ ५३ ॥ आर्द्रानलो महाबुद्धिर्महोरगविभूषणः ॥ भ्रूक्षेपदंतविभवो भ्रूकरालः पुनर्मयः ॥ ५४ ॥ पुनर्देवः पुनर्जेता पुनर्जीवः पुनर्वसुः॥ तिमिरस्तिमिकेतुश्च तिमिवासरघातनः॥ ५५ ॥ तिष्यस्तुलाधरो जृंभो विश्लेषाश्लेषदानराट् ॥ मानवी माधवो माधो वाचालो मघवोयमः ॥ ५६ ॥ मघो मघाप्रिये मेघो महाशुंडो महाभुजः ॥ पूर्वाफाल्गुणिकः प्रीतः फल्गुरुत्तरफाल्गुणः ॥ ५७ ॥ फेनिलो ब्रह्मदो ब्रह्मा सप्ततंतुसमाश्रयः ॥ घोणाहस्तश्चतुर्हस्तो हस्तिवक्त्रो हलायुधः॥५८॥ चित्रांबरोर्चितपदः स्वस्तिदः स्वस्तिविग्रहः ॥ विशाखाशिखिसेव्यश्च शिखिध्वजसहोदरः ॥५९॥ अणु रेणूकरस्कारो रूरूरेणू सुतीनरः ॥ अनुराधाप्रियो राधः श्रीमाञ्छुक्रः शुचिस्मितः ॥ ६० ॥ ज्येष्ठः श्रेष्ठार्चितपदो मूलं त्रिजगतो गुरुः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुचिः पूर्वोत्तराषाढश्चोत्तराषाढ ईश्वरः॥ ६१॥ श्रव्योभिजिदनंतात्मा श्रवोश्चेपितदानवः ॥ श्रावणः श्रावणः श्रोता धनी धन्यो धनिमूकः ॥ ६२ ॥ धनेशुकः सदा तीव्रः शीतकुंभः शरद्द्युतिः ॥ पूर्वाभाद्रपदाभद्रश्चोत्तराभाद्रपादिनः ॥ ६३ ॥ रेणुकस्तनयो रामो रेवती रमणो रमी ॥ अश्वयुक्कार्तिकेयेष्टो मार्गशीर्षो मृगोत्तमः ॥ ६४ ॥ पौषैश्वर्यः फाल्गुनात्मा वसंतश्चित्रको मधुः ॥ राज्यदोभिजिदात्मीय स्तारेशस्तारकद्युतिः ॥ ६५ ॥ प्रतीतः प्रोजितः प्रीतः परमः परमो हितः ॥ परहा पंचभूः पंचवायुपूज्यः परो महः ॥ ६६ ॥ पुराणागमवियोगी महिषो रासभोग्रगः ॥ ग्रहो मेषो वृषो मंदो मन्मथो मिथुनाकृतिः ॥ ६७ ॥ कल्पभृत्कंटकटको दीपो मर्कटशप्रभुः॥ कर्कटो घृणिकुक्कूटो वनजो हंसयोहमः ॥ ६८ ॥ सिंहसिंहासनो भूष्यो मुहुर्मूषकवाहनः ॥ कन्याकलावतीपुत्रो कन्याप्रीतः कुलोद्वहः ॥ ६९ ॥ अतुल्यरूपोबलदस्तुल्यभृत्तुल्यसाक्षिकः ॥ अलिश्चापधरो धन्वी कच्छपो मकरो मणिः॥ ७० ॥ कुंभभृत्कलशः कुब्जो मीन मांससुतर्पितः ॥ राशितारागृहमयस्तिथिरूपो जगद्विभुः ॥ ७१ ॥ प्रतापी प्रतिपत्प्रेयो द्वितीयाद्वैतानिश्चितः ॥ त्रिरूपश्च तृतीयाग्नि स्त्रयीरूपस्त्रयीतनुः ॥ ७२ ॥ चतुर्थीवल्लभो देवो परागः पंचमीश्वरः ॥ षड्रसास्वादको जातः षष्ठी षष्ठीकवत्सलः ॥ ७३ ॥ सप्ताणव गतिः सारः सप्तमीश्वररोहितः ॥ अष्टमीनंदनोनंतो नवमीभक्तिभावितः ॥ ७४ ॥ दशदिक्पतिपूज्यश्च दशमीद्रुहिणो द्रुतः ॥ एका दशात्मगणपो द्वादशीयुगचर्चितः ॥ ७५ ॥ त्रयोदशमणिस्तुल्यश्चतुर्दशस्वरप्रियः ॥ चतुर्दशेंद्रसंस्तुल्यः पूर्णिमानंदविग्रहः ॥ ७६ ॥ दर्शादर्शो दर्शगश्च वानप्रस्थो महेश्वरः ॥ मौर्वी मधुरवाग् मूलं मूर्तिमान्मेघवाहनः ॥ ७७ ॥ महागजो जितक्रोधो जितशत्रुर्जयाश्रयः रौद्रो रुद्रप्रियो रुद्रो रुद्रपुत्रोघनाशनः ॥ ७८ भवप्रियो भवानीष्टो भारभृद्भूतभावनः ॥ गंधर्वकुशलः कुंठो वैकुंठोऽविष्टसेवितः॥ ७९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृत्रहा विघ्नहा सीरः समस्तदुःखतापहः ॥ मंजुरो मार्जरो मत्तो दुर्गापुत्रो दुरालसः ॥८०॥ अनंतचित्सुधाधारो वीरवीर्यैकसाधकः ॥
भास्वन्मुकुटमाणिक्यः कूजत्किंकिणिजालकः ॥ ८१ ॥ शुंडाधारी तुंडचलः कुंडली मुंडमालकः ॥ पद्माक्षः पद्महस्तश्च पद्मनाभसम
र्चितः ॥ ८२॥ उदितानरदंतास्यो मालाभूषणभूषितः ॥ नारदो वारणो लोलश्रवणः शूर्पकर्णकः ॥८३॥ बृहदुल्लासनासाढ्यो व्याप्त
त्रैलोक्यमंडलः॥ रत्नमंडलआसीनःकृशानुरूपशीलकः ॥८४॥ बृहत्कर्णाञ्चलोद्भूतवायुवीजितदिक्पटः॥ बृहदास्यरवाक्रांतो भीमब्रह्मांड
भांडकः ॥ ८५ ॥ बृहत्पादसमाक्रांतः सप्तपातालदीपितः ॥ बृहद्दंतकृतात्युग्ररणानंदरसालसः ॥ ८६ ॥ बृहद्धस्तधृताशेषायुधनिर्जि
तदानवः ॥ स्फुरत्सिंदूरवदनः स्फुरत्तेजोग्निलोचनः ॥ ८७ ॥ उद्दीपितमणिस्फूर्जन्नूपुरध्वनिनादितः ॥ चलतोयप्रवाहाढ्यो नदीजल
कणाकरः ॥ ८८ ॥ भ्रमत्कुंजरसंघातवंदितांघ्रिशिरोरुहः ॥ ब्रह्माच्युतमहारुद्रपुरःसरसुरार्चितः ॥ ८९ ॥ अशेषशेषप्रभृतिव्यालजा
लोपसेवितः ॥ गर्जत्पंचाननारावप्रसादितधरातलः ॥ ९० ॥ हाहाहूहूगतात्युग्रस्वरविभ्रांतमानसः ॥ पंचाशद्वर्णबीजाढ्यो मंत्री मंत्रि
तविग्रहः ॥ ९१ ॥ वेदांतशास्त्रपीयूषधाराप्लावितभूतलः ॥ शंखध्वनिसमाक्रांतपातालादिनभस्तलः ॥ ९२ ॥ चिंतामणिर्महामल्लो
बल्लहस्तो बलिः कविः॥कृतत्रेतायुगोल्लासभासमानजगत्त्रयः ॥ ९३ ॥ द्वापरः परलौकैकः कर्मध्वांतसुधाकरः ॥ सुधासिक्तवपुर्व्यासो
ब्रह्मांडादिकबाहुकः ॥ ९४ ॥ अकारादिक्षकारांतवर्णपंक्तिसमुज्ज्वलः ॥ अकाराकारमोद्गीततताननादनिनादितः ॥ ९५ ॥ इकारे
कारमंत्राढ्यो मालाभरणलालसः ॥ उकारोकारमोद्गारिघोरनागोपवीतकः ॥ ९६ ॥ ऋवर्णांकित ॠकाड्यपद्मरयसमुज्ज्वलः ॥ लृका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रयुतल्कारशंखपूर्णदिगंतरः ॥ ९७ ॥ एकारैकारगिरिजास्तनपानविचक्षणः ॥ ओ कारौकारविश्वादिकृतसृष्टिक्रमालसः ॥ ९८ ॥
अंअो वर्णावलीव्याप्तपादादिशीर्षमंडलः ॥ कर्णतालकृतात्युच्चैर्वायुवीजितनिर्जरः ॥ ९९ ॥ खगेशध्वजरत्नांकः किरीटारुणपादकः ॥
गर्विताशेषगंधर्व्वगीततत्परश्रोत्रकः ॥ १०० ॥ घनवाहनवागीशपुरःसरसुरार्चितः ॥ ङवर्णामृतधाराढ्यसोममानैकदंतकः ॥ १०१ ॥
चंद्रकुंकुमजंबाललिप्तसिंदूरविग्रहः ॥ छत्रचामररत्नाढ्यमुकुटालंकृताननः ॥ १०२ ॥ जटाबद्धमहानर्घमणिपंक्तिविराजितः ॥ झंकारि
मधुपव्रातगाननादविनादितः ॥ १०३ ॥ जवर्णकृतसंहारदैत्यासृक्पर्णमुद्गरः ॥ टकारश्च फलास्वादी वेपिताशेषमूर्धजः ॥ १०४ ॥
ताम्रसिंदूरपूजाढ्यो ललाटफलकच्छविः ॥ थकारधनपंक्त्याढ्यः संतोषितद्विजव्रजः ॥ १०५ ॥ दयामृतहृदंभोजधृतत्रैलोक्यमंडलः ॥
धनदादिमहायक्षसंसेवितपदांबुजः ॥ १०६ ॥ नमिताशेषदेवौघकिरीटमणिरंजितः ॥ परवर्गापवर्गादिभोगच्छेदनदक्षकः ॥ १०७ ॥
फणिचक्रसमाक्रांतमल्लमंडलमंडितः ॥ वक्रभ्रूयुगभीमोग्रमंतर्जितसुरासुरः ॥ १०८ ॥ भवानीहृदयानंदवर्द्धनैकनिशाकरः ॥ मदिरा
कलशप्रीतः करालैककरांबुजः ॥ १०९ ॥ यज्ञांतरायसंघातमज्जीकृतवरायुधः ॥ रत्नाकरसुताक्रांतक्रांतिकीर्तिविवर्धनः ॥ ११०॥
लंबोदरमहाभीमवपुर्दीनकृतासुरः ॥ वरुणादिदिगीशानामर्चितार्चनचर्चितः ॥ १११ ॥ शंकरैकप्रियः प्रेमनयनानंदवर्द्धनः ॥ षोडश
स्वरतालापगीतगानविचक्षणः ॥ ११२ ॥ समदुर्गसरिन्नाथस्तारणाकोंडुपोहरः ॥ ब्रह्मवैकुंठब्रह्मज्ञसंरक्षिततनूचरः ॥ ११३ ॥
तारांकमंत्रवर्णैकविग्रहोज्ज्वलविग्रहः ॥ अकारादिक्षकारांतविद्याभूषितविग्रहः ॥ ११४ ॥ ॐ श्रीविनायको ॐ ह्रीं विघ्नाध्यक्षो गणा
धिपः ॥ हेरंबो मोदकाहारो वक्रतुंडो विधिः स्मृतः ॥११५॥ वेदांतगीतो विद्यार्थिसिद्धमंत्रः षडक्षरः ॥ गणेशो वरदो देवो द्वादशाक्षर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंत्रितः ॥ ११६ ॥ सप्तकोटिमहामंत्रमंत्रिताशेषविग्रहः ॥ गांगेयो गणसेव्यश्च ॐ श्रीद्वैमातुरः शिवः ॥ ११७ ॥ ॐ ह्रीं श्रीं क्लीं ग्लौं गं देवो महागणपतिः प्रभुः ॥ इदं नामसहस्रं ते महागणपतेः स्मृतम् ॥ ११८ ॥ गुह्यं गोप्यतमं सिद्धं सर्वतंत्रेषु गोपितम् ॥ सर्वमंत्रमयं दिव्यं सर्वमंत्रविनायकम् ॥ ११९ ॥ ग्रहतारामयं राशिवर्णपंक्तिसमन्वितम् ॥ सर्वविद्यामयं ब्रह्मसाधनं साधकप्रियम् ॥ १२० ॥ गणेशस्य च सर्वस्वं रहस्यं त्रिदिवौकसाम् ॥ यथेष्टफलदं लोके मनोरथप्रपूरणम् ॥ १२१ ॥ अष्टसिद्धिमयं श्रेष्ठं साधकानां जयप्रदम् ॥ वितार्चनं विना होमं विना न्यासं विना जपम् ॥ १२२ ॥ अणिमाद्यष्टसिद्धीनां साधनं स्मृतिमात्रतः ॥ चतुर्थ्यामर्धरात्रे तु पठेन्मंत्री चतुष्पथे ॥ १२३ ॥ लिखेद् भूर्जे महादेवि पुण्यं नामसहस्रकम् ॥ धारयेत्तं चतुर्दश्यां मध्याह्ने मूर्ध्नि वा भुजे ॥ १२४ ॥ योषिद्वामकरे चैव पुरुषो दक्षिणे भुजे ॥ स्तंभयेदपि ब्रह्माणं मोहयेदपि शंकरम् ॥ १२५ ॥ वशयेदपि त्रैलोक्यं मारयेदखिलान्रिपून् ॥ उच्चाटयेच्च गीर्वाणं शमयेच्च धनंजयम् ॥ १२६ ॥ वंध्या पुत्रं लभेच्छीघ्रं निर्धनो धनमाप्नुयात् ॥ त्रिवारं यः पठेद्रात्रौ गणेशस्य पुरः शिवे ॥ १२७ ॥ नक्तं शक्तियुतो देवि भुक्त्वा भोगान्यथेप्सितान् ॥ प्रत्यक्षवरदं पश्येद्गणेशं साधकोत्तमः ॥ १२८ ॥ पराह्ने पठ्यते नाम्नां सहस्रं भक्तिपूर्वकम् ॥ तस्य वित्तादिविभवो दारायुःसंपदः सदा ॥ १२९ ॥ रणे राजभये यते पठेन्नामसहस्रकम् ॥ सर्वत्र जयमाप्नोति गणेशस्य प्रसादतः ॥ १३० ॥ इतीदं पुण्यसर्वस्वं मंत्रनामसहस्रकम् ॥ महागणपतेः पुण्यं गोपनीयं स्वयोनिवत् ॥" इति श्रीरुद्रयामलतंत्रे उच्छिष्टगणेशसहस्रनामस्तोत्रं समाप्तम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥ अथोच्छिष्टगणेशस्तवराजप्रारम्भः ॥ उक्तं च रुद्रयामले ॥ देव्युवाच ॥ " पूजांते ह्यनया स्तुत्या स्तु
वीत गणनायकम् ॥ नमामि देवं सकलार्थदं तं सुवर्णवर्णं भुजगोपवीतम् ॥ गजाननं भास्करमेकदंतं लंबोदरं वारिभवासनं च ॥ १ ॥
केयूरिणं हारकिरीटजुष्टं चतुर्भुजं पाशवराभयानि ॥ सृणिं च हस्तं गणपं त्रिनेत्रं सचामरस्त्रीयुगलेन युक्तम् ॥ २ ॥ षडक्षरात्मानमन
ल्पभूषं मुनीश्वरैर्भार्गवपूर्वकैश्च ॥ संसेवितं देवमनाथकल्पं रूपं मनोज्ञं शरणं प्रपद्ये ॥ ३ ॥ वेदांतवेद्यं जगतामधीशं देवादिवंद्यं सुकृतैक
गम्यम् ॥ स्तंबेरमास्यं न च चन्द्रचूडं विनायकं तं शरणं प्रपद्ये ॥ ४ ॥ भवाख्यदावानलदह्यमानं भक्तं स्वकीयं परिषिंचते यः॥ गंडस्रु
तांभोभिरनन्यतुल्यं वंदे गणेशं च तमोरिनेत्रम् ॥ ५ ॥ शिवस्य मौलाववलोक्य चन्द्रं सुशुंडया मुग्धतया स्वकीयम् ॥ भग्नं विषाणं
परिभाव्य चित्ते आकृष्टचन्द्रो गणपोऽवतां नः ॥ ६ ॥ पितुर्जटाजूटतटे सदैव भागीरथी तत्र कुतूहलेन ॥ विहर्तुकामः स महीध्रपुत्र्या
निवारितः पातु सदा गजास्यः॥ ७॥लम्बोदरो देवकुमारसंघैः क्रीडन्कुमारं जितवान्निजेन॥करेण चोत्तोल्य ननर्त रम्यं दन्तावलास्यो भयतः
स पायात् ॥८॥आगत्य योच्चैर्हरिनाभिपद्मं ददर्श तत्राशु करेण तच्च॥ उद्धर्तुमिच्छन्विधिवादवाक्यं मुमोच भूत्वा चतुरो गणेशः॥९॥निरंतरं
संस्कृतदानपट्टे लग्नांतुगुंजद्भ्रमरावलीं वै ॥ तं श्रोत्रतालैरपसारयंतं स्मरेद्गजास्यं निजहृत्सरोजे ॥ १० ॥ विश्वेशमौलिस्थितजह्नुकन्या
जलं गृहीत्वा निजपुष्करेण ॥ हरं सलीलं पितरं स्वकीयं प्रपूजयन्हस्तिमुखः स पायात ॥ ११ ॥ स्तंबेरमास्यं घुसृणांगरागं सिंदूर
पूरारुणकांतकुंभम् ॥ कुचन्दनाश्लिष्टकरं गणेशं ध्यायेत्स्वचित्ते सकलेष्टदं तम् ॥१२॥ स भीष्ममातुर्निजपुष्करेण जलं समादाय कुचौ
स्वमातुः ॥ प्रक्षालयामास षडास्यपीतौ स्वार्थं मुदेऽसौ कलभाननोऽस्तु ॥ १३ ॥ सिंचाम नागं शिशुभावमासं केनापि सत्कारणतो धारि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ध्याम् ॥ वक्तारमाद्यं नियमादिकानां लोकैककर्तारं प्रणमामि विघ्नम् ॥ १४ ॥ आलिंगितं चारुरुचा मृगाक्ष्या संभोगलोलं मदविह्वलांगम् ॥ विघ्नौघविध्वंसनसक्तमेकं नमामि कांतं द्विरदाननं तम् ॥ १५ ॥ हेरंब उग्रद्रविकोटिकांतः पञ्चाननेनापि विचुंताम्यः ॥ मुनीन्सुरान्भक्तजनांश्च सर्वान्स पातु रथ्यासु सदा गजास्यः ॥ १६ ॥ द्वैपायनोक्तानि स निश्चयेन स्वदंतकोट्या निखिलं लिखित्वा ॥ दंतं पुराणं शुभमिंदुमौलिस्तपोभिरुग्रं मनसा स्मरामि ॥ १७ ॥ क्रीडातटान्ते जलधाविभास्ये वेलांजले लंबपतिः प्रभीतः ॥ विचिंत्य कस्येति सुरास्तदातं विश्वेश्वरं वाग्भिरभिष्टुवंति ॥ १८ ॥ वाचां निमित्तं स निमित्तमाद्यं पदं त्रिलोक्यामददत्स्तुतीनाम् ॥ सर्वैश्च वंद्यं न च तस्य वंद्यः स्थाणोः परं रूपमसौ स पायात ॥ १९ ॥ इमां स्तुतिं यः पठतीह भक्त्या समाहितप्रीतिरतीव शुद्धः ॥ संसेव्यते चेंदिरया नितांतं दारिद्र्यसंघं सविदारयेन्नः ॥ २० इति श्रीरुद्रयामलतंत्रे हरगौरीसंवादे उच्छिष्टगणेशस्तोत्रं समाप्तम् ॥ अथ हरिद्रागणेशकवच प्रारंभः ॥ ईश्वर उवाच ॥ शृणु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये ॥ पठित्वा पाठयित्वा च मुच्यते सर्वसंकटात ॥ १ ॥ अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत ॥ सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥ २ ॥ ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि ॥ संमोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः ॥ ३ ॥ गणाक्रीडो नेत्रयुगं नासायां गणनायकः ॥ गणक्रीडान्वितः पातु वदने सर्वसिद्धये ॥ ४ ॥ जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा ॥ विघ्नेशो हृदये पातु विघ्ननाथश्च वक्षसि ॥ ५ ॥ गणानां नायकः पातु बाहुयुग्मं सदा मम ॥ विघ्नकर्ता च ह्युदरे विघ्नहर्ता च लिंगके ॥ ६ ॥ गजवक्त्रः कटीदेशे एकदंतो नितंबके ॥ लंबोदरः सदा पातु गुह्यदेशे ममारुणः ॥ ७ ॥ व्यालयज्ञोपवीती मां पातु पादयुगे सदा ॥ जापकः सर्वदा पातु जानुजंघे गणाधिपः ॥ ८ ॥ हरिद्रः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वदा पातु सर्वाङ्गे गणनायकः ॥ य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि ॥ ९ ॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनम् ॥ सर्व
सिद्धिकरं साक्षात्सर्वपापविमोचनम् ॥ ॥ १० ॥ सर्वसंपत्प्रदं साक्षात्सर्वपापविमोक्षणम् ॥ सर्वसंपत्प्रदं साक्षात्सर्वशत्रुक्षयंकरम् ॥ ११ ॥
ग्रहपीडा ज्वरा रोगा ये चान्ये गुह्यकादयः ॥ पठनाद्धारणादेव नाशमायांति तत्क्षणात् ॥ १२ ॥ धनधान्यकरं देवि कवचं सुर
पूजितम् ॥ समं नास्ति महेशानि त्रैलोक्ये कवचस्य च ॥ १३ ॥ हारिद्रस्य महेशानि कवचस्य च भूतले ॥ किमन्यैरसदालापैर्यत्रायु
र्व्ययतामियात ॥ १४ ॥ इति विश्वसारतंत्रे हरिद्रागणेशकवचं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे गणेशतंत्रे पंचमस्तरंगः ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशाय नमः ॥ अथ शिवतंत्रप्रारम्भः॥ तत्रादौ पटलप्रारम्भः॥ अथ वक्ष्ये महेशस्य मंत्रान्सर्वार्थसिद्धिदान ॥ यैः पूर्वर्षिवाक्यैश्च शिवसायुज्यमंजसा ॥ ३ ॥अथ शिवपंचाक्षरीमंत्रप्रयोगः ॥ मंत्रो यथा (शारदातिलके) "ॐ नमश्शिवाय" अस्य विधानम् ॥ अत्र रुद्राः स्मृता रक्ता धृतशूलकपालकाः॥ शक्तयो रुद्रपीठस्थाः सिंदूरारुणविग्रहाः॥ रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः ॥ १ ॥ इति ध्यात्वा मूलेन प्राणायामत्रयं कृत्वा मंत्रन्यासादिकं कुर्यात् । तद्यथा । अस्य श्रीशिवपंचाक्षरीमंत्रस्य वामदेव ऋषिः । पंक्तिश्छंदः । ईशानो देवता। ॐ बीजाय नमः शक्तिः। शिवायेति कीलकम् । चतुर्विधपुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः ॥ ॐ वामदेवर्षये नमः शिरसि १ पंक्तिच्छंदसे नमः मुखे २ ईशानदेवतायै नमः हृदये ३ ॐ बीजाय नमः गुह्ये ४ नमः शक्तये नमः पादयोः ५ शिवायेति कीलकाय नमः नाभौ ६ विनियोगाय नमः सर्वांगे ७ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः १ ॐ नं तर्जनीभ्यां नमः २ ॐ मं मध्यमाभ्यां नमः ३ ॐ शिं अनामिकाभ्यां नमः ४ ॐ वां कनिष्ठिकाभ्यां नमः ५ ॐ यं करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ ॐ हृदयाय नमः १ ॐ नं शिरसे स्वाहा २ ॐ मं शिखायै वषट् ३ ॐ शिं कवचायहुं ४ ॐ वां नेत्रत्रयाय वौषट् ५ ॐ यं अस्त्राय फट् ६ इति हृदयादिषडंगन्यासः ॥ ॐ नं तत्पुरुषायनमः तर्जन्यां १ ॐ मं अघोराय नमः मध्यमायाम् २ ॐ शिं सद्योजाताय नमः कनिष्ठिकायाम् ३ ॐ वां वामदेवाय नमः अनामिकायाम ४ ॐ यं

१ (तंत्रांतरे) नमस्कारं समुद्धृत्य वान्तं नेत्रसमन्वितम्॥वरुणं मुखवृत्तं च वायुं ललाटसंयुतम् ॥ अमुं पंचाक्षरं मंत्रं पंचकामफलप्रदम् ॥ प्रणवादिर्यदा देवि तदा मंत्रः षडक्षरः ॥ २ बंधूकसन्निभं देवं त्रिनेत्रं चन्द्रशेखरम् ॥ त्रिशूलधारिणं देवं चारुहासं सुनिर्मलम् ॥ कपालधारिणं देवं वरदाभयहस्तकम् ॥ उमया सहितं शम्भुं ध्यायेत्सोमेश्वरं सदा ॥ (इति तंत्रांतरे) ॥

For Private And Personal Use Only

ईशानाय नमः इत्यंगुष्ठयोः ५ ॐ नं तत्पुरुषाय नमः मुखे ६ ॐ मं अघोराय नमः हृदये ७ ॐ शिं सद्योजाताय नमः पादयोः८ॐ वां वामदेवाय नमः गुह्ये ९ ॐ यं ईशानाय नमःमूर्ध्नि १० इति पंचमूर्तिन्यासः ॐ नं तत्पुरुषाय नमः पूर्ववक्रे १ ॐ मं अघोराय नमः दक्षिणवक्त्रे २ ॐ शिं सद्योजाताय नमः पश्चिमवक्त्रे ३ ॐ वाँ वामदेवाय नमः उत्तरवक्त्रे ४ ॐ यं ईशानाय नमः ऊर्द्ध्ववक्त्रे ५ इति वक्त्रन्यासः ॐ नमः हृदये १ ॐ नं नमः वक्त्रे २ ॐ मं नमः दक्षांसे ३ ॐ शिं नमः वामांसे ४ ॐ वां नमः दक्षिणोरौ ५ ॐ यं नमः वामोरौ ६ इति गोलकन्यासे प्रथमः ॥ १ ॥ ॐ नमः कंठे १ ॐ नं नमः नाभौ २ ॐ मं नमः दक्षिणपार्श्वे ३ ॐ शिं नमः वामपार्श्वे ४ ॐ वां नमः पृष्ठे ५ ॐ यं नमः हृदये ६ इति गोलकन्यासे द्वितीयः ॥ २ ॥ ॐ नमः मूर्ध्नि १ ॐ नं नमः मुखे २ ॐ मं नमः दक्षनेत्रे ३ ॐ शिं नमः वामनेत्रे ४ ॐ वां नमः दक्षिणनासापुटे ५ ॐ य नमः वामनासापुटे ६ इति गोलकन्यासे तृतीयः॥ ३॥ ॐ नं नमः हस्तांगुल्यग्रेषु १ ॐ मं नमः हस्तांगुलिमूलेषु २ ॐ शिं नमः मणिबंधयोः३ ॐ वां नमः कर्परयोः ४ ॐ यं नमः बाहुमूलयोः ५ इति गोलकन्यासे चतुर्थः॥ ४॥ ॐ नं नमः पादांगुल्यग्रेषु १ ॐ मं नमः पादांगुलीमूलेषु २ ॐ शिं नमः गुल्फयोः ३ ॐ वां नमः जानुनोः ४ ॐ यं नमः जंघयोः ५ इति गोलकन्यासे पंचमः ॥ ५ ॥ ॐ नमः शिरसि १ ॐ नं नमः गुह्ये २ ॐ मं नमः हृदये ३ ॐ शिं नमः कुक्षिद्वये ४ ॐ वां नमः ऊरुद्वये ५ ॐ यं नमः पादद्वये ६ इति गोलकन्यासे षष्ठः ॥ ६ ॥ ॐ नमः हृदये १ ॐ नं नमः वक्त्रांबुजे २ ॐ मं नमः टंके ३ ॐ शिं नमः मृगे ४ ॐ वां नमः अभये ५ ॐ यं नमः वरे ६ इति गोलकन्यासे सप्तमः ॥ ७ ॥ ॐ नमः वक्त्रे १ ॐ नं नमः अंसयोः २ ॐ मं नमः हृदये ३ ॐ शिं नमः पादद्वये ४ ॐ वां नमः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऊरुद्वये ५ ॐ यं नमः जठरे ६ इति गोलकन्यासेऽष्टमः ॥ ८ ॥ ॐ नं तत्पुरुषाय नमः मूर्ध्नि १ ॐ मं अघोराय नमः भाले २ ॐ शिं सद्योजाताय नमः उदरे ३ ॐ वां वामदेवाय नमः अंसयोः ४ ॐ यं ईशानाय नमः हृदये ५ इति गोलकन्यासे नवमः समाप्तः ॥ ९ ॥ ॐ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने ॥ चतुर्मूर्तिवपुःस्थाय भसितांगाय शंभवे ॥ १ ॥ इति व्यापकं न्यसेत्॥एवं दशन्यासान्कृत्वा पार्वतीपतिं ध्यायेत् ॥अथ ध्यानम् ॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम्॥पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वबीजं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम्॥ १ ॥ इति ध्यात्वा पीठपूजां कुर्य्यात् । तद्यथा । पीठादौ रचिते सर्वतोभद्रमंडले लिंगतोभद्रमंडले वा मंडूकादिपरतत्त्वान्तपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य स्वाग्रादिप्रादक्षिण्येन नव पीठशक्तीः पूजयेत् । तद्यथा । ॐ वामायै नमः १ ॐ ज्येष्ठायै नमः २ ॐ रौद्र्यै नमः ३ ॐ काल्यै नमः ४ ॐ कलविकरिण्यै नमः ५ ॐ बलविकरिण्यै नमः ६ ॐ बलप्रमथिन्यै नमः ७ ॐ सर्वभूतदमन्यै नमः ८ मध्ये ॐ मनोन्मन्यै नमः ९ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्वा स्वच्छवस्त्रेण संशोष्य " ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः " इति मंत्रेण पुष्पासनं दत्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्य्यात् ॥ तद्यथा । संविन्मयः परो देवः परामृतरसप्रिय ॥ अनुज्ञां शिव मे देहि परिवारार्चनाय मे ॥ इत्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ षट्कोणे ऐशान्याम् ॐ ईशानाय नमः ईशानश्रीपादुकां पूजयामि तर्पयामि नमः । इति १ सर्वत्र पूर्वे ॐ तत्पुरुषाय नमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्पुरुषश्रीपा० २ दक्षिणे ॐ अघोराय नमः । अघोरश्रीपा० ३ पश्चिमे ॐ वामदेवाय नमः वामदेवश्रीपा० ४ उत्तरे ॐ सद्योजाताय नमः सद्यो जातश्रीपा० ५ इति पंचमूर्तीः पूजयेत् । ततः पुष्पांजलिं गृहीत्वा ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमाव रणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १ ॥ ततः षट्कोणाग्रेषु ऐशान्याम् ॐ निवृत्त्यै नमः । निवृत्तिश्रीपा० १ पूर्वे ॐ प्रतिष्ठायै नमः । प्रतिष्ठाश्रीपा० २ दक्षिणे ॐ विद्यायै नमः विद्याश्रीपा० ३ पश्चिमे ॐ शांत्यै नमः । शांतिश्रीपा० ४ उत्तरे शांत्यतीतायै नमः । शांत्यती ताश्रीपा० ५ इति कलाः पूजयित्वा पुष्पांजलिं च दद्यात् इति द्विती यावरणम् ॥२॥ ततोऽष्टदले पूज्यपूजकयोरंतरालप्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ अनंताय नमः । अनन्तश्रीपा० १ ॐ सूक्ष्माय नमः सूक्ष्मश्रीपा० २ ॐ शिवोत्तमाय नमः । शिवोत्तमश्रीपा०

शिवपंचाक्षरीमंत्रप्रयोगावरणयंत्रम् ।



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

३ ॐ एकनेत्राय नमः । एकनेत्रश्रीपा० ४ ॐ एकरुद्राय नमः एकरुद्रश्रीपा० ५ ॐ त्रिमूर्तये नमः । त्रिमूर्तिश्रीपा० ६ ॐ श्रीकंठाय नमः । श्रीकंठश्रीपा० ७ ॐ शिखंडिने नमः । शिखंडिश्रीपा० ८ इति विद्येशान् पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम् ॥ ३ ॥ ततोष्टदलाग्रेषूत्तरादिक्रमेण । ॐ उमायै नमः । उमाश्रीपा० १ ॐ चण्डेश्वराय नमः चण्डेश्वरश्रीपा० २ ॐ नंदिने नमः । नंदिश्रीपा० ३ ॐ महाकालाय नमः । महाकालश्रीपा० ४ ॐ गणेशाय नमः गणेशश्रीपा० ५ ॐ वृषभाय नमः । वृषभश्रीपा० ६ ॐ भृंगारिटये नमः । भृंगारिटिश्रीपा० ७ ॐ स्कंदाय नमः । स्कंदश्रीपा० ८ इति गणान्पूजयित्वा पुष्पांजलिं च दद्यात् । इति चतुर्थावरणम् ॥ ४ ॥ ततो भूपुरे पूर्वादिक्रमेण ॐ लं इन्द्राय नमः । १ ॐ रं अग्नये नमः २ ॐ मं यमाय नमः ३ ॐ क्षं निर्ऋतये नमः ४ ॐ वं वरुणाय नमः ५ ॐ यं वायवे नमः ६ ॐ कं कुबेराय नमः ७ ॐ हं ईशानाय नमः ८ इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः ९ वरुणनिर्ऋतिमध्ये ॐ ह्रीं अनन्ताय नमः १० ॥ इति इन्द्रादिदशदिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात् । इति पंचमावरणम् ॥ ५ ॥ ततः पूर्वादिक्रमेण इन्द्रादिसमीपे ॐ वं वज्राय नमः १ ॐ शं शक्तये नमः २ ॐ दं दण्डाय नमः ३ ॐ खं खड्गाय नमः ४ ॐ पां पाशाय नमः ५ ॐ अं अंकुशाय नमः ६ ॐ गं गदायै नमः ७ ॐ त्रिं त्रिशूलाय नमः ८ ॐ पं पद्माय नमः ९ ॐ चं चक्राय नमः १० ॥ इत्यस्त्राणि पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं चतुर्विंशतिलक्षात्मकं जपः । जपांते दशांशेन वा चतुर्विंशतिसहस्रमंत्रैः पायसं त्रिमधुप्लाशेन होमयेत् । तत्तद्दशांशेन तर्पणमार्जने कृत्वा शुद्धान् विप्रांश्च पायसादिना भोजयेत । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साध

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येत् । तथा च-तत्त्वलक्षं जपेन्मंत्रं दीक्षितः शैववर्त्मना ॥ तावत्संख्यासहस्राणि जुहुयात्पायसैः शुभैः ॥ १ ॥ ततः सिद्धो भवेन्मंत्रः साधकाभीष्टसिद्धिदः ॥ इत्थं संपूजयेद्देवं सह नित्यशो जपेत ॥ २ ॥ सर्वपापविनिर्मुक्तः प्राप्नुयाद्वांछितां श्रियम् ॥ द्विसहस्रं जपेद्रोगान्मुच्यते नात्र संशयः ॥ ३ ॥ त्रिसहस्रं जपेन्मंत्रं दीर्घमायुरवाप्नुयात् ॥ सहस्रवृद्ध्या प्रजपेत्सर्वान्कामानवाप्नुयात् ॥४॥ आज्यान्वितैस्तिलैः शुद्धैर्जुहुयाल्लक्षमादरात् ॥ उत्पातजनितान्क्लेशान्नाशयेन्नात्र संशयः ॥ शतलक्षं जपेत्साक्षाच्छिवो भवति मानवः ॥ ५ ॥ इति शारदातिलकोक्तशिवपंचाक्षरमंत्रप्रयोगः ॥ अथ अष्टाक्षरीशिवमंत्रप्रयोगः (शारदातिलके) ॥ मंत्रो यथा--ह्रीं ॐ नमश्शिवाय ह्रीं इत्यष्टाक्षरो मंत्रः ॥ अस्य विधानम्--ॐ अस्य श्रीशिवाष्टाक्षरमंत्रस्य वामदेव ऋषिः । पंक्तिच्छंदः । उमापतिर्देवता सर्वेष्टसिद्धये विनियोगः ॥ ॐ वामदेवर्षये नमः शिरसि १ पंक्तिश्छंदसे नमः मुखे २ उमापतिदेवतायै नमः हृदि ३ विनियोगाय नमः सर्वांगे ४ इति ऋष्यादिन्यासः ॥ ह्रीं ॐ अंगुष्ठाभ्यां नमः १ ॐ नं तर्जनीभ्यां नमः २ ॐ मं मध्यमाभ्यां नमः ३ ॐ शिं अनामिकाभ्यां नमः ४ ॐ वां कनिष्ठिकाभ्यां नमः ५ ॐ यं करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ ह्रीं ॐ हृदयाय नमः १ ॐ नं शिरसे स्वाहा २ ॐ मं शिखायै वषट् ३ ॐ शिं कवचाय हुं ४ ॐ वां नेत्रत्रयाय वौषट् ५ ॐ यं अस्त्राय फट् ६ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत ॥ "बंधूकसन्निभं देवं त्रिनेत्रं चन्द्रशेखरम् ॥ त्रिशूलधारिणं वंदे चारुहासं सुनिर्मलम् ॥ १ ॥ कपालधारिणं देवं वरदाभयहस्तकम ॥ उमया सहितं शंभुं ध्यायेत्सोमेश्वरं सदा ॥ २ ॥ इति ध्यायेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले लिंगतोभद्रमंडले वा पूर्वोक्ते शिवे पीठे वामादिनवशक्तीः संपूज्य ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ॐ सकलगुणात्मशक्तियुक्तायानतां
ययोगपीठात्मने नमः।इति पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्यं प्रतिष्ठां च
कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य दे
वाज्ञया आवरणपूजां कुर्यात्। तद्यथा।संविन्मयः परो देवः परामृतरसप्रिय।
अनुज्ञां शिव मे देहि परिवारार्चनाय च ॥ इत्याज्ञां गृहीत्वा आवरणपूजां
कुर्यात । षट्कोणकेसरेषु आग्नेयादिदिक्चतुर्दिक्षु मध्ये च ॐ नं हृदयाय
नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र ॥ १ ॥ ॐ
मं शिरसे स्वाहा शिरः श्रीपा॰ २ ॐ शिं शिखायै वषट् । शिखाश्रीपा॰
३ ॐ वां कवचाय हुं कवचश्रीपा॰ ४ ॐ यं अस्त्राय फट् अस्त्रश्रीपा॰५
इति पंचांगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं
मे देहि शरणागतवत्सल॥भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥८ ॥
इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् । इति
प्रथमावरणम् ॥ १ ॥ तद्बाह्ये ॐ हृल्लेखायै नमः । हृल्लेखाश्रीपा॰ १ ॐ

अष्टाक्षरशिवमंत्रप्रयोगावरणयंत्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गगनायै नमः । गगनाश्रीपा० २ ॐ रक्तायै नमः। रक्तश्रीपा० ३ ॐ कालिकायै नमः कालिकाश्रीपा० ४ ॐ महोच्छुष्मायै नमः। महोच्छुष्माश्रीपा० ५ इति पूजयित्वा पुष्पांजलिं च दद्यात्॥इति द्वितीयावरणम्॥२॥ततोष्टदले पूज्यपूजकयोरंतराला प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ वृषभाय नमः। वृषभश्रीपा० १ ॐ क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० २ ॐ दुर्गायै नमः । दुर्गाश्रीपा० ३ ॐ कार्तिकेयाय नमः कार्तिकेयश्रीपा० ४ ॐ नंदिने नमः । नंदिश्रीपा० ५ ॐ विघ्नेशाय नमः । विघ्नेशश्रीपा० ६ ॐ श्यामाय नमः।श्यामाश्रीपा० ७ ॐ सेनाय नमः। सेनश्रीपा० ८ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम् ॥३॥ तद्बाह्ये प्राच्यादिक्रमेण ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० १ ॐ माहेश्वर्यै नमः। माहेश्वरीश्रीपा० २ ॐ कौमार्यै नमः । कौमारीश्रीपा० ३ ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ ॐ वाराह्यै नमः । वाराहीश्रीपा– ५ ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ ॐ चामुंडायै नमः । चामुंडाश्रीपा० ७ ॐ महालक्ष्म्यै नमः । महालक्ष्मीश्रीपा० ८ इति पूजयित्वा पुष्पांजलिं च दद्यात । इति चतुर्थावरणम् ॥४॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् । इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य जपं कुर्य्यात् । अस्य पुरश्चरणं चतुर्दशलक्षं जपेत तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मभोजनं च कुर्य्यात् ।एवं कृते मंत्रः सिद्धो भवति सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च । "मनुलक्षं जपेन्मंत्रं तत्सहस्रं यथाविधि ॥ जुहुयान्मधुरासिक्तैरारग्वधस मिद्वरैः ॥१॥ एवं यो भजते मंत्री देवेशंतमुमापतिम् ॥ स भवेत्सर्वलोकानां प्रियः सौभाग्यसंपदाम् ॥ २ ॥ इत्यष्टाक्षरशिवमंत्रप्रयोगः॥

अथ त्र्यक्षरमृत्युंजयमंत्रप्रयोगः ॥ (मंत्रमहोदधौ शारदायां च) मंत्रो यथा-ॐ हौं जं सः। अस्य विधानम् । अस्य त्र्यक्षरात्मकमृत्युंजय

For Private And Personal Use Only

मंत्रस्य कहोल ऋषिः।गायत्री छंदः।मृत्युंजयो महादेवो देवता। जूं बीजम्। सः शक्तिः।सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ॐ कहोलर्षये नमः
शिरसि १ गायत्रीछंदसे नमः मुखे २ मृत्युंजयमहादेवदेवतायै नमः हृदि ३ जूं बीजाय नमः गुह्ये ४ सः शक्तये नमः पादयोः ५
विनियोगाय नमः सर्वाङ्गे ६ इति ऋष्यादिन्यासः॥ ॐ मां अंगुष्ठाभ्यां नमः १ ॐ मीं तर्जनीभ्यां नमः २ ॐ मूं मध्यमाभ्यां नमः ३
ॐ मैं अनामिकाभ्यां नमः ४ ॐ मौं कनिष्ठिकाभ्यां नमः ५ ॐ मः करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ ॐ मां हृदयाय
नमः १ ॐ मीं शिरसे स्वाहा २ ॐ मूं शिखायै वषट् ३ ॐ मैं कवचाय हुं ४ ॐ मौं नेत्रत्रयाय वौषट् ५ ॐ मः अस्त्राय फट् ६
इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् । चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयांतःस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पा
णिं हिमांशुप्रभम् ॥ कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावयेत् ॥ १ ॥ इति ध्यात्वा
सर्वतोभद्रमंडले लिंगतोभद्रमंडले वा पीठपूजां विधाय पूर्वोक्ते शिवपीठे वामादिनवपीठशक्तीः संपूजयेत् । तद्यथा । पूर्वादिक्रमेण । ॐ
वामायै नमः १ ॐ ज्येष्ठायै नमः २ ॐ रौद्र्यै नमः ३ ॐ काल्यै नमः ४ ॐ कलविकरिण्यै नमः ५ ॐ बलविकरिण्यै नमः ६ ॐ बलप्रमथिन्यै
नमः ७ ॐ सर्वभूतदमन्यै नमः ८ मध्ये ॐ मनोन्मन्यै नमः ९ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय
घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठा
त्मने नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः
संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ पुष्पांजलिमादाय ॐ संविन्मयः परो देवः परामृतरसप्रिय ॥ अनुज्ञां शिव मे देहि परिवारार्चं

नाय मे ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्य दिक्षु च ॐ मां हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः १ ॐ सीं शिरसे स्वाहा । शिरःश्रीपा० २ ॐ सूं शिखायै वषट् । शिखाश्रीपा०३ ॐ सैं कवचाय हूँ ।कवचश्रीपा० ४ ॐ सौं नेत्रत्रयाय वौषट् ।नेत्रत्रयश्रीपा० ५ ॐ सः अस्त्राय फट्। अस्त्रश्रीपा०६इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्" ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्त र्पिताः संतु इति वदेत्। इति प्रथमावरणम् ॥ ततो भूपुरे इन्द्रादिदश दिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं दद्यात् ॥ इत्याव रणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् । अस्य पुरश्चरणं लक्षत्रयं जपः । पुरश्चरणदशांशेन दुग्धाज्यलोलितैरमृताखंडैर्होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्य्यात् । एवं कृते मंत्रः सिद्धो

त्र्यक्षरीमृत्युंजययंत्रम् ।



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत । (तथा च शरदायाम्) "गुणलक्षं जपेन्मत्रं तद्दशांशं विशालधीः ॥ जुहुयादमृताखंडः
शुद्धदुग्धाज्यलोलितैः ॥ १ ॥ जपपूजादिभिः सिद्धे मंत्रेऽस्मिन्मनुना क्रमात ॥ कुर्य्यात्प्रयोगान् कल्पोक्तानभीष्टान्फलसिद्धये ॥ २ ॥ दुग्ध
युक्तैः सुधाखंडैर्मंत्री मासं सहस्रकम ॥ आराधितेग्नौ जुहुयाद्विधिवद्विजितेन्द्रियः ॥ ३ ॥ संतुष्टः शंकरस्तेन सुधाप्लावितविग्रहः ॥ आयु
रारोग्यसंपत्तियशःपुत्रान्विवर्द्धयेत ॥ ४ ॥ सुधावटौ तिला दर्वाः पयः सर्पिः पयोहविः ॥ इत्युक्तैः सप्तभिर्द्रव्यैर्जुहुयात्सप्तवासरम ॥ ५ ॥
क्रमाद्दशांशतो नित्यमष्टोत्तरमतन्द्रितः ॥ सप्ताधिकान् द्विजान्नित्यं भोजयेन्मधुरान्वितम् ॥ ६ ॥ विकारानुगुणं मंत्री वर्द्धयेद्धोमवासरान् ॥
होतृभ्यो दक्षिणां दद्यादरुणा गाः पयस्विनीः ॥ ७ ॥ गुरुं संप्रीणयेत्पश्चाद्धनाद्यैर्देवताधिया ॥ अनेन विधिना साध्यं कृत्वा द्रोहज्वरा
दिभिः ॥ ८ ॥ विमुक्तः सुचिरं जीवेच्छरदां शतमंजसा ॥ अभिचारे ज्वरे तीव्रे घोरोन्मादे शिरोगदे ॥ ९ ॥ असाध्यरोगक्ष्वेडादौ
महादाहे महामये ॥ होमोयं शांतिदः प्रोक्तः सर्वसम्पत्प्रदायकः ॥ १० ॥ द्रव्यैरेतैः प्रजहुयात्त्रिजन्मसु यथाविधि ॥ भोजयेन्मधुरै
र्भोज्यैर्ब्राह्मणान्वेदपारगान् ॥ ११ दीर्घमायुरवाप्नोति वांछितां विंदति श्रियम ॥ एकादशाहुतीर्नित्यं दूर्वाभिर्जुहुयाद्बुधः ॥ १२ ॥ अप
मृत्युजिदेष स्यादायुरारोग्यवर्द्धनः ॥ द्विजन्मसु सुधावल्लीकाश्मरीबकुलोद्भवैः ॥ १३ ॥ समिद्वरैः कृतो होमः सर्वमृत्युगदापहः ॥ सि
द्धान्नैर्विहितो होमो महाज्वरविनाशनः ॥ अपामार्गसमिद्धोमः सर्वामयनिषूदनः ॥ १४ ॥ इति त्र्यक्षरमृत्युंजयमंत्रप्रयोगः ॥
अथ त्र्यंबकमंत्रप्रयोगः ॥ (शारदातिलके) "अथ त्रैष्यवकं मंत्रमभिधास्याम्यनुष्टुभम् ॥ यं भजंतं नरं कालः स्वयं वीक्षितुमक्षमः ॥ १ ॥"
मंत्रो यथा-" ॐ त्र्यंबकं यजामहे सुगंधिम्पुष्टिवर्धनम् ॥ उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् " इति मंत्रः । अस्य विधानम् ।

अस्य त्र्यंबकमंत्रस्य वसिष्ठ ऋषिः । अनुष्टुप् छन्दः । त्र्यंबकपार्वतीपतिर्देवता । त्र्यं बीजम् । वं शक्तिः । कं कीलकम् । सर्वेष्टसिद्ध्यर्थे जपे विनियोगः । ॐ वसिष्ठर्षये नमः शिरसि ॥ १ ॥ अनुष्टुप्छन्दसे नमः मुखे ॥ २ ॥ त्र्यंबकपार्वतीपतिदेवतायै नमः हृदि ॥३॥ त्र्यं बीजाय नमः गुह्ये ॥४॥ वं शक्तये नमः पादयोः ॥ ५ ॥ कं कीलकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वाङ्गे ॥७॥ इति ऋष्यादिन्यासः ॥ ॐ त्र्यंबकम् अंगुष्ठाभ्यां नमः ॥ १ ॥ यजामहे तर्जनीभ्यां नमः ॥ २ ॥ सुगंधिं पुष्टिवर्धनं मध्यमाभ्यां नमः ॥ ३ ॥ उर्वारुकमिव बंधनात् अनामिकाभ्यां नमः ॥ ४ ॥ मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ मामृतात् करतल करपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ त्र्यंबकं हृदयाय नमः ॥ १ ॥ यजामहे शिरसे स्वाहा ॥ २ ॥ सुगंधिम्पुष्टिवर्धनं शिखायै वषट् ॥ ३ ॥ उर्वारुकमिव बंधनात् कवचाय हुँ॥ ४ ॥ मृत्योर्मुक्षीय नेत्रत्रयाय वौषट् ॥ ५ ॥ मामृतात अस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः ॥ ॐ त्र्यं नमः पूर्वमुखे ॥ १ ॥ ॐ वं नमः पश्चिममुखे ॥ २ ॥ ॐ कं नमः दक्षिणमुखे ॥ ३ ॥ ॐ यं नमः उत्तरमुखे ॥ ४ ॥ ॐ जां नमः उरसि ॥ ५ ॥ ॐ मं नमः कंठे ॥ ६ ॥ ॐ हें नमः मुखे ॥ ७ ॥ ॐ सुं नमः नाभौ ॥८॥ ॐ गं नमः हृदि ॥ ९ ॥ ॐ धिं नमः पृष्ठे ॥ १० ॥ ॐ पुं नमः कुक्षौ ॥ ११ ॥ ॐ ष्टिं नमः लिंगे ॥ १२ ॥ ॐ वं नमः गुदे ॥ १३ ॥ ॐ र्धं नमः दक्षिणोरुमूले ॥ १४ ॥ ॐ नं नमः वामोरुमूले ॥ १५ ॥ ॐ उं नमः दक्षिणोरुमध्ये ॥ १६ ॥ ॐ र्वा नमः वामोरुमध्ये ॥ १७ ॥ ॐ रुं नमः दक्षिणजानुनि ॥ १८ ॥ ॐ कं नमः वामजानुनि ॥ १९ ॥ ॐ मिं नमः दक्षिणजानुवृत्ते॥ २०॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ वं नमः वामजानुवृत्ते ॥ २१ ॥ ॐ वं नमः दक्षिणस्तने ॥ २२ ॥ ॐ धं नमः वामस्तने ॥ २३ ॥ ॐ नां नमः दक्षिणपार्श्वे ॥ २४ ॥ ॐ मृं नमः वामपार्श्वे ॥२५॥ ॐ त्यों नमः दक्षिणपादे ॥ २६ ॥ ॐ मुं नमः वामपादे ॥२७॥ ॐ क्षीँ नमः दक्षिणकरे ॥ २८ ॥ ॐ यं नमः वामकरे ॥ २९ ॥ ॐ मां नमः दक्षनासायाम् ॥ ३० ॥ ॐ मृं नमः वामनासायाम् ॥ ३१ ॥ ॐ तां नमः मूर्ध्नि ॥ ३२ ॥ इति मंत्रवर्णन्यासः ॥ ॐ त्र्यंबकं शिरसि ॥ १ ॥ यजामहे भ्रुवोः॥ २ ॥सुगंधिं पुष्टिनेत्रयोः॥ ३॥वर्धनं मुखे ॥४॥ उर्वारुकं गंडयोः ॥ ५ ॥ इव हृदये ॥ ६ ॥ बंधनात् जठरे ॥ ७ ॥ मृत्योः लिंगे ॥ ८ ॥ मुक्षीय हृदये ॥ ९ ॥ मा जान्वोः १० ॥ मृतात् पादयोः ॥ ११ ॥ इति पदन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधतं मृगाक्षवलये द्वाभ्यां वहंतं परम् ॥ अंकन्यस्तकरद्वयामृतघटं कैलासकांतं शिवं स्वच्छांभोजगतं नवेन्दुमुकुटं देवं त्रिनेत्रं भजे ॥ १ ॥ इति ध्यायेत् । पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमण्डले वा मंडूकादिपरतत्त्वांतपीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् । पूर्वादिक्रमेण । ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभतदमन्यै नमः ॥ ८ ॥ मध्ये ॐ मनोन्मन्यै नमः॥ ९ ॥ इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनन्ताय योगपीठात्मने नमः । इति मंत्रेण पुष्पाद्यासनं दत्त्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य तत्र वृषभध्वजं त्र्यंबकं देवं पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् । तद्यथा । पुष्पांजलिमादाय "ॐ संविन्मयः परो देवः परामृतरसप्रिय ॥ अनुज्ञां शिव मे देहि परिवारार्चनाय मे ॥ १॥" इति पठित्वा पुष्पांजलिं च दत्त्वा देवाज्ञां विभाव्य आवरणपूजां कुर्यात । तद्यथा । षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ त्र्यंबकं हृदयाय नमः । हृदये श्रीपादुकां पूजयामि तर्पयामि नमः १ यजामहे शिरसे स्वाहा शिरःश्रीपा० २ सुगंधिम्पुष्टिवर्धनम् । शिखायै वषट् । शिखाश्रीपा० ३ उर्वारुकमिव बन्धनान् कवचाय हुं । कवचश्रीपा० ४ मृत्योर्मुक्षीय । नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५ मामृतात् अस्त्राय फट् । अस्त्रश्रीपा० ६ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ अर्कमूर्तये नमः । अर्कमूर्तिश्रीपा० १ ॐ इन्दुमूर्तये नमः । इन्दुमूर्तिश्रीपा० २ ॐ वसुधामूर्तये नमः । वसुधामूर्तिश्रीपा० ३ ॐ तोयमूर्तये नमः तोयमूर्तिश्रीपा० ४ ॐ वह्निमूर्तये नमः । वह्निमूर्तिश्रीपा० ५ ॐ वायुमूर्तये नमः । वायुमूर्तिश्रीपा० ६ ॐ आकाशमूर्तये नमः । आकाशमूर्तिश्रीपा० ७ ॐ यजमानमूर्तये नमः । यजमानमूर्तिश्रीपा० ८ इत्यष्टौ मूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥२॥ तद्बाह्येऽष्टदले प्राचीक्रमेण । ॐ रमायै नमः। रमाश्री०१ ॐ राकायै नमः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राकाश्रीपा० २ ॐ प्रभायै नमः। प्रभाश्रीपा० ३ ॐ ज्योत्स्नायै नमः। ज्योत्स्ना श्रीपा० ४ ॐ पूर्णायै नमः। पूर्णाश्रीपा० ५ ॐ ऊषायै नमः ऊषाश्रीपा० ६ ॐ पूरण्यै नमः। पूरणीश्रीपा० ७ ॐ सुधायै नमः। सुधाश्रीपादुकां पूजयामि ८ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात्। इति तृतीयावरणम् ॥ ३ ॥ तद्बाह्येऽष्टदले प्राचीक्रमेण। ॐ विश्वायै नमः। विश्वाश्रीपा० १ ॐ विद्यायै नमः। विद्याश्रीपा० २ ॐ सितायै नमः। सिताश्रीपा० ३ ॐ प्रह्वायै नमः। प्रह्वाश्रीपा० ४ ॐ रारायै नमः राराश्रीपा० ५ ॐ संध्यायै नमः। संध्याश्रीपा० ६ ॐ शिवायै नमः। शिवाश्रीपा० ७ ॐ निशायै नमः। निशाश्रीपा० ८ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात्। इति चतुर्थावरणम् ॥ ४ ॥ तद्बाह्येऽष्टदले प्राचीक्रमेण। ॐ आर्य्यायै नमः। आर्य्याश्री० १ ॐ प्रज्ञायै नमः। प्रज्ञाश्रीपा० २ ॐ प्रभायै नमः। प्रभाश्रीपा० ३ ॐ मेधायै नमः। मेधाश्रीपा० ४ ॐ शांत्यै नमः। शांतिश्रीपा० ५ ॐ कांत्यै नमः। कांतिश्रीपा० ६ ॐ धृत्यै नमः। धृतिश्रीपा० ७ ॐ मृत्यै

त्र्यंबकपूजनयंत्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैंमः । मृतिश्रीपा० ८ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात्। इति पंचमावरणम् ॥ ५ ॥ तद्बाह्येऽष्टदले प्राचीक्रमेण ॐ धारायै नैंमः । धाराश्री० १ ॐ मायायै नैंमः । मायाश्रीपा० २ ॐ अवन्यै नैंमः । अवनिश्रीपा० ३ ॐ पद्मायै नैंमः । पद्माश्रीपा० ४ ॐ शांतायै नैंमः । शांतश्रीपा० ५ ॐ मोघायै नैंमः मोघाश्रीपा० ६ ॐ जयायै नैंमः जयाश्री० ७ ॐ अमलायै नैंमः। अमलाश्रीपा० ८ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात। इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् । इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् । अस्य पुरश्चरण मेकलक्षजपः। दशद्रव्यैर्दशांशतो होमः। तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्य्यात। एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च "जपेन्मंत्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः ॥ जुहुयाद्दशभिर्द्रव्यैरयुतं घृतसंप्लुतैः ॥ १ ॥ बिल्वं पलाशं खदिरं परं च तिलसर्षपौ ॥ दुग्धं दधि पुनर्दूर्वा होमे तानि विदुर्बुधाः ॥ २ ॥ एवंकृते प्रयोगार्हो जायतेऽयं महामनुः ॥ अयुतं जुहुयाद्बिल्वसमिद्भिः संपदे सुधीः ॥ ३ ॥ जुहुयाद्ब्रह्मवृक्षस्य समिद्भिर्ब्रह्मतेजसे ॥ खादिरैरयुतं हुत्वा कांतिं पुष्टिमवाप्नुयात् ॥ ४ ॥ वटवृक्षस्य समिधो जुहुयादयुतावधि ॥ धनधान्यसमृद्धः स्यादचिरेणैव साधकः ॥ ५ ॥ तिलैस्तत्संख्यया हुत्वा सर्वपापैः प्रमुच्यते ॥ सिद्धार्थैरयुतं हुत्वा शत्रून्विजयते नृपः ॥ ६ ॥ अनेनैव विधानेन नश्येन्मृत्युरकालजः ॥ पायसेन कृतो होमो रक्षाश्रीकीर्ति कांतिदः॥ ॥ ७ ॥ गोदुग्धेन च शुद्धान्नं हुत्वा कृत्यां विनाशयेत् ॥ अयमेव मतो होमः शांतिश्रीसंपदावहः ॥ ८ ॥ दधिहोमेन संवादं कुर्याद्वि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वेषिणोर्मिथः ॥ प्रत्यहं जुहुयान्मंत्री दूर्वाअष्टोत्तरं शतम्॥ ९ ॥ आमयान्निखिलाञ्जित्वा दीर्घमायुरवाप्नुयात॥जुहुयाज्जम्बुकाष्ठेन पायसा न्नैर्घृतान्वितैः ॥ १० ॥ इच्छन्ननिंदितां लक्ष्मीमारोग्यमतुलं यशः ॥ गव्यदुग्धघृताक्ताभिर्दूर्वाभिर्जुहुयाद्वशी ॥ ११ ॥ स विंशतिशतं सम्यक् स्वजन्मदिवसे सुधीः ॥ आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः ॥ १२ ॥ काश्मरीसमिधस्तिस्रः पयोन्नं त्रिशतं पृथक् ॥ जुहुयाद्ब्राह्मणानंते भोजयेन्मधुरान्वितम् ॥ १३ ॥ प्रीणयेद्धनधान्याद्यैरात्मनो गुरुमादरात ॥ अनामयमवाप्नोति दीर्घमायुः श्रिया सह ॥ १४ ॥ सघृतेन पयोन्नेन हुत्वा पर्वणि मंत्रिणे ॥ राजश्रियमवाप्नोति षण्मासान्नात्र संशयः॥ १५ ॥लाजैर्विशुद्धैर्जुहुयात्कन्या सैषा वराप्तये ॥ क्षीरद्रुमसमिद्धोमाद्ब्राह्मणादीन्वशं नयेत् ॥ १६ ॥ स्नात्वा सहस्रं प्रजपेदादित्याभिमुखो मनुम् ॥ आधिव्याधि विनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥ अनेन मनुना सर्वं साधयेदिष्टमात्मनः ” ॥ इति त्र्यंबकमंत्रप्रयोगः ॥ अथ महामृत्युंजय मंत्रप्रयोगः ॥ (मंत्रमहोदधौ) महामृत्युंजयं वक्ष्ये दुरितापन्निवारणम् ॥ यं प्राप्य भार्गवः शंभोर्मृतान् दैत्यानजीवयन् ॥ १ ॥ मंत्रो यथा--“ ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ॥ उर्वारुकमिव बंधनान्‌ मृत्योर्मुक्षीय मामृतात् । भूर्भुवः स्वरों जूं सः हौं ॐ ” इति मंत्रः । अस्य विधानम् । देशकालौ संकीर्त्य मम शरीरे ज्वराद्यमुकरोगनिरासद्वारा सद्यः आरोग्यार्थममुककामनासिद्ध्यर्थं वा श्रीमहामृत्युंजयदेताप्रीत्यर्थममुकसंख्यापारिमितश्रीमहामृत्युंजयजपं करिष्ये इति संकल्प्य ॥ ॐ गुरुवे नमः ॥ १ ॥ ॐ गणपतये नमः ॥ २ ॥ ॐ स्वेष्टदेवतायै नमः ॥ ३ ॥ इति नत्वा न्यासादिकं कुर्य्यात । तद्यथा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अस्य श्रीमहामृत्युंजयमंत्रस्य वामदेवकहोलवशिष्ठा ऋषयः । पंक्तिगायत्र्यनुष्टुभश्छंदांसि । सदाशिवमहामृत्युंजयरुद्रा देवताः । श्रीं बीजम् । ह्रीं शक्तिः । महामृत्युंजयप्रीतये जपे विनियोगः। ॐ वामदेवकहोलवशिष्ठऋषिभ्यो नमः शिरसि ॥ १ ॥ पंक्तिगायत्र्यनुष्टुप्छंदोभ्यो नमः मुखे ॥ २ ॥ सदाशिवमहामृत्युंजयरुद्रदेवताभ्यो नमः हृदि ॥ ३ ॥ श्रींबीजाय नमः गुह्ये ॥ ४ ॥ ह्रीं शक्तये नमः पादयोः ॥ ५ ॥ विनियोगाय नमः सर्वाङ्गे ॥६॥ इति ऋष्यादिन्यासः॥ ॐ ह्रौं ॐ जूं सः भर्भुवःस्वः त्र्यंबकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रौंॐजूंसः भर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रौंॐजूं सः भर्भुवः स्वः सुगंधिं पुष्टिवर्धनं ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रौंॐजूंसः भर्भुवः स्वः उर्वारुकमिव बंधनात् ॐ नमो भगवते रुद्राय त्रिपुरांतकाय ह्रांह्रींअनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौंॐजूंसः भर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममंत्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रौंॐजूं सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय ॐ अग्नित्रयाय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रौंॐजूं सः भूर्भुवःस्वः त्र्यंबकं ॐ नमो भगवते रुद्राय शूलपाणये हृदयाय नमः ॥१॥ ॐ ह्रौंॐजूं सः भर्भुवःस्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय शिरसे स्वाहा ॥ २ ॥ ॐ ह्रौं ॐजूं सः भूर्भुवःस्वः सुगंधिम्पुष्टिवर्धनं ॐ नमो भगवते रुद्राय चन्द्राशिरसे जटिने शिखायै वषट् ॥ ३॥ ॐ ह्रौं ॐजूं सः भूर्भुवःस्वः उर्वारुकमिव बंधनात् ॐ नमो भगवते रुद्राय त्रिपुरांतकाय ह्रां ह्रीं कवचाय हुं ॥४॥ ॐ ह्रौंॐजूं सः भूर्भुवःस्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय

For Private And Personal Use Only

त्रिलोचनाय ऋग्यजुःसाममंत्राय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हौंॐजूं सः भूर्भुवःस्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वलज्वल मां रक्षरक्ष अघोरास्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ हौंॐजूं सः भूर्भुवःस्वः त्र्यं नमः पूर्वमुखे ॥ १ ॥ ॐ हौं ॐजूं सः भूर्भुवःस्वः बं नमः पश्चिममुखे ॥ २ ॥ ॐ हौंॐजूं सः भूर्भुवःस्वः कं नमः दक्षिणमुखे ॥३॥ ॐ हौंॐजूं सः भूर्भुवः स्वः यं नमः उत्तरमुखे ॥ ४ ॥ ॐ हौंॐजूं सः भूर्भुवः स्वः जां नमः उरसि ॥ ५ ॥ ॐ हौंॐजूं सः भूर्भुवः स्वः मं नमः कंठे ॥६॥ ॐ हौंॐजूं सः भूर्भुवः स्वः हें नमः मुखे ॥ ७ ॥ ॐ हौंॐजूं सः भूर्भुवः स्वः सुं नमः नाभौ ॥ ८ ॥ ॐ हौंॐजूं सः भूर्भुवःस्वः गं नमः हृदि ॥९॥ ॐ हौंॐजूंसः भर्भवःस्वः धिं नमः पृष्ठे ॥१०॥ ॐ हौंॐजूंसः भूर्भुवः स्वः पुं नमः कुक्षौ ॥११॥ ॐ हौंॐजूंसः भूर्भुवः स्वः ष्टिं नमः लिंगे ॥ १२ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः वं नमः गुदे ॥ १३ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः र्धं नमः दक्षिणोरुमूले ॥ १४ ॥ ॐ हौंॐजूंसः भूर्भुवःस्वः नं नमः वामोरुमूले ॥१५॥ ॐ हौंॐजूंसः भूर्भुवःस्वः उं नमः दक्षिणोरुमध्ये ॥ १६ ॥ ॐ हौंॐजूंसः भूर्भुवःस्वः र्वा नमः वामोरुमध्ये ॥ १७ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः रुं नमः दक्षिणजानुनि ॥ १८ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः कं नमः वामजानुनि ॥ १९ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः मिं नमः दक्षिणजानुवृत्ते ॥ २० ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः वं नमः वामजानुवृत्ते ॥ २१ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः बं नमः दक्षिणस्तने ॥२२॥ ॐ हौंॐजूंसः भूर्भुवः स्वः धं नमः वामस्तने ॥ २३ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः नान्नमः दक्षिणपार्श्वे ॥ २४ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः मृं नमः वामपार्श्वे ॥ २५ ॥ ॐ हौंॐजूंसः भूर्भुवः स्वः त्योर्नमः दक्षिणपादे ॥ २६ ॥ ॐ हौंॐजूंसः भूर्भुवःस्वः

For Private And Personal Use Only

मुं नमः वामपादे ॥ २७ ॥ ॐ ह्रौं ॐ जूंसः भर्भुवःस्वः क्षीं नमः दक्षकरे ॥ २८ ॥ ॐ ह्रा ॐ जूँसः भूर्भुवःस्वः यं नमः वामकरे ॥ २९ ॥ ॐ ह्रौं ॐजूंसः भर्भुवःस्वः मां नमः दक्षनासायाम् ॥ ३० ॥ ॐ ह्रौं ॐ जूँसः भूर्भुवःस्वः मृं नमः वामनासायाम् ॥ ३१ ॥ ॐ ह्रौं ॐ जूंसः भर्भुवःस्वः तान्नमः मूर्ध्नि ॥ ३२ ॥ इति मंत्रवर्णन्यासः ॥ ॐ ह्रौं ॐजूंसः भूर्भुवःस्वः त्र्यंबकं नमः शिरसि ॥ १ ॥ ॐ ह्रौं ॐ जूंसः भूर्भुवःस्वः यजामहे भ्रुवोः ॥ २ ॥ ॐ ह्रौं ॐ जंसः भूर्भुवःस्वः सुगंधिं नेत्रयोः ॥ ३ ॥ ॐ ह्रौं ॐ जूंसः भूर्भुवःस्वः पुष्टिवर्धनं मुखे ॥ ४ ॥ ॐ ह्रौं ॐ जूंसः भूर्भुवःस्वः उर्वारुकं गंडयोः ॥ ५ ॥ ॐ ह्रौं ॐ जूंसः भूर्भुवःस्वः इव हृदये॥६॥ ॐ ह्रौं ॐ जंसः भूर्भुवःस्वः बंधनात् जठरे ॥७॥ ॐ ह्रौं ॐ जूंसः भूर्भुवः स्वः मृत्योः लिंगे ॥ ८ ॥ ॐ ह्रौं ॐ जूंसः भूर्भुवःस्वः मुक्षीय ऊर्वोः ॥ ९ ॥ ॐ ह्रौं ॐ जूंसः भूर्भुवःस्वः मा जान्वोः ॥ १० ॥ ॐ ह्रौं ॐजूंसः भूर्भुवःस्वः अमृतात् पादयोः ॥११॥ इति पदन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् । "हस्तांभोजयुगस्थकुंभयुगलादुद्धृत्य तोयं शिरः सिंचंतं करयोर्युगेन दधतं स्वांके सकुंभौ करौ ॥ अक्षस्रङ्मृगहस्तमंबुजगतं मूर्द्धस्थचन्द्रस्रवत्पीयूषोन्नतनुं भजे सगिरिजं मृत्युंजयं त्र्यंबकम् ॥ " इति । ततः पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमण्डले वा ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् । तद्यथा । पूर्वादिक्रमेण । ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥८॥ मध्ये ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जलधारां च दत्वा स्वच्छवस्त्रेणाशोध्य " ॐ नमो भगवते सकलगुणात्मशक्तियुताय अनन्ताय योगपीठात्मने नमः ॥ " इति मंत्रेण
पुष्पाद्यासनं दत्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा सलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरण
पूजां कुर्यात् । तद्यथा । पुष्पांजलिमादाय "संविन्मयः परो देवः परामृतरसप्रिय॥अनुज्ञां शिव मे देहि परिवारार्चनाय मे॥ १ ॥ "इत्याज्ञां
गृहीत्वा पुष्पांजलिं च दत्वा आवरणपूजां कुर्यात् ॥ पंचकोणे । ईशान्याम् " ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति
ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥" ॐ ईशानाय नमः । ईशानश्रीपादुकां पूजयामि तर्पयामि नमः॥इति सर्वत्र ॥ १ ॥ पूर्वे
"ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि॥तन्नो रुद्रः प्रचोदयात्" ॐ तत्पुरुषाय नमः। तत्पुरुषश्रीपा० ॥ २ ॥दक्षिणे-"ॐ अघोरेभ्योऽथ
घोरेभ्यो घोरघोरतरेभ्यः॥सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ "ॐ अघोराय नमः । अघोरश्रीपा० ॥ ३ ॥पश्चिमे-"ॐ वामदे
वाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्व
भूतदमनाय नमो मनोन्मनाय नमः॥" ॐ वामदेवाय नमः । वामदेवश्रीपा० ॥ ४ ॥उत्तरे ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः
भवेभवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ ॐ सद्योजाताय नमः । सद्योजातश्रीपा० ॥ ५ ॥ इति पंचमूर्तीः पूजयेत् ॥ ततः पुष्पांज
लिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा
पुष्पांजलिं च दत्वा विशेषार्घाद्बिंदुं निःक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १ ॥ ततः पंचकोणाग्रेषु ऐशा
न्यादिक्रमेण । ॐ निवृत्त्यै नमः । निवृत्तिश्रीपा० ॥ १ ॥ ॐ प्रतिष्ठायै नमः । प्रतिष्ठाश्रीपा० ॥ २ ॥ ॐ विद्यायै नमः

For Private And Personal Use Only

विद्याश्रीपा० ॥ ३ ॥ ॐ शांत्यै नमः । शांतिश्रीपा० ॥ ४ ॥ ॐ शात्यतीतायै नमः । शांत्यतीताश्रीपा० ॥ ५ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदले पूज्यपूजकयोरंतरालं प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ सूर्य्यमूर्तये नमः । सूर्य्यमूर्तिश्रीपा० ॥ १ ॥ ॐ इन्दुमूर्तये नमः । इन्दुमूर्तिश्रीपा० ॥ २ ॥ ॐ क्षितिमूर्तये नमः । क्षितिमूर्तिश्रीपा० ॥ ३ ॥ ॐ तोयमूर्तये नमः । तोयमूर्तिश्रीपा० ॥ ४ ॥ ॐ अग्निमूर्तये नमः । अग्निमूर्तिश्रीपा० ॥ ५ ॥ ॐ पवनमूर्तये नमः । पवनमूर्तिश्रीपा० ॥ ६ ॥ ॐ आकाशमूर्तये नमः । आकाशमूर्तिश्रीपा० ॥ ७ ॥ ॐ यज्ञमूर्तये नमः । यज्ञमूर्तिश्रीपा० ॥ ८ ॥ इत्यष्टौ मूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम् ॥ ३ ॥ तद्बहिरष्टदले प्राचीक्रमेण ॐ रमायै नमः । रमाश्रीपा० ॥ १ ॥ ॐ राकायै नमः । राकाश्रीपा० ॥ २ ॥ ॐ प्रभायै नमः । प्रभाश्रीपा० ॥ ३ ॥ ॐ ज्योत्स्नायै नमः । ज्योत्स्नाश्रीपा० ॥ ४ ॥ ॐ पूर्णायै नमः । पूर्णाश्रीपा० ॥ ५ ॥ ॐ पूषायै नमः । पूषाश्रीपा० ॥ ६ ॥ ॐ पूर्ण्यै नमः । पूर्णीश्रीपा० ॥ ७ ॥ ॐ सुधायै नमः । सुधाश्रीपा० ॥ ८ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति चतुर्थावरणम् ॥ ४ ॥ तद्बहिरष्टदले प्राचीक्रमेण । ॐ विश्वायै नमः । विश्वाश्रीपा० ॥ १ ॥ ॐ वंद्यायै नमः । वंद्याश्रीपा० ॥ २ ॥ ॐ सितायै नमः । सिताश्रीपा० ॥ ३ ॥ ॐ प्रह्वायै नमः । प्रह्वाश्रीपा० ॥ ४ ॥ ॐ सारायै नमः । साराश्रीपा० ॥ ५ ॥ ॐ संध्यायै नमः । संध्याश्रीपा० ॥ ६ ॥ ॐ शिवायै नमः । शिवाश्रीपा० ॥ ७ ॥ ॐ निशायै नमः । निशाश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति पंचमावरणम् ॥ ५ ॥ तद्बहिरष्टदले प्राचीक्रमेण । ॐ आर्य्यायै नमः । आर्य्याश्रीपा०

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महामृत्युंजयपूजनयंत्रम् ।



For Private And Personal Use Only



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महामृत्युंजयपूजनयंत्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ १ ॥ ॐ प्रज्ञायै नमः । प्रज्ञाश्रीपा० ॥ २ ॥ ॐ प्रभायै नमः । प्रभाश्रीपा० ॥ ३ ॥ ॐ मेधायै नमः । मेधाश्रीपा० ॥ ४ ॥ ॐ
शांत्यै नमः । शांतिश्रीपा० ॥ ५ ॥ ॐ कान्त्यै नमः । कांतिश्रीपा० ॥ ६ ॥ ॐ धृत्यै नमः । धृतिश्रीपा० ॥ ७ ॥ ॐ मत्यै नमः ।
मतिश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति षष्ठावरणम् ॥ ६ ॥ तद्बहिरष्टदले प्राचीक्रमेण । ॐ धरायै नमः ।
धराश्रीपा० ॥ १ ॥ ॐ उमायै नमः । उमाश्रीपा० ॥ २ ॥ ॐ पावन्यै नमः । पावनीश्रीपा० ॥ ३ ॥ ॐ पद्मायै नमः । पद्माश्रीपा०
॥ ४ ॥ ॐ शांतायै नमः । शांताश्रीपा० ॥ ५ ॥ ॐ अमोघायै नमः । अमोघाश्रीपा० ॥ ६ ॥ ॐ जयायै नमः । जयाश्रीपा०
॥ ७ ॥ ॐ अमलायै नमः । अमलाश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति सप्तमावरणम् ॥ ७ ॥ तद्बहिर
ष्टदले प्राचीक्रमेण । ॐ अनंताय नमः । अनंतश्रीपा० ॥ १ ॥ ॐ सूक्ष्मसंज्ञाय नमः । सूक्ष्मसंज्ञश्रीपा० ॥ २ ॥ ॐ [illegible]
नमः । शिवोत्तमश्रीपा० ॥ ३ ॥ ॐ एकनेत्राय नमः । एकनेत्रश्रीपा० ॥ ४ ॥ ॐ एकरुद्राय नमः । एकरुद्रश्रीपा० ॥ ५ ॥
ॐ त्रिमूर्तये नमः । त्रिमूर्तिश्रीपा० ॥ ६ ॥ ॐ श्रीकंठाय नमः श्रीकंठश्रीपा० ॥ ७ ॥ ॐ शिखंडिने नमः । [illegible] ॥ ८ ॥
इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इत्यष्टमावरणम् ॥ ८ ॥ तद्बहिरष्टदले उत्तरादारभ्य ॐ उमायै नमः । उमाश्रीपा० ॥ १ ॥
ॐ चण्डेश्वराय नमः । चण्डेश्वरश्रीपा० ॥ २ ॥ ॐ नंदिने नमः । नंदिश्रीपा० ॥ ३ ॥ ॐ महाकालाय नमः । महाकालश्रीपा०
॥ ४ ॥ ॐ गणेशाय नमः । गणेशश्रीपा० ॥ ५ ॥ ॐ वृषभाय नमः । वृषभश्रीपा० ॥ ६ ॥ ॐ भृंगिरिटये नमः । भृंगिरिटिश्रीपा० ॥ ७ ॥
ॐ स्कंदाय नमः । स्कंदश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति नवमावरणम् ॥ ९ ॥ तद्बहिरष्टदले प्राचीक्रमेण ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० ॥ १ ॥ ॐ माहेश्वर्यै नमः । माहेश्वरीश्रीपा० ॥ २ ॥ ॐ कौमार्यै नमः । कौमारीश्रीपा० ॥ ३ ॥
ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ॥ ४ ॥ ॐ वाराह्यै नमः । वाराहीश्रीपा० ॥ ५ ॥ ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ॥ ६ ॥
ॐ चामुंडायै नमः । चामुंडाश्रीपा० ॥ ७ ॥ ॐ महालक्ष्म्यै नमः । महालक्ष्मीश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च
दद्यात ॥ । इति दशमावरणम् ॥ तद्बाह्ये भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं दद्यात् ।
इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य कृतांजलिः प्रार्थयेत् । ॐ मृत्युंजय महारुद्र त्राहि मां शरणागतम् ॥ जन्ममृत्युजरारोगैः
पीडितं कर्मबंधनैः ॥ १ ॥ तावकस्त्वद्गतप्राणस्त्वच्चित्तोहं सदा मृड ॥ इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं परम् ॥ २ ॥ इति संप्रार्थ्य जपं
कुर्यात् । अस्य पुरश्चरणमेकलक्षजपः । जपांते दशांशतो दशद्रव्यैर्होमः । होमदशांशेन मंत्रांते ॐ मृत्युंजयं तर्पयामीत्युक्त्वा दुग्धमिश्रित
जलेन तर्पयेत । ततस्तर्पणदशांशेन मंत्रांते आत्मानमभिषिंचामि नमः । इति यजमानमूर्द्धन्यभिषेकः होमतर्पणाभिषेकाशक्तौ तत्स्थाने
तत्तद्द्विगुणो जपः कार्यः । ततोभिषेकदशांशतोऽष्टोत्तरशतसंख्यातो वा ब्राह्मणभोजनं कुर्यात् । एवं कृते मंत्र सिद्धो भवति । सिद्धे च मंत्रे
मंत्री प्रयोगान् साधयेत । तथा च । जपेन्मंत्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः ॥ दशद्रव्यैः प्रजुहुयात्तानि बिल्वफलं तिलाः ॥ १ ॥ पायसं
सर्षपादुग्धं दधि दूर्वा च सप्तमी ॥ वटात्पलाशात्खदिरात्समिधो मधुरप्लुताः ॥ २ ॥ एवंकृते प्रयोगार्हो जायतेयं महामनुः ॥ जन्मभे
दशमे तस्मात्पुनश्चैकोनविंशके ॥ ३ ॥ जुहुयाद्यः सुधावल्याः समिधश्चतुरंगुलाः ॥ स रोगान् सकलाञ्छत्रून् पराभूय श्रिया युतः ॥ ४ ॥
मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः ॥ समिद्भिः श्रीफलोत्थाभिर्होमः संपत्तिसिद्धये ॥ ५ ॥ पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये ॥

३२

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वटोत्थाभिर्धनप्राप्त्यै खादिरीभिस्तु कांतये ॥ ६ ॥ तिलैरधर्म्मनाशाय सर्षपैः शत्रुनष्टये ॥ पायसेन कृतो होमः कांतिश्रीकीर्तिदायकः॥ ॥ ७ ॥ कृत्वा मृत्युक्षयरोग्यं दक्षा संवादासिद्धिदः ॥ होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता ॥ ८ ॥ अष्टोत्तरशतं दर्वात्रिकहोमाद्रुजां क्षयः ॥ स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितैः ॥ ९ ॥ जुहोति तस्य वर्द्धते कुलमारोग्यकीर्तयः ॥ गुडूचीबकुलोत्थाभिः समिद्भिर्हवनं नृणाम् ॥ १० ॥ जन्मतापत्रयं रोगान् मृत्युं चापि विनाशयेत् ॥ प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये ॥ ११ ॥ किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ॥ अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये॥दुग्धाक्तैरमृताखंडैर्मासं होमोखिलाप्तये॥ इति महामृत्युंजयमंत्रप्रयोगः॥

॥श्रीगणेशाय नमः॥ अथ दशाक्षररुद्रमंत्रविधानम् ॥ मंत्रो यथा ॥ ॐ नमो भगवते रुद्राय इति दशाक्षरो मंत्रः ॥ अस्य विधानम्॥ अस्य श्रीरुद्रमंत्रस्य बौधायन ऋषिः। पंक्तिश्छंदः। रुद्रो देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ॐ बौधायनर्षये नमः शिरसि॥ १॥ पंक्तिच्छंदसे नमः मुखे ॥ २ ॥ रुद्रदेवताय नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति ऋष्यादिन्यासः। ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी ॥ तयानस्तन्वाशंतमयागिरिशंताभिचाकशीहि ॥ इति शिखायाम् ॥१॥ ॐ अस्मिन्महत्यर्णवेंतरिक्षे भवा अधि॥ तेषा७ंसहस्रयोजनेवधन्वानितन्मसि ॥ इति शिरसि ॥२ ॥ ॐ सहस्राणि सहस्रशोबाह्वोस्तव हेतयः ॥ तासामीशानोभगवः परा चीनामुखाकृधि ॥ इति ललाटे ॥ ३ ॥ ॐ ह७ंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजाऋतजाअद्रिजाऋतंबृहत् ॥ इति भ्रुवोर्मध्ये ॥४॥ ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनम् ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मा मृतात्॥ इति नेत्रयोः॥५॥ॐ नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताय च ॥ इति कर्णयोः॥ ६ ॥ ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानो अश्वेषुरीरिषः ॥ मानोवीरान् रुद्रभामिनोवर्धीर्हविष्मंतः सदमित्वा हवामहे ॥ इति नासिकयोः॥ ७ ॥ ॐ अवतत्यधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्यशल्यानांमुखांशिवोनः सुमनाभव ॥ इति मुखे ॥ ८ ॥ ॐ नीलग्रीवाः शितिकंठाः शर्वा अधःक्षमाचराः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ इति कंठे ॥ ९ ॥ ॐ नीलग्रीवाःशितिकंठादिवꣳरुद्रा उपश्रिताः ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ इत्युपकंठे ॥ १० ॥ ॐ नमस्त आयुधा यानातताययधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यांतवधन्वने ॥ इति स्कंधयोः ॥ ११ ॥ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥ इति बाह्वोः ॥ १२ ॥ येतीर्थानिप्रचरंतिसृकाहस्तानिषंगिणः॥तेषाꣳस० इति हस्तयोः ॥१३॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ इत्यंगुष्ठयोः ॥ १४ ॥ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालाय नमः कलविकरणायनमोबलविकरणायनमः बलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः॥ इति तर्जन्योः॥ १५॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः॥मध्यमयोः॥ १६ ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात ॥ इत्यनामिकयोः ॥ १७॥ ईशानः सर्वविद्यानामीश्वरः सर्व्वभूतानाम् ॥ ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोअस्तुसदाशिवोम ॥ इति कनिष्ठिकयोः॥ १८ ॥ नमो वः किरिकेभ्योदेवानाꣳहृदयेभ्यो नमो विचिन्वत्केभ्योनमो विक्षिणत्केभ्यो नमः आनिर्हतेभ्यः ॥ इति हृदये ॥ १९ ॥ नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः ॥ इति पृष्ठे ॥ २० ॥ नमोहिरण्यबाहवेसेनान्येदिशा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ञ्चपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यः पशूनाम्पतयेनमोनमः सष्पिंजरायत्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतये नमोनमोबभ्लुशाय ॥ इति पार्श्वद्वये ॥ २१ ॥ ॐ विज्ज्यन्धनुः कपर्दिनोव्विशल्योबाणवांऽउत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्य निषङ्गधि इति जठरे ॥ २२ ॥ ॐ हिरण्यगर्भः समवर्ततायेभुतस्यजातः पतिरेकआसीत ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ इति नाभौ ॥ २३ ॥ मीढुष्टमशिवतमशिवोनः सुमनाभवपरमेवृक्षऽआयुधन्निधाय कृत्तिंव्वसानऽआचरपिनाकम्बिभ्रदागहि ॥ इति कण्ठ्याम ॥ २४ ॥ येभूतानामधिपतयोव्विशिखासः कपर्दिनः ॥ तेषाᳬ सहस्रयोजनेवधन्न्वानितन्मसि इति गुह्ये ॥ २५ ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः ॥ सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः इति गुदे ॥ २६ ॥ मानोमहान्तमुतमानोअर्भकंमानउक्षंतमुतमानउक्षितम् ॥ मानोऽवधीः पितरंमोतमातरंमानःप्रियास्तन्न्वोरुद्ररीरिषः ॥ इति ऊर्वोः॥ २७ ॥ एषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजवतोतीहि ॥ अवततधन्वापिनाकहस्तःकृत्तिवासाः ॥ इति जानुनोः॥ २८॥ येपथांपथिरक्षयऐलबृदाआयुर्युधः॥ तेषाᳬ सहस्रयोजनेवधन्न्वानितन्वसि ॥ इति पादयोः॥ २९ ॥ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् अहींश्चसर्वांजंभयत्सर्वाश्चयातुधान्योधराचीःपरासुव ॥ इति कवचम् ॥ ३० ॥ नमोबिल्मिनेचकवचिनेचनमोव्वर्म्मिणेच-व्वरूथिनेच नमः ॥ श्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचा-हनन्न्यायचनमोधृष्णवे ॥ इत्युपकवचम्[1] ॥ ३१ ॥ नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेअस्यसत्वानोहंतेभ्योकरन्नमः ॥ इति तृतीयनेत्रे ॥ ३२॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्न्योर्ज्ज्याम् ॥ याश्चतेहस्तऽइषवः

१—कवचाद्विपरीतक्रममुपकवचम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पराताभगवोव्वप ॥ इत्यस्त्रम् ॥ ३३ ॥ इति प्रथमो न्यासः ॥ यऽएतावन्तश्चभूयाꣳसश्च दिशोरुद्राव्वितास्थिरे ॥ तेषाꣳसहस्रयोजने वधन्वानितन्ममि ॥ इति दिग्बंधः ॥ १ ॥ ॐ ॐनमः शिरसि ॥ १ ॥ ॐ नं नमः नासिकायाम् ॥ २ ॥ ॐ मों नमः ललाटे ॥ ३ ॥ ॐ भं नमः मुखे ॥ ४ ॥ ॐ गं नमः कंठे ॥ ५ ॥ ॐ वं नमः हृदि ॥ ६ ॥ ॐ तें नमः दक्षस्तने ॥ ७ ॥ ॐ रुं नमः वामस्तने ॥ ८ ॥ ॐ द्रां नमः नाभौ ॥ ९ ॥ ॐ यं नमः पादयोः ॥ १० ॥ इति दशांगन्यासो द्वितीयः ॥ २ ॥ ॐ सद्यो जातंप्रपद्यामिसद्योजातायवैनमोनमः ॥ भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ इति पादयोर्न्यस्य ॐ हंसोहंसेनिब्रूयात् ॥ १ ॥ ॐ वाम देवायनमोज्येष्ठाय० । इति ऊर्वोर्न्यस्य हंसोहंसेति ब्रूयात ॥ २ ॥ ॐ अघोरेभ्योथघोरेभ्यो० इति हृदि विन्यस्य हंसोहंसेति ब्रूयात ॥ ३ ॥ ॐ तत्पुरुषायविद्महे० इति मुखे विन्यस्य हंसोहंसेति ब्रूयात् ॥ ४ ॥ ॐ इशानः सर्वविद्याना० इति मूर्ध्नि विन्यस्य हंसोहंसेति ब्रूयात् ॥ ५ ॥ इति तृतीयन्यासः ॥ ३ ॥ एवं न्यासत्रयं कृत्वा संपुटं कुर्यात् । तत्र क्रमः । कृतांजलिपुटः । ॐ त्रातारमिं द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विंद्रः ॥ इति मंत्रेण प्राच्यामिन्द्रं नम स्कुर्यात् ॥ १ ॥ ॐ त्वन्नोऽअग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्य स्मत् ॥ इत्याग्नेय्यामग्निं प्रणमेत् ॥ २ ॥ ॐ सुगन्नःपंथामभयंकृणोतु (?) —

मत्युरमृतम्मऽआगा द्वैवस्वतोनोऽअभयंकृणोतु ॥ इति दक्षिणस्यां यमं प्रणमेत ॥ ३ ॥ ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहितस्करस्य ॥ अन्य मस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ इति नैर्ऋतिं प्रणमेत् ॥ ४ ॥ ॐ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ इति पश्चिमायां वरुणं प्रणमेत् ॥ ५ ॥ ॐ आनोनियुद्भिःशतिनीभिरध्वरꣳ सह
स्त्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयंपातस्वस्तिभिःसदानः ॥ इति वायव्यां वायुं प्रणमेत् ॥ ६ ॥ ॐ व्वयꣳसोम
व्रतेतवमनस्तनूषुविभ्रतः ॥ प्रजावन्तःसचेमहि ॥ इत्युदीच्यां कुबेरं प्रणमेत् ॥ ७ ॥ ॐ तमीशानंजगतस्तस्थुषस्पतिंधियंजिन्वमवसे
हूमहेव्वयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ॥ इत्यैशान्यां ईश्वरं प्रणमेत् ॥८॥ ॐ अस्मेरुद्रामेहनापर्वतासोवृत्र
हत्येभरहूतौसजोषाः ॥ यः शꣳसतेस्तुवतेधायिपज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२ऽअवन्तुदेवाः इत्यूर्ध्वं ब्रह्माणं प्रणमेत् ॥ ९ ॥ ॐ
स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः इत्यधः पृथ्वीं प्रणमेत् ॥ १० ॥ एवं संपुटं कृत्वा चतुर्थं रक्षा
न्यासं कुर्यात् ॥ ॐ मनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वारिष्टंय्यज्ञꣳसमिमंदधातु ॥ व्विश्वेदेवासऽइहमादयन्ता
मो ३ प्रतिष्ठ ॥ इति गुह्ये ॥ १ ॥ ॐ अबोध्यग्निः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥ यह्वाऽइवप्रवयामुज्जिहानाःप्रभानवः
सिस्रतेनाकमच्छ ॥ इति जठरानले ॥ २ ॥ ॐ मूर्द्धानंदिवोऽअरतिंपृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥ कविꣳसम्राजमतिथिंज
नानामासन्नापात्रंजनयंतदेवाः ॥ इति हृदये ॥ ३ ॥ ॐ मर्म्माणितेवर्म्मणाछादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोवरु
णस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ इति मुखे ॥ ४ ॥ ॐ जातवेदायदिवापावकोसिविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्व
तस्पात् संव्वाहुभ्यांधमतिसंपतत्रैर्द्यावाभूमीजनयन्देवऽएकः॥ इति शिरसि ॥ ५ ॥ इति चतुर्थो न्यासः ॥ ४ ॥ ॐ यज्जाग्रतोदूरमुदैतिदैवं

१—एवं यं संपुटं कुर्यात्स स्यात्किल्बिषवर्जितः ॥ तं दीप्यमानमीक्षंते प्रेतचौराद्युपद्रवाः ॥ न पराभवितुं शक्ताः पलायंते विदूरतः ॥

For Private And Personal Use Only

तदुसुप्तस्यतथैवैति ॥ दूरङ्गमज्ज्योतिषाञ्ज्योतिरेकंतन्मेमनः शिवसंकल्पमस्तु ॥ इति हृदयाय नमः ॥ १ ॥ ॐ येनकर्म्माण्यपसोमनी षिणोयज्ञेकृण्वन्तिविदथेषुधीराः॥ यदपूर्वंयक्षमन्तः प्रजानान्तन्मेमनः शिवसंकल्पमस्तु॥ इति शिरसे स्वाहा ॥ २ ॥ यत्प्रज्ञानमुतचेतो धृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु॥यस्मान्न ऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः शिवसंकल्पमस्तु ॥ इति शिखायै वषट् ॥ ३ ॥ येनेदम्भूत म्भुवनंभविष्यत्परिगृहीतममृतेनसर्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवसंकल्पमस्तु ॥ इति कवचायहुं ॥ ४ ॥ यस्मिन्नृचः सामयजूंषियस्मिन्प्रतिष्ठितारथनाभाविवाराः यस्मिंश्चित्तं सर्वमोतम्प्रजानान्तन्मेमनः शिवसंकल्पमस्तु ॥ इति नेत्रत्रयाय वौषट् ॥५॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवसंकल्पमस्तु ॥ इत्यस्त्राय फट् ॥६॥ इति पंचमो न्यासः ॥ ५ ॥ इति पंचन्यासान्कृत्वा पुनः षडंगन्यासं कुर्य्यात् ॥ ॐ यज्जाग्रत इत्यादिशिवसंकल्पांते ॐ हृदयाय नमः ॥ १ ॥ ॐ सहस्रशीर्षापुरुष इत्यादिपुरुषसूक्तांते शिरसे स्वाहा ॥ २ ॥ ॐ अद्भ्यः संभृत इत्याद्युत्तरनारायणांते शिखायै वषट् ॥ ३ ॥ ॐ आशुः शिशानइत्यप्रतिरथांते कवचाय हुं ॥ ४ ॥ ॐ विभ्राड्बृहदित्यादिसूक्तांते नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ नमस्तेरुद्रायमन्यव इत्यादिशतरुद्रियांते अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासः ॥ एवं न्यासविधिं कृत्वा साष्टाङ्गं प्रणम्य अष्टभिर्मंत्रैर्न मस्कारं कुर्यात् ॥ ॐ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेकआसीत् ॥ सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ १ ॥ यः प्राणतो० ॥ २ ॥ ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठाः सतश्चयोनिमसतश्च विवः ॥ ३ ॥ ॐ महीद्यौः पृथिवीचन इमंयज्ञम्मिमिक्षताम् ॥ पिपृतान्नोभरीमभिः ॥ ४ ॥ उपश्वास० ५ अग्नेनय० ६

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यातेअग्ने० ७ इमंयमः० ८ इत्यष्टावृचः पठित्वा आत्मानं रुद्ररूपं ध्यायेत ॥ अथ ध्यानम् ॥ कैलासाचलसन्निभं त्रिनयनं पंचास्य
मंबायुतं नीलग्रीवमहीशभूषणधरं व्याघ्रत्वचा प्रावृतम् ॥ अक्षस्रग्वरकुंडिकाभयकरं चांद्रीं कलां बिभ्रतं गंगांभोविलसज्जटं दशभुजं वंदे
महेशं परम् ॥ १ ॥ इति ध्यात्वा लिंगतोभद्रमंडले सर्वतोभद्रमंडले वा स्वेस्वे स्थाने मंडूकादिपरतत्त्वांतपीठदेवता आवाह्य ॐ मं मंडू
कादिपरतत्त्वांतपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत ॥ तत्र क्रमः । पूर्वादिषु ॐ वामायै नमः ॥ १ ॥ ॐ
ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै
नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ पीठमध्ये । ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति नव
पीठशक्तीः पूजयेत् ॥ ततः । स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपूर्वकं ॐ नमो भगवते सकलगुणात्मकशक्तियुक्तायाऽनंताय योगपीठात्मने
नमः । इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांते रुपचारैः
पद्धतिमार्गेण संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात । पुष्पांजलिमादाय ॐ संविन्मयः परो देव परामृतरसप्रिय ॥ अनुज्ञां रुद्र मे
देहि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा आवरणपूजामारभेत । तत्र क्रमः । पश्चिमादिचतुर्दिक्षु क्रमेण ।

१-प्रणम्य जगतामीशमुमादेहार्द्धधारिणम् ॥ यंत्रोद्धारमहं वक्ष्ये रुद्रकल्पानुसारतः ॥ मध्ये वृत्तं समालिख्य तन्मध्ये च दशाक्षरम् ॥ बहिरष्टदलं पद्मं ततः षो
डशपत्रकम् ॥ चतुर्विंशतिपत्राढ्यं द्वात्रिंशत्पत्रकं तथा ॥ चत्वारिंशत्पत्रकं तु वृत्तं सूर्यसमप्रभम् ॥ पंचपद्मात्मकं वृत्तं चतुरस्रं च भूगृहम् ॥ सत्त्वंरजस्तमश्चेति
त्रिगुणैः परितो वृतम्॥ चतुर्द्वारं द्वारदेशे बहिर्नागसमावृतम ॥ रुद्रपीठमिति ख्यातं देवतास्तत्र विन्यसेत् ॥ चत्वारिंशच्छतं चैकं देवतानामुदाहृतम ॥
कर्णिकामध्यदेशे तु रुद्रं पंचास्यमालिखेत् ॥

For Private And Personal Use Only

ॐ सद्योजाताय नमः सद्योजातश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥ इति सर्वत्र॥ ॐ वामदेवाय नमः । वामदेवश्रीपा० ॥ २॥ ॐ अघोराय नमः अघोरश्रीपा० ॥ ३॥ ॐ तत्पुरुषाय नमः । तत्पुरुषश्रीपा० ॥ ४॥ मध्ये ॐ ईशानाय नमः । ईशानश्री० ॥ ५॥ इति पंचमूर्तीः पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १॥ ततोष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ नंदिने नमः। नंदिश्रीपा०॥ १॥ ॐ महाकालाय नमः। महाकालश्रीपा० ॥ २ ॥ ॐ गणेश्वराय नमः । गणेश्वरश्रीपा० ॥ ३ ॥ ॐ वृषभाय नमः । वृषभश्रीपा० ॥ ४ ॥ ॐ भृंगिरिटये नमः । भृंगिरिटिश्रीपा० ॥ ५ ॥ ॐ स्कंदाय नमः । स्कंदश्रीपा० ॥ ६ ॥ ॐ उमायै नमः । उमाश्रीपा० ॥ ७ ॥ ॐ चंडेश्वराय नमः । चंडेश्वरश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥ २ ॥ ततः षोडशदले पूर्वादिक्रमेण । ॐ अनंताय नमः। अनंतश्रीपा० ॥ १ ॥ ॐ सूक्ष्माय नमः । सूक्ष्मश्रीपा० ॥ २ ॥ ॐ शिवाय नमः । शिवश्रीपा० ॥ ३॥ ॐ एकपादाय नमः । एकपादश्रीपा० ॥ ४ ॥ ॐ एकरुद्राय नमः । एकरुद्रश्रीपा० ॥ ५ ॥ ॐ त्रिमूर्तये नमः । त्रिमूर्तिश्रीपा० ॥ ६ ॥ ॐ श्रीकंठाय नमः । श्रीकंठश्रीपा० ॥ ७ ॥ ॐ वामदेवाय नमः । वामदेवश्रीपा० ॥ ८ ॥ ॐ ज्येष्ठाय नमः । ज्येष्ठश्री० ॥ ९ ॥ ॐ श्रेष्ठाय नमः । श्रेष्ठश्रीपा० ॥ १० ॥ ॐ रुद्राय नमः । रुद्रश्री० ॥ ११ ॥ ॐ कालाय नमः । कालश्रीपा०॥ १२॥ ॐ कलविकरणाय नमः । कलविकरणश्रीपा० ॥ १३ ॥ ॐ बलाय नमः। बलश्रीपा० ॥ १४ ॥ ॐ बलविकरणाय नमः । बल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशाक्षरीरुद्रपूजनयन्त्रम्.



For Private And Personal Use Only



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशाक्षरीरुद्रपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकरणश्रीपा० ॥ १५ ॥ ॐ बलप्रमथनाय नमः । बलप्रमथनश्रीपा० ॥ १६ ॥ इति षोडश देवताः पूजयित्वा पुष्पांजलिं दद्यात् । इति तृतीयावरणम् ॥ ३ ॥ ततश्चतुर्विंशतिदले पूर्वादिक्रमेण । ॐ अणिमायै नमः । अणिमाश्रीपा० ॥ १ ॥ ॐ महिमायै नमः । महिमाश्री० ॥ २ ॥ ॐ लघिमायै नमः । लघिमाश्रीपा० ॥ ३ ॥ ॐ गरिमायै नमः । गरिमाश्रीपा० ॥ ४ ॥ ॐ प्राप्त्यै नमः । प्राप्तिश्रीपा० ॥ ५ ॥ ॐ प्राकाम्यायै नमः । प्राकाम्याश्रीपा० ॥ ६ ॥ ॐ ईशितायै नमः । ईशिताश्रीपा० ॥ ७ ॥ ॐ वशितायै नमः । वशिताश्री० ॥ ८ ॥ ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० ॥ ९ ॥ ॐ माहेश्वर्यै नमः माहेश्वरीश्रीपा० ॥ १० ॥ ॐ कौमार्यै नमः । कौमारीश्रीपा० ॥ ११ ॥ ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ॥ १२ ॥ ॐ वाराह्यै नमः । वाराहीश्री० ॥ १३ ॥ ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ॥ १४ ॥ ॐ चामुंडायै नमः । चामुंडाश्रीपा० ॥ १५ ॥ ॐ चंडिकायै नमः । चंडिकाश्रीपा० ॥ १६ ॥ ॐ असितांगभैरवाय नमः । असितांगभैरवश्रीपा० ॥ १७ ॥ ॐ रुरुभैरवाय नमः । रुरुभैरवश्रीपा० ॥ १८ ॥ ॐ चंडभैरवाय नमः । चंडभैरवश्रीपा० ॥ १९ ॥ ॐ क्रोधभैरवाय नमः । क्रोधभैरवश्रीपा० ॥ २० ॥ ॐ उन्मत्तभैरवाय नमः । उन्मत्तभैरवश्रीपा० ॥ २१ ॥ ॐ कालभैरवाय नमः । कालभैरवश्रीपा० ॥ २२ ॥ ॐ भीषणभैरवाय नमः । भीषणभैरवश्रीपा० ॥ २३ ॥ ॐ संहारभैरवाय नमः । संहारभैरवश्रीपा० ॥ २४ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति चतुर्थावरणम् ॥ ४ ॥ ततो द्वात्रिंशत्पत्रके पूर्वादिक्रमेण । ॐ भवाय नमः । भवश्रीपा० ॥ १ ॥ ॐ शर्वाय नमः । शर्वश्रीपा० ॥ २ ॥ ॐ ईशानाय नमः । ईशानश्रीपा० ॥ ३ ॥ ॐ पशुपतये नमः । पशुपतिश्रीपा० ॥ ४ ॥ ॐ रुद्राय नमः । रुद्रश्रीपा० ॥ ५ ॥ ॐ उग्राय नमः । उग्रश्रीपा० ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ भीमाय नमः । भीमश्रीपा० ॥ ७ ॥ ॐ महादेवाय नमः । महादेवश्रीपा० ॥ ८ ॥ ॐ अनंताय नमः । अनंतश्रीपा० ॥ ९ ॥ ॐ वासुकये नमः । वासुकिश्रीपा० ॥ १० ॥ तक्षकाय नमः । तक्षकश्रीपा० ११ ॥ ॐ कुलीरकाय नमः । कुलीकरश्रीपा० ॥ १२ ॥ ॐ कर्कोटकाय नमः । कर्कोटकश्रीपा० ॥ १३ ॥ ॐ शंखपालाय नमः । शंखपालश्रीपा० ॥ १४ ॥ ॐ कंबलाय नमः । कंबलश्रीपा० ॥ १५ ॥ ॐ अश्वतराय नमः । अश्वतरश्रीपा० ॥ १६ ॐ वैन्याय नमः । वैन्यश्रीपा० ॥ १७ ॥ ॐ पृथवे नमः । पृथुश्रीपा० ॥ १८ ॥ ॐ हैहयाय नमः । हैहयश्रीपा० ॥ १९ ॥ ॐ अर्जुनाय नमः । अर्जुनश्रीपा० ॥२०॥ ॐ शाकुंतलेयाय नमः । शाकुंतलेयश्रीपा० ॥ २१ ॥ ॐ भरताय नमः । भरतश्रीपा० ॥ २२ ॥ ॐ नलाय नमः । नलश्रीपा० ॥ २३ ॥ ॐ रामाय नमः । रामश्रीपा० ॥ २४ ॥ ॐ हिमवते नमः । हिमवच्छ्रीश्रीपा० ॥ २५ ॥ ॐ निषधाय नमः । निषधश्रीपा० ॥ २६ ॥ ॐ विंध्याय नमः । विंध्यश्रीपा० ॥ २७ ॥ ॐ माल्यवते नमः । माल्यवच्छ्रीपा० ॥ २८ ॥ ॐ पारियात्राय नमः । पारियात्रश्रीपा० ॥ २९ ॥ ॐ मलयाय नमः मलयश्रीपा० ॥३०॥ ॐ हेमकूटाय नमः । हेमकूटश्रीपा० ॥ ३१ ॥ ॐ गंधमादनाय नमः । गंधमादनश्रीपा० ॥ ३२ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति पंचमावरणम् ॥ ५ ॥

ततः चत्वारिंशद्दले पूर्वादिक्रमेण । ॐ इन्द्राय नमः । इन्द्रश्रीपा० ॥१॥ ॐ अग्नये नमः । अग्निश्रीपा० ॥ २ ॥ ॐ यमाय नमः । यमश्रीपा० ॥३॥ ॐ निर्ऋतये नमः । निर्ऋतिश्रीपा० ॥४॥ ॐ वरुणाय नमः । वरुणश्रीपा० ॥५॥ ॐ वायवे नमः । वायुश्रीपा०

---

१ इति नागाष्टकम् । २ इति नृपाष्टकम् । ३ इति गिर्यष्टकम् ।

For Private And Personal Use Only

॥ ६ ॥ ॐ कुबेराय नमः । कुबेरश्रीपा० ॥ ७ ॥ ॐ ईशानाय नमः । ईशानश्रीपा० ॥ ८ ॥ ॐ शच्यै नमः। शचीश्रीपा० ॥९॥
ॐ स्वाहायै नमः । स्वाहाश्रीपा० ॥ १० ॥ ॐ वाराह्यै नमः । वाराहीश्रीपा० ॥ ११ ॥ ॐ खड्गिन्यै नमः । खड्गिनीश्रीपा०
॥ १२ ॥ ॐ वारुण्यै नमः । वारुणीश्रीपा० ॥ १३ ॥ ॐ वायव्यै नमः । वायवीश्रीपा० ॥ १४ ॥ ॐ कौबेर्यै नमः । कौबेरी
श्रीपा० ॥ १५ ॥ ॐ ईशान्यै नमः । ईशानीश्रीपा० ॥ १६ ॥ ॐ वज्राय नमः । वज्रश्रीपा० ॥ १७ ॥ ॐ शक्तये नमः ।
शक्तिश्रीपा० ॥ १८ ॥ ॐ दंडाय नमः । दंडश्रीपा० ॥ १९ ॥ ॐ खड्गाय नमः । खड्गश्रीपा० ॥ २० ॥ ॐ पाशाय नमः ।
पाशश्रीपा० ॥ २१॥ ॐ अंकुशाय नमः। अंकुशश्रीपा० ॥ २२ ॥ ॐ गदायै नमः । गदाश्रीपा० ॥ २३ ॥ ॐ त्रिशूलाय
नमः । त्रिशूलश्रीपा० ॥ २४ ॥ ॐ ऐरावताय नमः । ऐरावतश्रीपा० ॥ २५॥ ॐ मेषाय नमः । मेषश्रीपा० ॥ २६॥ॐ महि
षाय नमः । महिषश्रीपा० ॥ २७ ॥ ॐ प्रेताय नमः । प्रेतश्रीपा० ॥ २८ ॥ ॐ मकराय नमः । मकरश्रीपा० ॥ २९ ॥ ॐ हारि
णाय नमः । हरिणश्रीपा० ॥ ३० ॥ ॐ नराय नमः । नरश्रीपा० ॥३१॥ ॐ वृषभाय नमः । वृषभश्रीपा० ॥ ३२ ॥ ॐ ऐरा
वताय नमः ऐरावतश्रीपा० ॥ ३३ ॥ ॐ पुंडरीकाय नमः । पुंडरीकश्रीपा० ॥ ३४ ॥ ॐ वामनाय नमः वामनश्रीपा० ॥ ३५ ॥
ॐ कुमुदाय नमः । कुमुदश्रीपा० ॥ ३६ ॥ ॐ अंजनाय नमः । अंजनश्रीपा० ॥ ३७ ॥ ॐ पुष्पदन्ताय नमः । पुष्पदन्तश्रीपा०
॥ ३८ ॥ ॐ सार्वभौमाय नमः । सार्वभौमश्रीपा० ॥ ३९ ॥ ॐ सुप्रतीकाय नमः । सुप्रतीकश्रीपा० ॥ ४० ॥ इति पूजयित्वा
पुष्पांजलिं च दद्यात् । इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुरे पूर्वादिक्रमेण पुनः इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयेत् ॥

ततो भूपुराभ्यंतरे आग्नेय्याम् ॐ विरूपाक्षाय नमः । विरूपाक्षश्रीपा० ॥ १ ॥ नैर्ऋते ॐ विरूपाय नमः । विरूपश्रीपा० ॥ २ ॥ वायव्याम् ॐ पशुपतये नमः । पशुपतिश्रीपा० ॥ ३ ॥ ऐशान्याम् ॐ ऊर्ध्वलिंगाय नमः। ऊर्ध्वलिंगश्रीपा० ॥ ४ ॥ इति पूजयेत् । ततो भूपुराद्बहिः पूर्वादिक्रमेण । ॐ विप्रवर्णाय श्वेतरूपाय सहस्रफणमंडिताय शेषाय नमः । शेषश्रीपा० ॥ १ ॥ ॐ वैश्यवर्णाय नील रूपाय पंचाशत्फणायोत्तुंगकायाय तक्षकाय नमः । तक्षकश्रीपा० ॥ २ ॥ ॐ विप्रवर्णाय कुंकुमरूपाय सहस्रफणमंडिताय अनन्ताय नमः । अनन्तश्रीपा० ॥ ३ ॥ ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणमंडितायोत्तुंगकाय वासुकये नमः । वासुकिश्रीपा० ॥ ४ ॥ ॐ क्षत्रियवर्णाय पीतरूपाय सप्तशतफणमंडिताय शंखपालाय नमः । शंखपालश्रीपा० ॥ ५ ॥ ॐ वैश्यवर्णाय कृष्णरूपाय पंचशतफण मंडितायोत्तुंगकायाय महापद्माय नमः । महापद्मश्रीपा० ॥ ६ ॥ ॐ शूद्रवर्णाय कृष्णरूपाय त्रिंशत्फणमंडिताय कंबलाय नमः कंबल श्रीपा० ॥ ७ ॥ ॐ शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणयुक्ताय कर्कोटकाय नमः । कर्कोटकश्रीपा० ॥ ८ ॥ इति सप्तमावरणं पूजयित्वा पुष्पांजलिं च दद्यात् इति सप्तमावरणम् ॥ ७ ॥ एवमावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य बद्धांजलिपूर्वकं प्रार्थयेत् ॥ "ॐ नमो विरंचिविष्ण्वीशभेदन परमात्मने ॥ सर्गसंस्थितिसंहारव्यापृतव्यक्तमूर्तये ॥ १ ॥ नमश्चतुर्थाप्रोद्भूतभूतभीतात्मनो भुवः ॥ भूरिभारार्ति संहर्त्रे भूतनाथाय शूलिने॥ २ ॥ विश्वग्रासाय विकसत्कालकूटविषाशिते ॥ तत्कालांकांकितश्रीवनीलकंठाय ते नमः ॥ ३ ॥ नमो ललाटनयनप्रोल्लसत्कृष्णवर्त्मने ॥ ध्वस्तस्मरनिरस्ताधियोगिध्याताय शंभवे ॥४॥ नमो देहार्द्धकांताय दग्धदक्षाध्वराय च ॥ चतुर्वर्गश्च सिद्ध्यर्थदायिने मायिनेऽणव ॥ ५ ॥ स्थूलाय मूलभूताय शूलवारितविद्विषे ॥ कालहंत्रे नमश्चंद्रखंडमण्डितमौलये ॥ ६ ॥ दिग्वाससे

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करदांतभींताहिशरदिंदवे ॥ देवदैत्योरगेन्द्रादिमौलिघृष्टांघ्रये नमः ॥ ७ ॥ भस्मासक्ताय भक्ताय भुक्तिमुक्तिप्रदायिने ॥ सकद्व्यक्तस्व
रूपाय शंकराय नमोनमः ॥ ८ ॥ नमोंधकांतकरिपवेऽसुरद्विषे नमोस्तु ते द्विरदवरावभेदिने ॥ विषोल्लसत्फणिकुलबद्धमूर्तये नमः सदा
वृषवरवाहनाय ते ॥ ९ ॥ वियन्मरुद्दुतवहवायुकुंभिनीमखेशरव्यमृतमयूखमूर्तये ॥ नमः सदा नरकायावभेदिने भवेह नो भव भयभंग
कृद्विभो॥१०॥" इति रुद्र स्तवेन स्तुत्वा साष्टांगं प्रणम्य जपं कुर्यात् । अस्य पुरश्चरणं दशलक्षजपः।अयुतहोमः। तत्तद्दशांशेन तर्पणमार्ज
नब्राह्मणभोजनं च कुर्यात्। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत । "प्रयोगान् पूर्वमंत्रोक्तान्। कुर्वीतात्र दशाक्षरे॥
दशाक्षरं भजन् विप्रो रुद्रजापी भवेत्सदा ॥ १॥ एवमर्चन्महादेवं पंचांगन्यासपूर्वकम्॥दशाक्षरजपासक्तो न सीदेत्स्वेष्टसाधने॥ २॥मनोहराणि
गेहानि सुंदर्यो वामलोचनाः॥ धनमिच्छापूरणांतं लभते शिवसेवनात्॥ ३॥" इति मंत्रमहोदधिशांतिसारादिप्रोक्तं दशाक्षररुद्रमंत्रविधानम्॥
अथ त्वरितरुद्रमंत्रपुरश्चरणप्रयोगः॥(हेमाद्रिशांतिरत्नेषु) मंत्रो यथा । "ॐ यो रुद्रोग्नौयोऽप्सुय औषधीषुयोरुद्रो विश्वाभुवनाविवेश तस्मै
रुद्रायनमोस्तु" इत्येकत्रिंशदक्षरो मंत्रः। अस्य विधानम् । अस्य त्वरितरुद्रमंत्रस्य अथर्वण ऋषिः।अनुष्टुप्छंदः। त्वरितरुद्रसंज्ञको देवता।
नमः इति बीजम्। अस्तु इति शक्तिः।त्वरितरुद्रप्रीत्यर्थे जपे विनियोगः।ॐ आथर्वणर्षये नमः शिरसि॥ १॥अनुष्टुप्छंदसे नमः मुखे॥ २॥
त्वरितरुद्रसंज्ञक देवतायै नमः हृदि ॥३॥ नमः इति बीजाय नमः गुह्य॥४॥ अस्तु इति शक्त्यै नमः पादयोः ॥५॥ विनियोगाय नमः
सर्वाङ्गे ॥६॥ इति ऋष्यादिन्यासः ॥ ॐ योरुद्रः अंगुष्ठाभ्यां नमः॥ १॥ ॐ अग्नौ तर्जनीभ्यां नमः ॥ २ ॥ ॐ योऽप्सु मध्यमाभ्यां
नमः ॥ ३॥ ॐ य औषधीषु अनामिकाभ्यां नमः॥४॥ ॐ यो रुद्रोविश्वाभुवनाविवेश कनिष्ठिकाभ्यां नमः॥५॥ ॐ तस्मैरुद्रायनमोस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ॥ ॐ यो रुद्रो हृदयाय नमः ॥ १ ॥ ॐ अग्नौ शिरसे स्वाहा ॥ २ ॥ ॐ योऽप्सु शिखायै वषट् ॥ ३ ॥ ॐ य औषधीषु कवचाय हुं॥ ४ ॥ ॐ यो रुद्रो विश्वाभुवनाविवेश नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ तस्मै रुद्राय नमोस्तु अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ यः पादयोः ॥ १ ॥ ॐ रुद्रः जंघयोः ॥ २ ॥ ॐ अग्नौ जानुनोः ॥ ३ ॥ ॐ यः ऊर्वोः ॥ ४ ॥ ॐ अप्सु गुल्फयोः ॥ ५ ॥ ॐ यः मेढ्रे ॥ ६ ॥ ॐ औषधीषु नाभौ ॥ ७ ॥ ॐ यः उदरे॥ ८ ॥ ॐ रुद्रः हृदये ॥ ९ ॥ ॐ विश्वा कंठे ॥ १० ॥ ॐ भुवना मुखे ॥ ११ ॥ ॐ विवेश नासिकायाम् ॥ १२ ॥ ॐ तस्मै नेत्रयोः ॥ १३ ॥ ॐ रुद्राय भ्रुवोः ॥ १४ ॥ ॐ नमः ललाटे ॥ १५ ॥ ॐ अस्तु शिरसि ॥ १६ ॥ इति पदन्यासः ॥ ॐ यः शिरसि ॥ १ ॥ ॐ रुद्रः ललाटे ॥२॥ ॐ अग्नौ नेत्रयोः॥ ३॥ ॐ यः कर्णयोः॥४॥ ॐ अप्सु नासिकायाम् ॥ ५ ॥ ॐ यः मुखे ॥६॥ ॐ औषधीषु बाह्वोः ॥ ७ ॥ ॐ यः हृदये ॥ ८ ॥ ॐ रुद्रः नाभौ ॥९॥ ॐ विश्वा गुह्ये ॥ १० ॥ ॐ भुवना अपाने॥ ११ ॥ ॐ विवेश ऊर्वोः ॥ १२ ॥ ॐ तस्मै जानुनोः ॥ १३ ॥ ॐ रुद्राय जंघयोः ॥ १४ ॥ ॐ नमः गुल्फयोः ॥ १५ ॥ ॐ अस्तु चरणयोः ॥१६॥ इति वर्णन्यासः॥एवं न्यासं कृत्वा "ॐ एषतेरुद्रभागःसहस्वस्रांबिकयातंजुषस्व स्वाहा" इत्यादिमंत्रद्वारा शुभदामुद्रां[1] प्रदर्श्य ध्यानं कुर्यात् । अथ ध्यानं यथा । ॐ रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदाभयम् ॥ दधानमूर्ध्व हस्ताभ्यां शूलं डमरुमेव च ॥ १ ॥ अंकसंस्थामुमां पद्मे दधानं च करद्वये ॥ आद्ये करद्वये कुंभं मातुलुंगं च बिभ्रतम् ॥ २ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य भेदपक्षे

१ त्र्यंगुल्यग्राणि मूले तु कृत्वांगुष्ठेन पीडयेत । सा मुद्रा शुभदा प्रोक्ता सैव शांतिप्रदायिनी ॥ इति शुभदा मुद्रा ॥

३४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिवे पीठे गंधादिपूजनं कृत्वा अधःशाय्येकभक्ताशी जपं कुर्य्यात् । अस्य पुरश्चरण विंशतिसहस्रजपः । तत्तद्दशांशेन होमतर्पणमार्जन
ब्राह्मणभोजनं च कुर्य्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च । अधःशाय्येकभक्ताशी
ब्रह्मचारी हविष्यभुक् ॥ अयुते द्वे जपेत्सर्वं प्रत्यहं पूजयेच्छिवम् ॥ १ ॥ जुहुयात्तद्दशांशेन तद्दशांशेन तर्पणम् ॥ मार्जनं तद्दशांशेन
तद्दशांशेन भोजयेत् ॥ २ ॥ एवं कृते तु सिद्धिः स्यात्फलार्थं तु ततो जपेत् ॥ पुरश्चरणमेवं तु कृत्वा संपूज्य शंकरम् ॥ ३ ॥
जपेत्त्वरितरुद्रं तु सर्वकामसमृद्धये ॥ श्रीकामः शांतिकामो वा जपेल्लक्षमतंद्रितः ॥४॥ बिल्वसमिद्भिः श्रीकामः शांतिकामः शमीमयैः॥
जुहुयादाज्यसंमिश्रैस्तर्पणं मार्जनं ततः॥५॥जप्त्वा लक्षं सुपुत्रार्थी पायसं जहुयात्ततः॥ वित्तार्थी श्रीफलैर्होममायुष्कामस्तु दूर्वया ॥६॥
तिलैराज्येन संमिश्रैस्तेजस्कामो घृतेन वै॥व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः॥७॥ पायसं सर्वकामेन होतव्यं शर्करान्वितम् ॥ मध्व
क्तान्याम्रपत्राणि तीव्रज्वरविनाशिना॥८॥हिमभूतज्वरार्थं तु गुडूचीभिर्हुनेद् ध्रुवम्॥सर्वरोगविनाशाय सूर्यस्याभिमुखो जपेत्॥९॥अयुते द्वे
जपाहोमः कार्योर्कसमिधा शुभः॥औदुंबरैरन्नकामस्तेजस्कामस्तु बादरैः॥१०॥अपामार्गसमिद्धोमाद्भूतबाधा विनश्यति॥ग्रहबाधाविनाशाय
जपेदश्वत्थसन्निधौ ॥ ११ ॥ लवणान्वितदध्याक्तास्तीक्ष्णाग्राश्वत्थसंभवाः ॥ हूयंते समिधः शुष्काः स्वाहांतं मंत्रमुच्चरेत ॥ १२ ॥
दशपंचाहुतीर्हुत्वा गच्छगच्छेत्युदीरयेत् ॥ यावद्धोमो बलिर्देयः पुरुषाहारसम्मितः॥ १३ ॥ एवं कृते प्रमुच्येत पुमान् स्त्री वा महाग्रहात्॥
जुहुयाच्छतपत्राणि संहृष्टो जयमाप्नुयात् ॥ १४ ॥ लाजाहोमेन कन्यार्थी कन्यां प्राप्नोति रूपिणीम् ॥ लाजाश्च मधुसंमिश्राः श्वेतपुष्पा ॥१३३॥
णि वा पुनः ॥ १५ ॥ हूयंते हरिते देशे तस्य विश्वं वशे भवेत ॥ वामांगमुत्तमं कार्य्यं स्त्रीवशित्वे विचक्षणैः ॥ १६ ॥ हस्त्यश्वाम

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यशांत्यर्थं तिलैश्चाज्येन संयुतैः ॥ होमस्थाने तु संस्थाप्य कुंभमेकं जलान्वितम् ॥१७॥ मंत्रं जप्त्वा सहस्रं तु कुंभं स्पृश्य प्रयत्नतः॥ अभिषेकं तु तेषां वै शालां प्रोक्ष्य प्रदक्षिणम् ॥१८॥ ग्रहग्रामादिशांतिस्तु सर्वैः कार्या तु पूर्ववत् ॥ वास्तुपूजा प्रकर्तव्या प्राच्यां दिशि पदे शुभे ॥१९॥ ईशानाय बलिः कार्यः पशूनां पतये तथा ॥ एवं कृते पशूनां तु प्रजानां शांतिमाप्नुयात् ॥ २० ॥ अद्भुतेषु च सर्वेषु पशूनां ग्रामबाह्यतः॥ उपविश्य जपेद्रुद्रं त्वरितं बहुभिः सह॥२१॥ होमः पलाशसमिधाः कर्तव्यो घृतसंयुजाः॥ ईशानाय बलिः कार्य्यो यस्यां दिशि तदद्भुतम् ॥२२॥ तदाशापतये चैव पशूनां पतये तथा ॥ वृष्टिकामो जपेल्लक्षं तिलैर्होमो घृतान्वितैः ॥ २३ ॥ बलिपूजा प्रकर्तव्या शिवस्य वरुणस्य च॥ सर्वस्मिन्नपि चैवार्थे त्वरितस्य जपो भवेत्॥२४॥अयुतद्वयजाप्यैस्तु यावल्लक्षं ततोधिकम्॥एवं कृते तु सिद्धिः स्यान्निष्कामः प्राप्नुयाच्छिवम्॥२५॥ऐहिकामुष्मिकान्भोगान्भुक्त्वा सायुज्यमाप्नुयात्॥इत्येकत्रिंशदक्षरत्वरितरुद्रमंत्रपुरश्चरणम् ॥

॥ अथ दक्षिणामूर्त्तिमंत्रप्रयोगः ॥ अथ वक्ष्ये मंत्ररत्नं समस्तपुरुषार्थदम् ॥ अवाप्युर्येन जनेन दिव्यं ज्ञानं मुनीश्वराः ॥ १ ॥ तत्रादौ षट्त्रिंशदक्षरमंत्रप्रयोगः (शारदातिलके) मंत्रो यथा। "ॐ ह्रीं दक्षिणामूर्तये तुभ्यं वटमलनिवासिने ॥ ध्यानैकनिरतांगाय नमो रुद्राय शंभवे ह्रीं ॐ" इति षट्त्रिंशदक्षरमंत्रः॥ अस्य दक्षिणामूर्त्तिमंत्रस्य शुक ऋषिः । अनुष्टुप् छंदः । दक्षिणामूर्तिशंभुदेवता चतुर्विधपुरुषार्थसिद्धये जपे विनियोगः॥ ॐ शुकऋषये नमः शिरसि ॥१॥ अनुष्टुप्छंदसे नमः मुखे ॥२॥ दक्षिणामूर्तिशंभुदेवतायै नमः हृदि॥३॥ विनियोगाय नमः सर्वांगे ॥४॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं दक्षिणामूर्तये ह्रीं ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं तुभ्यं ह्रीं ॐ तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं वटमूलनिवासिने ह्रीं ॐ मध्यमाभ्यां नमः ॥३॥ ॐ ह्रीं ध्यानैकनिरतांगाय ह्रीं ॐ अनामिकाभ्यां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः ॥ ४ ॥ ॐ ह्रीं नमो रुद्राय ह्रीं ॐ कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रीं शंभवे ह्रीं ॐ करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रीं दक्षिणामूर्तये ह्रीं ॐ हृदयाय नमः ॥ १ ॥ ॐ ह्रीं तुभ्यं ह्रीं ॐ शिरसे स्वाहा ॥ २ ॥ ॐ ह्रीं वटमूलनिवासिने ह्रीं ॐ शिखायै वषट् ॥ ३ ॥ ॐ ह्रीं ध्यानैकनिरतांगाय ह्रीं ॐ कवचाय हुं ॥ ४ ॥ ॐ ह्रीं नमो रुद्राय ह्रीं ॐ. नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रीं शंभवे ह्रीं ॐ अस्त्राय फट् । इति हृदयादिषडंगन्यासः॥ ॐ ॐ नमः मूर्ध्नि ॥१॥ ॐ ह्रीं नमः भाले ॥२॥ ॐ दं नमः दक्षिणनेत्रे ॥ ३ ॥ ॐ क्षिं नमः वामनेत्रे ॥ ४ ॥ ॐ णां नमः दक्षिणकर्णे ॥ ५ ॥ ॐ मूं नमः वामकर्णे ॥ ६ ॥ ॐ र्तं नमः दक्षिणगंडे ॥७॥ ॐ यें नमः वामगंडे ॥८॥ ॐ तुं नमः नासिकयोः॥९॥ ॐ भ्यं नमः मुखे ॥१०॥ ॐ वं नमः दक्षिणहस्तमूले ॥ ११ ॥ ॐ टं नमः दक्षकूर्परे ॥ १२ ॥ ॐ मूं नमः दक्षिणमणिबंधे ॥ १३ ॥ ॐ लं नमः दक्षहस्तांगुलिमूले॥ १४ ॥ ॐ निं नमः दक्षहस्तांगुल्यग्रे ॥ १५ ॥ ॐ वां नमः वामहस्तमूले ॥ १६ ॥ ॐ सिं नमः वामकर्परे ॥ १७ ॥ ॐ नें नमः वाममणिबंधे ॥ १८ ॥ ॐ ध्यां नमः वामहस्तांगुलिमूले ॥ १९ ॥ ॐ नैं नमः वामहस्तांगुल्यग्रे ॥ २० ॥ ॐ कं नमः गले ॥ २१ ॥ ॐ निं नमः स्तनयोः ॥ २२ ॥ ॐ रं नमः हृदि ॥ २३ ॥ ॐ तां नमः नाभौ ॥ २४ ॥ ॐ गां नमः कट्याम् ॥ २५ ॥ ॐ यं नमः गुह्ये ॥ २६ ॥ ॐ नं नमः दक्षिणपादमूले ॥ २७ ॥ ॐ मों नमः दक्षिणजानुनि ॥२८॥ ॐ रुं नमः दक्षिणगुल्फे॥ २९ ॥ ॐ द्रां नमः दक्षिणपादमूले ॥ ३० ॥ ॐ यं नमः दक्षिणपादांगुल्यग्रे ॥ ३१ ॥ ॐ शं नमः वामपादमूले ॥ ३२ ॥ ॐ भं नमः वामजानुनि ॥३३॥ ॐ वें नमः वामगुल्फे ॥३४॥ ॐ ह्रीं नमः वामपादांगुलिमूले ॥३५॥ ॐ ॐ नमः वामपादांगुल्यग्रे॥ ३६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति मंत्रवर्णन्यासः ॥ ॐ ह्रीं दक्षिणामूर्तये तुभ्यं वटमूलनिवासिने ॥ ध्यानैकनिरतांगाय नमो रुद्राय शंभवे ह्रीं ॐ इति मंत्रेण मूर्धादि पादपर्यंतं व्यापकं न्यासं कुर्यात् । इति न्यासविधिं कृत्वा ध्यायेत्॥ॐ हिमाचलतटे रम्ये सिद्धकिन्नरसेविते॥ विविधद्रुमशाखाभिः सर्वतो वारितातपे ॥ १ ॥ सुपुष्पितैर्लताजालैराश्लिष्टकुसुमद्रुमैः ॥ शिलाविवरनिर्गच्छन्निर्झरानिलसेविते ॥ २ ॥ गायद्भृंगांगनासंवे नृत्यद्बर्हिकदंबके ॥ कूजत्कोकिलसंघेन मुखरीकृतदिङ्मुखे॥ ३ ॥ परस्परविनिर्मुक्तमात्सर्यमृगसेविते ॥ आद्यैः शुकाद्यैर्मुनिभिरजस्रं समधिष्ठिते ॥ ४ ॥ पुरंदरमुखैर्देवैः सेवायातैर्विलोकितम् ॥ वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम् ॥ ५ ॥ गारुत्मतमयैः पत्रैर्निबिडैरुपशोभितम् ॥ नवरत्नमयाकल्पैर्लंबमानैरलंकृतम् ॥ ६ ॥ सजलैः स्थलजैः पुष्पैरामोदिभिरलंकृतम् ॥ शृण्वद्भिर्वेदशास्त्राणि शुकवृन्दैर्निषेवितम् ॥ ७ ॥ संसारतापविच्छेदकुशलच्छायमद्भुतम् ॥ विचिंत्य तस्य मूलस्थे रत्नसिंहासने शुभे ॥ ८ ॥ आसीनममिताकल्पं शरच्चंद्रनिभाननम् ॥ स्तूयमानं मुनिगणैर्दिव्यज्ञानाभिलाषिभिः ॥ ९ ॥ संस्मरेज्जगतामाद्यं दक्षिणामूर्तिमव्ययम् ॥ १० ॥ कैलासाद्रिनिभं शशांकशकलस्फूर्जज्जटामंडितं नासालोकनतत्परं त्रिनयनं वीरासनाध्यासितम् ॥ मुद्राटंककुरंगजानुविलसत्पाणिं प्रसन्नाननं कक्षाबद्धभुजंगमं मुनिवृतं वंदे महेशं परम् ॥ ११ ॥इति ध्यात्वा शिवपंचाक्षरोदिते पीठे पीठपूजां विधाय तामेव आवरणपूजां च कृत्वा जपं कुर्यात् । अस्य पुरश्चरणमयुतद्वयाधिकं त्रिलक्षं जपः। तथा च । अयुतद्वयसंयुक्तं गुणलक्षं जपेन्मनुम् ॥ तद्दशांशं तिलैः शुद्धैर्जुहुयात्क्षीरसंयुतैः॥ १ ॥ पंचाक्षरोदिते पीठे विधानेन प्रपूजयेत् । उपचारैः समुत्पन्नैः पाद्याद्यैः परमेश्वरम् ॥२॥एवं कृतपुरश्चर्यः सिद्धमन्त्रो भवेत्सुधीः॥भिक्षाहारो जपेन्मासं मनुमेनं जितेंद्रियः ॥३॥ नित्यं सहस्रमष्टार्द्धं परं विंदति वाङ्मयम्॥त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत्॥४॥नित्यशो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणामूर्तिं ध्यायन्साधकसत्तमः ।। शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरांतरे ।। ५ ।। ब्राह्मीसैंधवसिद्धार्थवचाकोष्ठकणोत्पलैः ।। सुगंधिसंयुतैः कल्कैः श्रृतं ब्राह्मीरसे घृतम् ॥६॥ मनुनानेन संजप्तमयुतं साधु साधितम् ।। निपीतं कविताकांतिरक्षायुःश्रीधृतिप्रदम् ॥७॥ इति षट्त्रिंशदक्षरदक्षिणामूर्तिमंत्रप्रयोगः ।। अथ द्वाविंशत्यक्षरदाक्षिणामूर्तिमंत्रप्रयोगः ॥ (शारदातिलके) ॥ मंत्रो यथा । "ॐ नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रयच्छ स्वाहा ॥" इति द्वाविंशत्यक्षरो मंत्रः ॥ अस्य दक्षिणामूर्तिमंत्रस्य चतुर्मुख ऋषिः । गायत्री छन्दः । वेदव्याख्यानतत्परदक्षिणामूर्तिर्देवता । सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ चतुर्मुखर्षये नमः शिरसि ॥१॥ गायत्रीछन्दसे नमः मुखे ॥ २ ॥ दक्षिणामूर्तये देवतायै नमः हृदि ॥३ ॥ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति हृदयादिन्यासः ॥ ॐ आं ॐ अंगुष्ठाभ्यां नमः ॥ ॐ ईं ॐ तर्जनीभ्यां नमः ॥ २ ॥ ॐ ऊं ॐ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ऐं ॐ अनामिकाभ्यां नमः॥ ४ ॥ ॐ औं ॐ कनिष्ठिकाभ्यां नमः ॥५॥ ॐ अः ॐ करतलकरपृष्ठाभ्यां नमः॥६॥इति करन्यासः ॥ ॐ आं ॐ हृदयाय नमः॥१॥ ॐ ईं ॐ शिरसे स्वाहा ॥ २ ॥ ॐ ऊं ॐ शिखायै वषट् ॥ ३ ॥ ॐ ऐं ॐ कवचाय हुं ॥ ४ ॥ ॐ औं ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ अः ॐ अस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः ॥ इति न्यासविधिं कृत्वा पूर्ववत् वटमूलस्थं मंत्रदैवतं संचित्य ध्यायेत् ॥ स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्राः कराग्रैः ॥ दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥१॥ इति ध्यात्वा शिवपंचाक्षरोदिते पीठे पीठपूजां विधाय आवरणपूजां कुर्यात् । तत्र क्रमः । षट्कोणकेशरेषु अग्निकोणे ॐ आं ॐ हृदयाय नमः ॥ १ ॥ नैर्ऋते ॐ ईं ॐ शिरसे स्वाहा ॥ २ ॥ वायव्ये ॐ ऊं ॐ शिखायै वषट् ॥ ३ ॥ ॐ

१ यथा-ताररुद्धैस्स्वरैर्दीर्घैःपड्भिरंगानि कल्पयेत् । अथवा मन्त्रसंभूतैः पदैर्वा कल्पयेत्क्रमात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऐशान्ये ॐ ऐं ॐ कवचाय हुं ॥ ४ ॥ देवतापूर्वे ॐ औं ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ देवपश्चिमे ॐ अः ॐ अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततोऽष्टदले पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य प्राचीक्रमेण ॐ सरस्वत्यै नमः ॥ १ ॥ ॐ ब्रह्मणे नमः ॥ २ ॥ ॐ सनकाय नमः ॥ ३ ॥ ॐ सनन्दनाय नमः ॥ ४ ॥ ॐ सनत्कुमाराय नमः ॥ ५ ॥ ॐ शुकाय नमः ॥ ६ ॥ ॐ व्यासाय नमः ॥ ७ ॥ ॐ गणेशाय नमः ॥ ८ ॥ इति पूजयेत् । ततः भूपुराभ्यंतरे पूर्वादिचतुर्दिक्षु ॐ सिद्धाय नमः ॥ १ ॥ ॐ गंधर्वाय नमः ॥ २ ॥ ॐ योगींद्राय नमः ॥ ३ ॥ ॐ विद्याधराय नमः ॥ ४ ॥ इति पूजयेत् ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् । तद्बाह्ये वज्राद्यायुधानि च पूजयेत् । इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् अस्य पुरश्चरणं लक्षात्मको जपः । तथा च । लक्षमेकं जपेन्मंत्रं ब्रह्मचारिव्रते स्थितः ॥ जुहुयात्सघृतैः पद्मैर्दशांशं संस्कृतेऽनले ॥ १ ॥ इत्थं पूजादिभिः सिद्धे मंत्रेऽस्मिन्साधकोत्तमः ॥ यद्धमो जायते वाचां वाचस्पतिरि

दक्षिणामूर्त्तिपूजनयंत्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वापरः ॥ २ ॥ मंत्रेणानेन संजप्तैर्विशुद्धैः सलिलैः सुधीः ॥ अभिषिंचेत्स्वशिरसि श्रियमारोग्यमाप्नुयात् ॥ ३ ॥ कंठमात्रे जले स्थि
त्वा जपेन्मंत्रं सहस्रकम्॥ प्रत्यहं मंडलादर्वाक्कवीनामग्रणीर्भवेत्॥ ४॥ गौर्या पार्श्वस्थया सार्द्धं श्रीकामी चिंतयन्विभुम् ॥ अयुतं प्रजपेन्मंत्रं
भूयसीं श्रियमाप्नुयात् ॥ ५ ॥ भुंजानः प्रयतो मंत्री गोमूत्रे श्रृतमोदनम् ॥ भिक्षान्नमथ वा मंत्रमयुतद्वितयं जपेत् ॥ ६ ॥ अश्रुतान्वे
दशास्त्रादीन् व्याचष्टे नात्र संशयः ॥ सिद्धगंधर्वमुनिभिर्योगींद्रैरपि सेविते॥ ७॥ ज्ञानवागर्थिनां प्रोक्तौ कथितौ मंत्रनायकौ॥ इति द्वाविंशत्य
क्षरदक्षिणामूर्तिमन्त्रप्रयोगः॥ अथ पार्थिवलिंगविधानम्॥ (मंत्रमहोदधौ) अथ प्रातःकृत्यक्रिया । नद्यादौ स्नात्वा स्वासने प्राङ्मुख उदङ्मुखो
वोपविश्य आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रीमहादेवप्रसन्नार्थममुककामनार्थं वा अमुकसंख्यापरिमितपार्थिवलिंगपूजनं क
रिष्ये । इति संकल्प्य न्यासादिकं कुर्यात् । तद्यथा ॐ ह्रां पृथिव्यै नमः हृदयाय नमः॥ १॥ ॐ ह्रां पृथिव्यै नमः शिरसे स्वाहा॥ २॥ ॐ
ह्रां पृथिव्यै नमः शिखायै वषट् ॥ ३॥ ॐ ह्रां पृथिव्यै नमः कवचाय हुं॥ ४॥ ॐ ह्रां पृथिव्यै नमः नेत्रत्रयाय वौषट्॥ ५॥ ॐ ह्रां पृथिव्यै
नमः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवमेव करन्यासं कुर्यात् । ततो मृदमानीय शर्करा बहिष्कृत्य शुद्धपात्रे निधाय
'वं' इति सुधाबीजेन मृदमासिच्य पिंडं कृत्वाग्रे संस्थाप्य तस्मात्पलमृदं गृहीत्वा "ॐ ह्रींग्लौंगंग्लौंगं गणपतये ग्लौंगंह्रीं" इति मंत्रेण
बालगणेश्वरं कृत्वा पीठं संस्थाप्य लिंगं कुर्यात् । तद्यथा । " ॐ नमो हराय" इति मंत्रेण बिभीतकफलमात्रमृदं गृहीत्वा "ॐ नमो
महेश्वराय" इति मंत्रेण अंगुष्ठमानादधिकं वितस्तिमात्रावधि यथेष्टं लिंगं कृत्वा "ॐ नमः शूलपाणये" इति मंत्रेण पीठे लिंगं स्थापयेत् ।
एवं यथासंख्यं लिंगं कृत्वा अवशिष्टमृदा "ॐ ऐंहुँक्षुँक्रीं कुमाराय नमः" इति मंत्रेण कुमारं कृत्वा लिंगपंक्त्यंते संस्थाप्य प्रतिष्ठां च

For Private And Personal Use Only

कुर्यात्। ततः ॐ नमः पिनाकिने इहागच्छ इह तिष्ठ इति लिंगे शिवमावाह्य ध्यायेत्। अथ ध्यानम्। दक्षांकस्थं गजपतिमुखं प्रामृशन्द क्षदोष्णा वामोरुस्थं नगपतनयांके गुहं चापरेण ॥ इष्टाभीती परकरयुगे धारयन्निंदुकांतिमव्यादस्मांस्त्रिभुवननतो नीलकंठस्त्रिनेत्रः ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य पाद्यादिपूजनं कुर्यात्। तद्यथा। 'ॐ नमः पशुपतये' इति मंत्रेण स्नापयित्वा शतरुद्रियमंत्रेण अभिषेकं कुर्यात्। ततः 'ॐ नमः शिवाय' इति मंत्रेण गंधपुष्पधूपदीपनैवेद्यान्यर्पयेत। इति पूजां कृत्वावरणपूजां कुर्यात्। तद्यथा। पूर्वादिवामावर्तेन पूर्वे ॐ सर्वाय क्षितिमूर्तये नमः ॥ १ ॥ ऐशान्ये ॐ भवाय जलमूर्तये नमः ॥ २ ॥ उत्तरे ॐ रुद्राय तेजोमूर्तये नमः ॥ ३ ॥ वायव्ये ॐ उग्राय वायुमूर्तये नमः ॥ ४ ॥ पश्चिमे ॐ भीमायाकाशमूर्तये नमः ॥ ५ ॥ नैर्ऋत्ये ॐ पशुपतये यजमानमूर्तये नमः॥ ६ ॥ दक्षिणे ॐ महादेवाय चंद्रमूर्तये नमः ॥ ७ ॥ आग्नेये ॐ ईशानाय सूर्यमूर्तये नमः ॥ ८ ॥ इत्यष्टौ मर्तीः संपूज्य पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य तिस्रः प्रदक्षिणाः कृत्वा स्तुतिपाठेन स्तुत्वा ॐ "नमश्शिवाय" इति षडक्षरं यथाशक्ति जपित्वा ॐ नमो महादेवेति मंत्रेण विसृजेत्। ततो गणेशगुहौ स्वस्वमंत्राभ्यामेवाखि लोपचारैः संपूज्य विसृजेत्। तथा च। पूजयेत्कार्य्यवशतो लक्षावधि सहस्रतः ॥ लक्षपार्थिवलिंगानां पूजनाद्भुवि मुक्तिभाक् ॥ १ ॥ लक्षं तु गुडलिंगानां पूजनात्पार्थिवो भवेत ॥ या नारी गुडलिंगानि सहस्रं पूजयेत्सती ॥ २ ॥ भर्तुः सुखमखंडं सा प्राप्नोति पार्वती भवेत् ॥ नवनीतस्य लिंगानि संपूज्येष्टमवाप्नुयात् ॥ ३ ॥ भस्मनो गोमयस्यापि वालुकायास्तथा फलम् ॥ क्रीडंति पृथुका भूमौ कृत्वा लिंगं रजोमयम् ॥ ४ ॥ पूजयंति विनोदेन तेपि स्युः क्षितिनायकाः ॥ प्रातर्गोमयलिंगानि नित्यं यस्त्रीणि पूजयेत् ॥ ५ ॥

For Private And Personal Use Only

ब्रृहतीबिल्वयोः पत्रैर्नैवेद्यं गुडमर्पयेत् ॥ एवं मासत्रयं कुर्वन्ननल्पं लभते धनम् ॥६॥ एकादशैव लिंगानि गोमयोत्थानि यो यजेत् ॥
प्रातर्मध्याह्नयोः सायं निशीथे प्रतिवासरम् ॥ ७ ॥ स सर्वाः सम्पदो यायात् षण्मासादेवमाचरन् ॥ एकादश यजेन्नित्यं शालिपिष्ट
मयानि सः ॥ ८ ॥ लिंगानि मासमात्रेण स कल्मषचयं दहेत् ॥ स्फाटिकं पूजितं लिंगमेनोनिकरनाशनः ॥९ ॥ सर्वकामप्रदं पुंसा
मुदुंबरसमुद्भवम् ॥ रेवाश्मजं सर्वसिद्धिप्रदं दुःखविनाशनम् ॥१०॥ यथाकथंचिल्लिंगस्य पूजा नित्यकृतेष्टदा ॥ यो यजेत्पिचुमंदोत्थैः
पत्रैर्गोमयजं शिवम्॥ ११ ॥क्रुद्धं महेश्वरं ध्यायेत्स पराजयते रिपून्॥यो लिंगं पूजयेन्नित्यं शिवभक्तिपरायणः॥ १२ ॥मेरुतुल्योपि तस्याशु
पापराशिर्लयं व्रजेत्॥दोग्ध्रीणां तु गवां लक्षं यो दद्याद्वेदपाठिने ॥ १३ ॥ पार्थिवं योर्चयेल्लिंगं तयोर्लिंगार्चको वरः॥चतुर्दश्यां तथाष्टम्यां
पौर्णमास्यां विधुक्षये॥ १४ ॥पयसा स्नापयेल्लिंगं धरादानफलं व्रजेत्॥ लिंगपूजां विधायाग्रे स्तोत्रं वा शतरुद्रियम् ॥ १५ ॥ प्रजपेत्तन्मना
भूत्वा शिवे स्वं विनिवेदयेत् ॥ यत्संख्याकं यजेल्लिंगं तन्मितं होममाचरेत् ॥ १६ ॥ आज्यान्वितैस्तिलैरग्नौ घृतैर्वा पायसेन वा ॥ शिवमंत्रेण
तस्यांते ब्राह्मणान् भोजयेच्छतम् ॥ १७॥एवं कृते समस्तेष्टसिद्धिर्भवति निश्चितम् ॥ १८॥ इति पार्थिवलिंगपूजनविधानम् ॥ इति शिवपटलः
समाप्तः ॥ अथ शिवपूजापद्धतिप्रारम्भः ॥ तत्रादौ मंत्रानुष्ठानोपयोगि पूर्वकृत्यम् ॥ चन्द्रतारादिबलान्विते सुदिने सुमुहूर्ते तीर्थपुण्य
क्षेत्रनिर्जनस्थानादावनुष्ठानयोग्यभूमिपरिग्रहणं कृत्वा तत्र मार्जनदहनखननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य जप
स्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रमाहारविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्म्मशोधनं कुर्य्यात्॥ततः पुरश्चरणात्प्राक्
तृतीयदिवसे क्षौरादिकं विधाय ततः प्रायश्चित्तांगभूतविष्णुपूजाविष्णुतर्पणविष्णुश्राद्धं होमं चांद्रायणादिव्रतं च कुर्य्यात् । व्रताशक्तौ

१–भद्रकंडेया । २ पापसमूहनाशनः । ३ 'ॐ नमः शिवाय' इति मंत्रेण होमयेत् ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोदानं द्रव्यदानं च कुर्य्यात् । यदि सर्वकर्मणामशक्तौ ततः प्रायश्चितांगभूतपंचगव्यप्राशनं कुर्य्यात् । तत्र मंत्रः । ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात् पंचगव्यस्य दहत्यग्निरिवेन्धनम् ॥ १ ॥ मूलं पठित्वा प्रणवेन पंचगव्यं पिबेत् ॥ तद्दिने उपवासः कर्त्तव्यः। अशक्तश्चेत् पयःपानं हविष्यान्नेनैकभक्तव्रतं वा कुर्यात् । पुरश्चरणात्पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थं चायुत गायत्रीजपं कुर्य्यात् । तद्यथा । देशकालौ संकीर्त्य ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणशिवपुरश्चरणाधिकारार्थममुकमंत्रसिद्ध्यर्थं च गायत्र्यायुतजपमहं करिष्ये । इति संकल्प्य गायत्र्यायुतं जपेत् । ततो गायत्र्याचार्य्यर्षिं विश्वामित्रं तर्पयामि ॥ १ ॥ गायत्रीछंदस्तर्पयामि ॥ २ ॥ सवितारं देवं तर्पयामि ॥ ३ ॥ इति तर्पणं कृत्वा ततस्तस्यां रात्रौ देवतोपास्ति शुभाशुभस्वप्नं च विचारयेत् । तद्यथा । स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं स्थित्वा वृषभध्वजं प्रार्थयेत् । तत्र मंत्रः । "ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वतः ॥ १ ॥ ॐ नमोऽजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः॥ २ ॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥३॥ इति मंत्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य निद्रां कुर्य्यात् । ततः स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् । अथ वा स्वयं स्वप्नं विचारयेत्॥इति पूर्वकृत्यम्॥

१ लिंगं चन्द्रार्कयोर्बिंबं भारती जाह्नवी गुरु । रक्ताभ्रितरणं युद्धे जयोऽनलस्यमर्चनम् ॥ १ ॥ शिखिहंसरथांगाह्वे रथे स्थानं च मोहनम् । आरोहणं सारसस्य धरालाभश्च निम्नगां ॥ २ ॥ प्रासादः स्यंदनः पद्म छत्रं कन्या द्रुमः फली ॥ नागो दीपो हयः पुष्पं वृषभोश्वश्च पर्वतः ॥ ३ ॥ सुरापदो ग्रहास्तारा नारी सूर्श्चादयोप्सराः ॥ हर्म्यशैलविमानानामारोहो गगने गमः ॥ ४ ॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् ॥ दध्योदनादनं राज्याभिषेको गोवृषध्वजौ ॥ ५ ॥ सिंहः सिंहासनं शंखो वादित्रं रोचनादिभिः ॥ चंदनं दर्पणश्चैषां स्वप्ने संदर्शनं शुभम् ॥ ६ ॥ तैलाभ्यक्तः कृष्णवर्णो नग्नो नागर्तवायसौ ॥ शुष्कः कंटकिवृक्षश्च चांडालो दीर्घकंधरः ॥ ७ ॥ प्रासादस्तलहीनश्च नैते स्वप्ने शुभावहाः ॥ इति विचारयेत् ॥

For Private And Personal Use Only

अथ प्रातःकृत्यम् पुरश्चरणादिवसे श्रीमत्साधकेन्द्रः प्रातःकालात्पूर्वे दण्डद्वयात्मके ब्राह्मे मुहूर्ते चोत्थाय निद्रास्थानाद्वहिर्निर्गत्य हस्तौ पादौ प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्यान्यवस्त्रं परिधाय शुद्धासन उपविश्य शिरसि सहस्रदलपंकजे कोटींदुप्रकाशपीठे श्रीगुरुं ध्यायेत् ॥ "आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम्॥ योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य "प्रातःप्रभृति सायांतं सायादि प्रातरंततः॥ यत्करोमि जगन्नाथ तदस्तु तव पूजनम्॥ १॥" इत्यनेन मंत्रेण सर्वं गुरवे विनिवेद्य तदाज्ञां गृहीत्वा शिवप्रातःस्मरणं कुर्यात् ॥ शिवप्रातःस्मरणं यथा-"प्रातःस्मरामि भवभीतिहरं सुरेशं गङ्गाधरं वृषभवाहनमम्बिकेशम् ॥ खट्वांगशूलवरदाभयहस्तमीशं संसाररोगहरमौषधमद्वितीयम् ॥ १ ॥ प्रातर्भजामि गिरिशं गिरिजार्धदेहं सर्गस्थितिप्रलयकारणमादिदेवम् ॥ विश्वेश्वरं विजितविश्वमनोभिरामं संसाररोगहरमौषधमद्वितीयम् ॥ २ ॥ प्रातर्भजामि शिवमेकमनंतमाद्यं वेदांतवेद्यमखिलं पुरुषं महांतम् ॥ नामादिभेदरहितं षडभावशून्यं संसाररोगहरमौषधमद्वितीयम् ॥ ३॥ प्रातः समुत्थाय शिवं विचिंत्य श्लोकत्रयं येऽनुदिनं पठंति ॥ ते दुःखजातं बहुजन्मसंचितं हित्वा पदं यांति तदेव शम्भोः ॥४॥" इति प्रातःस्मरणं कृत्वा गुरुमंत्रदेवतात्मनामैक्यं विभाव्य अजपाजपं गुरुं समर्पयेम् ॥ अथाजपाजपसंकल्पः संक्षेपतः । "आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के ॥ वासांते वालमध्ये डफकठसहिते आदियुक्ते स्वराणां हंक्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ १ ॥ षट्शतं तु गणेशस्य षट्सहस्रं प्रजापतेः ॥ षट्सहस्रं गदापाणेः षट्सहस्रं पिनाकिनः ॥ २ ॥ आत्मनस्तत्सहस्रं च सहस्रं परमात्मनः ॥ सहस्रं श्रीगुरुभ्यश्च ह्येतानि विनियोजयेत् ॥ ३ ॥ हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शंभुः॥ हंसोपि जीवः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमात्महंसो हंसो गुरुर्हंसमयश्च शंभुः ॥ ४ ॥'' इति पठित्वा अहोरात्रोच्चरितं षट्शताधिकमेकविंशतिसहस्रमुच्छ्वासनिःश्वासात्मकमजपा गायत्रीमंत्रजपं श्रीगणेशब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुभ्यो यथासंख्यं समर्पयामि ॥ इत्युक्त्वाऽष्टोत्तरशतावृत्तिं हंसगायत्रीं जपेत् ॥ हंसगायत्रीमंत्रो यथा।हरिः''ॐ हंसोहंसस्यविद्महेहंसोहंसस्यधीमहि॥हंसोहंसःप्रचोदयात्।''इति जपित्वा ॐ'' त्रैलोक्यचैतन्यमयि त्रिशक्ते श्रीविश्वमातर्भवदाज्ञयैव॥प्रातःसमुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयामि॥''इति संप्रार्थ्य भूमिं प्रार्थयेत्॥तत्र मंत्रः। ''ॐ समुद्रमेखले देवि पर्वतस्तनमंडले॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥''इति भूमिं प्रार्थ्य श्वासानुसारेण भूमौ पदं दत्त्वा बहिर्व्रजेत् । इति प्रातः कृत्यम्॥ततो ग्रामाद्बहिर्नैर्ऋत्यकोणे जनवर्जिते देशे उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरःप्रावृत्य मलमोचनं कृत्वा मृत्तिकया जलेन यथा संख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गंडूषं च कृत्वा दंतधावनं कुर्यात्॥ तद्यथा । आम्रचंपकापामार्गाद्यन्यतमस्य द्वादशांगुलं दंतकाष्ठं गृहीत्वा प्रार्थयेत् । ''ॐ आयुर्बलं यशो वर्चः प्रजापशुधनानि च ॥ श्रियं प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥ १ ॥ इति संप्रार्थ्य ॐ 'ह्रीं तडिति स्वाहा' इति मंत्रेण काष्ठं छित्त्वा ॐ 'क्लींकामदेवाय सर्वजनप्रियाय नमः' इत्यनेन दंतान् संशोध्य 'ऐं' मंत्रेण जिह्वामु ल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्ऋत्यां शुद्धदेशे निःक्षिपेत् ॥ ततो मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्यात् ॥ तद्यथा । गंगायमुनाद्यभावे नदीतडागादिकं गत्वा सर्वदेवोपयोगिपद्धतिमार्गेण तीर्थस्नानं मंगलस्नानं च कुर्यात् । अशक्तश्चेद्गृहस्नानं कुर्यात् । तत्र प्रयोगः । तात्कालि कोद्धृतोदकेन उष्णोदकेन वा स्नानं कृत्वा न तु पर्युषितशीतोदकेन । तद्यथा । ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् । तत्र मंत्रः। ''ॐ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ १ ॥ ॐ गंगे च यमुने चैव गोदावरि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सरस्वति ॥ नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु ॥२॥ आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि ॥ एहि गंगे नमस्तुभ्यंसर्वतीर्थ समन्विते॥ ३॥ "इति मंत्रेण तीर्थान्यावाह्य ॐ "ऋतं च सत्यम्" इति मंत्रेणाभिमंत्र्य स्नायात् । एवं स्नात्वा शुष्कं शुभं कर्पासोत्पन्नवस्त्रं परिधाय सूर्यायार्घ्यं दद्यात् । तत्र मंत्रः । "ॐ एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते॥ १॥" इति मंत्रेणार्घ्यं दत्वा स्नायी वस्त्रं परिपीड्याचम्य शैवं पंचत्रिपुंड्रं वैष्णवं द्वादशोर्ध्वपुंड्रं च तिलकं सर्वदेवोपयोगिपद्धतिमार्गेण कुर्यात् । इति तिलकं कृत्वा नित्यनैमित्तिकं समाप्य द्वारपूजनं कुर्यात् । अथ द्वारपूजनम् । गृहद्वारमागत्य मूलेन फडिति द्वारं संप्रोक्ष्य दक्षिणशाखायाम् । ॐ गं गणपतये नमः॥ १॥ ॐ दुं दुर्गायै नमः ॥२॥ वामशाखायाम् ॐ वं वटुकाय नमः॥ ३॥ ॐ क्षं क्षेत्रपालाय नमः॥ ४॥ द्वारोपरि ॐ सं सरस्वत्यै नमः ॥ ५ ॥ देहल्याम् ॐ सुदर्शनायास्त्राय फट् ॥ ६ ॥ इति पूजयेत् । इति द्वारपूजनं कृत्वा क्षेत्रं कीलयेत् । तथा च जपस्थाने गत्वा "ॐ गृहीतस्यास्य मंत्रस्य पुरश्चरणसिद्धये॥ मयेयं गृह्यते भूमिर्मंत्रोयं सिद्धिमेति च॥ १॥ "इति मंत्रेणभूमिं संग्राह्य अश्वत्थोदुंबरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दश कीलान् "ॐ नमः सुदर्शनायास्त्राय फट्" । इति मंत्रेणाष्टोत्तरशताभिमंत्रितान् ॥"ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु ॥ १॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥२॥" इति मंत्रेण दशदिक्षु दश कीलान् निखनेत् । ततस्तेषु "ॐ सुदर्शनायास्त्राय फट्" इति मंत्रेण प्रत्येकं कीलान् संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिदशदिक्पालानावाह्य पंचोपचारैः संपूज्य जपस्थानमध्ये गणेशकूर्मानंतवसुधाक्षेत्रपालांश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालगणपतिभ्यश्च माषभक्तबलिं दत्वा तद्बाह्ये भूतबलिं दद्यात् । तत्र मंत्रः। "ये रौद्रा रौद्रकर्मा ॥ १३९ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णो रौद्रस्थाननिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च मे ॥ १ ॥ भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः ॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥ २ ॥" इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दद्यात् । ततो वामकरांगुलिभिरर्घ्यजलेनोत्सृज्य पुष्पांजलिं गृहीत्वा "ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ संतोषमासाद्य व्रजंतु सर्वे क्षमंतु नान्यत्र नमोस्तु तेभ्यः॥ १ ॥" इति पुष्पांजलिं दत्वा हस्तपादौ प्रक्षाल्याचमेत् ॥ इति क्षेत्रकीलनम् । अथ प्रयोगविधानम् । " ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ १ ॥" इति मंत्रेण मण्डपांतरं प्रोक्ष्य तत्र तावदासनभूमौ कूर्मशोधनं कार्यम् । यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य तत्रैव जपं दीपस्थापनं च कुर्यात् । यत्र बहवः जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् । एवं कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा तत्र ॐ कूर्माय नमः ॥ १ ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥ २ ॥ ॐ पृथिव्यै नमः ॥ ३ ॥ इति गंधाक्षतपुष्पैः संपूज्य तदुपरि कुशासनं तदुपरि मृगाजिनं तदुपरि कंबलासनमास्तीर्य्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण ॐ अनन्तासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥ इति मंत्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् । एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य आसनं शोधयेत् । तद्यथा । ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता । सुतलञ्छन्दः । आसने विनियोगः। "ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ १ ॥" इति मंत्रेणासनं प्रोक्षयेत् । ततः मूलेन शिखां बद्ध्वा ॐ केशवाय नमः ॥ १ ॥ ॐ नारायणाय नमः ॥ २ ॥ ॐ माधवाय नमः ॥ ३ ॥ इति त्रिराचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रः श्रीअमुक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवशर्माहं स्वमहादेवामुकमंत्रसिद्धिप्रतिबंधकाऽशेषदुरितक्षयपूर्वकामुकमंत्रसिद्धिकामोऽद्यारभ्य यावता कालेन सेत्स्यति तावत्कालपर्यन्त ममुकमंत्रस्य इयत्संख्याजपतद्दशांशहोमतद्दशांशतर्पणतद्दशांशमार्जनतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनरूपपुरश्चरण (केवलजपरूपपुरश्चरणं वा) महं करिष्ये । इति संकल्प्य। "ॐ सुदर्शनायास्त्राय फट्" इति मंत्रेण तालत्रयं दिग्बंधनं कुर्यात्। ततो भूतशुद्धिं स्वप्राणप्रतिष्ठामंतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा प्रयोगोक्तन्यासान् कुर्यात । अथ पीठपूजनम् । पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमण्डले वा स्ववामे श्रीगुरुभ्यो नमः ॥ १ ॥ दक्षिणे ॐ गणपतये नमः ॥ २ ॥ मध्ये स्वेष्टदेवतायै नमः ॥ ३ ॥ इति नत्वा पीठमध्ये ॐ मं मंडूकाय नमः ॥ १ ॥ ॐ कं कालाग्निरुद्राय नमः ॥ २ ॥ ॐ अं आधारशक्तये नमः ॥ ३ ॥ ॐ कूं कूर्माय नमः ॥ ४ ॥ ॐ अं अनन्ताय नमः ॥ ५ ॥ ॐ पृं पृथिव्यै नमः ॥ ६ ॥ ॐ क्षीं क्षीरसागराय नमः ॥ ७ ॥ ॐ रं रत्नदीपाय नमः ॥ ८ ॥ ॐ रं रत्नमंडपाय नमः ॥ ९ ॥ ॐ कं कल्पवृक्षाय नमः ॥ १० ॥ ॐ रं रत्नवेदिकायै नमः ॥ ११ ॥ ॐ रं रत्नसिंहासनाय नमः ॥ १२ ॥ इति पूजयेत् । आग्नेय्याम् ॐ धं धर्म्माय नमः ॥ १३ ॥ नैर्ऋत्याम् ॐ ज्ञां ज्ञानाय नमः ॥ १४ ॥ वायव्याम् ॐ वैं वैराग्याय नमः ॥ १५ ॥ ऐशान्याम् ॐ ऐं ऐश्वर्य्याय नमः ॥ १६ ॥ पूर्वे ॐ अं अधर्म्माय नमः ॥ १७ ॥ दक्षिणे ॐ अं अज्ञानाय नमः ॥ १८ ॥ पश्चिमे ॐ अं अवैराग्याय नमः ॥ १९ ॥ उत्तरे ॐ अं अनैश्वर्य्याय नमः ॥ २० ॥ पुनः पीठमध्ये ॐ आं आनन्दकन्दाय नमः ॥ २१ ॥ ॐ सं संविन्नालाय नमः ॥ २२ ॥ ॐ सं सर्वतत्त्वकमलासनाय नमः ॥ २३ ॥ ॐ मं प्रकृतिमयपत्रेभ्यो नमः ॥ २४ ॥ ॐ विं विकारमयकेसरेभ्यो

For Private And Personal Use Only

नमः ॥ २५ ॥ ॐ पं पञ्चाशद्वर्णाढ्यकर्णिकाभ्यो नमः ॥ २६ ॥ ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः ॥ २७ ॥ ॐ सों सोममण्डलाय षोडशकलात्मने नमः ॥ २८ ॥ ॐ वं वह्निमण्डलाय दशकलात्मने नमः ॥ २९ ॥ ॐ सं सत्त्वाय नमः ॥ ३० ॥ ॐ रं रजसे नमः ॥ ३१ ॥ ॐ तं तमसे नमः ॥ ३२ ॥ ॐ आं आत्मने नमः ॥ ३३ ॥ ॐ पं परमात्मने नमः ॥ ३४ ॥ ॐ अं अंतरात्मने नमः ॥ ३५ ॥ ॐ ह्रीं ज्ञानात्मने नमः ॥ ३६ ॥ ॐ मं मायातत्त्वाय नमः ॥ ३७ ॐ कं कलातत्त्वाय नमः ॥ ३८॥ ॐ विं विद्यातत्त्वाय नमः ॥ ३९ ॥ ॐ पं परतत्त्वाय नमः ॥ ४० ॥ इति मण्डूकादिपरतत्त्वांतपीठदेवताः संपूज्य प्रयोगोक्तनवपीठशक्तीः पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य आसनमंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां च कुर्यात् । तद्यथा । देशकालौ संकीर्त्य मम महादेवनूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठां करिष्ये । इति संकल्प्य प्रतिष्ठां कुर्यात् । अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि च्छन्दांसि । क्रियामयवपुःप्राणाख्या देवताः । आं बीजम् । ह्रीं शक्तिः। क्रौं कीलकम् । अस्य नूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठापने विनियोगः । इति जलं क्षिपेत् । ततः करेणाच्छाद्य ॐ आं ह्रीं क्रौं यँरँलँवँशँषँसँहँसः सोहँ अस्य महादेवसपरिवारयंत्रस्य प्राणा इह प्राणाः। पुनः ॐ आंह्रींक्रौंयँरँलँवँशँषँसँहँसः सोहँ अस्य महादेवसपरिवारयंत्रस्य जीव इह स्थितः । पुनः ॐ आंह्रींक्रौंयँरँलँवँशँषँसँहँसः सोहँ अस्य महादेवसपरिवारयंत्रस्य सर्वेन्द्रियाणि इह स्थितानि । पुनः ॐ आंह्रींक्रौंयँरँलँवँशँषँसँहँसः सोहँ अस्य महादेवसपरिवारयंत्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु नमः स्वाहा । इति प्राणान् प्रतिष्ठाप्य यः प्राणतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निमिषतोमहित्वेविधेमइतिमन्निति त्रिवारं पठेत् । मनोजूतिर्जुषता सुप्रतिष्ठा प्रतिष्ठा । इत्युक्त्वा संस्कारसिद्धये पंचदशप्रणवावृत्तीः कृत्वा
अनेन महादेवसपरिवारयंत्रस्य गर्भाधानादिपंचदशसंस्कारान्संपादयामि इति वदेत् । ततः ॐ यंत्रराजाय विद्महे महायंत्राय धीमहि
तन्नो यंत्रः प्रचोदयात् ॥ इत्यष्टोत्तरशतकृत्वोऽभिमंत्र्य पाद्यादिपूजनं कुर्यात् ॥ अथ पाद्यादिपूजनम् ॥ आयाहि भगवञ्शंभो
शर्व त्वं गिरिजापते ॥ प्रसन्नो भव देवेश नमस्तुभ्यं हि शङ्कर ॥ इत्यावाहनम् ॥ १ ॥ विश्वेश्वर महादेव राजराजेश्वरप्रिय ॥ आसनं
दिव्यमीशान दास्येहं तुभ्यमीश्वर ॥ इत्यासनम् ॥ २ ॥ ॐ स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परि
पालय ॥ इति सुस्वागतम् ॥ ३ ॥ ॐ महादेव महेशान महादेव परात्पर ॥ पाद्यं गृहाण मद्दत्तं पार्वतीसहितेश्वर ॥ इति पाद्यम् ॥४॥
त्र्यंबकेश सदाचार जगदादिविधायक ॥ अर्घ्यं गृहाण देवेश सांब सर्वार्थदायक ॥ इत्यर्घ्यम् ॥ ५ ॥ ॐ त्रिपुरांतक दीनार्तिनाशिञ्छ्री
कण्ठ शाश्वत ॥ गृहाणाचमनीयं च पवित्रोदककल्पितम् ॥ इत्याचमनीयम् ॥ ६ ॥ ॐ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः ॥ स्नापितोऽसि
मया देव तथा शांतिं कुरुष्व मे ॥इति जलस्नानम् ॥ ७ ॥ ॐ मधुरं गोपयः पुण्यं पटपूतं पुरस्कृतम् ॥ स्नानार्थं देवदेवेश गृहाण परमेश्वर ॥ इति
पयःस्नानम् ॥ ८ ॥ दुर्लभं दिवि सुस्वादु दधि सर्वप्रियं परम् ॥पुष्टिदं पार्वतीनाथ स्नानाय प्रतिगृह्यताम् ॥ इति दधिस्नानम् ॥ ९ ॥ ॐ घृतं गव्यं
शुचि स्निग्धं सुसेव्यं पुष्टिमिच्छताम् ॥ गृहाण गिरिजानाथ स्नानाय चंद्रशेखर ॥ इति घृतस्नानम् ॥ १० ॥ ॐ मधुरं मृदु मोहघ्नं स्वरभङ्ग
विनाशनम् ॥ महादेवेदमुत्सृष्टं तव स्नानाय शंकर ॥ इति मधुस्नानम् ॥ ११ ॥ ॐ तापशांतिकरी शीता मधुरा स्वादुसंयुता ॥
स्नानार्थं देवदेवेश शर्करेयं प्रदीयते ॥ इति शर्करोदकस्नानम् ॥ १२ ॥ ॐ गंगा गोदावरी रेवा पयोष्णी यमुना तथा ॥ सरस्वत्यादि

For Private And Personal Use Only

तीर्थानि स्नानार्थं प्रतिगृह्यताम् ॥ इति शुद्धोदकस्नानम् ॥ १३ ॥ इति स्नापयित्वा शतरुद्रियद्वारा अभिषेकं कुर्यात् ॥ ॐ वस्त्राणि पट्टकूलानि विचित्राणि नवानि च ॥ मयानीतानि देवेश प्रसन्नो भव शंकर ॥ इति वस्त्रम् ॥ १४ ॥ ॐ सौवर्णं राजतं ताम्रं कर्पासस्य तथैव च ॥ उपवीतं मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥ इत्युपवीतम् ॥ १५ ॥ ॐ सर्वेश्वर जगद्वंद्य दिव्यासनसमास्थित ॥ गंधं गृहाण देवेश चंदनं प्रतिगृह्यताम् ॥ अंगुष्ठः कनिष्ठामूललग्नो गंधमुद्रा । इति गंधम् ॥ १६ ॥ ॐ अक्षताश्च सुरश्रेष्ठ शुभ्रा धौताश्च निर्मलाः॥मया निवेदिता भक्त्या गृहाण परमेश्वर॥ सर्वांगुलीभिर्दद्यात् । इत्यक्षताः॥ १७॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो॥ मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥ तर्जन्यावंगुष्ठमूललग्ने पुष्पमुद्रा ॥ इति पुष्पम् ॥ १८ ॥ ॐ बिल्वपत्रं सुवर्णेन त्रिशूलाकारमेव च ॥ मयार्पितं महादेव बिल्वपत्रं गृहाण मे ॥ इति बिल्वपत्रम् ॥ १९ ॥ इति पुष्पांतैरुपचारैः संपूज्य विशेषफलकांक्षी सहस्रनामभिः प्रत्येकनाम्ना पुष्पबिल्वपत्रद्वारा शिवं पूजयेत्॥ततः प्रयोगोक्तावरणपूजां कृत्वा धूपादिपूजनं कुर्यात् । अथ धूपादिपूजनम्॥ फडिति धूपपात्रं संप्रोक्ष्य नम इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय 'रं' इति वह्निबीजेन उपरि अग्निं संस्थाप्य तदुपरि मूलेन दशांगं दत्त्वा घंटां वादयन् ॐ वनस्पतिरसोत्पन्नो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ सांगाय सपरिवाराय श्रीमहादेवाय धूपं समर्पयामि । इति पठित्वा देवस्य वामभागे धूपपात्रं निधाय तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा तां प्रदर्शयेत् । इति धूपम्॥ ॥ २० ॥ ततो दीपपात्रं गोघृतेनापूर्य मंत्राक्षरतंतुभिर्वर्तीं निक्षिप्य 'ॐ' इति प्रणवेन प्रज्वाल्य घंटां वादयन् नेत्रादिपादपर्यंतं दीपं प्रदर्शयेत् । तत्र मंत्रः ॐ आज्याक्तवर्तिसंयुक्तं वह्निना दीपितं तु यत्॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ सांगाय सपरिवाराय

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महादेवाय दीपं समर्पयामि । इति पठित्वा देवस्य दक्षिणभागे निधाय ततः शंखजलमुत्सृज्य मध्यमांगुष्ठलग्नां दीपमुद्रां प्रदर्शयेत् । इति दीपम् ॥ २१ ॥ ततो देवस्याग्रे देवदक्षिणतो वा जलेन चतुरस्रमंडलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं संस्थाप्य तन्मध्ये षड्रसोपेतं विविधप्रकारं वा नैवेद्यं निधाय 'ॐ ह्रीं नमः' इति मंत्रेणार्घ्यजलेन प्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपारि तादृशं वामं निधाय नैवेद्यमाच्छाद्य (ॐ यं) इति वायुबीजेन षोडशधा संजप्य वायुना तद्गतदोषान् संशोष्य दक्षिणकरतले तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ रं) इति वह्निबीजेन षोडशवारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा वामकरतले अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ वँ) इति सुधाबीजं षोडशवारं संजप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य देवस्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा "ॐ अपूपानि च पक्वानि मण्डका वटकानि च ॥ पायसं सूपमन्नं च नैवेद्यं प्रतिगृह्यताम् ॥" सांगाय सपरिवाराय श्रीमहादेवाय नमः । नैवेद्यं समर्पयामि ॥ इति भूतले देवदक्षिणकरे जलं क्षिप्त्वा वामहस्तेन अनामामूलयोरंगुष्ठयोगे ग्रासमुद्रां प्रदर्श्य देवं भुक्तवंतं विभाव्य जलं दद्यात् ॥ २२ ॥ तद्यथा । ॐ नमस्ते देवदेवेश सर्वतृप्तिकरं वरम् ॥ परमानंदपूर्ण त्वं गृहाण जलमुत्तमम् ॥ ॐ सांगाय सपरिवाराय श्रीमहादेवाय नमः । जलं समर्पयामि । इति मंत्रेण स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य देवेन तज्जलं प्राशितमिति भावयन् अंतःपटं दत्त्वा देवकीर्तनं कर्यात् ॥ २३ ॥ ॐ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥ इत्याचमनम् ॥ २४ ॥ इत्याचमनं दत्त्वा मूलेन गंडूषार्थं जलं दद्यात् ॥ ॐ कर्पूरा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीनि द्रव्याणि सुगंधीनि महेश्वर ॥ गृहाण जगतां नाथ करोद्वर्तनहेतवे ॥ इति करोद्वर्तनम् ॥ २५ ॥ ॐ कूष्मांडं मातुलुगं च नारिकेलफलानि च ॥ गृहाण पार्वतीकांत सोमशेखर शंकर ॥ इति फलानि ॥ २६ ॥ ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ गृहाण देवदेवेश द्राक्षादीनि सुरेश्वर॥ इति तांबूलम्॥ २७ ॥ ॐ हिरण्यगर्भगर्भस्थं हेमबीजसमन्वितम्॥ पंचरत्नं मया दत्तं गृह्यतां वृषभध्वज ॥ इति द्रव्यम्॥ २८॥ "ॐ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥" इति कर्पूरार्तिक्यम्॥ २९॥ ॐ हर विश्वाखिलाधार निराधार निराश्रय ॥ पुष्पांजलिं गृहाणेश सोमेश्वर नमोस्तुते ॥ इति पुष्पांजलिः ॥ ३० ॥ " ॐ यानि कानि च पापानि जन्मांतरकृतानि वै ॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदेपदे ॥ इति पठित्वा तिस्रः प्रदक्षिणाः दद्यात्॥ ३१॥ "ॐ हेतवे जगतामेव संसारार्णवसेतवे ॥ प्रभवे सर्वविद्यानां शंभवे गुरवे नमः ॥ ३२ ॥ " इति वदन् साष्टांगं प्रणमेत् ॥ इति साष्टांगं प्रणम्य पुष्पांजलिं च दत्त्वा स्तुतिपाठेन स्तुत्वा बद्धांजलिः प्रार्थयेत् । तद्यथा । "ज्ञानतोऽज्ञानतो वाऽथ न मया क्रियते शिव ॥ मम कृत्यमिदं सर्वमेतदेव क्षमस्व मे ॥ १ ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥ २ ॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना॥ ३ ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं शिव॥ ४॥" इति संप्रार्थ्य "यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम्॥ निवेदितं च नैवेद्यं गृहाणाथानुकंपय॥ ५॥" इति पठित्वा देवस्य दक्षिणकरे पूजार्पणजलं दत्त्वा सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान् कुर्यात् । अशक्तश्चेत्साधारणं कुर्यात् । तद्यथा । मूलेन मालां संप्रोक्ष्य गंधादिभिस्संपूज्य ध्यायेत् । "ॐ ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मान्मे सिद्धिदा भव ॥ १ ॥ इति संप्रार्थ्य । ॐ अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा ॥ " इति मंत्रेण दक्षिहणस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् यथाशक्ति प्रातः कालमारभ्य मध्यंदिनं यावत् मूलमंत्रं जपेत् । नित्यशः समाना जपाः कार्या न तु न्यूनाधिकम्।ततो जपांते "ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा॥तेन सत्येन सिद्धिं मे देहि मातर्नमोस्तु ते॥ॐ ह्रीं सिद्धयै नमः ।"इति मालां शिरसि निधाय गोमुखीं रहसि स्थापयेत् । नाशुचिः स्पर्शयेत । नान्यस्मै दद्यात् । अशुचिस्थाने न निधापयेत् । स्वयोनिवद्गुतां कुर्यात् । इति जपं कृत्वा कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमंत्रोक्तऋष्यादिन्यासं हृदयादिषडंगन्यासं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं च दत्त्वा जपदेवार्पणं कुर्यात् । तद्यथा । अर्घ्योदकेन चुलुकमादय " ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ १ ॥ " ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा । मदीयं च सकलं श्रीमहादेवाय समर्पयामि नमः ॥ ॐ तत्सदिति ब्रह्मार्पणं भवतु । इति देवदक्षिणकरे जलसमर्पणं कृत्वा कृतांजलिः क्षमापनं पठेत् । तथा च "ॐ आवाहनं न जानामि न जानामि विसर्जनम्॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥२॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अंतश्चरश्च भूतानामिष्टस्त्वं परमेश्वर ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्कारुण्यभावेन क्षमस्व परमेश्वर ॥५॥ प्रातर्योनिसहस्रेषु सहस्रेषु व्रजाम्यहम् ॥ तेषु चेष्टाचला भक्तिरच्युतेस्तु सदा त्वयि ॥६॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्या च तव दर्शनात् ॥७॥ देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवं जपति सर्वत्र यो देवः सोहमेव हि ॥८॥ क्षमस्व देवदेवेश क्षम्यते भुवनेश्वर ॥ तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे॥९॥" इति प्रार्थ्य शंखजलमुद्धृत्य देवोपरि भ्रामयित्वा "साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम ॥" इत्युच्चरन् देवस्य दक्षिणहस्ते जलं दत्त्वा शंखं यथास्थाने निवेशयेत् । ततो गतसारं नैवेद्यं देवस्योच्छिष्टं किंचिदुद्धृत्य "ॐ चण्डेश्वराय नमः" इत्युच्छिष्टाधिकारिणे ऐशान्यां दिशि दद्यात् । तच्छेषं नैवेद्यं शिरसि धृत्वा नैवेद्यादिकं देवभक्तेषु विभज्य स्वयं भुक्त्वा विसर्जनं कुर्यात् । तथा च । "ॐ गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर ॥ पूजाराधनकाले च पुनरागमनाय च ॥" इत्यक्षतान्निक्षिप्य विसर्जनं कृत्वा देवं स्वहृदये स्थापयेत् । तद्यथा "ॐ तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर॥ यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि॥ १॥" इति हृदयकमले हस्तं दत्त्वा देवं संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् । एवमेव विधिना जपं समाप्य संस्कृते वह्नौ जपदशांशतो होमः तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् । एतत्सर्वं सर्वदेवोपयोगिपद्धतिमार्गेण कुर्यात् । इति शिवपूजापद्धतिः समाप्ता ॥

श्रीगणेशाय नमः ॥ अथ सदाशिवकवचप्रारंभः ॥ "श्रीदेव्युवाच ॥ भगवन्देवदेवेश सर्वाम्नायप्रपूजित ॥ सर्वं मे कथितं देव कवचं न प्रकाशितम् ॥ १ ॥ प्रासादाख्यस्य मंत्रस्य कवचं मे प्रकाशय ॥ सर्वरक्षाकरं देव यदि स्नेहोऽस्ति मां प्रति ॥ श्रीभगवानुवाच ॥ प्रासादमंत्रकवचस्य वामदेवऋषिः। पंक्तिश्छंदः । सदाशिवो देवता । साधकाभीष्टसिद्धये जपे विनियोगः ॥ शिरो मे सर्वदा पातु प्रासादाख्यः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सदाशिवः ॥ षडक्षरस्वरूपो मे वदनं तु महेश्वरः ॥ ३ ॥ पंचाक्षरात्मा भगवान्भुजौ मे परिरक्षतु ॥ मृत्युंजयस्त्रिबीजात्मा आस्यं रक्षतु मे सदा ॥ ४ ॥ वटमूलं समासीनो दक्षिणामूर्तिरव्ययः ॥ सदा मां सर्वदः पातु षट्त्रिंशार्णस्वरूपधृक् ॥ ५ ॥ द्वाविंशार्णात्मको रुद्रो दक्षिणः परिरक्षतु ॥ त्रिवर्णात्मा नीलकंठः कंठं रक्षतु सर्वदा ॥ ६ ॥ चिंतामणिर्बीजरूपो ह्यर्द्धनारीश्वरो हरः ॥ सदा रक्षतु मे गुह्यं सर्वसम्पत्प्रदायकः ॥ ७ ॥ एकाक्षरस्वरूपात्मा कूटव्यापी महेश्वरः ॥ मार्तंडभैरवो नित्यं पादौ मे परिरक्षतु ॥ ८ ॥ तुंबुराख्यो महाबीजस्वरूपस्त्रिपुरांतकः ॥ सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः ॥ ९ ॥ ऊर्ध्वमूर्द्धानमीशानो मम रक्षतु सर्वदा ॥ दक्षिणास्यं तु तत्पुरुषोऽव्यान्मे गिरिनायकः ॥ १० ॥ अघोराख्यो महादेवः पूर्वास्यं परिरक्षतु ॥ वामदेवः पश्चिमास्यं सदा मे परिरक्षतु ॥ ११ ॥ उत्तरास्यं सदा पातु सद्योजातस्वरूपधृक् ॥ इत्थं रक्षाकरं देवि कवचं देवदुर्लभम् ॥ १२ ॥ प्रातःकाले पठेयस्तु सोभीष्टं फलमाप्नुयात् ॥ पूजाकाले पठेयस्तु कवचं साधकोत्तमः ॥ १३ ॥ कीर्तिश्रीकांतिमेधायुःसहितो भवति ध्रुवम् ॥ कंठे यो धारयेदेतत्कवचं मत्स्वरूपकम् ॥ १४ ॥ युद्धे च जयमाप्नोति द्यूते वादे च साधकः ॥ कवचं धारयेयस्तु साधको दक्षिणे भुजे ॥ १५ ॥ देवा मनुष्यगंधर्वा वश्यास्तस्य न संशयः ॥ कवचं शिरसा यस्तु धारयेद्यतमानसः ॥ १६ ॥ करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः ॥ भूर्जपत्रे त्विमां विद्यां शुक्लपट्टेन वेष्टिताम् ॥ १७ ॥ रजतोदरसंविष्टां कृत्वा वा धारयेत्सुधीः ॥ संप्राप्य महतीं लक्ष्मीमंते मद्देहरूपभाक् ॥ १८ ॥ यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥ शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥ १९ ॥ अन्यथा सिद्धिहानिः स्यात्सत्यमेतन्मनारमे ॥ तव स्नेहान्महादेवि कथितं कवचं शुभम् ॥ २० ॥ न देयं कस्यचि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रद्रे यदीच्छेदात्मनो हितम् ॥ योऽर्चयेद्गंधपुष्पाद्यैः कवचं मन्मुखोदितम् ॥ तेनार्चिता महादेवि सर्वे देवा न संशयः ॥” इति भैरवतन्त्रे सदाशिवकवचं समाप्तम् ॥ अथ सदाशिवस्तोत्रप्रारंभः ॥ “धरापोऽग्निमरुद्व्योममखेशेंद्वर्कमूर्तये ॥ सर्वभूतान्तरस्थाय शंकराय नमो नमः ॥ १ ॥ श्रुत्यंतकृतवासाय श्रुतये श्रुतिजन्मने ॥ अतीन्द्रियाय महसे शाश्वताय नमोनमः ॥ २ ॥ स्थूलसूक्ष्मविभागाभ्याम निर्देश्याय शंभवे ॥ भवाय भवसंभूतदुःखहंत्रे नमोस्तु ते ॥ ३ ॥ तर्कमार्गातिदूराय तपसां फलदायिने ॥ चतुर्वर्गप्रदान्याय सर्वज्ञाय नमोनमः ॥ ४ ॥ आदिमध्यांतशून्याय निरस्ताशेषभीतये ॥ योगिध्येयाय महते निर्गुणाय नमोनमः ॥ ५ ॥ विश्वात्मनेऽविचिंत्याय विलसच्चंद्रमौलये ॥ कंदर्पदर्पकालाय[1] कालहंत्रे नमोनमः ॥६॥ विषाशनाय विहरद्वृषस्कंधमुपेयुषे ॥ सरिद्वामसमाबद्धकपर्दाय नमोनमः ॥ ७ ॥ शुद्धाय शुद्धभावाय शुद्धानामंतरात्मने ॥ पुरांतकाय पूर्णाय पुण्यनाम्ने नमोनमः ॥ ८ ॥ भक्ताय निजभक्तानां भुक्तिमुक्तिप्रदायिने ॥ विवाससे विवासाय विश्वेषां ते नमोनमः ॥ ९ ॥ त्रिमूर्तिमूलभूताय त्रिनेत्राय नमोनमः ॥ त्रिधाम्ना धामरूपाय जन्मघ्नाय नमो नमः ॥१०॥ देवासुरशिरोरत्नकिरणारुणितांघ्रये॥कांताय निजकांतायै दत्तार्धाय नमोनमः ॥११॥ स्तोत्रेणानेन पूजायां प्रीणयेज्जगतः पतिम् ॥ भक्तिमुक्तिप्रदं भक्त्या सर्वज्ञं परमेश्वरम् ॥ १२ ॥” इति सदाशिवस्तोत्रं समाप्तम् ॥ अथ शतनामस्तोत्रप्रारंभः॥ “ॐ शिवो महेश्वरः शंभुः पिनाकी शशिशेखरः॥वामदेवो विरूपाक्षः कपर्दी नीललोहितः॥ १ ॥शंकरः शूलपाणिश्च खट्वांगी विष्णुवल्लभः॥ शिपिविष्टोम्बिकानाथः श्रीकण्ठो भक्तवत्सलः॥२॥भवः सर्वस्त्रिलोकेशः शितिकंठः शिवाप्रियः॥ उग्रः कपाली कामारिरन्धकासुरसूदनः॥ ३॥

१ नाशायेति पाठान्तरम् ॥

For Private And Personal Use Only

गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ॥ भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ ४ ॥ कैलासवासी कवची कठोरस्त्रिपुरांतकः॥
वृषांको वृषभारूढो भस्मोद्धूलितविग्रहः ॥५॥ सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ॥ सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ ६ ॥
हविर्यज्ञमयः सोमः पंचवक्त्रः सदाशिवः॥ विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥७॥ हिरण्यरेता दुर्द्धर्षो गिरीशो गिरिशोऽनघः ॥
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८ ॥ कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः ॥ मृत्युञ्जयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः
॥ ९ ॥ व्योमकेशो महासेनो जनकश्चारुविक्रमः ॥ रुद्रो भतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः॥ १० ॥ अष्टमूर्तिरनेकात्मा सात्त्विकः
शुद्धविग्रहः ॥ शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥ ११ ॥ मृडः पशुपतिर्देवो महादेवोऽव्ययः प्रभुः ॥ पूषदंतभिदव्यग्रो दक्षाध्वर
हरो हरः ॥ १२ ॥ भगनेत्रभिदव्यक्तः सहस्राक्षः सहस्रपात् ॥ अपवर्गप्रदोऽनंतस्तारकः परमेश्वरः ॥ १३ ॥ इमानि दिव्यनामानि
जप्यंते सर्वदा मया ॥ नामकल्पलतेयं मे सर्वाभीष्टप्रदायिनी ॥ १४ ॥ नामान्येतानि सुभगे शिवदानि न संशयः ॥ वेदसर्वस्वभूतानि
नामान्येतानि वस्तुतः ॥ १५ ॥ एतानि यानि नामानि तानि सर्वार्थदान्यतः ॥ जप्यंते सादरं नित्यं मया नियमपूर्वकम् ॥ १६ ॥
वेदेषु शिवनामानि श्रेष्ठान्यघहराणि च ॥ संत्यनंतानि सुभगे वेदेषु विविधेष्वपि ॥ १७ ॥ तेभ्यो नामानि संगृह्य कुमाराय महेश्वरः ॥
अष्टोत्तरसहस्रं तु नाम्नामुपदिशत्पुरा ॥ १८ ॥" इति शिवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥ अथ शिवसहस्रनामस्तोत्रप्रारम्भः ॥
सूत उवाच ॥ "श्रूयतामृषयः श्रेष्ठाः कथयामि यथाश्रुतम् ॥ विष्णुना प्रार्थितो येन संतुष्टः परमेश्वरः ॥ १ ॥ तदहं कथयाम्यद्य पुण्यं
नामसहस्रकम् ॥ श्रीविष्णुरुवाच ॥ शिवो हरो मृडो रुद्रः पुष्करः पुष्पलोचनः॥२॥ अर्थिगम्यः सदाचारः शर्वः शंभुर्महेश्वरः ॥ चन्द्रा

पीडश्चन्द्रमौलिर्विश्वादिश्वामरेश्वरः॥ ३ ॥ वेदांतसारसंदोहः कपाली नीललोहितः ॥ ध्यानाधारापरिच्छेयो गौरीभर्ता गणेश्वरः ॥ ४ ॥
अष्टमूर्तिर्विश्वमूर्तिस्त्रिवर्गः स्वर्गसाधनः॥ ज्ञानगम्यो दृढप्रज्ञो देवदेवस्त्रिलोचनः ॥५॥ वामदेवो महादेवः पटुः परिवृढो दृढः ॥ विश्वरूपो
विरूपाक्षो वागीशः शुचिमत्तरः॥ ६ ॥ शर्वः प्रमाणसंवादीवृषांको वृषवाहनः॥ ईशः पिनाकी खट्वांगी चित्रवेषश्चिरंतनः॥ ७ ॥ तमोहरो
महायोगी गोप्ता ब्रह्माण्डहृज्जटी ॥ कालकालः कृत्तिवासाः सुभगः प्रणतात्मकः ॥ ८ ॥ त्रिपुंड्रधारी चाक्षुष्यो दुर्वासाः पुरशासनः ॥
दिव्यायुधः स्कंदगुरुः परमेष्ठी परात्परः॥९॥अनादिमध्यनिधनो गिरीशो गिरिबांधवः॥कुबेरबंधुः श्रीकण्ठो लोकवर्णोत्तमो मृदुः॥ १०॥
समाधिवेद्यः कोदण्डी नीलकण्ठः परश्वधी॥ विशालाक्षो मृगव्याधः सुरेशः सूर्य्यतापनः ॥ ११ ॥ धर्मधामा क्षमाक्षेत्रं भगवान् भगनेत्र
भित् ॥ उग्रः पशुपतिस्तार्क्ष्यः प्रियभक्तः प्रियंवदः ॥ १२ ॥ दाता दयाकरो दक्षः कपर्दी कामशासनः ॥ श्मशाननिलयः सक्ष्मः
श्मशानस्थो महेश्वरः ॥ १३ ॥ लोककर्ता मृगपतिर्महाकर्ता महौषधिः ॥ उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥ १४ ॥ नीतिः
सुनीतिः शुद्धात्मा सोमः सोमतरः सुखी ॥ सोमपोऽमृतपः सौम्यो महाज्योतिर्महाद्युतिः ॥१५॥ तेजोमयोऽमृतमयोन्नमयश्च सुधापतिः॥
अजातशत्रुरालोकसंभाव्यो हव्यवाहनः॥ १६ ॥ लोककरो वेदकरः सूत्रकारः सनातनः॥ महर्षिः कपिलाचार्य्यो विश्वदीप्तिर्विलोचनः
॥ १७ ॥ पिनाकपाणिर्भूदेववशगः स्वस्तिकृत्सुधीः ॥ धातृधामा धामकरः सर्वदः सर्वगोचरः ॥ १८ ॥ ब्रह्मसृग्विश्वसृक्सर्वः कर्णि
कारप्रियः कविः ॥ शाखो विशाखो गोशाखः शिवो भिषगनुत्तमः ॥ १९ ॥ गंगाप्लवोदको भव्यः पुष्कलः स्थपतिः स्थिरः ॥
विजितात्मा विधेयात्मा भूतवाहनसारथिः ॥ २० ॥ सगणो गणवर्यश्च सुकीर्तिश्छिन्नसंशयः ॥ कामदेवः कामपालो भस्मोद्धू

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लितविग्रहः ।। २१ ।। भस्मप्रियो भस्मशायी कामी कांतः कृतागमः ।। समावर्तो निवृत्तात्मा धर्मपुंजः सदाशिवः ।। २२ ।।
अकल्मषश्चतुर्बाहुर्दुरावासो दुरासदः ।। दुर्लभो दुर्गमो दुर्गः सर्वायुधविशारदः ।। २३ ।। अध्यात्मयोगनिलयः सुतंतुस्तंतुवर्द्धनः ।।
शुभांगो लोकसारंगो जगदीशो जनार्दनः ॥ २४ ॥ भस्मशुद्धिकरो मेरुरोजस्वी शुद्धविग्रहः ।। असाध्यः साधुसाध्यश्च भृत्यमर्कटरूप
धृक् ॥ २५ ॥ हिरण्यरेताः पौराणो रिपुजीवहरोऽचलः ।। महाह्रदो महागर्तः सिद्धवृन्दारकेंडितः ॥ २६ ॥ व्याघ्र
चर्माम्बरो व्याली महाभूतो महानिधिः ॥ अमृतानुभवः श्रीमान् पांचजन्यः प्रभञ्जनः ॥ २७ ॥ पंचविंशतितत्त्वस्थः पारिजातः
परात्परः ॥ सुलभः सुव्रतः शूरोवाङ्मयी कनिधिर्निधिः ॥ २८ ॥ वर्णाश्रमगुरुर्वर्णी शत्रुजिच्छत्रुतापनः ॥ आश्रमः क्षपणः क्षामो
ज्ञानवानचलेश्वरः॥ २९ ॥ प्रमाणभूतो दुर्ज्ञेयः सुपर्णो वायुवाहनः ॥ धनुर्धरो धनुर्वेदो गुणः शशिगुणाकरः ॥ ३० ॥ सत्यः सत्यपरो
दीनो धर्मांगो धर्मसाधनः ॥ अनंतदृष्टिरानन्दो दंडो दमयिता दमः ॥ ३१ ।। अभिचार्यो महामायो विश्वकर्मा विशारदः ॥ वीतरागो
विनीतात्मा तपस्वी भूतवाहनः ॥ ३२ ॥ उन्मत्तवेषः प्रच्छन्नो जितकामोर्चितप्रियः ॥ कल्पांतः प्रकृतिः कल्पः सर्वलोकप्रजापतिः
॥ ३३ ॥ तरस्वी तारको धीमान् प्रधानः प्रभुरव्ययः ॥ लोकपालोंतर्हितात्मा कल्पादिः कमलेक्षणः ॥ ३४ ॥ वेदशास्त्रार्थतत्त्वज्ञो
नियमो नियमाश्रयः ॥ चन्द्रः सूर्यः शनिः केतुर्विरागो विद्रुमच्छविः ॥ ३५ ॥ भक्तिवश्यः परब्रह्म मृगबाणार्पणो नयः ॥अद्रिरद्र्यालयः
कांतः परमात्मा जगद्गुरुः ॥३६॥ सर्वकामालयस्तुष्टो मांगल्यो मंगलावृतः ॥ महातपा दीर्घतपाः स्थविष्ठः स्थविरो द्रुमः ॥ ३७ ॥
अहः संवत्सरो व्याप्तिः प्रमाणं परमं तपः ॥ संवत्सरकरो मंत्रः प्रत्ययः सर्वदर्शनः ॥३८॥ अजः सर्वेश्वरः सिद्धो महारेता महाबलः ॥ ॥१४६॥

For Private And Personal Use Only

योगो योग्यो महातेजाः सिद्धः सर्वादिविग्रहः ॥ ३९ ॥ वसुर्वसुमनाः सत्यः सर्वपापहरो हरः ॥ सुकीर्तिः शोभितः श्रावी ह्यवाङ्मनसगोचरः ॥ ४० अमृतः शाश्वतः शांतो द्रोणहस्तः प्रतापवान् ॥ कमंडलुधरो धन्वी वेदांगो वेदविन्मुनिः ॥ ४१ ॥ भ्राजिष्णुर्भोजनं भोक्ता लोकनाथो दुरावरः ॥ अतींद्रियो महामायः सर्वावासश्चतुष्पथः ॥ ४२ ॥ कालयोगी महानादो महोत्साहो महाबलः ॥ महाबुद्धिर्महावीर्यो भूतचारी पुरन्दरः ॥ ४३ ॥ निशाचरः प्रेतचारी महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमान् सर्वाचार्यमनोगतिः ॥ ४४ ॥ बहुश्रुतो महामायो नियतात्मा ध्रुवोऽध्रुवः ॥ तेजस्तेजोद्युतिधरो नरकः सर्वशासकः ॥ ४५ ॥ नृत्यप्रियो नित्यनृत्यः प्रकाशात्मा प्रकाशकः ॥ स्पष्टः क्रूरो बुधो मंत्रः समानः सारसंप्लुवः ॥ ४६ ॥ युगादिकृद्युगावर्तो गंभीरो वृषवाहनः ॥ इष्टो विशिष्टः शिष्टेष्टः शरभः शरभो धनुः ॥ ४७ ॥ तीर्थरूपस्तीर्थनामा तीर्थादृश्यः सुतीर्थदः ॥ अपान्निधिरधिष्ठानं विजयो जयकालवित्॥४८॥ प्रतिष्ठितः प्रमाणज्ञो हिरण्यकवचो हरिः ॥ विमोचनः सुरगणो विद्येशो बिंदुसंश्रयः ॥ ४९ ॥ बालरूपो बलोन्मत्तो विकर्ता गहनो गुहः ॥ करणं कारणं कर्ता सर्वबंधविमोचनः ॥ ५० ॥ व्यवसायो व्यवस्थानः स्थानदो जगदादिजः ॥ गुरुदो ललितो भेदो निवासात्मनि संस्थितः ॥ ५१ ॥ वीरेश्वरो वीरभद्रो विश्वरूपो विधिर्विराट् ॥ वीरचन्द्रो मणिर्द्धर्ता तीव्रानन्दो नदीश्वरः ॥ ५२ ॥ अग्न्याधारस्त्रिशूली च शिपिविष्टः शिवालयः ॥ बालखिल्यो महावीर्यस्तिग्मांशुर्बधिरः खगः ॥ ५३ ॥ अभिरामः सुशरणः सुब्रह्मण्यः सुधानिधिः ॥ मघवा कौशिको गोमान् विरामः सर्वसाधनः ॥ ५४ ॥ ललाटजो विश्वदेहः सारसंसारचक्रभृत ॥ अमोघो दण्डिमध्यस्थो हरिणो ब्रह्मवर्चसः ॥ ५५ ॥ परमार्थः परमयः शंबरो व्याघ्रकोऽनलः ॥ रुचिर्वररुचिर्वंद्यो वाचस्पतिरहर्पतिः ॥ ५६ ॥ रवि

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विरोचनः स्कंदः शास्ता वैवस्वतोऽमरः ॥ युक्तिरुन्मत्तकीर्तिश्च सानुगश्च परंजयः ॥ ५७ ॥ कैलासाधिपतिः कांतः सविता रविलो
चनः ॥ विश्वोत्तमो वीतभयो विश्वभर्ता निवारितः ॥ ५८ नित्यो नियतकल्याणः पुण्यश्रवणकीर्तनः ॥ दूरश्रवा विश्वसहो ध्येयो दुःख
प्रणाशनः ॥ ५९ ॥ उत्तारणो दुष्कृतिहा विज्ञेयो दुःसहो भवः ॥ अनादिर्भूर्भुवो लक्ष्मीः किरीटी त्रिदशाधिपः ॥ ६० ॥ विश्वगोप्ता
विश्वकर्ता· सुवीरो रुचिरांगदः ॥ जननो जनजन्मादिः प्रीतिमान्नीतिमान्धवः ॥ ६१ ॥ वसिष्ठः कश्यपो भानुर्भीमो
भीमपराक्रमः ॥ प्रणवः सत्पथाचारो महाकाशो महाधनः ॥ ६२ ॥ जन्माधिपो महादेवः सकलागमपारगः ॥ तत्त्वं
तत्त्वविदेकात्मा विभुर्विष्णुविभूषणः ॥ ६३ ॥ ऋषिर्ब्राह्मण ऐश्वर्यो जन्ममृत्युजरातिगः ॥ पंचयज्ञसमुत्पत्तिर्विश्वेशो विमलोदयः ॥
॥ ६४ ॥ अनाद्यंत आत्मयोनिर्वत्सलो भक्तलोकधृक् ॥ गायत्रीवल्लभः प्रांशुर्विश्ववासः प्रभाकरः ॥ ६५ ॥ शिशुर्गिरिरतः
सम्राट् सुषेणः सुरशत्रुहा ॥ अनेमिरिष्टनेमिश्च मुक्तिदो विगतज्वरः ॥ ६६ ॥ स्वयंज्योतिस्तपज्ज्योतिरतिज्योतिरचंचलः ॥
पिंगलः कपिलः श्मश्रुर्भालनेत्रस्त्रयीतनुः ॥ ६७ ॥ ज्ञानस्कंदो महानीतिर्विश्वोत्पत्तिरुपप्लवः ॥ भोगी विवस्वतस्तत्त्वो योगपारो
दिवस्पतिः ॥ ६८ ॥ कल्याणगुणनामा च पापहा पुण्यदर्शनः ॥ उदारकीर्तिरुद्योगी महन्मान्यश्च सत्त्वपः ॥ ६९ ॥ रूक्षो
मलिनकेशश्च स्वाधिष्ठानपदाश्रयः ॥ पवित्रः पापनाशश्च मणिपूरो नभोगतिः ॥ ७० ॥ हृत्पुंडरीकमासीनः शक्रः शांतो वृषाकपिः ॥
कृष्णो ग्रहपतिः कृष्णः समर्थोऽनर्थनाशनः ॥ ७१ ॥ अधर्मशत्रुरज्ञेयः पुरुहूतः पुरुश्रुतः ॥ ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः
॥ ७२ ॥ जगद्धितैषी सुगतः कुमारः कुशलागमः ॥ हिरण्यवर्णो ज्योतिष्मान्नानाभूतरतो ध्वनिः ॥ ७३ ॥ आरोग्यो नयनाध्यक्षो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विश्वामित्रो धनेश्वरः ॥ ब्रह्मज्योतिर्वसुर्धामा महाज्योतिरनुत्तमः ॥ ७४ ॥ मातामहो मातरिश्वा नभस्वान्नागहारधृक् ॥ पुलस्त्यः पुलहोगस्त्यो जातूकर्ण्यः पराशरः ॥ ७५ ॥ निरावरणनिर्वारो वैरंच्यो विष्टरश्रवाः ॥ आत्मभूरनिरुद्धोत्रिर्ज्ञानमूर्तिर्महायशाः ॥ ७६ ॥ लोकवीराग्रणीर्वीरश्चन्द्रः सत्यपराक्रमः ॥ व्यालकल्पो महाकल्पः कल्पवृक्षः कलाधरः ॥ ७७ ॥ अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोम्बरः ॥ आशुः शब्दपतिर्वज्री पवनः शिखिसारथिः ॥ ७८ ॥ असंसृतिपतिः शक्रप्रमादः पादपासनः ॥ वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः॥ ७९ ॥ जप्यो जरारिः शमनो लोहिताश्वस्तनूनपात् ॥ नभोयोनिः सुनिष्पन्नः सुरभिः शिशिरात्मकः ॥ ८० ॥ वसंतो माधवो ग्रीष्मो नभःस्थो बीजवाहनः ॥ अंगिरा गुरुरात्रेयो विमलो विश्ववाहनः ॥ ८१ ॥ पावनः पुरुजिच्छक्रत्रैविद्यो नरवारणः ॥ मनोबुद्धिरहंकारः क्षेत्रज्ञः क्षेत्रपालकः ॥ ८२ ॥ जमदग्निर्जलनिधिर्विगोलो विश्वगोलकः ॥ अघोरानुत्तरो यज्ञः श्रेष्ठो निःश्रेयसालयः ॥ ८३ ॥ शैलो गगनकुंदाभो दानवारिररिंदमः ॥ चामुण्डाजीवकश्चारुर्निःशल्यो लोककल्पधक्॥ ८४ ॥ चतुर्वेदश्चतुर्भावश्चतुरश्चतुरप्रियः॥ आम्नायोथ समाम्नायस्तीर्थवेदशिवालयः॥ ८५॥ बहुरूपो महारूपः सर्वरूपश्चराचरः॥ नयनिर्मापको न्यायो न्यायगम्यो निरंजनः ॥ ८६ ॥ सहस्रमूर्द्धा देवेन्द्रः सर्वशास्त्रप्रभंजनः॥ मुण्डो विरूपो विक्रांतो दण्डिताण्डगुणोत्तमः ॥ ८७ ॥ पिंगलाक्षो हयग्रीवो नीलग्रीवो निरामयः॥ सहस्रबाहुः सर्वेशः शरण्यः सर्वलोकधृक्॥ ८८॥ पद्मासनः परंज्योतिः परंपारं परं फलम् ॥ पद्मगर्भो महागर्भो विश्वगर्भो विचक्षणः ॥ ८९ ॥ चराचरज्ञो वरदो वरेशस्तु महास्वनः ॥ देवासुरगुरुर्देवो देवासुरनमस्कृतः ॥ ९० ॥ देवासुरमहामित्रो देवासुरमहाश्रमः ॥ देवादिदेवो देवाग्निर्देवासुरवरप्रदः ॥ ९१ ॥ देवासुरेश्वरो दिव्यो देवासुरमहेश्वरः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवदेवो महाचिंत्यो देवतात्मात्मसंभवः ॥ ९२ ॥ सद्योनष्टासुरव्याघ्रो देवसिंहो दिवाकरः॥ विबुधाग्रचरः श्रेष्ठः सर्वदेवोत्तमोत्तमः॥९३॥
शिवज्ञानप्रदः श्रीमान् शिखी श्रीपर्वतप्रियः॥ वज्रहस्तः सिद्धखड्गी नरसिंहनिपातनः॥९४॥ ब्रह्मचारी लोकचारी धर्मचारी धनाधिपः ॥
नंदी नंदीश्वरो नंदो लग्नवृत्तिधरः शुचिः ॥ ९५ ॥ लिङ्गाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः॥ स्वर्द्धामा स्वर्गतः स्वामी स्वरः
स्वरतमस्वनः ॥ ९६ ॥ बोधाध्यक्षो बीजकर्ता धर्मकृद्धर्मसम्भवः ॥ दंभो लोभोथ वै शंभुस्सर्वभूतमहेश्वरः॥९७॥ श्मशाननिलयस्त्र्यक्षः
सेतुरप्रतिमाकृतिः ॥ लोकोत्तरः स्फुटालोकस्त्र्यंबको नागभूषणः ॥ ९८ ॥ अंधकारिर्मखद्वेषी विष्णोः स्कंधरतात्मकः ॥
हितदक्ष क्षयगुणो दक्षारिः पूषदंतभित् ॥ ९९ ॥ पूर्जनिः खंडपरशुः सकलो निष्कलो मुनिः ॥ अकालः सकलाधारः
पांडुरोगो मृगोनगः ॥ १०० ॥ पूर्णः पूरयिता पुण्यः सुकुमारः सुलोचनः ॥ संगो गोपप्रियाक्रूरः पुण्यकीर्तिरनामयः ॥ १०१ ॥
मनोजवस्तीर्थकरो जटिलोजीवितेश्वरः ॥ जीवितांतकरो नित्यो वसुरेता वसुप्रदः ॥ १०२ ॥ सुजातिः सत्कृतिः सिद्धिः सजातिः
कालकंटकः ॥ कलाधरो महाकालभूतः सत्यपरायणः॥ १०३ ॥ लोकलावण्यकर्ता च लोकोत्तरसुखालयः ॥ तेजोमयो द्युतिधरोलोक
मानाग्रणीरणुः ॥ १०४ ॥ शुचिस्मितः प्रसन्नात्मा अजेयो दुरतिक्रमः ॥ ज्योतिर्मयोनीरुजाङ्गोगङ्गाप्रेष्ठोजलेश्वरः ॥ १०५ ॥ तुंबवी
णोमहाकायोविशोकः शोकनाशनः ॥ त्रिलोकपास्त्रिलोकेशः सर्वशुद्धिरधोक्षजः ॥ १०६ ॥ अव्यक्तलक्षणो देवो व्यक्तोऽव्यक्तोविशां
पतिः ॥ परः शिवोवसुर्नासासारोमानंदनोमयः ॥ १०७ ॥ ब्रह्माविष्णुः प्रजापालोहंसोहंसगतिर्वयः ॥ वेधाविधातास्रष्टाचसंहर्ताचचतु
र्मुखः ॥ १०८ ॥ कैलासशिखरावासीसर्वावासीसदागतिः ॥ हिरण्यगर्भोद्रुहिणोभूतनाथोऽथभूपतिः ॥ १०९ ॥ सद्योगीयोगवियोगी

For Private And Personal Use Only

वरदो ब्राह्मणप्रियः ॥ देवप्रियो देवनाथो देवको देवचिंतकः॥११०॥ विषमाक्षो विरूपाक्षो वृषभो वृषवर्धनः॥ निर्म्ममो निरहंकारो नि
र्मोहो निरुपद्रवः ॥ १११ ॥ दर्पहा दर्पदो दृप्तः सर्वार्थपरिवर्तकः ॥ सहस्रजित्सहस्रार्चिः स्निग्धप्रकृतिदक्षिणः ॥११२॥ भूतभव्यभवो
नाथः प्रभवोऽभूतिनाशनः ॥ अर्थोऽनर्थो महाकोशः परकार्यैकपण्डितः ॥ ११३ ॥ निष्कंटकः कृतानंदो निर्व्याजो व्याजमर्दनः ॥
सत्त्ववान् सात्यकिः सत्यः कीर्तिस्नेहः कृतागतः॥११४ ॥ अकंपितो गुणग्राही नैकात्मा नैककर्मकृत् ॥ सुप्रीतः सुमुखः सूक्ष्मः सुकरो
दक्षिणानिलः ॥ ११५ ॥ नंदिस्कंधधरो धुर्यः प्रकटः प्रीतिवर्धनः ॥ अपराजितः सर्वसत्त्वो गोविंदः सत्त्ववाहनः ॥ ११६ ॥ अधृतः
स्वधृतः सिद्धः पूतमूर्तिर्यशोधनः ॥ वाराहशृङ्गधृक् शूरो बलवानेकनायकः ॥ ११७ ॥ श्रुतिप्रकाशः श्रुतिमानेकबंधुरनेककृत् ॥
श्रीवत्सलः शिवारंभः शांताभद्रः समो यशः॥११८ ॥ भूशयो भूषणो भूतिर्भूतकृद्भूतिभावनः ॥ अकम्पो भक्तिकायस्तु कालहा निष्कले
श्वरः ॥११९॥ सत्यव्रतो महात्यागी नित्यशांतिः परायणः॥परार्थवृत्तिर्वरदो विक्षुस्तुव विशारदः॥१२०॥ शुभदः शुभकर्ता च शुभ
नामा शुभः स्वयम् ॥ अनर्थितो गुणग्राही ह्यकर्ता कनकप्रभः॥१२१॥ स्वभावभद्रो मध्यस्थः शत्रुघ्नो विघ्ननाशनः॥ शिखण्डी कवची
शूली जटी मुंडी च कुंडली॥१२२॥ अमृत्युः सर्वदृक् सिंहस्तेजोराशिर्महामणिः॥ असंख्येयोप्रमेयात्मा वीर्यवान् वीर्यकोविदः॥१२३॥
वेद्यश्चैव वियोगी च सप्तवीरो मुनीश्वरः॥अनुक्रमो दुराधर्षो मधुरः प्रियदर्शनः॥१२४॥सुरेशस्तारणः शर्वश्शब्दः प्रतपताङ्गतिः॥कालक्षयः
कालकारी सुकृतिः कृतवासुकिः ॥ १२५ ॥ महेष्वासो महीभर्ता निष्कलंको विशृंखलः ॥ द्युमणिस्तरणिर्द्धन्यः सिद्धिदः सिद्धिसाध
नः ॥ १२६ ॥ विवृतः संवृतस्तुत्यो व्यूढोरस्को महाभुजः ॥ सर्वयोनिर्निरातंको नरनारायणप्रियः ॥१२७ ॥ निर्लेपो निःप्रसङ्गात्मा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ मृत्युञ्जयकवचप्रारंभः॥ भैरव उवाच ॥ शृणुष्वपरमेशानि कवचं मन्मुखोदितम् ॥ महामृत्युंजयस्यास्य न देयं परमा द्भुतम् ॥
॥ १ ॥ यं धृत्वा यं पठित्वा च यं श्रुत्वा कवचोत्तमम् ॥ त्रैलोक्याधिपतिर्भूत्वा सुखितोऽस्मि महेश्वरि ॥२॥ तदेव वर्णयिष्यामि तव
प्रीत्यावरानने॥ तथापि परमं तत्त्वं नं दातव्यं दुरात्मने॥३॥ॐ अस्य श्रीमहामृत्युंजयकवचस्य श्रीभैरवऋषि। गायत्रीछंदः। श्रीमृत्युंजय
रुद्रो देवता। ॐ बीजम्। जूं शक्तिः। सः कीलकम्। हौं इति तत्त्वम्। चतुर्वर्गफलसाधने पाठे विनियोगः ॥ ॐ चन्द्रमंडल
मध्यस्थे रुद्रमाले विचित्रिते ॥ तत्रस्थं चिंतयेत्साध्यं मृत्युं प्राप्नोपि जीवति ॥ ४ ॥ ॐ जूं सः हौं शिरः पातु देवो मृत्युंजयो मम ॥
श्रीशिवो वै ललाटं च ॐ हौं भ्रुवौ सदाशिवः ॥ ५ ॥ नीलकंठोऽवतान्नेत्रे कपर्दी मेऽवताच्छ्रुती ॥ त्रिलोचनोऽवतां गण्डौ नासां मे
त्रिपुरांतकः ॥ ६ ॥ मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः ॥ हनुं मे हाटकेशानो मुखं वटुकभैरवः ॥७॥ कंधरां कालमथनो गलं
गणप्रियोऽवतु ॥ स्कंधौ स्कंदपिता पातु हस्तौ मे गिरिशोऽवतु ॥८ ॥ नखान्मे गिरिजानाथः पायादंगुलिसंयुतान् ॥ स्तनौ तारापतिः
पातु वक्षः पशुपतिर्मम ॥ ९ ॥ कुक्षिं कुबेरवदनः पार्श्वौ मे मारशासनः ॥ शर्वः पातु तथा नाभिं शूली पृष्ठं ममाऽवतु ॥ १० ॥
शिश्नं मे शंकरः पातु गुह्यं गुह्यकवल्लभः ॥ कटिं कालांतकः पायादूरू मेंधकघातकः ॥ ११ ॥ जागरूकोऽवताज्जानू जंघे मे काल
भैरवः ॥ गुल्फौ पायाज्जटाधारी पादौ मृत्युंजयोऽवतु ॥१२॥ पादादिमूर्द्धपर्यंतं सद्योजातो ममावतु ॥ रक्षाहीनं नामहीनं वपुःपात्वमृते
श्वरः ॥ १३ ॥ पूर्वे बलविकरणो दक्षिणे कालशासनः ॥ पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः ॥ १४ ॥ ऐशान्यामीश्वरः पाया
दाग्नेय्यामग्निलोचनः ॥ नैर्ऋत्यां शंभुरव्यान्मां वायव्यां वायुवाहनः ॥ १५ ॥ ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः ॥ दशदिक्षु दास

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पातु महामृत्युंजयश्च माम्॥ १६ ॥ रणे राजकुले द्यूते विषमे प्राणसंशये ॥ पायादोंजूं महारुद्रो देवदेवो दशाक्षरः ॥ १७ ॥
प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु ॥ सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ॥१८॥ अर्धरात्रे महादेवो निशांते मां महोदयः॥
सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युंजयः॥१९॥ इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम्॥सर्वमंत्रमयं गुह्यं सर्वतंत्रेषु गोपितम्॥२०॥
पुण्यं पुण्यप्रदं दिव्यं देवदेवादिदैवतम् ॥य इदं च पठेन्मंत्रं कवचं वाचयतेत्ततः ॥२१॥ तस्य हस्ते महादेवि त्र्यंबकस्याष्टसिद्धयः ॥रणे
धृत्वा चरेद्युद्धं हत्वा शत्रुञ्जयं लभेत्॥२२॥जपं कृत्वा गृहे देवि संप्राप्स्यति सुखं पुनः ॥ महाभये महारोगे महामारीभये तथा॥ दुर्भिक्षे
शत्रुसंहारे पठेत्कवचमादरात् ॥१२३॥ इति श्रीमहामृत्युंजयकवचं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे शिवतंत्रे षष्ठस्तरंगः ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

॥ श्रीगणेशाय नमः ॥ अथ विष्णुतंत्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ अथ वक्ष्ये महामंत्रान्विष्णोः सर्वार्थसाधकान् ॥ येषां संस्मरणात्संतो भवाब्धेः पारमाश्रिताः ॥ १ ॥ अथाष्टाक्षरविष्णुमंत्रप्रयोगः ॥ मंत्रो यथा ॥ "ॐ नमो नारायणाय" इत्यष्टाक्षरो मंत्रः ॥ अस्य विधानम् । अस्य मंत्रस्य साध्यनारायण ऋषिः । देवीगायत्री छन्दः । विष्णुर्देवता। सर्वेष्टसिद्धये जपे विनियोगः॥ साध्यनारायणर्षये नमः शिरसि १ देवीगायत्रीछन्दसे नमः मुखे २ विष्णुदेवतायै नमः हृदि३ विनियोगाय नमः सर्वांगे ४ इति ऋष्यादिन्यासः ॥ ॐ क्रुद्धोल्काय अंगुष्ठाभ्यां नमः १ ॐ महोल्काय तर्जनीभ्यां नमः २ ॐ वीरोल्काय मध्यमाभ्यां नमः३ ॐ द्युल्काय अनामिकाभ्यां नमः ४ ॐ सहस्रोल्काय कनिष्ठिकाभ्यां नमः ५ इति करन्यासः ॥ ॐ क्रुद्धोल्काय हृदयाय नमः १ ॐ महोल्काय शिरसे स्वाहा २ ॐ वीरोल्काय शिखायै वषट् ३ ॐ द्युल्काय कवचाय हुं ४ ॐ सहस्रोल्कायास्त्राय फट् ५ इति हृदयादिषडंगन्यासः ॥ ॐ ॐ नमः हृदयाय नमः १ ॐ नं नमः शिरसे स्वाहा २ ॐ मों नमः शिखायै वषट् ३ ॐ नां नमः कवचाय हुं ४ ॐ रां नमः नेत्रत्रयाय वौषट् ५ ॐ यं नमः अस्त्राय फट् ६ ॐ णा नमः कुक्ष्योः ७ ॐ यं नमः पृष्ठे ८ इति मंत्रवर्णैः षडंगन्यासः ॥ अथ मंत्रवर्णैरष्टांगन्यासः ॥ ॐ ॐ नमः आधारे १ ॐ नं नमः हृदि २ ॐ मों नमः वक्त्रे ३ ॐ नां नमः दक्षिणभुजे ४ ॐ रां नमः वामभुजे ५ ॐ यं नमः दक्षिणपादे ६ ॐ णां नमः वामपादे ७ ॐ यं नमः नाभौ ८ इति प्रथमन्यासः ॥ १ ॥ ॐ ॐ नमः कंठे १ ॐ नं नमः नाभौ २ ॐ मों नमः हृदि ३ ॐ नां नमः दक्षिणस्तने ४ ॐ रां नमः वामस्तने ५ ॐ यं नमः दक्षिणपार्श्वे ६ ॐ णां नमः वामपार्श्वे ७

१— मंत्रन्यासं ततः कुर्यात्सर्वकामफलप्रदम् ॥ यं विना नैव तत्सिद्धिः सम्यगासुरनिष्कलम् ॥

ॐ यं नमः पृष्ठे ८ इति द्वितीयन्यासः ॥ २ ॥ ॐ ॐ नमः मूर्ध्नि १ ॐ नं नमः मुखे २ ॐ मों नमः दक्षिणनेत्रे ३ ॐ नां नमः वामनेत्रे ४ ॐ रां नमः दक्षिणकर्णे ५ ॐ यं नमः वामकर्णे ६ ॐ णां नमः दक्षिणनासापुटे ७ ॐ यं नमः वामनासापुटे ८ इति तृतीयन्यासः ॥ ३ ॐ ॐ नमः दक्षबाहुमूले १ ॐ नं नमः दक्षकूर्परे २ ॐ मों नमः दक्षमणिबंधे ३ ॐ नां नमः दक्षहस्तांगुलिमूले ४ ॐ रां नमः दक्षहस्तांगुल्यग्रे ५ ॐ यं नमः वामबाहुमूले ६ ॐ णां नमः वामकूर्परे ७ ॐ यं नमः वाममणिबंधे ८ इति चतुर्थन्यासः ॥ ४ ॥ ॐ ॐ नमः वामहस्तांगुलिमूले १ ॐ नं नमः वामहस्तांगुल्यग्रे २ ॐ मों नमः दक्षिणपादमूले ३ ॐ नां नमः दक्षिणजानुनि ४ ॐ रां नमः दक्षिणांगुलौ ५ ॐ यं नमः दक्षपादांगुलिमूले ६ ॐ णां नमः दक्षपादांगुल्यग्रे ७ ॐ यं नमः वामपादमूले ८ इति पंचमन्यासः ॥ ५ ॥ ॐ ॐ नमः वामजानुनि १ ॐ नं नमः वामगुल्फे २ ॐ मों नमः वामपादांगुलिमूले ३ ॐ नां नमः वामपादांगुल्यग्रे ४ हृदये करं दत्त्वा ॐ रां नमः त्वचि ५ ॐ यं नमः रक्ते ६ ॐ णां नमः मांसे ७ ॐ यं नमः मेदसि ८ इति षष्ठन्यासः ॥ ६ ॥ ॐ ॐ नमः अस्थिन १ ॐ नं नमः मज्जायाम् २ ॐ मों नमः शुक्र ३ ॐ नां नमः प्राणे ४ ॐ रां नमः हृदि ५ ॐ यं नमः दक्षिणगले ६ ॐ णां नमः वामगले ७ ॐ यं नमः हृदि ८ इति सप्तमन्यासः ॥७॥ ॐ ॐ नमः मूर्ध्नि १ ॐ नं नमः नेत्रयोः २ ॐ मों नमः मुखे ३ ॐ नां नमः हृदि ४ ॐ रां नमः कुक्षौ ५ ॐ यं नमः ऊर्वोः ६ ॐ णां नमः जंघयोः ७ ॐ यं नमः पादयोः ८ इत्यष्टमो न्यासः ॥८॥ इति मंत्रवर्णाष्टन्यासाः॥ ॐ चक्राय नमः दक्षिणगंडे १ ॐ शंखाय नमः वामगंडे २ ॐ गदायै नमः दक्षिणांसे ३ ॐ पद्माय नमः वामांसे ४ इति विन्यस्य मूर्तिपंजरन्यासं कुर्यात्॥ तत्र क्रमः॥ ॐ ॐ अं केशवाय धात्रे नमः ललाटे १ ॐ नं आं नारायणायार्यम्णे नमः कुक्षौ २ ॐ मों इं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माधवाय मित्राय नमः हृदि ३ ॐ भं ईं गोविंदाय वरुणाय नमः कंठे ४ ॐ गं उं विष्णवेंऽशवे नमः दक्षपार्श्वे ५ ॐ वं ऊं मधुसूदनाय भगाय नमः दक्षिणांशे ६ ॐ तें एं त्रिविक्रमाय विवस्वते नमः गलदक्षिणभागे ७ ॐ वां ऐं वामनायेन्द्राय नमः वामपार्श्वे ८ ॐ सुं ओं श्रीधराय पूष्णे नमः वामांसे ९ ॐ दें औं हृषीकेशाय पर्जन्याय नमः गलवामभागे १० ॐ वां अं पद्मनाभाय त्वष्ट्रे नमः पृष्ठे ११ ॐ यं अः दामोदराय विष्णवे नमः ककुदि १२ ॐ नमो भगवते वासुदेवाय मूर्ध्नि १३ इति द्वादशमूर्तिपंजर न्यासः ॥ ॐ किरीटकेयूरहारमकरकुंडलधरशंखचक्रगदांभोजपीतांबरधरश्रीवत्सांकितवक्षःस्थलश्रीभूमिसहितात्मज्योतिर्द्वयदीप्तकराय सहस्रादित्यतेजसे नमः इति मंत्रेण शिर आदिपादांतं व्यापकं विन्यसेत् ॥ इति किरीटमंत्रन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत ॥ उद्यत्कोटिदिवाकराभमनिशं शंखं गदां पंकजं चक्रं बिभ्रतमिन्दिरावसुमतीसंशोभिपार्श्वद्वयम्॥ कोटीरांगदहारकुंडलधरं पीतांबरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥ १ ॥ इति ध्यात्वा सर्वतोभद्रमंडले मं मंडूकादिपरतत्वांतपीठदेवताभ्यो नमः इति पीठदेवतां संपूज्य पीठशक्तिं पूजयेत् ॥ तत्र क्रमः ॥ पूर्वादिक्रमेण ॐ विमलायै नमः १ ॐ उत्कर्षिण्यै नमः २ ॐ ज्ञानायै नमः ३ ॐ क्रियायै नमः ४ ॐ योगायै नमः ५ ॐ प्रह्व्यै नमः ६ ॐ सत्यायै नमः ७ ॐ ईशानायै नमः ८ मध्ये ॐ अनुग्रहायै नमः ९ इति नवपीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं अग्न्युत्तारणपूर्वकं ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोग

---

१ द्वादशाक्षरं मंत्रवरं विन्यसेद्ब्रह्मरंध्रके ॥ वासुदेवो भवेत्साक्षाद्व्यापितस्तस्य तेजसा ॥ २ तन्मूर्तिपंजरन्यासोऽभीप्सितः परमेष्ठिना ॥ सकृन्न्यासाद्भवेन्मंत्री विष्णुमूर्तिरनुत्तमा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पद्मपीठात्मने नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहना
दिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः॥
पुष्पांजलिमादाय ॐ संविन्मय परो देवः परामृतरसप्रिय ॥ अनुज्ञां विष्णो मे
देहि परिवारार्चनाय मे ॥ इति पठित्वा पुष्पांजलिं च दद्यात् ॥ इत्याज्ञां
गृहीत्वा आवरणपूजामारभेत् तद्यथा । षट्कोणकेसरेषु अग्निकोणे ॐ क्रुद्धो
ल्काय हृदयाय नमः १ नैर्ऋत्ये ॐ महोल्कायशिरसे स्वाहा २ वायव्ये ॐ
वीरोल्काय शिखायै वषट् ३ ऐशान्ये ॐ द्युल्काय कवचाय हुं ४ देवपश्चिमे
सहस्रोल्कायास्त्राय फट् ५ इति पंचांगानि पूजयेत् ॥ ततः पुष्पांजलि
मादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्प
ये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजि
तास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् १ ततोऽष्टदलमूले पूज्यपूजक
योर्मध्ये प्राचीं प्रकल्प्य पूर्वादिक्रमेण ॐ ॐ नमः १ ॐ नं नमः २ ॐ मों
नमः ३ ॐ नां नमः ४ ॐ रां नमः ५ ॐ यं नमः ६ ॐ णां नमः ७ ॐ

अष्टाक्षरीविष्णुपूजनयंत्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यं नमः ८ इति मंत्रवर्णान् पूजयित्वा पुष्पांजलिं च दद्यात् इति द्वितीयावरणम् ।। २ ।। ततोऽष्टदलमध्येषु पूर्वे ॐ वासुदेवाय नमः । वासुदेवश्रीपादुकां पूजयामि तर्पयामि नमः १ इति सर्वत्र । दक्षिणे ॐ संकर्षणाय नमः संकर्षणश्रीपा० २ पश्चिमे ॐ प्रद्युम्नाय नमः प्रद्युम्नश्रीपा० ३ उत्तरे ॐ अनिरुद्धाय नमः अनिरुद्धश्रीपा० ४ अग्निकोणे ॐ शांत्यै नमः शांतिश्रीपा० ५ नैर्ऋते ॐ श्रियै नमः श्रीश्रीपा० ६ वायव्ये ॐ सरस्वत्यै नमः सरस्वतीश्रीपा० ७ ऐशान्ये ॐ रत्यै नमः रतिःश्रीपा० ८ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम् ।। ३ ।। ततोऽष्टदलाग्रेषु ।। पूर्वे ॐ चक्राय नमः १ दक्षिणे ॐ शंखाय नमः २ पश्चिमे ॐ गदायै नमः ३ उत्तरे ॐ पद्माय नमः ४ अग्निकोणे ॐ कौस्तुभाय नमः ५ नैर्ऋते ॐ मुसलाय नमः ६ वायव्ये ॐ खड्गाय नमः ७ ऐशान्ये ॐ वनमालायै नमः ८ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात । इति चतुर्थावरणम् ॥ ४ ॥ भूपुराभ्यंतरे पूर्वे ॐ गरुडाय नमः १ दक्षिणे ॐ शंखनिधये नमः २ पश्चिमे ॐ ध्वजाय नमः ३ उत्तरे ॐ पद्मनिधये नमः ४ अग्निकोणे ॐ विघ्नाय नमः ५ नैर्ऋते ॐ आर्य्यायै नमः ६ वायव्ये ॐ दुर्गायै नमः ७ ऐशान्ये ॐ सेनान्यै नमः इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात । इति पंचमावरणम् ॥ ५ ॥ ततो भूपुरे पूर्वादिक्रमेण । ॐ लं इन्द्राय नमः इन्द्रश्रीपा० १ ॐ रं अग्नये नमः अग्निश्रीपा० २ ॐ मं यमाय नमः यमश्रीपा० ४ ॐ क्षं निर्ऋतये नमः निर्ऋतश्रीपा० ४ ॐ वं वरुणाय नमः वरुणश्रीपा० ५ ॐ यं वायवे नमः वायुश्रीपा० ६ ॐ कुं कुबेराय नमः कुबेरश्रीपा० ७ ॐ हं ईशानाय नमः ईशानश्रीपा० ८ इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः ब्रह्मश्रीपा० ९ वरुणनिर्ऋतयोर्मध्ये ॐ ह्रीं अनंताय नमः अनंतश्रीपा० १० इति दशदिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात । तद्बाह्ये पूर्वादिक्रमेण । ॐ वं वज्राय नमः १ ॐ शं शक्तये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः २ ॐ दं दंडाय नमः ३ ॐ खं खड्गाय नमः ४ ॐ पं पाशाय नमः ५ ॐ अं अंकुशाय नमः ६ ॐ गं गदायै नमः ७ ॐ त्रिं त्रिशूलाय नमः ८ ॐ पं पद्माय नमः ९ ॐ चं चक्राय नमः इत्यस्त्राणि पूजयित्वा पुष्पांजलिं च दद्यात् । इति सप्तमावरणम् ॥ ७ ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं षोडशलक्षजपः ॥ तथा च । विकारलक्षं प्रजपेन्मनुमेनं समाहितः ॥ तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः ॥ १ ॥ धर्मार्थकामाँल्लब्ध्वा वै विष्णोः सायुज्यमाप्नुयात् ॥ इत्यष्टाक्षरविष्णुमंत्रप्रयोगः ॥ अथ द्वादशाक्षरीविष्णुमंत्रप्रयोगः (शारदायाम्) मंत्रो यथा । ॐ नमो भगवते वासुदेवाय ॥ इति द्वादशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य मंत्रस्य प्रजापतिर्ऋषिः । गायत्री छंदः । वासुदेवपरमात्मा देवता । सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ प्रजापतिऋषये नमः शिरसि १ गायत्रीछंदसे नमः मुखे २ वासुदेवपरमात्मदेवतायै नमः हृदि ३ विनियोगाय नमः सर्वांगे ४ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः १ नमो तर्जनीभ्यां नमः २ भगवते मध्यमाभ्यां नमः ३ वासुदेवाय अनामिकाभ्यां नमः ४ ॐ नमो भगवते वासुदेवाय कनिष्ठिकाभ्यां नमः ५ इति करन्यासः ॥ ॐ हृदयाय नमः १ नमो शिरसे स्वाहा २ भगवते शिखायै वषट् ३ वासुदेवाय कवचाय हुँ ४ ॐ नमो भगवते वासुदेवाय अस्त्राय फट् ५ इति पंचांगन्यासः ॥ ॐ ॐ नमः मूर्ध्नि १ ॐ नं नमः भाले २ ॐ मों नमः नेत्रयोः ३ ॐ भं नमः मुखे ४ ॐ गं नमः गले ५ ॐ वं नमः बाह्वोः ६ ॐ तें नमः हृदये ७ ॐ वां नमः कुक्षौ ८ ॐ सुं नमः नाभौ ९ ॐ दें नमः लिंगे १० ॐ वां नमः जान्वोः ११ ॐ यं नमः पादयोः १२ इति मंत्रवर्णन्यासः ॥ इति न्यासविधिं कृत्वा ध्यायेत् ॥ विष्णुं शारदचन्द्रकोटिसदृशं शंखं रथांगं गदामंभोजं दधतं सिताब्जनि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निलयं कांत्या जगन्मोहनम् ॥ आबद्धांगदहारकुंडलमहामौलिं स्फुरत्कंकणं श्रीवत्साकमुदारकौस्तुभधरं वंदे मुनींद्रैः स्तुतम् ॥ इति ध्यात्वा सर्वतोभद्रमंडले मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः। इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत ॥ तद्यथा । पूर्वादिक्रमेण ॐ विमलायै नमः १ ॐ उत्कर्षिण्यै नमः २ ॐ ज्ञानायै नमः ३ ॐ क्रियायै नमः ४ ॐ योगायै नमः ५ ॐ प्रह्वयै नमः ६ ॐ सत्यायै नमः ७ ॐ ईशानायै नमः ८ मध्ये अनुग्रहायै नमः ९ इति नवपीठशक्तीः संपूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रमग्र्युत्तारणपूर्वकम् ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः ॥ इति मंत्रेण पुष्पासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात ॥ तत्र क्रमः ॥ पुष्पांजलिमादाय ॐ संविन्मयः परो देव परामृत रसप्रिय ॥ अनुज्ञां विष्णो मे देहि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा आवरणपूजामारभेत । षट्कोणकेसरेषु अग्निकोणे ॐ हृदयाय नमः १ नैर्ऋते ॐ नमो शिरसे स्वाहा २ वायव्ये भगवते शिखायै वषट् ३ ईशान्ये वासुदेवाय कवचाय हुं ४ देवतापश्चिमे ॐ नमो भगवते वासुदेवाय अस्त्राय फट् ५ इति पंचांगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १ ॥ ततः पूज्यपूजकयो र्मध्ये प्राचीं प्रकल्प्य ततोऽष्टदले पूर्वे ॐ वासुदेवाय नमः वासुदेवश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ दक्षिणे ॐ संकर्षणाय नमः संकर्षणश्रीपा० २ पश्चिमे ॐ प्रद्युम्नाय नमः प्रद्युम्नश्रीपा० ३ उत्तरे ॐ अनिरुद्धाय नमः अनिरुद्धश्रीपा० ४ अग्नि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोणे ॐ शांत्यै नमः शांतिश्रीपा० ५ नैर्ऋते ॐ श्रियै नमः श्रीश्रीपा० ६ वायव्ये ॐ सरस्वत्यै नमः सरस्वतीश्रीपा० ७ऐशान्ये ॐ रत्यै नमः रतिश्रीपा० ८ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम्॥२॥ ततो द्वादशदले पूर्वादिक्रमेण ॐ ॐ केशवाय नमः केशवश्रीपा० १ ॐ नं नारायणाय नमः नारायणश्रीपा० २ ॐ मों माधवाय नमः माधवश्रीपा० ३ ॐ भं गोविंदाय नमः गोविंदश्रीपा०४ ॐ गं विष्णवे नमः विष्णुश्रीपा० ५ ॐ वं मधुसूदनाय नमः मधुसूदनश्रीपा० ६ ॐ तें त्रिविक्रमाय नमः त्रिविक्रम श्रीपा० ७ ॐ वां वामनाय नमः वामनश्रीपा० ८ ॐ सु श्रीधराय नमः श्रीधरश्रीपा० ९ ॐ दें हृषीकेशाय नमः हृषीकेशश्रीपा० १० ॐ वां पद्मनाभाय नमः पद्मनाभश्रीपा० ११ ॐ यं दामोदराय नमः दामोदरश्रीपा० १२ इति द्वादशमूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात । इति तृतीयावरणम्॥ ॥ ३ ॥ ततो भूपुरे । इन्द्रादीन् दशदिक्पालान् तद्बाह्ये वज्राद्यस्त्राणि च पूजयित्वा पुष्पांजलिं च दद्यात् । इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं

द्वादशाक्षरीविष्णुमंत्रयंत्रम.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संपूज्य जपं कुर्य्यात्। अस्य पुरश्चरणं द्वादशलक्षजपः । द्वादशसहस्रहोमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च । वर्णलक्षं जपेन्मंत्रं दीक्षितो विजितेन्द्रियः ॥ तत्सहस्रं प्रजुहुयात्तिलैराज्यपरिप्लुतैः ॥ १ ॥ एवं संपूजितो विष्णुः प्रदद्यादिष्टमात्मनः ॥ पायसेन घृताक्तेन मंत्रवर्णसहस्रकम् ॥ २ ॥ जुहुयान्मानवः सिद्ध्यै समिद्भिः क्षीरभूरुहाम् ॥ तत्संख्यया पयोक्ताभिः सर्वपापविमुक्तये ॥ ३ ॥ इति द्वादशाक्षरीविष्णुमंत्रप्रयोगः ॥

॥ श्रीगणेशाय नमः ॥ अथ राममंत्रप्रयोगः ॥ मंत्रो यथा । "रां रामाय नमः ॥" इति षडक्षरमंत्रः ॥ अस्य विधानम् । अस्य मंत्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । श्रीरामो देवता । रां बीजम् । नमः शक्तिः । चतुर्विधपुरुषार्थसिद्धये जपे विनियोगः ॥ ॐ ब्रह्मणे ऋषये नमः शिरसि १ गायत्रीछन्दसे नमः मुखे २ श्रीरामदेवतायै नमः हृदि ३ रां बीजाय नमः गुह्ये ४ नमः शक्तये नमः पादयोः ५ विनियोगाय नमः सर्वांगे ६ इति ऋष्यादिन्यासः ॥ ॐ रां अंगुष्ठाभ्यां नमः १ ॐ रीं तर्जनीभ्यां नमः २ ॐ रूं मध्यमाभ्यां नमः ३ ॐ रैं अनामिकाभ्यां नमः ४ ॐ रौं कनिष्ठिकाभ्यां नमः ५ ॐ रः करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ ॐ रां हृदयाय नमः १ ॐ रीं शिरसे स्वाहा २ ॐ रूं शिखायै वषट् ३ ॐ रैं कवचाय हुं ४ ॐ रौं नेत्रत्रयाय वौषट् ५ ॐ रः अस्त्राय फट् ६ इति हृदयादिषडंगन्यासः ॥ ॐ रां नमः ब्रह्मरंध्रे १ ॐ रां नमः भ्रुवोर्मध्ये २ ॐ मां नमः हृदि ३ ॐ यं नमः नाभौ ४ ॐ नं नमः लिंगे ५ ॐ मं नमः पादयोः ६ इति मंत्रवर्णन्यासः ॥ इति न्यासविधिं कृत्वा ध्यायेत् । कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं

For Private And Personal Use Only

दधानमपरं हस्तांबुजं जानुनि ॥सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतीं मुकुटांगदादिविविधाकल्पोज्ज्वलांगं भजे ॥ १ ॥ इति ध्यायेत् । ततः सर्वतोभद्रमण्डले ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य नवपीठशक्तीः पूजयेत् तद्यथा॥ पूर्वादिक्रमेण । ॐ विमलायै नमः १ ॐ उत्कर्षिण्यै नमः २ ॐ ज्ञानायै नमः ३ ॐ क्रियायै नमः ४ ॐ योगायै नमः ५ ॐ प्रह्वयै नमः ६ ॐ सत्यायै नमः ७ ॐ ईशानायै नमः ८ मध्ये ॐ अनुग्रहायै नमः ९ ॥ इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा अग्न्युत्तारणपूर्वकम् ॐ नमो भगवते रामाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः॥इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठ मध्ये संस्थाप्य प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वा वाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् । तत्र क्रमः । पुष्पांजलिमादाय ॐ संविन्मयः परो देव परामृतरसप्रिय ॥ अनुज्ञां देहि मे राम परिवारार्चनाय मे॥ इति पठित्वा पुष्पांजलिं दद्यात् । इत्याज्ञां गृहीत्वा आवरणपूजामारभेत । देववामपार्श्वे श्रीसीतायै नमः । सीताश्रीपादुकां पूजयामि तर्पयामि नमः १ इति सर्वत्र । अग्निकोणे । ॐ शार्ङ्गाय नमः शार्ङ्गश्रीपा० २ दक्षिणपार्श्वे ॐ शराय नमः ३ वामपार्श्वे ॐ चापाय नमः ४ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत । इति प्रथमावरणम् ॥ १ ॥ ततः षट्कोणकेसरेषु अग्निकोणे ॐ रां हृदयाय नमः १ निर्ऋते ॐ ह्रीं शिरसे स्वाहा २ वायव्ये ॐ रूं शिखायै वषट् ३ ऐशान्ये ॐ रैं कवचाय हुं ४ पूज्यपूजकयोर्मध्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ रौं नेत्रत्रयाय वौषट् ५ देवपश्चिमे ॐ रः अस्त्राय फट् ६ इति षडंगानि पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम्॥ २ ॥ तद्बहिरष्टदले पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य प्राचीक्रमेण ॐ हनुमते नमः । हनुमच्छ्रीपा० १ ॐ सुग्रीवाय नमः । सुग्रीवश्रीपा० २ ॐ भरताय नमः । भरतश्रीपा० ३ ॐ विभीषणाय नमः । विभीषणश्रीपा० ४ ॐ लक्ष्मणाय नमः । लक्ष्मणश्रीपा० ५ ॐ अंगदाय नमः। अंगदश्रीपा० ॥६॥ ॐ शत्रुघ्नाय नमः। शत्रुघ्नश्रीपा० ७ ॐ जाम्बवते नमः। जाम्बवच्छ्रीपा० ८ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम् ३ ततोष्टदलाग्रेषु । ॐ सृष्टाय नमः । सृष्टश्रीपा० १ ॐ जयन्ताय नमः । जयंतश्रीपा० २ ॐ विजयाय नमः । विजयश्रीपा० ३ ॐ सुराष्ट्राय नमः । सुराष्ट्रश्रीपा० ४ ॐ राष्ट्रवर्द्धनाय नमः । राष्ट्रवर्द्धनश्रीपा० ५ ॐ अकोपाय नमः । अकोपश्रीपा० ६ ॐ धर्म्मपालनाय नमः । धर्म्मपालश्रीपा० ७ ॐ सुमन्ताय नमः । सुमंतश्रीपा० ८ इत्यष्टौ

षडक्षरीराममंत्रप्रयोगावरणयंत्रम्



For Private And Personal Use Only

पूजयित्वा पुष्पांजलिं च दद्यात् । इति चतुर्थावरणम् ॥ ४ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् तद्बाहिर्वज्राद्यायुधाणि च पूजयित्वा पुष्पांजलिं च दद्यात् । इत्यावरणपूजां च कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् अस्य पुरश्चरणं षड्लक्षजपः । तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च (शारदातिलके) वर्णलक्षं जपेन्मंत्रं तद्दशांशं सरोरुहैः ॥ जुहुयादर्चिते वह्नौ ब्राह्मणान्भोजयेत्ततः ॥ १ ॥ एवं पूजादिभिः सिद्धे मनौ कर्माणि साधयेत ॥ जातीप्रसूनैर्जुहुयाच्चंदनांभःसमुक्षितैः ॥ २ ॥ राजवश्याय कमलैर्धनधान्यादिसंपदे ॥ नीलोत्पलानां होमेन वशयेदखिलं जगत् ॥ ३ ॥ बिल्वप्रमाणैर्जुहुयादिंदिरावाप्तये नरः ॥ दूर्वाहोमेन दीर्घायुर्भवेन्मंत्री निरामयः ॥ ४ ॥ रक्तोत्पलहुतान्मंत्री धनमाप्नोति वांछितम् ॥ मेधाकामेन होतव्यं पालाशकुसुमैर्नवैः ॥ ५ ॥ तज्जप्तमंभः प्रपिबेत्कविर्भवति वत्सरात् ॥ तन्मंत्रितान्नं भुंजीत महदारोग्यमाप्नुयात् ॥ ६ ॥ अयं मंत्रः षड्विधः । तथा च-स्वकामशक्तिवाग्लक्ष्मीताराद्यः पंचवर्णकः ॥ षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः ॥ १ ॥ ब्रह्मा संमोहनः शक्तिर्दक्षिणामूर्तिरव्ययः ॥ अगस्तिः श्रीशिवः प्रोक्तो मुनयोऽत्र क्रमादिमे ॥ २ ॥ अथवा कामबीजादेर्विश्वामित्रो मुनिर्म्मनोः ॥ छंदो गायत्रसंज्ञं च श्रीरामश्चैव

अथ षड्विधमंत्रस्वरूपचक्रम् ।

षड्विधमंत्रस्वरूपम्.	ऋषिः	छंदः	देवता
१ रां रामाय नमः	ब्रह्मा	गायत्री	श्रीरामः
२ क्लीं रामाय नमः	संमोहन-विश्वामित्रः	गायत्री	श्रीरामः
३ ह्रीं रामाय नमः	शक्तिः	गायत्री	श्रीरामः
४ ऐं रामाय नमः	दक्षिणामूर्तिः	गायत्री	श्रीरामः
५ श्रीं रामाय नमः	अगस्तिः	गायत्री	श्रीरामः
६ ॐ रामाय नमः	शिवः	गायत्री	श्रीरामः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवता॥ ३॥ध्यानपूजादिकं सर्वं पूर्ववत्कार्यम् ॥ इति षड्विधमंत्रस्वरूपम् ॥अथ दशाक्षररामसंत्रप्रयोगः॥ (शारदायाम्) मंत्रो यथा "हुं जानकीवल्लभाय स्वाहा" इति दशाक्षरो मंत्रः। अस्य मंत्रस्य वशिष्ठ ऋषिः। विराट् छंदः। सीतापाणिपरिग्रहे श्रीरामो देवता। हुं बीजम् स्वाहा शक्तिः। चतुर्विधपुरुषार्थसिद्धये विनियोगः। ॐ वशिष्ठऋषये नमः शिरसि १ विराट्छंदसे नमः मुखे २ सीतापाणिपरिग्रहे श्रीरामदेवतायै नमः हृदि ३ हुं बीजाय नमः गुह्ये ४ स्वाहा शक्तये नमः पादयोः ५ विनियोगाय नमः सर्वांगे॥इति ऋष्यादिन्यासः॥ ॐ क्लीं अंगुष्ठाभ्यां नमः १ ॐ क्लीं तर्जनीभ्यां नमः २ ॐ क्लीं मध्यमाभ्यां नमः ३ ॐ क्लीं अनामिकाभ्यां नमः ४ ॐ क्लीं कनिष्ठिकाभ्यां नमः ५ ॐ क्लीं करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ एवं हृदयादिषडंगन्यासं कुर्यात ॥ ॐ हुं नमः शिरसि १ ॐ जां नमः ललाटे २ ॐ नं नमः भ्रूमध्ये ३ ॐ कीं नमः तालुनि ४ ॐ वं नमः कंठे ५ ॐ हं नमः हृदि ६ ॐ भां नमः बाह्वोः ७ ॐ यं नमः नाभौ ८ ॐ स्वां नमः जान्वोः ९ ॐ हां नमः पादयोः १० इति मंत्रवर्णन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत। "अयोध्यानगरे रम्ये रत्नसौन्दर्यमंडपे ॥ मंदारपुष्पैरबद्धवितानतोरणांकिते ॥ १ ॥ सिंहासनसमारूढं पुष्पकोपरि राघवम् ॥ रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः ॥२॥ संस्तूयमानं मुनिभिः सर्वतः परिसेवितम् ॥ सीतालंकृतवामांगं लक्ष्मणेनोपशोभितम् ॥ ३॥ श्यामं प्रसन्नवदनं सर्वाभरणभूषितम् ॥ एवं ध्यात्वा मंत्रं जपेत्। अस्य पुरश्चरणं दशलक्षजपः। अन्यत्सर्वं पूर्ववत् ॥ इति दशाक्षरराम मंत्रप्रयोगः ॥ राममंत्रषट्स्वरूपम् ॥ वह्निर्नारायणाढ्यो यो जठरः केवलस्तथा ॥ द्व्यक्षरो मंत्रराजोयं सर्वाभीष्टफलप्रदः ॥ १ ॥ श्री मायामन्मथैकैकबीजाद्यंतगतो मनुः ॥ चतुर्वर्णः स एव स्यात् षड्वर्णो वांछित प्रदः ॥२॥ स्वाहांतो हुंफडंतो वा नमोऽन्तो वा भवेन्मनुः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तारो मायारमानंगवाक्स्वबीजैस्तु षड्विधः ॥ ३ ॥ त्र्यक्षरो मंत्रराजः स्यात्सर्वाभीष्टफलप्रदः ॥ द्व्यक्षरश्चन्द्रभद्रांतो मंत्रोयं चतुरक्षरः ॥ ४ ॥ रामाय हन्मनुः प्रोक्तो मंत्रः पंचाक्षरोऽ परः ॥ पंचाशन्मातृकावर्णप्रत्येकपूर्वको मनुः ॥ ५ ॥ लक्ष्मीवाग्मन्मथादिश्च तारादि स्यादनेकधा ॥ वह्निस्थं शयनं विष्णोरूर्द्ध्वचन्द्रविभूषितम् ॥६॥ एकाक्षरो मनुः प्रोक्तो मंत्रराजः सुरद्रुमः॥ ब्रह्मा मुनिः स्याद्गायत्री छंदो रामस्तु देवता ॥ ७ ॥ एकाक्षरेतु द्वादशलक्षजपः ॥ अन्येषां षड्लक्षजपः ॥ इति राममंत्रप्रयोगः ॥ अथ रामनामलेखनविधिः (श्रीमदानंदरामायणे मनोहरकांडे) शृणुष्व विष्णुदास त्वं यत्तेहं प्रवदामि च॥तुष्ट्यर्थं रामचन्द्रस्य नित्यं पत्रे तु मानवैः॥लेखनीयं रामनाम शतानि नव प्रत्यहम् ॥ अथवाष्टोत्तरशतं पूजनीयं सविस्तरम् ॥२॥एवं कोटिमितं लेख्यं लक्षं वास्तु ततः परम् ॥ हवनं हि दशांशेन कर्तव्यं विधिपूर्वकम्॥ ३॥इदं विष्णुरिति ऋचा तिलाज्यैः पायसेन वा॥नवान्नेनाऽथ वा कार्यं राघवं परिपूज्य च ॥ ४ ॥ युधिष्ठिरस्तु तच्छ्रुत्वा करिष्यति यथाविधि॥मामत्रयेण तस्यैव राजप्राप्तिर्भविष्यति॥५॥अंते च परमं स्थानं गमिष्यति मनोबलम्॥ इति रामनामलेखनविधिः ॥ अथ कृष्णमंत्रप्रयोगः॥मंत्रो यथा (शारदातिलके) "क्लीं कृष्णाय गोविंदाय गोपीजनवल्लभाय स्वाहा" इत्यष्टादशाक्षरो मंत्रः॥ अस्य विधानम्॥अस्य मंत्रस्य नारद ऋषिः। गायत्री छंदः। श्रीकृष्णो देवता । क्लीं बीजम् । स्वाहा शक्तिः । चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॐ नारदऋषये नमः शिरसि॥ १ ॥ॐ गायत्री छंदसे नमः मुखे॥ २॥ श्रीकृष्णदेवतायै नमः हृदि॥ ३॥क्लीं बीजाय नमः गुह्ये ॥४॥ स्वाहाशक्तये नमः पादयोः ॥५॥ विनियोगाय नमः सर्वांगे ॥६॥ इति ऋष्यादिन्यासः॥ क्लीं कृष्णाय अंगुष्ठाभ्यां नमः १ गोविंदायतर्जनीभ्यां नमः२ गोपीजन मध्यमाभ्यां नमः३ वल्लभाय अनामिकाभ्यां नमः४ स्वाहाकनिष्ठिकाभ्यां नमः ५ इति करन्यासः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्लिंकृष्णाय हृदयाय नमः १ गोविंदायशिरसे स्वाहा २ गोपीजन शिखायै वषट् ३ वल्लभाय कवचाय हुँ ४ स्वाहा अस्त्रायफट् इति हृदयादिपंचांगन्यासः । एवं न्यासं कृत्वा ध्यायेत् । अथ ध्यानम् । स्मरेद्वृक्षवने रम्ये मोहयंतमनारतम् । गोविंदं पुंडरीकाक्षं गोपकन्याःसहस्रशः॥ १ ॥आत्मनो वदनांभोजप्रेषिताक्षिमधुव्रताः॥पीडिताः कामबाणेन विरमाश्लेषणोत्सुकाः॥ २॥ मुक्ताहारलसत्पीनतुंगस्तनभरानताः॥ स्रस्तधम्मिल्लवसना मदस्खलितभाषणाः ॥ ३ ॥ दंतपंक्तिप्रभोद्भासिस्पंदमानाधरांचिताः ॥ विलोभयंती विविधैर्विभ्रमैर्भावगर्भितैः॥ ४ ॥ फुल्लेन्दीवरकांतमिन्दुवदनं बर्हावतंसं प्रियं श्रीवत्सांकमुदारकौस्तुभधरं पीतांबरं सुंदरम् ॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे ॥ ५ ॥ इति ध्यायेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले ॐ मं मंडूकादिपरतत्वांतपीठदेवताभ्यो नमः । इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् । तद्यथा । पूर्वादिक्रमेण । ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्वयै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥ ८ ॥ मध्ये-ॐ अनुग्रहायै नम ः॥ ९ ॥ इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्यतदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य । ॐ नमो भगवते श्रीकृष्णाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगप्रपीठात्मने नमः । इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् । तद्यथा । पुष्पांजलिमादाय । ॐ संविन्मयः परोदेवः परामृतरसप्रिय ॥ अनुज्ञां कृष्ण मे देहि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा आवरणपूजामारभेत् ॥ तद्यथा । पंचकोणे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आग्नेय्यादिक्रमेण ॥ क्लीं कृष्णाय हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र ॥ १ ॥ गोविंदाय शिरसे स्वाहा शिरःश्रीपा० ॥ २ ॥ गोपीजनशिखायै वौषट् । शिखाश्री० ॥ ३ ॥ वल्लभाय कवचायहुँ । कवचश्रीपा० ॥ ४ ॥ स्वाहा अस्त्राय फट् । अस्त्रश्रीपा० ॥ ५ ॥ इति पंचांगानि पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्वा पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम्॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ कालिंद्यै नमः । कालिंदीश्रीपा० ॥ १ ॥ ॐ नाग्नजित्यै नमः । नाग्नजितीश्रीपा० ॥ २ ॥ ॐ मित्रविंदायै नमः । मित्रविंदाश्रीपा० ॥ ३ ॥ ॐ चारुहासिन्यै नमः। चारुहासिनीश्रीपा० ॥ ४ ॥ ॐ रोहिण्यै नमः। रोहिणीश्रीपा० ॥ ५ ॥ ॐ जांबवत्यै नमः। जांबवतीश्रीपा० ॥ ६ ॥ ॐ रुक्मिण्यै

अष्टाक्षरीकृष्णपूजनयंत्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः । रुक्मिणीश्रीपा० ७ ॐ सत्यभामायै नमः । सत्यभामाश्रीपा० ८ इत्यष्टौ पट्टराज्ञीः पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥ २॥ ततोऽष्टदलाग्रेषु प्राचीक्रमेण ॐ ऐरावताय नमः ॥ १॥ ॐ पुंडरीकाय नमः ॥ २॥ ॐ वामनाय नमः ॥ ३॥ ॐ कुमुदाय नमः ॥ ४ ॥ ॐ अंजनाय नमः ॥ ५ ॥ ॐ पुष्पदन्ताय नमः ॥ ६ ॥ ॐ सार्वभौमाय नमः ॥ ७ ॥ ॐ सुप्रतीकाय नमः ॥ ८ ॥ इत्यष्टौ गजान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्रायायुधानि च संपूज्य पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतद्वयात्मको जपः ॥ तत्तद्दशांशेन होम तर्पणमार्जनं ब्राह्मणभोजनं च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति । एवं सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् । तथा चामंत्रमेनं यथान्याथ

नवविधकृष्णमंत्रस्वरूपचक्रम् ।

क्लीं कृष्णाय स्वाहा ।	इति एकाक्षरो मंत्रः । ६
गोपीजनवल्लभाय स्वाहा ।	इति दशाक्षरो मंत्रः ।
क्लीं हृषीकेशाय नमः ।	इत्यष्टाक्षरो मंत्रः ।
श्रीं ह्रीं क्लीं कृष्णाय स्वाहा ।	इत्यष्टाक्षरो मंत्रः ।
श्रीं ह्रीं क्लीं कृष्णाय गोविंदाय स्वाहा ।	इति द्वादशाक्षरो मंत्रः ।
ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा ।	इति षोडशाक्षरो मंत्रः ।
ऐं क्लीं कृष्णाय ह्रीं गोविंदाय श्री गोपीजनवल्लभाय स्वाहा स्रौं ।	इति द्वाविंशत्यक्षरो मंत्रः ।
ॐ क्लीं नमः भगवते नंदपुत्राय बालादिवपुषे श्यामलाय गोपीजनवल्लभाय स्वाहा ।	इति त्रयस्त्रिंशदक्षरो मंत्रः ।
ॐ क्लीं ह्रीं श्रीं गोपीजनवल्लभाय स्वाहा ।	इति चतुर्दशाक्षरो मंत्रः ।

पूजनादिकं सर्वं पूर्ववत्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मयुतद्वितयं जपेत् ॥ जुहुयादारुणाम्भोजैर्दशांशं सुसमाहितः॥ १ ॥ इति संपूजयेद्देवं गोविन्दं जगतां पतिम् ॥ कुर्वीत कल्पनिर्दिष्टान्प्रयोगा न्निजवांछितान् ॥ २ ॥ लक्ष्मीं प्रसूनैर्जुहुयाच्छ्रियमिच्छन्ननिंदिताम् ॥ साज्येनान्नेन जुहुयादाज्यान्नस्य समृद्धये ॥ ३ ॥ अरुणैः कुसुमैर्विप्राञ्जातीभिः पृथिवीपतीन् ॥ प्रसूनैरसितैर्वैश्याञ्छूद्रान्नीलोत्पलैर्नवैः॥ ४ ॥ वशयेल्लवणैः सर्वान् पंकजैर्वनिताजनम् ॥ गोशालासु कृतो होमः पायसेन ससर्पिषा ॥ ५ ॥ गवां शांतिकरोत्याशु गोविंदो गोकुलप्रियः ॥ शिशुवेषधरं देवं किंकिणीदामशोभितम् ॥ ६ ॥ स्मृत्वा प्रतर्पयेन्मंत्री दुग्धबुद्ध्या शुभैर्जलैः ॥ धनधान्यांशुकादीनि प्रीतस्तस्मै ददाति सः ॥ ७ ॥ इति कृष्णमन्त्रप्रयोगः ॥

॥ अथ लक्ष्मीनारायणमंत्रप्रयोगः ॥ मंत्रो यथा (शारदातिलके) ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः । इति चतुर्दशाक्षरो मंत्रः अस्य विधानम् । अस्य मंत्रस्य प्रजापतिर्ऋषिः । गायत्री छन्दः । वासुदेवो देवता । धर्मार्थकाममोक्षार्थे जपे विनियोगः । ॐ प्रजापतिऋषये नमः । शिरसि ॥ १ ॥ गायत्रीछन्दसे नमः मुखे ॥ २ ॥ वासुदेवदेवतायै नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वाङ्गे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं ह्रीं अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ श्रीं श्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ लक्ष्मी मध्यमाभ्यां नमः ॥ ३ ॥ ॐ वासुदेवाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ नमः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ ॐ ह्रीं ह्रीं हृदयाय नमः ॥ १ ॥ ॐ श्रीं श्रीं शिरसे स्वाहा ॥ २ ॥ ॐ लक्ष्मीं शिखायै वषट् ॥ ३ ॥ ॐ वासुदेवाय कवचायहुं ॥ ४ ॥ ॐ नमः अस्त्राय फट् ॥ ५ ॥ इति हृदयादिपंचांगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ विद्युचंद्रनिभं वपुः कमलजा वैकुंठयोरेकतां प्राप्तं स्नेहवशेन रत्नविलसद्भूषाभरालंकृतम् ॥ विद्यापंकजदर्पणान्मणिमयं कुंभं सरोजं गदां शंखं चक्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ममूनि बिभ्रदमितां दिश्याच्छ्रियं वः सदा ॥ १ ॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमण्डले ॐ मं मंडूकादिपरतत्त्वांतपीठ देवताभ्यो नमः । इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत । तद्यथा । पूर्वादिक्रमेण । ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्वै नमः ॥ ६ ॥ ॐ सत्यायै नमः॥ ७ ॥ ॐ ईशानायै नमः ॥ ८ ॥ मध्ये ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ॐ नमो भगवते लक्ष्मीनारायणाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञयाऽऽवरणपूजां च कुर्यात ॥ तद्यथा ॥ पुष्पांजलिमादाय । ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि मे देव परिवारार्चनाय मे॥ १॥ इति पठित्वा पुष्पांजलिं च दत्त्वा आवरपूजामारभेत् ॥ पंचकोणकेसरेषु आग्नेयादिक्रमेण ॥ ॐ ह्रीं ह्रीं हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ श्रीं श्रीं शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ लक्ष्मीं शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ वासुदेवाय कवचाय हुं । कवचश्रीपा० ॥ ४ ॥ ॐ नमः अस्त्राय फट् । अस्त्रश्रीपा० ॥ ५ ॥ इति पंचांगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत । इति प्रथमावरणम् ॥ १ ॥ततोऽष्टदले पूज्यपूजकयोर्मध्ये प्राचीं तदनुसारेण अन्या दिशाः प्रकल्प्य प्राच्यादिचतु

For Private And Personal Use Only

मं० म०

॥१६१॥

दिक्षु ॐ वासुदेवाय नमः ।वासुदेवश्रीपा० १ ॥ ॐ संकर्षणाय नमः । संकर्षण
श्रीपा० ॥ २ ॥ ॐ प्रद्युम्नाय नमः । प्रद्युम्नश्रीपा० ॥ ३ ॥ ॐ अनि
रुद्धाय नमः । अनिरुद्धश्रीपा० ॥ ४ ॥ आग्नेयादिचतुष्कोणेषु ॐ शांत्यै
नमः । शांतिश्रीपा० ॥ ५ ॥ ॐ श्रियै नमः । श्रीश्रीपा० ॥ ६ ॥ ॐ
सरस्वत्यै नमः । सरस्वतीश्रीपा० ॥ ७ ॥ ॐ रत्यै नमः रतिश्रीपा०॥८॥
इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥ २ ॥ ततो
द्वादशदले प्राच्यादिक्रमेण ॐ केशवाय नमः । केशवश्रीपा० ॥ १ ॥ ॐ नारा
यणाय नमः । नारायणश्रीपा० ॥ २ ॥ ॐ माधवाय नमः । माधवश्रीपा०
॥ ३ ॥ ॐ गोविंदाय नमः। गोविन्दश्रीपा० ॥ ४ ॥ ॐ विष्णवे नमः। विष्णुश्रीपा०
॥ ५ ॥ ॐ मधुसूदनाय नमः । मधुसूदनश्रीपा० ॥ ६ ॥ ॐ त्रिविक्रमाय
नमः त्रिविक्रमश्रीपा० ॥ ७ ॥ ॐ वामनाय नमः । वामनश्रीपा० ॥ ८ ॥
ॐ श्रीधराय नमः । श्रीधरश्रीपा० ॥ ९ ॥ ॐ हृषीकेशाय नमः । हृषीके
शश्रीपा० ॥ १० ॥ ॐ पद्मनाभाय नमः । पद्मनाभश्रीपा० ॥ ११ ॥ ॐ

लक्ष्मीनारायणपूजनयन्त्रम्.



पू० खं० १
वि० तं०
तरं० ७

॥ १६१ ॥

दामोदराय नँमः । दामोदरश्रीपा० ॥ १२ ॥ इति द्वादश मूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात् इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य जपं कुर्यात् । अस्य पुरश्चरणं चतुर्दशलक्षजपः । तत्सहस्रेण होमः तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च । वर्णलक्षं जपेदेनं तत्सहस्रं सरोरुहैः ॥ होमं कुर्याद्विकसितैर्मधुरत्रयसंयुतैः ॥ १ ॥ पायसेन कृतो होमो लक्ष्मीवश्यप्रदायकः ॥ मधुराक्तैस्तिलैर्हुत्वा सर्वकार्याणि साधयेत् ॥ २ ॥ इति चतुर्दशाक्षरलक्ष्मीनारायणमंत्रप्रयोगः ॥ अथ दधिवामनाख्यचमत्कारिमंत्रप्रयोगः ॥ मंत्रो यथा (शारदातिलके) "ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा" इत्यष्टादशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य मंत्रस्य इन्दुर्ऋषिर्विराट्छंदो दधिवामनो देवता सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ इन्दु ऋषये नमः शिरसि ॥ १ ॥ विराट्छंदसे नमः मुखे ॥ २ ॥ दधिवामनदेवतायै नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः ॥ १ ॥ नमो तर्जनीभ्यां नमः ॥ २ ॥ विष्णवे मध्यमाभ्यां नमः ॥ ३ ॥ सुरपतये अनामिकाभ्यां नमः ॥ ४ ॥ महाबलाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ हृदयाय नमः ॥ १ ॥ नमः शिरसे स्वाहा ॥ २ ॥ विष्णवे शिखायै वषट् ॥ ३ ॥ सुरपतये कवचाय हुँ ॥ ४ ॥ महाबलाय नेत्रत्रयाय वौषट् ॥ ५ ॥ स्वाहा अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ नमः मूर्ध्नि ॥ १ ॥ ॐ नं नमः भाले ॥ २ ॥ ॐ मों नमः नेत्रयोः ॥ ३ ॥ ॐ विं नमः कर्णयोः ॥ ४ ॥ ॐ ष्णं नमः नासिकयोः ॥ ५ ॥ ॐ वें नमः ओष्ठयोः ॥ ६ ॥ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुं नमः तालुके ॥७॥ ॐ रं नमः कंठे॥८॥ ॐ पं नमः बाहुद्वये॥९॥ॐ तं नमः पृष्ठे॥१०॥ॐ यें नमः हृदये ॥११॥ ॐ मं नमः उदरे ॥ १२ ॥ ॐ हाँ नमः नाभौ ॥ १३ ॥ ॐ वं नमः गुह्ये ॥ १४ ॥ ॐ लाँ नमः ऊरुद्वये ॥ १५ ॥ ॐ यं नमः जानुद्वये ॥ १६ ॥ ॐ स्वां नमः जंघयोः ॥ १७ ॥ ॐ हाँ नमः पादयोः ॥१८॥ इति मंत्रवर्णन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्॥ॐ मुक्तागौरं नवमणिलसद्भूषणं चंद्रसंस्थं भृंगाकारैरलकनिकरैः शोभिवक्रारविंदम्॥ हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णं दध्यन्नाढ्यं कनकचषकं धारयंतं भजामः ॥ १ ॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमण्डले ॐ मं मंडूकादिचन्द्रमण्डलांतं पीठदेवताभ्यो नमः । इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत्। तद्यथा । पूर्वादिक्रमेण । ॐ विमलायै नमः॥ १॥ ॐ उत्कर्षिण्यै नमः ॥२॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥४॥ ॐ योगायै नमः ॥५॥ ॐ प्रह्व्यै नमः॥६॥ॐ सत्यायै नमः॥७॥ ॐ ईशानायै नमः ॥ ८ ॥ मध्ये ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य " ॐ नमो भगवते दधिवामनाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः ॥ " इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा । पुष्पांजलिमादाय ॐ संविन्मयः परो देवः परामृतरसप्रिय ॥ अनुज्ञां देहि मे देव परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा आवरणपूजामारभेत् ॥ षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ हृदयाय नमः हृदयश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र ॥ १ ॥ नमः शिरसे स्वाहा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिरःश्रीपा० ॥ २ ॥ ॐ विष्णवे शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ सुरपतये कवचाय हुं । कवचश्रीपा० ॥ ४ ॥ ॐ महाबलाय नेत्रत्रयाय वौषट् । नेत्रश्रीपा० ॥ ५ ॥ स्वाहा अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्वा पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १ ॥ ततोष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राच्यादिचतुर्दिक्षु ॐ वासुदेवाय नमः । वासुदेवश्रीपा० ॥ १ ॥ ॐ संकर्षणाय नमः । संकर्षणश्रीपा० ॥ २ ॥ ॐ प्रद्युम्नाय नमः । प्रद्युम्नश्रीपा० ॥ ३ ॥ ॐ अनिरुद्धाय नमः । अनिरुद्धश्रीपा० ॥ ४ ॥ अग्न्यादिचतुष्कोणेषु ॐ शांत्यै नमः । शांतिश्रीपा० ॥ ५ ॥ ॐ श्रियै नमः। श्रीश्रीपा० ॥ ६ ॥ ॐ सरस्वत्यै नमः । सरस्वतीश्रीपा० ॥ ७ ॥ ॐ रत्यै नमः । रतिश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोष्टदलाग्रेषु प्राच्यादिषु चतु

दक्षिणामनपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिक्षु ॐ ध्वजाय नमः ॥ १ ॥ ॐ वैनतेयाय नमः ॥ २ ॥ ॐ कौस्तुभाय नमः ॥ ३ ॥ ॐ वनमालिकायै नमः ॥ ४ ॥ आग्नेयादिषु चतुष्कोणेषु ॐ शंखाय नमः ॥ ५ ॥ ॐ चक्राय नमः ॥ ६ ॥ ॐ गदायै नमः ॥ ७ ॥ ॐ शार्ङ्गाय नमः ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो द्वादशदले प्राचीक्रमेण ॐ केशवाय नमः । केशवश्रीपा० ॥ १ ॥ ॐ नारायणाय नमः । नारायणश्रीपा० ॥ २ ॥ ॐ माधवाय नमः । माधवश्रीपा० ॥ ३ ॥ ॐ गोविन्दाय नमः । गोविंदश्रीपा० ॥ ४ ॥ ॐ विष्णवे नमः । विष्णुश्रीपा० ॥ ५ ॥ ॐ मधुसूदनाय नमः । मधुसूदनश्रीपा० ॥ ६ ॥ ॐ त्रिविक्रमाय नमः । त्रिविक्रमश्रीपा० ॥७॥ ॐ वामनाय नमः । वामनश्रीपा० ॥८॥ ॐ श्रीधराय नमः । श्रीधरश्रीपा० ॥ ९ ॥ ॐ हृषीकेशाय नमः । हृषीकेशश्रीपा० ॥ १० ॥ ॐ पद्मनाभाय नमः । पद्मनाभश्रीपा० ॥ ११ ॥ ॐ दामोदराय नमः । दामोदरश्रीपा० ॥ १२ ॥ इति द्वादशमूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं त्रिलक्षजपः । तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्॥ तथा च । गुणलक्षं जपेन्मंत्रं तद्दशांशं घृतप्लुतैः ॥ पायसान्नैः प्रजुहुयाद्दध्यन्नैर्वा यथाविधि ॥ १ ॥ विधानमेतद्देवस्य कीर्तितं सुरपूजितम् ॥ पायसाज्येन जुहुयात्सहस्रं श्रियमाप्नुयात् ॥ २ ॥ धान्यहोमेन धान्याप्तिः शतपुष्पासमुद्भवैः ॥ बीजैः सहस्रसंख्यातैर्होमो भयविनाशनः ॥ ३॥ दध्योदनेन शुद्धेन हुत्वा मुच्येत दुर्गतेः ॥ स्मृत्वा त्रैविक्रमं रूपं जपेन्मंत्रमनन्यधीः ॥ ४ ॥ मुक्तो बन्धाद्भवेत्सद्यो नात्र कार्या विचारणा ॥ परे संपाद्य

For Private And Personal Use Only

देवेशं भित्तौ वा पूजयेत्सुधीः ॥ सुगंधिकुसुमैर्नित्यं महतीं श्रियमश्नुते ॥ ५ ॥ इत्यष्टादशाक्षरदधिवामनाख्यमंत्रप्रयोगः ॥ अथ हयग्रीवविष्णुमंत्रप्रयोगः ॥ (तंत्रसारे) मंत्रो यथा ॥ "हंसः सोहं विश्वातीर्णस्वरूपाय चिन्मयानंदरूपिणे ॥ तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे स्वाहा हंसः सोहम्॥" इति द्विचत्वारिंशदक्षरो हयग्रीवमंत्रः ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । हयग्रीवो देवता सर्वेष्टसिद्धये जपे विनियोगः ॥ ब्रह्मणे ऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ हयग्रीवाय देवतायै नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ हंसः सोहम् अंगुष्ठाभ्यां नमः ॥ १ ॥ विश्वातीर्णस्वरूपाय तर्जनीभ्यां नमः ॥ २ ॥ चिन्मयानंदरूपिणे मध्यमाभ्यां नमः ॥ ३ ॥ तुभ्यं नमो हयग्रीव अनामिकाभ्यां नमः ॥ ४ ॥ विद्याराजाय विष्णवे कनिष्ठिकाभ्यां नमः ॥ ५ ॥ स्वाहा हंसः सोहं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ हंसः सोहं हृदयाय नमः ॥ १ ॥ विश्वातीर्णश्वरूपाय शिरसे स्वाहा ॥ २ ॥ चिन्मयानंदरूपिणे शिखायै वषट् ॥ ३ ॥ तुभ्यं नमो हयग्रीव कवचायै हुं ॥ ४ ॥ विद्याराजाय विष्णवे नेत्रत्रयाय वौषट्॥५॥ स्वाहा हंसः सोहम् अस्त्राय फट्॥६॥इति हृदयादिषडंगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैरुपेतम् ॥ रथांगशंखांचितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः ॥१॥ इति ध्यायेत् ततः पीठादौ रचिते सर्वतोभद्रमंडले ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः। इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् । तद्यथा । ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्व्यै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥८॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्ये ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ॐ नमो भगवते हयग्रीवाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा (ह्लूं) इति बीजमंत्रेण मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात्॥ तद्यथा पुष्पांजलिमादाय ॐ संविन्मयः परो देवः परामृतरसप्रियः॥ अनुज्ञां देहि मे देव परिवारार्चनाय मे ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा आवरणपूजामारभेत्॥ षट्कोणकेसरेषु आग्नेयादिक्रमेण मध्ये दिक्षु च षडंगानि पूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोष्टदले पूज्यपूजकयो रन्तराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य पूर्वे ॐ ऋग्वेदाय नमः ॥ १ ॥ दक्षिणे ॐ यजुर्वेदाय नमः ॥ २ ॥ पश्चिमे ॐ सामवेदाय

हयग्रीवपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः ॥ ३ ॥ उत्तरे ॐ अथर्ववेदाय नमः ॥ ४ ॥ अग्निकोणे ॐ सर्वस्मृत्यै नमः ॥ ५ ॥ निर्ऋते ॐ सर्वन्यायशास्त्रेभ्यो नमः ॥ ६ ॥ वायव्ये ॐ सर्वधर्मशास्त्रेभ्यो नमः ॥ ७ ॥ ऐशान्ये ॐ सर्वपुराणशास्त्रेभ्यो नमः ॥ ८ ॥ इति पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजिता स्तर्पिताः संतु इति वदेत् इति द्वितीयावरणम् ॥ २ ॥ अन्यावरणं सर्वं पूर्ववत् संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं द्वाचत्वारिंश लक्षं जपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं कुंदपुष्पैर्मधुप्लुतैः ॥ दशांशं वैष्णवे वह्नौ जुहुयान्मंत्रसिद्धये ॥ १ ॥ एवं यो भजते देवं साक्षाद्वागीश्वरो भवेत् ॥ बिल्वैः फलैः कृतो होमः श्रीकरः परिगीयते ॥ २ ॥ कुन्दपुष्पाणि जुहुयादिच्छन्वाक्श्रियमव्ययाम् ॥ मनुनानेन संजप्तं घृतं ब्राह्मीरसे शृतम् ॥ ३ ॥ कवितामाहरेत्पुंसामनर्गलविजृंभिताम् ॥ वचामनेन संजप्तां भक्षयेत्प्रातरन्वहम् ॥ ४ ॥ सर्ववेदागमादीनां व्याख्याता जायते चिरात् ॥ मनोरस्य समो नास्ति ज्ञानैश्वर्यप्रदोऽपरः ॥ ५ ॥ इति चत्वारिंशदक्षर हयग्रीवमंत्रप्रयोगः ॥ अथ हयग्रीवस्यैकादशाक्षरमंत्रप्रयोगः ॥ मंत्रो यथा ॥ "ॐ हयग्रीवाय नमः स्वाहा ॐ" इत्येकादशाक्षरो हयग्रीवमंत्रः ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः। अनुष्टुप् छंदः। हयग्रीवरूपी विष्णुर्देवता । सर्वेष्टसिद्धये विनियोगः ॥ ऋष्यादिन्यासं कृत्वा कराङ्गन्यासं कुर्यात् ॥ हसां अंगुष्ठाभ्यां नमः ॥ १ ॥ हसीं तर्जनीभ्यां नमः ॥ २ ॥ हसूं मध्यमाभ्यां नमः ॥ ३ ॥ हसैं अनामिकाभ्यां नमः ॥ ४ ॥ हसौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ हसः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः एवमेव हृदयादिषडंगन्यासं कुर्यात् ॥ अथ ध्यानम् ॥ धवलनलिननिष्ठं क्षारगौरं कराग्रैर्जपवलयसरोजे पुस्तकाभीष्टदानैः ॥ दधतममलवस्त्राकल्पदानाभिरामं तुरगवदनविष्णु

For Private And Personal Use Only

नौमि वियाग्रविष्णुम् ॥ १ ॥ एवं ध्यात्वा विष्णुपीठे संपूज्य आवरणपूजां कुर्यात् ॥ प्रथमावरणम् ॥ प्रज्ञाहय १ मेधाहय २ स्मृतिहय ३ वियाहय ४ लक्ष्मीहय ५ वागीशीहय ६ वियाविशालहय ७ नादविमर्दनहयै ८ रित्यष्टभिः ॥ द्वितीयम् ॥ लक्ष्मीसरस्वतीरतिप्रीतिकीर्तिकांतितुष्टिपुष्टिभिः तृतीयम् ॥ कुमुदादिभिर्गजैः चतुर्थम् ॥ इन्द्रादिभिः पंचमावरणं अन्यत् सर्वं पूर्ववत् ॥ अस्य पुरश्चरणं लक्षचतुष्टयं जपः ॥ तथा च-वेदलक्षं जपेन्मंत्री दशांशं जुहुयात्ततः ॥ साज्येन दशांशहोमः ॥ इति हयग्रीवस्यैकादशाक्षरमंत्रप्रयोगः ॥

॥ अथ वाराहरूपविष्णुमंत्रप्रयोगः ॥ मंत्रो यथा (शारदातिलके) "ॐ नमो भगवते वाराहरूपाय भूर्भुवः स्वः स्यात्पतेभूपतित्वं देह्येतद्दापय स्वाहा" इति त्रयस्त्रिंशदक्षरो वाराहमंत्रः ॥ अस्य मंत्रस्य भार्गव ऋषिः । अनुष्टुप् छंदः । आदिवाराहो देवता । सर्वेष्टसिद्धये जपे विनियोगः ॥ भार्गवऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप् छंदसे नमः मुखे ॥ २ ॥ आदिवाराहदेवतायै नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ एकदंष्ट्राय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ व्योमोल्काय तर्जनीभ्यां नमः ॥ २ ॥ ॐ तेजोधिपतये मध्यमाभ्यां नमः ॥ ३ ॥ ॐ विश्वरूपाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ महादंष्ट्राय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ इति करन्यासः ॥ ॐ एकदंष्ट्राय हृदयाय नमः ॥ १ ॥ ॐ व्योमोल्काय शिरसे स्वाहा ॥ २ ॥ ॐ तेजोधिपतये शिखायै वषट् ॥ ३ ॥ ॐ विश्वरूपाय कवचाय हुं ॥ ४ ॥ ॐ महादंष्ट्राय अस्त्राय फट् ॥ इति हृदयादिपंचांगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत ॥ अथ ध्यानम् ॥ आपादं जानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्मुक्ताभं कंठदेशात्तरुणरविनिभं मस्तकान्नीलभासम् ॥ ईडे हस्तैर्दधानं रथचरणदरौ खड्गखेटौ गदाख्यां शक्तिं दानाभये च क्षितिधरणलसद्दंष्ट्रमाद्यं वाराहम् ॥ १ ॥ एवं ध्यात्वा वैष्णवे पीठे यंत्रं संस्थाप्य मूलेन मूर्तिं प्रकल्प्य

For Private And Personal Use Only

पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् । ततः षट्कोणकेसरेषु अग्निकोणे ॐ एकदंष्ट्राय हृदयाय नमः ॥ १ ॥ नैर्ऋते ॐ व्योमोल्काय शिरसे स्वाहा ॥ २॥ वायव्ये ॐ तेजोधिपतये शिखायै वषट् ॥ ३॥ ऐशान्ये ॐ विश्वरूपाय कवचाय हुं ॥ ४॥ देवपश्चिमे ॐ महादंष्ट्रायास्त्राय फट् ॥ ५ ॥ इति पंचांगानि पूजयेत ॥ इति प्रथमावरणम् ॥ ततोष्टदले पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य पूर्वादि क्रमेण ॐ चक्राय नमः ॥ १ ॥ ॐ शंखाय नमः ॥ २ ॥ ॐ खड्गाय नमः ॥ ३॥ ॐ खेटकाय नमः॥ ४॥ ॐ गदायै नमः॥ ५॥ ॐ शक्त्ये नमः ॥ ६॥ ॐ वराय नमः ॥ ७॥ ॐ अभयाय नमः ॥ ८॥ इति पूजयेत ॥ इति द्वितीयावरणम् ॥ ततो भूपुरे इन्द्रादि दशदिक्पालान् तद्बाह्ये वज्रायस्त्राणि च पूजयेत ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात ॥ अस्य पुरश्चरणं लक्षं जपः । तत्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनं च कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च " लक्षमेकं जपेन्मंत्रं मधुराक्तैः सरोरुहैः ॥ जुहुयात्तद्दशांशेन पीठे विष्णोः प्रपूजयेत् ॥ १ ॥ ध्यानादेवो धनं दद्याज्ज पाद्दद्यात्संधराम् ॥ प्रयच्छेज्जपपूजाद्यैर्धनधान्यमहाश्रियः ॥ २ ॥ रवौ सिंहगतेऽष्टम्यां शुक्लपक्षे सितां शिलाम् ॥ पंचगव्येषु निःक्षिप्य स्पृष्ट्वा तामयुतं जपेत् ॥ ३ ॥ उत्तराभिमुखो भूत्वा तां शिलां निखनेद्भुवि ॥ शत्रुचौरमहाभूतैः कृतां बाधां प्रणाशयेत् ॥ ४ ॥ भानूदये भौमवारे साध्यक्षेत्रात्समाहरेत ॥ मृत्तिकां संजपन्मंत्रं तां पुनर्विभजेत्त्रिधा ॥ ५ ॥ चुल्ल्यामेकांशमालिप्य पाकपात्रे तथापरम् ॥ गोदुग्धे परमालोड्य शोधितांस्तंडुलान् क्षिपेत ॥ ६ ॥ संस्कृतेग्नौ पचेत्सम्यक् चरुं मंत्री जपन्मनुम् ॥ अवतार्य चरुं पश्चादग्नौ देवं यथाविधि ॥ ७ ॥ धूपदीपादिकैरिष्ट्वा पुनराज्यप्लुतं चरुम् ॥ जुहुयादेधिते वह्नौ यावदष्टोत्तरं शतम् ॥ ८ ॥ एवं सप्तारवारेषु जुहुया

त्क्षेत्रसिद्धये ॥ प्रातःकाले भृगोर्वारे मृदं साध्यमहीतलात ॥ ९ ॥ आदाय हविरापाद्य पूर्ववज्जुहुयात्सुधीः ॥ विरोधो नश्यति क्षेत्रे सह चौराद्युपद्रवैः ॥ १० ॥ राजवृक्षसमुत्थाभिः समिद्भिर्मनुनामुना ॥ त्रिसहस्रं प्रजुहुयात्तस्य स्युः सर्वसंपदः ॥ ११ ॥ शालिभिर्जुहुयान्मंत्री नित्यमष्टोत्तरं शतम् ॥ समृद्धैर्धान्यसंघातैः शोभते तस्य मंदिरम् ॥ १२ ॥ तावदाज्येन जुहुयान्मंडलात्स्वर्णमाप्नुयात् ॥ लाजैः कन्यामवाप्नोति मध्वक्तैर्निजवांछितम ॥१३॥ मधुरत्रयसंयुक्तैर्जुहुयादुत्पलैः शुभैः॥ महतीं श्रियमाप्नोति मंडलात्पूर्वसंख्यया ॥१४॥ इति वाराहमंत्रप्रयोगः॥अथ नृसिंहमंत्रप्रयोगः॥ (शारदातिलके) ॥मंत्रो यथा॥ "ॐ उग्रवीरं महाविष्णुं ज्वलंतं सर्वतोमुखम् ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥१॥" इति श्लोकरूपमंत्रः ॥ अस्य नृसिंहमन्त्रस्य ब्रह्मा ऋषिः। अनुष्टुप्छन्दः । सुरासुरनमस्कृतनृसिंहो देवता । सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ ब्रह्मर्षये नमः शिरसि ॥ १ ॥ अनुष्टुप्छन्दसे नमः मुखे ॥ २ ॥ श्रीनृसिंहदेवतायै नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वांगे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ उग्रवीरम् अंगुष्ठाभ्यां नमः ॥ १ ॥ महाविष्णुं तर्जनीभ्यां नमः ॥ २ ॥ ज्वलंतं सर्वतोमुखं मध्यमाभ्यां नमः ॥ ३ ॥ नृसिंहभीषणम् अनामिकाभ्या नमः ॥ ४ ॥ भद्रं मृत्युमृत्युं कनिष्ठिकाभ्यां नमः॥ ५ ॥ नमाम्यहं करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ उग्रवीरं हृदयाय नमः॥ १ ॥ महाविष्णुं शिरसे स्वाहा ॥ २ ॥ ज्वलंतं सर्वतोमुखं शिखायै वषट् ॥ ३ ॥ नृसिंहभीषणं कवचाय हुं ॥४॥ भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् ॥ ५ ॥ नमाम्यहम् अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ उं नमः शिरसि ॥ १ ॥ ॐ ग्रं नमः ललाटे ॥ २ ॐ वीं नमः नेत्रयोः ॥ ३ ॥ ॐ रं नमः मुखे ॥ ४ ॥ ॐ मं नमः दक्षिणबाहुमूले ॥ ५ ॥ ॐ हां नमः दक्षिणकूर्परे ॥ ६ ॥ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विं नमः दक्षिणमणिबंधे ॥ ७ ॥ ॐ ष्णुं नमः दक्षहस्तांगुलिमूले ॥ ८ ॥ ॐ ज्वं नमः दक्षहस्तांगुल्यग्रे ॥ ९ ॥ ॐ लं नमः वामबाहुमूले ॥ १० ॥ ॐ तं नमः वामकूर्परे ॥ ११ ॥ ॐ सं नमः वाममणिबंधे ॥ १२ ॥ ॐ वं नमः वामहस्तांगुलिमूले ॥ १३ ॥ ॐ तों नमः वामहस्तांगुल्यग्रे ॥ १४ ॥ ॐ मुं नमः दक्षपादमूले ॥ १५ ॥ ॐ खं नमः दक्षजानुनि ॥ १६ ॥ ॐ नं नमः दक्षगुल्फे ॥ १७ ॥ ॐ सिं नमः दक्षपदांगुलिमूले ॥ १८ ॥ ॐ हं नमः दक्षपादांगुल्यग्रे ॥ १९ ॥ ॐ भीं नमः वामपादमूले ॥ २० ॥ ॐ षं नमः वामजानुनि ॥ २१ ॥ ॐ णं नमः वामगुल्फे ॥ २२ ॥ ॐ भं नमः वामपादांगुलिमूले ॥ २३ ॥ ॐ द्रं नमः वामपादांगुल्यग्रे ॥ २४ ॥ ॐ मृं नमः कट्याम् ॥ २५ ॥ ॐ त्युं नमः कुक्षौ ॥ २६ ॥ ॐ मृं नमः हृदये ॥ २७ ॥ ॐ त्युं नमः गले ॥ २८ ॥ ॐ नं नमः दक्षिणपार्श्वे ॥ २९ ॥ ॐ मां नमः वामपार्श्वे ॥ ३० ॥ ॐ म्यं नमः लिंगे ॥ ३१ ॥ ॐ हं नमः ककुदि ॥ ३२ ॥ इति मंत्रवर्णन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकरांबुजं त्रिनयनं रत्नोल्लसद्भूषणम् ॥ बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्राग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वंदे नृसिंहं विभुम् ॥ १ ॥ इति ध्यात्वा सर्वतोभद्रमंडले मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः ॥ इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत ॥ तत्र क्रमः ॥ पूर्वादिक्रमेण ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्व्यै नमः ॥६॥ ॐ सत्यायै नमः ॥७॥ ॐ ईशानायै नमः ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्ये ॐ अनुग्रहायै नमः॥ ९ ॥ इति नव पीठशक्तीः संपूज्य स्वर्णादिनि
र्मितं यंत्रमग्न्युत्तारणपूर्वकं "ॐ नमो भगवते नृसिंहाय दैत्यशत्रुसर्वात्मसंयोग
पद्मपीठाय नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्र
तिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचा
रैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तत्र क्रमः ॥ षट्को
णकेसरेषु अग्निकोणे ॐ उग्रवीरं हृदयाय नमः ॥ १ ॥ निर्ऋते ॐ
महाविष्णुं शिरसे स्वाहा ॥ २ ॥ वायव्ये ॐ ज्वलंतं सर्वतोमुखं शिखायै
वषट् ॥ ३॥ ऐशान्ये ॐ नृसिंहं भीषणं कवचाय हुं ॥४॥ पूज्यपूजकयो
र्मध्ये । भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् ॥५॥ देवतापश्चिमे । ॐ नमाम्यहं
अस्त्राय फट् ॥६॥ इति षडंगानि पूजयेत् ॥ ततोष्टदले पूज्यपूजकयोर्मध्ये
प्राचीं प्रकल्प्य प्राचीक्रमेण प्राच्यां ॐ गरुडपक्षिराजाय नमः गरुडश्री
पादुकां पूजयामि तर्पयामि नमः॥ १॥इति सर्वत्र ॥ दक्षिणे ॐ शंकराय
नमः शंकरश्रीपा० ॥२॥ पश्चिमे ॐ शेषाय नमः शेषश्रीपा० ॥ ३ ॥

नृसिंहपूजनयन्त्रम्



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्तरे ॐ ब्रह्मणे नमः ब्रह्मश्रीपा० ॥ ४ ॥ अग्निकोणे ॐ श्रियै नमः श्रीश्रीपा० ॥ ५ ॥ नैर्ऋते ॐ ह्रियै नमः ह्रीश्रीपा० ॥ ६ ॥ वायव्ये ॐ धृत्यै नमः धृतिश्रीपा० ॥ ७ ॥ ऐशान्ये ॐ पुष्ट्यै नमः पुष्टिश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयेत् ॥ इति प्रथमावरणम् ॥ततो भूपुरे पूर्वादिक्रमेण ॥ ॐ लं इन्द्राय नमः इन्द्रश्रीपा० ॥ १ ॥ ॐ रं अग्नये नमः अग्निश्रीपा० ॥ २ ॥ ॐ मं यमाय नमःयमश्रीपा० ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः निर्ऋतिश्रीपा० ॥ ४ ॥ ॐ वं वरुणाय नमः वरुणश्रीपा० ॥ ५ ॥ ॐ यं वायवे नमः वायुश्रीपा० ॥ ६ ॥ ॐ कुं कुबेराय नमः कुबेरश्रीपा० ॥ ७ ॥ ॐ हं ईशानाय नमःईशानश्रीपा० ॥ ८ ॥ इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः ब्रह्मश्रीपा० ॥९ ॥ वरुणनिर्ऋत्योर्मध्ये ॐ ह्रीं अनंताय नमः अनंतश्रीपादुकां पू० ॥ १० ॥ इति दश दिक्पालान् पूजयेत् ॥ तद्बाह्ये पूर्वादिक्रमेण ॥ ॐ वं वज्राय नमः ॥ १ ॥ ॐ शं शक्तये नमः ॥ २ ॥ ॐ दं दंडाय नमः ॥ ३ ॥ ॐ खं खड्गाय नमः ॥ ४ ॥ ॐ पं पाशाय नमः ॥ ५ ॥ ॐ अं अंकुशाय नमः ॥ ६ ॥ ॐ गं गदायै नमः ॥ ७ ॥ ॐ त्रिं त्रिशूलाय नमः ॥ ८ ॥ ॐ पं पद्माय नमः ॥ ९ ॥ ॐ चं चक्राय नमः ॥ १० ॥ इत्यस्त्राणि पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः । तत्सहस्रहोमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्य्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । वर्णलक्षं जपेन्मंत्रं तत्सहस्रं घृतप्लुतैः ॥ पायसान्नैः प्रजुहुयाद्विधिवत्पूजिते नले ॥ १ ॥ एवंकृते भवेन्मंत्री सिद्धमंत्रः प्रतापवान् ॥ इत्थं जपादिभिः सिद्धे मनौ काम्यानि साधयेत् ॥ २ ॥ उद्यत्कोटिरविप्रभं नरहरिं कोटीरहारोज्ज्वलं दंष्ट्राभीममुखे लसन्नखमुखैर्दीर्घैरनेकैर्भुजैः ॥ निर्भिन्नासुरनाथमग्निशशभृत्सूर्य्यात्मनेत्रत्रयं विद्युत्पुंजजटाकलाप

For Private And Personal Use Only

भयदं वह्निं वमंतं भजे ॥ ३ ॥ सौम्ये सौम्यं स्मरेत्कार्ये क्रूरे क्रूरमिमं भजेत् ॥ श्रीपुष्ट्यै जुहुयान्मंत्री बिल्वकाष्ठैधितनले ॥ ४ ॥
सहस्रं श्रियमाप्नोति पत्रैर्वा बिल्वसंभवैः ॥ प्रसूनैर्वा फलैस्तद्वद्दूर्वाहोमादरोगताम् ॥ ५ ॥ मंत्रजप्तां वचां श्वेतां भक्षयेत्प्रातरन्वहम् ॥ वाक्
सिद्धिं लभते मंत्री वाचस्पतिरिवापरः॥६॥ व्याघ्रचौरमृगादिभ्यो महारण्ये भयाकुललान् ॥रक्षेन्मनुरयं जप्तो भयेष्वन्येषु मंत्रिणः ॥७॥
अनेन मंत्रितं भस्म विषग्रहमहाभयान् ॥ नाशयेदचिरादेवं मंत्रस्यास्य प्रभावतः ॥ ८ ॥ घोराभिचारे सोन्मादे महोत्पाते महाभये ॥
जपेन्मंत्रं स्मरन्देवं दुःखान्मुक्तो भवेन्नरः ॥ ९ सिंहरूपं महाभीमं महादंष्ट्रादिभीषणम् ॥ स्मृत्वात्मानं रिपुं पश्चाद्ध्यायेन्मृगशिशुं रिपुम्
॥ १० ॥ गृहीत्वा गलदेशे तं पुनर्दिक्षु क्षिपेद्द्रुतम् ॥ पुत्रमित्रकलत्राद्यैरुच्चाटो जायते रिपोः ॥ ११॥ पूर्वमृत्युपदे साध्यनाम कृत्वा
स्वयं हरिः ॥ निशितैर्नखदंष्ट्राद्यैः खंडयमानं रिपुं स्मरन् ॥ १२ ॥ नित्यमष्टोत्तरशतं जपेन्मंत्रमतंद्रितः ॥ जायते मंडलादर्वाक् शत्रु
र्वैवस्वतप्रियः॥ १३ ॥ यंत्रं करोति विधिवच्छत्रुसेनानिवारणे॥ विभीतकाष्ठैर्ज्वलिते पावके रिपुमर्दनम्॥ १४॥विचिंत्य देवं नृहरिं संपूज्य
कुसुमादिभिः ॥ समूलच्चूलैर्जुहुयाच्छरैर्दशशतं पृथक् ॥ १५ ॥ रिपुं खादन्निव जपेन्निर्भिदन्निव तान्क्षिपेत् ॥ हुत्वा सप्तदिनं सेना
मिष्टां मंत्री महीपतेः ॥ १६ ॥ प्रस्थापयेच्छुभे लग्ने परराष्ट्रजयेच्छया ॥ तस्याः पुरस्तान्नृहरिं निघ्नंतं रिपुमण्डलम् ॥ १७ ॥
ध्यात्वा प्रयोगं कुर्वीत यावदायाति सा पुनः ॥ विजित्य निखिलाञ्शत्रून् सह वीर श्रिया सुखम् ॥ १८ ॥ आगत्य विजयी राजा
ग्रामक्षेत्रधनादिभिः ॥ प्रीणयेन्मंत्रिणं सम्यग् विभवैः प्रीतमानसः ॥ १९ ॥ मंत्री यदि न संतुष्येदनर्थः स्यान्महीपतेः ॥ राजा
विजयमाप्नोति युद्धेषु विधिनामुना ॥ इति नृसिंहस्य द्वात्रिंशदक्षरात्मकमंत्रप्रयोगः ॥ १ ॥ श्रीः ॥ इति विष्णुपटलः समाप्तः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ विष्णुपद्धतिप्रारंभः ॥ तत्रादौ प्रारम्भात्पूर्वं मंत्रानुष्ठानोपयोगि कृत्यम् ॥ चन्द्रतारादिबलान्विते सुदिने सुमुहूर्ते पुण्यतीर्थक्षेत्रनिर्जन स्थानादावनुष्ठानयोग्यभूमिपरिग्रहणं कृत्वा तत्र मार्जनदहनखननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रमाहाराविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्मशोधनं कुर्यात ॥ ततः पुरश्चरणात् प्राक् तृतीयदिवसे क्षौरादिकं विधाय प्रायश्चित्तांगं विष्णुपूजाविष्णुतर्पणविष्णुश्राद्धं होमं चांद्रायणादिव्रतं च कुर्यात। व्रताशक्तौ गोदानं द्रव्यदानं च कुर्यात् ॥ यदि सर्वकर्माशक्तस्तर्हिप्रायश्चित्तांगं पंचगव्यप्राशनं कुर्यात्। तत्र मंत्रः ॥ ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात्पंचगव्यस्य दहत्यग्निरिवेंधनम् ॥ १ ॥ मूलं पठित्वा प्रणवेन पंचगव्यं पिबेत् । तद्दिने चोपवासं कृत्वा अशक्तश्चेत् पयःपानं हविष्यान्नभोजनमेकभक्तव्रतं वा कुर्यात् ॥ पुरश्चरणात्पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थं चायुतगायत्रीजपं कुर्यात ॥ तद्यथा । देशकालौ संकीर्त्य मम ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणश्रीविष्णुपुरश्चरणाधिकारार्थममुकमंत्रसिद्ध्यर्थं च गायत्र्ययुत जपममुकगोत्रोऽमुकशर्माहं करिष्ये ॥ इति संकल्प्य गायत्र्ययुतं जपेत् ॥ ततो गायत्र्याचार्य्यमृषिं विश्वामित्रं तर्पयामि॥ १ ॥ गायत्री छंदस्तर्पयमि ॥ २ ॥ सवितारं देवं तर्पयामि ॥ ३ ॥ इति तर्पणं कृत्वा तस्मिन्रात्रौ देवतोपास्तिं शुभाशुभस्वप्नं च विचारयेत् ॥ तद्यथा स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं स्थित्वा वृषभध्वजं प्रार्थयेत् ॥ तत्र मंत्रः ॐ "भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वतम् ॥ १ ॥ ॐ नमोजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥२॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥ ३॥इति मंत्रेणाष्टोत्तर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शतवारं शिवं प्राथ्यं निद्रां कुर्यात् ।। ततः स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् ।। अथवा स्वयं स्वप्नं विचारयेत् इति पूर्वकृत्यम् ।। अथ प्रातः कृत्यम् । पुरश्चरणदिवसे श्रीमत्साधकेन्द्रः प्रातःकालात्पूर्वं दंडद्वयात्मके ब्राह्मे मुहूर्ते चोत्थाय प्रातःस्मरणं कुर्यात्॥अथ प्रातःस्मरणे नारायणस्तुतिराचारमयूखे (व्यासः)॥ ॐ प्रातः स्मरामि भवभीतिमहार्तिशांत्यै नारायणं गरुडवाहनमब्जनाभम्॥ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ १ ॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः ॥ नारायणस्य नरकार्ण

---

१ लिंगं चन्द्रार्कयोर्बिंबं भारतीं जाह्नवीं गुरुम्॥ रक्ताब्धितरणं युद्धे जपोऽनलसमर्चनम् ॥ शिखिहंसरथांगाह्वे रथे स्थानं च रोहनम् । आरोहणं सारसस्य धरालाभश्च निम्नगा ॥ प्रासादः स्यंदनः पद्मं छत्रं कन्या द्रुमः फली । नागो दीपो हयः पुष्पं वृषभोऽश्वश्च पर्वतः ॥ सुरावटो ग्रहास्तारा नारी सूर्यादयोऽप्सराः । हर्म्यशैलविमानानामारोहो गगने गमः ॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् । दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥ सिंहः सिंहासनं शंखो वादित्रं रोचनादिभिः । चंदनं तर्पणं चैषां स्वप्ने वै दर्शनं शुभम् ॥ तैलाभ्यक्तः कृष्णवर्णो नग्नो नागर्तवायसौ ॥ शुष्कः कंटकिवृक्षश्च चांडालो दीर्घकंधरः ॥ प्रासादस्तलहीनश्च नैते स्वप्ने शुभावहाः ॥ इति विचारयेत् ॥

२ राममंत्रानुष्ठाने रामस्मरणं कुर्यात । तथा च ॥ प्रातःस्मरामि रघुनाथमुखारविंदं मन्दस्मितं मधुरभाषि विशालभालम् ॥ कर्णावलम्बिचलकुंडलशोभिगंडं कर्णांतदीर्घनयनं नयनाभिरामम् ॥ १ ॥ प्रातर्भजामि रघुनाथकरारविंदं रक्षोगणाय भयदं वरदं निजेभ्यः ॥ यद्राजसंसदि विभज्य महेशचापं सीताकरग्रहणमंगलमाप सद्यः ॥ २ ॥ प्रातर्नमामि रघुनाथपदारविंदं यत्रांकुशादिशुभरेखि सुखावहं मे ॥ योगीन्द्रमानसमधुव्रतसेव्यमानं शापापहं सपदि गौतमधर्मपत्न्याः ॥ ३ ॥ प्रातर्वदामि वचसा रघुनाथनाम वाग्दोषहारि सकलं शमलं निहंति ॥ यत्पार्वती स्वपतिना सह भोक्तुकामा प्रीत्या सहस्रहरिनामसमं जजाप ॥ ४ ॥ प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं नीलाम्बुदोत्पलसितेतररत्ननीलाम् ॥ आमुक्तमौक्तिकविशेषविभूषणाढ्यां ध्येयां समस्तमुनिभिर्निजमृत्युहत्यै ॥ ५ ॥ यः श्लोकपंचकमिदं प्रयतः पठेत नित्यं प्रभातसमये पुरुषः प्रबुद्धः ॥ श्रीरामकिंकरजनेषु स एव मुख्यो भूत्वा प्रयाति हरिलोकमनन्यलभ्यम ॥ इति रामप्रातःस्मरणम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वतारणस्य पारायणप्रणवविप्रपरायणस्य ॥ २ ॥ प्रातर्भजामि भजतामभयङ्करं तं प्राक् सर्वजन्मकृतपापभयापहत्यै ॥ यो ग्राहवक्त्रपतितां घ्रिगजेन्द्रघोरशोकप्रणाशमकरोद्धृतशंखचक्रः ॥३॥ श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः॥ लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥ ४ ॥ इति प्रातःस्मरणं कृत्वा भूमिं प्रार्थयेत् ॥ तत्र मंत्रः ॥ ॐ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥ इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पादं दत्वा बहिर्व्रजेत ॥ इति प्रातःकृत्यम्॥ ततो ग्रामाद्बहिर्नैर्कत्यकोणे जनवर्जितदेशे उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरः प्रावृत्य मलमोचनं कृत्वा मृत्तिकया जलेन च यथासंख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गंडूषं च कृत्वा दंतधावनं कुर्यात् ॥ तद्यथा । आम्रचंपकापामार्गाद्यन्यतमं द्वादशांगुलं दंतकाष्ठं गृहीत्वा प्रार्थयेत् ॥ ॐ आयुर्बलं यशो वर्चः प्रजापशुधनानि च ॥ श्रियं प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥ १ ॥ इति संप्रार्थ्य ॥ " ॐ ह्रीं तडित् स्वाहा" इति मंत्रेण काष्ठं छित्त्वा 'ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः' इत्यनेन दंतान् संशोध्य 'ऐं' मंत्रेण जिह्वामुल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्कत्यां शुद्धदेशे निःक्षिपेत् ॥ ततो मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्यात् ॥ तद्यथा । तत्कालिकोद्धृतोदकेन उष्णोदकेन वा स्नानं कुर्यात् । न तु पर्युषितशीतोदकेन । तद्यथा। ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् ॥ तत्र मंत्रः ॥ ॐ गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिन्धु कावेरि जलेस्मिन्सन्निधिं कुरु ॥१॥ आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि॥ एहि गंगे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ २ ॥ इति तीर्थान्यावाह्य " ॐ ऋतं च सत्यं० " इति मंत्रेणाभिमंत्र्य वरुणमंत्रेण स्नात्वा शुष्कं शुभ्रं कार्पासोत्पत्तिवस्त्रं परिधाय सूर्यायार्घ्यं दद्यात् ॥ तत्र मंत्रः ॥ ॐ "एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ १ ॥ " इत्यर्घ्यं दत्त्वा स्नानवस्त्रं परिपीड्य आचम्य नित्यनैमित्तिकं समाप्य द्वादशोर्ध्वपुंड्रं तिलकं कुर्यात् ॥ अथ द्वारपूजा प्रयोगः ॥ पूजागृहद्वारमागत्य अस्त्राय फडिति द्वारं संप्रोक्ष्य दक्षिणशाखायाम् ॐ गं गणपतये नमः ॥ १ ॥ ॐ दुं दुर्गायै नमः॥२॥ वामशाखायाम् ॐ वं वटुकाय नमः ॥ ३ ॥ ॐ क्षं क्षेत्रपालाय नमः ॥ ४ ॥ द्वारोपरि ॐ सं सरस्वत्यै नमः ॥ ५ ॥ देहल्याम् ॐ सुदर्शनायास्त्राय फट् ॥ इति पूजयेत्॥ जपस्थाने गत्वा "ॐ गृहीतस्यास्य मंत्रस्य पुरश्चरणसिद्धये ॥ मयेयं गृह्यते भूमिर्मंत्रोयं सिद्धिमेत्विति ॥ १ ॥ " इति मंत्रेण भूमिं संगृह्य अश्वत्थोदुंबरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दश कीलान् " ॐ नमः सुदर्शनायास्त्राय फट्" इति मंत्रेणाष्टोत्तरशतवारानभिमंत्रितान् " ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः ॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु ॥ १ ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥२॥" इति मंत्रद्वयेन दशदिक्षु दश कीलान् निखनेत्॥ ततस्तेषु "ॐ सुदर्शनायास्त्राय फट्" इति मंत्रेण प्रत्येकं कीलं संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिलोकपालानावाह्य पंचोपचारैः संपूज्य जपस्थानमध्ये गणेशकूर्मानंतवसुधाक्षेत्रपालांश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालगणपत्यादिभ्यश्च बलिं दत्त्वा तद्बाह्ये भूतबलिं दद्यात्॥ तत्र मंत्रौ॥ "ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ।। मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ।।१।। भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः ।। ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम् ॥२॥" इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दत्त्वा वामकरांगुलिभिरर्घ्यजलेनोत्सृज्य पुष्पांजलिं गृहीत्वा " ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ संतोषमासाद्य व्रजंतु सर्वे क्षमंतु नान्यत्र नमोस्तु तेभ्यः ॥ १ ॥" इति पुष्पांजलिं दत्त्वा प्रणम्य हस्तौ पादौ प्रक्षाल्याचामेत् ॥ इति क्षेत्रकीलनम् ॥ अथ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयोगविधानम् ॥ "ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः॥ १॥" इति मंत्रेण मंडपातरं संप्रोक्ष्य तत्र तावत् आसनभूमौ कूर्मशोधनं कार्यम्। यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य जपं दीपस्थापनं च कुर्यात॥ यत्र बहवो जापकास्तत्र कूर्ममुखे दीपमेव स्थापयेत॥ इति कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा तत्र ॐ कूर्माय नमः ॥ १ ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥२॥ ॐ पृथिव्यै नमः॥३॥ इति गंधाक्षतपुष्पैः संपूज्य तदुपरि कुशासनं १ तदुपरि मृगाजिनं २ तदुपरि कंबलाद्यासनम् ३ आस्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण ॐ अनंतासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥ इति मंत्रत्रयेण त्रींस्त्रीन् दर्भान् प्रत्येकमुपरि निदध्यात् ॥ एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य आसनं शोधयेत् ॥ तत्र मंत्रः॥ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः। कूर्मो देवता । सुतलंच्छंदः। आसने विनियोगः ॥ ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥१॥ इति मंत्रेणासनं प्रोक्षयेत् ॥ ततः मूलेन शिखां बद्ध्वा ॐ केशवाय नमः ॥ १ ॥ॐ नारायणाय नमः ॥२॥ ॐ माधवाय नमः ॥३॥ इति त्रिराचम्य प्राणायामं कुर्यात् ॥ तद्यथा। दक्षिणहस्तांगुष्ठेन दक्षनासापुटं निरुध्य वामनासापुटेन मूलं षोडशवारं जपन् शनैः शनैः प्राणाख्यवायुमाकृष्य शिरसि सहस्रारे धारयेदिति पूरकः ॥ १ ॥ पुनः दक्षहस्तानामिकातर्जन्यंगुष्ठैः नासापुटद्वयं निरुध्य मूलं चतुःषष्टिवाराञ्जपन् कुंभयेत् ॥ २ ॥ पुनर्दक्षनासापुटांगुष्ठनिरोधं त्यक्त्वा मूलं द्वात्रिंशद्वारं जपञ्छनैःशनैस्तद्वायुं रेचयेत् ॥ ३ ॥ इति प्राणायामत्रयं कृत्वा देशकालौ संकीर्त्य अमुकगोत्रश्चामुकदेवशर्माहं श्रीविष्णुदेवताया अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकामुकमंत्रसिद्धिकामोऽद्यारभ्य यावता

For Private And Personal Use Only

कालेन संपत्स्यति तावत्कालममुकमंत्रस्य इयत्संख्यजपं तद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजनरूपपुरश्चरणं (केवलजपरूपपुरश्चरणं वा) करिष्ये॥ इति संकल्प्य "ॐ सुदर्शनायास्त्राय फट्" इति तालत्रयेण दिग्बंधनं कृत्वा भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासांश्च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा केशवादिकलामातृकान्यासं च कुर्यात्॥ अथ केशवादिकलामातृकान्यासप्रयोगः॥ अस्य केशवादिकलामातृकान्यासस्य प्रजापतिर्ऋषिः। गायत्री छन्दः। अर्धलक्ष्मीहरिर्देवता। नारायणप्रसन्नतार्थे न्यासे विनियोगः॥ ॐ प्रजापतिऋषये नमः शिरसि॥१॥ गायत्रीछन्दसे नमः मुखे॥२॥ अर्द्धलक्ष्मीहरये देवतायै नमः हृदि॥ ३॥ विनियोगाय नमः सर्वाङ्गे॥ ४॥ इति ऋष्यादिन्यासः॥ ॐ श्रीं अंगुष्ठाभ्यां नमः॥ १॥ ॐ श्रीं तर्जनीभ्यां नमः २॥ ॐ श्रीं मध्यमाभ्यां नमः॥ ३॥ ॐ श्रीं अनामिकाभ्यां नमः॥ ४॥ ॐ श्रीं कनिष्ठिकाभ्यां नमः॥ ५॥ ॐ श्रीं करतलकरपृष्ठाभ्यां नमः॥ ६॥ इति करन्यासः॥ ॐ श्रीं हृदयाय नमः॥ १॥ ॐ श्रीं शिरसे स्वाहा॥ २॥ ॐ श्रीं शिखायै वषट्॥ ३॥ ॐ श्रीं कवचाय हुँ॥४॥ ॐ श्रीं नेत्रत्रयाय वौषट्॥ ५॥ ॐ श्रीं अस्त्राय फट्॥ ६॥ इति हृदयादिषडंगन्यासः॥ एवं न्यासं कृत्वा ध्यायेत्॥ अथ ध्यानम्॥ ॐ उद्यत्प्रद्योतनशतरुचिं तप्तहेमावदातं पार्श्वद्वंद्वं जलधिसुतया विश्वधात्र्या च पुष्टम्॥ नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं विष्णुं वंदे दरकमलकौमोदकीचक्रपाणिम्॥ १॥ एवं ध्यात्वा मातृकां न्यसेत्॥ ॐ अं केशवकीर्त्यै नमः ललाटे॥१॥ ॐ आं नारायणाय कान्त्यै नमः मुखे॥ २॥ ॐ इं माधवाय पुष्ट्यै नमः दक्षनेत्रे॥ ३॥ ॐ ईं गोविन्दाय तुष्ट्यै नमः वामनेत्रे॥ ४॥ ॐ उं विष्णवे धृत्यै नमः दक्षकर्णे॥ ५॥ ॐ ऊं मधुसूदनाय शान्त्यै नमः वामकर्णे॥ ६॥ ॐ ऋं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिविक्रमाय क्रियायै नमः दक्षनासापुटे ॥ ७ ॥ ॐ ऋँ वामनाय दयायै नमः वामनासापुटे ॥ ८ ॥ ॐ लृँ श्रीधराय मेधायै नमः दक्षगंडे ॥ ९ ॥ ॐ लॄँ हृषीकेशाय दुर्गायै नमः वामगंडे ॥ १० ॥ ॐ एँ पद्मनाभाय श्रद्धायै नमः ऊर्ध्वोष्ठे ॥ ११ ॥ ॐ ऐं दामोदराय लज्जायै नमः अधरोष्ठे ॥ १२ ॥ ॐ ओं वासुदेवाय लक्ष्म्यै नमः ऊर्ध्वदंतपंक्तौ ॥ १३॥ ॐ औं संकर्षणाय सरस्वत्यै नमः अधोदंतपंक्तौ ॥ १४ ॥ ॐ अँ प्रद्युम्नाय धृत्यै नमः मस्तके ॥ १५ ॥ ॐ अः अनिरुद्धाय रत्यै नमः मुखे ॥ १६ ॥ ॐ कँ चक्रिणे जयायै नमः दक्षबाहुमूले ॥ १७ ॥ ॐ खँ गदिने दुर्गायै नमः दक्षिणकूर्परे ॥ १८ ॥ ॐ गँ शार्ङ्गिणे प्रभायै नमः दक्षिणमणिबंधे ॥ १९ ॥ ॐ घँ खड्गिने सत्यायै नमः दक्षहस्तांगुलिमूले ॥ २० ॥ ॐ ङँ शंखिने चन्द्रायै नमः दक्षहस्तांगुल्यग्रे ॥ २१ ॥ ॐ चँ हलिने वाण्यै नमः वामबाहुमूले ॥ २२ ॥ ॐ छँ मुसलिने विलासिन्यै नमः वामकूर्परे ॥ २३ ॥ ॐ जँ शूलिने विजयायै नमः वाममणिबंधे ॥ २४ ॥ ॐ झँ पाशिने विरजायै नमः वामहस्तांगुलिमूले ॥ २५ ॥ ॐ ञँ अंकुशिने विंबायै नमः वामहस्तांगुल्यग्रे ॥ २६ ॥ ॐ टँ मुकुंदाय विनदायै नमः दक्षपादमूले ॥ २७ ॥ ॐ ठँ नंदजाय सुनंदायै नमः दक्षजानुनि ॥ २८ ॥ ॐ डँ नंदिने स्मृत्यै नमः दक्षगुल्फे ॥ २९ ॥ ॐ ढँ नराय ऋद्ध्यै नमः दक्षपादांगुलिमूले ॥ ३० ॥ ॐ णँ नरकजिते समृद्ध्यै नमः दक्षपादांगुल्यग्रे ॥ ३१ ॥ ॐ तं हरये शुद्ध्यै नमः वामपादमूले ॥ ३२ ॥ ॐ थँ कृष्णाय वृद्ध्यै नमः वामजानुनि ॥ ३३ ॥ ॐ दँ सत्याय भूत्यै नमः वामगुल्फे ॥ ३४ ॥ ॐ धँ सत्त्वताय मत्यै नमः वामपादांगुलिमूले ॥ ३५ ॥ ॐ नँ सौराष्ट्राय क्षमायै नमः वामपादांगुल्यग्रे ॥ ३६ ॥ ॐ पं शूराय रमायै नमः दक्षपार्श्वे ॥ ३७ ॥ ॐ फँ जनार्दनाय उमायै नमः वामपार्श्वे ॥ ३८ ॥ ॐ बँ भूधराय क्लेदिन्यै नमःपृष्ठे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३९ ॥ ॐ भँ विश्वमूर्तये क्लिन्नायै नमः नाभौ ॥ ४० ॥ ॐ मँ वैकुंठाय वसुदायै नमः उदरे ॥ ४१ ॥ ॐ यँ त्वगात्मने पुरुषोत्तमाय वसुधायै नमः हृदि ॥ ४२ ॥ ॐ रं असृगात्मने बलिने परायै नमः दक्षांसे ॥ ४३ ॥ ॐ लँ मांसात्मने बालानुजाय परायणायै नमः ककुदि ॥ ४४ ॥ ॐ वँ मेदात्मने बलाय सूक्ष्मायै नमः वामांसे ॥ ४५ ॥ ॐ शँ अस्थ्यात्मने वृषघ्नाय संध्यायै नमः हृदयादिदक्षकरांतम् ॥ ४६ ॥ ॐ षँ मज्जात्मने वृषाय प्रज्ञायै नमः हृदयादिवामकरांतम् ॥ ४७ ॥ ॐ सं शुक्रात्मने हंसाय प्रभायै नमः हृदयादिदक्षपादांतम् ॥ ४८ ॥ ॐ हँ प्राणात्मने वराहाय निशायै नमः हृदयादिवामपादांतम् ॥ ४९ ॥ ॐ लं जीवात्मने विमलाय अमोघायै नमः हृदयादि उदरांतम् ॥ ५० ॥ ॐ छं क्रोधात्मने नृसिंहाय विद्युतायै नमः हृदयादिमुखांतम् ॥५१ ॥इति विष्णुकेलामातृकान्यासं[1] कृत्वा प्रयोगोक्तन्यासादिकं च कुर्यात्॥ अथ पीठपूजाप्रयोगः॥ पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः स्थापयेत् ॥ तद्यथा ॥ स्ववामभागे श्रीगुरवे नमः ॥ १ ॥ दक्षिणे गणपतये नमः ॥ २ ॥ मध्ये स्वेष्टदेवतायै नमः॥ ३॥ इति नत्वा पुष्पाक्षतानादाय पीठमध्ये ॐ मं मंडूकाय नमः॥ १ ॥ ॐ कं कालाग्निरुद्राय नमः ॥ २ ॥ ॐ अं आधारशक्त्ये नमः ॥ ३ ॥ ॐ कूँ कूर्माय नमः ॥ ४ ॥ ॐ अं अनंताय नमः ॥ ५ ॥ ॐ पृं पृथिव्यै नमः ॥ ६ ॥ ॐ क्षीं क्षीरसागराय नमः ॥ ७ ॥ ॐ रं रत्नदीपाय नमः ॥८॥ॐ रं रत्नमंडपाय नमः ॥ ९ ॥ ॐ कं कल्पवृक्षाय नमः ॥ १० ॥ ॐ रं रत्नवेदिकायै नमः ॥ ११ ॥ ॐ रं रत्नसिंहासनाय नमः ॥ १२ ॥ आग्नेय्याम् ॐ धं धर्माय नमः ॥ १३ ॥ नैर्ऋत्याम्

[1] केशवादिरयं न्यासो न्यासमात्रेण देहिनाम् ॥ अच्युतत्वं ददात्येव सत्यंसत्यं न संशयः ॥ एवं न्यासविधिं कृत्वा स्वसान्नारायणो भवेत्॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ ज्ञां ज्ञानाय नमः ॥ १४ ॥ वायव्ये ॐ वै वैराग्याय नमः ॥ १५ ॥ ऐशान्ये ॐ ऐश्वर्याय नमः ॥ १६ ॥ पूर्वे ॐ अं अधर्माय नमः ॥ १७ ॥ दक्षिणे ॐ अं अज्ञानाय नमः ॥ १८ ॥ पश्चिमे ॐ अं अवैराग्याय नमः ॥ १९ ॥ उत्तरे ॐ अं अनैश्वर्याय नमः ॥ २० ॥ पुनः पीठमध्ये । ॐ आं आनंदकंदाय नमः ॥ २१ ॥ ॐ सं संविन्नालाय नमः ॥ २२ ॥ ॐ सं सर्वतत्त्वकमलासनाय नमः ॥ २३ ॥ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः ॥ २४ ॥ ॐ विं विकारमयकेसरेभ्यो नमः ॥ २५ ॥ ॐ पं पंचाशद्वर्णाढ्यकर्णिकाभ्यो नमः ॥ २६ ॥ ॐ अं अर्कमंडलाय द्वादशकालात्मने नमः ॥ २७ ॥ ॐ सों सोममंडलाय षोडशकलात्मने नमः ॥ २८ ॥ ॐ वं वह्निमंडलाय दशकलात्मने नमः ॥ २९ ॥ ॐ सं सत्त्वाय नमः ॥ ३० ॥ ॐ रं रजसे नमः ॥ ३१ ॥ ॐ तं तमसे नमः ॥ ३२ ॥ ॐ आं आत्मने नमः ॥ ३३ ॥ ॐ पं परमात्मने नमः ॥ ३४ ॥ ॐ अं अंतरात्मने नमः ॥ ३५ ॥ ॐ ह्रीं ज्ञानात्मने नमः ॥ ३६ ॥ ॐ मं मायातत्त्वाय नमः ॥ ३७ ॥ ॐ कं कलातत्त्वाय नमः ॥ ३८ ॥ ॐ विं विद्यातत्त्वाय नमः ॥ ३९ ॥ ॐ पं परतत्त्वाय नमः ॥ ४० ॥ इति पीठदेवताः संस्थाप्य प्रयोगोक्तनवपीठशक्तीः पूजयेत् ॥ अथ शंखस्थापनप्रयोगः ॥ देववामतः त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां (ह्रीं) विलिख्य ॐ ह्रीं आधारशक्त्यै नमः इति संपूज्य मूलेन त्रिपदाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य ॐ मं वह्निमंडलाय दशकलात्मने शंखपात्राशनाय नमः ॥ इत्याधारं संपूजयेत् ॥ ततः ॐ क्लीं महाजलचराय हुं फट् स्वाहा पांचजन्याय नमः इति मंत्रेण क्षालितं शंखमाधारोपरि संस्थाप्य ॐ अं सूर्यमंडलाय द्वादशकलात्मने शंखपात्राय नमः इति शंखं पूजयेत्॥ततो मूलेन नमः इति शंखे जलमापूर्य ॐ सों सोममंडलाय षोडशकलात्मने शंखपात्रामृताय नमः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति गंधादिभिः संपूज्याभिमंत्रयेत् ॥ तथा च । ॐ शंखादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजातिश्चैवमग्रे गंगा सरस्वती ॥ १॥
त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत ॥ २ ॥ इत्यभिमंत्र्य प्रार्थयेत् ॥ तथा
च ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तुते ॥ १ ॥ इति संप्रार्थ्य " ॐ पांचजन्याय
विग्महे पावमानाय धीमहि तन्नः शंखः प्रचोदयात् " इति शंखगायत्रीमष्टधा जपित्वा शंखमुद्रां प्रदर्शयेत् ॥ इति शंखस्थापनम् ॥
अथ घंटास्थापनप्रयोगः ॥ देवदक्षिणतः घंटां संस्थाप्य नादं कृत्वा पूजयेत् ॥ तद्यथा ॐ भभुर्वः स्वः गरुडाय नमः आवाहयामि
सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ इत्यावाह्य ॥ " ॐ जगद्ध्वनिमंत्रमातः स्वाहा " इति मंत्रेण घंटास्थितगरुडं
घंटां च संपूज्य गरुडमुद्रां प्रदर्शयेत् ॥ इति घंटां संस्थाप्य गंधाक्षतपुष्पादींश्च पूजोपकरणार्थं स्वदक्षिणपार्श्वे संस्थाप्य मूलेन नमः
इति जलेन प्रोक्ष्य जलार्थं बृहत्पात्रं व्यजनं छत्रादर्शचामराणि च स्ववामे संस्थापयेत् । ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे
निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणा शोष्य आसनमंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य
देशकालौ संकीर्त्य मम विष्णुदेवतानूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठां करिष्ये ॥ इति संकल्प्य प्रतिष्ठां कुर्यात् ॥ तद्यथा । अस्य श्रीप्राणप्र
तिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुः सामानि छंदांसि क्रियामयवपुः प्राणाख्या देवता ॐ बीजम् । ह्रीं शक्तिः । क्रौं कीलकम्
अस्य नूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठापने विनियोगः ॥ इति जलं क्षिपेत् ॥ करेणाच्छाद्य ॐआँह्रींक्रौंयँरँलँवँशँषँहँसः सोहं अस्य विष्णुदे
वतासपरिवारयंत्रस्य प्राणा इह प्राणाः । पुनः। ॐ आँ ह्रींक्रौंयँरँलँवँशँषँसँहंसः सोहं अस्य विष्णदेवतासपरिवारयंत्रस्य जीव इह स्थितः।

For Private And Personal Use Only

पुनः। ॐ आँ ह्रींक्रौंयँरँलँवँशँषँसँहंसः सोहं अस्य विष्णुदेवतासपरिवारयंत्रस्य सर्वेन्द्रियाणि इह स्थितानि। पुनः। ॐ आँ ह्रींक्रौंयँरँलँवँशँ षँसँहंसः सोहं अस्य विष्णुदेवतासपरिवारयंत्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणान् प्रतिष्ठाप्य यः प्राणतो निमिषतो महित्वे विधेम ॥ इतिमन्त्रिति त्रिवारं पठेत् ॥ ॐ मनोजूतिर्जुषतासुप्रतिष्ठा प्रतिष्ठा। इत्युक्त्वा संस्कारसिद्धये पंचदश प्रणवावृत्तीः कृत्वा अनेन विष्णुदेवतासपरिवारयंत्रस्य गर्भाधानादिपंचदशसंस्कारान्संपादयामि इति वदेत्। ततः ॐ यंत्रराजाय विद्महे महायंत्राय धीमहि ॥ तन्नो यंत्रः प्रचोदयात् ॥ इत्यष्टोत्तरशतमभिमंत्र्य मूलदेवतां ध्यात्वा मूलेन मूर्ति प्रकल्प्यावाहयेत्॥ अक्षतानादाय ॐ देवेश भक्तिसुलभ परिवारसमन्वित॥ यावत्त्वां पूजयिष्यामि तावदेव इहावह ॥१॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीविष्णवे नमः इहागच्छ इह तिष्ठ इत्यावाहनम् ॥१॥ ॐ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यदि पूर्णं भवेत्कृत्यं तदाप्यभिमुखो भव ॥ १ ॥ ॐ भू० श्रीविष्णवे नमः इह सम्मुखो भव इति सम्मुखीकरणम् ॥ २ ॥ ॐ यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये॥ तस्मै ते परमेशाय स्वागतं स्वागतं च ते ॥१॥ मूलं पठित्वा ॐ भू० श्रीविष्णवे नमः सुस्वागतं समर्पयामि इति सुस्वागतम् ॥३॥ ॐ देवदेव महाराज प्रियेश्वर प्रजापते ॥ आसनं दिव्यमीशान दास्येहं परमेश्वर ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीविष्णवे नमः आसनं समर्पयामि इत्यासनम् ॥४॥ इत्यासनं दत्त्वा करं बद्ध्वा प्रार्थयेत् ॥ ॐ स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥१॥ मूलं पठित्वा ॐ भू० श्रीविष्णवे नमः प्रार्थनां समर्पयामि नमष्करोमि ॥५॥ इति प्रार्थयित्वा पाद्यादिपूजनं कुर्यात् ॥ अथ पाद्यादिपूजनम् ॐ यद्भक्तिलेशसंपर्कात्परमानंदसंभवः॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पयेत् ॥१॥ मूलं पठित्वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ भू० श्रीविष्णवे नमः पाद्यं समर्पयामि इति सर्वत्र॥इत्यर्घोदकेन पाद्यं दद्यात्॥इति पाद्यम् ॥१॥ ॐ देवानामपि देवाय देवानां देवता
त्मने॥ आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे॥१॥ इत्याचमनम् ॥२॥ ॐ तापत्रयहरं दिव्यं परमानंदलक्षणम् ॥ तापत्रयविमोक्षाय
तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥ अर्घ्योदकेनार्घ्यं दद्यात् ॥ इत्यर्घ्यम् ॥ ३ ॥ ॐ सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ॥ मधुपर्कमिदं
देव कल्पयामि प्रसीद मे ॥ १ ॥ इति मधुपर्कम् ॥ ४ ॥ ॐ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते
पुनराचमनीयकम् ॥ १ ॥ इति पुनराचमनीयम् ॥ ५ ॥ ॐ स्नेहं गृहाण स्नेहेन लोकनाथ महाशय ॥ सर्वलोकेषु शुद्धात्मन्ददामि
स्नेहमुत्तमम् ॥ १ ॥ इति सुगंधतैलम् ॥६॥ ॐ गंगा सरस्वती रेवापयोष्णीनर्मदाजलैः ॥ स्नापितोऽसि मया देव तथा शांतिं कुरुष्व मे
॥ १ ॥ इति जलस्नानम् ॥ ७ ॥ ॐ पयो दधि घृतं चैव मधु च शर्करायुतम् ॥ पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम् ॥ १ ॥
इति पंचामृतेन स्नापयित्वा पुनर्जलस्नानं च कारयेत् ॥ ८ ॥ ॐ सर्वभूषादिकैः सौम्ये लोकलज्जानिवारणे ॥ मयैवापादिते तुभ्यं
वाससी प्रतिगृह्यताम् ॥१॥ इति वस्त्रम् ॥९॥ ॐ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥१॥
इति यज्ञोपवीतम् ॥ १० ॥ ॐ स्वभावसुंदरांगाय सत्यासत्याश्रयाय ते ॥ भषणानि विचित्राणि कल्पयामि सुरार्चित ॥ १ ॥
दक्षहस्तांगुष्ठस्पृष्टानामिकात्मिकया मुद्रया भूषणानि दद्यात् ॥ इत्याभषणम् ॥ ११ ॥ ॐ श्रीखण्डं चंदनं दिव्यं गंधाढ्यं सुमनोहरम् ॥
विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम् ॥ १ ॥ अंगुष्ठौ कनिष्ठामूललग्नौ गंधमुद्रा इति गंधम् ॥१२ ॥ ॐ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः
सुशोभिताः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ १ ॥ सर्वांगुलीभिर्दद्यात् ॥ इत्यक्षतान् ॥ १३ ॥ माल्यादीनि सुगंधीनि

For Private And Personal Use Only

मालत्यादीनि वै प्रभो ॥ मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥ १ ॥ तर्जन्यावंगुष्ठमूललग्ने पुष्पमुद्रा इति पुष्पम् ॥ १४ ॥ एवं पुष्पांतं पूजयित्वा देवाज्ञया प्रयोगोक्तावरणपूजां कृत्वा धूपादिपूजनं कुर्यात् ॥ अथ धूपादिपूजनम् ॥ फडिति धूपपात्रं संप्रोक्ष्य मूलेन नमः इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय (रँ) इति वह्निबीजेन अग्निं संस्थाप्य तदुपरि मूलेन दशांगं दत्त्वा घंटां वादयन् ॐ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा ॐ भू० सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीविष्णवे नमः धूपं समर्पयामि ॥ इति पठित्वा देवस्य वामभागे धूपपात्रं निधाय तर्जनीमूलयोरंगुष्ठयोगो धूपमुद्रा तां प्रदर्शयेत् ॥ इति धूपम् ॥ १ ॥ ततो दीपपात्रं गोघृतेनापूर्य मंत्राक्षरतंतुभिर्वर्ती निःक्षिप्य प्रणवेन (ॐ) प्रज्वाल्य घंटां वादयन् नेत्रादिपादपर्यंतं दीपं प्रदर्शयेत् ॥ ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥ सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा ॐ भू०सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीविष्णवे नमः दीपं समर्पयामि ॥ इति पठित्वा देवस्य दक्षिणभागे निधाय ततः शंखजलमुत्सृज्य मध्यमे अंगुष्ठलग्ने दीपमुद्रा तां प्रदर्शयेत् ॥ इति दीपम् ॥२॥ततः देवस्याग्रे देवदक्षिणतो वा जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं संस्थाप्य तन्मध्ये षड्रसोपेतं विविधप्रकारं वा नैवेद्यं निधाय ॐ ह्रीं नमः इत्यर्घ्यजलेन प्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपरि तादृशं वामं निधाय नैवेद्यमाच्छाद्य (ॐ यँ) इति वायुबीजेन षोडशधा संजप्य वायुना तद्भूतदोषान् संशोष्य ततो दक्षिणकरतले तत्पृष्ठलग्नवामकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ रँ) इति वह्निबीजेन षोडशवारान् संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा ततो वामकरतले (ॐ वँ) इति अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ वँ) इति सुधाबीजं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षोडशवारं संजप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य देवस्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा "ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ॥ निवेदयामि देवेश सानुगाय गृहाण तत् ॥" मूलं पठित्वा ॐ भू०सांगाय सपरिवाराय सवाहनाय सायुधाय श्रीविष्णवे नमः ॥ नैवेद्यं समर्पयामि ॥ १ ॥ इति भूतले देवदक्षिणे जलं क्षिप्त्वा वामहस्तेन अनामामूलयोरंगुष्ठयोगे ग्रासमुद्रा तां प्रदर्श्य देवं भुक्तवन्तं विभाव्य जलं दद्यात् ॥ इति नैवेद्यम् ॥ ३ ॥ ॐ नमस्ते देवदेवेश सर्वतृप्तिकरो वरः ॥ परमानंदपूर्णस्त्वं गृहाण जलमुत्तमम् ॥ १ ॥ मूलं पठित्वा ॐ भू० सांगाय सपरिवाराय सवाहनाय सायुधाय श्रीविष्णवे नमः ॥ जलं समर्पयामि ॥ इति मंत्रेण स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य देवेन तज्जलं प्राशितमिति भावयन् अंतःपटं दद्यात् ॥ इति जलम् ॥ ४ ॥ ॐ ब्रह्मेशाद्यैः सरसमभितः सूपविष्टैः समन्तात्सिंजद्वालव्यजननिकरैर्वीज्यमानः सखीभिः ॥ नर्मक्रीडाप्रहसनपरान्पंक्तिभोक्तॄन् हसन्वै भुंक्ते पात्रे कनकघटिते षड्रसान्देवदेवः॥ १ ॥ शालीभक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतफलं द्वारिकाद्यं सुखाद्यम्॥आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीचस्वादीयः शाकराजीपरिकरममृताहारजोषं जुषस्व ॥ २ ॥ इति अंतःपटं दत्त्वा आचमनं दद्यात् ॥ ५ ॥ ॐ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥ १ ॥ ॐ भ० श्रीविष्णवे नमः आचमनं समर्पयामि ॥ इत्याचमनं दत्त्वा मूलेन गंडूषार्थं जलं च दद्यात् ॥ ६ ॥ ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ १ ॥ इति ताम्बूलम् ॥ ७ ॥ ॐ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ १ ॥ इति फलम्

For Private And Personal Use Only

॥ ८ ॥ ॐ बुद्धिः सवासना कृता दर्पणं मंगलानि च ॥ मनोवृत्तिर्विचित्रा ते नृत्यरूपेण कल्पिता ॥ १ ॥ ध्यानं च गीतरूपेण शब्दा वाद्यप्रभेदतः ॥ छत्राणि नवपद्मानि कल्पितानि मया प्रभो ॥ २ ॥ सुषुम्णा ध्वजरूपेण प्राणाद्याश्चामरा मताः ॥ अहंकारो गजत्वेन वेगः कृतो रथात्मना ॥ ३ ॥ इन्द्रियाण्यश्वरूपाणि शब्दादीरथवर्त्मना ॥ मनः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ॥ ४ ॥ सर्वं मन्मतथा कृतं तवोपकरणात्मना ॥ एमान् सार्द्धचतुष्टयश्लोकान् पठित्वा छत्रादि समर्पयेत् ॥ इति छत्राद्यर्पणम् ॥ ९ ॥ ॐ कदली गर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥ इति कर्पूरार्तिक्यम् ॥ १० ॥ ॐ यानि कानि च पापानि जन्मांतरकृतानि वै ॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदेपदे ॥ १ ॥ इति चतुरः प्रदक्षिणाः कुर्यात् ॥ ११ ॥ॐ प्रसन्न पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥ इति वदन् साष्टांगं प्रणमेत् ॥ १२ ॥ ॐ नानासुगंधपुष्पाणि यथाकालोद्भवानि च ॥ पुष्पांजलिं मया दत्तं गृहाण परमेश्वर॥ १ ॥इति पुष्पांजलिः ॥१३॥इति पुष्पांजलिं दत्त्वा ततस्तुतिपाठेन स्तुत्वा बद्धांजलिपूर्वकं प्रार्थयेत् ॥ ॐ ज्ञानतोऽज्ञानतो वाथ यन्मया क्रियते हरे ॥ मम कृत्यमिदं सर्वमिति देव क्षमस्व मे ॥ १ ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोयमिति मां मत्वा क्षमस्व परमेश्वर ॥ २ ॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना ॥ ३ ॥ भूमौ स्खलित पादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं हरे ॥ ४ ॥ इति बद्धांजलिपूर्वकं संप्रार्थ्य " ॐ यदुक्तं येन भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं च नैवेद्यं गृहाण त्वनुकंपय ॥१॥" इति पठित्वा देवस्य दक्षिणकरे पूजार्पणजलं दद्यात् ॥ ततो मालामादाय सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान् कृत्वा अशक्तश्चेत् "ॐ ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणी ॥ चतुर्वर्गस्त्व

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ १ ॥ इति मालां संप्रार्थ्य ॐ अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा ॥ " इति मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् यथा शक्ति प्रातःकालमारभ्य मध्यदिनं यावत् मूलमंत्रं जपेत् ॥ नित्यमेव समानं जपं कुर्यान्न तु न्यूनाधिकम् ॥ ततो जपांते "ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥ तेन सत्येन सिद्धिं मे देहि मातर्नमोऽस्तु ते ॥ १ ॥" ॐ ह्रीं सिद्ध्यै नमः ॥ इति मालां शिरसि निधाय गोमुखीरहस्ये स्थापयेत् नाशुचिः स्पर्शयेत् ॥ नान्यं दद्यात् ॥ अशुचिस्थाने न निधापयेत् । स्वयोनिवत् गुप्तां कुर्यात् ॥ ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमन्त्रोक्तं ऋष्यादिन्यासं हृदयादि षडंगन्यासं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं च दत्त्वा जपार्पणं कुर्यात् ॥ तथा च अर्घ्योदकेन चुलुकमादाय ॐ गुह्या तिगुह्यगोप्ता त्वं ग्रहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ १ ॥ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्मा धिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मदीयं च सकलं श्रीविष्णुदेवतायै समर्पयामि नमः ॥ ॐ तत्सदिति ब्रह्मार्पणं भवतु इति देवदक्षिणकरे जलसमर्पणं कृत्वां जलिपूर्वकं क्षमापनं पठेत् ॥ तथा च ॐ आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अंतश्चरसि भूतानामि इष्टस्त्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमेश्वर ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर ॥ ५ ॥ प्रातर्योनिसहस्रेषु सहस्रेषु व्रजाम्यहम् ॥ तेषु तेष्वचला भक्तिरच्युतेस्तु सदा त्वयि ॥ ६ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥आगता सुखसंपत्तिः पुण्या च तव दर्शनात् ॥७॥ देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवं जपति सर्वत्र यो देवः सोहमेव हि ॥ ८ ॥ क्षमस्व देवदेवेश क्षम्यतां भुवनेश्वर ॥ तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे ॥९॥ इति कृतांजलिः प्रार्थयित्वा शंखजलमुद्धृत्य देवोपरि भ्रामयित्वा "साधु वासाधु वा कर्म यद्यदाचारितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम ॥ १ ॥" इत्युच्चरन् देवस्य दक्षिण हस्ते किंचिज्जलं दत्त्वा प्राग्वदर्घ्यं देवशिरसि दत्त्वा शंखं यथास्थाने निवेशयेत् ॥ ततो गतसारनैवेद्यं देवस्योच्छिष्टं किंचिदुद्धृत्य ॐ विष्वक्सेनाय नमः ॥ इति विष्वक्सेनं संपूज्योच्छिष्टाधिकारिणे ऐशान्यां दिशि दद्यात् ॥ तच्छेषनैवेद्यं शिरसि धृत्वा नैवेद्यादिकं देवभक्तेषु विभज्य स्वयं भुक्त्वा विसर्जनं कुर्यात् ॥ तथा च ॥ "ॐ गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर ॥ पूजाराधनकाले च पुनरागमनाय च ॥ १ ॥" इत्यक्षतान्निक्षिप्य विसर्जनं कृत्वा "ॐ तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि॥ १ ॥" इति हृदयकमले हस्तं दत्त्वा देवं स्वहृदये संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् ॥ एवमेवाविधिना जपं सामाप्य सर्वदेवोपयोगिपद्धतिमार्गेण तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ इति विष्णुपूजापद्धतिः समाप्ता ॥ अथ विष्णुकवचप्रारंभः ॥ श्रीनारद उवाच ॥ "भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितम् ॥ त्रैलोक्यमंगलं नाम कृपया कथय प्रभो ॥ १॥ सनत्कुमार उवाच ॥ शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतम् ॥ नारायणेन कथितं कृपया ब्रह्मणे पुरा॥ २॥ब्रह्मणा कथितं

For Private And Personal Use Only

मह्यं परं स्नेहाद्ददामि ते ॥ अति गुह्यतरं तत्त्वं ब्रह्ममंत्रौघविग्रहम् ॥ ३ ॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवम् ॥ यद्धृत्वा पठना त्पाति महालक्ष्मीर्जगत्रयम् ॥४॥ पठनाद्धारणाच्छम्भुः संहर्ता सर्वमंत्रवित् ॥ त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् ॥५॥ वरदृप्ता अवानैव पठनाद्धारणाद्यतः ॥ एवमिन्द्रादयस्सर्वे सर्वैश्वर्य्यमवाप्नुयुः ॥ ६ ॥ इदं कवचमत्यंतं गुप्तं कुत्रापि नो वदेत् ॥ शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥७॥ शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ त्रैलोक्यमंगलस्यास्य कवचस्य प्रजापतिः ॥८॥ ऋषिश्छन्दश्च गायत्री देवो नारायणः स्वयम्॥धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः॥९॥ॐ प्रणवो मे शिरः पातु नमो नारायणाय च॥ भालं मे नेत्रयुगलमष्टार्णो भक्तिमुक्तिदः ॥१०॥ क्लीं पायाच्छ्रोत्रयुग्मं चैकाक्षरस्सर्वमोहनः॥ क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जिह्विकाम् ॥ ११ ॥ गोपीजनपदं वल्लभाय स्वाहाननं मम ॥ अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः ॥ १२ ॥ गोपीजनपदं वल्लभाय स्वाहा भुजद्वयम ॥ क्लीं ग्लौं क्लीं श्यामलांगाय नमः स्कंधौ दशाक्षरः ॥ १३ ॥ क्लीं कृष्णः क्लीं करौ पायात् क्लीं कृष्णायांगतोवतु ॥ हृदयं भुवनेशानी क्लीं कृष्णाय क्लीं स्तनौ मम ॥ १४ ॥ गोपालायाग्निजायांतं कुक्षियुग्मं सदावतु ॥ क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमः ॥ १५ कृष्णगोविंदकौ कट्यां स्मराद्यौ ङेयुतो मनुः ॥ अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु॥ १६ ॥ पृष्ठं क्लीं कृष्णकंकालं क्लीं कृष्णाय द्विठांतकः ॥ सक्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्णठद्वयम् ॥ १७ ॥ ऊरू सप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु ॥ श्रीं ह्रीं क्लीं पदतो गोपीजनवल्लभदं ततः ॥ १८ ॥ भाय स्वाहेति पायुं वै क्लीं ह्रीं श्रीं सदशार्णकः ॥ जानुनी च सदा पातु ह्रीं श्रीं क्लीं च दशाक्षरः ॥१९॥ त्रयोदशाक्षरः पातु जंघे चक्राद्युदायुधः ॥ अष्टादशाक्षरो ह्रीं श्रीं पूर्वको विंशदर्णकः ॥२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वांगं मे सदा पातु द्वारकानायको बली ।। नमो भगवते पश्चाद्वासुदेवाय तत्परम् ॥ २१ ताराद्यो द्वादशार्णोयं प्राच्यां मां सर्वदावतु ॥ श्रीं ह्रीं क्लीं च दशार्णस्तु क्लीं ह्रीं श्रीं षोडशार्णकः ।। २२ ।। गदाद्युदायुधो विष्णुर्मामग्नेर्दिशि रक्षतु ॥ ह्रीं श्रीं दशाक्षरो मंत्रो दक्षिणे मां सदावतु ।। २३ ।। तारो नमो भगवते रुक्मिणीवल्लभाय च ।। स्वाहेति षोडशार्णोयं नैर्ऋत्यां दिशि रक्षतु ।। २४ ।। क्लीं हृषीकेपदेशाय नमो मां वारुणेऽवतु ।। अष्टादशार्णः कामांतो वायव्ये मां सदावतु ।। २५ ।। श्रीं मायाकामकृष्णाय ह्रीं गोविन्दाय द्विठो मनुः ।। द्वादशार्णात्मको विष्णुरुत्तरे मां सदावतु ॥ २६ ।। वाग्भवं कामकृष्णाय ह्रीं गोविन्दाय तत्परम् ।। श्रीं गोपीजनवल्लभांते भाय स्वाहा हसौ स्वतः ॥ २७ ।। द्वाविंशत्यक्षरो मंत्रो मामैशान्ये सदावतु । कालियस्य फणामध्ये दिव्यनृत्यं करोति तम् ।। २८ ।। नमामि देवकीपुत्रं नृत्यराजानमच्युतम्।। द्वात्रिंशदक्षरो मंत्रोऽप्यधो मां सर्वदावतु ।। २९ ।। कामदेवाय विद्महे पुष्पबाणाय धीमहि ।। तन्नोऽनङ्गः प्रचोदयादेषा मां पातु चोर्ध्वतः ।। ३० ।। इति ते कथितं विप्र ब्रह्ममंत्रौघविग्रहम् । त्रैलोक्यमंगलं नाम कवचं ब्रह्मरूपकम् ।। ३१ ॥ ब्रह्मणा कथितं पूर्वं नारायणमुखाच्छ्रुतम् ।। तव स्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ॥ ३२ ॥ गुरुं प्रणम्य विधिवत्कवचं प्रपठेत्ततः ॥ सकृद्द्विस्त्रिर्यथाज्ञानं सोऽपि सर्वतपोमयः ।। ३३ ॥ मंत्रेष्वसकलेष्वेव देशिको नात्र संशयः ॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥ ३४ ।। हवनादीन्दशांशेन कृत्वा तत्साधयेद्ध्रुवम् ॥ यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयम् ।। ३५ ॥ मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधानतः ॥ स्पर्द्धामुद्धूय सततं लक्ष्मीर्वाणी वसेत्ततः ॥ ३६ ॥ पुष्पांजल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत्॥ दशवर्षसहस्राणां पूजायाः फलमाप्नुयात ॥ ३७ ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ।। कण्ठे वा दक्षिणे बाहौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोपि विष्णुर्न संशयः ॥ ३८ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा ॥ ३९ ॥ कलां नार्हंति तान्येव सकृदुच्चारणात्ततः ॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ॥ ४० ॥ त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत् ॥ इदं कवचमज्ञात्वा यजेद्यः पुरुषोत्तमम् ॥ शतलक्षप्रजप्तोपि न मंत्रस्तस्य सिद्ध्यति ॥ ४१ ॥" इति विष्णुकवचं समाप्तम् ॥ अथ नारायणहृदयम् ॥ आचम्य प्राणानायम्य देशकालौ स्मृत्वा ममाभीष्टसिद्ध्यर्थं संकलीकरणरीत्या संपुटीकरणरीत्या वा नारायणहृदयस्य सकृदावर्तनं करिष्ये ॥ इति संकल्पयेत्॥ॐ अस्य श्रीनारायणहृदयस्तोत्रमंत्रस्य भार्गव ऋषिः। अनुष्टुप्छंदः । श्रीलक्ष्मीनारायणो देवता । ॐ बीजम् । नमः शक्तिः । नारायणायेति कीलकम् । श्रीलक्ष्मीनारायणप्रीत्यर्थे पाठे विनियोगः ॥ ॐ भार्गवऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥२॥ ॐ श्रीलक्ष्मीनारायणदेवतायै नमो हृदि ॥३॥ ॐ बीजाय नमो गुह्ये ॥४॥ॐ नमः शक्तये नमः पादयोः॥ ५ ॥ ॐ नारायणेति कीलकाय नमः नाभौ ॥६॥ ॐ विनियोगाय नमः सर्वाङ्गे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ नारायणः परं ज्योतिरित्यंगुष्ठाभ्यां नमः॥ १ ॥ ॐ नारायणः परंब्रह्मेति तर्जनीभ्यां नमः॥२॥ ॐ नारायणः परो देव इति मध्यमाभ्यां नमः ॥३॥ ॐ नारायणः परो ध्यातेति अनामिकाभ्यां नमः ॥४॥ ॐ नारायणः परं धामेति कनिष्ठिकाभ्यां नमः ॥५॥ॐ नारायणः परो धर्म्म इति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ नारायगः परं ज्योतिरिति हृदयाय नमः ॥ १ ॥ ॐ नारायणः परंब्रह्मेति शिरसे स्वाहा ॥ २ ॥ ॐ नारायणः परो देव इति शिखायै वषट् ॥ ३ ॥ ॐ नारायणः परो ध्यातेति कवचाय हुं ॥४॥ ॐ नारायणः परं धामेति नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ नारायणः परो धर्म्म इत्यस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति न्यासं कृत्वा " ॐ नमः सुदर्शनाय सहस्राय हुं फट् बध्नामि नमश्चक्राय स्वाहा" ॥ इति मंत्रेण तालत्रयेण दशदिक्षु दिग्बंधनं कुर्यात् ॥ इति दिग्बंधनं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥"उद्यदादित्यसंकाशं पीतवाससमच्युतम् ॥ शंखचक्रगदापाणिं ध्यायेल्लक्ष्मी पतिं हरिम् ॥ १ ॥ इति ध्यात्वा " ॐ नमो नारायणाय" इति अष्टोत्तरशतं जपित्वा पाठं कुर्यात् ॥ अथ मूलाष्टकम् ॥ "ॐ नारायणः परं ज्योतिरात्मा नारायणः परः ॥ नारायणः परं ब्रह्म नारायण नमोस्तुते ॥ १ ॥ नारायणः परो देवो दाता नारायणः परः ॥ नारायणः परो ध्याता नारायण नमोस्तु ते॥ २॥ नारायणः परं धाम ध्यानं नारायणः परः॥नारायणः परो धर्म्मो नारायण नमोस्तु ते॥ ३॥ नारायणः परो वेद्यो विद्या नारायणः परः ॥ विश्वं नारायणस्साक्षान्नारायण नमोस्तु ते ॥ ४ ॥ नारायणाद्विधिर्जातो जातो नारायणाच्छिवः ॥ जातो नारायणादिन्द्रो नारायण नमोस्तु ते ॥५ ॥ रविर्नारायणं तेजश्चान्द्रं नारायणं महः॥ वह्निर्नारायणः साक्षान्नारायण नमोस्तु ते ॥ ६ ॥ नारायण उपास्यः स्याद्गुरुर्नारायणः परः॥ नारायणः परो बोधो नारायण नमोस्तु ते ॥७॥ नारायणः फलं मुख्यं सिद्धिर्नारायणः सुखम्॥सेव्यो नारायणः शुद्धो नारायण नमोस्तु ते॥८॥"इति मूलाष्टकम्॥अथ प्रार्थनादशकम्॥ॐ नारायणस्त्वमेवासि दहराख्ये हृदि स्थितः ॥ प्रेरकः प्रेर्य्यमाणानां त्वया प्रेरितमानसः ॥ १ ॥ त्वदाज्ञां शिरसा धृत्वा जपामि जनपावनम् ॥ नानोपासन मार्गाणां भावकृद्भावबोधकः ॥ २ ॥ भावार्थकृद्भावभूतो भावसौख्यप्रदो भव ॥ त्वन्मायामोहितं विश्वं त्वयैव परिकल्पितम् ॥ ३ ॥ त्वदधिष्ठानमात्रेण सैषा सर्वार्थकारिणी ॥ त्वमेव तां पुरस्कृत्य मम कामान्समर्प्पय ॥४॥ न मे त्वदन्यस्त्रातास्ति त्वदन्यन्न हि दैवतम् ॥ त्वदन्यं न हि जानामि पालकं पुण्यरूपकम् ॥ ५ ॥ यावत्सांसारिको भावो मनःस्थो भावनात्मकः ॥ तावत्सिद्धिर्भवेत्साध्या सर्वथा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वदा विभो ॥ ६ ॥ पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ॥ दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्रये ॥ ७ ॥ त्वयाप्यहं न सृष्टश्चेन्न स्यात्तव दयालुता ॥ आमयो नैव सृष्टश्चेदौषधस्य वृथोदयः ॥ ८ ॥ पापसंघपरिक्रांतः पापात्मा पापरूपधृक् ॥ त्वदन्यः कोऽत्र पापेभ्यस्त्राता मे जगतीतले ॥ ९ ॥ त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव ॥ त्वमेव विद्या च गुरुस्त्वमेव त्वमेव सर्वं मम देवदेव ॥ १० ॥" इति प्रार्थनादशकम् ॥ "प्रार्थनादशकं चैव मूलाष्टकमुदाहृतम् ॥ यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत ॥ १ ॥ नारायणस्य हृदयं सर्वाभीष्टफलप्रदम् ॥ लक्ष्मीहृदयकं स्तोत्रं यदि चेत्तद्विना कृतम् ॥ २ ॥ तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुद्ध्यति सर्वदा ॥ एतत्संकलितं स्तोत्रं सर्वकर्मफलप्रदम् ॥ ३ ॥ लक्ष्मीहृदयकं चैव तथा नारायणात्मकम् ॥ जपेद्यः संकलीकृत्य सर्वाभीष्टमवाप्नुयात ॥ ४ ॥ नारायणस्य हृदयमादौ जप्त्वा ततः परम् ॥ लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ॥ ५ ॥ पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीकृतं जपेत् ॥ पुनर्नारायणं जाप्यं संकलीकरणं भवेत् ॥ ६ ॥ एवं मध्ये द्विवारेण जपेत्संकलितं हि तत् ॥ लक्ष्मीहृदयकं स्तोत्रं सर्वकामप्रकाशितम् ॥ ७ ॥ तद्वज्जपादिकं कुर्य्यादेतत्संकलितं शुभम् ॥ सर्वान्कामानवाप्नोति आधिव्याधिभयं हरेत् ॥ ८ ॥ गोप्यमेतत्सदा कुर्यान्न सर्वत्र प्रकाशयेत् ॥ अति गुह्यतमं शास्त्रं प्राप्तं ब्रह्मादिकैः पुरा ॥ ९ ॥ तस्मात्सर्वप्रयत्नेन गोपयेत्साधयेत्सुधीः ॥ यत्रैतत्पुस्तकं तिष्ठेल्लक्ष्मीनारायणात्मकम् ॥ १० ॥ भूतपैशाचवेताला न स्थिरास्तत्र सर्वदा ॥ लक्ष्मीहृदयकं प्रोक्तं विधिना साधयेत्सुधीः ॥ ११ ॥ भृगुवारे च रात्रौ च पूजयेत्पुस्तकद्वयम् ॥ सर्वस्वं सर्वदा सत्यं गोपयेत्साधयेत्सुधीः ॥ १२ ॥ गोपनात्साधनाल्लोके धन्यो भवति तत्त्वतः ॥ १३ ॥ इत्यथर्वणरहस्ये उत्तरभागे श्रीनारायणहृदयं सम्पूर्णम् ॥ अथ विष्णुस्तोत्रम् ॥ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदाय वेदान्सकलान्समुद्रान्निहत्य शंखासुरमत्युदग्रम् ॥ दत्ताः पुरा येन पितामहाय विष्णुं तमाद्यं भज मत्स्यरूपम्॥ १ ॥ दिव्यामृ
तार्थे मथिते महाब्धौ देवासुरैर्वासुकिमन्दराभ्याम् ॥ भूमेर्महावेगविघूर्णितायास्तं कूर्ममाधारगतं स्मरामि ॥ २ ॥ समुद्रकांची सरिदुत्तरी
या वसुंधरा मेरुकिरीटभारा ॥ दंष्ट्राग्रतो येन समुद्धृता भूस्तमादिकोलं शरणं प्रपद्ये ॥ ३ ॥ भक्तार्तिभंगक्षमया धियायस्तंभां
तरालादुदितो नृसिंहः ॥ रिपुं सुराणां निशितैर्नखाग्रैर्विदारयंतं न च विस्मरामि ॥ ४ ॥ चतुस्समुद्राभरणा धरित्री न्यासाय
नालं चरणस्य यस्य ॥ एकस्य नान्यस्य पदं सुराणां त्रिविक्रमं सर्वगतं नमामि ॥ ५ ॥ त्रिःसप्तकृत्वो नृपतीन्निहत्य यस्त
र्पणं रक्तमयं पितृभ्यः ॥ चकार दोर्दण्डबलेन सम्यक् तमादिशूरं प्रणमामि रामम् ॥ ६ ॥ कुले रघूणां समवाप्य जन्म
विधाय सेतुं जलधेर्जलांतः ॥ लंकेश्वरं यः शमयांचकार सीतापतिं तं प्रणमामि भक्त्या ॥ ७ ॥ हलेन सर्वानसुरान्निकृष्य
चकार चूर्णं मुसलप्रहारैः ॥ यः कृष्णमासाद्य बलं बलीयान् भक्त्या भजे तं बलभद्रामम् ॥ ८ ॥ पुरा सुराणामसु
रान्विजेतुं संभावयञ्छीवरचिह्नवेषम् ॥ चकार यः शास्त्रममोघकल्पं तं मूलभूतं प्रणतोस्मि बुद्धम् ॥ ९ ॥ कल्पावसाने निखिलैः सुरैः
स्वैः संघट्टयामास निमेषमात्रात् ॥ यस्तेजसा स्वेन ददाह भीमो विष्ण्वात्मकं तं तुरगं भजामः ॥ १० ॥ शंखं सुचक्रं सुगदां
सरोजं दोर्भिर्दधानं गरुडाधिरूढम् ॥ श्रीवत्सचिह्नं जगदादिमूलं तमालनीलं हृदि विष्णुमीडे ॥ ११ ॥ क्षीराम्बुधौ शेषविशेषतल्पे
शयानमंतःस्मितशोभि वक्त्रम् ॥ उत्फुल्लनेत्राम्बुजमंबुदाभमाद्यं श्रुतीनामसकृत्स्मरामि ॥ १२ ॥ प्रीणयेदनया स्तुत्या जगन्नाथं जगन्म
यम् ॥ धर्म्मार्थकाममोक्षाणामाप्तये पुरुषोत्तमम् ॥ १३ ॥” इति श्रीविष्णुस्तोत्रं समाप्तम् ॥ अथ विष्णोरष्टोत्तरशतनामस्तोत्रप्रारंभः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"ॐ अष्टोत्तरं शतं नाम्नां विष्णोरतुलतेजसः ॥ यस्य श्रवणमात्रेण नरो नारायणो भवेत् ॥ १ ॥ विष्णुर्जिष्णुर्वषट्कारो देवदेवो वृष
कपिः ॥ दामोदरो दीनबंधुरादिदेवो दितेः सुतः ॥ २ ॥ पुण्डरीकः परानंदः परमात्मा परात्परः ॥ परशुधारी विश्वात्मा कृष्णः कालि
मलापहः ॥ ३ ॥ कौस्तुभोद्भासितोरस्को नरो नारायणो हरिः ॥ हरो हरप्रियः स्वामी वैकुण्ठो विश्वतोमुखः ॥ ४ ॥ हृषीकेशो
ऽप्रमेयात्मा वराहो धरणीधरः॥ वामनो वेदवक्ता च वासुदेवः सनातनः॥ ५ ॥ रामो विरामो विरजो रावणारी रमापतिः ॥ वैकुण्ठवासी
वसुमान् धनदो धरणीधरः ॥ ६ ॥ धर्मेशो धरणीनाथो ध्येयो धर्मभृतां वरः ॥ सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात् ॥ ७ ॥
सर्वगः सर्ववित्सर्वः शरण्यः साधुवल्लभः ॥ कौसल्यानंदनश्श्रीमान् रक्षःकुलविनाशकः ॥ ८ ॥ जगत्कर्ता जगद्धर्ता जगज्जेता जना
र्तिहा ॥ जानकीवल्लभो देवो जयरूपो जलेश्वरः ॥ ९ ॥ क्षीराब्धिवासी क्षीराब्धितनयावल्लभस्तथा ॥ शेषशायी पन्नगारिवाहनो विष्टर
श्रवाः॥ १० ॥ माधवो मथुरानाथो मोहदो मोहनाशनः ॥ दैत्यारिः पुण्डरीकाक्षो ह्यच्युतो मधुसूदनः ॥ ११ ॥ सोमसूर्याग्नि नयनो
नृसिंहो भक्तवत्सलः ॥ नित्यो निरामयश्शुद्धो नरदेवो जगत्प्रभुः ॥१२॥ हयग्रीवो जितरिपुरुपेन्द्रो रुक्मिणीपतिः ॥सर्वदेवमयः श्रीशः
सर्वाधारः सनातनः ॥ १३ ॥ सौम्यः सौम्यप्रदः स्रष्टा विष्वक्सेनो जनार्दनः ॥ यशोदातनयो योगी योगशास्त्रपरायणः ॥१४॥
रुद्रात्मको रुद्रमूर्ती राघवो मधुसूदनः ॥ इति ते कथितं दिव्यं नाम्नामष्टोत्तरं शतम् ॥ १५ ॥ सर्वपापहरं पुण्यं विष्णोरमिततेजसः॥
दुःखदारिद्र्यदौर्भाग्यनाशनं सुखवर्द्धनम् ॥ १६ ॥ सर्वसंपत्करं सौम्यं महापातकनाशनम् ॥ प्रातरुत्थाय विप्रेन्द्रः पठेदेकाग्रमानसः ॥
तस्य नश्यंति विपदां राशयः सिद्धिमाप्नुयात् ॥ १७ ॥ इत्यष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥ अथ विष्णुसहस्रनामस्तोत्रप्रारंभः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमहादेव उवाच ।। "ब्रह्महत्यासहस्राणां पापं शाम्येत्कथंचन ॥ न पुनस्त्वय्यविज्ञाते कल्पकोटिशतैरपि॥ १ ॥ यस्मान्मया कृता स्पर्द्धा पवित्रं स्यां कथं हरे ।। नश्यंति सर्वपापानि तन्मां वद सुरेश्वर ॥२॥ तदाह देवो गोविंदो मम प्रीत्या यथायथम् ॥ ३ ॥ श्रीभगवानुवाच ॥ सदा नामसहस्रं मे पावनं मत्पदावहम् ।। तत्परोऽनुदिनं शंभोः सर्वैश्वर्यं यदीच्छसि ॥ ४ ॥ श्रीमहादेव उवाच ॥ तमेव तपसा नित्यं भजामि स्तौमि चिंतये ।। तेनाद्वितीयमहिमो जगत्पूज्योऽस्मि पार्वति ॥ ५ ॥ श्रीपार्वत्युवाच ।। तन्मे कथय देवेश यथाहमपि शंकर ।। सर्वेश्वरी निरुपमा तव स्यां सदृशी प्रभो ॥६॥ श्रीमहादेव उवाच ॥ साधुसाधु त्वया पृष्टो विष्णोर्भगवतश्शिवे ॥ नाम्नां सहस्रं वक्ष्यामि मुख्यं त्रैलोक्यमंगलम् ।। ७ ।। नारायणाय पुरुषोत्तमाय च नमो महात्मने ।। विशुद्धसत्त्वाधिष्ठाय महाहंसाय धीमहि ॥ ८ ॥ ॐ अस्य श्रीविष्णोःसहस्रनाममंत्रस्य महादेव ऋषिः । अनुष्टुप्छंदः । परमात्मा देवता । सूर्यकोटिप्रतीकाश इति बीजम् । गंगातीर्थोत्तमा शक्तिः । प्रपन्नाशनिपंजर इति कीलकम् ॥ धर्मार्थकाममोक्षार्थे पाठे विनियोगः ॥ ॐ महादेवऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ परमात्मदेवतायै नमः हृदि ॥ ३ ॥ सूर्यकोटिप्रतीकाशबीजाय नमः गुह्ये ॥४ ॥ गंगातीर्थोत्तमशक्तये नमः पादयोः॥५॥प्रपन्नाशनिपंजरकीलकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वाङ्गे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ वासुदेवं परं ब्रह्म इत्यंगुष्ठाभ्यां नमः ॥१॥ ॐ मूलप्रकृतिरिति तर्जनीभ्यां नमः ॥२॥ भूमहावराह इति मध्यमाभ्यां नमः॥ ३॥ ॐ सूर्यवंशध्वजो राम अनामिकाभ्यां नमः॥४॥ॐ ब्रह्मादिकमलादिगदासूर्यकेशवमिति कनिष्ठिकाभ्यां नमः॥५॥शेष इति करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ वासुदेवं परं ब्रह्म इति हृदयाय नमः ॥१॥ ॐ मूलप्रकृतिशिरसे स्वाहा ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ भूमहावराह इति शिखायै वषट् ॥ ३ ॥ ॐ सूर्यवंशध्वजो रामः कवचाय हुं ॥ ४ ॥ ॐ ब्रह्मादिकमलादिगदासूर्यकेशवः
नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ दिव्यास्त्र इत्यस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्॥
ॐ विष्णुंभास्वत्कीरिटांगदवलयगणाकल्पहारोदरांघ्रिश्रोणीभूषं सुवक्षो मणिमकरमहाकुंडलं मंडितांसम् ॥ हस्तोद्यच्चक्रशंखांबुजगदममलं
पीतकौशेयवासोविद्युद्भासं समुद्यदिनकरसदृशं पद्महस्तं नमामि ॥ ९ ॥ ॐ वासुदेवः परंब्रह्म परमात्मापरात्परम्॥ परं धाम परज्योतिः पर
तत्त्वं परं पदम् ॥ १० ॥ परंशिवं परोध्येयः परंज्ञानंपरागतिः॥ परमार्थः परंश्रेयः परानंदः परोदयः ॥ ११ ॥ परोव्यक्तः परंव्योमपरार्द्धः
परमेश्वरः ॥ निरामयो निर्विकारो निर्विकल्पो निराश्रयः॥ १२॥ निरंजनो निरालंबो निर्लेपो निरवग्रहः ॥ निर्गुणो निष्कलोऽनंतोचिंत्यो
सावचलोऽच्युतः ॥ १३ ॥ अतीन्द्रियोऽमितोऽ रोध्योऽनीहोऽनीशोव्ययोऽक्षयः ॥ सर्वज्ञः सर्वगः सर्वः सर्वदः सर्वभावनः ॥ १४ ॥
सर्वशंभुस्सर्वमाक्षीपूज्यस्सर्वस्यसर्वदृक् ॥ सर्वशक्तिः सर्वसारः सर्वात्मा सर्वतोमुखः ॥ १५ ॥ सर्वावासः सर्वरूपः सर्वादिस्सर्वदुःखहा ॥
सर्वार्थः सवतोभद्रः सर्वकारणकारणम्॥ १६॥सर्वातिशायकः सर्वाध्यक्षः सर्वेश्वरेश्वरः॥ षड्विंशको महाविष्णुर्महागुह्यो महाहरिः॥ १७॥
नित्योदितो नित्ययुक्तोनित्यानंदः सनातनः॥ मायापतिर्योगपतिः कैवल्यपतिरात्मभूः॥ १८॥ जन्ममृत्युजरातीतः कलातीतोभवातिगः ॥
पूर्णः सत्यश्शुद्धबुद्धस्वरूपोनित्यचिन्मयः ॥१९॥ योगिप्रियोयोगमयोभवबंधैकमोचकः॥पुराणः पुरुषः प्रत्यक्चैतन्यपुरुषोत्तमः॥ २०॥
वेदांतवेद्योदुर्ज्ञेयस्तापत्रयविवर्जितः ॥ ब्रह्मविद्याश्रयोऽलंघ्यः स्वप्रकाशः स्वयंप्रभः ॥ २१ ॥ सर्वोपेयउदासीनः प्रणवस्सर्वतस्समः ॥
सर्वानवद्योदुष्प्रापस्तुरीयस्तमसमः परः ॥ २२ ॥ कूटस्थः सर्वसंश्लिष्टोवाङ्मनोगोचरातिगः॥ संकर्षणः सर्वहरः कालः सर्वभयंकरः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ २३ ॥ अनुल्लंघ्यः सर्वगतिर्महारुद्रोदुरासदः ॥ मूलप्रकृतिरानन्दः प्रज्ञाताविश्वमोहनः ॥ २४ ॥ महामायोविश्वबीजंपरशक्तिसुखै
कभुक् ॥ सर्वकाम्योनंतशीलस्सर्वभूतवशंकरः ॥२५॥ अनिरुद्धः सर्वजीवोहृषीकेशो मनःपतिः ॥ निरुपाधिः प्रियो हंसोक्षरः सर्वनियो
जकः ॥ २६ ॥ ब्रह्मा प्राणेश्वरः सर्वभूतभृद्देहनायकः ॥ क्षेत्रज्ञः प्रकृतिस्वामीपुरुषोविश्वसूत्रधृक् ॥ २७ ॥ अंतर्यामी त्रिधामांतः
साक्षीत्रिगुणईश्वरः ॥ योगिमृग्यः पद्मनाभः शेषशायी श्रियःपतिः॥२८॥ श्रीसत्योपास्यपादाब्जोऽनंतः श्रीः श्रीनिकेतनः ॥ नित्यवक्षः
स्थलस्थश्रीः श्रीनिधिः श्रीधरो हरिः ॥२९॥ रम्यश्रीनिश्चयश्रीदोविष्णुः क्षीराब्धिमंदिरः ॥ कौस्तुभोद्भासितोरस्को माधवोजगदार्तिहा
॥ ३० ॥ श्रीवत्सवक्षानिःसीमः कल्याणगुणभाजनम् ॥ पीतांबरोजगन्नाथोजगद्धाताजगत्पिता ॥ ३१ ॥ जगद्बन्धुर्जगत्स्रष्टाजगत्कर्ता
जगन्निधिः ॥ जगदेकस्फुरद्वीर्योनाहंवादीजगन्मयः ॥ ३२ ॥ सर्वाश्चर्यमयस्सर्वसिद्धार्थः सर्ववीरजित् ॥ सर्वामोघोद्यमोब्रह्मरुद्राद्युत्कृष्टचे
तनः ॥ ३३ ॥ शंभोः पितामहोब्रह्मपिताशक्राद्यधीश्वरः ॥ सर्वदेवप्रियः सर्वदेवमूर्तिरनुत्तमः ॥ ३४ ॥ सर्वदेवैकशरणं सर्वदेवैकदै
वतम् ॥ यज्ञभुग्यज्ञफलदोयज्ञेशोयज्ञभावनः ॥३५॥ यज्ञत्रातायज्ञपुमान् वनमालीद्विजप्रियः ॥ द्विजैकमानदोहिंस्रः कुलदेवोऽसुरांतकः
॥ ३६ ॥ सर्वदुष्टांतकृत्सर्वसज्जनानन्दपालकः ॥ सर्वलोकैकजठरः सर्वलोकैकमण्डलः ॥ ३७ ॥ सृष्टिस्थित्यंतकृच्चक्री शार्ङ्ग
धन्वागदाधरः ॥ शंखभृन्नन्दकीपद्मपाणिर्गरुडवाहनः ॥ ३८ ॥ अनिर्देश्यवपुः सर्वः सर्वलोकैकपावनः ॥ अनंतकीर्तिर्निःश्रीशः
पौरुषः सर्वमंगलः ॥ ३९ ॥ सूर्यकोटिप्रतीकाशोयमकोटिविनाशनः ॥ ब्रह्मकोटिजगत्स्रष्टावायुकोटिमहाबलः ॥ ४० ॥ कोटी
न्दुजगदानन्दीशंभुकोटिमहेश्वरः ॥ कुबेरकोटिलक्ष्मीवान्शत्रुकोटिविनाशनः ॥ ४१ ॥ कंदर्पकोटिलावण्योदुर्गकोटिविमर्दनः ॥ समुद्र

For Private And Personal Use Only

कोटिगम्भीरस्तीर्थकोटिसमाह्वयः ॥ ४२ ॥ हिमवत्कोटिनिष्कम्यः कोटिब्रह्माण्डविग्रहः ॥ कोट्यश्वमेधपापघ्नोयज्ञकोटिसमार्चनः॥ ४३॥
सुधाकोटिस्वास्थ्यहेतुःकामधुक्कोटिकामदः ॥ ब्रह्मविद्याकोटिरूपःशिपिविष्टःशुचिःश्रवाः ॥४४॥विश्वंभरस्तीर्थपादःपुण्यश्रवणकीर्तनः॥
आदिदेवोजगज्जैत्रोमुकुन्दःकालनेमिहा ॥ ४५ ॥ वैकुंठोऽनंतमाहात्म्यो महायोगीश्वरेश्वरः ॥ नित्यतृप्तोनृसद्भावोनिःशंकोनरकांतकः
॥ ४६ ॥ दीनानाथैकशरणंविश्वैकव्यसनापहा ॥ जगत्क्षमाकृतोनित्यःकृपालुः सज्जनाश्रयः ॥ ४७ ॥ योगेश्वरःसदोदीर्णोवृद्धिक्षय
विवर्जितः ॥ अधोक्षजोविश्वरेताः प्रजापतिसमाधिपः ॥ ४८ ॥ शक्रब्रह्मार्चितपदःशंभुर्ब्रह्मार्द्धधामगः ॥ सूर्यसोमेक्षणोविश्वभोक्तासर्व
स्यपारगः ॥ ४९ ॥ जगत्सेतुर्धर्मसेतुर्धारोऽरिष्टधुरन्धरः ॥ निर्मलोखिललोकेशोनिःशङ्कोऽद्भुतभोगवान् ॥ ५० ॥ रम्यमायोविश्व
विश्वोविष्वक्सेनोनगोत्तमः ॥ सर्वःश्रियःपतिर्दैव्याःसर्वभूषणभषितः ॥ ५१ ॥ सर्वलक्षणलक्षण्यःसर्वदैत्येन्द्रदर्पहा ॥ समस्तदेवसर्वज्ञः
सर्वदैवतनायकः॥ ५२ ॥ समस्तदेवतादुर्गः प्रपन्नाशनिपंजरः ॥ समस्तदेवकवचंसर्वदेवशिरोमणिः ॥ ५३ ॥ समस्तभयनिर्भिन्नोभगवान्
विष्टरश्रवाः ॥ विभुस्सर्वहितोप्यर्कोहतारिःसुरतिप्रदः ॥ ५४ ॥ सर्वदैवतजीवेशोब्राह्मणादिनियोजकः ॥ ब्रह्माशंभुपरार्द्धोढयोब्रह्मजेष्ठः
शिशुःस्वराट् ॥५५॥ विराड्भक्तपराधीनःस्तुत्यःसर्वार्थसाधकः ॥ सर्वार्थकर्ताकृत्यज्ञःस्वार्थकृत्यसदोज्झितः ॥५६॥ सदानवःसदाभद्रः
सदाशांतःसदाशिवः ॥ सदाप्रियः सदातुष्टःसदापुष्टःसदार्चितः ॥ ५७ ॥ सदापूतःपावनाग्र्योवेदगुह्योवृषाकपिः ॥ सहस्रनामा त्रियुगश्च
तुमूर्तिश्चतुर्भुजः ॥ ५८ ॥ भूतभव्यभवन्नाथोमाहापुरुषपूर्वजः ॥ नारायणोमुंजकेशःसर्वयोगविनिःसृतः ॥५९॥ वेदसारोयज्ञसारःसाम
सारस्तपोनिधिः ॥ साध्यश्रेष्ठःपुराणर्षिर्निष्ठाशांतिपरायणः ॥६०॥ शिवत्रिशूलविध्वंसीश्रीकंठैकवरप्रदः ॥ नरकृष्णोहरिर्धर्मनन्दनोधर्म

For Private And Personal Use Only

जीवनः ॥ ६१ ॥ आदिकर्तासर्वसत्यःसर्वस्त्रीरत्नदर्पहा ॥ विकलोर्जितकंदर्पउर्वशीदृङ्मुनीश्वरः ॥ ६२ ॥ आद्यःकविर्हयग्रीवःसर्ववागीश्वरेश्वरः ॥ सर्वदेवमयोब्रह्मगुरुर्वागीश्वरःपतिः ॥ ६३ ॥ अनंतविद्याप्रभवोमूलविद्याविनाशकः ॥ सर्वार्हणो जगज्जाड्यनाशको मधुसूदनः ॥ ६४ ॥ अनन्तमंत्रकोटीशः शब्दब्रह्मैकपावकः ॥ आदिवेद्वान्वेदकर्तावेदात्माश्रुतिसागरः ॥ ६५ ॥ ब्रह्मार्थवेदाभरणसर्वविज्ञानजन्मभूः ॥ विद्याराजोज्ञानराजोज्ञानसिंधुरखण्डधीः ॥ ६६ ॥ मत्स्यदेवोमहाश्रृंगोजगद्बीजवहित्रधृक् ॥ लीलाव्याप्ताखिलांभोधिश्चतुर्वेदप्रवर्तकः ॥ ६७ ॥ आदिकूर्मोखिलाधारस्तृणीकृतजगद्भवः ॥ अमरीकृतदेवौघःपीयूषोत्पत्तिकारणम् ॥ ६८ ॥ आत्माधारोधराधारोयज्ञाङ्गोधरणीधरः ॥ हिरण्याक्षहरः पृथ्वीपतिःश्राद्धादिकल्पकः ॥६९ ॥ समस्तपित्रभीतिघ्नःसमस्तपितृजीवनम् ॥ हव्यकव्यैकभुग्भव्योगुणभव्यैकदायकः ॥ ७० ॥ लोमांतलीनजलधिःक्षोभिताशेषसागरः ॥ महावराहोयज्ञघ्नध्वंसनोयाज्ञिकाश्रयः ॥ ७१ ॥ नरसिंहोदिव्यसिंहःसर्वारिष्टार्तिदुःखहा ॥ एकवीरोद्भुतबलोयन्त्रमन्त्रैकभंजनम् ॥ ७२ ॥ ब्रह्मादिदुःसहज्योतिर्युगांताग्न्यतिभीषणः ॥ कोटिवज्राधिकनखोगजदुष्प्रेक्षमूर्तिधृक् ॥७३॥ मातृचक्रप्रथमनोमहामातृगणेश्वरः ॥ अचिंत्योमोघवीर्य्योब्ध्यःसमस्तासुरघस्मरः ॥७४॥ हिरण्यकशिपुच्छेदीकालःसंकर्षणःपतिः ॥ कृतांतवाहनःसद्यःसमस्तभयनाशनः ॥ ७५ ॥ सर्वविघ्नांतकःसर्वसिद्धिदःसर्वपूरकः ॥ समस्तपातकध्वंसीसिद्धमंत्राधिकाह्वयः ॥ ७६ ॥ भैरवेशोहरार्तिघ्नःकालकल्पोदुरासदः ॥ दैत्यगर्भस्राविनामास्फुटब्रह्माण्डवर्जितः ॥ ७७ ॥ स्मृतिमात्राखिलत्राताभूतरूपोमहाहरिः ॥ ब्रह्मचर्मशिरःपङ्क्तिदिक्पालोऽर्द्धाङ्गभूषणः ॥ ७८ ॥ द्वादशार्कशिरोधामारुद्रशीर्षैकनुपूरः ॥ योगिनीग्रस्तगिरिजारतो भैरवतर्जकः ॥ ७९ ॥ वीरचक्रेश्वरोऽत्युग्रो यमारिः कालसंवरः ॥ क्रोधेश्वरोरुद्रचण्डीपारिवादीसुदुष्टभाक् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ८० ॥ सर्वाक्षः सर्वमृत्युश्चमृत्युर्मृत्युनिर्वर्तकः ॥ असाध्यस्सर्वरोगघ्नः सवदुर्ग्रहसौम्यकृत् ॥ ८१ ॥ गणेशकोटिदर्पघ्नोदुः
सहोऽशेषगोत्रहा ॥ देवदानवदुर्द्धर्षोजगद्भयप्रदः पिता ॥ ८२ ॥ समस्तदुर्गतित्राताजगद्भक्षकभक्षकः ॥ उग्रेशोऽसुरमार्जारः
कालमूषकभक्षकः ॥ ८३ ॥ अनंतायुधदोर्दण्डोनृसिंहोवीरभद्रजित् ॥ योगिनीचक्रगुह्येशः शक्रारिः पशुमांसभुक् ॥ ८४ ॥
रुद्रोनारायणोमेषरूपशंकरवाहनः॥ मेषरूपीशिवत्रातादुष्टशक्तिसहस्रभुक् ॥ ८५ ॥ तुलसीवल्लभोवीरोऽचिंत्यमायोऽखिलेष्टदः ॥ महाशिवः
शिवोरुद्रोभैरवैककपालभृत् ॥ ८६ ॥ भिल्लश्चक्रेश्वरश्चक्रोदिव्यमोहनरूपधृक् ॥ गौरीसौभाग्यदोमायानिधिर्मायाभयापहः ॥ ८७ ॥
ब्रह्मतेजोमयोब्रह्मश्रीमयश्चत्रयीमयः ॥ सुब्रह्मण्योबलिध्वंसीवामनोऽदितिदुःखहा ॥ ८८ ॥ उपेन्द्रोनृपतिर्विष्णुः कश्यपान्वयमण्डनः ॥
बलिस्वाराज्यदः सर्वदेवविश्रात्मदोऽच्युतः ॥ ८९ ॥ उरुक्रमस्तीर्थपादस्त्रिदशश्चत्रिविक्रमः ॥ व्योमपादः स्वपादांभःपवित्रितजग
त्रयः ॥ ९० ॥ ब्रह्मेशाद्यभिवंद्याङ्घ्रिर्द्रुतकर्माद्रिधारणः ॥ अचिंत्याद्भुतविस्तारोविश्ववृक्षोमहाबलः ॥ ९१ ॥ बहुमूर्द्धापराङ्गच्छिद्भृ
गुपत्नीशिरोहरः ॥ पापस्तेयः सदापुण्योदैत्येशोनित्यखण्डकः ॥ ९२ ॥ पूरिताखिलदेवेशोविश्वार्थैकावतारकृत् ॥ अमरोनित्यगुप्तात्मा
भक्ताचिंतामणिः सदा ॥ ९३ ॥ वरदः कार्तवीर्याादिराजराज्यप्रदोऽनघः ॥ विश्वश्लाघ्योऽमिताचारोदत्तात्रेयोमुनीश्वरः ॥ ९४ ॥
परशक्तिसमायुक्तोयोगानंदमदोन्मदः ॥ समस्तेन्द्रारितेजोहृत्परमानंदपादपः ॥ ९५ ॥ अनसूयागर्भरत्नोभोगमोक्षसुखप्रदः ॥ जमदग्नि
कुलादित्योरेणुकाद्भुतशक्तिहृत् ॥ ९६ ॥ मातृहत्यादनिर्लेपः स्कंदजिद्विप्रराज्यदः ॥ सर्वक्षत्रांतकृद्वीरदर्पहाकार्तवीर्यजित्॥ ९७ ॥
योगीयोगावतारश्चयोगीशोयोगतत्परः ॥ परमानंददाताचशिवाचार्ययशःप्रदः ॥ ९८ ॥ भीमः परशुरामश्चशिवाचार्यैकविश्वभूः ॥

For Private And Personal Use Only

शिवाखिलज्ञानकोशीभीष्माचार्य्योऽग्निदैवतः ॥ ९९ ॥ द्रोणाचार्यगुरुर्विश्वजैत्रधन्वाकृतांतकृत् ॥ अद्वितीयतमोमूर्तिर्ब्रह्मचर्य्यैकद
क्षिणः ॥ १०० ॥ मनुश्रेष्ठः सतांसेतुर्महीयान्वृषभोविराट् ॥ आदिराजः क्षितिपितासर्वरत्नैकदोहकृत् ॥ १०१ ॥ पृथुजन्माद्येकद
क्षो ह्रीः श्रीः कीर्तिः स्वयंधृतिः ॥ जगद्वृत्तिप्रदश्चक्रवर्तिश्रेष्ठोद्वुरस्त्रधृक् ॥ १०२ ॥ सनकादिमुनिप्राप्यद्भगवद्भक्तिवर्द्धनः ॥ वर्णाश्रमादि
धर्म्माणांकर्तारक्षाप्रवर्तकः ॥ १०३ ॥ सूर्यवंशध्वजोरामोराघवः सद्गुणार्णवः ॥ ककुत्स्थवीरताधर्मौराजधर्मधुरंधरः ॥ १०४ ॥ नित्य
स्वस्थाशयः सर्वभद्रग्राहीशुभैकदृक् ॥ नवरत्नंरत्ननिधिः सर्वाध्यक्षोमहानिधिः ॥ १०५ ॥ सर्वश्रेष्ठाश्रयः सर्वशस्त्रास्त्रग्रामवीर्य्यवान् ॥
जगद्वशीदाशरथिः सर्वरत्नाश्रयोनृपः ॥ १०६ ॥ धर्म्मः समस्तधर्म्मस्थोधर्म्मद्रष्टाखिलार्तिहृत् ॥ अतीन्द्रोज्ञानविज्ञानपारदश्वाक्षमाम्बु
धिः ॥ १०७ ॥ सर्वप्रकृष्टः शिष्टेष्टोहर्षशोकाद्यनाकुलः ॥ पित्राज्ञात्यक्तसाम्राज्यः सपत्नोदयनिर्भयः ॥ १०८ ॥ गुहादेशार्पितैश्वर्यः
शिवस्पर्द्धाजटाधरः ॥ चित्रकूटाप्तरत्नाद्रिजगदीशोरणेचरः ॥ १०९ ॥ यथेष्टमोघशस्त्रास्त्रोदेवेन्द्रतनयाक्षिहा ॥ ब्रह्मेन्द्रादिनतैषीकोमा
रीचघ्नोविराधहा ॥ ११० ॥ ब्रह्मशापहताशेषदण्डकारण्यपावनः ॥ चतुर्दशसहस्राख्यरक्षोघ्नैकशरैकभृत् ॥ १११ ॥ खरारिस्त्रिशिरो
हंतादूषणघ्नोजनार्दनः ॥ जटायुषोऽग्निगतिदः कबंधस्वर्गदायकः ॥ ११२ ॥ लीलाधनुः कोट्यपास्तदुन्दुभ्यस्थिमहाचयः ॥ सप्तताल
व्यथाकृष्टध्वजपातालदानवः ॥ ११३ ॥ सुग्रीवराज्यदोधीमान्मनसैवाभयप्रदः ॥ हनूमद्रुद्रमुख्येशःसमस्तकपिदेहभृत् ॥ ११४ ॥
अग्निदैवत्यबाणैकव्याकुलीकृतसागरः ॥ सम्लेच्छकोटिबाणैकशुष्कनिर्दग्धसागरः॥ ११५॥ सनागदैत्यधामैकव्याकुलीकृतसागरः॥ समु
द्राद्भुतपूर्वैकबद्धसेतुर्य्यशोनिधिः॥ ११६॥ असाध्यसाधकोलंकासमूलोत्कर्षदक्षिणः ॥ वरदृप्तजनस्थानपौलस्त्यकुलकृंतनः ॥ ११७ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रावणघ्नःप्रहस्तच्छितकुम्भकर्णभिदुग्रहा ॥ रावणैकमुखच्छेत्तानिश्शंकेन्द्रैकराज्यदः ॥ ११८ ॥ स्वर्गास्वर्गत्वविच्छेदोदेवेन्द्रादिन्द्रता
हरः ॥ रक्षोदेवत्वहृद्धर्म्मोधर्म्महर्म्येःपुरुष्टुतः ॥ ११९ ॥ नातिमात्रदशास्यारिर्दत्तराज्यविभीषणः ॥ सुधासृष्टिमृताशेषस्वसैन्यजीव
नैककृत् ॥ १२० ॥ देवब्राह्मणनामैकधातासर्वामरार्चितः ॥ ब्रह्मसूर्य्येन्द्ररुद्रादिवंद्योऽर्चितः सतां प्रियः ॥ १२१ ॥ अयोध्याखिल
राज्यार्हःसर्वभूतमनोहरः ॥ स्वाम्यतुल्यकृपादत्तोहीनोत्कृष्टैकसत्प्रियः ॥ १२२ ॥ स्वपक्षादिन्यायदर्शीहीनार्थोऽधिकसाधकः ॥ व्याध
व्याजानुचितकृत्तापक्रोऽखिलतुष्टिकृत्॥ १२३॥ पार्वत्यधिकयुक्तात्माप्रियात्यक्तसुरारिजित् ॥ साक्षात्कुशलवत्सघ्नीन्द्राग्निनातोपराऽजितः
॥१२४॥ कोशलेन्द्रो वीरबाहुःसत्यार्थस्त्यक्तसोदरः॥यशोदानंदनोनन्दीधरणीमण्डलोदयः॥ १२५॥ब्रह्मादिकाम्यसान्निध्यसनाथीकृत
दैवतः ॥ ब्रह्मलोकाप्तचांडालाद्यशेषप्राणिसार्थपः ॥ १२६ ॥ स्वर्णीतगर्दभाश्वादिचिरायोध्याबलैककृत् ॥ रामोद्वितीयः सौमित्रि
लक्ष्मणप्रहतेन्द्रजित् ॥ १२७ विष्णुभक्ताशिवांहःक्षितपादुकाराज्यनिर्वृतः ॥ भरतोऽसह्यगन्धर्वकोटिघ्नोलवणांतकः ॥ १२८ ॥
शत्रुघ्नोवैद्यराडायुर्वेदगर्भौषधीपतिः ॥ नित्यानित्यकरोधन्वंतरिर्य्यज्ञोजगद्धरः ॥ १२९ ॥ सूर्यविघ्नःसुराजीवोदक्षिणेशोद्विजप्रियः ॥
छिन्नमूर्द्धोऽदेशार्कतनूजकृतमौत्रिकः ॥ १३० ॥ शेषांगस्थापितनरः कपिलःकर्द्दमात्मजः ॥ योगात्मकध्यानभङ्गःसगरात्मजभस्मकृत
॥ १३१ धर्मोविश्वेन्द्रसुरभीपतिःशुद्धात्मभावितः ॥ शंभुत्रिपुरदाहैकस्थैर्य्यविश्वरथोद्धतः ॥ १३२ ॥ विश्वात्माशेषरुद्रार्थशिरश्छे
दाक्षताकृतिः ॥ वाजपेयादिनामाग्निर्वेदधर्म्मपरायणः ॥ १३३ ॥ श्वेतदीपपतिःसांख्यप्रणेतासर्वसिद्धिराट् ॥ विश्वप्रकाशितध्यान
योगोमोहतमिस्रहा ॥ १३४ ॥ भक्तशंभुजितोदैत्यामृतवापीसमस्तपः ॥ महाप्रलयविश्वैकोऽद्वितीयोखिलदैत्यराट् ॥ १३५ ॥ शेषदेवः ॥ १८४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहस्राक्षः सहस्रांघ्रिशिरोभुजः ॥ फणीफणिफणाकारयोजिताभ्यम्बुदाक्षितिः ॥ १३६ ॥ कालाग्निरुद्रजनकोमुसलास्त्रोहलायुधः ॥
नीलांबरोवारुणीशोमनोवाक्कायदोषहा ॥ १३७ ॥ स्वसंतोषतृप्तिमात्रःपातितैकदशाननः ॥ बलिसैंय्यमनोघोरो रौहिणेयःप्रलंबहा
॥ १३८ ॥ मुष्टिकघ्नोद्विविदहाकालिन्दीभेदनोबलः ॥ रेवतीरमणःपूर्वभक्तिखेदाच्युताग्रजः ॥ १३९ ॥ देवकीवासुदेवोत्थोदितिकश्यप
नन्दनः ॥ वार्ष्णेयःसात्वतांश्रेष्ठःशौरिर्य्यदुकुलोद्वहः ॥ १४० ॥ नराकृतिःपूर्णब्रह्मसव्यसाचीपरंतपः ॥ ब्रह्मादिकामना
नित्यजगत्पर्वेतशैशवः ॥ १४१ ॥ पूतनाघ्नःशकटभिद्यमलार्जुनभंजनः ॥ वत्सासुरारिःकेशिघ्नोधेनुकारिर्गवीश्वरः ॥ १४२ ॥
दामोदरोगोपदेवोयशोदानन्दकारकः ॥ कालीयमर्द्दनःसर्वगोपगोपीजनप्रियः ॥ १४३ ॥ लीलागोवर्द्धनधरोगोविन्दोगोकुलोत्सवः ॥
अरिष्टमथनःकामोन्मत्तगोपीविमुक्तिदः ॥ १४४ ॥ सद्यःकुवलयापीडघातीचाणूरमर्द्दनः ॥ कंसारिरुग्रसेनादिराज्यस्थाप्यारि
हाऽमरः ॥ १४५ ॥ सुधर्मांकितभूलोकोजरासंधबलांतकः ॥ त्यक्तभक्तजरासंधभीमसेनयशःप्रदः ॥ १४६ ॥ सान्दीपनिमृताप
त्यदाताकालांतकादिजित ॥ रुक्मिणीरमणोरुक्मिशासनोनरकांतकृत् ॥ १४७ ॥ समस्तनरकत्रातासर्वभूपतिकोटिजित् ॥ समस्त
सुंदरीकांतोसुरारिगरुडध्वजः ॥ १४८ ॥ एकाकीजितरुद्रार्कमरुदापोऽखिलेश्वरः ॥ देवेन्द्रदर्पहाकल्पद्रुमालंकृतभूतलः ॥ १४९ ॥
बाणबाहुसहस्रच्छित्स्कंधाद्रिगणकोटिजित् ॥ लीलाजितमहादेवोमहादेवैकपूजितः ॥ १५० ॥ इन्द्रार्थार्जुननिर्भर्त्सुर्जयदःपाण्ड
वैकधृक् ॥ काशीराजशिरश्छेत्तारुद्रशक्त्येकमर्द्दनः ॥ १५१ ॥ विश्वेश्वरप्रसादाढ्यःकाशीराजसुतार्द्दनः ॥ शंभुप्रतिज्ञापाता च स्वयंभू
गणपूजकः ॥ १५२ ॥ काशीशगणकोटिघ्नोलोकशिक्षाद्विजार्चकः ॥ शिवतीव्रतपोवश्यःपुराशिववरप्रदः ॥ १५३ ॥ गयासुरप्रति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञाधृक्स्वांशशंकरपूजकः ॥ शिवकन्याव्रतपतिःकृष्णरूपःशिवारिहा ॥१५४॥ महालक्ष्मीवपुर्गौरीत्राणो देवलवातहा ॥ विनिद्रमुचकुंदे
कब्रह्मास्त्रयुवनाश्वहृत ॥ १५५ ॥ अक्रूरोऽक्रूरमुख्यैकभक्तस्वच्छंदमुक्तिदः ॥ सबालस्त्रीजलक्रीडामृतवापीकृतार्णवः ॥ १५६ ॥
यमुनापतिरानीलपरिणीतद्विजात्मकः ॥ श्रीदामशङ्कुभक्तार्थभम्यानीतेन्द्रभैरवः ॥ १५७ ॥ दुर्वृत्तशिशुपालैकमुक्तिकोद्धारके
श्वरः ॥ आचाण्डालादिकंप्राप्यद्वारकानिधिकोटिकृत् ॥ १५८ ॥ ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैककृत ॥ पारिणीतद्विजसुताने
तार्जुनमदापहः ॥ १५९ ॥ गूढमुद्राकृतिग्रस्तभीष्माद्यखिलगौरवः ॥ पार्थार्थखण्डिताशेषदिव्यास्त्रःपार्थमोहभत ॥ १६० ॥
ब्रह्मशापच्छलध्वस्तयादवोविभवावहः ॥ अनंगोजितगौरीशोरतिकांतःसदेप्सितः ॥ १६१ ॥ पुष्पेषुर्विश्वविजयीस्मरःकामेश्वरीपतिः ॥
ऊषापतिर्विश्वहेतुर्विश्वतृप्ताऽधिपूरुषः॥१६२॥ चतुरात्माचतुर्वर्णश्चतुर्वेदविधायकः ॥ चतुर्विश्वैकविश्वात्मासर्वोत्कृष्टांशुकोटिपु॥ १६३ ॥
आश्रयात्मापुराणर्षिर्व्यासःशास्त्रसहस्रकृत ॥ महाभारतनिर्माताकवीन्द्रोबादरायणः ॥ १६४ ॥ कृष्णद्वैपायनःसर्वपुरुषार्थैकबोधकः ॥
वेदांतकर्ताब्रह्मैकव्यंजकःपुरुवंशकृत ॥१६५॥ बुद्धोध्यानजिताशेषदेवदेवोजगत्प्रियः ॥ निरायुधोजगज्जैत्रःश्रीधनोदुष्टमोहनः ॥१६६॥
दैत्यदेवबहिष्कर्तावेदार्थश्रुतिगोपकः ॥ शुद्धोदनिर्नष्टदिष्टः सुखदः सदसत्पतिः ॥ १६७ ॥ यथायोग्याखिलकृपःसर्वशून्योऽखिले
ष्टदः ॥ चतुष्कोटिपृथक्तत्त्वप्रज्ञापारमितेश्वरः ॥ १६८ ॥ पाषण्डश्रुतिमार्गेण पाषण्डश्रुतिगोपकः ॥ कल्कीविष्णुयशःपुत्रःकलि
कालविलोपकः ॥ १६९ ॥ समस्तम्लेच्छहन्तघ्नः सर्वशिष्टद्विजातिकृत ॥ सत्यप्रवर्तकोदेवद्विजदीर्घक्षुधापहः ॥ १७० ॥ अश्वएवा
दिदेवेनपृथ्वीदुर्गतिनाशनः ॥ सद्यःक्ष्मानंतलक्ष्मीकृन्नष्टनिःशेषधर्मकृत् ॥ १७१ ॥ अनंतस्वर्णयागैकहेमपूर्णाखिलद्विजः ॥ असाध्यैक

For Private And Personal Use Only

जगच्छास्ताविश्ववन्द्योजयध्वजः ॥ १७२ ॥ आत्मातत्त्वाधिपःकर्तृश्रेष्ठोविधिरुमापतिः ॥ भर्तुःश्रेष्ठःप्रजेशाग्र्योमरीचिजनकाग्रणीः ॥
॥ १७३ ॥ कश्यपोदेवराडिन्द्रः प्रह्लादोदैत्यराट्शशी ॥ नक्षत्रेशोरविस्तेजः श्रेष्ठः शुक्रः कवीश्वरः ॥ १७४ ॥ महर्षिराड्भृगुर्विष्णु
रादित्येशोबलिः स्वराट् ॥ वायुर्वह्निः शुचिः श्रेष्ठः शङ्करोरुद्रराड्गुरुः ॥ १७५ ॥ विद्वत्तमश्चित्ररथोगंधर्वाग्र्योवसूत्तमः ॥ वर्णादिर
ग्र्यास्त्रीगौरीशक्त्यग्र्याश्रीश्चनारदः ॥ १७६ ॥ देवर्षिराट्पाण्डवाग्र्योऽर्जुनोनारदश्चादराट् ॥ पवनः पवनेशानोवरुणोयादसाम्पतिः ॥
॥ १७७ ॥ गंगातीर्थोत्तमोद्द्यूतंछत्रकाग्र्यंवरौषधम् ॥ अस्त्रंसुदर्शनाख्याग्र्योवज्रप्रहरणोत्तमम् ॥ १७८ ॥ उच्चैःश्रवावाजिराजऐरावत
इभेश्वरः ॥ अरुंधत्येकपत्नीशोह्यश्वत्थोऽशेषवृक्षराट् ॥ १७९ ॥ अध्यात्मविद्याविद्यात्माप्रणवश्छन्दसांवरः ॥ मेरुर्गिरिपतिर्मार्गोमासाग्र्यः
कालसत्तमः ॥ १८० ॥ दिनाद्यात्मापूर्वसिद्धिः कपिलः सामवेदराट् ॥ तार्क्ष्यः खगेन्द्रऋत्वग्र्योवसंतः कल्पपादपः ॥ १८१ ॥ दातृश्रेष्ठः
कामधेनुरार्तिघ्नाग्र्यः सुरोत्तमः ॥ चिंतामणिर्गुरुश्रेष्ठोमाताहिततमः पिता ॥ १८२ ॥ सिंहोमृगेन्द्रोनागेन्द्रोवासुकिर्भूधरोनृपः ॥ वर्णेशोब्राह्मण
श्चांतःकरणाग्र्यत्नमोनमः ॥ १८३ ॥ इत्येतद्वासुदेवस्य विष्णोर्नामसहस्रकम् ॥ सर्वापराधशमनं परं भक्तिविवर्धनम् ॥ १८४ ॥ अक्षयब्र
ह्मलोकादिसर्वार्थाप्त्येकसाधनम् ॥ विष्णुलोकैकसोपानं सर्वदुःखविनाशनम् ॥ १८५ ॥ समस्तसुखदं सत्यं परं निर्वाणदायकम् ॥
कामक्रोधादिनिःशेषमनोमलविशोधनम् ॥ १८६ ॥ शांतिदं पावनन्नृणां महापातकिनामपि ॥ सर्वेषां प्राणिनामाशु सर्वाभीष्टफलप्रदम् ॥ १८७ ॥
सर्वविघ्नप्रशमनं सर्वारिष्टविनाशनम् ॥ घोरदुःखप्रशमनं तीव्रदारिद्र्यनाशनम् ॥ १८८ ॥ तापत्रयापहं गुह्यं धनधान्ययशस्करम् ॥
सर्वैश्वर्यप्रदं सर्वसिद्धिदं सर्वकालदम् ॥ १८९ ॥ तीर्थयज्ञतपोदानव्रतकोटिफलप्रदम् ॥ अप्रज्ञजाड्यशमनं सर्वविद्याप्रवर्तकम् ॥ १९० ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राज्यदं राज्यकामानां रोगिणां सर्वरोगनुत् ॥ बंध्यानां सुतदं चाशु सर्वश्रेष्ठफलप्रदम् ॥ १९१ ॥ अस्त्रग्रामविषध्वंसि ग्रहपीडाविनाशनम् ॥ मांगल्यं पुण्यमायुष्यं श्रवणात्पठनाज्जपात् ॥ १९२ ॥ सकृदस्यखिलावेदाः सांगा मंत्राश्च कोटिशः ॥ पुराणशास्त्रं स्मृतयः पठिताः पाठितास्तथा ॥ १९३ ॥ जप्त्वास्य श्लोकं श्लोकार्द्धं पादं वा पठतः प्रिये ॥ नित्यं सिद्ध्यति सर्वेषामचिरात्किमुतोऽखिलम् ॥ १९४ ॥ प्राणेन सदृशं सद्यः प्रत्यहं सर्वकर्मसु ॥ इदं भद्रे त्वया गोप्यं पाठ्यं स्वार्थैकसिद्धये ॥ १९५ ॥ नावैष्णवाय दातव्यं विकल्पोपहतात्मने ॥ भक्तिश्रद्धाविहीनाय विष्णुसामान्यदर्शिने ॥ १९६ ॥ देयं पुत्राय शिष्याय शुद्धाय हितकाम्यया ॥ मत्प्रसादादृते नेदं ग्रहीष्यंत्यल्पमेधसः ॥ १९७ ॥ कलौ सद्यः फलं कल्पग्राममेष्यति नारद ॥ लोकानां भाग्यहीनानां येन दुःखं विनश्यति॥ १९८॥ क्षेत्रेषु वैष्णवेष्वेतदाग्यावर्ते भविष्यति ॥ नास्ति विष्णोः परं सत्यं नास्ति विष्णोः परं पदम् ॥ १९९ ॥ नास्ति विष्णोः परं ज्ञानं नास्ति मोक्षो ह्यवैष्णवः ॥ नास्ति विष्णोः परो मंत्रो नास्ति विष्णोः परं तपः ॥ २०० ॥ नास्ति विष्णोः परं ध्यानं नास्ति मंत्रो ह्यवैष्णवः ॥ किं तस्य बहुभिर्मंत्रैः किं जपैर्बहुविस्तरैः ॥ २०१ ॥ वाजपेयसहस्रैः किं भक्तिर्यस्य जनार्दने ॥ सर्वतीर्थमयो विष्णुः सर्वशास्त्रमयः प्रभुः ॥ २०२ ॥ सर्वक्रतुमयो विष्णुः सत्यं सत्यं वदाम्यहम् ॥ आब्रह्मसारसर्वस्वं सर्वमेतन्मयोदितम् ॥ २०३ ॥ श्रीपार्वत्युवाच ॥ धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगद्गुरो ॥ यन्मयेदं श्रुतं स्तोत्रं त्वद्रहस्यं सुदुर्लभम् ॥ २०४ ॥ अहो बत महत्कष्टं समस्तसुखदे हरौ ॥ विद्यमानेऽपि सर्वेशे मूढाः क्लिश्यंति संसृतौ ॥ २०५ ॥ यमुद्दिश्य सदा नाथो महेशोपि दिगंबरः ॥ जटिलो भस्मलिप्ताङ्गस्तपस्वी वीक्षितो जनैः॥ २०६॥ अतोऽधिको न देवोस्ति लक्ष्मीकांतान्मधुद्विषः ॥ यत्तत्त्वं चिंत्यते नित्यं त्वया योगीश्वरेण

For Private And Personal Use Only

हि ॥ २०७ ॥ अतः परं किमधिकं पदं श्रीपुरुषोत्तमात् ॥ तमविज्ञाय तान् मूढा यजंते ज्ञानमानिनः ॥ २०८ ॥ मुषितास्मि त्वया नाथ चिरं यदयमीश्वरः ॥ प्रकाशितो न मे तस्य दत्ताद्या दिव्यशक्तयः॥२०९॥ अहो सर्वेश्वरो विष्णुः सर्वदेवोत्तमोत्तमः ॥ भवदादि गुरुर्मूढैः सामान्य इव लक्ष्यते ॥ २१० ॥ महीयसां हि माहात्म्यं भजमानान्भजंति चेत ॥ द्विषतोऽपि तथा पापानुपेक्ष्यंते क्षमालयाः ॥ २११ ॥ मयापि बाल्ये स्वपितुः प्रजा हृष्टा बुभुक्षिताः ॥ दुःखादशक्ताः स्वंपोढुं श्रियानाध्यासिताः पुरा ॥ २१२ ॥ त्वया संवर्द्धिताभिश्च प्रजाभिर्विबुधादयः ॥ विशसद्भिः स्वशक्त्याद्याः ससुहृन्मित्रबान्धवाः ॥ २१३ ॥ त्वया विना क्व देवत्वं क्व धैर्य्यं क्व परिग्रहः ॥ सर्वे भवंति जीवंतो यातनाः शिरसि स्थिताः ॥ २१४ ॥ तमृते नैव धर्मार्थौ कामो मोक्षोऽपि दुर्लभः ॥ क्षुधितानां दुर्गतानां कुतो योगसमाधयः ॥ २१५ ॥ सा च संसारसारैका सर्वलोकैकपालिका ॥ वश्या सा कमला यस्य त्यक्ता त्वामपि शंकर ॥२१६॥ श्रिया धर्मेण शौर्य्येण रूपेणार्ज्जवसंपदा ॥ सर्वातिशयवीर्येण संपूर्णस्य महात्मनः ॥ २१७ ॥ कस्तेन तुल्यतामेति देवदेवेन विष्णुना ॥ यस्यांशांशकभागेन विना सर्वं विलीयते ॥ २१८ ॥ जगदेतत्तथा प्राहुर्दोषायैतद्विमोहिता ॥ नास्य जन्म जरा मृत्युर्नाप्राप्यं वार्थमेव वा ॥ २१९ ॥ तथापि कुरुते धर्म्मान्पालनाय सतां कृते ॥ विज्ञापय महादेवं प्रणम्यैकमहेश्वरम् ॥ २२० ॥ अवधार्य्य तथा साहं कांत कामद शाश्वत ॥ कामाद्यासक्तचित्तत्वात्किं तु सर्वेश्वर प्रभो ॥ २२१ ॥ त्वन्मयत्वात्प्रसादाद्वा शक्नोमि पठितुन्न चेत् ॥ विष्णोः सहस्रनामैतत्प्रत्यहं वृषभध्वज ॥ २२२ ॥ नामैकेन तु येन स्यात्तत्फलं ब्रूहि मे प्रभो ॥ श्रीमहादेव उवाच ॥ ॐ राम रामेति रामेति रमे रामे मनोरमे ॥ सहस्रनामभिस्तुल्यं रामनाम वरानने ॥ २२३ ॥ अतः सर्वाणि तीर्थानि जलं चैव

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयागजम् ॥ विष्णोर्नामसहस्रस्य कलां नार्हन्ति षोडशीम् ॥ २२४ ॥ इति नारदपंचरात्रोक्तश्रीविष्णोर्नामसहस्रं समाप्तम् ॥
॥ अथ महापुरुषविद्यारम्भः॥जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन ॥ सुब्रह्मण्य नमस्तेऽस्तु महापुरुष पूर्वज ॥१॥ नमो हिरण्यगर्भाय
प्रधानव्यक्तिरूपिणे ॥ ॐ नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥२॥देवानां दानवानां च सामान्यमसि दैवतम् ॥ सर्वदा चरणद्वंद्वं व्रजामि
शरणं तव ॥ ३ ॥ एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ॥ अध्यक्षश्चानुमंता च गुणमायासमावृतः ॥ ४ ॥ संसारसागरं घोरम
नंतं क्लेशभाजनम् ॥ त्वमेव शरणं प्राप्य निस्तरंति मनीषिणः ॥ ५ ॥ न ते रूपं न चाकारो नायुधानि न चास्पदम् ॥ तथाऽपि पुरुषा
कारो भक्तानां त्वं प्रकाशसे ॥६॥ नैव किंचित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ॥ नैव किंचिदसाध्यं ते न च साध्योऽसि कस्यचित्
॥ ७ ॥ कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ॥ योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥ ८ ॥ अहं भीतोऽस्मि देवेश संसारे
ऽस्मिन्महाभये ॥ त्राहि मां पुंडरीकाक्ष न जाने शरणं परम् ॥ ९ ॥ कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ॥ शरीरेऽपि गतौ चापि
वर्तते मे महद्भयम् ॥ १० ॥ त्वत्पादकमलादन्यन्न मे जन्मांतरेष्वपि ॥ निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥ ११ ॥ विज्ञा
नं यदिदं प्राप्तं यदिदं ज्ञानमूर्जितम् ॥ जन्मांतरेपि मे देव माभूदस्य परिक्षयः॥ १२ ॥दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम ॥ यदि
नाथं च विज्ञेयं तावतास्मि कृती सदा ॥१३॥ आकामकलुषं चित्तं मम ते पादयोः स्थितम् ॥ कामये वैष्णवत्वं तु सर्वजन्मसु केवलम्
॥ १४ ॥ इति महापुरुषविद्या समाप्ता ॥ श्रीगणेशाय नमः ॥ अथ नृसिंहकवचप्रारंभः ॥ नारद उवाच ॥ इन्द्रादिदेववृंदेश ईड्येश्वर
जगत्पते ॥ महाविष्णोर्नृसिंहस्य कवचं ब्रूहि मे प्रभो ॥ १ ॥ यस्य प्रपठनाद्विद्वांस्त्रैलोक्यविजयी भवेत् ॥ ब्रह्मोवाच ॥ शृणु नारद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्ष्यामि पुत्रश्रेष्ठ तपोधन ॥ कवचं नरसिंहस्य त्रैलोक्यविजयी भवेत् ॥ २ ॥ स्रष्टाहं जगतां वत्स पठनाद्धारणाद्यतः ॥ लक्ष्मीर्जगत्त्रयं
पाति संहर्ता च महेश्वरः ॥ ३ ॥ पठनाद्धारणाद्देवा बहवश्च दिगीश्वराः ॥ ब्रह्ममंत्रमयं वक्ष्ये भ्रांतादिविनिवारकम् ॥ ४ ॥ यस्य प्रसा
दाद्दुर्वासास्त्रैलोक्यविजयी भवेत् ॥ पठनाद्धारणाद्यस्य शास्ता च क्रोधभैरवः ॥ ५ ॥ त्रैलोक्यविजयस्यापि कवचस्य प्रजापतिः ॥
ऋषिश्छंदस्तु गायत्री नृसिंहो देवता विभुः ॥ ६ ॥ क्ष्रौं बीजं मे शिरः पातु चन्द्रवर्णो महामनुः ॥७॥ "ॐ उग्रं वीरं महाविष्णुं ज्वलंतं
सर्वतोमुखम् ॥ नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥ ८ ॥ द्वात्रिंशदक्षरो मन्त्रो मंत्रराजः सुरद्रुमः ॥ कंठं पातु ध्रुवं क्ष्रौं हृद्भगवते
चक्षुषी मम ॥ ९ ॥ नरसिंहाय च ज्वालामालिने पातु कर्णकम् ॥ दीप्तदंष्ट्राय च तथा अग्निनेत्राय नासिकाम् ॥ १० ॥ सर्वरक्षो
घ्नाय च तथा सर्वभूतहिताय च ॥ सर्वज्वरविनाशाय दहदह पदद्वयम् ॥ ११ ॥ रक्षरक्ष वर्ममंत्रः स्वाहा पातु मुखं मम ॥ तारादिरामचं
द्राय नमः पातु हृदं मम ॥ १२ ॥क्लीं पायात्पार्श्वयुग्मं च तारो नमः पदं ततः ॥ नारायणाय नाभिं च आं ह्रींक्रौंक्ष्रौंचहुंफट् ॥ १३॥
षडक्षरः कटिं पातु ॐ नमो भगवते पदम् ॥ वासुदेवाय च पृष्ठं क्लीं कृष्णाय क्लीं ऊरुद्वयम् ॥ १४॥ क्लीं कृष्णाय सदा पातु जानुनी च
मनूत्तमः ॥ क्लीं ग्लौं क्लीं श्यामलांगाय नमः पायात्पदद्वयम् ॥ १५ ॥ क्ष्रौं नृसिंहाय क्ष्रौं च सर्वांगे मे सदावतु ॥ इति ते कथितं वत्स
सर्वमंत्रौघविग्रहम् ॥ १६ ॥ तव स्नेहान्मया ख्यातं प्रवक्तव्यं न कस्यचित् ॥ गुरुपूजां विधायाथ गृह्णीयात्कवचं ततः ॥ १७ ॥ सर्व
पुण्ययुतो भूत्वा सर्वसिद्धियुतो भवेत् ॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥ १८ ॥ हवनादीन्दशांशेन कृत्वा तत्साधकोत्तमः॥
ततस्तु सिद्धकवचो रूपेण मदनोपमः ॥ १९ ॥ स्पर्द्धामुद्धय भवने लक्ष्मीर्वाणी वसेन्मुखे ॥ पुष्पांजल्यष्टकं दत्त्वा मूलेनैव पठेत्सकृत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ २० ॥ अपि वर्षसहस्राणां पूजानां फलमाप्नुयात् ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेयदि ॥ २१ ॥ कंठे वा दक्षिणे बाहौ नरसिंहो भवेत्स्वयम् ॥ योषिद्वामभुजे चैव पुरुषो दक्षिणे करे ॥ २२ ॥ बिभृयात्कवचं पुण्यं सर्वसिद्धियुतो भवेत् ॥ काकवन्ध्या च या नारी मृतवत्सा च या भवेत् ॥ २३ ॥ जन्मवन्ध्या नष्टपुत्रा बहुपुत्रवती भवेत ॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ॥ २४ ॥ त्रैलोक्यं क्षोभयत्येवं त्रैलोक्यविजयी भवेत् ॥ भूतप्रेतपिशाचाश्च राक्षसा दानवाश्च ये ॥ २५ ॥ तं दृष्ट्वा प्रपलायंते देशाद्देशांतरं ध्रुवम् ॥ यस्मिन्गृहे च कवचं ग्रामे वा यदि तिष्ठति ॥ तद्देशं तु परित्यज्य प्रयांति ह्यतिदूरतः ॥ २६ ॥ इति ब्रह्मसंहितायां त्रैलोक्यमोहनं नाम नृसिंहकवचं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे विष्णुतंत्रे सप्तमस्तरंगः ॥ ७ ॥

समाप्तमिदं विष्णुतंत्रम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



૪૮

For Private And Personal Use Only

श्रीगणेशाय नमः ॥ अथ सूर्य्यतंत्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ अथ सूर्यमंत्रप्रयोगः॥ मंत्रो यथा-(शारदातिलके) "ॐ ह्रीं घृणिः सूर्य्य आदित्य श्रीं" इति दशाक्षरो मंत्रः॥अस्य विधानम् ॥ अस्य सूर्य्यमंत्रस्य भृगुर्ऋषिः। गायत्री छंदः। दिवाकरो देवता। ह्रीं बीजम्। श्रीं शक्तिः। दृष्टादृष्टफलसिद्धये जपे विनियोगः ॥ ॐ भृगुऋषये नमः शिरसि ॥ १ ॥ गायत्रीछंदसे नमः मुखे ॥ २ ॥ दिवाकर देवतायै नमः हृदि ॥ ३ ॥ ह्रींबीजाय नमः गुह्ये ॥ ४ ॥ श्रींशक्तये नमः पादयोः ॥ ५ ॥ विनियोगाय नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ सत्यतेजो ज्वालामणे हुं फट् स्वाहा-अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ब्रह्मतेजो ज्वालामणे हुं फट् स्वाहा तर्जनीभ्यां नमः ॥ २ ॥ ॐ विष्णुतेजो ज्वालामणे हुं फट् स्वाहा मध्यमाभ्यां नमः ॥ ३ ॥ ॐ रुद्रतेजो ज्वालामणे हुं फट् स्वाहा अनामिकाभ्यां नमः ॥ ४ ॥ ॐ अग्नितेजो ज्वालामणे हुं फट् स्वाहा कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ सर्वतेजो ज्वालामणे हुं फट् स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ सत्यतेजो ज्वालामणे हुं फट् स्वाहा हृदयाय नमः ॥ १ ॥ ॐ ब्रह्मतेजो ज्वालामणे हुं फट् स्वाहा शिरसे स्वाहा ॥ २ ॥ ॐ विष्णुतेजो ज्वालामणे हुं फट् स्वाहा शिखायै वषट् ॥ ३ ॥ ॐ रुद्रतेजो ज्वालामणे हुं फट् स्वाहा कवचाय हुं ॥ ४ ॥ ॐ अग्नितेजो ज्वालामणे हुं फट् स्वाहा नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ सर्वतेजो ज्वालामणे हुं फट् स्वाहास्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ ॐ आदित्याय नमः शिरसि ॥ १ ॥ ॐ एं रवये नमः ॥ मुखे ॥ २ ॥ ॐ उं भानवे नमः हृदये ॥ ३ ॥ ॐ इं भास्कराय नमः गुह्ये ॥ ४ ॥ ॐ अं सूर्य्याय नमः पादयोः ॥ ५ ॥ इति मूर्तिन्यासः ॥ ॐ ॐ नमः शिरसि ॥ १ ॥ ॐ घृं नमः मुखे ॥ २ ॥ ॐ णिं नमः कंठे ॥ ३ ॥ ॐ सूं नमः हृदि ॥ ४ ॥ ॐ

For Private And Personal Use Only

र्घ्यं नमः कुक्षौ ॥ ५ ॥ ॐ आं नमः नाभौ ॥ ६ ॥ ॐ दिं नमः लिंगे ॥७॥ ॐ त्यं नमः पादयोः ॥८॥ इति मंत्रवर्णन्यासः॥ एवं न्यासविधिं कृत्वा ध्यायेत्॥ अथ ध्यानम् ॥ रक्ताब्जयुग्माभयदानहस्तं केयूरहारांगदकुंडलाढ्यम्॥ माणिक्यमौलिं दिननाथमीडे बंधूक कांतिं विलसत्रिनेत्रम् ॥ १ ॥ इति ध्यात्वा सर्वतोभद्रमंडले मंडूकादिसूर्यमंडलाय द्वादशकलात्मने इत्यंतं पीठदेवतां संपूज्य पीठशक्तिं पूजयेत् ॥ तद्यथा—पूर्वादिक्रमेण ॥ ॐ रां दीप्तायै नमः ॥१॥ ॐ रीं सूक्ष्मायै नमः ॥२॥ ॐ रूं जयायै नमः ॥३॥ ॐ रैं भद्रायै नमः ॥ ४ ॥ ॐ रैं विभूत्यै नमः ॥ ५ ॥ ॐ रों विमलायै नमः ॥ ६ ॥ ॐ रौं अघोरायै नमः ॥ ७ ॥ ॐ रं विद्युतायै नमः ॥ ८ ॥ मध्ये ॐ रः सर्वतोमुख्यै नमः ॥ ९ ॥ इति पीठशक्तीः संपूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपूर्वकं ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वा "ॐ खं खखोल्कायनमः" इति मंत्रेण मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः ॥ पुष्पांजलिमादाय "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां सूर्य मे देहि परिवारार्चनाय मे ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा आवरणपूजामारभेत्॥ षट्कोणकेसरेषु अग्निकोणे । सत्यतेजो ज्वालामणे हुं फट् स्वाहा हृदयाय नमः हृदयश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र॥ १॥ निर्ऋतिकोणे । ॐ ब्रह्मतेजो ज्वालामणे हुं फट् स्वाहा शिरसे स्वाहा शिरःश्रीपा० ॥ २॥वायव्ये ॐ विष्णुतेजो ज्वालामणे हुं फट् स्वाहा शिखायै वषट् शिखाश्रीपा० ॥ ३ ॥ ऐशान्ये ॐ रुद्रतेजो ज्वालामणे हुं फट् स्वाहा कवचाय हुं कवचश्रीपा० ॥ ४ ॥ पूज्यपूज्यकयोर्मध्ये । ॐ अग्नितेजो ज्वालामणे हुं फट् स्वाहा नेत्रत्रयाय वौषट् नेत्रश्रीपा० ॥ ५ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवतापश्चिमे । ॐ सर्वतेजो ज्वालामणे हुं फट् स्वाहा अस्त्रायफट् अस्त्रश्रीपा० ॥६॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा। पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोष्टदले पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य प्राच्यादिक्रमेण चतुर्दिक्षु ॐ ॐ आदित्याय नमः आदित्यश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥ ॐ यं रवये नमः । रविश्रीपा० ॥ २ ॥ ॐ उं भानवे नमः भानुश्रीपा० ॥ ३ ॥ ॐ इं भास्कराय नमः । भास्करश्रीपा० ॥४॥ इति संपूज्य आग्नेय्यादिविदिक्षु च ॐ ऊषायै नमः ऊषाश्रीपा० ॥ ५ ॥ ॐ प्रं प्रज्ञायै नमः प्रज्ञाश्रीपा० ॥ ६ ॥ ॐ प्रभायै नमः प्रभाश्रीपा० ॥ ७ ॥ ॐ संध्यायै नमः संध्याश्रीपा० ॥ ८ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण॥ ॐ ब्राह्म्यै नमः ब्राह्मीश्रीपा० ॥ १ ॥ ॐ माहेश्वर्यै नमः । माहेश्वरीश्रीपा० ॥ २ ॥ ॐ कौमार्यै नमः । कौमारीश्रीपा० ॥३॥ ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ॥ ४ ॥ ॐ वाराह्यै नमः । वाराहीश्रीपा० ॥ ५ ॥ ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ॥ ६ ॥ ॐ चामुंडायै नमः । चामुंडाश्रीपा० ॥७॥ ॐ महालक्ष्म्यै नमः । महालक्ष्मीश्रीपा० ॥ ८ ॥ स्वपुरतः । ॐ अरुणाय नमः । अरुणश्रीपा० ॥ ॥ ९ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुराभ्यंतरे पूर्वादिक्रमेण । ॐ चन्द्राय नमः । चन्द्रश्रीपा० ॥ १ ॥ ॐ मंगलाय नमः । मंगलश्रीपा० ॥ २ ॥ ॐ बुधाय नमः । बुधश्रीपा० ॥ ३ ॥ ॐ बृहस्पतये नमः । बृहस्पतिश्रीपा० ॥ ४ ॥ ॐ शुक्राय नमः शुक्रश्रीपा० ॥ ५ ॥ ॐ शनैश्चराय नमः । शनैश्चरश्रीपा० ॥ ६ ॥ ॐ राहवे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः । राहुश्रीपा० ॥ ७ ॥ ॐ केतवे नमः । केतुश्रीपा० ॥ ८ ॥ इत्यष्टौ ग्रहान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततो भूपुरे पूर्वादिक्रमेण ॥ ॐ लं इन्द्राय नमः । इन्द्रश्रीपा० ॥ १ ॥ ॐ रं अग्नये नमः । अग्निश्रीपा० ॥ २ ॥ ॐ मं यमाय नमः यमश्रीपा० ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः । निर्ऋतिश्रीपा० ॥४॥ ॐ वं वरुणाय नमः । वरुणश्रीपा० ॥ ५ ॥ ॐ यं वायवे नमः । वायुश्रीपा० ॥ ६ ॥ ॐ कुं कुबेराय नमः । कुबेरश्रीपा० ॥ ७ ॥ॐ हं ईशानाय नमः । ईशानश्रीपा० ॥ ८ ॥ इन्द्रेशानयोर्मध्ये । ॐ आँ ब्रह्मणे नमः ब्रह्मश्रीपा० ॥ ९ ॥ ॐ ह्रीं अनंताय नमः। अनन्तश्रीपा० ॥ १० इति दिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति पंचमावरणम् ॥ ५॥ तद्बाह्ये । ॐ वं वज्राय नमः ॥१॥ ॐ शं शक्तये नमः ॥ २ ॥ ॐ दं दंडाय नमः ॥३॥ॐ खं खड्गाय नमः ॥४॥ ॐ पं पाशाय नमः ॥५॥ॐ अं अंकुशाय नमः ॥६॥ ॐ गं गदायै नमः ॥ ७ ॥ ॐ त्रिं

सूर्यपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिशूलाय नमः ॥ ८ ॥ ॐ पं पद्माय नमः ॥ ९ ॥ ॐ चं चक्राय नमः ॥ १० ॥ इत्यस्त्राणि पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादि नीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं दशलक्षजपः ॥ दशसहस्रहोमः ॥ तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ एवंकृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । " दशलक्षं जपेन्मंत्रं समिद्भिः क्षीरशाखिनाम् ॥ तत्सहस्रं प्रजुहुयात्क्षीराक्ताभिर्जितेंद्रियः ॥ १ ॥ एवं संपूज्य विधिवद्भास्करं भक्तवत्सलम् ॥ दद्यादर्घ्यं प्रतिदिनं वारे वा तस्य चोदिते ॥ २ ॥ अथार्घ्यविधानम् ॥ प्रभाते मंडलं कृत्वा पूर्ववत्पीठमर्चयेत् ॥ पात्रं ताम्रमयं प्रस्थतोयग्राहि मनोरमम् ॥ ३ ॥ विधाय तत्र मनुना पूरयेत्स्वच्छुभोदकैः ॥ कुंकुमं रोचनं राजीरक्तचंदनवेणवान् ॥ ४ ॥ करवीरजपाशालीकुशश्यामाकतंडुलान् ॥ निक्षिपेत्सलिले तस्मिन्नैक्यं संकल्प्य भानुना ॥ ५ ॥ सांगमभ्यर्चयेत्तस्मिन्भास्करं प्रोक्तलक्षणम् ॥ गंधपुष्पादिनैवेद्यैर्यथाविधि विधानवित् ॥ ६ ॥ तद्विधाय जपेन्मंत्रं सम्यगष्टोत्तरं शतम् ॥ पुनः संपूज्य गंधाद्यैर्जानुभ्यामवनीं गतः ॥ ७ ॥ आमस्तकं तदुद्धृत्य व्योम्नि सावरणे रवौ ॥ दृष्टिं विधाय स्वैकेन मूलमंत्रं धिया जपन् ॥ ८ ॥ दद्यादर्घ्यं दिनेशाय प्रसन्नेनांतरात्मना ॥ कृत्वा पुष्पांजलिं भूयो जपेदष्टोत्तरं शतम् ॥ ९ ॥ यावदर्घामृतं भानुः समादत्ते निजैः करैः ॥ तेन तृप्तो दिनमणिर्दद्यात्तस्मै मनोरथान् ॥ १० ॥ अर्घदानमिदं पुंसामायुरारोग्यवर्द्धनम् ॥ धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदम् ॥ ११ ॥ तेजोवीर्ययशःकांतिविद्याविभवभाग्यदम् ॥ गायत्र्युपासनाशक्तः संध्यावंदनतत्परः ॥ दशवर्णं जपन्विप्रो नैव दुःखमवाप्नुयात् ॥ १२ ॥ इति सूर्यदशाक्षरमंत्रप्रयोगः ॥ इति सूर्यपटलं समाप्तम् ॥ ॥ अथ सूर्यपद्धतिप्रारंभः ॥ पूर्वकृत्यं कृत्वा पुरश्चरणदिवसे ब्राह्मे मुहूर्ते चोत्थाय प्रातःस्मरणं कुर्यात् । अथ सूर्यप्रातःस्मरणम् । ॐ

For Private And Personal Use Only

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं हि मंडलमृचोऽथ तनुर्यजूंषि ॥ सामानि यस्य किरणाः प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यमाचिंत्य रूपम् ॥ १ ॥ प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च ॥ वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥ २ ॥ प्रातर्भजामि सवितारमनंतशक्तिं पापौघशत्रुभयरोगहरं परं च ॥ तं सर्वलोककलनात्मककालमूर्तिं गोकण्ठबंधनविमोचनमादिदेवम् ॥ ३ ॥ श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः ॥ स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् ॥ ४ ॥ इति प्रातःस्मरणं कृत्वा शौचादिकं विधाय स्नानं च कुर्यात् ॥ ततः पूजागृहमागत्य नित्यनैमित्तिकं विधाय स्वासने प्राङ्मुख उपविश्य भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च कृत्वा प्रयोगोक्तन्यासादिकं च कुर्यात् ॥ ततो वामभागे श्रीगुरुभ्यो नमः ॥ १ ॥ दक्षिणे गणपतये नमः ॥ २ ॥ मध्ये स्वेष्टदेवतायै नमः ॥ ३ ॥ इति नत्वा पीठपूजां कुर्यात् ॥ तद्यथा--पीठादौ रचिते सर्वतोभद्रमंडले सूर्यमण्डले वा मध्यभागे ॐ मं मंडूकाय नमः ॥ १ ॥ ॐ कं कालाग्निरुद्राय नमः ॥२॥ ॐ अं आधारशक्तये नमः ॥ ३ ॥ ॐ कूं कूर्माय नमः ॥ ४ ॥ ॐ अं अनन्ताय नमः ॥ ५ ॥ ॐ पृं पृथिव्यै नमः ॥६॥ ॐ क्षीं क्षीरसागराय नमः ॥ ७ ॥ ॐ रं रत्नदीपाय नमः ॥ ८ ॥ ॐ रं रत्नमण्डपाय नमः ॥ ९ ॥ ॐ कं कल्पवृक्षाय नमः ॥ १० ॥ ॐ रं रत्नवेदिकायै नमः ॥ ११ ॥ ॐ रं रत्नसिंहासनाय नमः ॥ १२ ॥ आग्नेय्याम् । ॐ धं धर्माय नमः ॥ १३ ॥ नैर्ऋत्याम् । ॐ ज्ञां ज्ञानाय नमः ॥ १४ ॥ वायव्ये । ॐ वैं वैराग्याय नमः ॥ १५ ॥ ऐशान्ये । ॐ ऐं ऐश्वर्य्याय नमः ॥ १६ ॥ पूर्वे । ॐ अं अधर्माय नमः ॥ १७ ॥ दक्षिणे । ॐ अं अज्ञानाय नमः ॥ १८ ॥ पश्चिमे । ॐ अं अवैराग्याय नमः ॥ १९ ॥ उत्तरे ।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अं अनैश्वर्याय नमः ॥ २० ॥ पुनः पीठमध्ये । ॐ आ आनन्दकन्दाय नमः ॥ २१ ॥ ॐ सं संविन्नालाय नमः ॥ २२ ॥ ॐ सं सर्वतत्त्वकमलासनाय नमः ॥ २३ ॥ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः ॥ २४ ॥ ॐ विं विकारमयकेसरेभ्यो नमः ॥ २५ ॥ ॐ पं पंचाशद्वर्णाढ्यकर्णिकाभ्यो नमः ॥ २६ ॥ ॐ अं अर्कमण्डलाय द्वादशकलात्मने नमः ॥ २७ ॥ इति "मंडूकादिसूर्यमंडलाय द्वादशकलात्मने" इत्यंतं पीठदेवताः संपूज्य प्रयोगोक्तनवपीठशक्तीः पूजयेत् ॥ ततः शंखस्थाने ताम्रपात्रं घंटां च सर्वदेवोपयोगिपद्धति मार्गेण संस्थाप्य गंधाक्षतपुष्पादींश्च पूजोपकरणार्थे स्वदक्षिणपार्श्वे निधाय मूलेन नमः इति जलेन संप्रोक्ष्य जलार्थे बृहत्पात्रं व्यजनं छत्रादर्शचामराणि च स्ववामे स्थापयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य आसनमंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य देशकालौ स्मृत्वा मम श्रीसूर्यनारायणनूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठां करिष्ये ॥ इति संकल्प्य प्रतिष्ठां कुर्यात् ॥ तद्यथा । ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामानि च्छन्दांसि । क्रियामयवपुःप्राणाख्या देवता । आं बीजम् । ह्रीं शक्तिः । क्रौं कीलकम् । अस्य नूतनयंत्रे मूर्तौ वा प्राण प्रतिष्ठापने विनियोगः ॥ इति जलं क्षिप्त्वा करेणाच्छाद्य । ॐ आं ह्रीं क्रौं यँरँलँवँशँषँसँहँहंसः सोहं अस्य सूर्यनारायणसपरिवारयंत्रस्य प्राणा इह प्राणाः ॥ १ ॥ पुनः ॐ आंह्रींक्रौंयँरँलँवँशँषँसँहँ हंसः सोहं अस्य सूर्यनारायणसपरिवारयंत्रस्य जीव इह स्थितः ॥ २ ॥ पुनः । ॐ आंह्रींक्रौं यँरँलँवँशँषँसँहँहंसः सोहं अस्य सूर्यनारायणसपरिवारयंत्रस्य सर्वेन्द्रियाणि इह स्थितानि ॥ ३ ॥ पुनः । ॐ आंह्रीं क्रौं यँरँलँवँशँषँसँहँहंसःसोहं अस्य सूर्यनारायणसपरिवारयंत्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिष्ठंतु स्वाहा ॥ ४ ॥ इति प्राणान् प्रतिष्ठाप्य यः प्राणतोनिमिषतोमहित्वेविधेम इतिमन्त्रिति त्रिवारं पठेत् ॥ ॐ मनोजूतिर्जुषतासुप्रतिष्ठा प्रतिष्ठा ॥ इत्युक्त्वा संस्कारसिद्धये पंचदश प्रणवावृत्तीः कृत्वा अनेन सूर्यनारायणसपरिवारयंत्रस्य गर्भाधानादिपंचदशसंस्कारान्संपादयामि । इति वदेत् । ततः "ॐ यंत्रराजाय विद्महे महायंत्राय धीमहि ॥ तन्नो यंत्रः प्रचोदयात्॥" इत्यष्टोत्तरशतमभिमंत्र्य मूलदेवतां ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहयेत॥ तद्यथा । अक्षतानादाय । "ॐ देवेश भक्तिसुलभ परिवारसमान्वित॥यावत्त्वां पूजयिष्यामि तावद्देव इहावह" ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीसूर्यनारायणाय नमः । इहागच्छ इह तिष्ठ इत्यावाहनम ॥१॥ "ॐ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यदि पूर्णं भवेत्कृत्यं तदाप्यभिमुखो भव" ॥ १ ॥ ॐ सूर्यनारायणाय नमः इह संमुखो भव ॥ इति सम्मुखीकरणम् ॥२॥ "ॐ यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये ॥ तस्मै ते परमेशाय स्वागतं स्वागतं च ते"॥ १ ॥मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीसूर्यनारायणाय नमः सुस्वागतं समर्पयामि ॥ इति सर्वत्र ॥ ३ ॥ "ॐ देवदेव महाराज प्रियेश्वर प्रजापते ॥ आसनं दिव्यमीशान दास्येहं परमेश्वर" ॥ १ ॥ इत्यासनम् ॥ ४ ॥ इत्यासनं दत्त्वा करो बद्ध्वा प्रार्थयेत् ॥ "ॐ स्वागतं देवदेवश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥ १ ॥ इति प्रार्थयित्वा पाद्यादिपूजनं कुर्यात् ॥ अथ पाद्यादिपूजनम् ॥ "ॐ यद्भक्तिलेशसंपर्कात्परमानन्दसंभवः ॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये" १ इत्यर्घोदकेन पाद्यं दद्यात्॥ १ ॥ "ॐ देवानामपि देवाय देवानां देवतात्मने ॥ आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे"॥१॥इत्याचमनम् ॥ २ ॥ ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम् ॥ तापत्रयविमोक्षाय तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥ इत्यर्घोदकेनार्घ्यं दद्यात ॥ ३ ॥ ॐ सर्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालुष्यहीनाय परिपूर्णसुखात्मने ॥ मधुपर्कमिदं देव कल्पयामि प्रसीद मे" ॥ २ ॥ इति मधुपर्कम् ॥४॥ "ॐ उच्छिष्टोऽप्यशुचिर्वापि
यस्य स्मरणमात्रतः॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥१॥ इत्याचनीयम॥५॥"ॐ स्नेहं गृहाण स्नेहेन लोकनाथ महाशय ॥
सर्वलोकेषु शुद्धात्मन्ददामि स्नेहमुत्तमम्" ॥१॥ इति सुगंधतैलम ॥ ६ ॥ "ॐ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः ॥ स्नापितोऽसि
मया देव तथा शांतिं कुरुष्व मे" ॥१॥ इति जलस्नानम् ॥७ ॥ ॐ पयो दधि घृतं चैव मधु च शर्करायुतम ॥ पंचामृतं मया नीतं
स्नानार्थं प्रतिगृह्यताम् ॥१॥ इति पंचामृतेन स्नापयित्वा पुनः जलस्नानं च कारये ॥८॥ "ॐ सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥
मये वापादिते तुभ्यं वाससी प्रतिगृह्यताम्" ॥१॥ इति रक्तवस्त्रम् ॥९॥ "ॐ नवभिस्तंतुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं
चोत्तरीयं गृहाण परमेश्वर" ॥ १ ॥ इति यज्ञोपवीतम् ॥ १० ॥ "स्वभावसुंदरांगाय सत्यासत्याश्रयाय ते ॥ भूषणानि विचित्राणि
कल्पयामि सुरार्चित ॥ १ ॥ दक्षहस्तांगुष्ठस्पृष्टानामिकात्मिकया मुद्रया भूषणानि दद्यात् ॥११॥ "ॐ श्रीखण्डं चंदनं दिव्यं गंधाढ्यं
सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम्" ॥१॥ अंगुष्ठकनिष्ठामूललग्ने गंधमुद्रा इति गंधम् ॥१२॥ "ॐ अक्षताश्च सुरश्रेष्ठ
कुंकुमाक्ताः सुशोभिताः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर" ॥१॥ सर्वांगुलीभिर्दद्यात् ॥ इत्यक्षतान् ॥ १३ ॥ "ॐ माल्या
दीनि सुगंधीनि मालत्यादीनि वै प्रभो॥मयाऽऽनीतानि पुष्पाणि गृहाण परमेश्वर"॥१॥ तर्जन्यावंगुष्ठमूललग्ने पुष्पमुद्रा इति पुष्पम्॥१४॥
एवं पुष्पांतं पूजयित्वा देवाज्ञया प्रयोगोक्तावरणपूजां कृत्वा धूपादिपूजनं कुर्यात ॥ अथ धूपादिपूजनम् ॥ "ॐ वनस्पतिरसोद्भूतो गंधाढ्यो
गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम " ॥१॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगाय सपरिवाराय सवाहनाय सायुधाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीसूर्य्यनारायणाय नमः॥धूपं समर्पयामि। इति सर्वत्र॥तर्जनीमूलयोरंगुष्ठयोगे धूपमुद्रया नाभिदेशतः तां धूपयित्वा देवस्य वामभागे धूपपात्रं निधाय शंखजलमुत्सृजेत् ॥ इति धूपम् ॥ १ ॥ ततः दीपपात्रं गोघृतेनापूर्य मंत्राक्षरतंतुभिर्वर्ती निक्षिप्य प्रणवेन (ॐ) प्रज्वाल्य घंटां वादयन् नेत्रादिपादपर्यंतं दीपं प्रदर्शयेत्॥"ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः॥स बाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यताम्"॥ १॥ मूलं पठित्वा ॐ भू० सां० दीपं समर्पयामि॥इति पठित्वा देवस्य दक्षिणभागे निधाय शंखजलमुत्सृज्य मध्यमांगुष्ठलग्ने दीपमुद्रां प्रदर्शयेत ॥२॥ततो देवस्याग्रे देवदक्षिणतो वा जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं संस्थाप्य तन्मध्ये षड्रसोपेतं विविधप्रकारं नैवेद्यं निधाय " ॐ ह्रीं नमः " इत्यर्घ्यजलेन प्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपरि तादृशं वामं निधाय नैवेद्येनाच्छाद्य (ॐ यँ) इति वायुबीजेन षोडशधा संजप्य वायुना तद्गतदोषान् संशोष्य ततो दक्षिणकरतले तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ रं) इति वह्निबीजेन षोडशवारं संज्यप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा ततो वामकरतले (ॐ वं) इति अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ वं) इति सुधाबीजं षोडशवारं संजप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य देवस्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा "ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ॥ निवेदयामि देवेश सानुगाय गृहाण तत् ॥१॥" मूलं पठित्वा ॐ भू० सां० नैवेद्यं समर्पयामि इति भूतले देवदक्षिणे जलं क्षिप्त्वा वामहस्तेन अनामामूलयोरंगुष्ठयोगे ग्रासमुद्रां प्रदर्शयेत ॥ इति नैवेद्यम् ॥ ३ ॥ "ॐ नमस्ते देव देवेश सर्वतृप्तिकरं परम् ॥ परमानंदपूर्णं त्वं गृहाण जलमुत्तमम्"॥ १ ॥ इति जलम् ॥ ४ ॥ "ॐ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरण

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम्" ॥२॥ इत्याचमनं दत्त्वा मूलेन गंडूषार्थं जलं दद्यात् ॥ ५ ॥ "ॐ पूगीफलं मह
द्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिकैर्युक्तं तांबूलं प्रतिगृह्यताम्"॥ ३ ॥ इति तांबूलम्॥ ६ ॥ "ॐ इदं फलं मया देव स्थापितं
पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि" ॥१॥ इति फलम् ॥ ७ ॥" ॐ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरार्ति
क्यमहं कुर्वे पश्य मे वरदो भव"॥१॥इति कर्पूरार्तिक्यम्॥८॥"ॐ यानि कानि च पापानि जन्मांतरकृतानि वै ॥ तानि सर्वाणि नश्यंतु
प्रदक्षिणपदेपदे॥ १॥" इति सप्तप्रदक्षिणाः कृत्वा "ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात्"॥इति वदन् साष्टांगं प्रणमेत्॥९॥ "ॐ
नानासुगंधपुष्पाणि यथाकालोद्भवानि च॥ पुष्पांजलिं मया दत्तं गृहाण परमेश्वर॥१॥"इति पुष्पांजलिः॥ १०॥ इति पुष्पांजलिं दत्त्वा
ततः स्तुतिपाठेन स्तुत्वा बद्धांजलिः प्रार्थयेत् ॥ तद्यथा ॥ "ॐ ज्ञानतोऽज्ञानतो वाथ यन्मया क्रियते शिव ॥ मम कृत्यमिदं सर्वमिति दे
व क्षमस्व मे"॥१॥ अपराधसहस्राणि क्रियंतेहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥२॥ अपराधो भवत्येव सेवकस्य
पदेपदे ॥ कोपरः सहतां लोके केवलं स्वामिनं विना ॥३॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं
शिव॥४॥इति बद्धांजलिः संप्रार्थ्य।"ॐ यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम्॥ निवेदितं च नैवेद्यं गृहाण मानुकंपया॥१॥"इति पठित्वा
देवस्य दक्षिणकरे पूजार्पणजलं दद्यात् ॥ ततो मालामादाय सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान् कृत्वा अशक्तश्चेत् "ॐ
ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ १ ॥" इति मालां संप्रार्थ्य "ॐ अविघ्नं
कुरु माले त्वं सर्वकार्येषु सर्वदा" इति मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् यथाशक्ति प्रातःकालमारभ्य मध्यंदिनं यावत् मूलमंत्रं जपेत् ॥ नित्यमेव समाना जपाः कार्याः । न तु न्यूनाधिकाः । ततो जपांते "ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥ तेन सत्येन सिद्धिं मे देहि मातर्नमोस्तु ते ॥ १ ॥" ॐ ह्रीं सिद्ध्यै नमः । इति मालां शिरसि निधाय गोमुखीरहस्ये स्थापयेत् । नाशुचिः स्पर्शयेत् । नान्यस्मै दद्यात् । अशुचिस्थाने न निधापयेत् । स्वयोनिवहनं कुर्यात् ॥ ततः । कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमंत्रोक्तऋष्यादिन्यासं हृदयादिषडंगन्यासं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं च दत्त्वा जपार्पणं कुर्यात् ॥ तद्यथा अर्घ्योदकेन चुलुकमादाय ॥ "ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ १ ॥" इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु वाचा मनसा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मदीयं च सकलं श्रीसूर्यनारायणायार्पयामि ॥ ॐ तत्सदिति ब्रह्मार्पणं भवतु इति देवदक्षिणकरे जलसमर्पणं कृत्वा कृतांजलिपूर्वकक्षमापनं पठेत् ॥ तथा च ॥ "ॐ आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्यो गतिर्मम ॥ अंतश्चरेण भूतानि द्रष्टस्त्वं परमेश्वर ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर ॥ ५ ॥ प्रातर्योनिसहस्राणां सहस्रेषु व्रजाम्यहम् ॥ तेषुतेष्वचला भक्तिरच्युतेस्तु सदा त्वयि ॥ ६ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुखसंपत्तिः पुण्या च तव दर्शनात् ॥ ७ ॥ देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवं जपति सर्वत्र यो देवः सोहमेव
हि ॥ ८ ॥ क्षमस्व देवदेवेश क्षम्यते भुवनेश्वर ॥ तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे ॥९॥" इति कृतांजलिः ॥ प्रार्थयित्वा
शंखजलमुद्धृत्य देवोपरि भ्रामयित्वा " साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनंमम ॥ १ ॥" इत्युच्चरन्
देवस्य दक्षिणहस्ते किंचिज्जलं दत्त्वा प्राग्वदर्घ्यं देवशिरसि दत्वा शंखं यथास्थानं निवेशयेत् ॥ ततो गतसारनैवेद्यं देवस्योच्छिष्टं किंचिदु
द्धृत्य ॐ चंडांशवे नमः इति चंडांशुं संपूज्य इत्युच्छिष्टाधिकारिणे ऐशान्यां दिशि दद्यात् ॥ तच्छेषनैवेद्यं शिरसि धृत्वा देवभक्तेषु
विभज्य स्वयं भुक्त्वा विसर्जनं कर्यात्॥तद्यथा॥ "ॐ गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर॥पूजाराधनकाले च पुनरागमनाय च॥१॥"
इत्यक्षतान् निक्षिप्य विसर्जनं कृत्वा " ॐ तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि ॥ १ ॥"
इति हृदयकमले हस्तं दत्त्वा स्वहृदये संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् ॥ एवमेव विधिना
जपं समाप्य सर्वदेवोपयोगिपद्धतिमार्गेण तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ इति सूर्य्यनारायणपूजापद्धतिः समाप्ता॥
अथ सूर्य्यकवचप्रारंभः॥ श्रीसूर्य उवाच ॥ साम्बसाम्ब महाबाहो शृणु मे कवचं शुभम् ॥ त्रैलोक्यमंगलं नाम कवचं परमाद्भुतम् ॥ १ ॥
यज्ज्ञात्वा मंत्रवित्सम्यक् फलमाप्नोति निश्चितम् ॥ यद्धृत्वा च महादेवो गणानामधिपोऽभवत्॥ २ ॥पठनाद्धारणाद्विष्णुः सर्वेषां पालकः
सदा ॥ एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ ३ ॥ कवचस्य ऋषिर्ब्रह्मा छन्दोनुष्टुबुदाहृतम् ॥ श्रीसूर्यदेवता चात्र सर्वदेवनमस्कृतः ॥
॥ ४ ॥ आरोग्ययशोमोक्षेषु विनियोगः प्रकीर्तितः॥ प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम् ॥ ५ ॥ सूर्योऽव्यान्नयनद्वंद्वमादित्यः

For Private And Personal Use Only

कर्णयुग्मकम् ॥ अष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः॥ ६ ॥ ह्रीं बीजं मे शिखां पातु हृदये भुवनेश्वरः ॥ चन्द्रबीजं विसर्गाढ्यं पातु मे गुह्यदेशकम् ॥ ७ ॥ त्र्यक्षरोसौ महामंत्रः सर्वतंत्रेषु गोपितः ॥ शिवो वह्निसमायुक्तो वामाक्षिबिंदुभूषितः ॥ ८ ॥ एकाक्षरो महामंत्रः श्रीसूर्यस्य प्रकीर्तितम् ॥ गुह्याद्गुह्यतरो मंत्रो वांछा चिंतामणिः स्मृतः॥९॥ शीर्षादिपादपर्यंतं सदा पातु मनूत्तमः ॥ इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम् ॥ १० ॥ श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम् ॥ कुष्ठादिरोगशमनं महाव्याधिविनाशनम् ॥ ११ ॥ त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत् ॥ बहुना किमिहोक्तेन यद्यन्मनसि वर्तते॥ १२ ॥ तत्तत्सर्वं भवत्येव कवचस्य च धारणात् ॥ भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥ १३ ॥ ब्रह्मराक्षसवेताला नैवद्रष्टुमपि क्षमाः ॥ दूरादेव पलायंते तस्य संकीर्तनादपि ॥ १४ ॥ भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः ॥ रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः ॥ १५ ॥ धारयेत्साधकश्रेष्ठस्त्रैलोक्यविजयी भवेत् ॥ त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे भुजे ॥ १६ ॥ शिखायामथ वा कंठे सोपि सूर्यो न संशयः ॥ इति ते कथितं साम्ब त्रैलोक्ये मंगलाभिधम् ॥१७॥ कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम् ॥ अज्ञात्वा कवच दिव्यं यो जपेत्सूर्यमुत्तमम् ॥ सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥१८॥ इति ब्रह्मयामले त्रैलोक्यमंगलं नाम श्रीसूर्यकवचं समाप्तम् ॥ ॥ अथ सूर्यस्तवराजप्रारंभः ॥ वसिष्ठ उवाच ॥ स्तुवंस्तत्र ततः साम्बः कृशो धमनिसंततः ॥ राजन्नामसहस्रेण सहस्रांशुं दिवाकरम् ॥१॥ खिद्यमानं तु तं दृष्ट्वा सूर्यः कृष्णात्मजं तदा ॥ स्वप्ने तु दर्शनं दत्त्वा पुनर्वचनमब्रवीत् ॥२॥ श्रीसूर्य उवाच॥साम्बसाम्ब महाबाहो शृणु जाम्बवतीसुत॥अलं नामसहस्रेण पठ स्विमं स्तवं शुभम् ॥ ३ ॥ यानि नामानि गुह्यानि पवित्राणि शुभानि च ॥ तानि ते कीर्तयिष्यामि श्रुत्वा वत्सावधारय ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकर्तनो विवस्वांश्च मार्तंडो भास्करो रविः ॥ ५॥ लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्महेश्वरः ॥ लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमि
स्रहा ॥ ६ ॥ तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः ॥ ७ ॥ एकविंशतिरित्येष स्तव
इष्टः सदा मम ॥ देहारोग्यकरश्चैव धनवृद्धियशस्करः ॥ ८ ॥ स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥ य एतेन महा
बाहो द्वे संध्ये स्तवनोदये ॥ ९ ॥ स्तौति मां प्रणतो भूत्वा सर्वपापैः प्रमुच्यते ॥ कायिकं वाचिकं चैव मानसं यच्च दुष्कृतम्
॥ १० ॥ एतज्जाप्येन तत्सर्वं प्रणश्यति न संशयः ॥ एष जप्यश्च होमश्च संध्योपासनमेव च ॥ ११ ॥ बलिमंत्रोऽर्घमंत्रश्च
धूपमंत्रस्तथैव च ॥ अन्नप्रदाने स्नाने च प्रणिपाते प्रदक्षिणे ॥ पूजितोयं महामंत्रः सर्वपापहरः शुभः ॥ १२ ॥
एवमुक्त्वा तु भगवान् भास्करो जगदीश्वरः ॥ आमंत्र्य कृष्णतनयं तत्रैवांतरधीयत ॥ १३ ॥ सांबोपि स्तवराजेन स्तुत्वा
सप्ताश्ववाहनम् ॥ पूतात्मा नीरुजः श्रीमांस्तस्माद्रोगाद्विमुक्तवान् ॥ १४ ॥ इति साम्बपुराणे सूर्यस्तवराजः समाप्तः ॥ शुभम् ॥
अथ सूर्यस्याष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ धौम्य उवाच ॥ ॐ सूर्योऽर्यमा भगस्त्वष्टा पूषार्कः सविता रविः ॥ गभस्तिमानजः
कालो मृत्युर्धाता प्रभाकरः ॥ १ ॥ पृथिव्यापश्च तेजश्च खं वायुश्च परायणम् ॥ सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ॥ २ ॥
इन्द्रो विवस्वान्दीप्तांशुः शुचिः शौरिः शनैश्चरः ॥ ब्रह्मा विष्णुश्च रुद्रश्च स्कंदो वै वरुणो यमः ॥ ३ ॥ वैद्युतो जाठरश्चाग्निरैंधनस्ते
जसांपतिः ॥ धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ॥ ४ ॥ कृतं त्रेता द्वापरश्च कलिः सर्वमलाश्रयः ॥ कला काष्ठा मुहूर्तश्च क्षपा
यामस्तथा क्षणः ॥ ५ ॥ संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः ॥ पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ॥ ६ ॥ काल

For Private And Personal Use Only

ध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः ॥ वरुणः सागरांशश्च जीमूतो जीवनारिहा ॥ ७ ॥ भूताश्रयो भूतपतिः सर्वलोकनमस्कृतः ॥ स्रष्टा संवर्तको वह्निः सर्वस्यादिरलोलुपः ॥ ८ ॥ अनंतः कपिलो भानुः कामदः सर्वतोमुखः ॥ जयो विशालो वरदः सर्वधातुनिषवितः ॥ ९ ॥ मनः सुपर्णो भूतादिः शीघ्रगः प्राणधारणः ॥ धन्वंतरिर्धूमकेतुरादिदेवोऽदितेः सुतः ॥ १० ॥ द्वादशात्माऽरविंदाक्षः पिता माता पितामहः ॥ प्रजाद्वारं सर्गद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ ११ ॥दाहकर्ता प्रशांतात्मा विश्वात्मा विश्वतोमुखः ॥ चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः ॥ १२ ॥ एतद्वै कीर्तनीयस्य सूर्यस्यामिततेजसः ॥ नामाष्टशतकं चेदं प्रोक्तमेतत्स्वयंभुवा ॥ १३ ॥ सुरगणपितृयक्षसेवितं ह्यसुरनिशाचरसिद्धवंदितम् ॥ वरकनकहुताशनप्रभं प्रणिपतितोस्मि हिताय भास्करम् ॥ १४ ॥ सूर्योदये यः सुसमाहितः पठेत्स पुत्रदारान्धनरत्नसंचयम् ॥ लभेत जातिस्मरतांतरः सदा धृतिं च मेधां च स विंदते पुमान् ॥ १५ ॥ इमं स्तवं देववरस्य यो नरः प्रकीर्तयेच्छुद्धमनाः समाहितः ॥ विमुच्यते शोकदवाग्निसागराल्लभेत कामान्मनसा यथेप्सितान् ॥ १६ ॥ इति श्रीमहाभारते वनपर्वणि धौम्ययुधिष्ठिरसंवादे श्रीसूर्यस्याष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ अथ आदित्यहृदयप्रारंभः ॥ ततो युद्धपरिश्रांतं समरे चिंतया स्थितम् ॥ रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ॥ उपगम्याब्रवीद्रामसगस्त्यो भगवांस्तदा ॥ २ रामराम महाबाहो शृणु गुह्यं सनातनम् ॥ येन सर्वानरीन्वत्स समरे विजयिष्यसे ॥ ३ ॥ आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ॥ जयावहं जपेन्नित्यमक्षयं परमं शिवम् ॥ ४ ॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ॥ चिंताशोकप्रशमनमायुर्वर्द्धनमुत्तमम् ॥ ५ ॥ रश्मिमंतं समुद्यंतं देवासुरनमस्कृतम् ॥पूजयस्व विवस्वंतं भास्करं भुवनेश्वरम् ॥६॥ सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एष देवासुरगणाँल्लोकान्पाति गभस्तिभिः ॥ ७ ॥ एष ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः ॥ महेन्द्रो धनदः कालो यमः सोमो ह्यपांपतिः ॥ ८ ॥ पितरो वसवः साध्या अश्विनौ मरुतो मनुः ॥ वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ॥ सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १० ॥ हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् ॥ तिमिरोन्मथनः शंभुस्त्वष्टा मार्तण्डकोंऽशुमान् ॥ ११ ॥ हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः ॥ अग्निगर्भोऽदितेः पुत्रः शंखः शिशिरनाशनः ॥ १२ ॥ व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः ॥ घनवृष्टिरपांमित्रो विन्ध्यवीथीप्लवंगमः ॥ १३ ॥ आतपी मंडली मृत्युः पिङ्गलः सर्वतापनः ॥ कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥ नक्षत्रग्रहताराणामधिपो विश्वभावनः ॥ तेजसामपि तेजस्वी द्वादशात्मन्नमोस्तु ते ॥ १५ ॥ नमः पूर्वाय गिरये पश्चिमायाद्रये नमः ॥ ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥ जयाय जयभद्राय हर्यश्वाय नमोनमः ॥ नमोनमः सहस्रांशो आदित्याय नमोनमः ॥ १७ ॥ नम उग्राय वीराय सारङ्गाय नमो नमः ॥ नमः पद्मप्रबोधाय प्रचण्डाय नमोस्तु ते ॥ १८ ॥ ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे ॥ भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥ तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ॥ कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥ तप्तचामीकराभाय हरये विश्वकर्मणे ॥ नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥ नाशयत्येष वै भूतं तमेव सृजति प्रभुः ॥ पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥ एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ॥ एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥ देवाश्च क्रतवश्चैव क्रतूनां फलमेव च ॥ यानि कृत्यानि लोकेषु सर्वेषु परमः प्रभुः ॥ २४ ॥ एनमापत्सु कृच्छ्रेषु कांतारेषु भयेषु च ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कीर्तयन्पुरुषः कश्चिन्नावसीदति राघव ॥२५॥ पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ॥ एतत्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसे ॥२६॥ अस्मिन्क्षणे महाबाहो रावणं त्वं जयिष्यसि ॥ एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ॥ २७ ॥ एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ॥ धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥ आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ॥ त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्य्यवान् ॥२९॥ रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागतम् ॥ सर्वयत्नेन महता वृतस्तस्य वधेऽभवत् ॥ ३० ॥ अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ॥ निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥ इति वाल्मीकीये श्रीमद्रामायणे आदित्यहृदयस्तोत्रं समाप्तम् ॥ अथ सूर्यसहस्रनामस्तोत्रप्रारंभः ॥सुमंतुरुवाच ॥ माघे मासि सिते पक्षे सप्तम्यां कुरुनन्दन॥ निराहारो रविं भक्त्या पूजयेद्विधिना नृप ॥१॥ पूर्वोक्तेन जपेज्जाप्यं देवस्य पुरतः स्थितः॥ शुद्धैकाग्रमना राजञ्जितक्रोधो जितेन्द्रियः ॥ २ ॥ शतानीक उवाच ॥ केन मंत्रेण जप्तेन दर्शनं भगवान् व्रजेत् ॥ स्तोत्रेण वापि सविता तन्मे कथय सुव्रत ॥३॥ सुमंतुरुवाच ॥ स्तुतो नामसहस्रेण यदा भक्तिमता मया ॥ तदा मे दर्शनं यातः साक्षाद्देवो दिवाकरः ॥ ४ ॥ शतानीक उवाच ॥ नाम्नां सहस्रं सवितुः श्रोतुमिच्छामि ते द्विज ॥ येन ते दर्शनं यातः साक्षाद्देवो दिवाकरः ॥५॥ सुमंतुरुवाच ॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनम् ॥ न चेदस्ति भयं किंचित्तज्जनेन च शाम्यति ॥६ ॥ ज्वराद्विमुच्यते राजन्स्तोत्रेऽस्मिन्पठिते नरः ॥ अन्ये च रोगाः शाम्यंति पठतः शृण्वतस्तथा ॥७॥ संपद्यंते यथाकामास्सर्वभोगा यथेप्सिताः ॥ य एतदादितः श्रुत्वा संग्रामं प्रविशेन्नरः ॥८॥ स जित्वा समरे शत्रूनभ्येति गृहमक्षतः॥ वंध्यानां पुत्रजननं भीतानां भयनाशनम् ॥ ९ ॥ भूतिकारि दरिद्राणां कुष्ठिनां परमौषधम् ॥ बालानां चैव सर्वेषां ग्रहरक्षो

निवारणम् ॥ १० ॥ पठंदेतद्धि यो राजन् स श्रेयः परमाप्नुयात ॥ स सिद्धसर्वसंकल्पः सुखमत्यंतमश्नुते ॥ ११ ॥ धर्मार्थिभिर्द्धर्म्म
लब्ध्यै सुखाय च सुखार्थिभिः ॥ राज्याय राज्यकामैश्च पठितव्यमिदं नरैः ॥ १२ ॥ विद्यावहं तु विप्राणां क्षत्रियाणां जयावहम् ॥
पश्चावहं तु वैश्यानां शूद्राणां धर्म्मवर्द्धनम् ॥ १३ ॥ पठतां शृण्वतामेतद्भवतीति न संशयः ॥ तच्छृणुष्व नृपश्रेष्ठ प्रयतात्मा ब्रवीमि ते ॥
नाम्नां सहस्रं विख्यातं देवदेवस्य भास्वतः॥ १४ ॥ ॐ अस्य श्रीसूर्यसहस्रनाम्नां भगवान् पराशर ऋषिः । अनुष्टुप् छन्दः । श्रीसूर्यो
देवता । सकलाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ विश्वविद्विश्वजित्कर्ताविश्वात्माविश्वतोमुखः ॥ विश्वेश्वरोविश्वयोनिर्नियतात्माजिते
न्द्रियः ॥१॥ कालाश्रयः कालकर्ताकालहाकालनाशनः ॥ महायोगीमहाबुद्धिर्महात्मासुमहाबलः ॥ २ ॥ प्रभुर्विभुर्भूतनाथोभूतात्माभु
वनेश्वरः ॥ भूतभव्योभावितात्माभूतांतःकरणश्शिवः ॥ ३ ॥ शरण्यः कमलानन्दोनन्दनोनंदवर्द्धनः ॥ वरेण्योवरदोयोगीसुसंयुक्तःप्रका
शकः ॥४॥ प्राक्प्राणःपरमःप्राणःप्रीतात्माप्रियतःप्रियः ॥ नयःसहस्रपात्साधुर्दिव्यकुण्डलमण्डितः ॥५॥अव्यंगधारीधीरात्माप्रचेतावायु
वाहनः ॥ समाहितमतिर्द्धाताविधाताकृतमंगलः ॥ ६ ॥ कपर्द्दीकल्पकृद्रुद्रःसुमनाधर्मवत्सलः ॥ समायुक्ताविमुक्तात्माकृतात्माकृतिनां
वरः ॥७॥ अविचिंत्यवपुःश्रेष्ठोमहायोगीमहेश्वरः ॥ कांतःकामादिरादित्योनियतात्मानिराकुलः ॥ ८ ॥ कामःकारुणिकःकर्ताकमला
करबोधनः॥ सप्तसप्तिरचिंत्यात्मामहाकारुणिकोत्तमः॥ ९ ॥ संजीवनोजीवनाथोजगज्जीवोजगत्पतिः॥ अजयोविश्वनिलयस्संविभागोवृष
ध्वजः ॥१०॥ वृषाकपिःकल्पकर्ताकल्पांतकरणोरविः॥ एकचक्ररथोमौनीसुरथोरथिनां वरः ॥११॥ अक्रोधनोरश्मिमालीतेजोराशिर्वि
भावसुः॥दिव्यकृद्दिनकृद्देवोदेवदेवोदिवस्पतिः॥१२॥दीननाथोहरविहोर्तादिव्यबाहुर्दिवाकरः॥ यज्ञोयज्ञपतिःपूषास्वर्णरेताःपरावहः॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परापरज्ञस्तरणिरंशुमालीमनोहरः ॥ प्राज्ञः प्रजापतिस्सूर्यःसविताविष्णुरंशुमान् ॥ १४ ॥ सदागतिर्गंधवाहुर्विहितोविधिराशुगः ॥
पतंगः पतगःस्थाणुर्विहङ्गोविहगोवरः ॥ १५ ॥ हर्य्यश्वोहरिताश्वश्चहरिदश्वोजगत्प्रियः ॥ त्र्यंबकस्सर्वदमनोभावितात्माभिषग्वरः
॥ १६ ॥ आलोककृल्लोकनाथोलोकालोकनमस्कृतः॥ कालःकल्पांतकोवह्निस्तपनस्संप्रतापनः॥ १७ ॥ विरोचनोविरूपाक्षस्सहस्राक्षः
पुरंदरः ॥ सहस्ररश्मिर्मिहिरोविविधांबरभूषणः ॥ १८ ॥ खगः प्रतर्द्दनोधन्योहयगोवाग्विशारदः ॥ श्रीमांश्चशिशिरोवाग्मीश्रीपतिः
श्रीनिकेतनः ॥ १९ ॥ श्रीकंठःश्रीधरःश्रीमान्श्रीनिवासोवसुप्रदः ॥ कामचारीमहामायोमहेशोविदिताशयः ॥ २० ॥ तीर्थक्रियावान्
सुनयोविभवोभक्तवत्सलः ॥ कीर्तिःकीर्तिकरोनित्यःकुंडलीकवचीरथी ॥ २१ ॥ हिरण्यरेताःसप्ताश्वःप्रयतात्मापरंतपः ॥ बुद्धिमानमर
श्रेष्ठोरोचिष्णुः पाकशासनः ॥ २२ ॥ समुद्रोधनदोधातामान्धाताकश्मलापहः ॥ तमोघ्नोध्वांतहावह्निर्होतांतःकरणोगुहः ॥ २३ ॥
पशुमान्प्रयतानंदोभूतेशःश्रीमतांवरः ॥ नित्योदितोनित्यरथःसुरेशःसुरपूजितः ॥ २४ ॥ अजितोविजयोजेताजंगमस्थावरात्मकः ॥
जीवानंदोनित्यगामीविजेताविजयप्रदः ॥ २५ ॥ पर्जन्योग्निस्थितिः स्थेयःस्थविरोणुर्निरंजनः ॥ प्रद्योतनोरथारूढःसर्वलोकप्रकाशकः
॥ २६ ॥ ध्रुवोमेधीमहावीर्य्योहंसःसंसारतारकः ॥ सृष्टिकर्ताक्रियाहेतुर्मार्तण्डोमरुतांपतिः ॥ २७ ॥ मरुत्वान्दहनस्त्वष्टाभगो
भाग्योऽर्य्यमापतिः ॥ वरुणांशोजगन्नाथःकृतकृत्यःसुलोचनः ॥ २८ ॥ विवस्वानभानुमानकार्यकारणंतेजसांनिधिः ॥ असंगगामी
तिग्मांशुर्द्धर्मादिर्दीप्तदीधितिः ॥ २९ ॥ सहस्रदीधितिर्ब्रध्नःसहस्रांशुर्दिवाकरः ॥ गभस्तिमान्दीधितिमान्स्रग्विमानतुल्यद्युतिः ॥ ३० ॥
भास्करःसुरकार्य्यज्ञःसर्वज्ञस्तीक्ष्णदीधितिः ॥ सुरज्येष्ठःसुरपतिर्बहुज्ञोवचसांपतिः ॥ ३१ ॥ तेजोनिधिर्बृहत्तेजाबृहत्कीर्तिर्बृहस्पतिः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 अहिमानूर्जितोधीमानामुक्तःकीर्तिवर्द्धनः ॥ ३२ ॥ महाविद्योगणपतिर्गणेशोगणनायकः ॥ तीव्रप्रतापनस्तापीतापनोविश्वतापनः ॥३३॥
 कार्त्तस्वरोहृषीकेशःपद्मानंदोभिनंदितः ॥ पद्मनाभोमृताहारःस्थितिमान्केतुमान्नभः ॥ ३४ ॥ अनाद्यंतोच्युतोविश्वोविश्वामित्रोघृणी
विराट् ॥ आमुक्तःकवचीवाग्मीकंचुकीविश्वभावनः ॥ ३५ ॥ अनिमित्तगतिःश्रेष्ठःशरण्यःसर्वतोमुखः ॥ विगाहीरेणुरसहःसमायुक्त
स्समाहितः ॥ ३६ ॥ धर्मकेतुर्धर्मगतिः संहर्तासंयमोयमः ॥ प्रणतार्तिहरोवादीसिद्धकार्योजनेश्वरः ॥ ३७ ॥ नभोविगाहनस्सत्यस्ता
ममःसुमनोहरः ॥ हारीहरिर्हरोवायुर्ऋतुःकालानलद्युतिः ॥३८॥ सुखसेव्योमहातेजाजगतामंतकारणम् ॥ महेन्द्रोविष्टुतस्तोत्रंस्तुतिहेतुः
प्रभाकरः ॥ ३९ ॥ सहस्रकरआयुष्मानरोषःसुखदस्सुखी ॥ व्याधिहासुखदःसौख्यंकल्याणःकलिनांवरः ॥ ४० ॥ आरोग्यकर्मणां
सिद्धिर्वृद्धिर्ऋद्धिरहस्पतिः हिरण्यरेताआरोग्यंविद्वान्ब्रध्नुर्बुधोमहान् ॥ ४१ ॥ प्राणवान्धृतिमान्धर्मोधर्मकर्तारुचिप्रदः ॥ सर्वप्रियःसर्वसहःसर्व
शत्रुनिवारणः ॥ ४२ ॥ प्रांशुर्विद्योतनोद्योतःसहस्रकिरणःकृतिः ॥ केयूरभूषणोद्भासीभासितोभासनोनलः ॥ ४३ ॥ शरण्यार्तिहरो
होताखद्योतःखगसत्तमः ॥ सर्वद्योतोभवद्योतःसर्वद्युतिकरोमलः ॥ ४४ ॥ कल्याणःकल्याणकरःकल्पःकल्पकरःकविः ॥ कल्याण
कृत्कल्पवपुःसर्वकल्याणभाजनः ॥४५॥शांतिप्रियःप्रसन्नात्माप्रशांतः प्रशमप्रियः ॥ उदारकर्मासुनयःसुवर्चावर्चसोज्ज्वलः ॥४६॥ वर्चस्वी
वर्चसामीशस्त्रैलोक्येशोवशानुगः ॥ तेजस्वीसुयशावर्णिर्वर्णाध्यक्षोबलिप्रियः ॥ ४७ ॥ यशस्वीवेदनिलयस्तेजस्वीप्रकृतिस्थितः ॥
आकाशगःशीघ्रगतिराशुगःश्रुतिमान्खगः ॥ ४८ ॥ गोपतिर्ग्रहदेवेशोगोमानेकःप्रभंजनः ॥ जनिताप्रजनंजीवोदीपःसर्वप्रकाशकः ॥४९॥
कर्मसाक्षीयोगनित्योनभस्वानसुरांतकः ॥ रक्षोघ्नोविघ्नशमनःकिरीटीसुमनःप्रियः ॥ ५० ॥ मरीचिमालीसुमतिःकृतातिथ्योविशेषतः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिष्टाचारःशुभाचारःस्वाचाराचारतत्परः ॥ ५१ ॥ मंदारोमाठरोरेणुःक्षोभणःपक्षिणांगुरु ॥ स्वविशिष्टोविशिष्टात्माविधेयोज्ञानशोभनः
॥ ५२ ॥ महाश्वेताप्रियोज्ञेयःसामगोमोददायकः ॥ सर्ववेदप्रगीतात्मासर्ववेदालयोलयः ॥ ५३ ॥ वेदमूर्तिश्चतुर्वेदोवेदभृद्वेदपारगः ॥
क्रियावानतिरोचिष्णुर्वरीयांश्चवरप्रदः ॥५४॥ व्रतचारीव्रतधरोलोकबंधुरलंकृतः ॥ अलंकाराक्षरोदिव्यविद्यावानविदिताशयः ॥ ५५ ॥
अकारोभूषणोभूष्योभूष्णुर्भुवनपूजितः ॥ चक्रपाणिर्ध्वजधरःसुरेशोलोकवत्सलः ॥ ५६ ॥ राज्ञीपतिर्महाबाहुःप्रकृतिर्विकृतिर्गुणः ॥
अंधकारापहःश्रेष्ठोयुगावर्तोयुगादिकृत ॥ ५७ ॥ अप्रमेयःसदायोगीनिरहंकारईश्वरः ॥ शुभप्रदःशुभश्शोभाशुभकर्माशुभास्पदः ॥५८॥
सत्यवान्धृतिमानच्योह्यकारोवृद्धिदोनलः ॥ बलभृद्बलदोबंधुर्बलवानबलिनांवरः ॥ ५९ ॥ अनङ्गोनागराडिन्द्रःपद्मयोनिर्गणेश्वरः ॥
संवत्सरऋतुर्नेताकालचक्रप्रवर्तकः ॥ ६० ॥ पद्मेक्षणःपद्मयोनिःप्रभवोनमरश्रुतिः ॥ सुमूर्तिःसुमतिस्सोमोगोविंदोजगदादिजः ॥ ६१ ॥
पीतवासाःकृष्णवासादिग्वासातीन्द्रियोहरिः ॥ अतीन्द्रोऽनेककृपात्मास्कंदःपरपुरंजयः ॥ ६२ ॥ शक्तिमाञ्शल्यभृद्भास्वानमोक्षहेतुर
योनिजः ॥ सर्वदर्शीजितोदर्शीदुःस्वप्नाशुभनाशनः ॥ ६३ ॥ मंगल्यकर्तातरणिर्वेगवान्कश्मलापहः ॥ स्पष्टाक्षरोमहामंत्रोविशाखो
यजनप्रियः ॥ ६४ ॥ विश्वकर्मामहाशक्तिर्ज्योतिरीशोविहंगमः ॥ विचक्षणोदक्षइन्द्रःप्रत्यूहःप्रियदर्शनः ॥ ६५ ॥ अश्विनौवेदनिलयो
वेदविद्विदिताशयः ॥ प्रभाकरोजितारिपुःसुजनोरुणसारथिः ॥ ६६ ॥ कुबेरसुरथःस्कंदोमहितोभिहितोगुरुः ॥ ग्रहराजोग्रहपतिर्ग्रहनक्षत्र
मंडनः ॥ ६७ ॥ भास्करःसततानंदोनन्दनोनंदिवर्द्धनः ॥ मंगलोप्यथमंगलवानमांगल्योमंगलापहः ॥ ६८ ॥ मंगलाचारचरितःशीर्णः
सर्वव्रतोव्रती ॥ चतुर्मुखःपद्ममालीपूतात्माप्रणतार्तिहा ॥ ६९ ॥ अकिंचनस्सत्यसंधोनिर्गुणोगुणवान्गुणी ॥ संपूर्णःपुंडरीकाक्षोविधे

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योयोगतत्परः ॥ ७० ॥ सहस्रांशुःक्रतुपतिःसर्वस्वंसुमतिःसुवाक् ॥ सुवाहनोमाल्यदामाधृताहारोहरिप्रियः ॥ ७१ ॥ ब्रह्मप्रचेता
प्रथितः प्रतीतात्मास्थिरात्मकः ॥ शतबिंदुःशतमखोगरीयाननलप्रभुः ॥ ७२ ॥ धीरामहत्तरोधन्यः पुरुषः पुरुषोत्तमः ॥ विद्याधारा
धिराजोहिविद्यावान्भूतिदः स्थितः ॥ ७३ ॥ अनिर्देश्यवपुः श्रीमान् विश्वात्मा बहुमंगलः ॥ सुस्थितः सुरथः स्वर्णामो
क्षाधारनिकेतनः ॥ ७४ ॥ निर्द्वंद्वोद्वंद्वहासर्गः सर्वगः संप्रकाशकः ॥ दयालुस्सूक्ष्मधीः शांतिः क्षेमाक्षेमस्थितिप्रियः ॥ ७५ ॥
भूधरोभूपतिर्वक्तापवित्रात्मात्रिलोचनः ॥ महावराहः प्रियकृद्दाताभोक्ताभयप्रदः ॥ ७६ ॥ चतुर्वेदधरोनित्योविनिद्रोविविधाशनः ॥
चक्रवर्तीधृतिकरः संपूर्णोऽथमहेश्वरः ॥ ७७ ॥ विचित्ररथएकाकीसप्तसप्तिः परात्परः ॥ सर्वोदधिस्थितिकरः स्थितिः
स्थेयः स्थितिप्रियः ॥ ७८ ॥ निष्कलः पुष्करनिभोवसुमान्वासवप्रियः ॥ वसुमान्वासवस्वामीवसुदातावसुप्रदः ॥ ७९ ॥
बलवानज्ञानवांस्तत्त्वमोंकारस्त्रिषुसंस्थितः ॥ संकल्पयोनिर्दिनकृद्भगवान्कारणावहः ॥ ८० ॥ नीलकण्ठोधनाध्यक्षश्चतुर्वेदप्रियंवदः ॥
वषट्कारोहुतंहोतास्वाहाकारोहुताहुतिः ॥८१॥ जनार्दनोजनानंदोनरोनारायणोंबुदः ॥ स्वर्णांगक्षपणोवायुः सुरासुरनमस्कृतः ॥८२॥
विग्रहोविमलोबिंदुर्विशोकोविमलद्युतिः॥ द्योतितोद्योतनोविद्वान्विविक्त्वान्वरदोबली॥८३॥धर्मयोनिर्महामोहोविष्णुर्भ्राताःसनातनः॥सावित्री
भावितोराजाविसृतोविघृणीविराट् ॥८४॥ सप्तार्चिः सप्ततुरगः सप्तलोकनमस्कृतः॥ संपन्नोथजगन्नाथः सुमनाश्शोभनप्रियः॥८५॥ सर्वा
त्मासर्वकृत्सृष्टिः सप्तिमान्सप्तमीप्रियः॥ सुमेधामाधवोमेध्योमेधावीमधुसूदनः॥८६॥ अंगिरागतिकालज्ञोधूमकेतुस्सुकेतनः ॥ सुखीसुखप्रदः
सौख्यंकामीकांतिप्रियोमुनिः ॥ ८७ ॥ संतापनः संतपनआतपीतपसांपतिः ॥ उग्रश्रवास्सहस्रोस्रः प्रियंकारीप्रियंकरः ॥ ८८ ॥ प्रीतो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विमन्युरंभोदोजीवनोजगतांपतिः ॥ जगत्पिताप्रीतमनाः सर्वः शर्वोगुहाबलः ॥८९॥ सर्वगोजगदानंदोजगन्नेतासुरारिहा ॥ श्रेयः श्रेयस्क
रोज्यायानुत्तमोत्तमउत्तमः ॥ ९० ॥ उत्तमोथमहामेरुर्धारणोधरणीधरः ॥ धाराधरोधर्मराजोधर्माधर्मप्रवर्तकः ॥ ९१ ॥ रथाध्यक्षोरथ
पतिस्त्वरमाणोमितानलः ॥ उत्तरोनुत्तरस्तापीतारापतिरपांपतिः ॥ ९२ ॥ पुण्यसंकीर्तनः पुण्योहेतुर्लोकत्रयाश्रयः ॥ स्वर्भानुर्विहगारि
ष्टोविशिष्टोत्कृष्टकर्मकृत् ॥ ९३ ॥ व्याधिप्रणाशनः क्षेमः शूरस्सर्वजितांवरः ॥ एकनाथोरथाधीशः शनैश्चरपितासितः ॥ ९४ ॥ वैव
स्वतगुरुर्मृत्युर्द्धर्मनित्योमहाव्रतः ॥ प्रलंबहारः संचारीप्रद्योतोद्योतितोनलः ॥ ९५ ॥ संतानकृत्परोमंत्रोमंत्रमूर्तिर्महाबलः ॥ श्रेष्ठात्मा
सुप्रियः शंभुर्महतामीश्वरेश्वरः ॥ ९६ ॥ संसारगतिविच्छेतासंसारार्णवतारकः ॥ सप्तजिह्वः सहस्रार्चीरत्नगर्भोपराजितः ॥ ९७ ॥
धर्मकेतुरमेयात्माधर्म्माधर्म्मवरप्रदः ॥ लोकसाक्षीलोकगुरुर्लोकेशश्छंदवाहनः ॥ ९८ ॥ धर्मरूपः सूक्ष्मवायुर्द्धनुष्पाणिर्द्धनुर्द्धरः ॥ पिना
कधृङ्महोत्साहोनैकमायोमहाशनः ॥९९॥ वीरः शक्तिमतांश्रेष्ठः सर्वशस्त्रभृतांवरः॥ ज्ञानगम्योदुराराध्योलोहिताङ्गोरिमर्द्दनः॥१००॥
अनंतोधर्मदोनित्योधर्मकृच्चत्रिविक्रमः ॥ दैवतक्ष्यक्षरोमद्योनीलाङ्गोनीललोहितः ॥ १०१ ॥ एकोनेकस्त्रयीव्यासः सवितासमितिंजयः॥
शार्ङ्गधन्वानलोभीमः सर्वप्रहरणायुधः ॥ १०२ ॥ परमेष्ठीपरंज्योतिर्नाकपालीदिवस्पतिः ॥ वदान्योवासुकिर्वैद्यआत्रेयोतिपराक्रमः
॥ १०३ ॥ द्वापरः परमोदारः परमब्रह्मचर्य्यवान् ॥ उद्दीप्तवेशोमुकुटीपद्महस्तोहिमांशुभृत् ॥ १०४ ॥ स्मितः प्रसन्नवदनः पद्मोदर
निभाननः॥ सायंदिवादिव्यवपुरनिर्देश्योमहारथः ॥ १०५ ॥ महारथोमहानीशः शेषः सत्त्वरजस्तमः ॥ धृतातपत्रप्रतिमोविमर्षीनिर्णयः
स्थितः ॥ १०६ ॥ अहिंसकः शुद्धमतिरद्वितीयोऽरिमर्द्दनः ॥ सर्वदोधनदोमोक्षोविहारीबहुदायकः ॥ १०७ ॥ ग्रहनाथोग्रहपतिर्ग्रहे

५४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शास्तिमिरापहः॥ मनोहरवपुः शुभ्रः शोभनः सुप्रभाननः ॥ १०८ ॥ सुप्रभः सुप्रभाकारः सुनेत्रोनिक्षुभापतिः ॥ राज्ञीप्रियः शब्दकरो ग्रहेशास्तिमिरापहः ॥ १०९ ॥ सैंहिकेयरिपुर्देवोवरदोवरनायकः ॥ चतुर्भुजोमहायोगीयोगीश्वरपतिस्तथा ॥ ११० ॥ अनादिरूपोदितिजोरत्नकांतिः प्रभामयः ॥ जगत्प्रदीपोविस्तीर्णोमहाविस्तीर्णमण्डलः ॥ १११ ॥ एकचक्ररथः स्वर्णरथः स्वर्णशरीरधृक् ॥ निरालंबोगगनगोधर्मकर्मप्रभावकृत ॥ ११२ ॥ धर्मात्माकर्मणांसाक्षीप्रत्यक्षः परमेश्वरः ॥ मेरुसेवीसुमेधावीमेरुरक्षाकरोमहान्॥ ११३॥ आधारभूतोरतिमांस्तथाचधनधान्यकृत् ॥ पापसंतापसंहर्तामनोवांछितदायकः ॥ ११४ ॥ रोगहर्ताराज्यदायीरमणीयगुणोनृणी ॥ कालत्रयानंतरूपोमुनिवृंदनमस्कृतः ॥ ११५ ॥ संध्यारागकरः सिद्धः संध्यावंदनवंदितः ॥ साम्राज्यदाननिरतः समाराधनतोषवान् ॥ ॥ ११६॥ भक्तदुःखक्षयकरोभवसागरतारकः ॥ भयापहर्ताभगवानप्रमेयपराक्रमः ॥ मनुस्वामीमनुपतिर्मान्योमन्वंतराधिपः ॥ ११७॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ नाम्नां सहस्रं सवितुः पाराशर्यो यदाह मे ॥ ११८ ॥ धन्यं यशस्यमायुष्यंदुष्टदुःस्वप्ननाशनम् ॥ बंधमोक्षकरं चैवभानोर्नामानुकीर्तनम् ॥ ११९ ॥ यस्त्विदंशृणुयान्नित्यंपठित्वाप्रयतोनरः ॥ अक्षयंसुखमन्नाद्यंभवेत्तस्योपसाधितम् ॥ १२० ॥ नृपाग्नितस्करभयंव्याधिभ्योनभयंभवेत् ॥ विजयीचभवेन्नित्यंश्रेयश्चपरमाप्नुयात ॥ १२१ ॥ कीर्तिमान् सुभगोविद्वान्ससुखीप्रियदर्शनः ॥ भवेद्वर्षशतायुश्चसर्वव्याधिविवर्जितः ॥ १२२ ॥ नाम्नां सहस्रमिदमंशुमतः पठेद्यः प्रातः शुचिर्नियमवान् सुसमाधियुक्तः ॥ दूरेणतंपरिहरंतिमदैवरोगाभीतास्सुपर्णमिवसर्वमहोरगेन्द्राः ॥ १२३ ॥ इति श्रीभविष्यपुराणे सप्तमकल्पे भगवतः श्रीसूर्यस्य नाम्नां सहस्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे श्रीसूर्यतंत्रेऽष्टमस्तरंगः ॥८॥ इति सू० तं० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीगणेशायनमः॥ अथ हनुमत्तन्त्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ अथ हनूमद्द्वादशाक्षरमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा
"हौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः" इति द्वादशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य हनुमन्मंत्रस्य रामचन्द्र ऋषिः । जगती
छन्दः । हनुमान् देवता। ह्सौं बीजम् । ह्स्फ्रें शक्तिः। सर्वेष्टसिद्धये जपे विनियोगः॥ ॐ रामचन्द्रऋषये नमः शिरसि ॥१॥ जगती छन्द
से नमः मुखे ॥ २ ॥ हनुमद्देवतायै नमः । हृदि ॥ ३ ॥ ह्सौं बीजाय नमः गुह्ये ॥ ४ ॥ ह्स्फ्रें शक्तये नमः ॥ ५ ॥ विनियोगाय
नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ हौं हृदयाय नमः ॥ १ ॥ ॐ ह्स्फ्रें शिरसे स्वाहा ॥ २ ॥ ॐ ख्फ्रें शिखायै वषट्
॥ ३ ॥ ॐ ह्सौं कवचाय हुं ॥ ४ ॥ ह्स्ख्फ्रें नेत्रत्रयाय वौषट् ॥ ॐ ह्सौं अस्त्राय फट् ॥ इति हृदयादिषडंगन्यासः ॥ एवमेव कर
न्यासं कृत्वा मूर्ध्नि १ भाले २ नेत्रयोः ३ मुखे ४ कंठे५ बाह्वोः६ हृदि ७ कुक्षौ ८ नाभौ ९ लिंगे १० जानुद्वये ११ पादयोः१२
इति द्वादशस्थानेषु द्वादशमंत्रवर्णान् प्रणवाद्यनमोंतान् न्यसेत्॥ इति न्यासं कृत्वा ध्यायेत्॥ ध्यानम्। बालार्कायुततेजसं त्रिभुवनप्रक्षोभकं
सुंदरं सुग्रीवादिसमस्तवानरगणैः संसेव्यपादांबुजम् ॥ नादेनैव समस्तराक्षसगणान्संत्रासयंतं प्रभुं श्रीमद्रामपदांबुजस्मृतिरतं ध्यायामि
वातात्मजम् ॥ १ ॥ एवं ध्यात्वा सर्वतोभद्रमण्डले मंडूकादिपरतत्वांतपीठदेवताः संस्थाप्य नव पीठशक्तीः पूजयेत् ॥ पूर्वादिक्रमेण । ॐ
विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः
॥ ५ ॥ ॐ प्रह्व्यै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥ ८ ॥ मध्ये ॐ अनुग्रहायै नमः ॥ ९ ॥ ॥ २०२॥
इति पूजयेत्॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोष्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"ॐ नमो भगवते हनुमते सर्वभूतात्मने हनुमते सर्वात्मसंयोगपद्मपीठात्मने नमः ॥ " इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा ॥ पुष्पांजलिमादाय "संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां हनुमन्देहि परिवारार्चनाय मे ॥ " इति पुष्पांजलिं दत्त्वा आज्ञां प्राप्य आवरण पूजां कुर्यात् ॥ तद्यथा । षट्कोणकेसरेषु आग्नेय्यादिचतसृषु दिक्षु मध्ये दिक्षु च ॥ ॐ ह्रां हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ ह्स्फ्रें शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ स्फ्रें शिखायै वषट् शिखाश्रीपा० ॥ ३ ॥ ॐ ह्लौं कवचाय हुम् । कवचश्रीपा० ॥ ४ ॥ ॐ ह्स्ख्फ्रें नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ॥ ५ ॥ ॐ ह्सौं अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ ततोऽष्टदलेषु पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण दक्षिणावर्तेन च ॐ *रामभक्तायनमः । रामभक्तश्रीपा० ॥ १ ॥ ॐ महातेजसे नमः । महातेजःश्रीपा० ॥ २ ॥ ॐ कपिराजाय नमः । कपिराजश्रीपा० ॥ ३ ॥ ॐ महाबलाय नमः । महाबलश्रीपा० ॥ ४ ॥ ॐ द्रोणाद्रिहारकाय नमः । द्रोणाद्रिहारकश्रीपा० ॥ ५ ॥ ॐ मेरुपीठार्चकारकाय नमः । मेरुपीठार्चकारकश्रीपा० ॥ ६ ॥

---

* रामभक्तो महातेजाः कपिराजो महाबलः ॥ द्रोणाद्रिहारको मेरुपीठिकार्चनकारकः ॥१॥ दक्षिणाशाभास्करश्च सर्वविघ्ननिवारकः ॥ एवं नामानि संपूज्य दलाग्रेषु च वानरान् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ दक्षिणाशाभास्कराय नमः । दक्षिणाशाभास्करश्रीपा० ॥ ७ ॥ ॐ सर्वविघ्ननिवारकाय नमः । सर्वविघ्ननिवारकश्रीपा० ॥ ८ ॥ इति नामभिः संपूज्य पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलाग्रेषु प्राचीक्रमेण ॥ ॐ सुग्रीवाय नमः । सुग्रीवश्रीपा० ॥ १ ॥ ॐ अंगदाय नमः । अंगदश्रीपा० ॥२॥ ॐ नीलाय नमः । नीलश्रीपा० ॥ ३ ॥ ॐ जांबवते नमः । जांबवच्छ्रीपा० ॥ ४ ॥ ॐ नलाय नमः । नलश्रीपा० ॥ ५ ॥ ॐ सुषेणाय नमः । सुषेणश्रीपा० ॥ ६ ॥ ॐ द्विविदाय नमः । द्विविदश्रीपा० ॥ ७ ॥ ॐ मयंदाय नमः । मयंदश्रीपा० ॥ ८ ॥ इत्यष्टौ वानरान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततः भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं द्वादशसहस्रजपाः॥तद्दशांशतो होमः एवंकृते मंत्रः सिद्धो भवति॥ सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत ॥ तथा च-"एवं ध्यात्वा जपेदर्कसहस्रं जितमानसः ॥ दशांशं जुहुयाद्व्रीहीन्पयोदध्याज्यसंयुतान् ॥ १ ॥ एवंसिद्धे मनौ मंत्री स्वपरेष्टं प्रसाधयेत् ॥ कदलीबीजपूराम्रफलैर्हुत्वासहस्रकम् ॥२॥ द्वाविंशतिं ब्रह्मचारीन्विप्रान्सम्भोजयेदथ ॥ एवंकृते महाभूतविषचौराद्युपद्रवाः ॥३॥ नश्यंति क्षणमात्रेण विद्वेषिग्रहदानवाः॥अष्टोत्तरशतं वारि मंत्रितं विषनाशनम् ॥४॥ रात्रौ नवशतं मंत्रं जपेद्दशदिनावधि॥ यो नरस्तस्य नश्यंति राजशत्रूत्थभीतयः॥५॥अभिचारोत्थभूतोत्थज्वरे तं मंत्रितैर्जलैः॥भस्मभिःसलिलैर्वापि ताडयेज्ज्वरिणं क्रुधा॥६॥ दिनत्रयाज्ज्वरान्मुक्तः स सुखं लभते नरः ॥ तन्मंत्रितौषधं जग्ध्वा नीरोगो जायते ध्रुवम् ॥७॥ तन्मंत्रितं पयः पीत्वा योद्धुं गच्छेन्मनुं जपन् ॥ तज्जपभस्मलिप्तांगः शस्त्रसंघैर्न बाध्यते ॥८॥ शस्त्रक्षतं व्रणः शोफो लूतास्फोटोऽपि भस्मना॥त्रिमंत्रितेन संस्पृष्टाःशुष्यंत्यचिरतो

॥ २०३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नृणाम्॥९॥सूर्यास्तमयमारभ्य जपेत्सूर्योदयावधिः ॥ कीलकं भस्म चादाय समाहावधिसंयुतः ॥१०॥ निखनेद्भस्मकीलौ तौ विद्विषो द्वार्य्यलक्षितः ॥ विद्वेषं मिथ आपन्नाः पलायंतेऽरयोचिरात् ॥११॥ अभिमंत्रितभस्मांबु देहचंदनसंयुतम्॥ खाद्यादियोजितं यस्मै दीयते स तु दासवत् ॥१२॥ क्रूराश्च जंतवोऽनेन भवंति विधिना वशाः ॥ ईशानदिक्स्थमूलेन भूतांकुशतरोः शुभाम् ॥ १३ ॥ अंगुष्ठमात्रां प्रतिमां प्रविधाय हनूमतः ॥ प्राणसंस्थापनं कृत्वा सिंदूरैः परिपूज्य च ॥ १४ ॥ गृहस्याभिमो द्वारे निखनेन्मंत्रमुच्चरन् ॥ भूताभिचारचौराग्निविषरोगनृपोद्भवाः ॥ १५ ॥ संजायंते गृहे तस्मिन्न कदाचिदुपद्रवाः ॥ प्रत्यहं धनपुत्राद्यैरेधते तद् गृहं चिरम् ॥ १६ ॥ निशि श्मशानभूमिस्थो भस्मना मृन्मयापि वा ॥ शत्रोः प्रतिकृतिं कृत्वा हृदि नाम समालिखेत ॥ १७ ॥ कृतप्राणप्रतिष्ठां तां भिंद्याच्छस्त्रैर्मनुं जपन् ॥ मंत्रांते प्रोच्चरेच्छत्रोर्नाम छिंधि च भिंधि च ॥१८॥ मारयेति च तस्यांते दंतैरोष्ठं निपीड्य च ॥ पाण्योस्तले प्रपीड्याथ त्यक्त्वा तां सदनं व्रजेत्॥१९॥एवं सप्तदिनं कुर्वन्हन्याच्छत्रूनशिवार्दितम् ॥ अर्धचन्द्राकृतौ कुंडे स्थंडिले वा हुतं चरेत् ॥ ॥२०॥ मुक्तकेशः श्मशानस्थो लवणैराजिकायुतैः ॥ उन्मत्तफलपुष्पैश्च नखरोमविषैरपि ॥२१॥ काककौशिकगृध्राणां पक्षैः श्लेष्मांतकाक्षजैः ॥ समिद्भिरैश्च त्रिशतं दक्षिणाशामुखो निशि ॥२२॥ सप्तघस्रानिदं कुर्वन्मारयेद्रिपुमुद्धतम् ॥ शतषट्कं जपेद्रात्रौ श्मशाने दिवसत्रयम् ॥ २३ ॥ ततो वेताल उत्थाय वदेद्भावि शुभाशुभम् ॥ उदितं कुरुते सर्वं किंकरीभूय मंत्रिणः ॥२४॥ वश्ये युद्धे नृपद्वारे

---

१ देहचंदनं देहे धृतं यच्चंदनं तेन युतं भस्मांबु च मंत्रितं यस्मै देयं स वश्यः स्यात् ॥ २ भूतांकुशतरोः करंजस्य अरिष्टस्य ईशानादिशि स्थितेन मूलेनां गुष्ठमितां हनुत्प्रतिमां कृत्वा प्राणान्संस्थाप्य सिंदूरैरभ्यर्च्य यद् गृहद्वारि निखन्यते तत्र सर्वोपद्रवनाशस्संपत्तिवृद्धिश्च ॥ ३ शिवार्दितं शिवेनापि राक्षितं शत्रुमेवं कुर्वन् हन्यात ॥ ४ उन्मत्तो धत्तूरः ॥ ५ श्लेष्मांतकश्चिक्कणफलो वृक्षः ॥ ६ अक्षो बिभीतकस्तदुत्थसमिद्भिश्च ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समरे चौरसंकटे ॥ मंत्रोयं साधितो दद्यादिष्टसिद्धिं ध्रुवं नृणाम् ॥ २५ ॥
वस्त्रे शिलायां फलके ताम्रपात्रेथ कुड्यके ॥ भूर्जे वा तालपत्रे वा रोचनाना
भिकुंकुमैः ॥ २६ ॥ यंत्र
मेतत्समालिख्य त्यक्त्वा
सौ ब्रह्मचर्यवान् ॥ करेः
प्राणान्प्रतिष्ठाप्य पूज
येत्तं यथाविधि ॥ २७ ॥
सर्वदुःखनिवृत्त्यैतद्यंत्रमा
त्मनि धारयेत् ॥ ज्वरमा
र्यभिचारिघ्नं सर्वोपद्रवशां
तिकृत् ॥ २८ ॥ योषि
तामपि बालानां धृतं जन
मनोहरम् ॥ इति हनुमद्
द्वादशाक्षरमंत्रप्रयोगः १



हनुमत्कूटद्वादशाक्षरीपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथ हनुमदष्टादशाक्षरमंत्रप्रयोगः ॥ मंत्रो यथा (मंत्रमहोदधौ)-"ॐ नमो भगवते आंजनेयाय महाबलाय स्वाहा" इत्यष्टादशाक्षरो मंत्रः॥ अस्य विधानम् ॥अस्य मंत्रस्य ईश्वर ऋषिः। अनुष्टुप् छंदः। हनुमान् देवता। हुं बीजम्। स्वाहा शक्तिः। सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ ईश्वरऋषये नमः शिरसि ॥१॥ अनुष्टुप्छंदसे नमः मुखे ॥२॥ हनुमद्देवतायै नमः हृदि ॥३॥ हुंबीजाय नमः गुह्ये ॥४॥ स्वाहाशक्तये नमः पादयोः ॥५॥ विनियोगाय नमः सर्वांगे ॥६॥ इति ऋष्यादिन्यासः॥ ॐ आंजनेयाय नमः हृदयाय नमः ॥ १ ॥ॐ रुद्रमूर्तये नमः शिरसे स्वाहा ॥ २ ॥ ॐ वायुपुत्राय नमः शिखायै वषट् ॥३॥ ॐ अग्निगर्भाय नमः कवचाय हुं॥४॥ ॐ रामदूताय नमः नेत्रत्रयाय वौषट् ॥५॥ ॐ ब्रह्मास्त्रनिवारकाय नमः अस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः ॥ एवं करन्यासं कृत्वा ध्यायेत्॥ अथ ध्यानम् ॥ "ॐ दहनतप्तसुवर्णसमप्रभं भयहरं हृदये विहितांजलिम् ॥ श्रवणकुंडलशोभिमुखांबुजं नमत वानरराजमिहाद्भुतम् ॥१॥" इति ध्यायेत् ॥ ततः सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा– पूर्वादि क्रमेण ॥ ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानाय नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्व्यै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥८॥ मध्ये ॐ अनुग्रहायै नमः॥९॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य "ॐ नमो भगवते हनुमते सर्वभूतात्मने हनुमंताय सर्वात्मसंयोगपद्मपीठात्मने नमः" ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात ॥ तद्यथा-पुष्पांजलिमादाय मूलमुच्चा

For Private And Personal Use Only

यं "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां हनुमन्देहि परिवारार्चनाय मे॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वेदत ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत ॥ षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ आंजनेयाय हृदयाय नमः हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ रुद्रमूर्तये शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ वायुपुत्राय शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ अग्निगर्भाय कवचाय हुम । कवचश्रीपा० ॥ ४ ॥ ॐ रामदूताय नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ॥ ५ ॥ ॐ ब्रह्मास्त्रनिवारकाय अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इत्यंगानि पूजयेत ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत । इति प्रथमावरणम ॥ १ ॥ ततोष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या

द्वादशाक्षरीहनुमत्कल्पपूजनयन्त्रम्.



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिशः प्रकल्प्य प्राचीक्रमेण दक्षिणावर्तेन च ॐ रामभक्ताय नमः ॥ १ ॥ ॐ महातेजसे नमः ॥ २ ॥ ॐ कपिराजाय नमः ॥ ३ ॥ ॐ महाबलाय नमः ॥ ४ ॥ ॐ द्रोणाद्रिहरकाय नमः ॥ ५ ॥ ॐ मेरुपीठार्चनकारकाय नमः ॥ ६ ॥ ॐ दक्षिणाशाभास्कराय नमः ॥ ॥ ७ ॥ ॐ सर्वविघ्ननिवारकाय नमः ॥ ८ ॥ इति संपूज्य पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टकोणाग्रेषु प्राचीक्रमेण । ॐ सुग्रीवाय नमः ॥ १ ॥ ॐ अंगदाय नमः ॥ २ ॥ ॐ नालाय नमः ॥ ३ ॥ ॐ जाम्बवते नमः ॥ ४ ॥ ॐ नलाय नमः ॥ ५ ॥ ॐ सुषेणाय नमः ॥ ६ ॥ ॐ द्विविदाय नमः ॥ ७ ॥ ॐ मयंदाय नमः ॥ ८ ॥ इति संपूज्य पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतजपाः । तद्दशांशतो होमः । एवंकृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च । "अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयात्तिलैः ॥ जितेंद्रियो नक्तभोजी प्रत्यहं साष्टकं शतम् ॥ १ ॥ जपित्वा क्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात् ॥ १ ॥ भूतप्रेतपिशाचादिनाशायैवं समाचरेत् ॥ महारोगनिवृत्त्यै तु सहस्रं प्रत्यहं जपेत् ॥ २ ॥ एकाशनोऽयुतं नित्यं जपन्ध्यायन्कपीश्वरम् ॥ राक्षसौघं विनिघ्नंतमाचिराज्जयति द्विषम् ॥ ३ ॥ सुग्रीवेण समं रामं संदधानं स्मरन्कपिम् ॥ प्रजप्यायुतमेतस्य संधिं कुर्याद्विरुद्धयोः ॥ ४ ॥ लंकां दहंतं तं ध्यायन्नयुतं प्रजपेन्मनुम् ॥ शत्रूणां प्रदहेद् ग्रामानचिरादेव साधकः ॥ ५ ॥ प्रयाणसमये ध्यायन् हनूमंतं मनुं जपन् ॥ यो याति सोऽचिरात्स्वेष्टं साधयित्वा गृहं भजेत् ॥ ६ ॥ यः कपीशं सदा गेहे पूजयेज्जपतत्परः ॥ आयुर्लक्ष्म्यौ प्रवर्द्धेते तस्य नश्यंत्युपद्रवाः ॥ ७ ॥ शार्दूलतस्करादिभ्यो रक्षेन्मनुरयं स्मृतः ॥ प्रस्वापकाले चौरेभ्यो दुःस्वप्नादपि ध्रुवम् ॥ ८ ॥ इत्यष्टादशाक्षरहनुमन्मंत्रप्रयोगः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ द्वादशाक्षरमंत्ररूपहनुमत्कल्पः ॥ (गारुडीतंत्रे) देव्युवाच ॥ शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च ॥ साधनानि च
सौराणि चान्यानि यानि तानि च ॥ १ ॥ श्रुतानि देवदेवेश त्वद्वक्त्रान्निःसृतानि च ॥ किंचिदन्यत्तु देवानां साधनं यदि कथ्य
ताम् ॥ २ ॥ महादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि सावधानाऽवधारय ॥ हनुमत्साधनं पुण्यं महापातकनाशनम् ॥ ३ ॥ एतद्गुह्यतमं
लोके शीघ्रसिद्धिकरं परम् ॥ जपी यस्य प्रसादेन लोकत्रयजितो भवेत् ॥ ४ ॥ तत्साधनमहं वक्ष्ये नृणां सिद्धिकरं द्रुतम् ॥ ५ ॥
वियत्सनरकंघोरंहनुमतेतदनंतरम् ॥ रुद्रात्मकायकवचंफडितिद्वादशाक्षरम् ॥ ६ ॥ एतन्मंत्रं मयाख्यातं गोपनीयं प्रयत्नतः ॥ तवस्नेहे
न भक्त्या च दासोऽस्मि तव सुन्दरि ॥७॥ एतन्मंत्रमर्जुनाय प्रदत्तं हरिणा पुरा ॥ जपेन साधनं कृत्वा जितं सर्वं चराचरम् ॥ ८ ॥
मंत्रो यथा—"हं हनुमतेरुद्रात्मकायहुँफट्" इति द्वादशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ नदीकूले विष्णुगेहे निर्जनस्थाने पर्वते वने वा

---

१ अथ भाषानुवादः—देवीजी बोली हे ईश्वर ! शिवसाधन गणेशसाधन शक्तिसाधन विष्णुसाधन सूर्यसाधन आदि अनेकसाधनोंकी रीति मैंने तुम्हारे समीप श्रवण करी है। अब मैं अन्यान्य देवतोंका साधन सुननेकी इच्छा करती हूं सो आप कहिये ॥ १ ॥ २ ॥ महादेवजी बोले हे देवि ! मैं इस समय हनुमत्साधन कहता हूं सो तुम सावधान होकर श्रवण करो। यह साधन बड़े पुण्यका देनेवाला और बडे बडे जो पातक हैं उनका नाश करनेवाला है ॥३॥ इसकी साधनविधि अतिगुप्त है और शीघ्र सिद्धिकी देने वाली है। इस साधनके बलसे साधक तीनों लोकोंको जय करनेमें समर्थ होसकता है ॥ ४ ॥ तिसके साधनकी विधि मैं कहता हूँ जो मनुष्योंको सिद्धिकी देनेवाली है ॥ ५ ॥ प्रथम हं दूसरे हनुमते पीछे रुद्रात्मकाय अन्तमें हुं फट् अर्थात् "हं हनुमतेरुद्रात्मकायहुंफट्" ॥ ६॥ यह बारह अक्षरका मंत्र जो मैंने कहा इसको यत्नपूर्वक गुप्त रखना चाहिये। हे सुन्दरि ! मैं तुम्हारा दास हूं इस वास्ते मैंने तुम्हारे स्नेह और भक्तिके वशीभूत होकर यह मंत्र कहा है ॥ ७ ॥ इस मंत्रको प्रथम भगवान् श्रीकृष्णचन्द्रजीने अर्जुनसे कहा था। अर्जुनने इसी मंत्रको सिद्ध करके चर और अचर जगत्को जीता है ॥ ८ ॥ नदीके किनारे विष्णुभगवान्के मंदिरमें निर्जनस्थानमें अथवा पर्वतमें एकाग्रचित्त होकर इस साधनको करे ॥ ९ ॥ हनुमान्जी बडे भारी पर्वतको उखाडकर रावणकी ओरको धावमान होरहे हैं और रावणसे घोर शब्द करके कहते हैं कि रे दुष्टात्मन् ठहर ठहर भाग मत, हनुमान्जीका वर्ण लाखके रंगके समान अरुण है, हनुमान्जीका भयानक स्वरूप कालांतक यमकी समान है, इनके दोनों नेत्र अग्निकी

For Private And Personal Use Only

जपस्थानभूमि परिग्रहणं कृत्वा नदीतीरे स्नात्वा कुशासने उपविश्य आचम्य मूलेन प्राणानायम्य देशकालौ संकीर्त्यामुकगोत्रोऽमुकशर्म्माहं श्रीहनुमत्प्रीतिकामोऽमुकमंत्रेण लक्षजपरूपपुरश्चरणमहं करिष्ये इति संकल्प्य भूतशुद्ध्यादिकं कुर्यात् ॥ अस्य ऋष्यादिकादेरभावः ॥ "हं हनुमते रुद्रात्मकाय हुं फट् स्वाहा" इत्यंगुष्ठाभ्यां नमः ॥ १ ॥ एवमेव विधिना करन्यासं हृदयादिषडंगन्यासं च कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ महाशैलं समुत्पाट्य धावन्तं रावणं प्रति ॥ तिष्ठतिष्ठ रणे दुष्ट घोररावं समुच्चरन् ॥ १ ॥ लाक्षारसारुणं गात्रं कालांतकयमोपमम् ॥ ज्वलदग्निलसन्नेत्रं सूर्य्यकोटिसमप्रभम् ॥ अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥ एवंरूपं हनुमन्तं ध्यात्वा पूजां समारभेत् ॥ इति ध्यायेत्॥ ततः पीठादौ रचिते सर्वतोभद्रमंडलं कृत्वा ततः सकेसरं रक्तचंदनं घृष्ट्वा तेन लेखनीं च कृत्वा ताम्रादिपत्रेऽष्टदलपद्मं विलिख्य मंडले संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्त्तिः प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य मूलेन पुष्पांजल्यष्टकं दत्त्वा ततः "ॐ कुले रघूणां समवाप्य जन्म विधाय सेतुं जलधेर्जलांतः॥ लंकेश्वरं यः शमयांचकार सीतापतिं तं प्रणमामि भक्त्या ॥ १ ॥" इति रामं ध्यात्वा पुष्पांजलिमादाय मूलमुच्चार्य्य "ॐ संविन्मयः परो देवःपरामृतरसप्रियः॥ अनुज्ञां हनुमन्देहि परिवारार्चनाय मे" ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत्॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत्॥ तथा च पूज्यपूजकयोरंत

भाँति प्रकाशमान हैं और देह कोटिसूर्यकी कांतिवाली है। रुद्ररूपी हनुमानजी अंगदजी आदि बड़े बड़े वीरोंसे युक्त हैं ॥ १० ॥ इस प्रकार हनुमानजीका ध्यान करके मंत्रका जप करै। लक्ष जप पूर्ण होजाने पर हनुमान्जी उस साधकपर प्रसन्न होजाते हैं। हे देवि ! तुम्हारे प्रति यह हनुमान्जीका मंत्र मैंने सत्य कहा है ॥ ११ ॥ पुरुषोंको ध्यानमात्र करनेसे ही सिद्धि होती है इसमें कोई सन्देह नहीं है किन्तु ध्यान भक्तिपूर्वक होना चाहिये। प्रातःकाल स्नान कर नदीके किनारे कुशाके आसनपर बैठ ॥ १२ ॥ प्राणायाम और षडंगन्यास सब मूलमंत्रसे करै पीछे मूलमंत्रद्वारा आठ अंजलि पुष्पप्रदान कर सीता सहित श्रीरामचन्द्रजीका ध्यान करै ॥ १२ ॥ इसके उपरांत हनुमान्जीका यंत्र अंकित करै। पहले केसरसहित घिसे रक्तचंदन और रक्तचंदनकी कलमसे ताम्रपत्रके ऊपर अष्टदल कमल लिखना चाहिये ॥ १३ ॥ तिसके बीचमें मूलमंत्र लिखकर उस मूलमंत्रको हनुमान्जीका स्वरूप समझ कर आवाहनपूर्वक

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वादशाक्षरीहनुमन्मन्त्रयन्त्रम्.



राले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ सुग्रीवाय नमः । सुग्रीवश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥ इति सर्वत्र ॥ १ ॥ ॐ लक्ष्मणे नमः । लक्ष्मणश्रीपा० ॥ २ ॥ ॐ अंगदाय नमः । अंगदश्रीपा० ॥ ३ ॥ ॐ नलाय नमः । नलश्रीपा० ॥ ४ ॥ ॐ नीलाय नमः । नीलश्रीपा० ॥ ५ ॥ ॐ जाम्बवते नमः । जाम्बवच्छ्रीपा० ॥ ६ ॥ ॐ कुमुदाय नमः । कुमुदश्रीपा० ॥ ७ ॥ ॐ केसरिणे नमः । केसरिश्रीपा० ॥ ८ ॥ देवदक्षिणतः । ॐ पवनाय नमः । पवनश्रीपा० ॥ ९ ॥ वामे । ॐ अंजन्यै नमः । अंजनीश्रीपा० ॥ १० ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य । "ॐ अभीष्टसिद्धिं मे देहि शरणगतवत्सल ॥ भक्त्या समर्पये तुभ्यमिदं ह्यावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजल्यष्टकं दत्त्वा विशेषार्घ्यबिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य पुनर्ध्यात्वा एकाग्रचित्तो मंत्रार्थं स्मरन् जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षजपः । लक्षांते दिवसं प्राप्य तेन महत्पूजनं कृत्वा दिवारात्रिं व्याप्य जपेत् ॥ तावत्कालं जपेत् यावत्संदर्शनं भवेत् ॥ एवंकृते हनुमांस्त्रिभागशेषासु निशासु आगच्छति साधकाय वरं दत्त्वा पुनर्व्रजति

पाद्यादि देवे ॥ १५ ॥ फिर मूलमंत्रसे गंधपुष्पादि निवेदन कर सुग्रीव लक्ष्मण अंगद नल नील ॥ १६ ॥ जाम्बवंत कुमुद और केसरी इन्होंको कमलके आठों दलोंमें लिखकर पूर्वादिक्रमसे इन आठोंका पूजन करना चाहिये ॥ १७ ॥ हनुमान्जीके दक्षिण भागमें पवनका पूजन करै । और वामभागमें अंजनीका पूजन करै ॥ दलके अग्रभागमें "ॐ कपिभ्यो नमः ।" इस मंत्रसे आठ अंजलि पुष्प चढावै ॥१८॥ पीछे कपिराजका ध्यान करके मंत्रका जप करै ॥ इस मंत्रको एक लाख जपना चाहिये । जिस दिन लक्ष जप पूरा होजावे उस दिन महापूजा करनी चाहिये ॥ १९ ॥ एकाग्रचित्तसे रात्रि दिन हनुमान्जीके मंत्रका जप करने पर हनुमान्जीका दर्शन होता है । जब तक दर्शन न होवे जप करता रहै ॥ २० ॥ ऐसा करनेसे हनुमानजी साधकको दृढ़ प्रतिज्ञ जान रात्रिके समय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा च । नदीकूले विष्णुगेहे निर्जने पर्वते वने ॥ एकाग्रचित्तमाधाय साधयेत्साधनं महत् ॥ ९ ॥ महाशैलं समुत्पाट्य धावंतं रावणं प्रति ॥ तिष्ठतिष्ठ रणे दुष्ट घोरं रावं समुच्चरन् ॥ लाक्षारसारुणं गात्रं कालान्तकयमोपमम् ॥ ज्वलदग्निसमनेत्रं सूर्यकोटिसमप्रभम् ॥ अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥ १० ॥ एवंरूपं हनूमंतं ध्यात्वा यः प्रजपेन्मनुम् ॥ लक्षजापात्प्रसादः स्यात्सत्यं ते कथितं मया ॥ ११ ॥ ध्यानैकमात्रतः पुंसां सिद्धिरेव न संशयः ॥ प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने ॥ १२ ॥ प्राणायामं षडंगञ्च मूलेन सकलं चरेत् ॥ पुष्पांजल्यष्टकं दत्त्वा ध्यात्वा रामं ससीतकम् ॥ १३ ॥ ताम्रपात्रे ततः पद्ममष्टपत्रं सकेसरम् ॥ रक्तचन्दनघृष्टेन लिखेत्तस्य शलाकया ॥ १४ ॥ कर्णिकायां लिखेन्मंत्रं तत्रावाह्य कपिप्रभुम् ॥ कर्णिकायां हनूमंतं ध्यात्वा पाद्यादिकं ततः ॥ १५ ॥ गंधपुष्पादिकं चैव निवेद्य मूलमंत्रतः ॥ सुग्रीवं लक्ष्मणं चैव चाङ्गदं नलनीलकम् ॥ १६ ॥ जाम्बवंतं च कुमुदं केसरिणं दलेदले ॥ पूर्वादिक्रमतो देवि पूजयेद्गंधचन्दनैः ॥ १७ ॥ पवनञ्चांजनञ्चैव पूजयेद्दक्षवामतः ॥ दलाग्रेषु कपिभ्योपि पुष्पाञ्जल्यष्टकं ततः ॥ १८ ॥ ध्यात्वा तु मंत्रराजं वै लक्षं यावत्तु साधकः ॥ लक्षांते दिवसं प्राप्य कुर्याच्च पूजनं महत् ॥ १९ ॥ एकाग्रचित्तमनसा तस्मिन्पवननंदने ॥ दिवारात्रौ जपं कुर्याद्यावत्संदर्शनं भवेत् ॥ २० ॥ सुदृढं साधकं मत्वा निशीथे पवनात्मजः ॥ सुप्रसन्नस्ततो भूत्वा प्रयाति साधकाग्रतः ॥ २१ ॥ यथेप्सितं वरं दत्वा साधकाय कपिप्रभुः ॥ वरं लब्ध्वा साधकेन्द्रो विहरेदात्मनः सुखैः ॥ २२ ॥ एतद्धि साधनं पुण्यं देवानामपि दुर्लभम् ॥ तव स्नेहान्मयाख्यातं भक्तासि मयि पार्वति ॥ २३ ॥ इति श्रीगारुडे तंत्रे देवीश्वरसंवादे द्वादशाक्षरहनुमत्कल्पं समाप्तम् ॥

प्रसन्न हो साधकके समीप आते हैं ॥ २१ ॥ तहां हनुमानजी साधकको अभिलषित वर देते हैं । साधक वरको प्राप्त हो सुखपूर्वक विहार करता है ॥ २२ ॥ यह परम पुण्यका देनेवाला साधन देवताओंको भी दुर्लभ है । हे देवि तुम मेरी भक्ता हो इस कारण तुम्हारे स्नेहके वशीभूत हो प्रकाश करा है ॥ २३ ॥ यह गारुडी तंत्रमें लिखा हुआ पार्वती महादेवका सम्वाद है ॥ इति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथ हनुमद्दशाक्षरमन्त्रवीरसाधनप्रयोगः ॥ " हनुमतोऽतिगुह्यं तु लिख्यते वीरसाधनम् ॥ स्वबीजं पूर्वमुच्चार्य पवनं च ततो वदेत् ॥ १ ॥ नन्दनं च ततो देयं ङेऽवसानेऽनलप्रिया ॥ दशार्णोऽयं मनुः प्रोक्तो नराणां सुरपादपः ॥ २ ॥" मंत्रो यथा ॥ "हंपवनन न्दनाय स्वाहा" इति दशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ "ब्राह्मे मुहूर्ते चोत्थाय कृतनित्यक्रियो द्विजः॥ गत्वा नदीं ततः स्नात्वा तीर्थ मावाह्य चाभसि ॥ मूलमंत्रं ततो जप्त्वा सिंचेदादित्यसंख्यया ॥ ३ ॥" ततो वाससी परिधाय गंगातीरे पर्वते वा उपविश्य । ह्रौं अंगु

१ अथ भाषानुवादः-हनुमान्जीका अत्यंत गुप्त वीर साधन कहा जाता है। "हं पवननंदनायस्वाहा" यह दशाक्षरका मंत्र मनुष्योंके लिये कल्पवृक्षके समान है। अब मैं इसके करनेकी विधि कहता हूं। साधक ब्राह्ममुहूर्तमें उठ संध्यावंदनादि नित्यक्रिया करनेके उपरांत नदीके किनारे जाय स्नान करके तीर्थावाहनपूर्वक आठबार मूलमंत्रका जप करै फिर उस जलके द्वारा बारह बार अपने मस्तकपर अभिषेक करै । पीछे वस्त्रयुगल धारण कर गंगाके तीर वा पर्वत पर बैठ "ह्रौंअंगुष्ठाभ्यांनमः। इस प्रकार करन्यास हृदयादिषडंगन्यास करै। तिसके पीछे अकारादि १६ स्वरवर्णोंको उच्चारण करके वामनासापुटमें वायुको पूर्ण करै तथा ककारादि मकार पर्यंत २५ अक्षरोंको उच्चारण करके दोनों नासापुटोंमें वायुको बन्द करै और यकारादि क्षकारांत वर्णोंको उच्चारण करके दक्षिणनासापुटसे वायुको रेचन करै अर्थात् बाहर निकाल दे। इसी प्रकार दक्षिणनासापुटसे वायुको खैंचकर दोनों नासापुटोंमें कुंभक और वाम नासापुटसे रेचन करै ॥ फिर वामनासापुटसे पूर्ण दोनों नासापुटोंसे धारण और दक्षिणसे रेचन करै। इस प्रकार तीनवार प्राणायाम कर मंत्रके अक्षरोंसे अंगन्यास पूर्वक ध्यान करै। हनुमान्जी संग्रामके बीच कोटि वानरोंसे युक्त हैं। हनुमान्जी रावणको पराजय करनेके निमित्त धावित होरहे हैं। हनुमान्जीको देखकर रावण कंपायमान होरहा है। महावीर लक्ष्मणजीको रणभूमिमें गिरे हुये देख हनुमान्जी क्रोधके साथ महापर्वतको उखाड़ घमंडके साथ हाहाकार ध्वनिसे तीनों लोकोंको कंपित कर रहे हैं। हनुमान्जी ब्रह्माण्डव्यापी भीम कलेवरको धारण किये हुए स्थित हैं। इस प्रकार ध्यान करके छः हजार मूलमंत्रका जप करना चाहिये छः दिन इस प्रकार जप करके सातवें दिन दिनरात जप करना चाहिये। इस प्रकार जप करने पर रात्रिके चौथे पहरमें महाभय प्रदर्शनपूर्वक निश्चय हनुमान्जी साधकके समीप आगमन करते हैं। यदि साधक मायाको अर्थात भयको परित्याग करनेमें समर्थ हो तो अभिलषित वर प्राप्त कर सकता है। विद्याको धनको राज्यको तथा शत्रु निग्रहको उसी समय प्राप्त होता है सत्य है सत्य है भले प्रकार निश्चय किया हुआ है। इति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्ठाभ्यां नमः ॥ १ ॥ ह्रौँ तर्जनीभ्यां नमः ॥२॥ इत्यादिना करन्यासं हृदयादिषडंगन्यासं च कृत्वा प्राणायामं कुर्यात् ॥ तथा च—
अकारादिवर्णानुच्चार्य वामनासापुटेन वायुं पूरयेत ॥ पंचवर्गानुच्चार्य्य वायुं कुंभयेत ॥ यकारादिवर्णानुच्चार्य्य दक्षिणनासापुटेन वायुं
रेचयेत ॥ एवं वारत्रयं कृत्वा मंत्रवर्णैरंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ध्यायेद्रणे हनुमंतं कपिकोटिसमन्वितम् ॥ धावंतं रावणं
जेतुं दृष्ट्वा सत्वरमुत्थितम् ॥ लक्ष्मणं च महावीरं पतितं रणभूतले ॥ गुरुं च क्रोधमुत्पाद्य गृहीत्वा गुरुपर्वतम ॥ हाहाकारैः सदर्पैश्च
कम्पयंतं जगत्रयम ॥ ब्रह्माण्डं स समावाप्य कृत्वा भीमं कलेवरम ॥१॥ इति ध्यात्वा षट्सहस्रं जपेत् । सप्तमदिवसं प्राप्य तदा दिवा
रात्रिं व्याप्य जपेत । ततो महाभयं दत्त्वा त्रिभागशेषासु निशासु नियतमागच्छति साधको यदि मायां तरति तदेप्सितं वरं प्राप्नोति ॥
विद्यां वापि धनं वापि राज्यं वा शत्रुनिग्रहम् ॥ तत्क्षणादेव चाप्नोति सत्यं सत्यं सुनिश्चितम् ॥ इति दशाक्षरवीरमंत्रसाधनम् ॥
॥ अथ अष्टादशाक्षरमन्त्रप्रयोगः॥ मंत्रो यथा ॥ "ॐ नमो हनुमते आवेशय आवेशय स्वाहा" इत्यष्टादशाक्षरमंत्रः ॥ अस्य[1] विधानम् ॥

---

१ रक्तचंदनकी हनुमानजीकी प्रतिमा बनाकर प्राणप्रतिष्ठा करै और रक्तवस्त्र धारण करावै। पीछे आप रक्तवस्त्र धारण कर रक्तवर्णके आसनपर पूर्वाभिमुख बैठकर रात्रिके समय हनुमानजीका पंचोपचार पूजन करै गुडके चूरमेका नैवेद्य लगावै, उस नैवेद्यको मूर्तिके सामने आठ पहर धरा रहने दे, जब दूसरे दिन नैवेद्य लगावै तब पहले दिनका नैवेद्य उठाकर किसी पात्रमें इकट्ठा करता रहै। अनुष्ठान समाप्त होनेके पीछे किसी दुर्बल ब्राह्मणको देदेवे या पृथ्वीमें गाड़ देवै। घृतका दीपक जलावै, रुद्राक्षकी मालासे ११०० मंत्र नित्य जपै, उसी स्थानमें रक्तवस्त्र पर सोजावै; ऐसा करनेसे ११ दिनके भीतर हनुमानजी ब्रह्मचारी स्वरूप हो रात्रिके समय स्वप्न द्वारा दर्शन देकर साधकके प्रश्नका उत्तर अवश्य देते हैं। साधक जो पूँछता है बताते हैं औरभी जिस कामके वास्ते जपै उसका मनोरथ पूर्ण करते हैं। यह एक महात्माका उपदेश किया हुआ बड़ा चमत्कारी मंत्र है. मेरा अनुभव किया हुआ सिद्ध मंत्र है। इसको गुप्त रखना चाहिये ॥ इत्यष्टादशाक्षरहनुमन्मंत्रप्रयोगः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथ चतुर्दशाक्षरहनुमन्मंत्रप्रयोगः ॥ मंत्रो यथा "ॐ नमो हरिमर्कटमर्कटाय स्वाहा" इति चतुर्दशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ अथ हनुमत्पूजापद्धतिप्रारंभः ॥ तत्रादौ मंत्रानुष्ठानप्रारम्भात्पूर्वकृत्यम् ॥ चन्द्रताराद्विबलान्विते सुमुहूर्ते पुण्यतीर्थक्षेत्रे विष्णुगेहे पर्वते वने वा निर्जनस्थानादावनुष्ठानयोग्यभूमिपरिग्रहणं कृत्वा तत्र मार्जनदहनखननसंप्लावनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रमाहारादिविहारार्थं परिकल्प्य जपस्थानभूमौ कूर्मशोधनं कुर्यात् ॥ ततः पुरश्चरणात् प्राक् तृतीयदिवसे क्षौरादिकं विधाय ततः प्रायश्चित्तांगतार्थं विष्णुपूजातर्पणश्राद्धानि होमं चान्द्रायणादिव्रतं च कुर्यात ॥ व्रताशक्तौ गोदानं द्रव्यदानं च कुर्यात ॥ यदि सर्वकर्माशक्तिस्तदा प्रायश्चित्तांगतार्थं पंचगव्यप्राशनं कुर्यात ॥ तत्र मंत्रः ॥ "ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात्पंचगव्यस्य दहत्यग्निरिवेंधनम् ॥१" ॥ मूलं पठित्वा प्रणवेन पंचगव्यं पिबेत ॥ तद्दिने उपवासं कुर्यात। अशक्तश्चेत् पयःपानं हविष्यान्नेनैकभक्तव्रतं वा कुर्यात ॥ ततः पुरश्चरणात् पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थं चायुतगायत्री जपं कुर्यात ॥ तथा च देशकालौ संकीर्त्य ममामुकगोत्रस्यामुकशर्मणो ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणश्रीहनुमन्मंत्रपुरश्चरणाधिकारार्थं

---

१ इस मंत्रको आम्रके पत्तेपर गुलाल बिछाकर अनारकी कलमसे एक लाख मंत्र लिखे, तो मनोरथ सिद्ध हो राज्यका प्रयोजन सिद्ध हो अनेक कार्य मनोवांछित सिद्ध हों, इसमें कुछ संदेह नहीं, अगर "ॐ नमो हरिमर्कटमर्कटाय अमुकं हरिमर्कटमर्कटाय स्वाहा" इस प्रकार भोजपत्र या कागजपर सिंदूरसे लिखकर वीरमूर्ति हनुमान्के मस्तकपर चिपकाय देवे. पंचोपचार पूजन करके सरसोंके तेलकी हनुमान्जीके मस्तकपर इस मंत्रके द्वारा एक लाख धारा देवे तो शत्रुका नाश होवे. शत्रुका धन नष्ट होवे. अत्यंत दुःखी होकर पैरोंमें आन पड़े। यह विधि भी एक जटिल सिद्ध पुरुषकी कही हुई हमारी अनुभूत किया है। इति चतुर्दशाक्षरहनुमन्मंत्रप्रयोगः ॥ इति हनुमत्पटलं समाप्तम्

For Private And Personal Use Only

चायुतगायत्रीजपपहं करिष्ये । इति संकल्प्य व्याहृतित्रयपूर्वकगायत्र्ययुतं जपेत् । ततो गायत्र्या आचार्यकर्षि विश्वामित्रं तर्पयामि ॥ १ ॥ गायत्रीछंदस्तर्पयामि ॥ २ ॥ सवितारं देवतां तर्पयामि ॥ ३ ॥ इति तर्पणं कृत्वा ततस्तस्यां रात्रौ देवतोपास्तिशुभाशुभं स्वप्नं विचारयेत ॥ तथा च स्नानादिकं कृत्वा हरिपादाम्बुजं स्मृत्वा कुशास्तरादिशय्यायां यथासुखं स्थित्वा वृषभध्वजं प्रार्थयेत ॥ तत्र मंत्रः । "ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टं समाचक्ष्व मम सुप्तस्य शाश्वतः ॥ १ ॥ ॐ नमोजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ २ ॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥ ३ ॥" इति मंत्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य निद्रां कुर्यात ॥ ततः स्वप्नं दृष्ट्वं निशि प्रातर्गुरवे विनिवेदयेत ॥ अथवा स्वयं स्वप्नं विचारयेत ॥ इति पूर्वकृत्यम ॥ अथ प्रातःकृत्यम ॥ पुरश्चरणदिवसे श्रीमत्साधकेन्द्रः प्रातःकालात्पूर्वं दंडद्वयात्मके ब्राह्मे मुहूर्ते चोत्थाय प्रातःस्मरणं कृत्वा भूमिं प्रार्थयेत ॥ तत्र मंत्रः ॥ "ॐ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥" इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पादं दत्वा बहिर्व्रजेत् ॥ ततो

---

१ लिंगचन्द्रार्कयोर्बिंबं भारती जाह्नवी गुरुः । रक्ताध्यितरणं युद्धे जयोऽनलसमर्चनम् ॥ शिखिहंसरथांगाढ्ये रथे स्थानं च मोहनम् ॥ आरोहणं सारसस्य धराळाभश्च निम्नगा ॥ प्रासादः स्यंदनः पद्मं छत्रं कन्या द्रुमः फली ॥ नागो द्वीपी हयः पुष्पं वृषभोश्वश्च पर्वतः ॥ सुरावटा ग्रहास्तारा नारी सूर्योदयो ध्वराः ॥ हर्म्यशैलविमानानामारोहो गगने गमः ॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम् ॥ दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥ सिंहः सिंहासनं शंखो व दिव्ये रोचनादिभिः ॥ चंदनं दर्पणश्चैषां स्वप्ने वै दर्शनं शुभम ॥ तैलाभ्यक्तः कृष्णवर्णो नग्नो नागतवापसौ ॥ शुष्क कंटकिवृक्षश्च चांडालो दीर्घकेश्वरः ॥ प्रासादस्तलहीनश्च नैते स्वप्ने शुभावहाः ॥ इति स्वयं स्वप्नं विचारयेत ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रामाद्बहिः नैर्ऋत्यकोणे जनवर्जिते देशे उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरः प्रावृत्य मलमोचनं कृत्वा मृत्तिकया जलेन यथासंख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गंडूषं च कृत्वा दंतधावनं कुर्यात॥ तथा च॥ आम्रचंपकापामार्गान्यतमं द्वादशांगुलं दंतकाष्ठं गृहीत्वा प्रार्थयेत ॥ " ॐ आयुर्बलं यशो वर्चः प्रजापशुधनानि च ॥ श्रियं प्रज्ञां च मेधां च त्वंनो देहि वनस्पते ॥ १ ॥" इति संप्रार्थ्य । ॐ "ह्रीं तडित्स्वाहा" इति मंत्रेण काष्ठं छित्वा "ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः" इत्यनेन दंतान् संशोध्य ऐं बीजेन जिह्वामुल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्ऋत्यां शुद्धदेशे निःक्षिपेत ॥ ततो मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्यात् ॥ तथा च तात्कालिकोद्धृतोदकेनोष्णोदकेन वा स्नानं कृत्वा न तु पर्युषितशीतोदकेन ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत ॥ तत्र मंत्रः ॥ "ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥ १॥ आवाहयामि त्वां देवि स्नानार्थमिह सुंदरि ॥ एहि गंगे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥ २ ॥" इति तीर्थान्यावाह्य ॥ "ॐ ऋतं च सत्यं०" इति मंत्रेणाभिमंत्र्य वरुणमंत्रेण स्नात्वा शुष्कं शुभ्रं कर्पासोत्पन्नरक्तवस्त्रं परिधाय सूर्यायार्घ्यं दद्यात ॥ तत्र मंत्रः । "ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते॥ १॥" इत्यर्घ्यं दत्वा स्नायिवस्त्रं परिपीड्य आचम्य नित्यनैमित्तिकं समाप्य शैवं पंचत्रिपुंड्रं वैष्णवं द्वादशोर्ध्वपुंड्रं तिलकं कुर्यात ॥ ततः पूजागृहद्वारमागत्य मूलेन अस्त्राय फडिति द्वारं संप्रोक्ष्य दक्षिणशाखायाम । ॐ गं गणपतये नमः ॥ १ ॥ ॐ दुं दुर्गायै नमः ॥ २ ॥ वामशाखायाम् ॐ वं वटुकाय नमः ॥ ३ ॥ ॐ क्षं क्षेत्रपालाय नमः ॥ ४ ॥ द्वारोपरि ॐ सं सरस्वत्यै नमः ॥ ५ ॥ देहल्याम् ॐ सुदर्शनायास्त्राय फट् ॥ ६ ॥ इति द्वारपूजां कृत्वा जपस्थाने गत्वा "ॐ गृहीतस्यास्य मंत्रस्य पुरश्चरण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिद्धये॥मयेयं गृह्यते भूमिर्मंत्रोयं सिद्धयतामिति॥ १॥" इति मंत्रेण भूमिं संगृह्य अश्वत्थोदुंबरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दश कीलान् "ॐ नमः सुदर्शनायास्त्राय फट्" इति मंत्रेणाष्टोत्तरशताभिमंत्रितान् "ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः ॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धये ॥ १ ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥२॥" इति मंत्रद्वयेन दशदिक्षु दश कीलान् निखनेत् ॥ ततश्च "ॐ सुदर्शनायास्त्राय फट्" इति मंत्रेण प्रत्येककीलं संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिलोकपालानावाह्य पंचोपचारैः संपूज्य जपस्थानमध्ये गणेशकूर्मानंतवसुधाक्षेत्रपालांश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालगणपतिभ्यश्च बलिं दत्त्वा तद्बाह्ये भूतबलिं दद्यात् ॥ तत्र मंत्रः ॥ "ॐ ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ॥ १ ॥ भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः ॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमं बलिम ॥ २ ॥" इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दत्त्वा वामकरांगुलिभिरर्घ्यजलेनोत्सृज्य पुष्पांजलिं गृहीत्वा "ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ संतोषमासाद्य व्रजंतु सर्वे क्षमंतु नान्यत्र नमोस्तु तेभ्यः ॥ १ ॥" इति पठित्वा पुष्पांजलिं दत्त्वा प्रणम्य हस्तौ पादौ प्रक्षाल्याचमेत ॥ ततः "ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ १ ॥" इति मंत्रेण मंडपांतरं संप्रोक्ष्य तत्र तावदासनभूमौ कूर्मशोधनं कार्यम् ॥ यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य तत्रैव जपं दीपस्थापनं च कुर्यात् ॥ यत्र बहवो जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत्॥ इति कूर्मशोधनं विधाय तत्रासनाधो जलादिना त्रिकोणं कृत्वा तत्र "ॐ कूर्माय नमः॥ १॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः॥ २॥ ॐ पृथिव्यै नमः ॥ ३॥" इति गंधाक्षतपुष्पैः संपूज्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदुपरि कुशासनं १ तदुपरि मृगाजिनं २ तदुपरि कम्बलाद्यासनं ३ केवलकुशासनं वा आस्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण "ॐ अनन्ताय नमः१ ॐ विमलासनाय नमः२ ॐ पद्मासनाय नमः३" इति मंत्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् ॥ एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वोपविश्यासनं शोधयेत ॥ तत्र मंत्रः ॥ ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता । सुतलश्छन्दः । आसने विनियोगः॥ "ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥१॥" इति मंत्रेणासनं प्रोक्ष्य मूलेन शिखां बद्ध्वा "ॐ केशवाय नमः ॥१॥ ॐ नारायणाय नमः ॥२॥ ॐ माधवाय नमः॥ ३॥" इति त्रिराचम्य प्राणायामं कुर्यात ॥ तथा च । दक्षिणहस्तांगुष्ठेन दक्षनासापुटं निरुध्य वामनासापुटेन मूलं षोडशवारं जपन् शनैःशनैः प्राणाख्यवायुमाकृष्य शिरसि सहस्रारे धारयेदिति पूरकः ॥ १ ॥ पुनः दक्षहस्तानामिकातर्जन्यंगुष्ठैर्नासापुटद्वयं निरुध्य मूलं चतुःषष्टिवारं जपन् कुंभयेत् ॥ २ ॥ पुनर्दक्षनासापुटांगुष्ठनिरोधनं त्यक्त्वा मूलं द्वात्रिंशद्वारं जपञ्छनैः शनैस्तद्वायुं रेचयेत ॥ ३ ॥ एवमेव प्राणायामजपं कृत्वा देशकालौ संकीर्त्यामुकगोत्रः श्रीअमुकदेवशर्मा श्रीहनुमद्देवताया अमुकमंत्रसिद्धिप्रतिबंधकाशेषदुरितक्षयपूर्वकामुकमंत्रसिद्धिकामः इयतसंख्याजपतद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनरूपपुरश्चरणं (केवलजपरूपपुरश्चरणं वा) अहं करिष्ये इति संकल्प्य "ॐ सुदर्शनायास्त्राय फट्" इति तालत्रयेण दिग्बंधनं कृत्वा भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासंश्च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा प्रयोगोक्तन्यासादिकं कुर्यात् ॥ अथ पीठपूजाप्रयोगः ॥ पीठादौ रचिते सर्वतोभद्रमण्डले मंडूकादिपरतत्त्वांतपीठदेवताः स्थापयेत ॥ तथा च वामभागे श्रीगुरवे नमः ॥१॥ दक्षिणे गणपतये नमः॥२॥ मध्ये स्वेष्टदेवतायै नमः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३ ॥ इति नत्वा पुष्पाक्षतानादाय पीठमध्ये ॐ मं मंडूकाय नमः ॥ १ ॥ ॐ कं कालाग्निरुद्राय नमः ॥ २ ॥ ॐ अं आधार शक्त्यै नमः ॥ ३ ॥ ॐ कूं कूर्माय नमः ॥ ४ ॥ ॐ अं अनन्ताय नमः ॥ ५ ॥ ॐ पृं पृथिव्यै नमः ॥ ६ ॥ ॐ क्षीं क्षीरसागराय नमः ॥ ७ ॥ ॐ रं रत्नद्वीपाय नमः ॥८॥ ॐ रं रत्नमंडपाय नमः ॥ ९ ॥ ॐ कं कल्पवृक्षाय नमः ॥ १० ॥ ॐ रं रत्नवेदिकायै नमः ॥ ११ ॥ ॐ रं रत्नसिंहासनाय नमः ॥ १२ ॥ आग्नेय्याम् ॐ धं धर्माय नमः ॥ १३ ॥ नैर्ऋत्याम् ॐ ज्ञां ज्ञानाय नमः ॥ १४ ॥ वायव्ये ॐ वैं वैराग्याय नमः ॥ १५ ॥ ऐशान्ये ॐ ऐं ऐश्वर्याय नमः ॥ १६ ॥ पूर्वे ॐ अं अधर्माय नमः ॥१७॥ दक्षिणे ॐ अं अज्ञानाय नमः ॥ १८ ॥ पश्चिमे ॐ अं अवैराग्याय नमः ॥ १९ ॥ उत्तरे ॐ अं अनैश्वर्याय नमः ॥ २० ॥ पुनः पीठमध्ये । ॐ आं आनन्दकंदाय नमः ॥ २१ ॥ ॐ सं संविन्नालाय नमः ॥२२॥ ॐ सं सर्वतत्त्वकमलासनाय नमः॥२३॥ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः ॥२४॥ ॐ विं विकारमयकेसरेभ्यो नमः ॥२५॥ ॐ पं पंचाशद्वर्णाढ्यकर्णिकाभ्यो नमः ॥ २६ ॥ ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः ॥ २७ ॥ ॐ सों सोममंडलाय षोडशकलात्मने नमः ॥ २८ ॥ ॐ वं वह्निमंडलाय दश कलात्मने नमः ॥ २९ ॥ ॐ सं सत्त्वाय नमः ॥ ३० ॥ ॐ रं रजसे नमः ॥ ३१ ॥ ॐ तं तमसे नमः ॥ ३२ ॥ ॐ आं आत्मने नमः ॥ ३३ ॥ ॐ पं परमात्मने नमः ॥ ३४ ॥ ॐ अं अंतरात्मने नमः ॥ ३५ ॥ ॐ ह्रीं ज्ञानात्मने नमः ॥ ३६ ॥ ॐ मं मायातत्त्वाय नमः ॥ ३७ ॥ ॐ कं कलातत्त्वाय नमः ॥ ३८ ॥ ॐ विं वियातत्त्वाय नमः ॥ ३९ ॥ ॐ पं परतत्त्वाय नमः ॥ ४० ॥ इति पीठदेवताः संस्थाप्य प्रयोगोक्तनवपीठशक्तीः पूजयेत ॥ अथ शंखस्थापनप्रयोगः ॥ देववामतः त्रिकोणमंडलं

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृत्वा जलेन प्रोक्ष्य त्रिकोण।तर्मायां (ह्रीं) विलिख्य "ॐ ह्रीं आधारशक्त्यै नमः" इति संपूज्य मूलेन त्रिपदाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य "ॐ मं वह्निमंडलाय दशकलात्मने शंखपात्रासनाय नमः ॥" इत्याधारं संपूजयेत ॥ ततः "ॐ क्रीं महाजलचराय हुँ फट् स्वाहा पांचजन्याय नमः॥" इति मंत्रेण क्षालितं शंखमाधारोपरि संस्थाप्य "ॐ अं सूर्यमंडलाय द्वादशकलात्मने शंखपात्राय नमः" इति शंखं पूजयेत॥ततो मूलेन 'नमः' इति शंखे जलमापूर्य "ॐ मों सोममंडलाय षोडशकलात्मने शंखपात्रामृताय नमः" इति गंधादिभिः संपूज्याभिमंत्रयेत ॥ तत्र मंत्रः ॥ "ॐ शंखादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैवमग्रे गंगा सरस्वती ॥ १ ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत् ॥ २॥" इत्यभिमंत्र्य प्रार्थयेत ॥ तत्र मंत्रः॥ "ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते॥" इति संप्रार्थ्य ॥ "ॐ पांचजन्याय विद्महे पावमानाय धीमहि ॥तन्नः शंखः प्रचोदयात ॥" इति शंखगायत्रीमष्टधा जपित्वा शंखमुद्रां प्रदर्शयेत॥ इति शंखस्थापनम् ॥ अथ घंटा स्थापनप्रयोगः ॥ देवदक्षिणतः घंटां संस्थाप्य नादं कृत्वा पूजयेत ॥ तथा च । "ॐ भूर्भुवः स्वः गरुडाय नमः" आवाहयामि सर्वोपचारार्थं गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ इत्यवाह्य "ॐ जगद्ध्वने मंत्रमातः स्वाहा" इति मंत्रेण घंटास्थितगरुडं घंटां च संपूज्य गरुडमुद्रां प्रदर्शयेत् ॥ इति घंटां संस्थाप्य गंधाक्षतपुष्पादींश्च पूजोपकरणार्थं स्वदक्षिणपार्श्वे निधाय मूलेन नमः इति जलेन प्रोक्ष्य जलार्थं बृहत्पात्रं छत्रादर्शचामराणि च स्ववामे संस्थापयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य आसनमंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य देशकालौ संकीर्त्य मम

For Private And Personal Use Only

श्रीहनुमद्देवतानूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठां करिष्ये । इति संकल्प्य प्रतिष्ठां च कुर्यात् ॥ तथा च ॥ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः। ऋग्यजुःसामानि च्छंदांसि । क्रियामयवपुःप्राणाख्या देवता । आँ बीजम् । ह्रीं शक्तिः। क्रौं कीलम् । अस्य नूतनयंत्रे मूर्तौ वा प्राणप्रतिष्ठापने विनियोगः॥ इति जलं भूमौ क्षिप्त्वा करेणाच्छाद्य ॐ ओं ह्रीं क्रौं यँरँलँवँशँषँसँहंसः सोहं अस्य हनुमद्देवतासपरिवारयंत्रस्य प्राणा इह प्राणाः ॥ १ ॥ पुनः ॐ आँ ह्रीं क्रौं यँरँलँवँशँषँसँहंसः सोहं अस्य हनुमद्देवतासपरिवारयंत्रस्य जीव इह स्थितः ॥२॥ पुनः ॐ आँ ह्रीं क्रौं यँरँलँवँशँषँसँहंसः सोहं अस्य हनुमद्देवतासपरिवारयंत्रस्य सर्वेन्द्रियाणि इह स्थितानि ॥ ३ ॥ पुनः ॐ आँ ह्रीं क्रौं यँरँलँवँशँषँसँहंसः सोहं अस्य हनुमद्देवतासपरिवारयंत्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥४॥इति प्राणान् प्रतिष्ठाप्य"यःप्राणतो निमिषतोमहित्वेविधेम इति मन"इति त्रिवारं पठेत्॥ततःॐ मनोजूतिर्जुषता सुप्रतिष्ठा प्रतिष्ठा ॥ इत्युक्त्वा संस्कारसिद्ध्यै पंचदशप्रणवावृत्तीः कृत्वा अनेन श्रीहनुमद्देवतासपरिवारयंत्रस्य गर्भाधाना दिपंचदशसंस्कारान्संपादयामि नमः॥ इति वदेत् । ततः "यंत्रराजाय विद्महे महायंत्राय धीमहि ॥ तन्नो यंत्रः प्रचोदयात्" इत्यष्टोत्तरशतवारमभिमंत्र्य मूलदेवतां ध्यात्वा आवाहनादिपुष्पांतैरुपचारैः पूजयेत् ॥ अथावाहनादिपूजनम् ॥ अक्षतानादाय "ॐ देवेश भक्तिसुलभ परिवारसमन्वित॥ यावत्त्वां पूजयिष्यामि तावद्देव इहावह ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीहनुमते नमः इहागच्छ इह तिष्ठ एवं सर्वत्र ॥ इत्यावाहनम् ॥१॥ "ॐ अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यद्यपूर्णं भवेत्कृत्यं तदाप्यभिमुखो भव॥ १ ॥" मू० ॐ भू० श्रीहनुमते नमः इह सम्मुखो भव इति संम्मुखीकरणम् ॥ २ ॥ "ॐ यस्य दर्शनमिच्छंन्ति देवाः स्वाभीष्टसिद्धये ॥ तस्मै ते

For Private And Personal Use Only

परमेशाय स्वागतंस्वागतं च ते ॥ १ ॥" मू० ॐ भू० श्रीहनुमते नमः सुस्वागतं समर्पयामि ॥ इति सुस्वागतम् ॥ १ ॥
"ॐ देवदेव महाराज प्रियेश्वर प्रजापते ॥ आसनं दिव्यमीशान दास्येहं परमेश्वर ॥ १ ॥" मूलं पठित्वा ॐ भू० श्रीहनुमते नमः
आसनं समर्पयामि ॥ इत्यासनम् ॥ ४ ॥ इत्यासनं दत्त्वा करौ बद्ध्वा प्रार्थयेत् ॥ "ॐ स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः॥प्राकृतं
त्वमदृष्ट्वा मां बालवत्परिपालय ॥ १ ॥" मू० ॐ भ० श्रीहनुमते नमः प्रार्थनां समर्पयामि नमस्करोमि ॥ इति प्रार्थयित्वा पाद्यादि
पूजनं कुर्यात् ॥ अथ पाद्यादिपूजनम् ॥ "ॐ यद्भक्तिलेशसंपर्कात्परमानंदसंभवः ॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पये ॥१॥"
मू० ॐ भू० श्रीहनुमते नमः पाद्यं समर्पयामि । इति पाद्यम् ॥ १ ॥ "ॐ देवानामपि देवाय देवानां देवतात्मने ॥ आचामं कल्पयामी
श शुद्धानां शुद्धिहेतवे ॥ १ ॥" मू० ॐ भ० श्रीहनुमते नमः आचमनं समर्पयामि । इत्याचमनम् ॥ २ ॥ "ॐ तापत्रयहरं
दिव्यं परमानन्दलक्षणम् ॥ तापत्रयविमोक्षाय तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥ इत्यर्घोदकेनार्घ्यं दत्त्वा श्रीहनुमते नमः अर्घ्यं स०
इति वदेत् । इत्यर्घ्यम् ॥ ३ ॥ "ॐ सर्वकालुष्यहीनाय परिपूर्णसुखात्मने ॥ मधुपर्कमिदं देव कल्पयामि प्रसीद मे ॥ १ ॥" मू०
ॐ भ०श्रीहनुमते नमः मधुपर्कं समर्पयामि ॥ इति सर्वत्र । इति मधुपर्कः ॥ ४ ॥ "ॐ उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥१॥" इति पुनराचमनीयम् ॥ ५ ॥ "ॐ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः ॥ स्नापि
तोऽसि मया देव तथा शांतिं कुरुष्व मे ॥ १ ॥" इति स्नानम् ॥ ६ ॥ "ॐ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ॥ मयैवापादि
ते तुभ्यं वाससी प्रतिगृह्यताम् ॥ १ ॥ इति रक्तवस्त्रे ॥ ७ ॥ "ॐ नवभिस्तंतुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं चोत्तरीयं गृहाण

For Private And Personal Use Only

परमेश्वर ॥ १ ॥" इति यज्ञोपवीतम् ॥ ८ ॥ "ॐ स्वभावसुंदरांगाय सत्यासत्याश्रयाय ते ॥ भूषणानि विचित्राणि कल्पयामि सुरार्चित ॥ १ ॥" दक्षहस्तांगुष्ठस्पृष्टानामिकात्मिकया मुद्रया भूषणानि दद्यात् ॥ इत्याभूषणम् ॥ ९. ॥ "ॐ श्रीखण्डं चंदनं दिव्यं गंधाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ १ ॥" अंगुष्ठौ कनिष्ठामूललग्नौ गंधमुद्रा ॥ १० ॥ "ॐ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः ॥ मया निवेदिता भक्त्या गृहाण परमेश्वर ॥ १ ॥" सर्वांगुलीभिर्दद्यात् । इत्यक्षताः ॥ ११ ॥ "ॐ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥ १ ॥" तर्जन्यंगुष्ठमूललग्ने पुष्पमुद्रा इति पुष्पम् ॥ १२ ॥ इति पुष्पांतं पूजयित्वा प्रयोगोक्तावरणपूजां च कृत्वा धूपादिपूजनं कुर्यात् ॥ अथ धूपादिपूजनम् ॥ 'फडिति' धूपपात्रं संप्रोक्ष्य मूलेन नमः इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय (रँ) इति वह्निबीजेनाग्निं संस्थाप्य तदुपरि मूलेन दशांगं दत्त्वा घंटां वादयन् । "ॐ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥ १ ॥" मू० ॐ भू० सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीहनुमते नमः धूपं समर्पयामि । इति पठित्वा नाभिदेशे धूपयित्वा देवस्य वामभागे धूपपात्रं निधाय शंखजलं चोत्सृज्य तर्जनीमूलांगुष्ठयोगे धूपमुद्रा तां प्रदर्शयेत् । इति धूपः ॥ १ ॥ ततः दीपपात्रं गोघृतेनापूर्य मंत्राक्षरतंतुभिर्वर्तिं निक्षिप्य (ॐ) इति प्रणवेन प्रज्वाल्य घंटां वादयन् नेत्रादिपादपर्यंतं दीपं प्रदर्शयेत्॥ "ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः॥ सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यताम्॥ १ ॥" मू० ॐ भू० सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीहनुमते नमः दीपं समर्पयामि । इति पठित्वा देवस्य दक्षिणभागे दीपपात्रं निधाय ततः शंखजलमुत्सृज्य मध्यमांगुष्ठलग्ने दीपमुद्रा तां प्रदर्शयेत् । इति दीपः ॥ २ ॥ ततो

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवस्याग्रे देवदक्षिणतो वा जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादिभोजनपात्रं संस्थाप्य तन्मध्ये षड्रसोपेतं विविधप्रकारं मोदकं वा निधाय मूलेन संप्रोक्ष्याधोमुखदक्षिणहस्तोपरि तादृशं वामहस्तं निधाय नैवेद्येनाच्छाद्य (ॐ यँ) इति वायुबीजेन षोडशधा संजप्य वायुना तद्गतदोषान् संशोष्य ततो दक्षिणकरतलं तत्पृष्ठलग्नवामकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ रं) इति वह्निबीजेन षोडशवारं संजप्य तदुत्थाग्निना तद्दोषं दग्ध्वा ततो वामकरतले (ॐ वँ) इति अमृतबीजं विचिन्त्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ वँ) इति सुधाबीजं षोडशवारं संजप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य देवस्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा "ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ॥ निवेदयामि देवेश सानुगाय गृहाण तत् ॥१॥" मू० ॐ भू० सांगाय सपरिवाराय सवाहनाय सायुधाय श्रीहनुमते नमः नैवेद्यं समर्पयामि इति भूतले देवदक्षिणे जलं क्षिप्त्वा वामहस्तेन अनामामूलयोरंगुष्ठयोगे ग्रासमुद्रातां प्रदर्श्य देवं भुक्तवन्तं विभाव्य जलं दद्यात् । इति नैवेद्यम् ॥ ३ ॥ "ॐ नमस्ते देवदेवेश सर्वतृप्तिकरं वरम् ॥ परमानंदपूर्ण त्वं गृहाण जलमुत्तमम् ॥" इति जलम् ॥४॥ॐ "उच्छिष्टोप्यशुचिर्वापि यस्य स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ॥" इत्याचमनम् ॥ ५ ॥ इत्याचमनं दत्वा मूलेन गंडूषार्थं जलं च दद्यात् ॥६॥ " ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिकैर्युक्तं तांबूलं प्रतिगृह्यताम् ॥" इति तांबूलम् ॥७॥ "ॐ इदं फलं मया देव स्थापितं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ " इति फलम् ॥ ८ ॥ "ॐ कदलीगर्भसंभूतं कर्पूरं च प्रदीपितम् ॥ आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥" इति कर्पूरम् ॥ ९ ॥ " ॐ यानि कानि च पापानि जन्मांतरकृतानि वै ॥

For Private And Personal Use Only

तानि सर्वाणि नश्यंतु प्रदक्षिणपदेपदे ॥ इति तिस्रः प्रदक्षिणाः कृत्वा " ॐ प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥" इति वदन् साष्टांगं प्रणमेत् ॥ १० ॥ "ॐ नानासुगंधिपुष्पाणि यथाकालोद्भवानि च ॥ पुष्पांजलिं मया दत्तं गृहाण परमेश्वर ॥ १ ॥" इति पुष्पांजलिः ॥ ११ ॥ इति पुष्पांजलिं दत्त्वा ततःस्तुतिपाठेन स्तुत्वा बद्धाजलिपूर्वकं प्रार्थयेत् ॥ तथा च । "ॐ ज्ञानतोऽज्ञानतो वाऽथ यन्मया क्रियते विभो ॥ मम कृत्य मिदं सर्वमिति देव क्षमस्व मे ॥ १ ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोयमिति मां मत्वा क्षमस्व परमेश्वर ॥ २ ॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोपरः सहतां लोके केवलं स्वामिनं विना ॥ ३ ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयिजातापराधानां त्वमेव शरणं प्रभो ॥ ४ ॥" इति बद्धांजलिपूर्वकं संप्रार्थ्य " ॐ यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं च नैवेद्यं गृहाण मानुकंपय ॥ १ ॥" इति पठित्वा देवस्य दक्षिणकरे पूजार्पणजलं दद्यात् ॥ ततो मालामादाय सर्वदेवोपयोगि पद्धतिमार्गेण मालायाः संस्कारान् कृत्वा अशक्तश्चेत् " ॐ ह्रीं मालेमाले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ १ ॥" इति मालां संप्रार्थ्य । " ॐ अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा " इति मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् यथाशक्ति मूलमंत्रं जपेत् ॥ नित्यशः समाना एव जपाः कार्या न तु न्यूनाधिकाः। ततो जपांते "ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा ॥ तेन सत्येन सिद्धिं मे देहि मातर्नमोस्तु ते ॥ १ ॥" "ॐ ह्रीं सिद्ध्यै नमः" इति मालां शिरसि निधाय गोमुखीरहस्ये स्थापयेत् ॥ नाशुचिः स्पर्शयेत् ॥ नान्यं दद्यात् ॥ अशुचिस्थाने न निधापयेत् ॥ स्वयोनिवत् गुप्तां

कुर्यात् ॥ ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनर्मूलमंत्रोक्तन्यासादिकं च कृत्वा पंचोपचारैः संपूज्य पुष्पांजलिं च दत्त्वा जपार्पणं कुर्यात ॥ तथा च । शंखोदकेन चुलुकमादाय ॥ " ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ १ ॥" ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मदीयं च सकलं श्रीहनुमद्देवतायै समर्पयामि॥ "ॐ तत्सत् इति ब्रह्मार्पणं भवतु ॥ इति देव दक्षिणकरे जलसमर्पणं कृत्वा कृतांजलिपूर्वकं क्षमापनं पठेत् ॥ तथा च " ॐ. आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्यो गतिर्मम ॥ अंतश्चरेण भूतानि द्रष्टस्त्वं परमेश्वर ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन क्षमस्व परमेश्वर॥५॥प्रातर्योनिसहस्राणां सहस्रेषु व्रजाम्यहम् ॥ तेषु तेष्व चला भक्तिरच्युतेस्तु सदा त्वयि ॥६॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्या च तव दर्शनात्॥७॥देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवं जपति सर्वत्र यो देवः सोहमेव हि ॥ ८ ॥ क्षमस्व देवदेवेश क्षम्यते भुवनेश्वर ॥ तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे ॥९॥" इति कृतांजलिः प्रार्थयित्वा शंखजलमुद्धृत्य देवोपरिभ्रामयित्वा "साधु वा साधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहणाराधनं मम ॥ १ ॥" इत्युच्चरन् देवस्य दक्षिणहस्ते किंचिज्जलं दत्त्वा प्रागवदर्घ्यं देवशिरसि दत्त्वा शंखं यथास्थाने निवेश

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येत् ॥ ततो गतसारनैवेद्यं देवस्योच्छिष्टं शिरसि धृत्वा नैवेद्यादिकं देवभक्तेषु विभज्य स्वयं भुक्त्वा विसर्जनं कुर्यात् ॥ तथा च "ॐ गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर ॥ पूजाराधनकाले च पुनरागमनाय च ॥ १ ॥" इत्यक्षतान्निक्षिप्य विसर्जनं कृत्वा "ॐ तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि ॥ १ ॥" इति हृदयकमले हस्तं दत्त्वा देवं स्वहृदये संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् । एवमेवविधिना जपं समाप्य सर्वदेवोपयोगिपद्धतिमार्गेण तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ इति हनुमत्पूजापद्धतिः समाप्ता ॥

अथ पंचमुखीहनुमत्कवचप्रारंभः ॥ श्रीपार्वत्युवाच ॥ सदाशिव वरस्वामिन्ज्ञानद प्रियकारक ॥ कवचादि मया सर्वं देवानां संश्रुतं प्रिय ॥ १ ॥ इदानीं श्रोतुमिच्छामि कवचं करुणानिधे ॥ वायुसूनोर्वरं येन नान्यदन्वेषितं भवेत् ॥ साधकानां च सर्वस्वं हनुमत्प्रीतिवर्द्धनम् ॥ २ ॥ श्रीशिव उवाच ॥ देवेशि दीर्घनयने दीक्षादीनकलेवरे ॥ मां पृच्छसि वरारोहे न कस्यापि मयोदितम् ॥ ३ ॥ कथं वाच्यं हनुमतः कवचं कल्पपादपम् ॥ स्त्रीरूपा त्वमिदं नानाकूटमंडितविग्रहम् ॥ ४ ॥ गह्वरं गुरुगम्यं च यत्र कुत्र वदिष्यसि ॥ तेन प्रत्युत पापानि जायंते गजगामिनि ॥ ५ ॥ अत एव महेशानि नो वाच्यं कवचं प्रिये ॥ ६ ॥ श्रीपार्वत्युवाच ॥ वदान्यस्य वचो नेदं नादेयं जगतीतले ॥ त्वं वदान्यावधिः प्राणनाथो मे प्रियकृत्सदा ॥७॥ मह्यं च किं न दत्तं ते तदिदानीं वदाम्यहम् ॥ गणपं शाक्तं सौरे च शैवं वैष्णवमुत्तमम् ॥ ८ ॥ मंत्रयंत्रादिजालं हि मह्यं सामान्यतस्त्वया ॥ दत्तं विशेषतो यद्यत्सर्वं कथयामि ते ॥ ९ ॥ श्रीराम तारको मंत्रः कोदण्डस्यापि मे प्रियः॥ नृहरेः सामराजो हि कालिकायाः प्रियंवद ॥ १० ॥ दशविद्याविशेषेण षोडशीमंत्रनायिकाः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणामूर्तिसंज्ञोऽन्यो मंत्रराजो धरापते ॥ ११ ॥ सहस्रार्जुनकस्यापि मंत्रा येऽन्ये हनूमतः ॥ ये ते ह्यदेया देवेश तेऽपि मह्यं सम
र्पिताः ॥ १२ ॥ किं बहूक्तेन गिरिश प्रेमयंत्रितचेतसा ॥ अर्धाङ्गमपि मह्यं ते दत्तं किं ते वदाम्यहम् ॥ स्त्रीरूपं मम जीवेश पूर्वं तु न
विचारितम् ॥ १३ ॥ श्रीशिव उवाच ॥ सत्यंसत्यं वरारोहे सर्वं दत्तं मया तव ॥ परं तु गिरिजे तुभ्यं कथ्यते शृणु सांप्रतम् ॥ १४॥
कलौ पाखण्डबहुला नानावेषधरा नराः ॥ ज्ञानहीना लुब्धकाश्च वर्णाश्रमबहिष्कृताः ॥ १५ ॥ वैष्णवत्वेन विख्याताः शैवत्वेन वरा
नने ॥ शाक्तत्वेन च देवेशि सौरत्वेनेतरे जनाः ॥ १६ ॥ गाणपत्वेन गिरिजे शास्त्रज्ञानबहिष्कृताः ॥ गुरुत्वेन समाख्याता विचारिष्यं
ति भूतले ॥१७॥ ते शिष्यसंग्रहं कर्तुमुद्युक्ता यत्र कुत्रचित् ॥ मंत्राद्युच्चारणे तेषां नास्ति सामर्थ्यमम्बिके ॥१८॥ तच्छिष्याणां च गि
रिजे तथापि जगतीतले ॥ पठंति पाठयिष्यंति विप्रद्वेषपराः सदा ॥१९॥ द्विजद्वेषपराणां हि नरके पतनं ध्रुवम् ॥ प्रकृतं वच्मि गिरि
जे यन्मया पूर्वमीरितम् ॥ २० ॥ नानारूपमिदं नानाकूटमण्डितविग्रहम् ॥ तत्रोत्तरं महेशानि शृणु यत्नेन साम्प्रतम् ॥ २१ ॥
तुभ्यं मया यदा देवि वक्तव्यं कवचं शुभम् ॥ नानाकूटमयं पश्चात्त्वयाऽपि प्रेमतः प्रिये ॥ २२ ॥ वक्तव्यं कुत्रचित्तत्तु भुवने विचारि
ष्यति ॥ भुवनांतःपतितां भद्रे यदि पुण्यवतां सताम् ॥२३॥ सत्सम्प्रदायशुद्धानां दीक्षामंत्रवतां प्रिये ॥ब्राह्मणाः क्षत्रिया वैश्या विशेषेण
वरानने ॥ २४ ॥ उच्चारणे समर्थानां शास्त्रनिष्ठावतां सदा ॥ हस्तागतं भवेद्भद्रे तदा ते पुण्यमुत्तमम् ॥२५॥ अन्यथा शूद्रजातीनां पूर्वो
क्तानां महेश्वरि॥मुखशुद्धिविहीनानां दांभिकानां सुरेश्वरि॥२६॥यदा हस्तगतं तत्स्यात्तदा पापं महत्तव ॥ तस्माद्विचार्य देवेशि ह्यधिका
रिणमम्बिके ॥ २७ ॥ वक्तव्यं नात्र सन्देहो नान्यथा निरयं व्रजेत् ॥ किं कर्तव्यं मया तुभ्यमुच्यते प्रेमतः प्रिये ॥ त्वयापीदं विशेषेण

॥२१६॥

For Private And Personal Use Only

गोपनीयं स्वयोनिवत् ॥ २८ ॥ पाठः ॥ ॐ श्रीपञ्चवदनायाञ्जनेयाय नमः॥ ॐ अस्य श्रीपंचमुखहनुमन्मंत्रस्य ब्रह्मा ऋषिः। गायत्री छंदः। पंचमुखविराड्हनुमान्देवता। ह्रीं बीजम्॥श्रीं शक्तिः। क्रौं कीलकम्। क्रूं कवचम्। क्रैं अस्त्राय फट्। इति दिग्बंधः ॥ श्रीगरुड उवाच ॥ अथ ध्यानं प्रवक्ष्यामि शृणु सर्वाङ्गसुंदरि ॥ यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥ १ ॥ अथ ध्यानम् ॥ पंचवक्त्रं महाभीमं त्रिपंचनयनैर्युतम् ॥ बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥ १ ॥ पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ॥ दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् ॥ २ ॥ अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ॥ अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥ ३ ॥ पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम् ॥ सर्वनागप्रशमनं विषभूतादिकृंतनम् ॥ ४ ॥ उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् ॥ पातालसिंहवेतालज्वररोगादिकृंतनम् ॥ ५ ॥ ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम् ॥ येन वक्त्रेण विप्रेन्द्र तारकाख्यं महासुरम् ॥ ६ ॥ जघान शरणं तत्स्यात्सर्वशत्रुहरं परम् ॥ ध्यायेत्पंचमुखं रुद्रं हनुमंतं दयानिधिम् ॥ ७ ॥ खड्गं त्रिशूलं खट्वाङ्गं पाशमंकुशपर्वतम् ॥ मुष्टिंकौमोदकीं वृक्षं धारयंतं कमण्डलुम् ॥८॥ भिन्दिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगव ॥ एतान्यायुधजालानि धारयंतं भजाम्यहम् ॥ ९ ॥ प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ॥ दिव्यमालांबरधरं दिव्यगंधानुलेपनम् ॥ १० ॥ सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम्॥ ११॥पञ्चास्यमच्युतमनेकविचित्रवर्णं वक्त्रं शशांकशिखरं कपिराजवर्यम् ॥ पीताम्बरादिमुकुटैरुपशोभिताङ्गं पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥ १२ ॥ मर्कटेश महोत्साह सर्वशत्रुहरः परः ॥ शत्रुं संहर मां रक्ष श्रीमन्नापद उद्धर ॥ १३ ॥ ॐ हरिमर्कटमर्कटमंत्रमिमं परिलिख्यतिलिख्यति वामतले ॥ यदि नश्यतिनश्यति शत्रुकुलं यदि मुंचतिमुंचति वामलता

For Private And Personal Use Only

॥ १४ ॥ इति ध्यात्वा कवचं पठेत् ॥ ॐ हरिमर्कटमर्कटाय स्वाहा ॥ १ ॥ ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रु संहारणाय स्वाहा ॥२॥ ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतमथनाय स्वाहा ॥ ३ ॥ ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा ॥ ४ ॥ ॐ नमो भगवते पंचवदनायोत्तरमुखायादिव राहाय सकलसम्पत्कराय स्वाहा ॥५॥ ॐ नमो भगवते पंचवदनायोर्द्धमुखाय हयग्रीवाय सकलजनवशंकराय स्वाहा ॥६॥ ॐ अस्य श्रीपंच मुखहनुमन्मंत्रस्य श्रीरामचन्द्र ऋषिः । अनुष्टुप्छन्दः । पञ्चमुखवीरहनुमान्देवता । हनुमानिति बीजम् ॥ वायुपुत्र इति शक्तिः । अंजनी सुत इति कीलकम् । श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ॥ ॐ रामचन्द्रऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप्छन्दसे नमः मुखे ॥ २ ॥ पञ्चमुखवीरहनुमद्देवतायै नमः हृदि ॥ ३ ॥ हनुमानिति बीजाय नमः गुह्ये ॥ ४ ॥ वायुपुत्र इति शक्त्ये नमः पादयोः ॥ ५ ॥ अंजनीसुत इति कीलकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वाङ्गे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंजनीसुताय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ रुद्रमूर्तये तर्जनीभ्यां नमः ॥ २ ॥ ॐ वायुपुत्राय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ अग्निगर्भाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ रामदूताय कनिष्ठिकाभ्यां नमः ॥५॥ ॐ पंचमुखहनुमते करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः॥ ॐ अंजनीसुताय हृदयाय नमः ॥ १ ॥ ॐ रुद्रमूर्तये शिरसे स्वाहा ॥ २ ॥ ॐ वायुपुत्राय शिखायै वषट् ॥ ३ ॥ ॐ अग्निगर्भाय कवचाय हुम् ॥ ४ ॥ ॐ रामदूताय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ पंचमुखहनुमतेऽस्त्राय फट् ॥ ६ ॥ ॐ पंचमुखहनुमते स्वाहा ॥ इति दिग्बंधः ॥ इति षडंगन्यासः ॥ एवं न्यासं कृत्वा पुनर्ध्यायेत ॥ अथ ध्यानम् ॥ वन्दे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रा

For Private And Personal Use Only

न्वितं दिव्यालंकरणं त्रिपंचनयनं देदीप्यमानं रुचा ॥ हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भाकुशाद्रीन् हलं खट्वांगं फणिभूरुहं दशभुजं सर्वा रिवीरापहम् ॥ १ ॥ ॐ रामदूतायाञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लंकादहनकारणाय महाबलप्रचण्डाय फाल्गुनसखाय कोलाहलसकलब्रह्माण्डविश्वरूपाय सप्तसमुद्रनीरालंघनाय पिङ्गलनयनायामितविक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिबर्हणाय दृष्टिनिरालंकृताय सञ्जीविनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय फाल्गुनमहासखाय सीतासहितरामवरप्रदाय षट्प्रयोगागमपञ्चमुखवीरहनुमन्मन्त्रजपे विनियोगः ॥ ॐ हरिमर्कटमर्कटाय वँवँवँवँवँवौषट् स्वाहा ॥ १ ॥ ॐ हरिमर्कटमर्कटाय फँफँफँफँफँ फट् स्वाहा ॥२॥ ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखेंमारणाय स्वाहा ॥३॥ ॐ हरिमर्कटमर्कटाय लुँलुँलुँलुँलुँ आकर्षितसकलसम्पत्कराय स्वाहा ॥४॥ ॐ हरिमर्कटमर्कटाय धँधँधँधँधँशत्रुस्तंभनाय स्वाहा ॥ ५ ॥ हरिमर्कटमर्कटाय ठँठँठँठँठँ कूर्ममूर्तये पञ्चमुखवीरहनुमते परयंत्रपरतंत्रोच्चाटनाय स्वाहा ॥ ६ ॥ ॐ कँखँगँघँङँचँछँजँझँञँटँठँडँढँणँतँथँदँधँनँपँफँबँभँमँयँरँलँवँशँषँसँहँलँक्षँस्वाहा ॥ इति दिग्बंधः ॥ ७ ॥ ॐ पूर्वकपिमुखाय पंचमुखहनुमते ठँठँठँठँठँ सकलशत्रुसंहारणाय स्वाहा ॥ ८ ॥ ॐ दक्षिणमुखाय पंचमुखहनुमते करालवदनाय नरसिंहाय ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः सकलभूतप्रेतदमनाय स्वाहा ॥ ९ ॥ ॐ पश्चिममुखाय गरुडाननाय पंचमुखहनुमते मँमँमँमँमँ सकलविषहराय स्वाहा ॥ १० ॥ ॐ उत्तरमुखायादिवराहाय लँलँलँलँलँ नृसिंहाय नीलकण्ठमूर्तये पञ्चमुखहनुमते स्वाहा ॥ ११ ॥ ॐ ऊर्ध्वमुखाय हयग्रीवाय रुँरुँरुँरुँरुँ रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा ॥ १२ ॥ ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय श्रीरामचन्द्रकृपापादुकाय महावीर्यप्रमथनाय ब्रह्माण्डनाथाय कामदाय पंचमुखवीरहनुमते स्वाहा ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूतप्रेतपिशाचब्रह्मराक्षसशाकिनीडाकिन्यन्तरिक्षग्रहपरयंत्रपरतंत्रोच्चाटनाय स्वाहा ॥ सकलप्रयोजननिर्वाहकाय पंचमुखवीरहनुमते श्रीरामचन्द्रवरप्रदाय जँजँजँजँजँ स्वाहा ॥ १३ ॥ इदं कवचं पठित्वा तु महाकवचं पठेन्नरः ॥ एकवारं जपेत्स्तोत्रं सर्वशत्रुनिवारणम् ॥ १ ॥ द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् ॥ त्रिवारं च पठेन्नित्यं सर्वसम्पत्करं शुभम् ॥ २ ॥ चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ॥ पंचवारं पठेन्नित्यं सर्वलोकवशंकरम् ॥ ३ ॥ षड्वारं च पठेन्नित्यं सर्वदेववशंकरम् ॥ सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥ ४ ॥ अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम् ॥ नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ॥ ५ ॥ दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ॥ रुद्रावृत्तीः पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवम् ॥ ६ ॥ कवचस्मरणेनैव महाबलमवाप्नुयात् ॥ ७ ॥ इति श्रीसुदर्शनसंहितायां श्रीरामचंद्रसीताप्रोक्तं श्रीपञ्चमुखहनुमत्कवचं सम्पूर्णम्॥एकमुखहनुमत्कवचं षट्कवचीप्रयोगे मिश्रतरंगे ज्ञेयम् ॥ अथैकादशमुखहनुमत्कवचम् ॥ लोपामुद्रोवाच ॥ कुम्भोद्भव दयासिंधो श्रुतं हनुमतः परम् ॥ यंत्रमंत्रादिकं सर्वं त्वन्मुखोदीरितं मया ॥ १ ॥ दयां कुरु मयि प्राणनाथ वेदितुमुत्सहे ॥ कवचं वायुपुत्रस्य एकादशमुखात्मनः ॥ २ ॥ इत्येवं वचनं श्रुत्वा प्रियायाः प्रश्रयान्वितम् ॥ वक्तुं प्रचक्रमे तत्र लोपामुद्राप्रतिः प्रभुः ॥ ३ ॥ अगस्त्य उवाच ॥ नमस्कृत्वा रामदूतं हनुमंतं महामतिम् ॥ ब्रह्मप्रोक्तं तु कवचं शृणु सुन्दरि सादरम् ॥ ४ ॥ सनन्दनाय सुमहच्चतुराननभाषितम् ॥ कवचं कामदं दिव्यं सर्वरक्षोनिबर्हणम् ॥ ५ ॥ सर्वसम्पत्प्रदं पुण्यं मर्त्यानां मधुरस्वरे ॥ ६ ॥ ॐ अस्य श्रीमदेकादशमुखहनुमत्कवचस्य सनन्दन ऋषिः । अनुष्टुप्छंदः। प्रसन्नात्मा हनुमान्देवता । वायुपुत्रेति बीजम् । मुख्यः प्राण इति शक्तिः । सर्वकामार्थसिद्ध्यर्थे जपे विनियोगः ॥ ॐ स्फें बीजं शक्तिधृक् पातु शिरो मे पवनात्मजः ॥ क्रौं बीजात्मा

For Private And Personal Use Only

नयनयोः पातु मां वानरेश्वरः ॥ १ ॥ क्षंबीजरूपी कर्णौ मे सीताशोकविनाशनः ॥ ग्लौंबीजवाच्यो नासां मे लक्ष्मणप्राणदायकः ॥ २ ॥
वं बीजार्थश्च कण्ठं मे पातु चाक्षय्यकारकः ॥ ऐंबीजवाच्यो हृदयं पातु मे कपिनायकः ॥ ३ ॥ वंबीजकीर्तितः पातु बाहू मे चाञ्जनीसुतः ॥
ह्रां बीजो राक्षसेन्द्रस्य दर्पहा पातु चोदरम् ॥ ४ ॥ ह्सौंबीजमयो मध्यं पातु लंकाविदाहकः ॥ ह्रींबीजधरो मां पातु गुह्यं देवेन्द्रवंदितः ॥ ५ ॥
रंबीजात्मा सदा पातु चोरुवारिधिलंघनः ॥ सुग्रीवसचिवः पातु जानुनी मे मनोजवः ॥ ६ ॥ पादौ पादतले पातु द्रोणाचलधरो हरिः ॥
आपादमस्तकं पातु रामदूतो महाबलः ॥ ७ ॥ पूर्वे वानरवक्त्रो मामाग्नेय्यां क्षत्रियान्तकृत् ॥ दक्षिणे नारसिंहस्तु नैर्ऋत्यां गणनायकः
॥ ८ ॥ वारुण्यां दिशि मामव्यात्खगवक्त्रो हरीश्वरः ॥ वायव्यां भैरवमुखः कौबेर्यां पातु मां सदा ॥ ९ ॥ क्रोडास्यः पातु मां नित्यमी
शान्यां रुद्ररूपधृक् ॥ ऊर्ध्वं हयाननः पातु त्वधः शेषमुखस्तथा ॥ १० ॥ रामास्यः पातु सर्वत्र सौम्यरूपी महाभुजः ॥ इत्येवं राम
दूतस्य कवचं प्रपठेत्सदा ॥ ११ ॥ एकादशमुखस्यैतद् गोप्यं वै कीर्तितं मया ॥ रक्षोघ्नं कामदं सौम्यं सर्वसम्पद्विधायकम् ॥ १२ ॥
पुत्रदं धनदं चोग्रशत्रुसंघविमर्दनम् ॥ स्वर्गापवर्गदं दिव्यं चिंतितार्थप्रदं शुभम् ॥ १३ ॥ एतत्कवचमज्ञात्वा मंत्रसिद्धिर्न जायते ॥
चत्वारिंशत्सहस्राणि पठेच्छुद्धात्मना नरः ॥ १४ ॥ एकवारं पठेन्नित्यं कवचं सिद्धिदं पुमान् ॥ द्विवारं वा त्रिवारं वा पठन्नायुष्यमाप्नुयात् ॥
॥ १५ ॥ क्रमादेकादशादेवमावर्तनजपात्सुधीः ॥ वर्षान्ते दर्शनं साक्षाल्लभते नात्र संशयः ॥ १६ ॥ यं यं चिंतयते चार्थं तं तं प्राप्नोति पूरुषः ॥
ब्रह्मोदीरितमेतद्धि तवाग्रे कथितं महत् ॥ १७ ॥ इत्येवमुक्त्वा वचनं महर्षिस्तूष्णीं बभूवेन्दुमुखीं निरीक्ष्य ॥ संहृष्टचेताऽपि तदा तदीय
पादौ ननामातिमुदा स्वभर्तुः ॥ १८ ॥ इति श्रीअगस्त्यसारसंहितायामेकादशमुखहनुमत्कवचं सम्पूर्णम् ॥ अथ श्रीरामप्रोक्तहनुमत्कवच

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रारंभः ॥ ॐ अस्य श्रीहनुमत्कवचस्य श्रीरामचन्द्र ऋषिः । अनुष्टुप्छंदः । श्रीहनुमान्देवता । मारुतात्मजेति बीजम् । अंजनीसूनुरिति शक्तिः । आत्मनः इति कीलकम् । सकलकार्यसिद्ध्यर्थे जपे विनियोगः ॥ ॐ श्रीरामचन्द्रऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ श्रीहनुमद्देवतायै नमः हृदि ॥ ३ ॥ मारुतात्मजेति बीजाय नमः गुह्ये ॥ ४ ॥ अंजनीसूनुरिति शक्तये नमः पादयोः ॥ ५ ॥ आत्मनः इति कीलकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ हनुमते अंगुष्ठाभ्यां नमः ॥ १ ॥ पवनात्मजाय तर्जनीभ्यां नमः ॥ २ ॥ अक्षघ्नाय मध्यमाभ्यां नमः ॥ ३ ॥ विष्णुभक्ताय अनामिकाभ्यां नमः ॥ ४ ॥ लङ्काविदाहकाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ श्रीरामकिंकराय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ हनुमते हृदयाय नमः ॥ १ ॥ पवनात्मजाय शिरसे स्वाहा ॥ २ ॥ अक्षघ्नाय शिखायै वषट् ॥ ३ ॥ विष्णुभक्ताय कवचाय हुम् ॥ ४ ॥ लंकाविदाहकाय नेत्रत्रयाय वौषट् ॥ ५ ॥ श्रीरामकिंकराय अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं देवेन्द्रप्रमुखैः प्रशंसियशसं देदीप्यमानं रुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीताम्बरालंकृतम् ॥ १ ॥ वज्राङ्गं पिङ्गकेशाढ्यं स्वर्णकुंडलमंडितम् ॥ नियुद्धमुपसंक्रम्य पारावारपराक्रमम् ॥ २ ॥ वामहस्ते गदायुक्तं पाशहस्तं कमण्डलुम् ॥ ऊर्ध्वदक्षिणदोर्दण्डं हनूमंतं विचिंतयेत ॥३॥ स्फटिकाभं स्वर्णकांतिं द्विभुजं च कृताञ्जलिम् ॥ कुंडलद्वयसंशोभिमुखाम्बुजहरिं भजेत् ॥४॥ हनुमान्पूर्वतः पातु दक्षिणे पवनात्मजः॥ पातु प्रतीच्यामक्षघ्नः पातु सागरपारगः ॥ ५ ॥ उदीच्यामूर्ध्वगः पातु केसरीप्रियनन्दनः ॥ अधस्ताद्विष्णुभक्तश्च पातु मध्ये च पावनिः ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवांतरदिशः पातु सीताशोकविनाशनः।। लंकाविदाहकः पातु सर्वापद्भ्यो निरंतरम् ॥ ७ ॥ सुग्रीवसचिवः पातु मस्तकं वायुनंदनः ॥ भालं पातु महावीरो भ्रुवोर्मध्ये निरंतरम् ।। ८ ।। नेत्रे छायापहारी च पातु नः प्लवगेश्वरः ।। कपोलौ कर्णमूले च पातु श्रीरामकिंकरः ।। ९ ।। नासाग्रमंजनीसूनुः पातु वक्त्रं कपीश्वरः ।। पातु कंठं च दैत्यारिः स्कंधौ पातु सुरार्चितः ।। १० ।। भुजौ पातु महातेजाः करौ तु चरणायुधः ।। नखान्नखायुधः पातु कुक्षौ पातु कपीश्वरः ।। ११ ।। वक्षो मुद्रापहारी च पार्श्वे पातु भुजायुधः ।। लंकाविभंजकः पातु पृष्ठे देशे निरंतरम् ।। १२ ।। नाभिं च रामदूतस्थ कटिं पात्वनिलात्मजः ।। गुह्यं पातु कपीशस्तु गुल्फौ पातु महाबलः ॥ १३ ॥ अचलोद्धारकः पातु पादौ भास्करसन्निभः ॥ अङ्गान्यमितसत्त्वाढ्यः पातु पादांगुलीः सदा ॥ १४ ॥ सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान् ॥ हनुमत्कवचं यस्तु पठेद्विद्वान्विचक्षणः ॥ १५ ॥ स एव पुरुषश्रेष्ठो भुक्तिं मुक्तिं च विंदति ॥ त्रिकालमेककालं वा पठेन्मासत्रयं पुनः ॥ १६ ॥ सर्वारिष्टं क्षणे जित्वा स पुमाञ्छ्रियमाप्नुयात ॥ अर्धरात्रे जले स्थित्वा सप्तवारं पठेयदि ॥ १७ ॥ क्षयापस्मारकुष्ठादितापज्वरनिवारणम् ॥ अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान् ॥ १८ ॥ स एव जयमाप्नोति संग्रामेष्वभयं तथा ॥ यः करे धारयेन्नित्यं सर्वान्कामानवाप्नुयात् ॥ १९ ॥ लिखित्वा पूजयेयस्तु तस्य ग्रहभयं हरेत् ॥ कारागृहे प्रयाणे च संग्रामे देशविप्लवे ॥ २० ॥ यः पठेद्धनुमत्कवचं तस्य नास्ति भयं तथा ॥ २१ ॥ यो वारांनिधिमल्पपल्वलमिवोल्लंघ्य प्रतापान्वितो वैदेहीघनतापशोकहरणो वैकुण्ठभक्तप्रियः ॥ अक्षाद्यर्जितराक्षसेश्वरमहादर्पापहारी रणे सोऽयं वानरपुङ्गवोऽवतु सदा चास्मान्समीरात्मजः ॥ २२ ॥ इति श्रीब्रह्माण्डपुराणे अगस्त्यनारदसंवादे श्रीरामचन्द्रप्रोक्तं हनुमत्कवचं सम्पूर्णम् ॥ अथ हनुमत्सहस्रनामस्तो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रप्रारंभः ॥ ऋषय ऊचुः ॥ ऋषे लोहगिरिं प्रामः सीताविरहकातरः ॥ भगवान् किं व्यधाद्रामस्तत्सर्वं ब्रूहि सत्वरम् ॥ १ ॥ वाल्मीकिरुवाच ॥ मायामानुषदेहोयं ददर्शाग्रे कपीश्वरम् ॥ हनुमंतं जगत्स्वामी बालार्कसमतेजसम् ॥२॥ स सत्वरं समागम्य साष्टाङ्गं प्रणिपत्य च ॥ कृताञ्जलिपुटो भूत्वा हनुमान् रामसब्रवीत् ॥३॥ श्रीहनुमानुवाच ॥ धन्योस्मि कृतकृत्योऽस्मि दृष्ट्वा त्वत्पादपंकजम् ॥ योगिनामप्यगम्यं च संसारभयनाशनम् ॥ ४ ॥ पुरुषोत्तम देवेश कर्तव्यं तन्निवेद्यताम् ॥ श्रीराम उवाच ॥ जनस्थानं कपिश्रेष्ठ कोऽप्यागत्य विदेहजाम् ॥ ५ ॥ हृतवान्विप्रसंवेषो मारीचानुगते मयि ॥ गवेष्यः साम्प्रतं वीर जानकीहरणे परः ॥ ६ ॥ त्वयागम्यो न को देशस्त्वं च ज्ञानवतां वरः ॥ सप्तकोटिमहामंत्रमंत्रितावयवः प्रभुः ॥ ७ ॥ ऋषय ऊचुः ॥ को मंत्रः किं च तद्ध्यानं तन्नो ब्रूहि यथार्थतः ॥ तथा सुधारसं पीत्वा न तृप्यामः परंतपः ॥ ८ ॥ वाल्मीकिरुवाच ॥ मंत्रं हनुमतो विद्धि भुक्तिमुक्तिप्रदायकम् ॥ महारिष्टमहापापमहादुःखनिवारणम् ॥ ९ ॥ "ॐ ऐं ह्रीं हनुमते रामदूताय लंकाविध्वंसनायाञ्जनीगर्भसंभूताय शाकिनीडाकिनीध्वंसनाय किलिकिलिबुबुकारेण विभीषणाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रौं फट् स्वाहा ॥" अन्यं हनुमतो मंत्रं सहस्रनामसंज्ञकम् ॥ जानंति ऋषयः सर्वे महादुरितनाशनम् ॥ १० ॥ अस्य संस्मरणात्सीता लब्धा राज्यमकण्टकम् ॥ विभीषणाय च ददावात्मनं लब्धवान्मया ॥ ११ ॥ ऋषय ऊचुः ॥ सहस्रनामसन्मंत्रं दुःखाघौघनिवारणम् ॥ वाल्मीके ब्रूहि नस्तूर्णं शुश्रयामः कथां पराम् ॥ १२ ॥ वाल्मीकिरुवाच ॥ शृण्वंतु ऋषयः सर्वे सहस्रनामकं स्तवम् ॥ स्तवानामुत्तमं दिव्यं सदर्थस्य प्रदायकम् ॥१३॥ अथ पाठः॥ॐ अस्य श्रीहनुमत्सहस्रनामस्तोत्रमंत्रस्य श्रीरामचन्द्र ऋषिः । अनुष्टुप्छन्दः । श्रीहनुमन्महारुद्रो देवता ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्रींश्रींह्रौंह्रां बीजम् । श्रीं इति शक्तिः । किलिकिलि बुबुकारेणेति कीलकम् ॥ लंकाविध्वंसनेति कवचम् ॥ मम सर्वोपद्रवशांत्यर्थे सर्वकर्मसिद्ध्यर्थे पाठे विनियोगः ॥ श्रीरामचन्द्रऋषये नमः । शिरशि ॥ १ ॥ अनुष्टुप्छन्दसे नमः मुखे ॥ २ ॥ श्रीहनुमन्महारुद्र देवतायै नमः हृदि ॥ ३ ॥ ह्रींश्रींह्रौं ह्रां बीजाय नमः गुह्ये ॥ ४ ॥ श्रीं इति शक्तये नमः पादयोः ॥५॥ किलिकिलि बुबुकारेणेति कीलकाय नमः नाभौ ॥ ६ ॥ लंकाविध्वंसनेति कवचाय नमः बाहुद्वये ॥ ७ ॥ विनियोगाय नमः सर्वांगे ॥ ८ ॥ इति ऋष्यादि न्यासः ॥ ॐ ऐं हनुमते अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ लंकाविध्वंसनाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ अञ्जनीगर्भसम्भूताय मध्यमाभ्यां नमः ॥३॥ ॐ शाकिनीडाकिनीविध्वंसनाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ किलिकिलि बुबुकारेण विभीषणाय हनुमद्देवाय कनिष्ठिकाभ्या नमः॥ ५ ॥ ॐ ह्रींश्रींह्रौंह्रां फट् स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ हनुमते हृदयाय नमः ॥ १ ॥ ॐ लंकाविध्वंसनाय शिरसे स्वाहा ॥ २ ॥ ॐ अंजनीगर्भसंभूताय शिखायै वषट् ॥ ३ ॥ ॐ शाकिनीडाकिनीविध्वंसनाय कवचाय हुम् ॥४ ॥ ॐ किलिकिलि बुबुकारेण विभीषणाय हनुमद्देवाय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रींश्रींह्रौंह्रां फट् स्वाहा अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ प्रतप्तस्वर्णवर्णाभं संरक्तारुणलोचनम् ॥ सुग्रीवादियुतं ध्यायेत्पीताम्बरसमावृतम् ॥ १४ ॥ गोष्पदीकृतवारीशं पुच्छमस्तकमीश्वरम् ॥ ज्ञानमुद्रां च बिभ्राणं सर्वालंकारभूषितम् ॥ १५ ॥ श्रीरामचन्द्र उवाच ॥ ॐ हनुमाञ्श्रीपदो वायुपुत्रोरुद्रोअघोऽजरः ॥ अमृत्युर्वीरवीरश्चग्रामवासोजनाश्रयः ॥ १६ ॥ धनदो निर्गुणः कायो वीरोनिधिपतिर्मुनिः ॥ पिंगाक्षोवरदो वाग्मीसीताशोकविनाशनः ॥ १७ ॥ शिवः सर्वः परोऽव्यक्तोव्यक्ताव्यक्तोरसाधरः ॥ पिंगरोमःपिंगकेशःश्रुतिगम्यः सनातनः ॥ १८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनादिर्भगवान्देवोविश्वहेतुर्निरामयः ॥ आरोग्यकर्ताविश्वेशोविश्वनाथोहरीश्वरः ॥ १९ ॥ भर्गोरामोरामभक्तःकल्याणप्रकृतिःस्थिरः ॥
विश्वंभरोविश्वमूर्तिर्विश्वाकारोऽथविश्वदः॥ २० ॥विश्वात्माविश्वसेव्योऽथविश्वोविश्वहरोरविः॥ विश्वचेष्टोविश्वगम्योविश्वध्येयः कलाधरः
॥ २१ ॥ प्लवंगमःकपिश्रेष्ठोज्येष्ठोविद्यावनेचरः ॥ बालोवृद्धोयुवातत्त्वंतत्त्वगम्यउदाग्रजः ॥२२॥ अंजनीसूनुरव्यग्रोग्रामख्यातोधराधरः॥
भूर्भुवःस्वर्महर्लोकोजनलोकस्तपोऽव्ययः ॥ २३ ॥ सत्यमोंकारगम्यश्चप्रणवोव्यापकोऽमलः ॥ शिवधर्मप्रतिष्ठातारामेष्टःफाल्गुनप्रियः
॥ २४ ॥ गोष्पदीकृतवारीशिःपूर्णकामोधरापतिः ॥ रक्षोघ्नः पुण्डरीकाक्षःशरणागतवत्सलः ॥ २५ ॥ जानकीप्राणदाताचरक्षःप्राणा
पहारकः ॥ पूर्णःसत्यःपीतवासादिवाकरसमप्रभः ॥ २६ ॥ देवोद्यानविहारीचदेवताभयभंजनः ॥ भक्तोदयोभक्तलब्धोभक्तपालनतत्परः
॥ २७ ॥ द्रोणहर्ताशक्तिनेताशक्तिराक्षसमारकः ॥ रक्षोघ्नोरामदूतश्चशाकिनीजीवहारकः॥ २८ ॥ बुबुकारहतारातिर्गर्वपर्वतमर्दनः ॥
हेतुस्त्वहेतुःप्रांशुश्चविश्वभर्ताजगद्गुरुः ॥ २९ ॥ जगन्नेताजगन्नाथोजगदीशोजनेश्वरः ॥ जगद्धितोहरिःश्रीशोगरुडस्मयभंजनः ॥३०॥
पार्थध्वजोवायुपुत्रोऽमितपुच्छोऽमितप्रभः ॥ ब्रह्मपुच्छःपरब्रह्मपुच्छोरामेष्ट एव च ॥३१॥ सुग्रीवादियुतोज्ञानीवानरोवानरेश्वरः ॥ कल्प
स्थायीचिरंजीवीप्रसन्नश्चसदाशिवः ॥ ३२ ॥ सन्नतः सद्गतिर्भक्तिमुक्तिदःकीर्तिनायकः॥कीर्तिःकीर्तिप्रदश्चैवसमुद्रःश्रीपदःशिवः॥ ३३॥
भक्तोदयोभक्तगम्योभक्तभाग्यप्रदायकः ॥ उदधिक्रमणोदेवः संसारभयनाशकः॥ ३४॥ बलिबन्धनकृद्विश्वजेताविश्वप्रतिष्ठितः ॥ लंकारिः
कालपुरुषोलंकेशगृहभञ्जनः ॥३५॥ भूतावासोवासुदेवोवसुस्त्रिभुवनेश्वरः ॥ श्रीरामरूपः कृष्णस्तुलंकाप्रासादभञ्जकः ॥ ३६ ॥ कृष्णः
कृष्णस्तुतः शांतः शांतिदोविश्वपावनः ॥ विश्वभोक्ताऽथमारघ्नोब्रह्मचारीजितेन्द्रियः ॥३७॥ ऊर्द्धगोलांगुलीमालीलांगूलाहतराक्षसः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समीरतनुजोवीरोवीरमारोजयप्रदः ॥ ३८ ॥ जगन्मंगलदः पुण्यः पुण्यश्रवणकीर्तनः ॥ पुण्यकीर्तिः पुण्यगतिः जगत्पावनपावनः
॥ ३९ ॥ देवेशोजितमारोऽथरामभक्तिविधायकः ॥ ध्याताध्येयोभगः साक्षीचेताचैतन्यविग्रहः ॥ ४० ॥ ज्ञानदः प्राणदः प्राणोजग
त्प्राणसमीरणः ॥ विभीषणप्रियः शूरः पिप्पलायनसिद्धिदः ॥ ४१ ॥ सिद्धिः सिद्धाश्रयः कालः कालभक्षकभञ्जनः ॥ लंकेशनि
धनस्थायीलंकादाहकईश्वरः ॥४२॥ चन्द्रसूर्याग्निनेत्रश्चकालाग्निः प्रलयांतकः ॥ कपिलः कपिशः पुण्यराशिर्द्वादशराशिगः॥ ४३ ॥
सर्वाश्रयोऽप्रमेयात्मारेवत्यादिनिवारकः ॥ लक्ष्मणप्राणदाताचसीताजीवनहेतुकः ॥ ४४ ॥ रामध्येयोहृषीकेशोविष्णुभक्तोजटीबलिः ॥
देवारिदर्पहाहोताधाताकर्ताजगत्प्रभुः ॥४५॥ नगरग्रामपालश्चशुद्धोबुद्धोनिरंतरः ॥ निरंजनोनिर्विकल्पोगुणातीतोभयंकरः ॥ ४६ ॥
हनुमंतोदुराराध्यस्तपःसाध्योमहेश्वरः ॥ जानकीघनशोकोत्थतापहर्तापरात्परः ॥ ४७ ॥ वाङ्मयः सदसद्रूपकारणं प्रकृतेः परः ॥
भाग्यदोनिर्मलोनेतापुच्छलंकाविदाहकः ॥ ४८ ॥ पुच्छबद्धयातुधानोयातुधानरिपुप्रियः ॥ छायापहारीभूतेशोलोकेशः सद्गतिप्रदः
॥४९॥ प्लवंगमेश्वरः क्रोधः क्रोधसंरक्तलोचनः ॥ सौम्योगुरुः काव्यकर्ताभक्तानांचवरप्रदः ॥५० ॥ भक्तानुकम्पीविश्वेशः पुरुहूतः
पुरन्दरः ॥ क्रोधहर्तातापहर्ताभक्ताऽभयवरप्रदः ॥५१॥ अग्निर्विभावसुर्भानुर्यमोनिर्ऋतिरेवच ॥ वरुणोवायुगतिमान् वायुः कुबेरईश्वरः
॥५२॥ रविश्चन्द्रः कुजः सौम्योगुरुः काव्यः शनैश्चरः॥ राहुः केतुर्मरुद्दाताधर्ताहर्तासमीरजः॥५३॥ मशकीकृतदेवारिर्दैत्यारिर्मधुसूदनः
कामः कपिः कामपालः कपिलोविश्वजीवनः ॥५४॥भागीरथीपदाम्भोजः सेतुबन्धविशारदः ॥ स्वाहास्वधाहविःकव्यहव्यवाहप्रकाशकः
॥५५॥ स्वप्रकाशोमहावीरोलघुरमितविक्रमः ॥ प्रडीनोड्डीनगतिमान्सद्गतिः पुरुषोत्तमः ॥५६॥ जगदात्माजगद्योनिर्जगदंतोह्यनंतकः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिपाप्मानिष्कलंकोऽथमहात्माहृदयंकृतिः ॥५७॥ खंवायुः पृथिवीरामोवह्निर्दिक्पालएवच ॥ क्षेत्रज्ञः क्षेत्रहर्ताचपल्वलीकृतसागरः
॥५८॥ हिरण्मयः पुराणश्चखेचरोभूचरोमनुः ॥ हिरण्यगर्भः सूत्रात्माराजराजोनिशांपतिः ॥५९॥ वेदांतवेद्यउद्गीथोवेदवेदांगपारगः॥
प्रतिग्रामस्थितिः सद्यः स्फूर्तिदातागुणाकरः ॥६०॥ नक्षत्रमालीभूतात्मासुरभिः कल्पपादपः ॥ चिंतामणिर्गुणनिधिः प्रजाधारोह्यनुत्तमः
॥६१॥ पुण्यश्लोकः पुरारातिर्ज्योतिष्मान्शर्वरीपतिः॥ किलिकिलिरावसंत्रस्तभूतप्रेतपिशाचकः ॥६२॥ ऋणत्रयहरः सूक्ष्मः स्थूलः सर्व
गतिः पुमान् ॥ अपस्मारहरः स्मर्ताश्रुतिर्गाथास्मृतिर्मनुः ॥६३॥ स्वर्गद्वारप्रजाद्वारमोक्षद्वारपतीश्वरः ॥ नादरूपः परंब्रह्मब्रह्मब्रह्मपुरातनः
॥६४॥ एकोऽनेकोजनः शुक्लः स्वयंज्योतिरनाकुलः॥ ज्योतिर्ज्योतिरनादिश्चसात्विकोराजसस्तमः ॥६५॥ तमोहर्तानिरालम्बोनिराहा
रोगुणाकरः॥ गुणाश्रयोगुणमयोबृहत्कर्माबृहद्यशाः ॥ ६६ ॥ बृहद्धनुर्बृहत्पादोबृहन्मूर्धाबृहत्स्वनः ॥ बृहत्कायोबृहन्नासोबृहद्बाहुर्बृहत्तनुः
॥६७॥ बृहद्यत्नोबृहत्कामोबृहत्पुच्छोबृहत्करः ॥ बृहद्गतिर्बृहत्सेव्योबृहल्लोकफलप्रदः॥६८॥ बृहच्छक्तिर्बृहद्वाञ्छाफलदोबृहदीश्वरः॥
बृहल्लोकनुतोद्रष्टाविद्यादाताजगद्गुरुः ॥ ६९ ॥ देवाचार्यः सत्यवादीब्रह्मवादीकलाधरः ॥ सप्तपातालगामीचमलयाचलसंश्रयः ॥७०॥
उत्तराशास्थितः श्रीदोदिव्यौषधिवशः खगः॥शाखामृगः कपीन्द्रोऽथ पुराणः प्राणचंचुरः॥७१॥ चतुरोब्राह्मणोयोगीयोगगम्यःपरावर ॥
अनादिनिधिदोव्यासोवैकुण्ठः पृथिवीपतिः ॥७२॥ अपराजितोजितारातिः सदानन्दोगिरीशजः॥ गोपालीगोपतिर्योद्धाकलिकालपरात्परः
॥७३॥ मनोवेगीसदायोगीसंसारभयनाशनः ॥ तत्त्वदाताऽथतत्त्वज्ञस्तत्त्वंतत्त्वप्रकाशकः॥७४॥ शुद्धोबुद्धोनित्ययुक्तोभक्तराजोजगद्रथः॥
प्रलयोऽमितमायश्चमायातीतोविमत्सरः ॥ ७५ ॥ मायाभर्जितरक्षाश्चमायानिर्मितविष्टपः ॥ मायाश्रयश्चनिर्लेपोमायानिर्वर्तकः सुखम्

For Private And Personal Use Only

॥७६॥ सुखीसुखप्रदोनागोमहेशकृतसंस्तवः ॥ महेश्वरः सत्यसंधः शरभः कलिपावनः ॥७७॥ रसोरसज्ञः संमानोरूपंचक्षुः श्रुतिः
रवः ॥ घ्राणोगंधः स्पर्शनंचस्पर्शोऽहंकारमानगः ॥ ७८ ॥ नेतिनेतीतिगम्यश्चवैकुण्ठभजनप्रियः ॥ गिरीशोगिरिजाकांतोदुर्वासाः
कविरंगिराः ॥७९॥ भृगुर्वसिष्ठश्च्यवनोनारदस्तुम्बरुर्बलः ॥ विश्वक्षेत्रोविश्वबीजोविश्वनेत्रश्चविश्वपः ॥८०॥ याजकोयजमानश्चपावकः
पितरस्तथा ॥ श्रद्धाबुद्धिः क्षमातंत्रोमंत्रोमंत्रपितामुरः ॥१॥राजेन्द्रोभूपतीरुण्डमालीसंसारसारथिः॥ नित्यसम्पूर्णकामश्चभक्तकामधुगुत्तमः
॥ ८२ ॥ गणपः केशवोभ्रातापितामाताऽथमारुतिः ॥ सहस्रमूर्द्धासहस्रास्यः सहस्राक्षः सहस्रपात् ॥ ८३ ॥ कामजित्कामदहनः
कामीकामफलप्रदः ॥ मुद्रापहारीरक्षोघ्नः क्षितिभारहरोबलः ॥ ८४ ॥ नखदंष्ट्रायुधोविष्णुर्भक्ताभयवरप्रदः ॥ दर्पहादर्पदोदंष्ट्राशतमूर्ति
रमूर्तिमान् ॥८५॥ महानिधिर्महाभागोमहाभर्गोमहर्द्धिदः ॥ महाकारोमहायोगीमहातेजामहाद्युतिः ॥८६॥ महाकर्मामहानादोमहामंत्रो
महामतिः॥ महागमोमहोदारोमहादेवात्मकोविभुः॥८७॥ रुद्रकर्माकृतकर्मरत्ननाभः कृतागमः ॥ अम्भोधिलंघनः सिंहः सत्यधर्मप्रमोदनः
॥८८॥ जितामित्रोजयः सोमोविजयो वायुवाहनः ॥ जीवोधातासहस्रांशुर्मुकुन्दोभूरिदक्षिणः ॥८९॥ सिद्धार्थःसिद्धिदः सिद्धसंकल्पः
सिद्धिहेतुकः ॥ सप्तपातालचरणः सप्तर्षिगणवंदितः ॥ ९० ॥ सप्ताब्धिलंघनोवीरः सप्तद्वीपोरुमण्डलः ॥ सप्तांगराज्यसुखदः
सप्तमातृनिषेवितः ॥ ९१ ॥ सप्तस्वर्लोकमुकुटः सप्तहोत्रस्वराश्रयः ॥ सप्तच्छन्दोनिधिः सप्तच्छंदः सप्तजनाश्रयः ॥ ९२ ॥
सप्तसामोपगीतश्चसप्तपातालसंश्रयः ॥ मेधादः कीर्तिदः शोकहारीदौर्भाग्यनाशनः ॥ ९३ ॥ सर्ववश्यकरोगर्भदोषहापुत्रपौत्रदः ॥
प्रतिवादिमुखस्तंभोरुष्टचित्तप्रमादनः ॥ ९४ ॥ पराभिचारशमनो दुःखहाबन्धमोक्षदः ॥ नवद्वारपुराधारोनवद्वारनिकेतनः ॥ ९५ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नरनारायणस्तुल्योनवनाथमहेश्वरः ॥ मेखलीकवचीखड्गीभ्राजिष्णुर्जिष्णुसारथिः ॥ ९६ ॥ बहुयोजनविस्तीर्णपुच्छःपुच्छहतासुरः ॥
दुष्टग्रहनिहंताचपिशाचग्रहघातकः ॥ ९७ ॥ बालग्रहविनाशीचधर्मनेताकृपाकरः ॥ उग्रकृत्यउग्रवेगउग्रनेत्रः शतक्रतुः ॥ ९८ ॥
शतमन्युस्तुतः स्तुत्यः स्तुतिः स्तोतामहाबलः ॥ समग्रगुणशालीचव्यग्रोरक्षोविनाशनः ॥ ९९ ॥ रक्षोग्निदाहोब्रह्मेशः श्रीधरो
भक्तवत्सलः ॥ मेघनादोमेघरूपोमेघवृष्टिनिवारकः ॥ १०० ॥ मेघजीवनहेतुश्चमेघश्यामःपरात्मकः ॥ समीरतनयोयोद्धातत्त्वविद्याविशारदः
॥ १०१॥ अमोघोमोघदृष्टिश्चदिष्टदोऽरिष्टनाशनः ॥ अर्थोऽनर्थापहारीचसमर्थोरामसेवकः ॥ १०२ ॥ अर्थिवन्द्योसुरारातिःपुण्डरी
काक्षआत्मभूः ॥ संकर्षणोविशुद्धात्माविद्याराशिःसुरेश्वरः ॥ १०३ ॥ अचलोद्धारकोनित्यःसेतुकृद्रामसारथिः ॥ आनन्दःपरमानन्दो
मत्स्यःकूर्मोनिधीशयः ॥ १०४ ॥ वाराहोनारसिंहश्चवामनोजमदग्निजः ॥ रामःकृष्णःशिवोबुद्धःकल्कीरामश्चमोहनः ॥ १०५ ॥
नंदीशृंगीचचण्डीचगणेशोगणसेवितः ॥ कर्माध्यक्षःसुरारामोविश्रामोजगतीपतिः ॥ १०६ ॥ जगन्नाथःकपीशश्चसर्वावासःसदाश्रयः ॥
सुग्रीवादिस्तुतोदांतःसर्वकर्माप्लवंगमः ॥१०७॥ नखदारितरक्षाश्चनखयुद्धविशारदः ॥ कुशलःसुधनःशेषोवासुकिस्तक्षकस्तथा ॥१०८॥
स्वर्णवर्णोबलाढ्यश्चपुरजेताघनाशनः ॥ कैवल्यदीपःकैवल्योगरुडःपन्नगोगुरुः ॥ १०९ ॥ क्लिक्लिरावहतारातिर्गर्वपर्वतभेदनः ॥
वज्रांगोवज्रवज्रश्चभक्तवज्रनिवारकः ॥ ११० ॥ नखायुधोमणिग्रीवोज्वालामालीचभास्करः ॥ प्रौढप्रतापस्तपनोभक्तातापनि
वारकः ॥ १११ ॥ शरणंजीवनंभोक्तानानाचेष्टोऽथचंचलः ॥ स्वस्थस्त्वस्वास्थ्यहादुःखशातनः पवनात्मजः ॥ ११२ ॥
पावनःपवनःकांतोभक्तागःसहनोबली ॥ मेघनादरिपुर्मेघनादसंहतराक्षसः ॥ ११३ ॥ क्षरोऽक्षरोविनीतात्मावानरेशःसतांगतिः ॥ श्री

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कण्ठःशितिकण्ठश्चसहायोऽहनायकः ॥ ११४ ॥ अरकूलस्स्वनगुर्भगोदिव्यःसंभूतिनाशनः ॥ अध्यात्मविद्यामारध्याध्यात्मकुशलः
सुधीः ॥ ११५॥ अकल्मषःसत्यहेतुःसत्यदःसत्यगोचरः॥ सत्यगर्भःसत्यरूपःसत्यःसत्यपराक्रमः ॥ ११६ ॥ अंजनीप्राणलिंगश्चवायु
वंशोद्भहःश्रुतिः॥ भद्ररूपोरुद्ररूपःसुरूपश्चित्ररूपधृक् ॥ ११७ ॥ मैनाकवंदितःसूक्ष्मदर्शनोविजयोऽजयः ॥ क्रांतदिङ्मण्डलोरुद्रःप्रकटी
कृतं विक्रमः ॥ ११८ ॥ कंबुकण्ठःप्रसन्नात्माह्रस्वनासोवृकोदरः॥लंबोष्ठःकुण्डलीचित्रमालीयोगविदांवरः ॥ ११९ ॥ विपश्चित्कवि
रानन्दविग्रहोऽनल्पशासनः ॥ फल्गुनीसूनुरव्यग्रोयोगात्मायोगतत्परः ॥ १२० ॥ योगवियोगकर्ताचयोगयोनिर्दिगम्बरः ॥ अकारा
दिक्षकारांतवर्णनिर्मितविग्रहः ॥ १२१ ॥ उलूखलमुखःसिद्धसंस्तुतःप्रमथेश्वरः॥ श्लिष्टजंघःश्लिष्टजानुःश्लिष्टपाणिःशिखाधरः॥१२२॥
सुशर्माऽमितशर्माचनारायणपरायणः ॥ जिष्णुर्भविष्णूरोचिष्णुर्ग्रसिष्णुःस्थाणुरेवच ॥१२३॥ हरिरुद्रानुकृद्वृक्षकंपनोभूमिकंपनः ॥ गुण
प्रवाहःसूत्रात्मावीतरागस्तुतिप्रियः ॥ १२४ नागकन्याभयध्वंसीकृतुपर्णःकपालभृत ॥ अनुकूलोऽक्षयोऽपायो नपायोवेदपारगः ॥१२५॥
अक्षरःपुरुषोलोकनाथऋक्षप्रभुर्दृढः ॥ अष्टांगयोगफलभूःसत्यसंधःपुरुष्टुतः ॥ १२६ ॥ श्मशानस्थाननिलयःप्रेतविद्रावणक्षमः ॥
पंचाक्षरपरःपंचमातृकोरंजनध्वजः ॥ १२६ ॥ योगिनीवृन्दवंद्यश्रीःशत्रुघ्नोऽनंतविक्रमः ॥ ब्रह्मचारीन्द्रियरिपुर्धृतदण्डोदशात्मकः
॥ २२८ ॥ अप्रपंचःसदाकारःशूरसेनोविदारकः॥ वृद्धःप्रमोदआनन्दःसप्तजिह्वपतिर्धरः ॥ १२९ ॥ नवद्वारपुराधारःप्रत्यग्रःसामगाय
कः ॥ षट्चक्रधामास्वर्लोकभयहृन्मानदोमदः ॥ १३० ॥ सर्ववश्यकरःशक्तिरनंतोऽनंतमंगलः ॥ अष्टमूर्तिर्नयोपेतोविरूपःसुरसुंदरः
॥ १३० ॥ धूमकेतुर्महाकेतुः सत्यकेतुर्महारथः ॥ नन्दिप्रियःस्वतंत्रश्चमेखलीडमरुप्रियः ॥ १३२ ॥ लोहांगः सर्वविद्धन्वीखण्डलः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शर्वईश्वरः ॥ फलभुक्फलहस्तश्चसर्वकर्मफलप्रदः ॥ १३३ ॥ धर्माध्यक्षोधर्मफलोधर्मोधर्मप्रदोऽर्थदः ॥ पंचविंशतितत्त्वज्ञस्तारकोब्रह्म
तत्परः ॥ १३४ ॥ त्रिमार्गवसतिर्भीमःसर्वदुष्टनिबर्हणः ॥ ऊर्जस्वान्निष्कलःशूलीमौलिर्गर्जन्निशाचरः ॥ १३५ ॥ रक्तांबरधरोरक्तो
रक्तमालाविभूषणः ॥ वनमालीशुभांगश्चश्वेतःश्वेतांबरोयुवा ॥ १३६ ॥ जयोऽजयपरीवारःसहस्रवदनःकपिः ॥ शाकिनीडाकिनीयक्ष
रक्षोभूतप्रभंजकः ॥ १३७ ॥ सद्योजातःकामगतिर्ज्ञानमूर्तिर्यशस्करः ॥ शंभुतेजाःसार्वभौमोविष्णुभक्तःप्लवंगमः ॥ १३८ ॥ चतुर्नवति
मंत्रज्ञःपौलस्त्यबलदर्पहा ॥ सर्वलक्ष्मीप्रदः श्रीमानंगदप्रिय ईतिनुत ॥१३९॥ स्मृतिबीजंसुरेशानःसंसारभयनाशनः ॥ उत्तमःश्रीपरी
वारःश्रितरुद्रश्चकामधुक् ॥ १४० ॥ वाल्मीकिरुवाच ॥ इति नाम्नां सहस्रेण स्तुतो रामेण वायुभूः ॥ उवाच तं प्रसन्नात्मा
संधायात्मानमव्ययम्॥ १४१॥ श्रीहनुमानुवाच ॥ध्यानास्पदमिदं ब्रह्ममत्पुरःसमुपस्थितम् ॥ स्वामिन्कृपानिधेरामज्ञातोसिकपिनामया
॥ १४२ ॥ त्वद्ध्याननिरतालोकाः किंमांजपसि सादरम् ॥ तवागमनहेतुश्चज्ञातोद्यमयाऽनघ ॥ १४३ ॥ कर्तव्यंममकिंरामतथाब्रू
हिचराघव ॥ इतिप्रचोदितोरामः प्रहृष्टामेदमब्रवीत् ॥१४४॥ श्रीराम उवाच ॥ दुर्जयः खलुवैदेहीगृहीत्वाकोऽपिनिर्गतः ॥ हत्वातं
निर्घृणंवीरमानयत्वंकपीश्वर ॥ १४५ ॥ मम दास्यंकुरुसखेभवविश्वसुखंकरः ॥ तथाकृते त्वया वीर मम कार्यं भविष्यति॥ १४६ ॥
ओमित्याज्ञां तु शिरसा गृहीत्वा स कपीश्वरः ॥ विधेयं विधिवत्तत्र चकार शिरसा स्वयम् ॥ १४७ ॥ इदं नाम्नां सहस्रं तु योऽधीते
प्रत्यहं नरः ॥ दुःखौघो नश्यते तस्य सम्पत्तिर्वर्धतेऽचिरम् ॥१४८ ॥ वश्यं चतुर्विधं तस्य भवत्येव न संशयः ॥ राजानो राजपुत्राश्च ॥२२५॥
राजकीयाश्च मंत्रिणः ॥१४९॥ अश्वत्थमूले जपतां नास्ति वैरिकृतं भयम्॥त्रिकालपठनात्तस्य सिद्धिः स्यात्करसंस्थिता ॥ १५० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राह्मे मुहूर्ते चोत्थाय प्रत्यहं यः पठेन्नरः ॥ ऐहिकामुष्मिकं सोपि लभते नात्रसंशयः॥१५१॥ संग्रामे सन्निविष्टानां वैरिविद्रावणं परम् ॥ ज्वरापस्मारशमनं गुल्मादीनां निवारणम्॥१५२॥ साम्राज्यसुखसंपत्तिदायकं जायते नृणाम् ॥ स्वर्गं मोक्षं समाप्नोति रामचन्द्रप्रसादतः ॥ १५३ ॥ य इदं पठते नित्यं श्रावयेद्वा समाहितः ॥ सर्वान्कामानवाप्नोति वायुपुत्रप्रसादतः ॥ १५४ ॥ इति ब्रह्माण्डपुराणे उत्तरखंडे श्रीरामकृतं हनुमत्सहस्रनामस्तोत्रं संपूर्णम्॥ अथ हनुमत्स्तोत्रप्रारम्भः॥ हनुमानुवाच ॥ तिरश्चामपियोराजासमवायंसमीयुषाम् ॥ तथासुग्रीवसुख्यानांयस्तंवंदेनमाम्यहम् ॥ १ ॥ सकृदेवप्रपन्नाय विशिष्टायैवराज्यदः ॥ विभीषणाययोदेवस्तंवीरंप्रणमाम्यहम्॥ २ ॥ योमहापुरुषोव्यापी महाब्धौकृतसेतुकः॥ स्तुतोयेनजटायुश्चमहाविष्णुंनमाम्यहम्॥ ३ ॥ तेजसाप्यायितायस्य ज्वलंतिज्वलनादयः॥ प्रकाशतेस्वतंत्रोयस्तंज्वलंतंनमाम्यहम्॥ ४ ॥ सर्वतोमुखतायेन लीलयादर्शितारणे ॥ राक्षसेश्वरयोधानांतंवंदेसर्वतोमुखम् ॥ ५ ॥ नृभावंतुप्रपन्नानांहिनस्तिचसदारुजम् ॥ नृसिंहतनुप्राप्तोयस्तं नृसिंहंनमाम्यहम् ॥ ६ ॥ यस्माद्विभ्यतिवातार्कज्वलनेंद्राःसमृत्यवः ॥ भयंतनोतिपापानांभीषणंतंनमाम्यहम् ॥ ७ ॥ परस्ययोग्यतांवीक्ष्यहरतेपापसन्ततिम् । पुरस्ययोग्यतांवीक्ष्यतंभद्रंप्रणमाम्यहम् ॥ ८ ॥ योमृत्युंनिजदासानांमारयत्यतिचेष्टदः ॥ तत्रापिनिजदासार्थंमृत्युमृत्युंनमाम्यहम् ॥ ९ ॥ यत्पादपद्मप्रणतोभवत्युत्तमपूरुषः॥ तमीशंसर्वदेवानांनमनीयंनमाम्यहम् ॥ १० ॥ आत्मभावंसमुत्क्षिप्यदास्यंचैवरघूत्तमम् ॥ भजेहंप्रत्यहंरामंससीतंसहलक्ष्मणम्॥ ११॥ नित्यंश्रीरामभक्तस्यकिंकरायमकिंकराः ॥ शिवावत्योदिशस्तस्यसिद्धयस्तस्यदासिकाः ॥ १२ ॥ इदंहनुमताप्रोक्तंमंत्रराजात्मकंस्तवम् ॥ पठेदनुदिनंयस्तुसरामेभक्तिमान्भवेत् ॥ इति हनुमत्कल्पे श्रीरामकृतहनुमन्मंत्रराजात्मकस्तवराजः समाप्तः ॥ अथ लांगूलास्त्रशत्रुंजयस्तोत्रप्रारंभः ॥ ॐ हनुमंतंमहावीरंवायुतुल्यपराक्रमम् ॥ मम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कार्यार्थमागच्छप्रणमामिमुहुर्मुहुः ॥ १ ॥ ॐ अस्यश्रीहनुमच्छत्रुंजयस्तोत्रमालामंत्रस्य श्रीरामचन्द्र ऋषिः । नाना छन्दांसि । श्रीमन्महावीरो हनुमान्देवता । मारुतात्मज ह्सौं इति बीजम् । अंजनीसूनुह्स्फें इति शक्तिः। ॐ ह्रांह्रांह्रां इति कीलकम् । श्रीरामभक्तह्रां इति प्राणः । श्रीरामलक्ष्मणानन्दकर ह्राँह्रींह्रूँ इति जीवः । ममारातिपराजयनिमित्तशत्रुंजस्तोत्रमालामंत्रजपे विनियोगः ॥ ॐ ऐं श्रींह्राँह्रींह्रूँ स्फेंख्फेंह्सौंह्स्ख्फेंह्सौं नमो हनुमते अंगुष्ठाभ्यां नमः ॥ १ ॥ इति बीजादौ सर्वत्र संयोज्य रामदूताय तर्जनीभ्यां नमः ॥ २ ॥ लक्ष्मणप्राणदात्रे मध्यमाभ्यां नमः ॥ ३ ॥ अंजनीसूनवे अनामिकाभ्यां नमः ॥ ४ ॥ सीताशोकविनाशाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ लंकाप्रासादभंजनाय करतलकरपृष्ठाभ्यां नमः॥६॥ इति करन्यासः ॥ ॐ हनुमते हृदयाय नमः ॥१॥ रामदूताय शिरसे स्वाहा॥२॥ लक्ष्मणप्राणदात्रे शिखायै वषट् ॥ ३ ॥ अंजनीसूनवे कवचाय हुम् ॥ ४ ॥ सीताशोकविनाशिने नेत्रत्रयाय वौषट् ॥ ५ ॥ लंकाप्रासादभंजनाय अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ "ॐ ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं देवेन्द्रप्रमुखैः प्रशस्तयशसं देदीप्यमानं रुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीतांबरालंकृतम् ॥१॥ मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्॥वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि॥२॥वज्रांगपिंगकेशाढ्यं स्वर्णकुंडलमंडितम् ॥ नियुद्धउपसंगात्रं पारावारपराक्रमम् ॥ ३ ॥ वामहस्तगदायुक्तं पाशहस्त कमंडलुम् ॥ उद्यद्दाक्षिणदोर्दण्डं हनुमंतं विचिंतयेत्॥४॥" इति ध्यात्वा "अरेमल्लचटखेत्युच्चारणेऽथवातोडरमल्लचटखेत्युच्चारणेकपिमुद्रांप्रदर्शयेत्॥"अथ मंत्रः॥ "ॐऐंश्रींह्रांह्रींह्रूं स्फेंख्फेंह्सौंह्स्ख्फेंह्सौं नमोहनुमतेत्रैलोक्याक्रमणपराक्रमश्रीरामभक्तममपरस्यचसर्वशत्रून्चतुर्वर्णसंभवान्पुंस्त्रीनपुंसकान्भूतभविष्यद्वर्तमानान्

नानादूरस्थसमीपस्थान्नानानामधेयान्नानासंकरजातिजान्कलत्रपुत्रमित्रभृत्यबंधुसुहृत्समेतान्पशुशक्तिसहितान्धनधान्यादिसंपत्तियुतान्रा
ज्ञोराजपुत्रसेवकान्मंत्रीसचिवसखीन्आत्यंतिकक्षणेनत्वरयाएतद्दिनावधिनानानोपायैर्मारय२शस्त्रैश्छेदय२अग्निनाज्वालय२दाहय २ अक्षय
कुमारवत्पादतलाक्रमणेनानेनशिलातलेनात्रोटय२घातय२वध२भूतसंघैःसहभक्षय २ क्रुद्धचेतसानखैर्विदारय२ देशादस्मादुच्चाटय२पिशाच
वतभ्रंशय२भ्रामय२भयातुरान्विसंज्ञान्सद्यःकुरु२भस्मीभूतान्उद्धूलय२ भक्तजनवत्सलशीताशोकापहारकसर्वत्रमामेनंचरक्षरक्षह्रांह्रांह्रांहुंहुंहुं
घेघेघेहुंफट्स्वाहा"॥ १ ॥ "ॐनमोहनुमतेमहाबलपराक्रमायमहाविपत्तिनिवारकायभक्तजनमनःकामनाकल्पद्रुमायदुष्टजनमनोरथस्तंभनायप्र
भंजनप्राणप्रियायस्वाहा ॥२॥" "ॐ ह्रांह्रींह्रूंह्रैंह्रौंह्रः ममशत्रून्शूलेनच्छेदय२अग्निनाज्वालय२ दाहय२ उच्चाटय२ हुंफट्स्वाहा ३" इति
मंत्रं पठित्वा पुनर्ध्यायेत् ॥ ॐ हनुमते नमः । श्रीमंतं हनुमंतमार्तरिपुभिर्भूभृत्तरुभ्राजितं चाल्यद्वालधिबन्धवैरिनिचयं चामीकराद्रिप्रभम् ॥
अष्टौ रक्तपिशंगनेत्रनलिनं भ्रूभंगमंगस्फुरत्प्रोद्यच्चण्डमयूखमण्डलमुखं दुःखापहं दुःखिनाम् ॥ १ ॥ कौपीनं कटिसूत्रमौंज्यजिनयुग्देहं विदे
हात्मजा प्राणाधीशपदारविंदनिरत स्वांतं कृतांतं द्विषाम् ॥ ध्यात्वैवं समरांगणस्थितमथानीय स्वहृत्पंकजे संपूज्याखिलपूजनोक्तविधिना
संप्रार्थयेत्प्रार्थितम् ॥ इति ध्यात्वा स्तोत्रं पठेत् ॥ ॐ हनुमन्नंजनीसूनो महाबलपराक्रम ॥ लोलल्लांगूलपातेन ममारातीन्निपातय ॥१॥
मर्कटाधिप मार्तण्डमण्डलग्रासकारक ॥ लोलल्लां० ॥ २ ॥ अक्षक्षपण पिंगाक्ष क्षितिजाशुक्क्षयंकर ॥ लो० ॥ ३ ॥ रुद्रा
वतारसंसारदुःखभारापहारक ॥ लोल० ॥ ४ ॥ श्रीरामचरणांभोजमधुपायितमानस ॥ लो० ॥ ५ ॥ वालिकालरदक्लां
तसुग्रीवोन्मोचन प्रभो ॥ लोल० ॥ ६ ॥ सीताविरहवारीशमग्नसीतेशतारक ॥ लोल० ॥ ७ ॥ रक्षोराजप्रतापाग्निदह्यमान

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगद्धन ॥ लो० ॥ ८ ॥ ग्रस्ताशेषजगत्स्वास्थ्य राक्षसांभोधिमन्दर ॥ लो० ॥ ९ ॥ पुच्छगुच्छस्फुरद्धूमानलदग्धारिपत्तन ॥
लो०॥१०॥जगन्मनोदुरुल्लंघ्यपारावारविलंघन॥लो०॥११॥ स्मृतमात्रसमस्तेष्ट पूरक प्रणतप्रिय॥लो०॥१२॥रात्रिंचरचमूराशिकर्त
नैकविकर्तन ॥ लो० ॥ १३ ॥ जानकीजानकीजानिप्रेमपात्रपरंतप ॥ लो० ॥ १४ ॥ भीमादिकमहावीरवीरवेशावतारक ॥
लो० ॥ १५ ॥ वैदेहीविरहक्लान्तरामरोषैकविग्रह ॥ लो० ॥ १६ ॥ वज्रांगनखदंष्ट्रेशवज्रिवज्रावकुण्ठन ॥ लो० ॥ १७ ॥ अखर्व
गर्वगंधर्वपर्वतोद्भेदनस्वर ॥ लो० ॥ १८ ॥ लक्ष्मणप्राणसंत्राणत्रातास्तीक्ष्णकरान्वय ॥ लो० ॥ १९ ॥ रामादिविप्रयोगार्तभरताद्या
र्तिनाशन ॥ लो० ॥ २० ॥ द्रोणाचलसमुत्क्षेपसमुत्क्षिप्तारिवैभव ॥ लो० ॥ २१ ॥ सीताशीर्वादसम्पन्नसमस्तावयवाक्षत ॥ लो०
ल्लांगूलपातेन ममारातीन्निपातय ॥ २२ ॥ इत्येवमश्वत्थतलोपविष्टः शत्रुंजयंनाम पठेत्स्वयं यः ॥ स शीघ्रमेवास्तसमस्तशत्रुः प्रमोदते
मारुतजप्रसादात् ॥२३॥ इति श्रीलांगूलास्त्रशत्रुञ्जयहनुमत्स्तोत्रं सम्पूर्णम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे हनुमत्तंत्रे नवमस्तरङ्गः॥९॥

समाप्तोयंहनुमत्तरङ्गः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीगणेशाय नमः॥ अथ श्रीवटुकभैरवतंत्रप्रारंभः ॥ तत्रादौ पटलप्रारंभः ॥ दृष्ट्वातंत्राण्यनेकानिमाधवाख्येनधीमता ॥ श्रीमद्वटुकनाथस्य
पटलंवक्ष्यतेधुना ॥ १ ॥ (रुद्रयामले) एकदागिरिजाशंभुंपप्रच्छोपासनाविधिम् ॥ येनेदं सर्वलोकानामीप्सितं च फलंभवेत् ॥ २ ॥ श्री
पार्वत्युवाच ॥ प्राणनाथजगन्नाथजगदादिजगन्मय ॥ शंभोशंकरदेवेशवटुकाराधनंवद ॥ ३ ॥ एकादशसहस्रंतुभजनंहित्वयोदितम् ॥
विधिस्तस्यविशेषेणब्रूहित्वंशंकराधुना ॥ ४ ॥ येनकार्याणिसिध्यंतिसाधकानांनिरंतरम् ॥ सुगोप्यमपिदेवेशविधिंमब्रूहिशंकर ॥ ५ ॥
ईश्वर उवाच ॥ सम्यक्पृष्टंत्वयादेविलोकदुःखविमोचनम् ॥ मयावटुकरूपंहिधृतंसर्वसुखावहम् ॥६॥ अन्येदेवास्तुकालेनप्रसन्नाः संभवं
तिहि ॥ वटुकः सेवितः सद्यः प्रसीदतिध्रुवंशिवे ॥ ७ ॥ दुःखेचसेवितः शीघ्रंदुःखंनाशयतेक्षणात् ॥ सुखेचसेवितोनित्यंसुखंवर्द्धयते
बहु ॥ ८ ॥ शृणुदेविप्रवक्ष्यामिवटुकस्यमहात्मनः ॥ विधानंपरमंगोप्यंब्रह्मादीनांसुदुर्लभम् ॥ ९ ॥ संक्षेपेणवसुसंक्षेपात्कथयिष्यामिव
ल्लभे ॥ येनविज्ञातमात्रेणत्रैलोक्यंसाधयेत्सुधीः ॥१०॥ एकदादेवदेवेशितपसेमंदराचलम् ॥ गतोहंपरमानंदान्मूलप्रकृतिरीश्वरीम्॥११॥
चक्रेपरमसंतुष्टांतपसाभावितात्मना ॥ आकाशरूपिणीदेवीप्रोवाचवचनंमुदा ॥ १२ ॥ तुष्टाहंशंकरप्रीतावरंवरयदुर्लभम् ॥ वटुकस्यविधा
नंमेपरमंभक्तितोवरम् ॥१३॥परमाशयान्मंत्रस्ययेनसिध्यंतिसर्वथा ॥ मनोरमाणिमंत्रस्यसर्वकार्याणिसांप्रतम् ॥ १४ ॥ इतिवाक्यंचमेश्रु
त्वामूलभूतासनातनी ॥ उवाचयादृशंदेवीविधानंशृणुवल्लभे ॥ १५ ॥ वटुकाख्यस्यदेवस्यभैरवस्यमहात्मनः ॥ ब्रह्माविष्णुमहेशाद्यैर्वंदितं
स्यदयानिधेः ॥ १६ ॥ न्यासाएकादशप्रोक्तावटुकाराधनेशिवे ॥ यान्विनानैवसिद्धिः स्याद्वर्षाणामयुतैरपि ॥ १७ ॥ प्रथमः प्रेतबीजेन
नृसिंहबीजेनचापरः ॥ कामबीजेनसत्यायाः श्रीबीजेनततः परः ॥ १८ ॥ प्राणबीजेनवैन्यासान्कुर्यात्तत्रविचक्षणः ॥ घंटाबीजेनचन्यासं

For Private And Personal Use Only

विधायख्यातिबीजतः ॥ १९ ॥ मूलबीजेनपश्चाचन्यासंकृत्वामहामतिः ॥ भ्रामरीबीजतोन्यासंविदध्यात्प्रीतिसंयुतः ॥ २० ॥ एवंन्या
साञ्जपादौतुनकरोतिनरोयदा ॥ वांछयेहंवरारोहेतावन्मंत्रोनसिध्यति ॥ २१ ॥ इतिन्यासान्समाधायपुरश्चरणकारकः ॥ यथोक्तन्या
सकारीचयदिनोवरमाप्नुयात् ॥ २२ ॥ तदाकन्यादूषणोत्थंममपापंप्रजायताम् ॥ न्यासैरेतैर्वरारोहेब्रह्महत्याविनश्यति ॥ २३ ॥ काक
थान्यस्यपापस्यसत्यंसत्यंवदामिते ॥ ममन्यासानथोवक्ष्ये त्रीन्देवस्यमहात्मनः ॥२४॥ यान्विधायनरोविंदेत्सिद्धिंलोकेषुदुर्लभाम् ॥ आ
कूतबीजंविन्यस्येन्मस्तकेगंडयोर्मुखे ॥ २५ ॥ कालबीजंचक्षुषोश्चकर्णयोरपिविन्यसेत् ॥ नाभौलिंगेगुदेवापिविद्याबीजंकपोलयोः॥२६॥
ब्रह्मरंध्रेदंतपंक्तौविन्यसेत्साधकोत्तमः॥एतन्न्यासत्रयंप्रोक्तंसाधकाभीष्टसिद्धिदम्॥२७॥ यस्यप्रसादमासाद्यसाधकः शीघ्रसिद्धिदः ॥ शृणुदे
विप्रवक्ष्यामिशृंखलान्यासमुत्तमम् ॥ २८ ॥ यस्यप्रसादाच्चशिवेवटुकः सिद्धिदोभवेत् ॥ महापराख्यंबीजंचविन्यसेत्साधकोत्तमः ॥२९॥
न्यासेनानेनसुश्रोणिसाक्षाच्छिवसमोभवेत् ॥ वटुकस्याथवक्ष्यामिमातृकान्यासमुत्तमम् ॥ ३० ॥ कृतेनयेनवटुकः साधकस्यकरेभवेत् ॥
वटुकस्यपरंपूज्यंमातृकान्यासमुत्तमम् ॥ ३१ ॥ विज्ञायसाधयेत्प्राज्ञः समग्रः शिवतांव्रजेत् ॥ विनैवंमातृकान्यासंयोन्येनन्यासमाचरे
त् ॥ ३२ ॥ वटुकस्तस्यकुपितः सद्यः शापंप्रयच्छति ॥ तस्यन्यासः प्रकर्तव्यः साधकेनविपश्चिता ॥ ३३ ॥ सर्वेषुमातृस्थानेषुवपुः
पावनहेतवे ॥ मातृकान्यासमेनंहित्यक्त्वाऽन्यंन्यासमाचरेत् ॥ ३४ ॥ वर्षकोटिप्रयत्नेनससिद्धिंनैवविंदति ॥ ॐ कारमादौसंयोज्यसर्वं
पूर्ववदाचरेत् ॥ ३५ ॥ अयमंतर्मातृकाख्योन्यासः स्यात्पूर्वसिद्धिदः ॥ ॐकारमादिमंकृत्वान्यासोयंवरवर्णिनि ॥ नाम्नाबहि
र्मात्रिकाख्योन्यासचूडामणिर्भवेत् ॥३६॥ अथान्यंन्यासमाख्यास्येशृणुष्ववरवर्णिनि ॥ सरस्वतीमातृकाख्यंसद्यःसिद्धिप्रदायकम् ॥ ३७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यसेन्महामतेबीजंमातृकास्थानकेषुच ॥ महासरस्वतीदेवीसद्यःसिद्धिप्रदायिका ॥ ३८ ॥ महासरस्वतीबीजंकथितंदेवदुर्लभम् ॥ इये
न्यासाःसमाख्यातावटुकाराधने शिवे ॥ ३९ ॥ सद्यःसिद्धिकरादेविभाग्यलभ्यानसंशयः ॥ न्यूनन्यासस्यकर्तायःसद्योहानिमवाप्नुयात्
॥ ४० ॥ एतस्मादधिकान्न्यासान्न्यस्तंचपीठन्यासकम् ॥ यंत्रावरणन्यासंचपीठपूजाविधिंचरेत् ॥ ४१ ॥ एवंन्यासतनुंदेविध्यायेद्वटुक
भैरवम् ॥ शुद्धस्फटिकसंकाशंद्विनेत्रोत्पलशोभितम् ॥ ४२ ॥ कुटिलालकसंवीतंचारुस्मेरमुखांबुजम् ॥ नानारत्नमयैःकल्पैःकिंकिणी
जालनूपुरैः ॥ ४३ ॥ दीप्तंशुक्लांबरावीतंद्विभुजंदक्षिणेकरे ॥ त्रिशिखंसव्यहस्तेचदधानंदंडमद्भुतम् ॥ ४४ ॥ वटुवेशधरंशंभुंसात्त्विकं
साधकःस्मरेत् ॥ एवंध्यात्वायजेद्देवंशैवेपीठेसुरेश्वरि ॥ ४५ ॥ पात्रासादनशंखंचघंटाकलशस्थापनम् ॥ विशेषार्घस्थापनंवायंत्रस्थापन
मेवच ॥ ४६ ॥ सप्तधातुमयेपीठेताम्रजेवापटेशुभे ॥ संस्थाप्यतत्रतद्यंत्रंध्यात्वातत्रवटुंप्रिये ॥ ४७ ॥ यथाकामंतथाध्यानंकारयेत्साध
कोत्तमः ॥ क्रूरकार्येषुसर्वेषुध्यानंवैतामसंस्मृतम् ॥४८॥ वश्येविद्वेषणेस्तंभेराजसंध्यानमीरितम् ॥ सात्त्विकंशुभकार्येषुध्यानभेदःसमीरितः
॥ ४९ ॥ अन्यैर्वैध्यानभेदाश्चस्तवराजेप्रकीर्तिताः ॥ मूर्तिंमूलेनसंकल्प्यतस्यामावाहयेत्प्रभुः॥५०॥सद्योजातेनमंत्रेणमूलाद्येनचसुव्रते ॥
सन्निधाप्याथमूलेनकेवलेनस्वमुद्रया ॥ ५१ ॥ अघोरांतेनमूलेनसन्निरोधनमाचरेत् ॥ मूलेनसंमुखीकुर्याद्वगुंठ्याथमूलतः ॥ ५२ ॥
षडंगैःशकलीकृत्यामृतीकृत्यचमूलतः ॥ परमीकरणंचैवस्वस्वमुद्राभिरर्चयेत् ॥ ५३ ॥ एतत्सर्वंविधातव्यंततोध्यायेत्समाहितः ॥ कृत्वागु
स्थापनंतस्यमुद्राःसंदर्शयेदथ ॥ ५४ ॥ लिंगाद्याःपूर्वमुद्दिष्टायोनिमुद्रातथांतिमा ॥ तांदर्शयेत्तत्पुरुषंमूलाभ्यांचमहेश्वरि ॥ ५५ ॥ आस
नाद्यैश्चपुष्पांतैरुपचारैस्ततोर्चयेत् ॥ ततो देवाज्ञयासम्यग्यजेदावरणदेवताः ॥ ५६ ॥ मंत्राक्षराणांसंख्याकैस्तंतुभिर्ब्रह्मसूत्रजैः॥ वर्तिं कृत्वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घृतेनैव दीपतत्रप्रदापयेत ॥ ५७ ॥ तैलेनवाप्रकुर्वीतदीपदानविधानतः ॥ बलिंन्यासविधिंकृत्वाध्यानंकृत्वायथोक्तवत ॥५८॥ श्रीपार्व त्युवाच ॥ भगवन्करुणासिंधोर्दीनबंधोजगद्गुरो ॥ कृपांकृत्वासमाख्याहिमूंत्रैरेवपृथक्पृथक् ॥ ५९ ॥ साधकस्तुतथासिद्धिमचिरेणैवविं दति ॥ कालेनेहयथाल्पेनसाधकःसिद्धिमाप्नुयात् ॥६०॥ गोपनीयोनमंत्रोयंवटुकाख्योजगद्गुरो ॥ तथानिरूपयविभोबालकोपियथाल भेत् ॥ ६१ ॥ ईश्वर उवाच ॥ शृणुदेविजगत्पूज्येन्यासबीजानिशोभने ॥ प्रकटानियथाशश्वत्कथयामिहितावते ॥ ६२ ॥ ॥ तत्रादावापदुद्धारकवटुकमंत्रप्रयोगः॥ (रुद्रयामले) मंत्रो यथा-"ॐह्रींवटुकायआपदुद्धारणायकुरुकुरुवटुकायह्रीम्" इत्येकविंशत्यक्ष रो मंत्रः॥ अस्य विधानम् ॥ आचम्य मूलेन प्राणानायम्य देशकालौ संकीर्त्य श्रीमद्वटुकभैरवदेवताप्रीतयेममामुकमंत्रसिद्ध्यर्थं लक्षसंख्या त्मकजप (अथ वैकविंशतिलक्षात्मकजप) रूपपुरश्चरणमहंकरिष्ये ॥ इति संकल्प्यभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थिति संहारमातृकान्यासं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा प्रेतबीजाद्यश्रीकंठादिकलामातृकान्यासांतं सर्वंन्यासं च पद्धतिमार्गेण कृत्वा प्रयोगोक्तन्यासादिकं कुर्यात्॥तद्यथा ॥ अस्य श्रीवटुकभैरवमंत्रस्य बृहदारण्य ऋषिः। अनुष्टुप्छन्दः। श्रीवटुकभैरवो देवता। ह्रींबीजम् । ह्रींशक्तिः । ॐ कीलकम् । श्रीवटुकभैरवप्रीतये जपे विनियोगः ॥ ॐ बृहदारण्यऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप्छन्दसे नमः मुखे ॥ २ ॥ श्रीवटुकभैरवदेवतायै नमः हृदि ॥ ३ ॥ ह्रींबीजाय नमः गुह्ये ॥ ४ ॥ ह्रींशक्तये नमः पादयोः ॥ ५ ॥ ॐ की लकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां वां ईशानाय नमः अंगुष्ठयोः ॥ १ ॥ ॐ ह्रें वेंतत्पुरुषाय नमः तर्जन्योः॥ २ ॥ॐह्रूंवूं अघोराय नमः मध्यमयोः ॥ ३ ॥ ॐ ह्रीं वींवामदेवाय नमः अनामिकयोः ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ हां वां सद्योजाताय नमः कनिष्ठिकयोः ॥ ५ ॥ इति करन्यासः ॥ ॐ ह्रौं वौं ईशानाय ऊर्ध्ववक्त्राय नमः शिरसि ॥ १ ॥ ॐ हें वें तत्पुरुषाय पूर्ववक्त्राय नमः मुखे ॥ २ ॥ ॐ हुं वुं अघोराय दक्षिणवक्त्राय नमः दक्षिणकर्णे ॥ ३ ॥ ॐ हीं वीं वामदेवाय उत्तरवक्त्राय नमः वामकर्णे ॥ ४ ॥ ॐ हां वां सद्योजाताय पश्चिमवक्त्राय नमः चूडाधः ॥ ५ ॥ इति मूर्तिन्यासः ॥ ॐ हौं वौं ईशानाय नमः शिरसि ॥ १ ॥ ॐ हें वें तत्पुरुषाय नमः मुखे ॥ २ ॥ ॐ हुंवुं अघोराय नमः हृदये ॥ ३ ॥ ॐ हीं वीं वामदेवाय नमः गुह्ये ॥ ४ ॥ ॐ हां वां सद्योजाताय नमः पादयोः ॥ ५ ॥ इति पंचब्रह्ममंत्रन्यासः ॥ ॐ हां वां हृदयाय नमः ॥ १ ॥ ॐ हीं वीं शिरसे स्वाहा ॥ २ ॥ ॐ हुं वुं शिखायै वषट् ॥ ३ ॥ ॐ हें वें कवचाय हुम् ॥ ४ ॥ ॐ हौं वौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हः वः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ततः ॐ सुदर्शनायास्त्राय फट् इत्यस्त्रमंत्रेण तालैश्छोटिकाभिर्वा दशदिग्बंधनं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् ॥ नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥ १ ॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥ २ ॥ भुजंगमेखलं देवमग्निवर्णं शिरोरुहम् ॥ दिगंबरं कुमारेशं बटुकाख्यं महाबलम् ॥ ३ ॥ खट्वांगमसिपाशं च शूलं दक्षिणभागतः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ अग्निवर्णसमोपेतं सारमेयसमन्वितम् ॥ ४ ॥ इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमंडले वा मंडूकादिपरतत्वांतपीठदेवताः पद्धतिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्वांतपीठदेवताभ्यो नमः ॥ इति संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा-पूर्वादिक्रमेण । ॐ वां वामायै नमः ॥ १ ॥ ॐ ज्यें ज्येष्ठायै नमः ॥ २ ॥ ॐ रौं रौद्रै नमः ॥ ३ ॥ ॐ कां काल्यै नमः ॥ ४ ॥ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कं कलविकरण्यै नमः ॥५॥ ॐ बं बलविकरण्यै नमः ॥ ६ ॥ ॐ बं बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सं सर्वभूतदमन्यै नमः ॥८॥ मध्ये । ॐ मं मनोन्मन्यै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्ध धारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ततः शक्तिगंधाष्टकेन यंत्रं विलिख्य "ॐ नमो भगवते बटुकाय सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः ॥" इति मंत्रेण पुष्पासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तथा च॥ पुष्पांजलिमादाय । "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि बटुक परिवारार्चनाय मे ॥ १ ॥ इत्युक्त्वा पुष्पांजलिं भैरवोपरि दत्त्वा आज्ञां गृहीत्वा आवरणपूजामारभेत् ॥ अत्र सर्वत्र पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य आवरणदेवतां पूजयेत् ॥ ततो दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधाक्षतपुष्पाणि गृहीत्वा देवस्यांगे आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ ह्रां वां हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्राचरेत् ॥१॥ ॐ ह्रीं वीं शिरसे स्वाहा शिरःश्रीपा० ॥ २ ॥ ॐ ह्रूं वूं शिखायै वषट् शिखाश्रीपा० ॥ ३ ॥ ॐ ह्रैं वैं कवचाय हुम् कवचश्रीपा० ॥ ४ ॥ ॐ ह्रौं वौं नेत्रत्रयाय वौषट् नेत्रत्रयश्रीपा० ॥ ५ ॥ ॐ ह्रः वः अस्त्राय फट् अस्त्रश्री

१ ॐ लिंगस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च ॥ मण्डलस्थां महामायां यंत्रस्थां प्रतिमासु च ॥ सौवर्णे राजते ताम्रे पट्टे भूर्जे वा भुवि । विना यंत्रेण चेत्पूजा देवता न प्रसीदति ॥ २—शक्त्यष्टगंधो यथा-स्वयंभूकुसुमं कुंडगोलोत्थं रोचनागुरु ॥ काश्मीरमृगनाभिं च लाक्षां च मलयोद्भवम् ॥ एष गंधः समाख्यातः सर्वदा चण्डिकाप्रियः ॥

For Private And Personal Use Only

पा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततः कर्णिकाद्बहिरष्टदले प्राच्यादिक्रमेण । ॐ ह्रीं आ अमितांगभैरवाय नमः अमितांगभैरवश्रीपा० ॥ १ ॥ ॐ ह्रीं ई रुरुभैरवाय नमः रुरुभैरवश्रीपा० ॥ २ ॥ ॐ ह्रीं ऊं चंडभैरवाय नमः । चंडभैरवश्रीपा० ॥ ३ ॥ ॐ ह्रीं ऋं क्रोधभैरवाय नमः । क्रोधभैरवश्रीपा० ॥४॥ ॐ ह्रीं ऌं उन्मत्तभैरवाय नमः उन्मत्तभैरवश्रीपा० ॥५॥ ॐ ऐं ह्रीं कपालभैरवाय नमः। कपालभैरवश्रीपा० ॥ ६ ॥ ॐ ह्रीं औं भीषणभैरवाय नमः । भीषणभैरवश्रीपा० ॥ ७ ॥ ॐ ह्रीं अं संहारभैरवाय नमः । संहारभैरवश्रीपा० ॥ ॥ ८ ॥ इत्यष्टौ भैरवान्संपूज्य त्रिकोणे पूर्वादिकोणेषु । ॐ सत्त्वाय नमः ॥ १ ॥ ॐ रजसे नमः ॥ २ ॥ ॐ तमसे नमः ॥ ३ ॥ इति त्रिगुणान संपूज्य पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ त्रिकोणाद्बहिः षट्कोणे पूर्वादिक्रमेण । ॐ ह्रीं भूतनाथाय नमः । भूतनाथश्रीपा० ॥ १ ॥ ॐ ह्रीं आदिनाथाय नमः । आदिनाथश्रीपा० ॥ २ ॥ ॐ ह्रीं आनंदनाथाय नमः । आनंदनाथश्रीपा० ॥ ३ ॥ ॐ ह्रीं सिद्धशाबरनाथाय नमः । सिद्धशाबरनाथश्रीपा० ॥ ४ ॥ ॐ ह्रीं सहजानंदनाथाय नमः । सहजानंदनाथश्रीपा० ॥ ५ ॥ ॐ ह्रीं निःसीमानंदनाथाय नमः । निःसीमानंदनाथश्रीपा० ॥ ६ ॥ इति संपूज्य पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो वर्तुले पूर्वादिक्रमेण । ॐ ह्रीं डाकिनीपुत्रेभ्यो नमः । डाकिनीपुत्रश्रीपा० ॥ १ ॥ ॐ ह्रीं राकिनीपुत्रेभ्यो नमः राकिनीपुत्रश्रीपा० ॥२॥ ॐ ह्रीं लाकिनीपुत्रेभ्यो नमः । लाकिनीपुत्रश्रीपा० ॥३॥ ॐ ह्रीं काकिनीपुत्रेभ्यो नमः । काकिनीपु

त्रश्रीपा० ॥ ४ ॥ ॐ ह्रीं शाकिनीपुत्रेभ्यो नमः । शाकिनीपुत्रश्रीपा० ॥ ५ ॥ ॐ ह्रीं हाकिनीपुत्रेभ्यो नमः । हाकिनीपुत्रश्रीपा० ॥ ॥ ६ ॥ ॐ ह्रीं याकिनीपुत्रेभ्यो नमः याकिनीपुत्रश्रीपा० ॥ ७ ॥ ॐ ह्रीं देवीपुत्रेभ्यो नमः । देवीपुत्रश्रीपा० ॥ ८ ॥ देवदक्षिणतः ॥ ॐ ह्रीं उमापुत्रेभ्यो नमः । उमापुत्रश्रीपा० ॥ ९ ॥ ॐ ह्रीं रुद्रपुत्रेभ्यो नमः । रुद्रपुत्रश्रीपा० ॥ १० ॥ ॐ ह्रीं मातृपुत्रेभ्यो नमः । मातृपुत्रश्रीपा० ॥ ११ ॥ पश्चिमनैर्ऋतयोर्मध्ये । ॐ ह्रीं ऊर्ध्वमुखीपुत्रेभ्यो नमः । ऊर्ध्वमुखीपुत्रश्रीपा० ॥ १२ ॥ पूर्वेशानयोर्मध्ये ॥ ॐ ह्रीं अधोमुखीपुत्रेभ्यो नमः । अधोमुखीपुत्रश्रीपा० ॥ १३ ॥ इति त्रयोदशपुत्रवर्गान् पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्॥ १॥" इति पठित्वा पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं भैरवोपरि निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत ॥ इति चतुर्थावरणम् ॥ ४ ॥ वर्तुलाद्बहिः पूर्वाद्याग्नेयांतं क्रमेण वामावर्तेन च पूर्वे ॐ ह्रीं ब्रह्माणिपुत्रवटुकाय नमः । ब्रह्माणिपुत्रवटुकश्रीपा० ॥ १ ॥ ऐशान्ये । ॐ ह्रीं माहेश्वरीपुत्रवटुकाय नमः । माहेश्वरीपुत्रवटुकश्रीपा० ॥ २ ॥ उत्तरे ॐ ह्रीं वैष्णवीपुत्रवटुकाय नमः । वैष्णवीपुत्रवटुकश्रीपा० ॥ ३ ॥ वायव्ये । ॐ ह्रीं कौमारीपुत्रवटुकाय नमः । कौमारीपुत्रवटुकश्रीपा० ॥ ४ ॥ पश्चिमे इन्द्राणीपुत्रवटुकाय नमः । इन्द्राणीपुत्रवटुकश्रीपा० ॥ ५ ॥ नैर्ऋत्ये ॐ ह्रीं महालक्ष्मीपुत्रवटुकाय नमः । महालक्ष्मीपुत्रवटुकश्रीपा० ॥ ६ ॥ दक्षिणे । ॐ ह्रीं वाराहीपुत्रवटुकाय नमः । वाराहीपुत्रवटुकश्रीपा० ॥ ७ ॥ आग्नेये ॥ ॐ ह्रीं चामुंडापुत्रवटुकाय नमः । चामुंडापुत्रवटुकश्रीपा० ॥ ८ ॥ इत्यष्टौ मातृपुत्रवटुकान् पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं पंचमावरणार्चनम्॥ १॥" इति पठित्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं भैरवोपरि निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति पंचमावरणम् ॥५॥ अष्टदलाद्बहिः चतुरस्राभ्यंतरे इंद्रादिक्रमेण प्राचीं प्रकल्प्य पूर्वादिदशदिक्षु च पूर्वे ॐ ह्रीं हेतुकाय नमः । हेतुकश्रीपादुकांपूज० ॥१॥ आग्नेये । ॐ ह्रीं त्रिपुरांतकाय नमः। त्रिपुरांतकश्रीपा० ॥२॥ दक्षिणे। ॐ ह्रीं वेतालाय नमः। वेतालश्रीपादुकां पूजयामि तर्प० ॥३॥ नैर्ऋते ॐ ह्रीं अग्निजिह्वाय नमः! अग्निजिह्वश्रीपा० ॥४॥ पश्चिमे॥ ॐ ह्रीं कालांतकाय नमः। कालांतकश्रीपा० ॥५॥ वायव्ये । ॐ ह्रीं करालाय नमः। करालश्रीपा० ॥६॥ उत्तरे ॐ ह्रीं एकपादाय नमः। एकपादश्रीपा० ॥७॥ ऐशान्ये ॐ ह्रीं भीमरूपाय नमः। भीमरूपश्रीपा० ॥८॥ इन्द्रेशानयोर्मध्ये । ॐ ह्रीं अचलाय नमः । अचलश्रीपा० ॥९॥ नैर्ऋतवरुणयोर्मध्ये । ॐ ह्रीं हाटकेशाय नमः । हाटकेशश्रीपा० ॥१०॥ इति हेतुकादीन् दशवटुकान् पूजयेत्॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य । "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥भक्त्या समर्पये तुभ्यं षष्ठमावरणार्चनम्"॥१॥ इति पठित्वा पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं भैरवोपरि निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति षष्ठावरणम॥६॥ तत्र त्रिरेखात्मकभूपुरस्य प्रथमरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु श्रीकंठादिमहासेनांतान्यजेत् ॥ तत्र क्रमः ॥ पूर्वे । ॐ ह्रीं अं श्रीकंठेशपूर्णोदरीभ्यां नमः । श्रीकंठेशपूर्णोदरीश्रीपा० ॥१॥ दक्षिणे॥ ॐ ह्रीं आं अनंतेशविरजाभ्यां नमः । अनंतेशविरजश्रीपा० ॥२॥ पश्चिमे । ॐ ह्रीं इं सूक्ष्मेशशाल्मलीभ्यां नमः । सूक्ष्मेशशाल्मलीश्रीपा० ३ ॥ उत्तरे । ॐ ह्रीं ईं त्रिमूर्तीशलोलाक्षीभ्यां नमः । त्रिमूर्तीशलोलाक्षीश्रीपा० ॥४॥ आग्नेय्याम्॥ ॐ ह्रीं उं अमरेशवर्तुलाक्षीभ्यां नमः । अमरेशवर्तुलाक्षीश्रीपा० ॥५॥ नैर्ऋते । ॐ ह्रीं ऊं अर्घीशदीर्घघोणाभ्यां नमः । अर्घीशदीर्घघोणाश्रीपा० ॥६॥ वायव्ये ॥ ॐ ह्रीं ऋं भारभूतीशदीर्घमुखीभ्यां नमः । भारभूतीशदीर्घमुखी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आपदुद्धारबटुकपूजनयन्त्रम्.



For Private And Personal Use Only



८३१ ॥

श्रीपादुकां पू० ॥७॥ ऐशान्ये ॥ ॐ ह्रीं ऋं अतिथीशगोमुखीभ्यां नमः । अतिथीशगोमुखीश्रीपा० ॥ ८ ॥ पूर्वाग्निमध्ये । ॐ ह्रीं
लृं स्थाण्वीशदीर्घजिह्वाभ्यां नमः । स्थाण्वीशदीर्घजिह्वाश्रीपा० ॥ ९ ॥ दक्षिणनैर्ऋतमध्ये ॥ ॐ ह्रीं ॡं हरेशकुंडोदरीभ्यां नमः ।
हरेशकुंडोदरीश्रीपा०॥ १०॥ पश्चिमवायुमध्ये । ॐ ह्रीं एं झिंटीशोर्ध्वकेशीभ्यां नमः । झिंटीशोर्ध्वकेशीश्रीपा०॥ ११॥ उत्तरेशानमध्ये।
ॐ ह्रीं ऐं भौतिकेशविकृतमुखीभ्यां नमः । भौतिकेशविकृतमुखीश्रीपा०॥ १२॥ अग्निदक्षिणमध्ये । ॐ ह्रीं ओं सद्योजातेशज्वालामुखीभ्यां
नमः । सद्योजातेशज्वालामुखीश्रीपा०॥ १३॥ निर्ऋतिवरुणमध्ये । ॐ ह्रीं औं अनुग्रहेशोल्कामुखीभ्यां नमः । अनुग्रहेशोल्कामुखीश्रीपा०
॥ १४॥ वायुसोममध्ये ॥ ॐ ह्रीं अं अक्रूरेशश्रीमुखीभ्यां नमः । अक्रूरेशश्रीमुखीश्रीपा० ॥ १५ ॥ ईशानपूर्वमध्ये ॥ ॐ ह्रीं अः
महासेनेशविद्यामुखीभ्यां नमः । महासेनेशविद्यामुखीश्रीपा० १६॥ इति पूजयेत्॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य। "अभीष्टसिद्धिं मे
देहि शरणगतवत्सल॥ भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम्"॥ इति पठित्वा पुष्पांजलिं दत्त्वा विशेषार्घ्याद्बिंदुं भैरवोपरि निक्षिप्य पूजिता
स्तर्पिताः संतु इति वदेत्॥ इति सप्तमावरणम्॥ ७॥ ततो भूपुरस्य द्वितीयरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु क्रोधीश्वरादिषोडशांतान्॥
पूजयेत्॥ तत्र क्रमः। पूर्वे । ॐ ह्रीं कं क्रोधीशमहाकालीभ्यां नमः । क्रोधीशमहाकालीश्रीपा०॥ १॥ दक्षिणे । ॐ ह्रीं खं चंडीशसरस्व
तीभ्यां नमः। चंडीशसरस्वतीश्रीपा०॥ २॥ पश्चिमे। ॐ ह्रीं गं पंचांतकेशसर्वसिद्धिगौरीभ्यां नमः। पंचांतकेशसर्वसिद्धिगौरीश्रीपा०॥ ३॥
उत्तरे । ॐ ह्रीं घं शिवोत्तमेशत्रैलोक्यविजयाभ्यां नमः। शिवोत्तमेशत्रैलोक्यविजयाश्रीपा० ॥४॥ आग्नेय्याम् । ॐ ह्रीं ङं एकरुद्रेशमंत्र
शक्तिभ्यां नमः । एकरुद्रेशमंत्रशक्तिश्रीपा० ॥५॥ नैर्ऋत्ये ॥ ॐ ह्रीं चं कूर्मेशात्मकशक्तिभ्यां नमः । कूर्मेशात्मकशक्तिश्रीपा० ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वायव्ये । ॐ ह्रीं छं एकनेत्रेशभूतमातृकाभ्यां नमः । एकनेत्रेशभूतमातृकाश्रीपा० ॥७॥ ऐशान्ये । ॐ ह्रीं जं चतुराननेशलंबोदरीभ्यां नमः । चतुराननेशलंबोदरीश्रीपा० ॥८॥ पूर्वाग्निमध्ये । ॐ ह्रीं झं अजेशद्राविणीभ्यां नमः । अजेशद्राविणीश्रीपा० ॥ ९ ॥ दक्षिणनैर्ऋतमध्ये । ॐ ह्रीं त्रं सर्वेशनागरीभ्यां नमः । सर्वेशनागरीश्रीपा० ॥ १० ॥ पश्चिमवायुमध्ये । ॐ टं सोमेशखेचरीभ्यां नमः । सोमेशखेचरीश्रीपा० ॥११॥ उत्तरेशानमध्ये । ॐ ह्रीं ठं लांगलीशमंजरीभ्यां नमः । लांगलीशमंजरीश्रीपा०॥१२॥अग्नेययाम्यमध्ये । ॐ ह्रीं डं दारुकेशरूपिणीभ्यां नमः । दारुकेशरूपिणीश्रीपा० ॥१३॥ नैर्ऋतपश्चिममध्ये । ॐ ह्रीं ढं अर्धनारीशवीरणीभ्यां नमः । अर्धनारीशवीरणीश्रीपादुकांपू० ॥ १४ ॥ वायुसोममध्ये । ॐ ह्रीं णं उमाकांतेशकाकोदरीभ्यां नमः । उमाकांतेशकाकोदरीश्रीपा० ॥ १५ ॥ ईशानपूर्वमध्ये ॥ ॐ ह्रीं तं आषाढेशपूतनाभ्यां नमः । आषाढेशपूतनाश्रीपा० ॥ १६ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य ॥ "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यमष्टमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं दत्वा विशेषार्घाद्बिंदुं भैरवोपरि निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इत्यष्टमावरणम् ॥८॥ ततो भूपुरस्य तृतीयरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु दंडीश्वरादिभृग्वीशांतान् पूजयेत् ॥ तत्र क्रमः ॥ पूर्वे । ॐ ह्रीं थं दंडीशभद्रकालीभ्यां नमः । दंडीशभद्रकालीश्रीपादुकां पू० ॥१॥दक्षिणे । ॐ ह्रीं दं अत्रीशयोगिनीभ्यां नमः । अत्रीशयोगिनीश्रीपा०॥२॥पश्चिमे ॥ ॐ ह्रीं धं मीनेशशंखिनीभ्यां नमः । मीनेशशंखिनीश्रीपा० ॥ ३ ॥ उत्तरे । ॐ ह्रीं नं मेषेशगर्जनीभ्यां नमः । मेषेशगर्जनीश्रीपा०॥४ ॥ आग्नेय्याम ॥ ॐ ह्रीं पं लोहितेशकालरात्रिभ्यां नमः । लोहितेशकालरात्रिश्रीपादुकां पूजयामि तर्पयामि नमः॥ ५ ॥ नैर्ऋत्ये । ॐ ह्रीं फं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिखीशकुब्जिकाभ्यां नमः । शिखीशकुब्जिकाश्रीपा० ॥ ६ ॥ वायव्ये । ॐ ह्रीं बं छागलेशकपर्दिनीभ्यां नमः । छागलेशकपर्दिनी श्रीपा० ॥७॥ ऐशान्ये ॥ ॐ ह्रीं भं द्विरंडेशवज्रिणीभ्यां नमः । द्विरंडेशवज्रिणीश्रीपा० ॥८॥ पूर्वाग्निमध्ये । ॐ ह्रीं मं महाकालेशजयाभ्यां नमः । महाकालेशजयाश्रीपा० ॥ ९ ॥ दक्षिणनैऋतमध्ये । ॐ ह्रीं यं त्वगात्मभ्यां बालेशसुमुखेश्वरीभ्यां नमः । बालेशसुमुखेश्वरीश्रीपा० ॥१०॥ पश्चिमवायव्यमध्ये । ॐ ह्रीं रं असृगात्मभ्यां भुजंगेशरेवतीभ्यां नमः । भुजंगेशरेवतीश्रीपा० ॥११॥ उत्तरेशानयोर्मध्ये । ॐ ह्रीं लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः । पिनाकीशमाधवीश्रीपा० ॥१२॥ आग्नेयदक्षिणमध्ये । ॐ ह्रीं वं वेदात्मभ्यां खड्गीशवारुणीभ्यां नमः । खड्गीशवारुणीश्रीपा० ॥१३॥ नैऋतपश्चिममध्ये । ॐ ह्रीं शं अस्थ्यात्मभ्यां बकेशवायवीभ्यां नमः। बकेशवायवीश्रीपा० ॥१४॥ वायुसोममध्ये। ॐ ह्रीं षं मज्जात्मभ्यां नमः।श्वेतशरक्षोवधारिणीभ्यां नमः।श्वेतशरक्षोवधारिणीश्रीपा० ॥१५॥ ईशानपूर्वमध्ये! ॐ ह्रीं सं शुक्रात्मभ्यां भृग्वीशमहजाभ्यां नमः । भृग्वीशमहजाश्रीपा० ॥१६॥ इति पूजयेत्॥ ततो भूपुराद्बहिः देवदक्षिणतः लकुलेशादि त्रयं पूजयेत् ॥ तत्र क्रमः । ॐ ह्रीं हं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः । लकुलीशलक्ष्मीश्रीपा० ॥१॥ ॐ ह्रीं ळं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः । शिवेशव्यापिनीश्रीपा० ॥ २॥ ॐ ह्रीं क्षं क्रोधात्मभ्यां संवर्तकेशमहामायाभ्यां नमः । संवर्तकेशमहामायाश्रीपा० ॥३॥ इति पूजयेत् ॥ ततः ऐशान्ये । ॐ ह्रीं योगिनीसहितेभ्यो दिव्ययोगीश्वरेभ्यो नमः । योगिनीसहितदिव्ययोगीश्वरश्रीपा० ॥१॥ आग्नेये । ॐ ह्रीं योगिनीसहितेभ्योऽन्तारिक्षस्थयोगीश्वरेभ्यो नमः। योगिनीसहितांतारिक्षस्थयोगीश्वरश्रीपा० ॥२॥ नैऋते । ॐ ह्रीं योगिनीसहितभूमिस्थयोगीश्वरेभ्यो नमः । योगिनीसहितभूमिस्थयोगीश्वरश्रीपा० ॥ ३ ॥ पूर्वे । गं गणपतये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः । गणपतिश्रीपा० ॥४॥ दक्षिणे भैं भैरवाय नमः । भैरवश्रीपा० ॥५॥ पश्चिमे । क्षं क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० ॥६॥
उत्तरे । दुं दुर्गायै नमः। दुर्गाश्रीपा०॥७॥इति पूजयेत॥ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य। "अभीष्टसिद्धिं मे देहि शरणागत वत्सल॥
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्॥इति पठित्वा पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं भैरवोपरि निक्षिप्य पूजितास्तार्पिताः संतु इति वदेत॥
इति नवमावरणम् ॥९॥ ततो भूपुराद्बहिः पूर्वादिक्रमेण दशदिक्षु इन्द्रादीन् दशदिक्पालान् पूजयेत्॥तत्र क्रमः । ॐ ह्रीं लं इंद्राय नमः।
इन्द्रश्रीपा० ॥१॥ ॐ ह्रीं रं अग्नये नमः। अग्निश्रीपा०॥२॥ ॐ ह्रीं मं यमाय नमः।यमश्रीपा०॥३॥ॐ ह्रीं क्षं निर्ऋतये नमः। निर्ऋति
श्रीपा०॥४॥ह्रीं वं वरुणाय नमः। वरुणश्रीपा०॥५॥ॐ ह्रीं यं वायवे नमः। वायुश्रीपा०॥६॥ॐ ह्रीं सों सोमाय नमः । सोमश्रीपा०
॥७॥ ॐ ह्रीं हं ईशानाय नमः । ईशानश्रीपा० ॥८॥ इन्द्रेशानयोर्मध्ये । ॐ ह्रीं आँ ब्रह्मणे नमः। ब्रह्मश्रीपा०॥९॥वरुणनिर्ऋतयो
र्मध्ये । ॐ ह्रीं अनंताय नमः ॥१०॥ इति दशदिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति दशमावरणम् ॥१०॥ ततः इन्द्रादि
समीपे । ॐ वं वज्राय नमः॥१॥ ॐ शं शक्तये नमः ॥२॥ ॐ दं दंडाय नमः॥३॥ ॐ खं खड्गाय नमः॥४॥ ॐ पां पाशाय नमः
॥५॥ ॐ अं अंकुशाय नमः ॥६॥ ॐ गं गदायै नमः ॥७॥ ॐ त्रिं त्रिशूलाय नमः ॥८॥ ॐ पं पद्माय नमः ॥९॥ॐ चं चक्राय
नमः ॥१०॥ इत्यस्त्राणि पूजयित्वा रुद्राख्यपदं संयोज्य पुष्पांजलिं च दत्वा स्तंभन १ चतुरास्त्रणि २ मच्छ ३ गोक्षु ४ योनि
मुद्र इति पंच मुद्राः प्रदर्शयेत् ॥ इत्येकादशावरणम् ॥११॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य पंचबलिदानं दत्त्वा पशुब
लिदानादिकं विधाय जपं कुर्यात॥अस्य पुरश्चरणमेकविंशतिलक्षजपः ॥ जपांतेतिलाज्येनमधुमिश्रितेन दशांशतो होमः । होमांते होमदशां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेन मंत्रांते "ॐ बटुकभैरवं तर्पयामि" इत्युक्त्वा दुग्धमिश्रितजलेन तर्पणं कुर्यात ॥ ततस्तर्पणदशांशेन मंत्रांते "ॐ आत्मानमभिषिंचामि नमः ॥" इति मूर्ध्न्यभिषेकः ॥ होमतर्पणाभिषेकाशक्तौ तत्तत्स्थाने तत्तद्द्विगुणो जपः कार्यः ततोऽभिषेकदशांशसंख्याकमष्टोत्तरशतं वा ब्राह्मणान् भोजयेत् ॥ इति शारदातिलके ज्ञेयम् ॥ रुद्रयामले पुरश्चरणलक्षजपः ॥ तत्तद्दशांशेन होमतर्पणब्राह्मणभोजनानि कारयेत् ॥ एवंकृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च (रुद्रयामले) "लक्षमेकं जपेन्मंत्रं हविष्याशी जितेन्द्रियः ॥ तद्दशांशं च जुहुयात्तिलैर्मधुरसंयुतैः ॥ १ ॥ अनेन मनुना देवी सिद्धेन जगतीतले ॥ असाध्यं नास्ति लोकेषु सत्यंसत्यं मयोदितम् ॥ २ ॥ एवं सिद्धे मनौ मंत्री प्रयोगान् कर्तुमर्हति ॥ यथाकामं तथा ध्यानं कारयेत्साधकोत्तमः ॥ ३ ॥ क्रूरकार्येषु सर्वेषु ध्यानं वै तामसं स्मृतम् ॥ वश्ये विद्वेषणे स्तंभे राजसं ध्यानमीरितम् ॥ ४ ॥ सात्त्विकं शुभकार्येषु ध्यानभेदः समीरितः ॥ बालसूर्यांशुसंकाशं राजसं ध्यानमुच्यते ॥ ५ ॥ सात्त्विकं श्वेतवर्णं च कृष्णं तामसमुच्यते ॥ सर्वकामार्थसिद्ध्यर्थं राजसं ध्यानमुच्यते ॥ ६ ॥" अथ तामसध्यानं यथा "ॐ त्रिनेत्रं रक्तवर्णं च वरदाभयहस्तकम् ॥ सव्ये त्रिशूलमभयं कपालं वरमेव च ॥ ७ ॥ रक्तवस्त्रपरीधानं रक्तमाल्यानुलेपनम् ॥ नीलग्रीवं च सौम्यं च सर्वाभरणभूषितम् ॥ ८ ॥ अथ राजसध्यानम् ॥ तुषारकर्णिकाभासं मायारूपमनंतकम् ॥ मूर्ध्नि खंडेन्दुशकलं त्रिनेत्रं शांतिलोचनम् ॥ ९ ॥ सर्वकारणकर्तारं द्विभुजं रत्नभूषितम् ॥ कपालं वामहस्ते च सूक्ष्मदण्डं च दक्षिणे ॥ १० ॥ पादनूपुरसंयुक्तं छिन्नशीर्षविभूषितम् ॥ सर्पमालासमायुक्तं हस्तोरुस्थूलजानुषु ॥ आंत्रमालासमायुक्तं सर्वाभरणभूषितम् ॥ ११ ॥ अथ सात्त्विकं ध्यानम् ॥ श्वेतवर्णं चतुर्बाहुं जटामुकुटधारिणम् ॥ भुजंगपाशहस्तं च हस्ते दंडकमण्डलुम् ॥ १२ ॥ शुक्लयज्ञोपवीतं च शुक्लकौपीन

For Private And Personal Use Only

वाससम् ॥ शुक्लवस्त्रपरीधानं श्वेतमालानुलेपनम् ॥ १३ ॥ त्रिनेत्रं नीलकंठं च मुक्ताभरणभूषितम् ॥ अन्ये वै ध्यानभेदाश्च स्तवराजे प्रकीर्तिताः ॥१४॥ अथ प्रयोगः (रुद्रयामले) शुक्लपक्षे द्वितीयायां शुक्रवारे समाहितः ॥ पूर्ववत्पूजयेद्देवं सिद्धान्नं च निवेदयेत् ॥ १ ॥ पलार्द्धं च वचाचूर्णं तन्मानघृतसंयुतम् ॥ पद्मपत्रे विनिःक्षिप्य त्रिसहस्रं जपेद्बुधः ॥ २ ॥ प्राशयेन्नियतो भूत्वा पुनर्लक्षत्रयं जपेत् ॥ तस्यैवं कुर्वतः प्रज्ञा निःसीमा भवति ध्रुवम् ॥ ३ ॥ गद्यपद्यमयी वाणी श्रुतस्याप्यवधारणम् ॥ कृष्णपक्षे चतुर्दश्यां भूमिपुत्रस्य वासरे ॥ ४ ॥ आराध्य विधिवद्देवं तस्याग्रे स्थापयेद्बुधः ॥ रोचनां हेमजे पात्रे संपूज्य विधिनाथ ताम् ॥ ५ ॥ गंधपुष्पादिना स्पृष्ट्वा तां जपेदयुतत्रयम् ॥ तद्गतवर्तिं प्रज्वाल्य कपिलाघृतसेविनाम् ॥ ६ ॥ सौवर्णे नृकपाले वा पात्रे संगृह्य चांजनम् ॥ संपूज्य च पुनर्जप्त्वा तत्पात्रं मंत्रसंग्रहम् ॥ ७ ॥ ध्यात्वा वादवदंशोरे तदा चांजनमाचरेत ॥ वश्या भवंति ते सर्वे यान्यान्पश्यति साधकः ॥ ८ ॥ वंध्याचिकित्सां कुर्वाणो बालाकाभं समर्चयेत ॥ हरिद्रार्धपलं चैव वचाचूर्णं च तत्समम् ॥ ९ ॥ पेषयित्वा तु गोमूत्रे गोलकं घृतसंयुतम् ॥ पद्मपत्रे विनिःक्षिप्य स्थापयेद्देवसन्निधौ ॥ १० ॥ प्रणिपत्य नमस्कृत्य जपेदुच्चैः सहस्रकम् ॥ एवमेव प्रकारेण प्राशयेत्तु महौषधम् ॥ ११ ॥ श्रीमंतमायुष्मंतं च बलवंतं सुदर्शनम् ॥ विद्यावंतं पुत्रवंतं सद्यः पुत्रमवाप्नुयात् ॥ १२ ॥ वश्यार्थमयुतं जप्त्वा रक्तपुष्पैर्दशांशतः ॥ होमं कुर्यात्करवीरैः श्वेतैर्विद्यामवाप्नुयात् ॥ १३ ॥ लक्ष्म्याप्त्यै कमलैर्होमो दीर्घायुर्दूर्वया हुते ॥ गुडेन रोगनाशः स्यादपमृत्युनिवारणम् ॥ १४ ॥ वस्त्रेण वस्त्रप्राप्तिः स्याद्धान्यान्निर्धान्यहोमतः॥ पुत्रजी

१ शारदातिलके त्रिशतमिति पाठः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीफलैर्होमे सर्वसिद्धिमवाप्नुयात् ॥ १५ ॥ अश्वत्थसमिधाहोमे पुत्राप्तिः सर्वसिद्धयः ॥ लवणघृतहोमेन शत्रून्मादकरं भवेत् ॥ १६ ॥
काकोलूकमांसहोमाच्छत्रून्मारयते ध्रुवम् ॥ ससरात्रेण देवेशि श्मशाने च त्रिलक्षकम् ॥ १७ ॥ जपित्वा बलिदानेन वटुको दर्शने
भवेत् ॥ वटवृक्षतले मर्त्यस्त्रिलक्षं प्रजपेन्निशि ॥ १८ ॥ रसायनं च गुटिकां चेटकासिद्धिमाप्नुयात् ॥ विभीतकवृक्षतले यदि लक्षं जपेन्न
रः ॥१९॥ वेतालभूतप्रेताश्च वश्या भवंति निश्चयात्॥ जुहुयादरुणाम्भोजैयजोदोषैर्मधुप्लुतैः ॥२०॥ लक्षसंख्या तदर्धं वा प्रत्यहं भोजये
द्विजान् ॥ वनितां युवतीं रम्यां प्रीणयेद्देवताधिया ॥ २१ ॥ होमांते धनधान्याद्यैस्तोषयेद्गुरुमात्मनः ॥ एवंकृते जगद्वश्यं रमाया भवनं
भवेत् ॥ २२ ॥ रक्तोत्पलैस्त्रिमध्वक्तैररुणैर्वा हरिद्रजैः ॥ पुष्पैः पयोन्नैः सघृतैर्होमाद्विश्वं वशं नयेत ॥ २३ ॥ वाक्सिद्धिं लभते मंत्री
पालाशकुसुमैर्हुते ॥ कर्पूरागरुसंयुक्तं गुग्गुलुं जुहुयात्सुधीः ॥ २४ ॥ ज्ञानं दिव्यमवाप्नोति तेनैव स भवेत्कविः ॥ क्षीराक्तैरमृताखंडै
र्होमः सर्वापमृत्युजित ॥ २५ ॥ दूर्वाभिरायुषे होमः क्षीराक्ताभिर्दिनत्रयम् ॥ गिरिकर्णिभवैः पुष्पैस्तवधूकार्णिकारजैः ॥ २६ ॥
मालतीकुसुमैर्हुत्वा तत्पुत्रांश्च वशं नयेत् ॥ कारंडकुसुमैर्वैश्यान् वृषलान् पाटलोद्भवैः ॥ २७ ॥ आत्मानमविलेपांतस्थितमाध्याह्वयान्वि
तम् ॥ मंत्रमुच्चार्य जुहुयान्मंत्री मधुरलोडितैः ॥ २८ ॥ सर्षपैः पद्मंभिश्चैर्वशयेत्पार्थिवान्क्षणात् ॥ अनेनैव विधानेन सपत्नीं तत्सुता
नपि ॥ २९ ॥ जातिबिल्वफलैः पुष्पैर्मधुरत्रयसंयुतैः ॥ नरनारीनरपतीन्होमतो वशयेद्ध्रुवम्॥ ३०॥ मालतीकुसुमोद्भूतैः पुष्पैश्चंदनलो
डितैः ॥ जुहुयात्कवितां मंत्री लभते वत्सरान्तरे ॥ ३१ ॥ मधुरत्रयसंयुक्तैः फलैर्बिल्वसमुद्भवैः ॥ जुहुयाद्वशयेल्लोकान्छ्रियं प्राप्नोति
वांछिताम् ॥ ३२ ॥ पाटलैः कुसुमैः कुंदैरुत्पलैर्नागचंपकैः॥ नद्यावर्तैर्विकचितैः कृतमालैर्जुहोति यः॥ ३३ ॥जायते वत्सरादर्वाक् श्रिया

For Private And Personal Use Only

विजितपार्थिवः ॥ साज्येन्ने च हुते मंत्री भवेदन्नसमृद्धिमान् ॥३४॥ कस्तूरीकुंकुमोपेतं कर्पूरं जुहुयाद्वशी ॥ कंदर्पादधिकं सद्यः सौंदर्य
मधिगच्छति ॥ ३५ ॥ लाजान् श्रजुहुयान्मंत्री दधिक्षीरघृतप्लुतान् ॥ विजित्य रोगानखिलाञ्जीवेच्च शरदां शतम् ॥ ३६ ॥ पादद्वयं
मलयजं पादं कुसुमकेशरम् ॥ पादं गोरोचनायाश्च त्रीणि पिष्ट्वा हिमांभसा ॥ ३७ ॥ विदध्यात्तिलकं भाले यान्पश्यायान्विलोकयेत् ॥
यान्स्पृशेत् स्पर्शिता ये वै वश्याः स्युस्तस्य तेऽचिरात् ॥ ३८ ॥ कर्पूरकपिचोराणि समभागानि कल्पयेत् ॥ चतुर्भागो जटामांसी
तावती रोचना मता ॥ ३९ ॥ कुंकुमं समभागं स्याद् द्विभागं चंदनं मतम् ॥ अगरं नवभागं स्यादेवं भागक्रमेण च ॥ ४० ॥ हिमा
द्भिः कन्यकापिष्टमेतत्सर्वं सुभावितम् ॥ यो भाले तिलकं धत्ते कुर्याद्भूमिपतीन्नरान् ॥ ४१ ॥ वासितान्मदगर्वाढ्यान्मदोन्मत्ता
न्मतंगजान् ॥ सिंहान्व्याघ्रान्महासर्पान्भूतवेतालराक्षसान् ॥ ४२ ॥ दर्शनादेव वशयेत्तिलकं धारयेन्नरः ॥ (शारदातिलके
विशेषः) बिल्वप्रसूनैर्जुहुयान्महतीं विंदते श्रियम् ॥ ४३ ॥ लवणैर्मधुसंयुक्तैर्वशयेद्वनिताजनान् ॥ वृष्टिकामेन होतव्यं
वेतसानां समिद्वरैः ॥ ४४ ॥ वश्याय जुहुयान्मंत्री मधुना दिवसत्रयम् ॥ कृष्णाष्टमीं समारभ्य यावत्स्यात्तु चतुर्दशी ॥ ४५ ॥
तिलैस्तण्डुलसंमिश्रैर्मधुरत्रयलोलितैः ॥ त्रिसहस्रं प्रतिदिनं जुहुयात्संस्कृतेऽनले ॥४६॥ वटुकेशं समभ्यर्च्य भक्ष्यभोज्यफलान्वितः ॥
नित्यं निवेद्य समये मध्यरात्रे बलिं हरेत् ॥ ४७ ॥ एवं जपित्वा प्रयतः सहस्राण्येकविंशतिः ॥ समाप्तिदिवसे रात्रावजं हत्वा बलिं
हरेत् ॥४८॥ ततः कारयिता राजा तोषयेत्साधकं धनैः॥ प्रयोगदिवसे नित्यं भक्ष्यभोज्यैः सदक्षिणैः ॥ ४९ ॥ विप्रान्सप्त महादेवि
तोषयेद्वांछितासये ॥ समाप्तिदिवसे विप्रान्सप्तसप्त समाहितः ॥५०॥ भोजयेद्बहुवित्ताद्यैस्तोषयेज्जगदीश्वरि । विधिनानेन संतुष्टो वटुकेशः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयच्छति ॥५१॥ तेजो बलं यशः पुत्रान्कान्तिं लक्ष्मीं मनोरमाम्॥ नश्यंति शत्रवः सर्वे वर्धंते मित्रबांधवाः ॥ ५२ ॥ अवग्रहो न
जायेत विषये तस्य भूपते ॥ जुहुयात्केवलैर्लाजैरयुतं स्तंभनेच्छया ॥ ५३ ॥ साधयेद्विधिनानेन भस्म सर्वार्थसिद्धिदम् ॥ उशीरं चंदनं
कुष्ठं घनसारं सकुंकुमम् ॥५४॥ श्वेतार्कमूलवाराहीलक्ष्मीक्षीरमहीरुहाम् ॥ त्वचो बिल्वतरोर्मूलं शोषयित्वा सुचूर्णयेत् ॥५५॥ चूर्णं
व्योम्नि गृहीतेन गोमयेन विमिश्रितम्॥ कृत्वा पिंडाभिमंशोष्य संस्कृते हव्यवाहने॥५६॥मूलेन दग्ध्वा तद्भस्म शुद्धे पात्रे विनिःक्षिपेत्॥
केतकीमालतीपुष्पैर्वासयेद्भस्म शोधितम् ॥५७॥ अयुतं प्रजपेन्मंत्रं स्पृष्ट्वा भस्म सुपूजितम् ॥ एतदादाय दिवसे प्रातः पुंड्रं करोति यः
॥ ५८ ॥ ब्राह्मणो वेदविधिना त्रिपुंड्रं धारयेत्सुधीः ॥ शूद्राद्यैर्मूलमंत्रेण सर्वे वा मूलमंत्रतः ॥ ५९ ॥ तस्य रोगाः प्रणश्यंति
कृत्याद्रोहमहाग्रहाः ॥ रिपुचोरमृगादिभ्यो भयमस्य न जायते ॥ ६० ॥ वर्द्धंते संपदः सर्वाः पूज्यंते सकलैर्जनैः ॥ राजा वश्यो
भवेत्तस्य सामात्यः सपरिच्छदः ॥६१॥ अभिषेकं प्रकुर्वीत राज्ञो विजयकांक्षिणः ॥ पूर्वोक्तमंडले कृते वितानध्वजशोभिते ॥ ६२ ॥
सर्वतोभद्रमालिख्य कर्णिकां तस्य पूजयेत् ॥ अष्टद्रोणप्रमाणेन शालिभिः शोभितैः शुभैः ॥ ६३ ॥ तदर्धांस्तण्डुलांस्तस्मिंस्तदर्धस्य
दूर्वाक्षतान्वितम् ॥ होमादिविहितं कुंभं नवरत्नसमन्वितम् ॥६४॥ संस्थाप्य विमलैस्तोयैरापूर्यास्मिन्विनिःक्षिपेत् ॥ क्षीरद्रुमप्रवालानि
लक्ष्मीदूर्वासमायुतम् ॥६५॥ कर्पूरं चंदनं बिल्वमुशीरं कुंकुमं पुनः ॥ कंकोलमगुरुं जातिं मल्लिकाचंपकोत्पलैः ॥६६॥ गोमेददाडिमं
पश्चात्पट्टसूत्रेण वेष्टयेत् ॥ तस्मिन्नावाह्य वटुकं राजसं संप्रपूजयेत् ॥६७॥बहिरष्टसु कुंभेषु भैरवानष्ट पूजयेत् ॥ त्रयोदशसु कुंभेषु त्रयोदश
गणान्यजेत् ॥६८॥ बाह्ये दशसु कुंभेषु लोकेशानर्चयेत्सुधीः ॥ तद्बहिर्द्व्यष्टकुंभेषु श्रीकंठादीन्सुरेश्वरान्॥६९॥ पंचत्रिंशद्घटेष्वथैका

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्विवर्णस्वरान् क्रमात् ॥ इति गंधादिभिः सम्यक् पंचावरणमर्चयेत् ॥ ७० ॥ अयुतं प्रजपेत्स्पृष्ट्वा तान्घटान्देशिकोत्तमः ॥ पायसैः सर्पिषा शुद्धैस्तिलैर्दशशतं पृथक् ॥७१॥ जुहुयात्तान्घटान्स्पृष्ट्वा प्रत्यहं बलिमाहरेत् ॥ राजमोक्तप्रकारेण राज्ञो देशिकसत्तमः॥ ७२ ॥ सुदिने शोभने लग्ने वाचयित्वा द्विजातिभिः ॥ स्वस्तिमंगलवाक्यानि विशुद्धैर्वेदपारगैः ॥७३॥ नदत्सु पंचवाद्येषु प्रणम्य बटुकेश्वरम् ॥ जितेन्द्रियं शुद्धकायं राजानं ब्राह्मणप्रियम् ॥ ७४ ॥ आस्तिकं शुद्धवचनमभिषिंचेत्प्रसन्नधीः ॥ अभिषिक्तो नरपतिः प्रणिपत्य गुरुं परम् ॥७५॥ भूगर्भीं दक्षिणां दद्यात्प्रसीदति यथा गुरुः॥ राजाभिषिक्तो भवति साक्षाद्भूमिपुरंदरः ॥ ७६ ॥ परान्विजयते भूपांस्तूयते सकलैर्नरैः ॥ भक्ष्यभोज्यैर्धनैर्धान्यैः पूजयंति यशस्विनः॥ कृताभिषेकः षण्मासं प्रतिमासं महीपतिः ॥ ७७ ॥ इत्येकविंशत्यक्षरबटुक भैरवमंत्रप्रयोगः ॥ अथ स्वर्णाकर्षणभैरवमंत्रप्रयोगः ॥ अथातः संप्रवक्ष्यामि स्वर्णाकर्षणभैरवम् ॥ यस्यानुष्ठानमात्रेण स्वर्णराशिमवाप्नुयात् ॥ १ ॥ शांतिकं पौष्टिकं चैव वश्याकर्षणमोहनम्॥ मारणोच्चाटनं द्वेषस्तंभनं च प्रशस्यते ॥ २॥ मंत्रो यथा-" ऐंह्रींश्रींऐंश्रींआपदुद्धारणायह्रां ह्रीं ह्रूं अजामलबद्धायलोकेश्वरायस्वर्णाकर्षणभैरवायममदारिद्र्यविद्वेषणायमहाभैरवायनमःश्रीं ह्रीं ऐं" इति सप्तपंचाशदक्षरो मंत्रः॥ अस्य विधानम् ॥ ॐ अस्य श्रीस्वर्णाकर्षणभैरवमंत्रस्य श्रीब्रह्माऋषिः । पंक्तिश्छंदः। हरिहरब्रह्मात्मकस्वर्णाकर्षणभैरवो देवता । ह्रीं बीजम् । ह्रीं शक्तिः । ॐ कीलकम् । स्वर्णाकर्षणभैरवप्रसादसिद्ध्यर्थे स्वर्णराशिप्राप्तये स्वर्णाकर्षणभैरवमंत्रजपे विनियोगः ॥ ॐ ब्रह्मर्षये नमः शिरसि ॥ १ ॥ पंक्तिच्छंदसे नमः मुखे ॥ २ ॥ स्वर्णाकर्षणभैरवदेवतायै नमः हृदि ॥ ३ ॥ ह्रीं बीजाय नमः गुह्ये ॥ ४ ॥ ह्रीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शक्तये नमः पादयोः ॥५॥ ॐ कीलकाय नमः सर्वांगे॥६॥ इति ऋष्यादिन्यासः॥ ऐं ह्रीं श्रीं आपदुद्धारणाय अंगुष्ठाभ्यां नमः॥१॥
ह्रां ह्रीं ह्रूं अजामलबद्धाय तर्जनीभ्यां नमः ॥ २ ॥ लोकेश्वराय मध्यमाभ्यां नमः ॥३॥ स्वर्णाकर्षणभैरवाय अनामिकाभ्यां नमः॥४॥
मम दारिद्र्यविद्वेषणाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ महाभैरवाय नमः । श्रीं ह्रीं ऐं करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ॥
ऐं ह्रीं श्रीं ऐं श्रीं आपदुद्धारणाय हृदयाय नमः ॥१॥ ह्रां ह्रीं ह्रूं अजामलबद्धाय शिरसे स्वाहा ॥२॥ लोकेश्वराय शिखायै वषट्॥३॥
स्वर्णाकर्षणभैरवाय कवचाय हुम् ॥४॥ मम दारिद्र्यविद्वेषणाय नेत्रत्रयाय वौषट् ॥५॥ महाभैरवाय नमः श्रीं ह्रीं ऐं अस्त्राय फट् ॥६॥
इति हृदयादिषडंगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम् ॥ अक्षयस्वर्ण
माणिक्यं तडित्पूरितपात्रकम् ॥ १ ॥ अभिलषितं महाशूलं तोमरं चामरद्वयम् ॥ सर्वाभरणसंपन्नं मुक्ताहारोपशोभितम् ॥२॥ मदोन्मत्तं
सुखासीनं भक्तानां च वरप्रदम् ॥ संततं चिंतयेद्देवं भैरवं सर्वसिद्धिम् ॥ ३ ॥ पारिजातद्रुमकांतारस्थिते मणिमंडपे ॥ सिंहासनगतं
ध्यायेद्भैरवं स्वर्णदायकम् ॥ ४ ॥ गांगेयपात्रं डमरुं त्रिशूलं वरं करैः संदधतं त्रिनेत्रम् ॥ देव्या युतं तप्तसुवर्णवर्णं स्वर्णाकृतिं भैरवमा
श्रयामि ॥५॥" इति ध्यात्वा मानसोपचारैः संपूजयेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले लिंगतोभद्रमंडले वा मंडूकादिपरतत्त्वांतपीठ
देवताः एवमितिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः। इति संपूज्य नव पीठशक्तीः पूजयेत्॥तद्यथा-पूर्वादिक्रमेण ।
ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥२॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरण्यै नमः ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ बलविकरण्यै नमः॥६॥ ॐ बलप्रमथिन्यै नमः॥७॥ ॐ सर्वभूतदमन्यै नमः॥८॥ मध्ये । ॐ मनोन्मन्यै नमः॥ ९ ॥ इति पीठ शक्तीः संपूजयेत ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोध्य "ॐ नमो भगवते स्वर्णाकर्षणभैरवयोगपीठात्मने नमः ॥" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यायेत् ॥ ॐ गांगेयपात्रं डमरुं त्रिशूलं वरं करैः संदधतं त्रिनेत्रम् ॥ देव्या युतं तप्तसुवर्णवर्णं स्वर्णाकृतिं भैरवमाश्रयामि ॥ १ ॥ ध्यानम् । मन्दारद्रुममूलभाजि महति माणिक्यसिंहासने संविष्टोदरभिन्नपंकजरुचा देव्या कृतालिंगनः ॥ भक्तेभ्यः करां रत्नपात्रभरितं स्वर्णं ददानोऽनिशं स्वर्णाकर्षणभैरवो विजयते स्वर्गापवर्गैकभूः ॥ २ ॥ इति ध्यात्वा । मूलेन मूर्तिं प्रकल्प्यावाहनादि पुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा । पुष्पांजलिमादाय "ॐ संविन्मयः परो देवः परामृतरसप्रियः॥ अनुज्ञां देहि भैरव परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात् । इत्याज्ञां गृहीत्वा आवरणपूजामारभेत॥ तथा च ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राच्यादिक्रमेण ॐ आकाशाय नमः । मूर्ध्नि पूजयामि ॥१॥ ॐ समीरणाय नमः । मुखे पूजयामि ॥२॥ ॐ दहनाय नमः । बाह्वोः पूजयामि ॥३॥ ॐ वैवर्ताय नमः। हृदि पूजयामि॥ ४ ॥ ॐ विश्वंभराय नमः । उदरे पूजयामि ॥ ५ ॥ ॐ ब्रह्मणे नमः । कटौ पूजयामि ॥६॥ ॐ जनार्दनाय नमः । जान्वोः पूजयामि ॥७ ॥ ॐ इन्द्राय नमः । पादयोः पूजयामि ॥८॥ इत्यष्टांगानि पूजयेत्॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्यबिंदुं निःक्षिप्य समुद्राः सचक्रकाः सायुधाः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सवाहनाः सशक्तिकाः सपरिवाराः सर्वोपचारैः स्वर्णाकर्षणभैरवाः पूजितास्तर्पिताः संतु इति वदेत ॥ इति प्रथमावरणम्॥ १ ॥ततस्त्रिको णमध्ये पूर्वकोणे ॐ बटुकभैरवाय नमः । बटुकभैरवश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥ इति सर्वत्र ॥ १ ॥ ईशानकोणे ॐ कालभैरवाय नमः। कालभैरवश्रीपा०॥२॥अग्निकोणे ॐ क्षेत्रपालभैरवाय नमः ।क्षेत्रपालभैरवश्रीपा०॥ ३॥इति संपूजयेत् ॥ ततः पुष्पां जलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥ १ ॥" इति पुष्पांजलिं दत्त्वा विशेषार्घ्याद्बिंदुं भैरवोपरि दत्त्वा समुद्राः सचक्रकाः सायुधाः सवाहनाः सशक्तिकाः सपरिवाराः सर्वोपचारैः स्वर्णाकर्षणभैरवाः पूजि तास्तर्पिताः संतु इति वदेत् ॥ इति द्वितीयावरणम् ॥२॥ ततः त्रिकोणाद्बहिः षट्कोणे आग्नेय्यादिक्रमेण अग्निकोणे ॐ आपदुद्धारणाय नमः । आपदुद्धारणश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥ नैर्ऋत्यकोणे । ॐ अजामलबद्धाय नमः । अजामलबद्धपादुकां पू जयामि तर्पयामि नमः ॥ २॥ वायुकोणे ॐ लोकेश्वराय नमः । लोकेश्वरश्रीपादुकां पूजयामि तर्पयामि नमः॥ ३॥ ऐशान्ये । ॐ स्वर्णाक र्षणभैरवाय नमः। स्वर्णाकर्षणभैरवश्रीपादुकां पूजयामि तर्पयामि नमः॥४॥प्राच्याम् । ॐ मम दारिद्र्यविद्वेषणाय नमः। मम दारिद्र्यविद्वेषण श्रीपादुकां पूजयामि तर्पयामि नमः ॥ ५ ॥ पश्चिमे । ॐ श्रीमहाभैरवाय नमः श्रीमहाभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ६ ॥ इति पूजयेत॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥ १ ॥" इति पुष्पांजलिं दत्त्वा विशेषार्घ्याद्बिंदुं भैरवोपरि दत्त्वा समुद्राः सचक्रकाः सायुधाः सवाहनाः सशक्तिकाः सपरिवाराः स्वर्णाक

For Private And Personal Use Only

षणभैरवाः सर्वोपचारैः पूजितास्तर्पिताः संतु इति वदेत् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो वृते पूर्वादिक्रमेण ॐ असितांगभैरवाय ब्राह्मीशक्तिसहिताय नमः । ब्राह्मीशक्तिसहितासितांगभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥ ॐ रुरुभैरवाय माहेश्वरीशक्तिसहिताय नमः । माहेश्वरीशक्तिसहितरुरुभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ २ ॥ ॐ चंडभैरवाय कौमारीशक्तिसहिताय नमः। कौमारीशक्तिसहितचंडभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥३॥ ॐ क्रोधभैरवाय वैष्णवीशक्तिसहिताय नमः । वैष्णवीशक्तिसहितक्रोधभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥४॥ ॐ उन्मत्तभैरवाय वाराहीशक्तिसहिताय नमः । वाराहीशक्तिसहितोन्मत्तभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ५ ॥ ॐ कपालिभैरवाय नारसिंहीशक्तिसहिताय नमः । नारसिंहीशक्तिसहितकपालिभैरवश्रीपादुकां पूजयामि तर्पयामि नमः॥ ६ ॥ ॐ भीषणभैरवाय चामुंडाशक्तिसहिताय नमः। चामुण्डाशक्तिसहितभीषणभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ७ ॥ ॐ संहारभैरवाय चंडिकाशक्तिसहिताय नमः । चंडिकाशक्तिसहितसंहारभैरवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ८ ॥ इत्यष्टौ भैरवान् पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य " अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥ १ ॥" इति पुष्पांजलिं दत्वा विशेषार्घाद्बिंदुं भैरवोपरि दत्वा समुद्राः सचक्रकाः सायुधाः सवाहनाः सशक्तिकाः सपरिवाराः स्वर्णाकर्षणभैरवाः सर्वोपचारैः पूजितास्तर्पिताः संतु इति वदेत् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततो वर्तुलाद्बहिरष्टदले पूर्वादिक्रमेण ॐ आदित्याय स्वशक्तिसहिताय नमः । स्वशक्तिसहितादित्यश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ स्वर्णाकर्षणभैरवपूजनयन्त्रम्.



For Private And Personal Use Only

॥ ७६८ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ स्वर्णाकर्षणभैरवपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ सोमाय स्वशक्तिसहिताय नमः । स्वशक्तिसहितसोमश्रीपादुकां पूजयामि तर्पयामि नमः ॥२॥ ॐ भौमाय स्वशक्तिसहिताय नमः । स्वशक्तिसहितभौमश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ३ ॥ ॐ बुधाय स्वशक्तिसहिताय नमः । स्वशक्तिसहित बुधश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ४ ॥ ॐ जीवाय स्वशक्तिसहिताय नमः । स्वशक्तिसहित जीवश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ५॥ ॐ शुक्राय स्वशक्तिसहिताय नमः । स्वशक्तिसहितशुक्रश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ६ ॥ ॐ शनैश्चराय स्वशक्तिसहिताय नमः । स्वशक्तिसहित शनैश्चरश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ७ ॥ ॐ राहवे केतवे च स्वस्वशक्तिसहिताय नमः । स्वस्वशक्तिहिताराहुकेतुश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ८ ॥ इति नवग्रहान् पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य " ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं पंचमावरणार्चनम् ॥ ५ ॥ " इति पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं भैरवोपरि दत्त्वा समुद्राः सचक्रकाः सायुधाः सवाहनाः सशक्तिकाः सपरिवाराः स्वर्णाकर्षणभैरवाः सर्वोपचारैः पूजितास्तर्पिताः संतु इति वदेत् ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुराभ्यंतरे देवदक्षिणतः ॐ पूजाविधिसिद्ध्यै नमः । पूजाविधिसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः ॥ १ ॥ ॐ रससिद्ध्यै नमः । रससिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः ॥ २ ॥ ॐ स्वर्णसिद्ध्यै नमः । स्वर्णसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः ॥ ३ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिं गृहीत्वा मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं षष्ठमावरणार्चनम् ॥ १ ॥ " इति पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं भैरवोपरि दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुराद्बहिः देववामभागे ॐ भूतप्रेतपिशाचवेतालासुरेभ्यो नमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूतप्रेतपिशाचवेतालासुरश्रीपादुकां पूजयामि तर्पयामि । इति पूजयेत ॥ इति सप्तमावरणम् ॥ ७ ॥ ततो भूपुरे इंद्रादिदशदिक्पालान् तद्बाह्ये वज्राद्यायुधानि च पूजयेत॥८॥९॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य देवं ध्यात्वा जपं कुर्यात् ॥अस्य पुरश्चरणं लक्षजपः॥ तथा च । "लक्षं जपेद्दशांशेन पायसैर्जुहुयात्सुधीः॥दशांशं तर्पयेत्पश्चाद्धोमयेच्चदशांशकम् ॥ १ ॥ ब्राह्मणान्भोजयेत्पश्चान्मंत्रसिद्धिर्न संशयः ॥ एवं सिद्धे कृते मंत्रे अयुतं प्रजपेन्मनुम् ॥ २ ॥ दारिद्र्यं दूरमुत्क्षिप्य जायते धनदोपमः ॥ करवीरैर्जातिपुष्पैर्जपादाडिमसंभवैः ॥ ३ ॥ रक्तप्रसूनैर्जुहुयात्सौभाग्यं च समश्नुते ॥ सिद्धद्रव्येण जुहुयाल्लभ्यंते चाष्टसिद्धयः ॥ ४ ॥ पायसेनापि जुहुयाल्लभ्यते सकलं फलम् ॥ आज्यं च जुहुयाद्देवि ऐहिकामुष्मिकं फलम् ॥ ५ ॥ मंत्रसिद्धिं च लभते चंदनादींधनैः क्रमात् ॥ इति स्वर्णाकर्षणभैरवसप्तपंचाशदक्षरमंत्रपुरश्चरणप्रयोगः ॥ अथ बटुकभैरववीरसाधनप्रयोगः ॥ श्रीपार्वत्युवाच ॥ भगवन्देवदेवेश रहस्यं वटुकस्य मे॥ब्रूहि येन वशीकुर्युः साधका भैरवं शिवम् ॥१॥ ईश्वर उवाच ॥ शृणु देवि परं गोप्यं कथयामि सुशोभने॥रहस्यं सिद्धिदं साक्षाद्वटुकस्य महात्मनः ॥२ ॥ सर्वे वटुकदेवस्य साधने ये निरूपिताः ॥ उपाया निष्फला एव विनकं वीरसाधनम् ॥ ३ ॥ ये श्चान्यसाधनं हित्वा उपायं चान्यमाश्रयत् ॥ न च सिद्धिमवाप्नोति नरो वर्षशतैरपि॥४॥तत्र प्रयोगो यथा ॥ साधकेन्द्रः कृतनित्यक्रियः पालाशपत्रकृतषोडशपुटेषु जलेन प्रफुल्लितान् सुपक्वान् माषान् मुद्गान् मसूरान् चणकान् ओदनक्षीरापूपान् सुहालीन् एकैकपदार्थं द्विद्विपात्रे एवं षोडशपात्रे संपूर्य अन्यपात्रे किंचिदधिकं च पूर्वोक्तं सर्वं कन्यया कर्तितं कर्पाससूत्रं कुंकुमेन रंजितान् क्षीरवृक्षभवानष्टौ कीलान् स्तंभार्थमेकं कीलं तेभ्यः स्थलान्नव कीलान् गंधाक्षतपुष्पधूपदीपान् अष्टौ तांबूलानि च फलानि गृहीत्वा उत्तरसाधकसहितः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्मशाननिकटे गत्वा पादौ प्रक्षाल्य आचम्य स्वेष्टदेवतां ध्यात्वा बद्धाञ्जलिरिदं वाक्यं वदेत् । "ॐ अत्र श्मशाने याः काश्चिद्देवता निव संति हि ॥ ताः प्रयच्छंतु मे सिद्धिं प्रसन्नाः संतु पांतु माम् ॥ १ ॥" इति संप्रार्थ्य आत्मरक्षां कुर्यात् ॥ तथा च । अक्षतानादाय "ॐ पूर्वे मां शंकरः पातु तथाग्नेय्यां च शूलधृक् ॥ कपाली दक्षिणे पातु नैर्ऋत्ये जटिलोवतु ॥ १ ॥ पश्चिमे पार्वतीनाथो वायव्ये प्रम थाधिपः ॥ उत्तरे मुंडमालोव्यादैशान्ये वृषभध्वजः ॥ २ ॥ ऊर्ध्वं पातु तथा शंभुरधस्ताद्धूलिधूसरः ॥ अग्रतो भैरवः पातु पृष्ठतः पातु खेचरः ॥ ३ ॥ दक्षिणे भचरः पातु वामे च पिशिताशनः ॥ केशान्पातु विशालाक्षो मूर्धानं च मरुत्प्रियः ॥ ४ ॥ मस्तकं पातु भृग्वीशो नेत्रे पातु महामनाः ॥ कपोलौ पातु वीरेशो गंडौ गंडाभिमर्दनः ॥ ५ ॥ उत्तरोष्ठे विरूपाक्षो ह्यधरे योगिनीप्रियः ॥ अक्षेषु दक्षविध्वंसी चिबुके तु कपालधृक् ॥ ६ ॥ कण्ठे रक्षतु मां देवो नीलकण्ठो जगद्गुरुः ॥ दक्षस्कंधे गिरीन्द्रेशो वामस्कंधे वसुंजयः ॥ ७ ॥ दक्षिणे च भुजे सर्वमंत्रनाथः सदाऽवतु ॥ वामे भुजे सार्वभौमो हृदये पातु पाण्डुरः ॥ ८ ॥ दक्षहस्ते पशुपतिर्वामे पातु महेश्वरः॥ उदरे सर्वकल्याणकारकोवतु मां सदा ॥ ९ ॥ नाभौ कामप्रविध्वंसी जंघे पातु दयामयः ॥ जानुनी पातु जामित्रो गुल्फौ गौरीपतिः सदा ॥ १० ॥ पादपृष्ठे सामनिधिस्तथा पादांगुलीर्हरः ॥ पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥ ११ ॥" इति आत्मरक्षामंत्रान्स पठित्वा पूर्वादिदिक्षु रक्षाबीजमंत्रान् पठेत् ॥ ॐ ह्रांह्रींहूँहः नमः पूर्वे ॥१॥ ॐ ह्रिं हुँ ह्रां नमः आग्नेये॥ २ ॥ ॐ ह्रीश्रीं नमः दक्षिणे ॥ ३ ॥ ग्लूँ ब्लूँ नगनग नमः नैर्ऋत्ये ॥ ४ ॥ ॐ प्रूँ प्रूँ प्रूँ संसः नमः पश्चिमे ॥ ५ ॥ ॐ श्रां श्रां नमः वायव्ये ॥ ६ ॥ ॐ भ्रां भ्रां भैरवाय नमः उत्तरे ॥ ७ ॥ ॐ ब्रांब्रींब्रूँफट् नमः ऐशान्ये ॥ ८ ॥ ॐ ग्लौं ब्लूँ नमः ऊर्ध्वे ॥ ९ ॥ ॐ घ्रांघ्रींघ्रः नमः अधोदेशे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ १० ॥ इति पठन् नमस्कुर्यात ॥ ततः पूर्वाद्यष्टदिक्षु कीलाष्टकं मध्यश्मशाने च स्तंभनार्थं स्थलकीलकं च निखाय पूजासाहित्यं मध्यस्तंभसमीपे संस्थाप्य पूर्वाभिमुखो भैरवं प्रार्थयेत ॥ ॐ भां भैरवाय नमः । भां भैरव भैरव भयंकर हर मां रक्षरक्ष हुँ फट् स्वाहा ॥ इति प्रार्थयेत ॥ ततः सिद्धमाषादिभरितपलाशपुटकं गंधपुष्पधूपदीपादिपूजासामग्रीं गृहीत्वा पायसोदकपात्रहस्तो निर्भयः पूर्वकीलक समीपं गत्वा तत्र ॐ लं इन्द्र सांगसपरिवार इहागच्छागच्छ इतीन्द्रमावाह्य ततः ऐरावतारूढं वज्रहस्तं पीतवर्णं सहस्राक्षं सुरगणपरिवारम् ॥ इति ध्यात्वा ततः "ॐ लं इन्द्राय नमः । आसनार्घ्यपाद्याचमनस्नानगंधपुष्पाक्षतधूपदीपोपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र माषपुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रांह्रींह्रूं भो इन्द्र सुरनायक शीघ्रं मे प्रसन्नो भव सनातनीं सिद्धिं मे देहि रक्ष मामिमं माषबलिं गृह्णगृह्ण हुँ फट्" इति मंत्रेण तस्मिन् पात्रे जलं बलिंचोत्सृज्य तांबूलं च दत्त्वा प्रणमेत ॥ १ ॥ तत आग्नेयकोणगतकीलसमीपं गत्वा तत्र "ॐ रं अग्ने सांग सपरिवार इहागच्छागच्छ इत्यग्निमावाह्य ततः मेषारूढं शक्तिहस्तं त्रिनेत्रं तेजोनिधिं ध्यात्वा ततो रं अग्नये नमः ॥ इत्यासनार्घ्यपाद्याचमनस्नानगंधपुष्पाक्षतधूपदीपोपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र मुद्गभरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं, स्पृशन् "ॐ रँराँरुँरूँरिंरींहिंहुँहोंअग्ने तेजोनायक शीघ्रं मे प्रसन्नो भव सनातनीं सिद्धिं मे देहि इमं मुद्गबलिं गृह्णगृह्ण हुँ फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत् ॥ २ ॥ ततः दक्षिणकीलसमीपं गत्वा तत्र ॐ मं यम सांग सपरिवार इहागच्छागच्छ इति यममावाह्य महिषारूढं कृष्णवर्णं दंडहस्तं प्रेतगणपरिवेष्टितं ध्यात्वा ॐ मं यमाय नमः। इत्यासनाद्युपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मसूरभरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् ॐ भ्राँ भ्रीं भ्रूँ भो यम प्रेताधिपते शीघ्रं मे प्रसन्नो भव इमं मसूरबलिं गृह्णगृह्ण हुँ फट् इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत् ॥ ३॥ ततः नैर्ऋत्यकोणगतकीलसमीपं गत्वा तत्र ॐ क्षं निर्ऋते सांग सपरिवार इहागच्छागच्छ इति नैर्ऋतिमावाह्य प्रेतारूढं धूम्रवर्णं खड्गहस्तं रक्षोभिः परिवृतं ध्यात्वा ॐ क्षं निर्ऋतये नमः इत्यासनाद्युपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र चणकपूरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ फ्रेंफ्रंफ्रेंहूँहूँग्रेंग्रेंह्रांह्रौंभोभो रक्षनाथ शीघ्रं मे प्रसन्नो भव इदं चणकबलिं गृह्णगृह्ण हुँ फट् ॥" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत ॥ ४ ॥ ततः पश्चिमदिग्गतकीलसमीपं गत्वा तत्र ॐ व वरुण सांग सपरिवार इहागच्छागच्छ इति वरुणमावाह्य मकरारूढं पाशहस्तं श्वेतवर्णं यादोगणपरिवारसहितं ध्यात्वा ॐ वं वरुणाय जलनाथाय नमः इत्यासनाद्युपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्रौदनपूरितपात्रं निधाय दक्षहस्तेन जलं गृहीत्वा वामहस्ते तत्पात्रं स्पृशन् "ॐ ब्रांब्रींब्रूँ भोभो वरुण जलनाथ शघिं मे प्रसन्नो भव सिद्धिं मे देहि इममोदनबलिं गृह्णगृह्ण हुँ फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत् ॥५॥ ततो वायुकोणगतकीलससीपं गत्वा तत्र ॐ यँ वायो सांग सपरिवार इहागच्छागच्छ इति वायुमावाह्य मृगारूढं वृक्षायुधधरं स्वमरुद्गण सहितं ध्यात्वा ॐ यं वायवे नमः । इत्यासनाद्यपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र पायसपूरितं पुटकं निधाय दक्ष हस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ वांवींवूं ॐ ब्रांब्रांब्रिं भोभो वायो भुवनपते शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इमं पायसबलिं गृह्णगृह्ण हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्त्वा प्रणमेत॥ ६॥ ततः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्तरदिग्गतकीलसमीपं गत्वा तत्र ॐ कुं कुबेर सांग सपरिवार इहागच्छागच्छ इति कुबेरमावाह्य नरवाहनं गदाहस्तं शुक्लवर्णं यक्षगण परिवेष्टितं ध्यात्वा ॐ कुं कुबेराय नमः इत्यासनाद्युपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्रापूपपूरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ कूंकूंकूं ॐ क्रांक्रांक्रां भोभो यक्षनाथ शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इममपूपबलिं गृह्णगृह्ण हुं फट्।" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत ॥ ७ ॥ ततः ईशानकोणगतकीलसमीपं गत्वा तत्र ॐ हं ईशान सांग सपरिवार इहागच्छागच्छ इतीशानमावाह्य वृषभारूढं शूलहस्तं श्वेतवर्णं विद्यागणसेवितमीशानं ध्यात्वा ॐ हं ईशानाय नमः। इत्यासनाद्युपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र शष्कुलीपूरितपुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ श्रांश्रींश्रूं ॐ श्रांश्रांश्रां भोभो ईशान विद्याधिपते शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इमं शष्कुलीबलिं गृह्णगृह्ण हुं फट्।" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत ॥ ८ ॥ इत्यष्टदिक्पालेभ्यो बलिं दत्त्वा ततः मध्यस्तंभसमीपे गत्वा निर्भयः सन् ततः ह्रांह्रींह्रूं स्तंभाय नमः। इत्यासनाद्युपचारैः संपूज्य मंत्रमयं कवचं पठेत् ॥ कवचं मंत्रमयं यथा ॥ "ॐ ह्रांह्रींह्रूंह्रः क्षांक्षींक्षूंक्षः ग्लांग्लींग्लूंग्लः ग्रांग्रींग्रूंग्रः श्रांश्रींश्रूंश्रः श्रोंश्रोंश्रोंश्रों क्रोंक्रोंक्रोंक्रों श्रोंश्रोंश्रोंश्रों ज्रोंज्रोंज्रोंज्रों हुंहुंहुंहुंहुंहुंहुंहुं फट् सर्वतो रक्षरक्षरक्षरक्ष भैरवनाथनाथ हुं फट्।" इति मंत्ररूपकवचद्वारा स्वशरीरे व्यापकरूपेणात्मरक्षां कृत्वा स्तंभसमीपे स्वासने पूजिते

१ अस्य प्रसादमासाद्य साधको निर्भयो भवेत्। सर्वरक्षाकरः प्रोक्तः साधकाभीष्टदायकः ॥ एवं विधाय मतिमांस्तनौ रक्षां विशालधीः । वीरशांतिमधो कुर्यात्सर्वकार्यस्य सिद्धये ॥ तया सिद्धयंति कार्याणि साधकानां महेश्वरि । यावत्कुर्यान्न वीराणां शांतिसाधकसत्तमः ॥ तावन्न जायते सिद्धिः साधकस्य कथंचन ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ वीरसाधनपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ६२०



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ वीरसाधनपूजनयन्त्रम्



For Private And Personal Use Only

पूर्वाभिमुख उपविश्य स्वपुरतः स्तंभात् पश्चिमे भूतले यंत्रं लिखित्वा तन्मध्ये देवमावाह्य आसनादिषोडशोपचारैः संपूज्य अंगादि संपूज्य तत्राष्टदले पूज्यपूजकयोर्मध्ये प्राचीं तदनुसारेणान्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ असितांगभैरवाय नमः ॥ १ ॥ ॐ रुरुभैरवाय नमः ॥ २ ॥ ॐ चण्डभैरवाय नमः ॥ ३ ॥ ॐ क्रोधभैरवाय नमः ॥ ४ ॥ ॐ उन्मत्तभैरवाय नमः ॥ ५ ॥ ॐ कपालभैरवाय नमः ॥ ६ ॥ ॐ भीषणभैरवाय नमः ॥ ७ ॥ ॐ संहारभैरवाय नमः ॥ ८ ॥ इत्यष्टौ भैरवान् पूजयेत् ॥ ततः षोडशदले प्राच्यादिक्रमेण ॐ कुलिशाय नमः ॥ १ ॥ ॐ सुकुलीशाय नमः ॥ २ ॥ ॐ जामित्राय नमः ॥ ३॥ ॐ रामठाय नमः ॥४॥ ॐ अरिभाय नमः ॥ ५ ॥ ॐ प्रचंडाय नमः ॥ ६ ॥ ॐ चण्डकेशाय नमः ॥ ७ ॥ ॐ चण्डात्मने नमः ॥ ८ ॥ ॐ चामराय नमः ॥ ९ ॥ ॐ चरित्राय नमः ॥ १० ॥ ॐ चमत्काराय नमः ॥ ११ ॥ ॐ चंचलाय नमः ॥ १२ ॥ ॐ चारुभूषणाय नमः ॥ १३ ॥ ॐ चामीकराय नमः ॥ १४ ॥ ॐ चारुवाहाय नमः ॥ १५ ॥ ॐ चारुवाहांकिताय नमः ॥ १६ ॥ इति बटुके षोडशमित्रान् पूजयेत् ॥ तद्बहिरष्टदलेषु प्राच्यादिक्रमेण ॐ ब्राह्म्यै नमः ॥ १ ॥ ॐ माहेश्वर्यै नमः ॥ २ ॥ ॐ कौमार्यै नमः ॥ ३ ॥ ॐ वैष्णव्यै नमः ॥ ४ ॥ ॐ वाराह्यै नमः ॥ ५ ॥ ॐ नारसिंह्यै नमः ॥ ६ ॥ ॐ चामुंडायै नमः ॥ ७ ॥ ॐ चंडिकायै नमः ॥ ८ ॥ इत्यष्टौ मातृकाः पूजयेत् ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुनः मध्ये श्रीवटुकभैरवं धूपादिनमस्कारांतं पूजयित्वा पायसनैवेद्यं दत्त्वा अक्षतानादाय स्थापितयंत्रदेवतामंडले विकिरन् वीरशांतिं पठेत् । तथा च । "ॐ श्मशानदेशे ये वीराः शिरस्यादाय शासनम् । मम स्थिता निकृंतंति साधकानां मनोरथान् ॥ अपूजिताः पूजितास्ते सर्वकाम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फलप्रदाः ॥ १ ॥ इति वीरशांतिं पठित्वा तत्रैव ॐ चंड आयाहि ॥ १ ॥ ॐ प्रचंड आयाहि ॥ २ ॥ ॐ ऊर्ध्वकेश आयाहि ॥ ३ ॥ ॐ भीषण आयाहि ॥ ४ ॥ ॐ प्रभीषण आयाहि ॥ ५ ॥ ॐ व्योमकेश आयाहि ॥ ६ ॥ ॐ व्योमवाह आयाहि ॥ ७ ॥ ॐ व्योमव्यापक आयाहि ॥ ८ ॥ इति पृथक्पृथक् गंधादिभिरुपचारैः संपूज्य पायसनैवेद्यं च पृथक्पृथक् समर्प्य निर्भयः सन् पश्चिमाभिमुखः प्राणायामकृष्यादिन्यासपूर्वकं प्रयोगोक्तान् न्यासान् कृत्वा प्राग्वन्मालां संपूज्य मूलमंत्रस्याष्टाक्षरपदोच्चारणपूर्वकमुच्चैःस्तवराजं पठित्वा प्रसन्नचित्तो मूलमंत्रं जपेत् ॥ तदा देवतायामागतायां वामहस्तेन पायसपात्रमादाय दक्षिणहस्तेन देवं भोजयेत् ॥ ततस्तृप्तो देवो वरं वरयेति ब्रूयात्तदा दंडवद्भूमौ प्रणम्य निजेप्सितवरं गृहीत्वा स्वयं गत्वा महोत्सवं कुर्यात् ॥ तथा च (रुद्रयामले) " भैरवाय समीपे तु वामहस्तेन पायसम् ॥ भोजयेच्च जपं कुर्यान्निर्भयः प्रीतमानसः ॥ १ ॥ तृप्तो देवो यदा ब्रूयाद्वरं वरय वाञ्छितम् ॥ प्रणम्य दंडवद्भूमौ वाञ्छितं वरमुच्चरन् ॥ २ ॥ गृहेचागत्य प्रयत उत्सवं च समाचरेत् ॥ अनेन मनुना देवि सिद्धो भवति भूतले ॥ ३ ॥ असाध्यं नास्ति लोकेषु सत्यंसत्यं मयोदितम् ॥ ४ ॥" इति वीरसाधनप्रयोगः ॥

अथ वटुकभैरवदीपदानप्रयोगः ॥ उक्तं च (शिवागमसारे) पार्वत्युवाच ॥ देवदेव जगन्नाथ भक्तानुग्रहकारक ॥ दीपदानविधिं ब्रूहि वटुकस्य महात्मनः ॥ १ ॥ महादेव उवाच ॥ नोक्तः पूर्वं महेशानि दीपो वै भैरवस्य च ॥ आपत्काले महादेवि दीपयागं समाचरेत् ॥ २ ॥ न तिथिर्न च नक्षत्रं न योगः करणं शशी ॥ न राशिर्न च सूर्यादिग्रहान्नैव विचिंतयेत् ॥ ३ ॥ यथाकामनया ध्यात्वा दीपदानं प्रयोजयेत् ॥ दीपनाशे पुनर्दीपं कृत्वा शांतिं तु कारयेत् ॥ ४ ॥ त्रिपंचसप्तनवभिः पात्रं कृत्वा विचक्षणः ॥ शुभे सौम्यमुखो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीपो ह्यशुभे दक्षिणामुखः ॥ ५ ॥ (तत्र मुहूर्तनिर्णयः) वैशाखश्रावणाश्वीनकार्तिकेयादिपंचके ॥ शुक्लपक्षे प्रकर्तव्या यावत्कृष्णा
च पंचमी ॥ १ ॥ सप्तमी पूर्णिमा चैव द्वितीया पंचमी तथा ॥ त्रयोदशी च दशमी तृतीया प्रतिपत्तथा ॥ २ ॥ द्वादशी च तथा
पूर्णा ह्येताः स्युस्तिथयः शुभाः ॥ वृद्धिवैधृतिपाताश्च ये ते योगाः शुभाः स्मृताः ॥ ३ ॥ बालवं कौलवं चैव गरं चेति शुभानि वै ॥
ग्रीष्मं विना शुभाः पंच ऋतवः परिकीर्तिताः ॥ ४ ॥ मासद्वयात्मकाः श्रेष्ठा दिनं दिनार्द्धमेव च ॥ ५ ॥ सूर्योदयं समारभ्य यावदस्तं
गतो रविः ॥ अहोरात्रप्रमाणेन ग्रीष्माद्याः परिकीर्तिताः ॥ ६ ॥ दिवा पूर्वाह्णकोः कालः रात्रौ निशीथ एव च ॥ यद्वा सर्वत्र रात्रौ
तु सूर्यचन्द्रोपरागयोः ॥ अर्द्धोदये महाष्टम्यां काळमोहोच रात्रिके ॥ ७ ॥ (अथ कार्यपरत्वेन पात्रविस्तारं तैलमानम्) विंशत्पल
मिते पात्रे बुध्नोच्छ्राये षडंगुलम् ॥ विस्तारे चांगुलान्येव षोडश परिकीर्तितम् ॥ १ ॥ पंचाशत्पलगव्यं च वश्ये चौर्यादिकर्मणि ॥
त्रिशद्दशपले पात्रे मानं तद्वत्प्रकीर्तितम् ॥ षष्टिपलमिते पात्रे बुध्नोच्छ्राये नवांगुलम् ॥ अंगुलानि चतुर्विंशदायामे परिकल्पयेत् ॥ ३ ॥
पंचसप्तमिते तैले सर्वशत्रुविनाशनम् ॥ द्विपंचाशत्पले पात्रे बुध्नोच्छ्राये तु षण्मित ॥ ४ ॥ शतं पलमिते तैले दीपाद्वैरिविनाशनम् ॥ शतं
पलमिते पात्रे चोच्छ्रायो द्वादशांगुलः ॥ ५ ॥ द्वात्रिंशच्च ह्यायामे तन्मध्ये तु सहस्रकम् ॥ सर्वकर्मणि सिद्धिः स्याद्दीपे पलसह
स्रके ॥ ६ ॥ सपादशतपात्रे च पंचोत्तरशताधिके ॥ पंचदशांगुलोच्छ्रायं व्यायामे षट् च त्रिंशके ॥ ७ ॥ अयुतपलदीपश्च निगडाद्
दिमुक्तये ॥ सहस्रपलदीपे च बंदिमोक्षः प्रजायते ॥ ८ ॥ त्रिंशत्पलमिते पात्रे मान्यं चैव तु पूर्ववत् ॥ त्रिंशत्पलमिते तैले दिनान्येकोनविं
शतिः ॥ ९ ॥ कन्याभिकांक्षी तैलेन प्रत्यहं दीपमाचरेत् ॥ इच्छितां लभते कन्यां भैरवस्य प्रसादतः ॥ १० ॥ नृकपालमिते

For Private And Personal Use Only

पात्रे चोच्छ्राये तु रसागुलम् ॥ विंशत्पलमिते दीपे प्रत्यहं विंशतिर्दिने ॥ ११ ॥ सर्वरोगविनाशाय क्षयापस्मारदारुणे । दशपलमिते पात्रे बुध्नोच्छ्राये तु त्रिंशतम् ॥ १२ ॥ दशपलमिते तैलं प्रत्यहं समवासरे ॥ राजवश्यकरं क्षिप्रं यदि साक्षाज्जगत्पतिः ॥ नित्यदीपप्रमाणे तु पात्रं पलत्रयं स्मृतम ॥ १३ ॥ (तंत्रांतरेपि) शतमष्टोत्तरं चाथ पलानि प्रथमे विधौ ॥ अष्टाशीति द्वितीये च परेष्टाविंशतिः प्रिये ॥ सर्वकार्येषु देवेशि संख्या प्रोक्ता त्रिधाऽत्र वै ॥ १४ ॥ (अथ कार्यपरत्वेन पात्रे धातुमानम्) सौवर्णं सिद्धिदं पात्रं वश्ये रौप्यं प्रकल्पयेत ॥ विद्वेषणकरं लौहं मारणे मृण्मयं तथा ॥ १५ ॥ उच्चाटनकरं कांस्यं मोहे पित्तलजं स्मृतम् ॥ अन्योक्तसर्वकार्येषु सर्वाभावे तु ताम्रजम् ॥ १६ ॥ (तंत्रांतरेपि) गोधूमाश्च तिला माषा मुद्गाश्च तण्डुलाः क्रमात् ॥ पंचधान्यमिदं प्रोक्तं सर्वदा दीपदापने ॥ १७ ॥ वश्ये तण्डुलपिष्टोत्थं मारणे माषपिष्टजम् ॥ तिलपिष्टमसूत्कृतमुच्चाटनविधौ स्मृतम् ॥ १८ ॥ प्रियस्यागमने प्रोक्तं गोधूमोत्थं सतण्डुलम् ॥ मोहने मुद्गजं प्रोक्तं पात्रद्रव्यमनुक्रमात ॥ १९ ॥ (अथ कार्यपरत्वेन तैलमानम्) गव्यमाकर्षणे कुर्ये कौस्तुभं स्तंभने स्मृतम्॥ तिलतैलं तथा नव्यं घृतं वश्ये प्रकल्पयेत्॥ १ ॥कटुतैलं द्वेषणे च मारणे राजिकं स्मृतम् ॥ आज्यं चौष्ट्रं माहिषं च मेषमुच्चाटने मतम् ॥२॥ बंदिबंधनमोक्षे च तथा भूतपिशाचके ॥ सार्षपं तैलमापूर्य दीपदानं विधीयते ॥ ३ ॥ अथवा तिलतैलं तु सर्वकार्ये प्रशस्यते ॥४॥ (अथ कार्यपरत्वेन वर्तिमानम्) एका पंच तथा सप्त एकविंशतिसंख्यया ॥ अयुग्माऽथ

---

१ (तंत्रांतरेपि) शुभकार्ये माषमयं विपरीते तु लोहजम् ॥ २(तंत्रांतरेपि) गोघृतेन कृते दीपे देवतावशमानयेत ॥ वश्यार्थमतसीतैलम् । मधुवृक्षजं तैलं विद्वेषे । उच्चाटनेकरंजतैलम् ॥ वादमोक्षे भूतपिशाचनिवारणे सर्षपतैलम् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकतव्या युग्मां नैव तु कारयेत ॥ १ ॥ (तंत्रांतरेऽपि) वर्तिका प्रकतव्या तिस्रो वा वर्तयस्तथा ॥ शतेन त्रिशतेनाथ सहस्रेणाथ वर्तिकाम् ॥ २ ॥ कारयित्वा शुभे पात्रे संस्थाप्य ज्वालयेत्तथा ॥ श्वेतं शांतौ तथा पीतं स्तंभे वश्ये तु रक्तकम् ॥ ३ ॥ मांजिष्ठं द्वेषणे प्रोक्तं मारणे कृष्णसूत्रजम् ॥ सर्वाभावे महादेवि श्वेतसूत्रं प्रशस्यते ॥ ४ ॥ (अथ दीपदानप्रयोगः ॥) तत्रात्मनो यजमानस्यवा चंद्रतारानुकूले शुभेह्नि तिथिवारसुलग्नेषु त्वरितकार्ये चेदमृतघटीषु शुभहोरायां वा दीपारंभं कुर्यात ॥ स च ग्रहणे संक्रांतौ कृष्णाष्टम्यां दुर्गोत्सवेऽर्धोदयादिमहापर्वसु कृतस्तात्कालिकफलप्रदो भवति ॥ दीपदानसंभारो यथा । कपिलागोमयम् १ चिंचायाम्लद्रव्यम् २ यथाकामनया दीपपात्रम् ३ यथोक्तमाज्यं तैलं वा ४: यथोक्ता वर्तयः ५ शीघ्रकार्ये पात्रपल ६३ द्रव्यपल १०८ तंतु १००० द्वितियपक्षे पात्रपल ३२ द्रव्यपल ८८ तंतु ३०० मध्यमप्रकारे पात्रपल १६ द्रव्यपल २८ तंतु १०० कनिष्ठपक्षे पात्रपल ८ द्रव्यपल ८ तंतु १६ नित्यदीपे पात्रपल ३ द्रव्यपल १ तंतु २१ शुभे दीपमुखमुत्तरे । साधकः पूर्वाभिमुखः । आधारयंत्रमुखमुत्तरे । अशुभे दीपयंत्रसाधकानां मुखं दक्षिणे । नित्ये षडंगुलान्यष्टखदिरकीलानि नैमित्तिके द्वादशांगुलानि कीलानि दीपाग्रे प्रथमकीलपूजनं दक्षिणावर्तं दीवडी ८ कीलप्रत्येक १ रक्तचंदनसिंदुरादिसुपक्वान् मापान कमलाकारं रक्तचंदनकवीरकुसुमाक्षतैर्युतं सदीपं बलिदानार्थमेकैके रात्रे एवाष्टपात्रे संपूर्य एवं च दीपदानात्पूर्वदिने सामग्रीं संपाद्य एकभक्तव्रतं कृत्वाऽपरदिने कृतोपवासो भूमौ स्वपेत् । दीपदानदिने ब्राह्मे मुहूर्ते चोत्थाय नित्यनैमित्तिकं समाप्य कंबलासन उपविश्य आदौ गणपतिपूजनं कृत्वा अर्घं संस्थाप्य देशकालौ संकीर्त्य श्रीमद्बटुकभैरवप्रीतिकामो दीपदानं कर्तुं ममेप्सितफलावाप्त्यै आचार्यं त्वामहं वृणे इत्याचार्य

For Private And Personal Use Only

वृत्वा वस्त्रभूषणानि निवेद्य दक्षिणां दत्त्वा "ॐ भक्त्या ममागतोऽहं ते पादयोर्भक्तवत्सल ॥ दीपकार्यं च भगवन् मंगार्थं वै नमो नमः ॥ ३ ॥" इति मंत्रेण दंडवन्नमस्कृत्य अन्यान् त्रीन् पंच सप्त नवैकादश वा ब्राह्मणान् वृणुयात् ॥ नैर्ब्राह्मणैः सहाचार्यैः पुण्याह वाचनादिनांदीश्राद्धांतानि कृत्वा भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च कृत्वा पद्धतिमार्गेण पंचदश न्यासान् कुर्यात् ॥ ततः सपादहस्तां समंततः चतुरस्रां चतुरंगुलोच्चां दीपवेदीं शोधितस्थले निर्माय कपिलागोमयेनोपलिप्य तस्योपरि रक्तचंदनेन बटुकभैरवप्रयोगोक्तयंत्रं लिखेत्॥ततो दीपवेदिकाग्रे तंडुलैरष्टदलं कृत्वा तस्योपरि कलशोक्तविधिना कलशं संस्थाप्य ततःस्वर्णा दिनिर्मितां बटुकप्रतिमामग्न्युत्तारणपूर्वकमासनमंत्रेणासनं दत्त्वा कलशोपरि विराजयित्वा प्राणान्प्रतिष्ठाप्य पाद्यादिनमस्कारांतं संपूज्य पुष्पांज लिं च दद्यात्॥ततो देशकालौ संकीर्त्य मम यजमानस्य वा सकलमनोरथसिद्धये प्रयोगानुसारेण चत्वारिंशद्दिनं वाऽष्टविंशतिदिनं वा एकविंशति दिनं वा पंचदशदिनं वा सप्तदिनपर्यंतममुकसंख्यामितेन पात्रेण घृतेन तैलेन वा अमुकसंख्याकाभिर्वर्तिभिर्दीपदानमहं करिष्ये इति संकल्प येत् ॥ ॐ अस्य श्रीबटुकभैरवदीपदानमालामंत्रस्य मन्मथ ऋषिः । पंक्तिश्छंदः। आपदुद्धारकबटुकभैरवो देवता वं बीजम् । ह्रीं शक्तिः। मम सर्वमनोरथसिद्धये दीपदाने विनियोगः ॥ ॐ मन्मथ ऋषये नमः शिरसि ॥ १ ॥ पंक्तिश्छंदसे नमः मुखे ॥ २ ॥ आपदु द्धारकबटुकभैरवदेवतायै नमः हृदि ॥ ३ ॥ वं बीजाय नमः गुह्ये ॥ ४ ॥ ह्रीं शक्तये नमः पादयोः ॥ ५ ॥ विनियोगाय नमः सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासं कृत्वा प्रयोगोक्तन्यासादिकं विधाय यथाकामं ध्यायेत् । ततः पूर्वोक्तदीपवेद्युपरि लिखितं यंत्रमक्षतैः पूर यित्वा तस्या वेद्या अष्टदिक्षु खदिरवृक्षोद्भवानष्टकीलान् निखाय तेषु कीलेषु पूर्वादिदिशमारभ्याष्टभैरवेभ्यो बलिं दद्यात् ॥ तथा च

मं० म० पूर्वकीलसमीपे जलेन चतुरस्रमंडलं कृत्वा तत्र माषपात्रं निधाय ॐ जयंतभैरवाय नमः ॥ इति गंधादिभिः जयंतं संपूज्य दक्षहस्ते जलं पू० खं० १
॥२४७॥ गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् ततः "ॐ ह्रीं जयंतभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" पं० तं०
इति मंत्रेण तस्मिन् पात्रे जलं बलिं चोत्सृज्य प्रणमेत् ॥ १ ॥ ततः आग्नेयकोणगतकीलसमीपे जलेन चतुरस्रमंडलं कृत्वा तत्र माषपात्रं तरं० १०
निधाय ॐ अघोरभैरवाय नमः ॥ इति गंधादिभिरघोरं संपूज्य दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् ततः "ॐ
ह्रीं अघोरभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" इति मंत्रेणास्मिन्पात्रे जलं बलिं चोत्सृज्य
प्रणमेत् ॥ २ ॥ ततः दक्षिणकीलसमीपे जलेन चतुरस्रमंडलं कृत्वा तत्र माषपात्रं निधाय ॐ चामीकराय नमः ॥ इति चामीकरं
संपूज्य दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् ततः "ॐ ह्रीं चामीकरभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां
रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" इति मंत्रेणास्मिन्पात्रे जलं बलिं चोत्सृज्य प्रणमेत् ॥ ३ ॥ ततः नैर्ऋत्यकोणगतकीलसमीपे जलेन
चतुरस्रमंडलं कृत्वा तत्र माषपात्रं निधाय ॐ असितांगभैरवाय नमः ॥ इति असितांगभैरवं संपूज्य दक्षहस्ते जलं गृहीत्वा
वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रीं असितांगभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" इति
मंत्रेणास्मिन्पात्रे जलं बलिं चोत्सृज्य प्रणमेत् ॥ ४ ॥ ततः पश्चिमकीलसमीपे जलेन चतुरस्रमंडलं कृत्वा तत्र माषपात्रं ॥ २४७ ॥
निधाय ॐ भीषणभैरवाय नमः ॥ इति भीषणभैरवं संपूज्य दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्
"ॐ ह्रीं भीषणभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" इति मंत्रेणास्मिन्पात्रे जलं बलिं चो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्सृज्य प्रणमेत्॥५॥ततो वायुकोणगतकीलसमीपे जलेन चतुरस्रमण्डलं कृत्वा तत्र माषपात्रं निधाय ॐ प्रचंडभैरवाय नमः॥इति प्रचंडभैरवं संपूज्य दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रीं चंडभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरु कुरु स्वाहा" इति मंत्रेणास्मिन्पात्रे जलं बलिं चोत्सृज्य प्रणमेत् ॥६॥ ततः उत्तरदिग्गतकीलसमीपे जलेन चतुरस्रमण्डलं कृत्वा तत्र माषपात्रं निधाय ॐ करालभैरवाय नमः ॥ इति करालं संपूज्य दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रीं करालभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" इति मंत्रेणास्मिन्पात्रे जलं बलिं चोत्सृज्य प्रणमेत्॥७॥ततः ईशानकोणगतकीलसमीपे जलेन चतुरस्रमंडलं कृत्वा तत्र माषपात्रं निधाय ॐ कपालभैरवाय नमः॥ इति कपालं भैरवं संपूज्य दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रीं कपालभैरव एह्येहि इमं सदीपं माषान्नबलिं गृह्णगृह्ण मां रक्षरक्ष अभीष्टं कुरुकुरु स्वाहा" इति मंत्रेणास्मिन्पात्रे जलं बलिं चोत्सृज्य प्रणमेत् ॥ ८ ॥ इत्यष्टदिक्षु बलिं दत्त्वा । ॐ गुरुभ्यो नमः ॥१॥ ॐ परमगुरुभ्यो नमः ॥२॥ ॐ परात्परगुरुभ्यो नमः ॥३॥ ॐ परमेष्ठिगुरुभ्यो नमः॥४॥ ॐ ग्लौं गणपतये नमः॥५॥ ॐ क्षौं क्षेत्रपालाय नमः॥६॥ॐ वं बटुकभैरवाय नमः ॥ ७ ॥ इति नत्वा ततो यथाकामं कृतं दीपं वेदीमध्ये तंडुलोपरि संस्थाप्य गायत्रीमंत्रेण यथाकामं घृतं तैलं वाऽऽपूर्य यथाकामं वर्तिं निधाय यावत्संख्यकास्तन्तवस्तावतीभिर्मंत्रावृत्तिभिरभिमंत्र्य मूलेन दीपानुरूपां शलाकां दीपे निधाय दक्षिणभागे छुरिकां निधाय "ॐ ह्रीं छ्रीं छुरिके मम शत्रूञ्छेदिनि रिपून् निर्दलयनिर्दलय मां पाहिपाहि स्वाहा" इति छुरिकां संपूज्य ततः ॐ ह्रां ह्रीं सर्वांगसुंदर्य्यै शलाकायै नमः ॥ इति शलाकां पूजयेत । ततो मूलेन गायत्रीमंत्रेण वा दीपं प्रज्वाल्य पूर्ववत्पुनर्न्यासादिकं कृत्वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हस्ते कुशजलगंधाक्षतपुष्पाणि गृहीत्वा "ॐ ऐं श्रीं क्लीं ऐं श्रीं सर्वज्ञाय प्रचंडपराक्रमाय वटुकभैरवाय इमं दीपं गृहाण सर्वकार्याणि साधयसाधय दुष्टान्नाशय२ त्रासय २ सर्वतो मम रक्षां कुरुकुरु हुं फट् स्वाहा" इति दीपं संकल्प्य जलं च दीपाग्रे निक्षिप्य पुनर्दक्षहस्ते जलमादाय "ॐ गृहाण दीपं देवेश वटुकेश महाप्रभो॥ ममाभीष्टं कुरु क्षिप्रमापद्भ्यो मां समुद्धर॥ १॥" मूलं पठित्वा वटुकभैरवाय इमं दीपं निवेदयामि नमः॥ इति जलं भूमौ निक्षिप्य दीपं भैरवाय निवेदयित्वा दीपस्य प्राणप्रतिष्ठां कुर्यात्। तथा च करेणाच्छाद्य ॐ आं ह्रीं क्रों यँरँलँवँशँषँसँहौं अँसँहंमः ह्रीं ॐ हंसः अस्य वटुकभैरवदीपस्य प्राणा इह प्राणाः। पुनः अस्य वटुकभैरवदीपस्य जीव इह स्थितः। पुनः अस्य वटुकभैरवदीपस्य सर्वेन्द्रियाणि इह स्थितानि। पुनः अस्य वटुकभैरवदीपस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥४॥ इति प्राणान्प्रतिष्ठाप्य तत्र दीपे वटुकमावाह्य यथाकामं ध्यात्वा पाद्यादिपुष्पांतैरुपचारैः पद्धतिमार्गेण संपूज्य प्रयोगोक्तावरणपूजां च कृत्वा धूपादिनमस्कारांतं संपूज्य बलिं दद्यात्। तथा च दीपस्य वामभागे त्रिकोणवृत्तषट्कोणमंडलं कृत्वा ॐ बलिमंडलाय नमः ॥ इति मंडलं संपूज्य तत्राधारं संस्थाप्य तत्र शाल्योदनशर्करालाजाचूर्णगुडापूपशष्कुलीसूपपायसान्नादिकं घृतप्लुतमनेकजातीयं बलिद्रव्यं (तंत्रांतरेपि) घृतमधुशर्करामोदकमाषान्नवटकं च विविधभक्ष्यद्रव्याणि यथासंभवं माषमुद्गान्नप्रधानबलिद्रव्यं वा क्षत्रियादिभिः समांसबलिद्रव्यं कमलाकारं कृत्वा तस्योपरि गंधाक्षतपुष्पदीपादिकं निधाय आधारोपरि संस्थाप्य देशकालौ संकीर्त्य ममामुकफलावाप्तये श्रीवटुकभैरवप्रीतये अमुकद्रव्यबलिदानमहं करिष्ये ॥ इति संकल्प्य ॐ वं वटुकबलिद्रव्याय नमः इति संपूज्य दक्षहस्ते जलं गृहीत्वा वामकरांगुष्ठेन बलिपात्रं स्पृशन् मूलं पठित्वा "ॐ एह्येहि विदुषि पुरं भंजय २ नर्तय २

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निग्रह २ महाभैरवबटुक बलिं गृह्णगृह्ण स्वाहा ॥ १ ॥ एह्येहि देवीपुत्र बटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वाला मुख सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्णगृह्ण स्वाहा ॥ २ ॥ " इति मंत्रेण जलं बलिमुत्सृज्य प्रणमेत् ॥ मद्यांसब लिपक्षे "ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि ॥ तन्नः पशुः प्रचोदयात् ॥ १ ॥ " ॐ अरिपिशितमांसान्नबलिं गृह्णगृह्ण " शत्रुपक्षस्य रुधिरं पिशितं च दिनेदिने ॥ भक्षयेयो गणैः सार्द्धं सारमेयसमन्वितः ॥ १ ॥ सर्वगणेभ्यो नमः । आमिषं गृह्ण २ भक्षय २ मां रक्षरक्ष स्वाहा ॥" इति मंत्रेण दद्यात् । इति बलिं दत्त्वा यथाकामं देवं ध्यात्वा ततः अष्टोत्तरसहस्रमष्टोत्तरशतं वा यथाशक्ति मूलं प्रजप्याष्टोत्तरशतनामस्तवराजं च एकविंशतिवारमेकादशवारं वा शतवारं वा महाप्रयोगश्चेत्सहस्रवारं वा ब्राह्मणैः सहावृत्य पुनः पूर्वोक्तसंख्यया मंत्रं जपेत् ॥ततः "गुह्यातिगुह्य" इति मंत्रेण जपं समर्प्य ततः स्तोत्रकवचसहस्रनामादिकं दीपसमाप्तिपर्यंतं प्रत्यहं पठेत् । यावद्दीपं तावदशुभं न वदेत्॥क्रोधपरनिंदापरस्त्रीषु पराङ्मुखो भवेत्॥पाठांते बटुकान् कुमारिकाः सुवासिनीश्च पायसान्नैर्वट कैर्मोदकैश्चणकैश्च नानाभक्ष्यभोज्यैश्च प्रत्यहं तर्पयित्वा ततः आचार्यः स्वयं वा शांतिस्तोत्रं पठेत् । शांतिस्तोत्रं यथा ।"यस्यार्चनेन विधिना किमपीह लोके कर्मप्रसिद्ध इति नाम फलं प्रसूते ॥ तं संततं सकलसाधकवांछितार्थचिंतामणिं सुरगणाधिपतिं नमामि ॥ १ ॥ रक्तां बरं ज्वलनपिंगजटाकलापं ज्वालावलीकुटिलचन्द्रधरं त्रिनेत्रम् ॥ बालार्कचाम्रफलकांचनतुल्यवर्णं देवीसुतं बटुकनाथमहं भजामि ॥ २ ॥ हरतु कुलगणेशो विघ्नसर्पानशेषान्नयतु कुलसपर्यापूर्णतां साधकानाम् ॥ पिबतु बटुकनाथः शोणितं निंदकानां दिशतु सकलकामा न्साधकानां गणेशः ॥ ३ ॥ सततविततेजाश्चक्रभासा विनम्रश्रमनसमुदितो वै विश्वसंदोहनाभिः ॥ प्रलयनयननाभिः किंतुरात्मोद्भवाभिर्भ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वतु भुवनगर्भो भैरवो नः पुनातु ॥४॥ या काचिद्योगिनी रौद्रा सौम्या घोरतरापरा ॥ गृह्णतां बलिपूजां सा मम व्याधिं व्यपोहतु॥५॥
नंदंतु साधकाः सर्वे विनश्यंतु प्रदूषकाः॥अवस्था शांभवी मेऽस्तु प्रसन्नोस्तु गुरुः सदा॥६॥" इति पठेत्॥ततो जपदशांशेन होमतर्पणमा
र्जनब्राह्मणभोजनं च कृत्वा ब्राह्मणान् जपानुसारेण दक्षिणादिभिः संतोष्य आचार्यं कार्यानुसारेण दक्षिणावस्त्रालंकारादिभिः परितोष्य
प्रणमेत् ॥ तथा च । " अयं दीपविधिः प्रोक्तो बटुकस्य नवानघे ॥ योजनीयः प्रयत्नेन सत्यंसत्यं वदाम्यहम् ॥ १ ॥ परिवारसमा
युक्तौ सपुत्रौ सहपत्निकौ ॥ सर्वान्देवान्प्रपूज्याथावरणेन समान्वितान् ॥ २ ॥ मध्यं तु पूजयेद्देवं बटुकं दीपमध्यतः ॥ पंचोपचारैः संपू
ज्य धूपदीपादिभिः क्रमात् ॥ ३ ॥ कवचं स्तवराजं च आपदुद्धारणं जपेत् ॥ मंत्रं लक्षं जपेद्देवि कवचं चायुतं पठेत् ॥ ४ ॥ सहस्रं
स्तवराजं च कार्यमुद्दिश्य मंत्रवित् ॥ कलौ चतुर्गुणं प्रोक्तं दीपाग्रप्रपठेत्सदा ॥५॥ सूर्यास्तकालमारभ्य यावत्सूर्योदयो भवेत् ॥ ताव
न्मंत्रं जपेद्रात्रौ कार्यमुद्दिश्य मंत्रवित् ॥ ६ ॥ अष्टमीदिनमारभ्य यावत्कृष्णा चतुर्दशी ॥ तावन्मंत्रं जपेद्रात्रौ सर्वकार्यप्रसाधने ॥ ७ ॥
नदीतीरे शिवागारे बिल्वमूले गिरौ तथा॥ गुहायां सिद्धपीठे च सन्निधौ भैरवस्य च ॥८॥ पुत्रप्राप्तिः सहस्रे स्याद्द्विगुणे च धनागमः ॥
त्रिगुणे बंधनान्मुक्तिश्चतुःसंख्ये प्रियागमः॥९॥बाणसंख्ये स्तंभनं स्याद्रससंख्ये क्षयो भवेत्॥सप्तसंख्ये जगद्वश्यमष्टसंख्ये तु मोहनम्॥१०॥
अंकसंख्ये महोत्साह उच्चाटो दशसंख्यके ॥ एकादशेन देवेशि ह्यखिलाः सिद्धयः स्मृताः ॥ ११ ॥ लक्षेणैकेन देवेशि चक्रवर्ती
भवेद्ध्रुवम् ॥ कोटिसंख्ये महादेवि भवेद्रुद्रसमप्रभः ॥ १२ ॥ नौकाया व्यवहारे च जपेत्सप्तशतं तथा ॥ कृषिकर्मणि वाणिज्ये
रुद्रसंख्याशतानि च ॥ १३ ॥ दीपाग्रे कलशाग्रे च पठित्वा फलमाप्नुयात् ॥ दीपाग्रे च यथाशक्ति गायत्री बटुकस्य च ॥ १४ ॥

For Private And Personal Use Only

जपदीपं समर्प्याथ कवचं प्रजपेत्ततः ॥ मंत्रं जप्त्वा पुनर्वर्म पठेन्मंत्रं ततः परम् ॥ १५ ॥ स्तवराजं पठित्वा तु मंत्रं जप्त्वा निवेदयेत् ॥ पुरुषोत्तमपादाब्जभक्तियेर्पितमौलिना ॥ कथितो रामचन्द्रेण दीपदानविधिः शुभः ॥ १६ ॥ इति बटुकभैरवदीपदानविधानम् ॥ ॥ श्रीगणेशाय नमः ॥ अथ श्रीबटुकभैरवपूजापद्धतिप्रारंभः ॥ "नमः कर्पूरगौराय कैलासाचलवासिने ॥ गौरीकंठग्रहानंदनिष्ठ दायाधकर्त्रिणे ॥ १ ॥ उत्पत्तिस्थितिसंहारकारको जगदीश्वरः ॥ देवाधिदेवो बटुकभैरवोऽवतु मां सदा ॥ २ ॥ भैरवाराधनविधिं प्रवक्ष्यामि समासतः ॥ साधकानां हितार्थाय मुमुक्षूणां विशेषतः ॥ षट्कर्मणां च संसिद्ध्यै वक्ष्ये भैरवपद्धतिम् ॥ ३ ॥" पुरश्चरणात् प्राक् तृतीय दिवसे क्षौरादिकं विधाय ततः प्रायश्चित्तार्थं विष्णुपूजां विष्णुतर्पणं विष्णुश्राद्धं होमं चांद्रायणादिव्रतं च कुर्यात् ॥ व्रताशक्तौ गोदानं द्रव्यदानं च कुर्यात् ॥ यदि सर्वकर्माशक्तस्तदा प्रायश्चित्तार्थं पंचगव्यप्राशनं कुर्यात् ॥ तत्र मंत्रः ॥ "ॐ यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनात्पंचगव्यं हि दहत्यग्निरिवेन्धनम् ॥ १ ॥" इति पठित्वा प्रणवेन पंचगव्यं पिबेत् ॥ तद्दिने उपवासं कृत्वा अशक्तश्चेत् पयःपानं हविष्यान्नेन एकभक्तव्रतं वा कुर्यात् ॥ ततः पुरश्चरणात् पूर्वदिने स्वदेहशुद्ध्यर्थं पुरश्चरणाधिकारप्राप्त्यर्थं चायुतगायत्रीजपं कुर्यात् ॥ तत्र क्रमः ॥ देशकालौ संकीर्त्य ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणश्रीमद्बटुकभैरवपुरश्चरणाधिकारार्थम् मुकमंत्रेण सिद्ध्यर्थं च गायत्र्यायुतजपमहं करिष्ये ॥ इति संकल्प्य गायत्र्या अयुतं जपेत् ॥ ततो गायत्र्याचार्यऋषिं विश्वामित्रं तर्पयामि ॥ १ ॥ गायत्रीछंदस्तर्पयामि ॥ २ ॥ सवितारं देवं तर्पयामि ॥ ३ ॥ इति तर्पणं कुर्यात् ॥ ततस्तस्यां रात्रौ देवतां प्रार्थ्य शुभाशुभं स्वप्नं विचारयेत् ॥ तत्र क्रमः ॥ स्नानादिकं कृत्वा हरिपादांबुजं स्मृत्वा कुशासनादिशय्यायां यथासुखं स्थित्वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृषभध्वजं प्रार्थयेत् ॥ तत्र मंत्रः ॥ "ॐ भगवन्देवदेवेश शूलभृद्वृषवाहन ॥ इष्टानिष्टं ममाचक्ष्व मम सुप्तस्य शाश्वत ॥ १ ॥ ॐ नमोजाय त्रिनेत्राय पिंगलाय महात्मने ॥ वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ २ ॥ स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ॥ क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥ ३ ॥" इति मंत्रेणाष्टोत्तरशतवारं शिवं प्रार्थ्य स्वप्यात् ॥ ततः स्वप्नं दृष्टं निशि प्रातर्गुरवे विनिवेदयेत् अथवा स्वयं स्वप्नं विचारयेत् ॥ ततः चंद्रताराादिबलान्विते समुहूर्ते विविक्ते देशे जपस्थानं प्रकल्प्य पुरश्चरणादिवसे श्रीमान्साधकेंद्रः प्रातःकालात्पूर्वं दंडद्वयात्मके ब्राह्मे मुहूर्ते चोत्थाय निद्रास्थानाद्बहिर्निर्गत्य हस्तौ पादौ प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्यान्यवस्त्रं परिधाय शुद्धासने चोपविश्य स्वशिरसिसहस्रदलपंकजे कोटींदुप्रकाशपीठे श्रीगुरुं ध्यायेत्॥ गुरुस्मरणम् । "आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ॥ योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं भजामि ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य "प्रातः प्रभृतिसायांतं सायादिप्रातरंततः ॥ यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ॥ १ ॥" इत्यनेन मंत्रेण सर्वं गुरवे निवेद्य तदाज्ञां गृहीत्वा श्रीवटुकप्रातःस्मरणं कुर्यात् ॥ अथ श्रीवटुकप्रातःस्मरणम् ॥ "प्रातः स्मरामि वटुकं सुकुमारमूर्तिं श्रीस्फाटिकाभसदृशं

---

१ लिंगं चंद्रार्कयोर्बिंबं भारतीं जाह्नवीं गुरुम् ॥ रक्ताब्धितरणं युद्धे जयोनलसमर्चनम् ॥ शिखिहंससरथांगाह्वे रथं स्थानं मोहनम्॥ आरोहणं सारसस्य धरालाभश्चनिम्नगा ॥ प्रासादः स्यंदनः पद्मं छत्रं कन्या द्रुमः फली॥ नागो दीपो हयः पुष्पं वृषभोश्वश्च पर्वतः ॥ सुराघटो ग्रहास्तारा नारी सूर्योदयोप्सराः॥ हर्म्यशैलविमानानामारोहो गगनेगमः ॥ मद्यमांसादनं विष्ठालेपो रुधिरसेचनम्॥ दध्योदनादनं राज्याभिषेको गोवृषध्वजाः ॥ सिंहं सिंहासनं शंखो वादित्रं रोचना दधि॥ चंदनं दर्पणश्चैषां स्वप्ने संदर्शनं शुभम् ॥ तैलाभ्यक्तः कृष्णवर्णो नग्नो नागर्तवायसौ ॥ शुष्कं कंटकिवृक्षश्च चांडालो दीर्घकंधरः ॥ प्रासादस्तलहीनश्च नैते स्वप्ने शुभावहाः॥ इति विचारयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुटिलालकाढ्यम् ॥ वक्त्रं दधानमणिमादिगुणैर्हि युक्तं हस्तद्वयं मणिमयैः पदभूषणैश्च ॥ १ ॥ प्रातर्नमामि बटुकं तरुणं त्रिनेत्रं कामास्पदं वरकपालत्रिशूलदंडान् ॥ भक्तार्तिनाशकरणे दधते करेषु तं कौस्तुभाभरणभूषितदिव्यदेहम् ॥ २ ॥ प्रातःकालेसदाऽहंभगणपरिधरं भालदेशे महेशं नागं पाशं कपालं डमरुमथ भृणिं खड्गघंटाभयानि ॥ दिग्वस्त्रं पिंगकेशं त्रिनयनसहितं मुंडमालं करेषु यो धत्ते भीमदंष्ट्रं मम विजयकरं भैरवं तं नमामि॥ ३ ॥देवदेव कृपासिंधो सर्वनाशिन्महाऽव्यय॥संसारासक्तचित्तं मां मोक्षमार्गे निवेशय॥ ४ ॥एतच्छ्लोकचतुष्कं वै भैरवस्य तु यः पठेत् ॥ सर्वबाधाविनिर्मुक्तो जायते निर्भयः पुमान्॥ ५॥ "एवं ध्यात्वा गुरुमंत्रदेवतात्मनामैक्यं विभाव्य अजपाजपं गुरुं समर्पयेत् ॥ अथाजपाजपसंकल्पः संक्षेपतः ॥ "आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के॥वासांते बालमध्ये डफकठसहिते आदियुक्ते स्वराणां हंसंतत्त्वाधियुक्तं सकलदलगतं वर्णरूपं नमामि॥ १ ॥षट्शतं तु गणेशस्य षट्सहस्रं प्रजापतेः ॥ षट्सहस्रं गदापाणेः षट्सहस्रं पिनाकिनः ॥ २॥ आत्मनस्तत्सहस्रं च सहस्रं परमात्मनः॥ सहस्रं श्रीगुरुश्चैव एतानि विनियोजयेत ॥ ३ ॥ हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शंभुः ॥ हंसोपि जीवो परमात्महंसो हंसो गुरुर्हंसमयश्च शंभुः ॥ ४ ॥" इति पठित्वा ॥ अहोरात्रोच्चारितं षट्शताधिकमेकविंशतिसहस्रमुच्छ्वासनिःश्वासात्मकमजपागायत्री मंत्रजपं श्रीगणेशब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुभ्यो यथासंख्यं समर्पयामि ॥ इत्युक्त्वाष्टोत्तरशतावृत्तिं हंसगायत्रीं जपेत ॥ अथ हंसगायत्रीमंत्रः ॥ हरिः ॐ " हंसोहंसस्य विद्महे हंसोहंसस्यधीमहि हंसोहंमः प्रचोदयात् ॥" इति जपित्वा ॥ " त्रैलोक्यचैतन्यमयि त्रिशक्ते श्रीविश्वमातर्भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयामि ॥ १ ॥" इति संप्रार्थ्य भूमिं प्रार्थयेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ भूमिप्रार्थनामंत्रः ॥ " समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥ " इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पादं दत्त्वा बहिर्व्रजेत् ॥ इति प्रातःकृत्यम् ॥ अथ शौचक्रिया ॥ ततो ग्रामाद्बहिः नैर्ऋत्यकोणे जनवर्जिते उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरः प्रावृत्य मलमोचनं कृत्वा ॥ मृत्तिकया जलेन यथासंख्यं शौचं कृत्वा हस्तौ पादौ प्रक्षाल्य गंडूषांतं दंतधावनं कुर्यात् ॥ अथ दंतधावनम् ॥ आम्रचंपकापामार्गाद्यन्यतमं द्वादशांगुलं दंतकाष्ठं गृहीत्वा प्रार्थयेत्॥ "आयुर्बलं यशो वर्चः प्रजा पशुधनानि च ॥ श्रियं प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ १ ॥ " इति प्रार्थ्य " ॐ ह्रीं तडित्स्वाहा ॥" इति मंत्रेण काष्ठं छित्त्वा "ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः ॥" इत्यनेन दंतान् संशोध्य "ऐं" मंत्रेण जिह्वामुल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्ऋत्ये शुद्धदेशे निःक्षिपेत् ॥ मूलेन मुखं प्रक्षाल्याचम्य स्नानं कुर्यात ॥ अथ स्नानम् ॥ ततः तीर्थस्नानं मंगलस्नानं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा अशक्तश्चेद् गृहस्नानं कुर्यात् ॥ तत्र क्रमः ॥ तात्कालिकोद्धृतोदकेनोष्णोदकेन वा स्नानं कृत्वा न तु पर्युषितशीतोदकेन तद्यथा ॥ ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् ॥ तत्र मंत्रः ॥ " ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ १ ॥ ॐ पुष्कराद्यानि तीर्थानि गंगाद्याः सरितस्तथा ॥ आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥ २ ॥" इति तीर्थान्यावाह्य ॥ " गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधुकावेरि जलेस्मिन्सान्निधिं कुरु ॥ ३ ॥" इति पठित्वा "ऋतं च सत्यं०" इति मंत्रेणाभिमंत्र्य स्नायात ॥ एवं स्नानं कृत्वा शुष्कं शुभ्रं कर्पासोत्पन्नं वस्त्रं परिधाय सूर्यायार्घ्यं दद्यात् ॥ तत्र मंत्रः ॥ "एहि सूर्य्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहाणार्घ्यं नमोस्तु ते ॥ " इत्यर्घं दत्त्वा स्नानवस्त्रं परिपीडय यज्ञोत्थ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भस्मना पंचत्रिपुंड्रं कृत्वा रुद्राक्षमालां धारयन् वैदिकींसंध्या विधाय तांत्रिकीं कुर्यात् ॥ अथ तांत्रिकीसंध्याप्रयोगः ॥ देशकालौ संकीर्त्य श्रीवटुकभैरवाराधनयोग्यताजननार्थं तंत्रसंध्यामहं करिष्ये इति संकल्प्य ॥ " ॐ ह्रीं आत्मतत्त्वाय स्वाहा ॥ १ ॥ ॐ ह्रीं विद्यातत्त्वाय स्वाहा ॥ २ ॥ ॐ ह्रूं शिवतत्त्वाय स्वाहा ॥ ३ ॥ " इति त्रिराचम्य मूलेन प्राणानायम्य ऋष्यादिकरांगन्यासान् कृत्वा मूलेन जलं संवीक्ष्य ॥ "अस्त्राय फट् ॥ " इति संप्रोक्ष्य । अनेनैव दर्भेण संताडच "कवचाय हुम् ॥" इत्यभ्युक्ष्य तज्जलेन कुंभमुद्रया मूर्ध्नि सिंचेत् ॥ ततो वामपाणौ दक्षेण तीर्थजलमादाय ॥"ॐ ह्रां वां हृदयाय नमः ॥" इति मंत्रेण सप्तवारमभिमंत्र्य तद्गलितोदकबिंदुभिर्दक्षहस्तेन शिरसि मार्जयेत् ॥ तत्र मंत्राः ॥ ह्रां वां हृदयाय नमः वौषट् ॥ १ ॥ ह्रीं वीं शिरसे स्वाहा वौषट् ॥२॥ ह्रूं वूं शिखायै वौषट् ॥ ३ ॥ ह्रैं वैं कवचाय हुं वौषट् ॥ ४ ॥ ह्रौं वौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ह्रः वः अस्त्राय फट् ॥६॥ ॐ आं ह्रां व्योमव्यापिने नमः ॥७॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः॥भवे भवेनातिभवेभवस्वमां भवोद्भवाय नमः ॥८॥ ॐ वामदेवाय नमोज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नम :कलविकरणाय नमोबलायनमोबलविकरणायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनोन्मनायनमः ॥ ९ ॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ १० ॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ ११ ॥ ईशानः सर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेस्तुसदाशिवोम् ॥ १२ ॥ ह्रां ह्रीं ह्रूं मूलमंत्रश्च । एतैमंत्रैर्मार्जयित्वा वामहस्तस्थं जलं वामनासासमीपमानीय इडया देहांतरादाकृष्य पापौघं प्रक्षाल्य कृष्णवर्णं तदुदकं दक्षिणया विरेच्य वामहस्तस्थमुदकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दक्षिणेनादाय पुरःकल्पितवज्रशिलायामस्त्रमंत्रेण क्रोधादास्फालयेत् ॥ ततः पूर्ववदाचम्य करांगन्यासौ कृत्वा अर्घपात्रे जलं कृत्वा तमा
दाय मूलमुच्चार्य "शिवरूपाय सूर्यायेदमर्घ्यं स्वाहा ॥" इति त्रिरर्घ्यं दत्त्वा मूलेनोपस्थाय गायत्रीं मूलमंत्रं जपेत् ॥ गायत्रीमंत्रो यथा ॥
"ॐ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥" इति गायत्रीमष्टविंशतिवारमष्टोत्तरशतवारं मूलं च संजप्य जपं
निवेद्य नमस्कारं कुर्यात् ॥ इति तांत्रिकीसंध्याप्रयोगः ॥ अथ द्वारपूजा ॥ ततः पूजागृहद्वारमागत्य द्वारपूजां कुर्यात् ॥ तत्र क्रमः ॥
"अस्त्राय फट्" इति द्वारं संप्रोक्ष्य दक्षिणशाखायाम् ॥ गं गणपतये नमः ॥ १ ॥ दुं दुर्गायै नमः ॥ २ ॥ वामशाखायाम् वं वटुकाय
नमः॥३॥ क्षं क्षेत्रपालाय नमः॥४॥ द्वारोपरि । सं सरस्वत्यै नमः॥५॥देहल्याम् । अस्त्राय फट् ॥६॥ इति पूजयेत् ॥ अथ प्रयोगः॥
ततः जपस्थाने गत्वा ॥ अश्वत्थौदुंबरप्लक्षाणामन्यतमस्य वितस्तिमात्रान् दश कीलान् "ॐ नमः सुदर्शनायास्त्राय फट् ॥" इति मंत्रेणा
ष्टोत्तरशताभिमंत्रितान् "ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतरिक्षगाः ॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु ॥ १ ॥ मयैत
त्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥ २ ॥" इति मंत्रद्वयेन दशदिक्षु दश कीलान् निखनेत्॥
ततस्तेषु "ॐ सुदर्शनायास्त्राय फट् " इति मंत्रेण प्रत्येककीलान् संपूज्य तद्बाह्ये भूतबलिं दद्यात् ॥ तत्र मंत्रः ॥ "ये रौद्रा रौद्रकर्माणो
रौद्रस्थाननिवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च मे ॥ १ ॥ विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ॥ ते सर्वे प्रीत
मनसः प्रतिगृह्णंत्विमं बलिम् ॥ २ ॥" इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दद्यात् ॥ ततो वामकरांगुलिभिरर्घ्यजलेनोत्सृज्य
पुष्पांजलिमादाय "ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ संतोषमासाद्य व्रजंतु सर्वे क्षमंतु नान्यत्र नमोस्तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेभ्यः ॥" इति पुष्पांजलिं दत्त्वा प्रणमेत् ॥ इति भूतेभ्यो बलिं दत्त्वा हस्तौ पादौ प्रक्षाल्याचमेत्॥ ततः "ॐ अपवित्रः पवित्रो वा सर्वावस्था गतोपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥ १ ॥" इति मंत्रेण मंडपांतरं प्रोक्ष्य ॥ तत्र तावदासनभूमौ कूर्मशोधनं कार्यम् ॥ यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य तत्रैव जपं दीपस्थापनं च कुर्यात् ॥ यत्र बहवः जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् ॥ एवं कूर्मशोधनं विधाय तत्र आसनाधो जलादिना त्रिकोणं कृत्वा तत्र "ॐ कूर्माय नमः ॥ १ ॥ ॐ ह्रीं आधारशक्तिकमलासनाय नमः ॥ २ ॥ ॐ पृथिव्यै नमः ॥ ३ ॥" इति गंधाक्षतपुष्पैः संपूज्य तदुपरि कुशासनं तदुपरि मृगाजिनं तदुपरि कम्बलाद्यासनमास्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण "ॐ अनन्तासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥" इति मंत्रत्रयेण त्रीन् दर्भान् प्रत्येकं निदध्यात् ॥ एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्यासनं शोधयेत्॥ तत्र मंत्रः ॥ ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता । सुतलञ्छन्दः । आसने विनियोगः ॥ "ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ १ ॥" इति मंत्रेणासनं प्रोक्ष्य ततो मूलेन शिखां बद्ध्वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य मम श्रीमद्बटुकभैरवदेवताप्रीतये अमुकमंत्रसिद्ध्यर्थं लक्षसंख्यात्मकं (अथवा एकविंशतिलक्षसंख्यात्मकं) जपं तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये इत्युच्चार्य्य जलं भूमौ क्षिपेत् ॥ ततो भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासान्सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा प्रेतबीजायसरस्वतीबीजांतं पंचदश न्यासान् कुर्यात् ॥ तद्यथा ॥ ॐ हसहौं हृदयाय नमः ॥ १ ॥ ॐ हसहौं शिरसे स्वाहा ॥ २ ॥ ॐ हसहौं शिखायै वषट् ॥ ३ ॥ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हसहौं कवचाय हुम् ॥ ४ ॥ ॐ हसहौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हस हौं अस्त्राय फट् ॥ ६ ॥ इति प्रेतबीजन्यासः प्रथमः ॥ १ ॥ ॐ हसर्क्ष नमः शिरसि ॥ १ ॥ ॐ हसर्क्ष नमः बाह्वोः ॥ २ ॥ ॐ हसर्क्ष नमः लिंगे ॥ ३ ॥ ॐ हसर्क्ष नमः नाभौ ॥ ४ ॥ ॐ हसर्क्ष नमः हस्तांगुलीषु ॥ ५ ॥ ॐ हसर्क्ष नमः पादांगुलीषु ॥ ६ ॥ इति सिंहबीजन्यासो द्वितीयः ॥ २ ॥ ॐ क्ष्रौं नमः ब्रह्मरंध्रे ॥ १ ॥ ॐ क्ष्रौं नमः मुखे ॥ २ ॥ ॐ क्ष्रौं नमः नेत्रद्वये ॥ ३ ॥ ॐ क्ष्रौं नमः ग्रीवायाम् ॥ ४ ॥ ॐ क्ष्रौं नमः नासापुटयोः ॥ ५ ॥ ॐ क्ष्रौं नमः कपोलयोः ॥ ६ ॥ ॐ क्ष्रौं नमः चिबुके ॥ ७ ॥ ॐ क्ष्रौं नमः ब्रह्मरंध्रे ॥ ८ ॥ इति काणबीजन्यासस्तृतीयः ॥ ३ ॥ ॐ मलहौं नमः पादयोः ॥ १ ॥ ॐ मलहौं नमः हस्तयोः ॥ २ ॥ ॐ मलहौं नमः करयोः ॥ ३ ॥ ॐ मलहौं नमः नेत्रयोः ॥ ४ ॥ ॐ मलहौं नमः कर्णयोः ॥ ५ ॥ ॐ मलहौं नमः मुखे ॥ ६ ॥ ॐ मलहौं नमः कुक्षिद्वये ॥ ७ ॥ ॐ मलहौं नमः लिंगे ॥ ८ ॥ इति मत्स्यबीजन्यासश्चतुर्थः ॥ ४ ॥ ॐ श्रूं नमः चिबुके ॥ १ ॥ ॐ श्रूं नमः पादयोः ॥ २ ॥ ॐ श्रूं नमः कर्णयोः ॥ ३ ॥ ॐ श्रूं नमः हृदये ॥ ४ ॥ ॐ श्रूं नमः मुखे ॥ ५ ॥ ॐ श्रं नमः पादयोः ॥ ६ ॥ ॐ श्रूं नमः नाभौ ॥ ७ ॥ ॐ श्रूं नमः पादयोः ॥ ८ ॥ इति महाबीजन्यासः पंचमः ॥ ५ ॥ ॐ प्रूं नमः हृदये ॥ १ ॥ ॐ प्रूं नमः सव्यकुक्षौ ॥ २ ॥ ॐ प्रूं नमः हृदये ॥ ३ ॥ ॐ प्रूं नमः वामकुक्षौ ॥ ४ ॥ ॐ प्रूं नमः हृदये ॥ ५ ॥ ॐ प्रूं नमः दक्षपादतले ॥ ६ ॥ ॐ प्रूं नमः हृदये ॥ ७ ॥ ॐ प्रूं नमः वामपादतले ॥ ८ ॥ ॐ प्रूं नमः हृदये ॥ ९ ॥ इति प्राणबीजन्यासः षष्ठः ॥ ६ ॥ ॐ घ्रूं नमः गलघंटिकायाम् ॥ १ ॥ ॐ घ्रं नमः नाभौ ॥ २ ॥ ॐ घ्रूं नमः घंटिकायाम् ॥ ३ ॥ ॐ घ्रूं नमः हृदये ॥ ४ ॥ इति घंटाबीजन्यासः सप्तमः ॥ ७ ॥ ॐ क्ष्म्रूं नमः मस्तके ॥ १ ॥ ॐ क्ष्म्रूं नमः पादयोः ॥ २ ॥ ॐ क्ष्म्रूं नमः ग्रीवायाम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३ ॥ ॐ क्ष्र्यूं नमः । नाभिमंडले ॥ ४ ॥ ॐ क्ष्र्यूं नमः गले ॥५॥ ॐ क्ष्र्यूं नमः हृदये ॥६॥ ॐ क्ष्र्यूं नमः जंघयोः ॥७ ॥
ॐ क्ष्र्यूं नमः नेत्रयोः ॥ ८ ॥ ॐ क्ष्र्यूं नमः कर्णयोः ॥ ९ ॥ ॐ क्ष्र्यूं नमः बाह्वोः ॥ १० ॥ ॐ क्ष्र्यूं नमः स्तनयोः ॥ ११ ॥
इति ख्यातिबीजन्यासोऽष्टमः ॥ ८ ॥ ॐ ॐ नमः हृदये ॥ १ ॥ ॐ ॐ नमः मुखे ॥ २ ॥ ॐ ॐ नमः पादयोः ॥ ३ ॥ ॐ ॐ नमः
हस्तयोः ॥ ४ ॥ ॐ ॐ नमः कर्णयोः ॥ ५ ॥ ॐ ॐ नमः नासापुटयोः ॥ ६ ॥ इति मूलबीजन्यासो नवमः ॥ ९ ॥ ॐ भरलसहीं
नमः मुखे ॥ १ ॥ ॐ भरलसहीं नमः नेत्रद्वये ॥ २ ॥ ॐ भरलसहीं नमः कर्णद्वये ॥ ३ ॥ ॐ भरलसहीं नमः कपोलयोः ॥ ४ ॥ ॐ
भरलसहीं नमः गंडयोः ॥ ५ ॥ ॐ भरलसहीं नमः कंठदेशे ॥ ६ ॥ ॐ भरलसहीं नमः स्तनयोः ॥ ७ ॥ ॐ भरलसहीं नमः हृदये ॥ ८ ॥ ॐ
भरलसहीं नमः पादयोः ॥ ९ ॥ ॐ भरलसहीं नमः चिबुके ॥ १० ॥ ॐ भरलसहीं नमः मस्तके ॥ ११ ॥ ॐ भरलसहीं नमः
बाह्वोः ॥ १२ ॥ ॐ भरलसहीं नमः स्कंधयोः ॥ १३ ॥ ॐ भरलसहीं नमः दंतपंक्तयोः ॥ १४ ॥ ॐ भरलसहीं नमः ब्रह्मरंध्रे
॥ १५ ॥ ॥ ॐ भरलसहीं नमः आधारे ॥ १६ ॥ ॐ भरलसहीं नमः भ्रूमध्ये ॥ १७ ॥ इति आपरीबीजन्यासो दशमः ॥ १० ॥
ॐ नमरलमरक्षरशरहसीं नमः शिरसि ॥ १ ॥ ॐ नमरलमरक्षरशरहसीं नमः गंडयोः ॥ २ ॥ ॐ नमरलमरक्षरशरहसीं नमः वक्त्रे
॥ ३ ॥ इति आकूतीबीजन्यास एकादशः ॥ ११ ॥ ॐ करलमरमरीं नमः नेत्रयोः ॥ १ ॥ ॐ करलमरमरीं नमः कर्णयोः ॥ २ ॥
ॐ करलसरमरीं नमः नाभौ ॥ ३ ॥ ॐ करलसरमरीं नमः लिंगे ॥ ४ ॥ ॐ करलसरमरीं नमः गुदे ॥ ५ ॥ इति कालबीजन्यासो द्वादशः
॥ १२ ॥ ॐ क्षरशरहसीं नमः कपोलयोः ॥ १ ॥ ॐ क्षरशरहसीं नमः ब्रह्मरंध्रे ॥ २ ॥ ॐ क्षरशरहसीं नमः दंतपङ्क्तयोः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति विद्याबीजन्यासस्त्रयोदशः ॥ १३ ॥ ॐ सहसहलकलह्रशरवरवलवऊई नमः मस्तके ॥ १ ॥ ॐ सहसहलकलह्रशरवरवलवऊई
नमः दक्षनेत्रे ॥२॥ एवं सर्वत्र । ॐ १९. वामनेत्रे ॥ ३ ॥ ॐ १९. दक्षकर्णे ॥४॥ ॐ १९ वामकर्णे ॥५॥ ॐ१९.दक्षिणकपो
ले ॥ ६ ॥ ॐ १९ वामकपोले ॥ ७ ॥ ॐ १९ दक्षगंडके ॥ ८ ॥ ॐ १९. वामगंडके ॥९॥ ॐ १९ चिबुके ॥ १० ॥
ॐ १९ गले ॥ ११ ॥ ॐ १९. दक्षस्कंधे ॥ १२ ॥ ॐ १९. वामस्कंधे ॥ १३ ॥ ॐ १९. दक्षस्तने ॥ १४ ॥ ॐ १९
वामस्तने ॥ १५ ॥ ॐ १९ हृदये ॥ १६ ॥ ॐ १९. दक्षकुक्षौ ॥ १७ ॥ ॐ१९. वामकुक्षौ॥१८॥ ॐ १९. नाभौ ॥ १९ ॥
ॐ १९ वक्षसि ॥२०॥ ॐ १९. दक्षजंघायाम्॥२१॥ ॐ १९. वामजंघायाम्॥२२॥ॐ१९.लिंगे॥२३॥ॐ१९दक्षमेढ्रे॥२४॥
ॐ १९ वाममेढ्रे ॥२५॥ ॐ१९ मूलाधारे॥२६॥ ॐ १९. दक्षगुल्फे ॥२७॥ ॐ१९ वामगुल्फे॥२८॥ ॐ १९दक्षपादे॥२९॥
ॐ १९वामपादे॥३०॥ॐ१९दक्षपादांगुलीषु॥३१॥ॐ १९. वामपादांगुलीषु॥३२॥ॐ१९ब्रह्मरंध्रे॥३३॥ॐ१९मूलाधारे॥३४॥
ॐ १९ ब्रह्मरंध्रे ॥ ३५ ॥ इति श्रृंखलामहापराख्यबीजन्यासश्चतुर्दशः ॥१४॥ ॐ कलडरसहरह्क्षशरई ललाटे॥१॥इति सर्वत्र ॥
ॐ १२ मुखवृत्ते ॥२॥ ॐ १२ दक्षनेत्रे ॥३॥ ॐ १२ वामनेत्रे ॥ ४ ॥ ॐ १२ दक्षकर्णे ॥५॥ ॐ १२ वामकर्णे॥ ६ ॥
ॐ १२ दक्षनासापुटे ॥७॥ ॐ १२ वामनासापुटे ॥८॥ ॐ १२ दक्षगंडे ॥९॥ ॐ १२ वामगंडे ॥१०॥ ॐ १२ ऊर्ध्वोष्ठे॥११॥
ॐ १२ अधरोष्ठे ॥१२॥ ॐ १२ ऊर्ध्वदंतपंक्तौ ॥१३॥ ॐ १२ अधोदंतपंक्तौ॥१४॥ ॐ १२शिरसि ॥१५॥ ॐ १२ मुखाभ्यं
तरे ॥१६॥ ॐ १२ दक्षबाहुमूले ॥१७॥ॐ १२ दक्षकूर्परे ॥१८॥ ॐ१२दक्षिणमणिबंधे॥१९॥ॐ१२दक्षकरांगुलिमूले॥२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ १ २दक्षकरांगुल्यग्रे॥ २१॥ ॐ १ २वामबाहुमूले॥ २२॥ ॐ १ २वामकूर्परे॥ २३॥ ॐ १ २वाममणिबंधे॥ २४॥ ॐ १ २ वामकरांगुलिमूले ॥ २५॥ ॐ १ २वामकरांगुल्यग्रे॥ २६॥ ॐ १ २दक्षपादमूले॥ २७॥ ॐ १२ दक्षजानुनि॥ २८॥ ॐ १ २दक्षगुल्फे ॥ २९॥ ॐ १ २ दक्षपादांगुलिमूले॥ ३०॥ ॐ १ २दक्षपादांगुल्यग्रे॥ ३१॥ ॐ १ २वामपादमूले॥ ३२॥ ॐ १ २वामजानुनि॥ ३३॥ ॐ १ २वामगुल्फे॥ ३४॥ ॐ १ २वामपादांगुलिमूले॥ ३५॥ ॐ १ २वामपादांगुल्यग्रे॥ ३६॥ ॐ १ २दक्षपार्श्वे॥ ३७॥ ॐ १ २वामपार्श्वे॥ ३८॥ ॐ १ २पृष्ठवंशे॥ ३९॥ ॐ १ २नाभौ॥ ४०॥ ॐ १ २जठरे॥ ४१॥ ॐ १ २हृदि॥ ४२॥ ॐ १ २दक्षांसे॥ ४३॥ ॐ १ २वामांसे॥ ४४॥ ॐ १ २ककुदि ॥ ४५॥ ॐ १ २ हृदादिदक्षकरांगुल्यग्रपर्यंतम् ॥ ४६॥ ॐ १२ हृदयादिवामकरांगुल्यग्रपर्यंतम्॥ ४७॥ ॐ १२ हृदयादिदक्षपादांगुल्यग्रपर्यंतम् ॥ ४८॥ ॐ १ २हृदयादिवामपादांगुल्यग्रपर्यंतम ॥ ४९ ॥ ॐ १२ नाभ्यादिहृदयपर्यंतम्॥ ५०॥ ॐ १२ हृदादिमुखपर्यंतं न्यसेत् ॥ ५१॥ इति महासरस्वतीबीजमातृकान्यासः पंचदशः ॥ १५ ॥ इति पंचदशन्यासान् कृत्वा पीठदेवता न्यसेत् ॥ अथ पीठदेवतान्यासः ॥ ॐ मं मंडूकाय नमः मूलाधारे॥ १॥ ॐ कां कालाग्निरुद्राय नमः स्वाधिष्ठाने॥ २॥ ॐ कूं कूर्माय नमः नाभौ॥ ३॥ ॐ अं अनंताय नमः॥ ॐ आं आधारशक्त्ये नमः॥ ॐ क्षीं क्षीरसागराय नमः॥ ॐ रं रत्नदीपाय नमः॥ ॐ सुं सुधांबुधये नमः॥ ॐ मं मणिमंडपाय नमः॥ ॐ कं कल्पवृक्षाय नमः॥ ॐ रं रत्नवेदिकायै नमः॥ इति हृदये॥ ४॥ ॐ धं धर्माय नमः दक्षांसे॥ ५॥ ॐ ज्ञां ज्ञानाय नमः वामांसे॥ ६॥ ॐ वं वैराग्याय नमः वामोरौ ॥ ७॥ ॐ ऐं ऐश्वर्याय नमः दक्षोरौ ॥ ८॥ ॐ अं अधर्माय नमः वदने ॥ ९॥ ॐ अं अज्ञानाय नमः वामपार्श्वे ॥ १०॥ ॐ अं अवैराग्याय नमः नाभौ ॥ ११॥ ॐ अं अनैश्वर्याय नमः दक्षपार्श्वे ॥ १२॥ ॐ आं आनंदकंदाय नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ सं सविन्नालाय नमः ॥ ॐ सं सर्वतत्त्वपद्माय नमः॥ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः॥ ॐ विं विकारमयकेसरेभ्यो नमः॥ पं पंचाश
द्वर्णबीजाढ्यकर्णिकायै नमः ॥ ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः ॥ ॐ उं चन्द्रमंडलाय षोडशकलात्मने नमः ॥ ॐ रं
अग्निमंडलाय द्वादशकलात्मने नमः॥ ॐ सं सत्त्वबोधात्मने नमः॥ ॐ रं रजःप्रकृत्यात्मने नमः॥ ॐ तं तमोमोहात्मने नमः॥ ॐ आं आत्मने
नमः॥ ॐ पं परमात्मने नमः॥ ॐ अं अंतरात्मने नमः॥ ॐ ज्ञां ज्ञानात्मने नमः॥ ॐ मां मायातत्त्वात्मने नमः॥ ॐ कं कलातत्त्वात्मने
नमः॥ ॐ विं विद्यातत्त्वात्मने नमः॥ ॐ पं परतत्त्वात्मने नमः॥ ॐ शिं शिवतत्त्वात्मने नमः॥ इति हृदये॥ १३ ॥ ततः हृदयेव पूर्वादिष्टदिक्षु नव
पीठशक्तीर्न्यसेत् ॥ ॐ वां वामायै नमः पूर्वभागे ॥ ॐ ज्यें ज्येष्ठायै नमः आग्नेये ॥ ॐ श्रें श्रेष्ठायै नमः दक्षिणे ॥ ॐ रौं रौद्रायै नमः
नैर्ऋते॥ ॐ कां काल्यै नमः पश्चिमे॥ ॐ कं कलविकरण्यै नमः वायव्ये॥ ॐ बं बलविकरण्यै नमः उत्तरे ॥ ॐ बं बलप्रमथिन्यै नमः
ऐशान्ये ॥ ॐ सं सर्वभूतदमन्यै नमः ऊर्ध्वभागे ॥ ॐ मं मनोन्मन्यै नमः हृदयमध्ये ॥ १४॥ "ॐ नमो भगवते सकलगुणात्मशक्ति
युक्तायानंताय योगपीठात्मने नमः" इति मंत्रेण स्वहृदये पीठदेवतायै आसनं दत्त्वा ततः "आवरणदेवतान्यासं कुर्यात् ॥ १५ ॥ अथा
वरणदेवतान्यासः ॥ तत्र शिरसि॥ ॐ ह्रां वां हृदये देवाय भूतनाथाय नमः॥ १ ॥ ॐ ह्रीं वीं शिरसि देवाय आदिनाथाय नमः॥ २॥ ॐ
ह्रूं वूं शिखायां देवायानंदनाथाय नमः॥ ३॥ ॐ ह्रैं वैं कवचदेवाय सिद्धशाबरनाथाय नमः ॥ ४ ॥ ॐ ह्रौं वौं नेत्रदेवाय सहजानं
दनाथाय नमः ॥५॥ ॐ ह्रः वः अस्त्रदेवाय निःसीमानंदनाथाय नमः॥ ६॥ इति प्रथमावरणदेवन्यासः॥ १॥ ललाटे ॐ डां डाकिनी
पुत्रेभ्यो नमः ॥ १ ॥ ॐ शां शाकिनीपुत्रेभ्यो नमः ॥ २ ॥ ॐ लां लाकिनीपुत्रेभ्यो नमः ॥ ३ ॥ ॐ कां काकिनीपुत्रेभ्यो नमः

For Private And Personal Use Only

॥ ४ ॥ ॐ सां साकिनीपुत्रेभ्यो नमः ॥ ५ ॥ हा हाकिनीपुत्रेभ्यो नमः ॥ ६ ॥ ॐ मां मालिनीपुत्रेभ्यो नमः ॥ ७ ॥ ॐ दें देवीपुत्रेभ्यो नमः ॥ ८ ॥ ॐ मां मातृपुत्रेभ्यो नमः ॥ ९ ॥ ॐ रुं रुद्रपुत्रेभ्यो नमः ॥ १० ॥ ॐ ऊं ऊर्ध्वमुखपुत्रेभ्यो नमः ॥ ११ ॥ ॐ अं अधोमुखपुत्रेभ्यो नमः ॥ १२ ॥ इति द्वितीयावरणदेवतान्यासः ॥ २ ॥ कंठस्थाने ॐ ब्रं ब्रह्माणीपुत्रबटुकाय नमः ॥ १ ॥ ॐ मां माहेश्वरीपुत्रबटुकाय नमः ॥ २ ॥ ॐ कौं कौमारीपुत्रबटुकाय नमः ॥ ३ ॥ ॐ वें वैष्णवीपुत्रबटुकाय नमः ॥ ४ ॥ ॐ इं इन्द्राणीपुत्रबटुकाय नमः ॥ ५ ॥ ॐ मं महालक्ष्मीपुत्रबटुकाय नमः ॥ ६ ॥ ॐ वां वाराहीपुत्रबटुकाय नमः ॥ ७ ॥ ॐ चां चामुण्डापुत्रबटुकाय नमः ॥ ८ ॥ इति तृतीयावरणदेवतान्यासः ॥ ३ ॥ हृदये ॐ हें हेतुकाय नमः ॥ १ ॥ ॐ त्रिं त्रिपुरांतकाय नमः ॥२॥ ॐ वें वेतालाय नमः ॥ ३ ॥ ॐ अं अग्निजिह्वाय नमः ॥४॥ ॐ कां कालांतकाय नमः ॥ ५ ॥ ॐ कं करालाय नमः ॥ ६ ॥ ॐ एं एयालाय नमः ॥ ७॥ ॐ त्रीं भीमाय नमः ॥८॥ ॐ अं अचलाय नमः ॥ ९ ॥ ॐ हां हाटकेशाय नमः ॥ १० ॥ इति चतुर्थावरणदेवतान्यासः ॥ ४ ॥ नाभौ ॐ श्रीं श्रीकंठाय नमः ॥ १ ॥ ॐ अं अनंतेशाय नमः ॥ २ ॥ ॐ सूं सूक्ष्मेशाय नमः ॥ ३ ॥ ॐ अं अर्मीशाय नमः ॥ ४ ॥ ॐ भां भारभूतीशाय नमः ॥ ५ ॥ ॐ अं अतिथीशाय नमः ॥ ६ ॥ ॐ स्थां स्थाण्वीशाय नमः ॥ ७ ॥ ॐ हं हरेशाय नमः ॥८॥ ॐ झिं झिंटीशाय नमः ॥ ९ ॥ ॐ भौं भौतिकेशाय नमः ॥ १० ॥ ॐ सं सद्योजातेशाय नमः ॥ ११ ॥ ॐ अं अनुग्रहेशाय नमः ॥ १२ ॥ ॐ क्रूं क्रूरेशाय नमः ॥ १३ ॥ ॐ मं महासेनेशाय नमः ॥ १४ ॥ इति पंचमहावरणदेवतान्यासः ॥ ५ ॥ स्वाधिष्ठाने ॐ क्रों क्रोधीशाय

नमः ॥ १ ॥ ॐ चं चंडीशाय नमः ॥ २ ॥ ॐ पं पंचांतकेशाय नमः ॥ ३ ॥ ॐ शिं शिशोत्तमेशाय नमः ॥ ४ ॥ ॐ एं एकरुद्रे शाय नमः ॥ ५ ॥ ॐ कूं कूर्मेशाय नमः ॥ ६ ॥ ॐ एं एकनेत्रेशाय नमः ॥ ७ ॥ ॐ चं चतुराननेशाय नमः ॥ ८ ॥ ॐ अं अजेशाय नमः ॥ ९ ॥ ॐ सं सर्वेशाय नमः ॥ १० ॥ ॐ सों सोमेशाय नमः ॥ ११ ॥ ॐ लां लांगलीशाय नमः ॥ १२ ॥ ॐ दां दारुकेशाय नमः ॥ १३ ॥ ॐ अं अर्धनारीशाय नमः ॥ १४ ॥ ॐ उं उमाकांतेशाय नमः ॥ १५ ॥ ॐ आं आषाढीशाय नमः ॥ १६ ॥ इति षष्ठावरणदेवतान्यासः ॥ ६ ॥ मूलाधारे ॐ दं दंडीशाय नमः ॥ १ ॥ ॐ अं अत्रीशाय नमः ॥ २ ॥ ॐ मं मीनेशाय नमः ॥ ३ ॥ ॐ में मेषेशाय नमः ॥ ४ ॥ ॐ लों लोहितेशाय नमः ॥ ५ ॥ ॐ शिं शिखीशाय नमः ॥ ६ ॥ ॐ छं छगलंडेशाय नमः ॥ ७ ॥ ॐ द्विं द्विरंडेशाय नमः ॥ ८ ॥ ॐ मं महाकालीशाय नमः ॥ ९ ॥ ॐ वां वालीशाय नमः ॥ १० ॥ ॐ भुं भुजंगेशाय नमः ॥ ११ ॥ ॐ पिं पिनाकीशाय नमः ॥ १२ ॥ ॐ खं खड्गीशाय नमः ॥ १३ ॥ ॐ वं वकीशाय नमः ॥ १४ ॥ ॐ श्वें श्वेतेशाय नमः ॥ १५ ॥ ॐ भृं भृग्वीशाय नमः ॥ १६ ॥ ॐ नं नकुलीशाय नमः ॥ १७ ॥ ॐ शिं शिवेशाय नमः ॥ १८ ॥ ॐ सं संवर्तकेशाय नमः ॥ १९ ॥ ॐ दिं दिव्ययोगिन्यै नमः ॥ २० ॥ ॐ अं अंतरिक्षयोगिन्यै नमः ॥ २१ ॥ ॐ भूं भूमिष्ठयोगिन्यै नमः ॥ २२ ॥ ॐ सं संवर्तयोगिन्यै नमः ॥ २३ ॥ इति सप्तमावरणदेवतान्यासः ॥ ७ ॥ पादयोः ॐ इं इंद्राय वज्रहस्ताय नमः ॥ १ ॥ ॐ अं अग्नये शक्तिहस्ताय नमः ॥ २ ॥ ॐ यं यमाय दंडहस्ताय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये खड्गहस्ताय नमः ॥ ४ ॥ ॐ वं वरुणाय पाशहस्ताय नमः ॥ ५ ॥ ॐ वां वायवे अंकुशहस्ताय नमः ॥ ६ ॥ ॐ सं

सोमाय गदाहस्ताय नमः ॥ ७ ॥ ॐ ईं इशानाय त्रिशूलहस्ताय नमः ॥ ८ ॥ ॐ ब्रं ब्रह्मणे कमलहस्ताय नमः ॥ ९ ॥ ॐ अं अनंताय चक्रहस्ताय नमः ॥ १० ॥ इत्यष्टमावरणदेवतान्यासः ॥ ८ ॥ इति न्यासं कृत्वा श्रीकण्ठादिकलामातृकान्यासं कुर्यात् ॥ तथा च । ॐ अस्य श्रीकण्ठादिन्यासस्य दक्षिणामूर्तिर्ऋषिः । गायत्री छन्दः । अर्धनारीश्वरो देवता । हलो बीजानि । स्वराः शक्तयः चतुर्विध पुरुषार्थसिद्ध्यर्थे न्यासे विनियोगः ॥ ॐ दक्षिणामूर्तिऋषये नमः शिरसि ॥ १ ॥ गायत्रीछन्दसे नमः मुखे ॥ २ ॥ अर्धनारीश्वरदेवतायै नमः हृदि ॥ ३ ॥ हल्बीजेभ्यो नमः गुह्ये ॥ ४ ॥ स्वरशक्तिभ्यो नमः पादयोः ॥५॥ विनियोगाय नमः सर्वांगे ॥६॥ इति श्रीकंठादिना कलामातृकांतर्गतऋष्यादिन्यासः ॥ ॐ ह्लां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्लीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्लूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्लैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्लौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्लः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति श्रीकंठादिना कलामातृकांतर्गतकरन्यासः ॥ ॐ ह्लाँ हृदयाय नमः ॥१॥ ॐ ह्लीं शिरसे स्वाहा ॥ २ ॥ ॐ ह्लूँ शिखायै वषट् ॥ ३ ॥ ॐ ह्लैं कवचाय हुम् ॥४॥ ॐ ह्लौं नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्लः अस्त्राय फट् ॥ ६ ॥ इति श्रीकंठादिना कलामातृकांतर्गतहृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ "पाशांकुशवराक्षस्रक्पाणिशीतांशुशेखरम् ॥ त्र्यक्षं रक्तसुवर्णाभमर्धनारीश्वरं भजे ॥ १ ॥ बन्धूककांचननिभं रुचिराक्षमालां पाशांकुशौ च वरदं निजबाहुदंडैः ॥ बिभ्राणमिन्दुशकलाभरणं त्रिनेत्रमर्धाम्बिकेशमनिशं वपुराश्रयामः ॥ २ ॥" इति ध्यात्वा श्रीकण्ठाद्यान् न्यसेत् ॥ तद्यथा-ॐ ह्लौं अं श्रीकंठेशपूर्णोदरीभ्यां नमः मस्तके ॥ १ ॥ ॐ ह्लौं आं अनंतशशिवराजाभ्यां नमः आननवृत्ते ॥ २ ॥ ॐ ह्लौं इं सूक्ष्मेशशाल्मलीभ्यां नमः दक्षिणनेत्रे ॥ ३ ॥ ॐ ह्लौं ईं त्रिमूर्तिलोला

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षीभ्यां नमो वामनेत्रे ॥४॥ ॐ ह्लौं उं अमरेशवर्तुलाक्षीभ्यां नमो दक्षकर्णे॥५॥ॐ ह्लौं ऊं अर्थीशदीर्घघोणाभ्यां नमो वामकर्णे॥६॥
ॐ ह्लौं ऋं भारभूतीशदीर्घमुखीभ्यां नमः दक्षनासापुटे ॥७॥ ॐ ह्लौं ॠं अतिथिशगोमुखीभ्यां नमः वामनासापुटे ॥८॥ ॐ ह्लौं ऌं
स्थाण्वीशदीर्घजिह्वाभ्यां नमो दक्षगंडे॥९॥ह्लौं ॡं हरेशकुंडोदरीभ्यां नमः वामगंडे॥१०॥ॐ ह्लौं एं झिण्टीशोर्ध्वकेशीभ्यां नमः ऊर्ध्वो
ष्ठे॥११॥ ॐ ह्लौं ऐं भौतिकेशविकृतमुखीभ्यां नमः अधरोष्ठे ॥१२॥ ॐ ह्लौं ओं सद्योजातेशज्वालामुखीभ्यां नमः ऊर्ध्वदन्तपंक्तौ
॥१३॥ ॐ ह्लौं औं अनुग्रहेशोल्कामुखीभ्यां नमः अधोदन्तपंक्तौ॥१४॥ ॐ ह्लौं अं अक्रूरेशश्रीमुखीभ्यां नमः शिरसि ॥१५॥ ॐ
ह्लौं अः महासेनेशविद्यामुखीभ्यां नमः मुखमध्ये ॥१६॥ ॐ ह्लौं कं क्रोधीशमहाकालीभ्यां नमः दक्षस्कंधे ॥१७॥ ॐ ह्लौं खं
चंडेशसरस्वतीभ्यां नमः दक्षकूर्परे ॥१८॥ ॐ ह्लौं गं पञ्चांतकेशगौरीभ्यां नमः दक्षिणमणिबंधे ॥१९॥ ॐ ह्लौं घं शिवोत्तमेशत्रै
लोक्यविजयाभ्यां नमः दक्षहस्तांगुलिमूले ॥२०॥ ॐ ह्लौं ङं एकरुद्रेशमंत्रशक्तिभ्यां नमः दक्षहस्तांगुल्यग्रे ॥२१॥ ॐ ह्लौं चं
कूर्मेशात्मशक्तिभ्यां नमः वामस्कंधे ॥२२॥ ॐ ह्लौं छं एकाननेशभूतमातृकाभ्यां नमः वामकूर्परे ॥२३॥ ॐ ह्लौं जं चतुराननेश
लम्बोदरीभ्यां नमः वाममणिबंधे ॥२४॥ ॐ ह्लौं झं अंजेशद्राविणीभ्यां नमः वामहस्तांगुलिमूले ॥२५॥ ॐ ह्लौं ञं सर्वेशनागरी
भ्यां नमः वामहस्तांगुल्यग्रे ॥२६॥ ॐ ह्लौं टं सोमेशखेचरीभ्यां नमः दक्षपादमूले ॥२७॥ ॐ ह्लौं ठं लंगलीशमंजरीभ्यां नमः
दक्षजानुनि ॥२८॥ ॐ ह्लौं डं दारुकेशभागिनीभ्यां नमः दक्षगुल्फे ॥२९॥ ॐ ह्लौं ढं अर्धनारीश्वरेशवारणीभ्यां नमः दक्ष ॥२५७॥
पादांगुलिमूले ॥३०॥ ॐ ह्लौं णं उमाकांतेशवृकोदरीभ्यां नमः दक्षपादांगुल्यग्रे ॥३१॥ ॐ ह्लौं तं आषाढीशपूतनाभ्यां नमः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वामपादमूले ॥ ३२ ॥ ॐ ह्लौं थं दंडीशभद्रकालीभ्यां नमः वामजानुनि ॥ ३३ ॥ ॐ ह्लौं दं अत्रीशयोगिनीभ्यां नमः वामगुल्फे ॥ ३४ ॥ ॐ ह्लौं धं मीनेशशंखिनीभ्यां नमः वामपादांगुलिमूले ॥ ३५ ॥ ॐ ह्लौं नं मेषेशतर्जनीभ्यां नमः वामपादांगुल्यग्रे ॥ ३६ ॥ ॐ ह्लौं पं लोहितेशकालरात्रिभ्यां नमः दक्षकुक्षौ ॥ ३७ ॥ ॐ ह्लौं फं शिखीशकुण्डलिनीभ्यां नमः वामकुक्षौ ॥ ३८ ॥ ॐ ह्लौं बं छागलण्डेशकपर्दिनीभ्यां नमः पृष्ठे ॥ ३९ ॥ ॐ ह्लौं भं द्विरण्डेशवज्राभ्यां नमः नाभौ ॥ ४० ॥ ॐ ह्लौं मं महाकालेशजयाभ्यां नमः उदरे ॥ ४१ ॥ ॐ ह्लौं यं त्वगात्मभ्यां वालीशसुमुखेश्वरीभ्यां नमः हृदये ॥ ४२ ॥ ॐ ह्लौं रं असृगात्मभ्यां भुजंगेशरेवतीभ्यां नमः दक्षांसे ॥ ४३ ॥ ॐ ह्लौं लं मांसात्मभ्यां पिनाकीशमाधवीभ्यां नमः ककुदि ॥ ४४ ॥ ॐ ह्लौं वं मेदआत्मभ्यां खड्गीशवारुणीभ्यां नमः वामांसे ॥ ४५ ॥ ॐ ह्लौं शं अस्थ्यात्मभ्यां केशवायवीभ्यां नमः हृदयादिदक्षकराग्रांतम् ॥ ४६ ॥ ॐ ह्लौं षं मज्जात्मभ्यां श्वेतेशरक्षोवधारिणीभ्यां नमः हृदयादिवामकराग्रांतम् ॥ ४७ ॥ ॐ ह्लौं सं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां नमः हृदयादिवामपादांतम् ॥ ४८ ॥ ॐ ह्लौं हं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः हृदयादिदक्षपादांतम् ॥ ४९ ॥ ॐ ह्लौं ळं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः हृदयादिनाभ्यंतम् ॥५०॥ ॐ ह्लौं क्षं परमात्मभ्यां संवर्तकेशमायाभ्यां नमः हृदयादिशिरोंतम् ॥ ५१ ॥ इति विन्यस्य ध्यायेत् ॥ अत्र रुद्राः स्मृता रक्ता धृतशूलकपालकाः ॥ शक्तयो रुद्रपीठस्थाः सिंदूरारुणविग्रहाः॥ रक्तोत्पलकपालाभ्यामलंकृतकरांबुजाः ॥१॥" इति श्रीकण्ठादिकलामातृकान्यासं कृत्वा प्रयोगोक्तन्यासादिकं कुर्यात् ॥ ततः। पीठादौ रचिते लिंगतोभद्रमंडले सर्वतोभद्रमंडले वा तन्मध्ये मंडूकादिपरतत्त्वांतपीठदेवताः स्थापयेत ॥ तत्र क्रमः। पुष्पाक्षतानादाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्ववामभागे श्रीगुरुभ्यो नमः ॥ १ ॥ दक्षिणे गणपतये नमः ॥२॥ मध्ये स्वेष्टदेवतायै नमः ॥ ३ ॥ इति संपूज्य ततः पीठमध्ये ॐ मं मंडूकाय नमः ॥ १ ॥ ॐ कं कालाग्निरुद्राय नमः ॥२ ॥ ॐ आं आधारशक्त्यै नमः ॥३॥ ॐ कूं कूर्म्माय नमः॥ ४ ॥ ॐ अं अनंताय नमः ॥५॥ ॐ पृं पृथिव्यै नमः ॥६॥ ॐ क्षीं क्षीरसागराय नमः ॥७॥ ॐ रं रत्नदीपाय नमः ॥ ८ ॥ ॐ रं रत्नमंडपाय नमः॥९॥ ॐ कं कल्पवृक्षाय नमः ॥१०॥ ॐ रं रत्नवेदिकायै नमः ॥११॥ ॐ रं रत्नसिंहासनाय नमः ॥ १२ ॥ इति पूजयेत् आग्नेय्याम् ॐ धं धर्म्माय नमः ॥१३॥ नैर्ऋत्याम् ॐ ज्ञां ज्ञानाय नमः ॥१४॥ वायव्याम् ॐ वैं वैराग्याय नमः॥१५॥ ऐशान्याम् ॐ ऐं ऐश्वर्याय नमः ॥१६॥ पूर्वे ॐ अं अधर्माय नमः ॥१७॥ दक्षिणे ॐ अं अज्ञानाय नमः ॥१८॥ पश्चिमे ॐ अं अवैराग्याय नमः ॥१९॥ उत्तरे ॐ अं अनैश्वर्याय नमः ॥२०॥ इति पूजयेत् ॥ पुनः पीठमध्ये । ॐ आं आनंदकंदाय नमः ॥ २१ ॥ ॐ सं संविन्नालाय नमः ॥२२॥ ॐ सं सर्वतत्त्वकमलासनाय नमः ॥२३॥ ॐ प्रं प्रकृतिमयपत्रेभ्यो नमः ॥२४॥ ॐ विं विकारमयकेसरेभ्यो नमः ॥२५॥ ॐ पं पञ्चाशद्वर्णाढ्यकर्णिकाभ्यो नमः॥२६॥ ॐ अं अर्कमंडलाय द्वादशकलात्मने नमः॥ २७॥ ॐ सों सोममंडलाय षोडशकलात्मने नमः ॥ २८ ॥ ॐ वं वह्निमंडलाय दशकलात्मने नमः ॥ २९ ॥ ॐ सं सत्त्वाय नमः ॥ ३० ॥ ॐ रं रजसे नमः ॥३१॥ ॐ तं तमसे नमः॥ ३२॥ ॐ आं आत्मने नमः॥ ३३॥ ॐ पं परमात्मने नमः ॥ ३४॥ ॐ अं अंतरात्मने नमः ॥ ३५॥ ॐ ह्रीं ज्ञानात्मने नमः॥ ३६॥ ॐ मं मायातत्त्वाय नमः॥ ३७॥ ॐ कं कलातत्त्वाय नमः ॥ ३८॥ ॐ विं वियातत्त्वाय नमः॥ ३९॥ ॐ पं परतत्त्वाय नमः ॥४०॥ एवं पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत्॥ पूर्वे ॐ वां वामायै नमः॥ १॥ आग्नेय्याम् ॐ ज्यें ज्येष्ठायै

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः ॥२॥ दक्षिणे। ॐ रौं रौद्र्यै नमः ॥३॥ नैर्ऋत्ये ॐ कां काल्यै नमः ॥४॥ पश्चिमे। ॐ कं कलविकरण्यै नमः ॥५॥ वायव्ये। ॐ बं बलविकरण्यै नमः ॥६॥ उत्तरे। ॐ बं बलप्रमथिन्यै नमः ॥७॥ ऐशान्ये। ॐ सं सर्वभूतदमन्यै नमः ॥८॥ पीठमध्ये॥ ॐ मं मनोन्मन्यै नमः॥९॥इति पीठशक्तीः पूजयेत॥ ततः स्वर्णादिनिर्मितं यंत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दद्यात॥ स्वच्छवस्त्रेण संशोष्य॥ शक्तिगंधाष्टकेन यंत्रं विलिख्य "ॐ नमो भगवते बटुकाय सकलगुणात्मशक्तियुक्ताया नंताय योगपीठात्मने नमः॥" इति मंत्रेण पुष्पाद्यासनं दत्वा वक्ष्यमाणं देवयंत्रं पूजनं विनैव केवलं पीठमध्ये संस्थाप्य पात्रासादनं कुर्यात् तत्रादौ साम्बकलशस्थापनम्॥देवदक्षिणे यक्षकर्दममिश्रितजलेन भूमिं विलिप्य त्रिकोणं च कृत्वा जलेन प्रोक्ष्य तत्त्रिकोणांतर्मायां ह्रीं विलिख्य त्रिकोणेषु कूटत्रयेण संपूजयेत्॥तद्यथा। मलस्यखंडत्रयं कृत्वा अग्निकोणे प्रथमकूटं दक्षिणकोणे द्वितीयकूटं वामकोणे तृतीयकूटं च संपूज्य त्रिकोणमध्ये ह्रीं कारदेशे ॐ ह्रीं आधार शक्तिभ्यो नमः। इति आधारशक्तीः पूजयेत्॥ ततः मूलेन नमः इति त्रिपदा आधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य ततः प्रथमकूटमुच्चार्य धर्मप्रददशकलाव्यापात्मने वह्निमंडलाय नमः इत्याधारं संपूज्य पूर्वादिक्रमेण दश वह्निकला

---

१ लिंगस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च॥ मंडलस्थां महामायां यंत्रस्थां प्रतिमासु च॥ सौवर्णे राजते ताम्रे पट्टे मृतांचवा भुवि॥ विना यंत्रेण चेत्पूजा देवता न प्रसीदति॥ २ स्वयंभू... पंकुंडगोलोत्थरोचनागुरु॥काश्मीरमृगनाभि चन्दनं च मलयोद्भवम् एष गंधः समाख्यातः सर्वदा चंडिकाप्रियः॥ ३ "कुलार्णवे-स्वर्णरूप्यशिलाकूर्म कपालानातु मृन्मयम्॥ नारिकेलं च शंखं च मुक्ताः शुक्तिसमुद्भवम्॥पुण्यवृक्षसमुद्भूतं पात्रसंलोहितं शुभम्॥साध्यसाधकयोर्मध्ये षट्त्रिंशदंगुलं भवेत्॥ द्वादशांगुलमर्द्धं च ह्यधोभागे तथांगुलम्॥द्वादशांगुलमध्यं तु तत्र संस्थापयेद्बुधः॥ स्वार्थ च द्वादश त्यक्त्वादिवा च द्वादशं त्यजेत॥द्वादशांगुलमध्यस्थं तत्र चार्घ्यं निधापयेत॥ ४ यक्षकर्दममाह धन्वंतरिः–कर्पूरागरुकस्तूरीकुंकुमं चंदनं तथा॥ महासुगंधिभिर्युक्तो नामतो यक्षकर्दमः॥ ५ मूलेनखंडत्रयंकृत्वा कूटसंज्ञोभवति।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यजेत् ॥ तद्यथा । यं धूम्रार्चिषे नमः ॥ १ ॥ रं ऊष्मायै नमः ॥ २ ॥ लं ज्वलिन्यै नमः ॥ ३ ॥ वं ज्वालिन्यै नमः ॥ ४ ॥ शं विस्फुलिंगिन्यै नमः ॥५॥ षं सुश्रियै नमः ॥६॥ सं सुरूपायै नमः ॥७॥ हं कपिलायै नमः ॥८॥ ळं हव्यवाहायै नमः ॥९॥ क्षं कव्यवाहायै नमः॥ १०॥ इति पूजयेत् ॥ ततो मूलेनास्त्राय फट् ॥ इति कलशं प्रक्षाल्य आधारोपरि हस्तद्वयेन संस्थाप्य रक्तवस्त्रमाल्यादिभिर्भूषयित्वा ततो द्वितीयकूटमुच्चार्य "ॐ अर्थप्रदद्वादशकलात्मने सूर्यमंडलाय नमः" इति कलशं संपूज्य तद्बाह्ये पूर्वादिषु सूर्यस्य द्वादश कलाः पूजयेत्। तद्यथा । ॐ कं भं तपिन्यै नमः ॥ १ ॥ ॐ खं बं तापिन्यै नमः॥२॥ ॐ गं फं धूम्रायै नमः॥ ३॥ ॐ घं पं मरीच्यै नमः॥ ४॥ ॐ ङं नं ज्वालिन्यै नमः ॥५॥ ॐ चं धं रुच्यै नमः ॥६॥ छं दं सुषुम्णायै नमः ॥७॥ ॐ जं थं भोगदायै नमः ॥ ८ ॥ ॐ झं तं विश्वायै नमः ॥९॥ ॐ ञं णं बोधिन्यै नमः ॥ १० ॥ ॐ टं ढं धारिण्यै नमः ॥ ११ ॥ ॐ ठं डं क्षमायै नमः ॥ १२ ॥ इति पूजयेत् ॥ ततः शुद्धोदकेन मुखपर्यंतं घटमापूर्य " ॐ गंगे च यमुने चैव गोदावरि सरस्वति ॥ नर्मदे सिंधु कावेरि जलेऽस्मिन्सन्निधिं कुरु " इति तीर्थान्यावाह्य ततस्तृतीयकूटमुच्चार्य "ॐ कामप्रदषोडशकलात्मने सोममंडलाय नमः" इति जले पूजयित्वा पूर्वादिषु षोडश सोमकला यजेत् । तद्यथा—ॐ अं अमृतायै नमः ॥ १ ॥ ॐ आं मानदायै नमः ॥ २ ॥ ॐ इं पूषायै नमः ॥ ३ ॥ ॐ ईं तुष्ट्यै नमः ॥ ४ ॥ ॐ उं पुष्ट्यै नमः ॥ ५ ॥ ॐ ऊं रत्यै नमः ॥ ६ ॥ ॐ ऋं धृत्यै नमः ॥ ७ ॥ ॐ ॠं शशिन्यै नमः ॥ ८ ॥ ॐ ऌं चन्द्रिकायै नमः ॥ ९ ॥ ॐ ॡं कान्त्यै नमः ॥ १० ॥ ॐ एं ज्योत्स्नायै नमः ॥ ११ ॥ ॐ ऐं श्रियै नमः ॥ १२ ॥ ॐ ओं प्रीत्यै नमः ॥ १३ ॥ ॐ औं अंगदायै नमः ॥ १४ ॥ ॐ अं पूर्णायै नमः ॥ १५ ॥ ॐ अः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्णामृतायै नमः ॥ १६ ॥ इति पूजयित्वा देवं ध्यायेत् ॥ इति साम्बकलशस्थापनम् ॥ १ ॥ अथ सुधाकुंभस्थापनम् ॥ स्ववामे त्रिकोणं षट्कोणं वृत्तं चतुरस्रं मंडलं कृत्वा शंखमुद्रया मंडलं स्पर्शयेत्। ततस्त्रिकोणांतरमयं विलिख्य त्रिकोणेषु कूटत्रयं पूजयेत्। तद्यथा— अग्निकोणे प्रथमकूटं दक्षिणकोणे द्वितीयकूटं वामकोणे तृतीयकूटं च पूजयेत॥ ततः षट्कोणेषु अग्निकोणे ॐ हृदयशक्तिभ्यां नमः। ऐशान्ये ॐ शिरःशक्तिभ्यां नमः। वायव्ये-शिखाशक्तिभ्यां नमः। नैर्ऋते-कवचशक्तिभ्यां नमः। पूर्वे-नेत्रशक्तिभ्यानमः। पश्चिमे-अस्त्रशक्तिभ्यां नमः इति षडंगानि गंधपुष्पाभ्यां संपूज्य षट्कोणाद्बहिर्वर्तुले अकारादिक्षकारांतं मातृकां संपूजयेत॥ ततो वर्तुलाद्बहिश्चतुरस्रे पूर्वद्वारे उड्यानपीठाय नमः। दक्षिणद्वारे। जालंधरपीठाय नमः। पश्चिमद्वारे। पूर्णगिरिपीठाय नमः। उत्तरद्वारे। कामगिरिपीठाय नमः॥ इति चतुःपीठानि गंधपुष्पाभ्यां संपूज्य त्रिकोणमध्ये 'ॐ ह्रीं आधारशक्तिभ्यो नमः' इत्याधारशक्तीः पूजयेत॥ ततो 'मूलेन नमः' इति मंत्रेणाधारद्रव्यं प्रक्षाल्य मंडलोपरि संस्थाप्य ततः प्रथमकूटमुच्चार्य ॐ धर्मप्रददशकलाव्यापात्मने वह्निमंडलाय नमः इति संपूज्य पूर्वादिषु दश वह्निकला यजेत्। तथा च ॐ यं धूम्रार्चिषे नमः ॥ १ ॥ ॐ रं ऊष्मायै नमः ॥ २ ॥ ॐ लं ज्वलिन्यै नमः ॥ ३ ॥ ॐ वं ज्वालिन्यै नमः ॥ ४ ॥ ॐ शं विस्फुलिंग्यै नमः ॥ ५ ॥ ॐ षं सुश्रियै नमः ॥ ६ ॥ ॐ सं सुरूपायै नमः ॥ ७ ॥ ॐ हं कपिलायै नमः ॥ ८ ॥ ॐ ळं हव्यवाहायै नमः ॥ ९ ॥ ॐ क्षं कव्यवाहायै नमः ॥ १० ॥ इति पूजयेत् ॥ ततः मूलेनास्त्राय फट् इति मंत्रेण कलशं प्रक्षाल्य रक्तवस्त्रमाल्यादिभिर्भूषयित्वा रत्नखचितं तत्पात्रं त्रिपदाधारोपरि हस्तद्वयेन संस्थाप्य द्वितीयकूटमुच्चार्य ॐ अर्थप्रदद्वादशकलाव्यापात्मने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूर्यमंडलाय नमः ॥ इति मंत्रेण कलशं स्पृष्ट्वा पूर्वादिषु द्वादश सूर्यकला यजेत । तथा च । ॐ कं भं तपिन्यै नमः ॥ १ ॥ ॐ खं बं तापिन्यै नमः ॥ २ ॥ ॐ गं फं धूम्रायै नमः ॥ ३ ॥ ॐ घं पं मरीच्यै नमः ॥ ४ ॥ ॐ ङं नं ज्वालिन्यै नमः ॥ ५ ॥ ॐ चं धं रुच्यै नमः ॥ ६ ॥ ॐ छं दं सुषुम्णायै नमः॥ ७ ॥ ॐ जं थं भोगदायै नमः ॥ ८ ॥ ॐ झं तं विश्वायै नमः ॥ ९ ॥ ॐ ञं णं बोधिन्यै नमः ॥ १० ॥ ॐ टं ढं धारिण्यै नमः ॥ ११ ॥ ॐ ठं डं क्षमायै नमः ॥ १२ ॥ इति पूजयेत् ॥ ततः सुधामिश्र वस्त्रगालिततीर्थामृतेन कलशमापूर्य्य तृतीयकूटमुच्चार्य्य कामप्रदषोडशकलाव्यापात्मने सोममंडलाय नमः ॥ इति मंत्रोक्ष्य तदमृते षोडशचन्द्रकला यजेत् ॥ तथा च-ॐ अं अमृतायै नमः ॥ १ ॥ ॐ आं मानदायै नमः ॥ २ ॥ ॐ इं पूषायै नमः ॥ ३ ॥ ॐ ईं तुष्ट्यै नमः ॥ ४ ॥ ॐ उं पुष्ट्यै नमः ॥ ५ ॥ ॐ ऊं रत्यै नमः ॥ ६ ॥ ॐ ऋं धृत्यै नमः ॥ ७ ॥ ॐ ॠं शशिन्यै नमः ॥ ८ ॥ ॐ ऌं चन्द्रिकायै नमः ॥ ९ ॥ ॐ ॡं कान्त्यै नमः ॥ १० ॥ ॐ एं ज्योत्स्नायै नमः ॥ ११ ॥ ॐ ऐं श्रियै नमः ॥ १२ ॥ ॐ ओं प्रीत्यै नमः ॥ १३ ॥ ॐ औं अंगदायै नमः ॥ १४ ॥ ॐ अं पूर्णायै नमः ॥ १५॥ ॐ अः पूर्णामृतायै नमः ॥ १६ ॥ इति संपूज्य द्रव्यशुद्धिं कुर्यात् ॥ तथा च--"ॐ सुधादेवी विद्महे कामेश्वर्यै च धीमहि ॥ तन्नो रक्ताक्षि प्रचोदयात" इति सुधागायत्रीमंत्रेण दशधाभिमंत्र्य मूलमंत्रं दशधा जपेत् ॥ इति शुद्धिं संपाद्य शापमोचनं कुर्यात् । तथा च । ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ॥ कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥ १ ॥ सूर्यमंडलसंभूते वरुणालयसम्भवे ॥ आरयबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ २ ॥ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि ॥ तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु ॥ ३ ॥ इति मंत्रेण सुधायामाच्छाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मंत्रं पठेत् ।। तत्र मंत्रः ।। 'ॐ सां सीं सूं सैं सौं सः शुक्रशापविमोचिकायै सुधादेव्यै नमः।। १ ।।' इति द्वादशधा जपेत् ।। 'ॐ व्रां व्रीं व्रूँ व्रैं व्रौं व्रः ब्रह्मशापविमोचिकायै सुरादेव्यै नमः' इति दशधा जपेत् ।। २ ।। 'ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुधाकृष्णशापं विमोचय २ अमृतं स्रावय २ स्वाहा' इति दशधा जपेत् ।। ३ ।। 'ॐ रां रीं रूं रैं रौं रः रुद्रशापविमोचिकायै सुरादेव्यै नमः' इति दशधा जपेत् ।। ४ ।। इति शुक्रब्रह्मकृष्णरुद्रशापोद्धारणं कृत्वा दशदोषनिवारणं कुर्यात् ।। तथा च । 'ॐ ह्रीं क्रीं परमस्वामिनि परमाकाशशून्यवाहिनि चन्द्रसूर्याग्निभक्षिणि पात्रं विशविश स्वाहा ' इति मंत्रं पात्रोपरि दशधा जपेत्।। १ ।। 'ॐ ऐं ह्रीं श्रीं महेश्वराय विद्महे सुधादेव्यै च धीमहि ।। तन्नोर्द्धनारीश्वरः प्रचोदयात्' इति मंत्रं पात्रोपरि दशधा जपेत ।।२।। इति मंत्र द्वयं पठित्वा ततो दशदोषनिवारणार्थं दशमंत्रद्वारा पात्रोपरि अक्षतान्निःक्षिपेत । तद्यथा-'ॐ ऐं ह्रीं श्रीं पथिकदेवताभ्यो हुं फट् स्वाहा' ।। १ ।। 'ॐ ऐं ह्रीं श्रीं यंरंलंआं आस्फालिनी ग्रामचांडालिनी हुं फट् स्वाहा ।।२।।' ॐ ऐं ह्रीं श्रीं ह्रौं ह्रां संगमस्पर्शचांडालिनी हुं फट् स्वाहा ।। ३।। 'ॐ ऐं ह्रीं श्रीं फें वं ङं लं क्षं दृष्टिचांडालिनी हुं फट् स्वाहा ।।४।। ' ॐ ऐं ह्रीं श्रीं ग्लौं ग्लां क्रोधचांडालिनी हुं फट् स्वाहा ।। ५ ।। 'ॐ ऐं ह्रीं श्रीं अं सृष्टिचांडालिनी हुं फट् स्वाहा ।। ६ ।।' ॐ ऐं ह्रीं श्रीं आं क्रों घटचांडालिनी हुं फट् स्वाहा ।। ७ ।। 'ॐ ऐं ह्रीं श्रीं चं छं तपनीयवधचांडालिनी हुं फट् स्वाहा ।। ८ ।।' 'ॐ ऐं ह्रीं श्रीं क्षं आं क्रों क्लीं निर्दयचांडालिनी हुं फट् स्वाहा ।।९।।' 'ॐ ऐं ह्रीं श्रीं स्रूं छं स्रों स्रौं खेदयखेदय सर्वजनसृष्टिस्पर्शदोषाय हुं फट् स्वाहा ।।१०।।' इत्युक्त्वा कुंभोपरि अक्षतान्निःक्षिपेत ।। ततः ' ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ।। नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजा अद्रिजाऋतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बृहत्॥१॥' इत्यनेन त्रिवारं द्रव्योपरि पठित्वा गन्धपुष्पाणि निःक्षिप्य द्रव्यंशुद्धमिति भावयन् दोषरहितद्रव्यमध्ये आनंदभैरवमानं
दभैरवीं च ध्यायेत्॥ अथानंदभैरवध्यानम्॥ 'सूर्यकोटिप्रतीकाशं चंद्रकोटिसुशीतलम् ॥अष्टादशभुजं देवं पंचवक्त्रं त्रिलोचनम्॥१॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरि स्थितम् ॥ वृषारूढं नीलकंठं सर्वाभरणभूषितम् ॥२॥ कपालखट्वांगधरं घंटाडमरुवादिनम् ॥ पाशांकु
शधरं देवं गदामुसलधारिणम् ॥ ३ ॥ खड्गखेटकपट्टीशमुद्गरं शूलकुंतलम् ॥ विधृतं खेटकं मुंडं वरदाभयपाणिकम् ॥ ४ ॥ लोहितं
देवदेवेशं भावयेत्साधकोत्तमः ॥ ५ ॥' इति ध्यात्वा ॥ 'ॐ ऐं ह्रीं श्रीं वं हसक्षमलवरयूं आनंदभैरवाय वौषट्' इति मंत्रेणानंदभैरवं
त्रिः संपूज्य आनंदभैरवीं ध्यायेत् ॥ तद्यथा-"भावयेच्च सुरां देवीं चन्द्रकोटियुतप्रभाम् ॥ हेमकुंदेंदुधवलां पंचवक्त्रां त्रिलोचनाम् ॥१॥
अष्टादशभुजैर्युक्तां सर्वानंदकरोद्यताम्॥प्रहसंतीं विशालाक्षीं देवदेवस्य संमुखीम्॥२॥"इति ध्यात्वा 'ॐ ऐं ह्रीं श्रीं हसक्षमलवरयीं सुधादे
व्यै वौषट्।' इत्यानंदभैरवीं संपूजयेत। ततः स्थालीमध्ये किंचिद्द्रव्यं गृहीत्वा द्रव्यमध्ये शक्तिचक्रं विलिख्य तदभावे त्रिकोणदक्षावर्तेन
विलिख्य ऊर्ध्वरेखायाम्-अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः दक्षिणरेखायाम्-कंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतं उत्तररेखायाम्-थंदंधंनंपंफं
बंभंमंयंरंलंवंशंषंसंहं दक्षिणपार्श्वे-ॐ लं नमः वामपार्श्वे-ॐ क्षं नमः त्रिकोणमध्ये-कामकलां 'ईं' इति विलिख्य द्रव्यमध्ये अमृतत्वं विचिंत
येत्।तत्र मंत्रः-"ॐ ऐं ह्रीं श्रीं ह्रीं अमृते अमृतोद्भव अमृतवर्षिणि अमृतस्वरूपिणि अमृतं स्रावयस्रावय शुक्रादिशापात् सुरां मोचयमोचय ॥ २६१॥
मोचिकायै नमः" इति विचिंतयेत्। ततः"ह्रीं ॐ जूं सः" इति मृत्युंजयमंत्रं द्वाविंशतिवारं जपित्वा तेनैव मंत्रेण द्रव्यं कलशे क्षिप्त्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलेनाष्टधाभिमंत्र्य सुधामंत्रेणाभिमंत्रयेत् ॥ तत्र मंत्रः ॥ "पावमानः परानंदः पावमानः परो रसः॥ पावमानं परं ज्ञानं तेन ते पावयाम्यहम्"इति अभिमंत्रयेत्-पश्चाद्धेनुमुद्रयामृतीकृत्य मत्स्यमुद्रयाच्छाद्य कवचेनावगुंठ्य चक्रेण संरक्ष्य अस्त्रेण च्छोटिकाभिर्दशदिग्बंधनं कृत्वा कलशं ध्यायेत ॥ अथ कलशध्यानम् ॥ "देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि महाकुंभ विष्णुना विधृतः करे॥ १ ॥त्वत्तोये सर्वदेवाः स्युः सर्वे वेदाः समाश्रिताः॥त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ २॥शिवस्त्वं च घटोसि त्वं विष्णुस्त्वं च प्रजापतिः आदित्याद्या ग्रहाः सर्वे विश्वेदेवाः सपैतृकाः॥ ३॥ त्वयि तिष्ठंति कलशे यतः कामफलप्रदाः॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ ॥ ४ ॥त्वदालोकनमात्रेण भुक्तिमुक्तिफलं महत् ॥ सान्निध्यं कुरु भो कुंभ प्रसन्नो भव सर्वदा॥ ५॥"इति ध्यात्वा घटसूक्तं पठेत् ॥ अथ घटसूक्तम् "समुद्रे मथ्यमाने तु क्षीरोदे सागरोत्तमे॥ तत्रोत्पन्नां सुरां ध्यायेत्कन्यकारूपधारिणीम्॥ १ ॥ अष्टादशभुजां देवीं रक्तांतायतलोचनाम् ॥ आपीनवर्णां स्वर्णाभां बहुरूपां परां सुराम्॥ २॥ तां सर्वां तु सुरां सर्वदेवानामभयंकरीम् ॥या सुरा सा रमा देवी यो गंधः स जनार्दनः ॥ ३॥ यो वर्णः स भवेद्ब्रह्मा यो मदः स महेश्वरः॥स्वादे तु संस्थितः सोमः शब्दसंस्थो हुताशनः॥ ४॥ इच्छायां मन्मथो देवः पाताले तु च भैरवः ॥ घटो ब्रह्मा रसो विष्णुर्बिंदवो रुद्र एव च ॥ ५ ॥ हुंकार ईश्वरः प्रोक्तो ह्युन्मोदस्तु सदाशिवः॥ घटमूले स्थितो ब्रह्मा घटमध्ये तु माधवः ॥ ६ ॥ घटकंठे नीलकंठो घटाग्रे सर्वदेवताः ॥ लक्ष्मी हि वारुणी देवी महामांसचरुप्रिया ॥ ७ ॥ सर्वप्रिया तु या देवी सुरादेवि नमोस्तु ते ॥ अनेन घटसूक्तेन द्रव्यशुद्धिः प्रजायते॥ ८॥" एवं घटसूक्तं पठित्वा कलशे प्राणप्रतिष्ठां कुर्यात् ॥ अथ

---

१ श्यामारहस्ये-अमृतं चिंतयेद्द्रव्यमष्टधा त्वमृतं जपेत् ॥ अष्टधा मूलमंत्रं च जपेत्कृत्वा घटं ततः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कलशप्राणप्रतिष्ठाप्रयोगः ॥ करेणाच्छाद्य ॐ आं ह्रीं क्रों यँ रं लं वं शं षं सं हंसः सोहं श्रीमद्बटुकभैरवस्याधारसहितस्य कलशेस्मिन् अग्निसूर्यसोमकलानां प्राणा इह प्राणाः । पुनः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः सोहं श्रीमद्बटुकभैरवस्यास्मिन्कलशे जीव इह स्थितः।पुनः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः सोहं श्रीमद्बटुकभैरवस्यास्मिन्कलशे सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुर्जिह्वाश्रोत्र घ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥३॥इति प्राणान्प्रतिष्ठाप्य गंधादिभिः संपूज्य तत्र कलशे चतुर्दिक्षु पंच रत्नानि पूजयेत । तद्यथा-पूर्वे ॐ ग्लूं गगनरत्नाय नमः। दक्षिणे-ॐ स्लूं स्वर्गरत्नाय नमः । पश्चिमे-ॐ ह्लूं पातालरत्नाय नमः। उत्तरे-ॐ म्लूं मर्त्यरत्नाय नमः। मध्ये-ॐ न्लूं नागरत्नाय नमः ॥ एवं पंचरत्नानि संपूज्य पंचमुद्रया नमस्कृत्य कलशे बलिं दद्यात् ॥ तद्यथा कुंभसमीपे रक्तचंदनसिंदूरकुंकुममेकत्र मेलयित्वा तेन त्रिकोणवृत्तचतुरस्रमंडलं कृत्वा तत्र 'सर्वपथिकदेवेभ्यो नमः' इति गंधपुष्पाभ्यां संपूज्य तदुपरि द्रव्यशुद्धिमीनमुद्रान्वितं बलिं निधाय तत्त्वमुद्रया बलिमुत्सृज्यतं बलिं वामपाणिना कलशोपरि त्रिधा भ्रामयित्वा मूलमुच्चरन् पूजाबाह्ये निःक्षिपेत ॥ इति सुधाकलशस्थापनविधिः ॥अथ शुद्धिस्थापनवि० ॥ कुंभस्य वामतः शुद्धिं संस्थाप्य पात्रासादनं कुर्यात॥ तद्यथा-कुंभस्य वामतः सांबकलशस्थापनोक्तविधिना शुद्धिं संस्थाप्य धेनुमुद्रां प्रदर्श्य "ॐ उद्बुध्यस्व पशो त्वं हि न पशुस्त्वं शिवोसि भो॥ शिवाकृत्यमिदं पिंडं यतस्त्वं शिवतां व्रज ॥१॥ ॐ पशुपाशाय विद्महे शिरश्छेदाय धीमहि । तन्नश्छागः प्रचोदयात ॥२॥" इति त्रिवारं पठेत् ॥ इति शुद्धिस्थापनम् ॥ इति शुद्धिं संस्थाप्य पात्रासादनं कुर्यात ॥ अथ पात्रासादनप्रयोगः ॥ तत्रादौ शंखस्थापनप्रयोगः ॥

For Private And Personal Use Only

देवे[१]वामतः सांबकलशस्थापनोक्तविधिना शंखं संस्थाप्य गंधादिभिः संपूज्याभिमंत्रयेत् । तत्र मंत्रः ॥ " ॐ शंखादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता ॥ पृष्ठे प्रजापतिश्चैवमग्रे गंगा सरस्वती ॥ १ ॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत ॥ २ ॥" इत्यभिमंत्र्य प्रार्थयेत ॥ तत्र मंत्रः॥ "ॐ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते ॥ १ ॥ " इति संप्रार्थ्य । " ॐ पांचजन्याय विद्महे पावमानाय धीमहि ॥ तन्नः शंखः प्रचोदयात ॥ " इत्यष्टधा जपित्वा शंखमुद्रां प्रदर्शयेत् ॥ इति शंखस्थापनम ॥ अथ विशेषार्घस्थापनम् ॥ आत्मश्रीचक्रयोर्मध्ये स्वपुरतः सांबकलशोक्तविधिना विशेषार्घपदमुच्चरन् विशेषार्घं संस्थाप्याभिमंत्रयेत ॥ तत्र मंत्रः ॥ " ॐ ऐं क्लीं सौं ब्रह्माण्डखण्डसंभूतमशेषरससंभवम् ॥ आपूरितं महापात्रं पीयूषरसमावह ॥ १ ॥ अखंडैकरसानंदकलेवरसुधात्मनि ॥ स्वच्छंदस्फुरणान्मंत्रान्निधेह्यकुलरूपिणी ॥ २ ॥ क्लीं अकुलस्थामृताकारे सिद्धज्ञानकलेवरे ॥ अमृतत्वं निधेह्यस्मिन्वस्तुनि क्लिन्नरूपिणी ॥ ३ ॥ सौः तद्रूपेणैकरस्यं च कृत्वास्यैतत्स्वरूपिणी ॥ भूत्वा पराभृताकारं मयि विस्फुरणं कुरु ॥ ४ ॥ अनेन मंत्रेणार्घ्यमभिमंत्र्य पूर्ववत पंचरत्नानि पूजयेत॥ इति विशेषार्घस्थापनम्॥ इति विशेषार्घ्यं स्थापयित्वा देवदक्षिणतः प्रोक्षणीपात्रमेवमेवविधिना स्थापयेत॥ इति त्रिरर्घ्यस्थापनम् ॥ ३ ॥ततो विशेषार्घाद्वामतः श्रीपात्रं १ गुरुपात्रं २ भैरवपात्रं ३ शक्तिपात्रं ४ योगिनीपात्रं ५ भोगपात्रं ६ वीरपात्रं ७ आत्मपात्रं ८ बलिपात्रं ९ एतानि नव पात्राणि दक्षिणे

---

१ वामे शंखं प्रतिष्ठाप्य मध्ये चार्घ्यं प्रकल्पयेत॥ दक्षिणे प्रोक्षणीपात्रम त्रयाविकल्पने॥ दृष्ट्वार्घपात्रं देवेशि ब्रह्माद्या देवताः सदा ॥ नृत्यंति सर्वयोगिन्यः प्रीताः सिद्धिं ददत्यपि ॥ आदौ कुंभं तथा शंखं श्रीपात्रं शक्तिपात्रकम् ॥ गुरुपात्रं वीरपात्रं बलिपात्रं तथैव च॥

पाद्यार्घ्याचमनीयमधुपर्का इति चत्वारि पात्राणि सांबकलशोक्तविधिना स्थापयेत् ॥ अशक्तश्चेद्गुरवीगात्मबलिभोगेति पंचपात्राणि पाद्या द्युपचारार्थमेकं वा पात्रं स्थापयेत ॥ तत्राप्यशक्तश्चेत्तदा एकमेव शंखं संस्थापयेत् ॥ अथ घंटास्थापनप्रयोगः ॥ देवदक्षिणतः घंटां संस्थाप्य नादं कृत्वा पूजयेत ॥ तथा च "ॐ भूर्भुवः स्वः गरुडाय नमः । आवाहयामि सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि नमस्करोमि" इत्यावाह्य । "ॐ जगद्ध्वने मंत्रमातः स्वाहा" इति मंत्रेण घंटास्थितगरुडं घंटां च संपूज्य गरुडमुद्रां प्रदर्शयेत ॥ इति घंटास्थापनम् ॥ अथ अखण्डदीपस्थापनप्रयोगः ॥ देवस्य दक्षिणभागे घृतदीपं वामे तैलदीपं स्थापयेत ॥ तथा च । दीपपात्रं गोघृतेन तैलेन वाऽऽपूर्य एकविंशतितंतुभिर्वर्तिं निःक्षिप्य प्रणवेन (ॐ) प्रज्वाल्य सुदर्शनमंत्रेण घृतदीपं पूजयेत ॥ सुदर्शनमंत्रो यथा-"ॐ गौंरींक्रूंरेरौंरः सुदर्शनायास्त्राय फट् स्वाहा" इति मंत्रेण गंधपुष्पाभ्यां पूजयेत् ॥ तैलदीपं पाशुपतास्त्रमंत्रेण पूजयेत ॥ पाशुपतास्त्रमंत्रो यथा-"ॐ श्लीं पशु हुं फट् स्वाहा" इति मंत्रेण पूजयेत् ॥ इति संपूज्य हस्तद्वयेन दीपशिखां स्पृष्ट्वा मंत्रं पठेत ॥ तत्र मंत्रः ॥ ॐ अघोराय घोरतमाय महारौद्राय वीरभद्राय ज्वालामालिने सर्वदुष्प्राणोपसंहर्त्रे हुं फट् स्वाहा" इति पठित्वा तेजसात्मानं समर्प्य चित्तं शोधयेत् ॥ तथा च-हुं फट् स्वाहा इति मुखे ॥ १ ॥ ॐ रक्षरक्ष हुं फट् स्वाहेति हृदये ॥ २ ॥ हस्तं दत्वात्मरक्षां निधाय "ॐ" इति मंत्रेण चंदनपुष्पाणि कराभ्यां मर्दयित्वा पुष्पाक्षतानादाय "ॐ ते सर्वे विलयं यांतु ये मां हिंसंति हिंसकाः ॥ मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके ॥ १ ॥" इति मंत्रेणैशान्यां दिशि दूरतः पुष्पं क्षिप्त्वा हस्तौ प्रक्षाल्याचमेत ॥ इत्यखण्डदीपस्थापनम् ॥ इति दीपं संस्थाप्य गंधाक्षतादिपूजोपकर

१ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ घंटानादं प्रकुर्वीत पश्चाद्घंटां प्रपूजयेत ॥ दीपं घृतयुतं दक्षे तैलयुक्तं च वामतः ॥ दक्षिणे च सितां वर्तिं वामतो रक्तवर्तिकाम् ॥२॥

For Private And Personal Use Only

णानि स्वदक्षिणे संस्थाप्य मूलेन 'नमः' इति संप्रोक्ष्य जलार्थं बृहत्पात्रं व्यजनच्छत्रादर्शचामराणि च वामपार्श्वे निधापयेत् ॥ अथ मांस शोधनम् ॥ " ॐ पशुपाशाय विद्महे शिरच्छेदाय धीमहि ॥ तन्नो मांसः प्रचोदयात् " इति दशधा जपे मांसः शुद्धो भवति ॥ अथ मीनशोधनम् ॥ "ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् " इति मंत्रेण शोधयेत् ॥ अथ मुद्राशोधनम् ॥ "ॐ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति॥गर्भं ते आश्विनौ धत्तां वेर्धतां पुष्करस्रजौ ॥ १ ॥""ॐ हुं ज्लुं ग्लूं स्वाहा" इति मंत्रेण मांसमीनमुद्राः शोधयेत् ॥ इति शोधयित्वा यंत्रस्य प्राणप्रतिष्ठां कुर्यात् ॥ अथ प्राणप्रतिष्ठाप्रयोगः ॥ देशकालौ संकीर्त्य मम बटुकभैरवदेवतानूतनयंत्रे प्राणप्रतिष्ठां करिष्ये इति संकल्पयेत॥अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । ऋग्यजुः सामानि च्छंदांसि । क्रियामयवपुःप्राणाख्या देवता । आं बीजम् । ह्रीं शक्तिः । क्रों कीलकम् । अस्य नूतनयंत्रे प्राणप्रतिष्ठापने विनियोगः ॥ इति जलं क्षिपेत् ॥ ततो यंत्रं करेणाच्छाद्य ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः सोहं अस्य बटुकभैरवसपरिवारयंत्रस्य प्राणा इह प्राणाः ॥ १ ॥ पुनः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः सोहं अस्य बटुकभैरवसपरिवारयंत्रस्य जीव इह स्थितः ॥२॥ पुनः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हंसः सोहं अस्य बटुकभैरवसपरिवारयंत्रस्य सर्वेन्द्रियाणि इह स्थितानि ॥ ३ ॥पुनः ॐ आं ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँसः सोहं अस्य बटुकभैरवसपरिवारयंत्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ ४ ॥ इति प्रतिष्ठाप्य "यःप्राणतोनिमिषतोमहित्वेविधेमइति मन्त्रिति" त्रिवारं पठेत् ॥ "मनोजूतिर्जूपतासुप्रतिष्ठाप्रतिष्ठा" इत्युक्त्वा संस्कारसिद्धये पंचदशप्रणवावृत्तीः कृत्वा अनेन बटुकभैरवसपरिवारयंत्रस्य गर्भाधानादिपंचदशसंस्कारान्संपादयामीति वदेत् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति प्राणान् प्रतिष्ठाप्य ध्यायेत् ॥ अथ ध्यानम् ॥ शुद्धस्फटिकसंकाशंसहस्रादित्यवर्चसम् ॥ नीलजीमूतसंकाशंनीलांजनसमप्रभम्॥ १ ॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥ २ ॥ भुजंगमेखलं देवमग्निवर्णशिरोरुहम् ॥ दिगंबरं कुमारेशं वटुकाख्यं महाबलम् ॥ ३ ॥ खट्वांगमसिपाशं च शूलं दक्षिणभागतः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ ४ ॥ अग्निवर्णसमोपेतं सारमेयसमन्वितम् ॥ एवं ध्यात्वा हि वटुकं ततो यजनमारभेत् ॥ ५ ॥ तत्र मंत्रः ॥ अक्षतानादाय "देवेश भक्तिसुलभ परिवारसमन्वित ॥ यावत्त्वां पूजयिष्यामि तावद्देव इहावह ॥ १ ॥ आगच्छ देव वटुक स्थाने चात्र स्थितो भव ॥ यावत्पूजां करिष्यामि तावत्त्वं सन्निधौ भव ॥ २ ॥" मूलं पठित्वा 'ॐ भूर्भुवः श्रीवटुकभैरवदेवते इहागच्छ इह तिष्ठ ' इत्यक्षतान्निःक्षिप्य आवाहनीमुद्रां प्रदर्शयेत् ॥ इत्यावाहनम् ॥ १ ॥ "तवेयं महिमा मूर्तिस्तस्यां त्वां सर्वगः प्रभो ॥ भक्तिस्नेहसमाकृष्टंदीपवत्स्थापयाम्यहम् ॥ १ ॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवदेव इहतिष्ठ ॥ इत्यक्षतान्निःक्षिप्य स्थापिनीमुद्रां प्रदर्शयेत् ॥ इति स्थापनम् ॥ २ ॥ "अनन्या तव देवेश मूर्तिशक्तिरियं प्रभो ॥ सान्निध्यं कुरु तस्यां त्वं भक्तानुग्रहतत्परः ॥ १ ॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवदेवते इह सन्निधेहि ' इत्यक्षतान्निःक्षिप्य सन्निधापनीमुद्रां प्रदर्शयेत् ॥ इति संनिधापनम् ॥ ३ ॥ "आज्ञया तव देवेश कृपांभोधे गुणांबुधे ॥ आत्मानं देकतृतं त्वां निरुणध्मि पितर्गुरो ॥ १ ॥" मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीवटुकभैरवदेवते इह सान्निरुध्य ॥ इत्यक्षतान्निःक्षिप्य सन्निरोधनमुद्रां प्रदर्शयेत् ॥ इति सन्निरोधनम् ॥ ४ ॥ "अज्ञानाद्दुर्मनस्त्वाद्वा वैकल्यात्साधनस्य च ॥ यदपूर्णं भवेत्कृत्यं तदप्यभिमुखो भव ॥ १ ॥" मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवदेव इह संमुखो भव ' इत्यक्षतान्निःक्षिप्य सम्मुखीकरणमुद्रां प्रदर्शयेत् ॥ इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्मुखीकरणम् ॥ ५ ॥ "अभक्तवाङ्मनश्चक्षुःश्रोत्रदूरातिगद्युते ॥ स्वतेजःपञ्जरेणाशु वेष्टितो भव सर्वतः ॥ १ ॥ " मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवदेव अवगुंठितो भव' इत्यक्षतान्निःक्षिप्य अवगुंठनीमुद्रां प्रदर्शयेत॥इत्यवगुंठनं कृत्वा सुस्वागतं कुर्यात ॥६॥ तत्र मंत्रः॥ "यस्य दर्शनमिच्छंति देवाः स्वाभीष्टसिद्धये॥तस्मै ते परमेशाय स्वागतं स्वागतं च ते॥ १ ॥" मूलमंत्रं पठित्वा 'ॐ श्रीवटुकभैरवाय नमः' सुस्वागतं समर्पयामि ॥ इति सुस्वागतम् ॥७॥ "देवदेव महाराज प्रियेश्वर प्रजापते ॥ आसनं दिव्यमीशान दास्येहं परमेश्वर ॥ १ ॥" मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः वटुकभैरवाय नमः' आसनं समर्पयामि ॥ इत्यासनं दत्त्वा करौ बद्ध्वा प्रार्थयेत् ॥ ८ ॥ तत्र मंत्रः ॥ "स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः ॥ प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय ॥ १ ॥" मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' प्रार्थनां समर्पयामि नमस्करोमि ॥ इति प्रार्थयित्वा पाद्यादिपुष्पांतैरुपचारैः संपूजयेत् ॥ ९ ॥ अथ पाद्यादिपूजनम् ॥ "ॐ यद्भक्तिलेशसंपर्कात्परमानंदविग्रहः॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पयेत् ॥ १ ॥" मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' पाद्यं समर्पयामि ॥ इति सामान्यार्घोदकेन[1] पाद्यं दद्यात ॥ १ ॥ " ॐ तापत्रयहरं दिव्यं परमानंदलक्षणम् ॥ तापत्रयविनिर्मुक्त तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥" मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' अर्घ्यं समर्पयामि ॥ इत्यर्घः॥ २॥ "ॐ सर्वकालुष्यहीनाय परिपूर्णसुखात्मने॥मधुपर्कमिदं देव कल्पयामि प्रसीद मे॥ १ ॥"मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' मधुपर्कं समर्पयामि ॥ इति मधुपर्कम्॥ ३॥ "ॐ वेदानामपि वेदाय देवानां देवतात्मने॥आचामं कल्पयामीश शुद्धानां

१ अथवा शंखोदकेन।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुद्धिहेतवे ॥१॥" मूलमंत्रं पठित्वा ॐ भूर्भुवः स्वः आचमनं समर्पयामि ॥ इत्याचमनम् ॥४॥ ॐ इत्याचमनं दत्त्वा पञ्चामृतस्नानादिकं च सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा जलस्नानं कुर्यात ॥ तद्यथा--"ॐ गंगासरस्वतीरेवापयोष्णीनर्मदाजलैः॥ स्नापितोऽसि मया देव तथा शांतिं कुरुष्व मे ॥१॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' शंखोदकस्नानं समर्पयामि ॥ इति स्नानम् ॥५॥ 'ॐ सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥ मयैवापादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥१॥" मूलमंत्रं पठित्वा 'ॐ श्रीवटुकभैरवाय नमः' वस्त्रं समर्पयामि ॥ इति वस्त्रम् ॥६॥ "ॐ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम ॥ उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥१॥" मूलमंत्रं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' यज्ञोपवीतं समर्पयामि॥इति यज्ञोपवीतम्॥७॥"ॐ श्रीखण्डं चंदनं दिव्यं गंधाढ्यं सुमनोहरम्॥विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम्॥१॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' गंधं समर्पयामि ॥ अंगुष्ठौ कनिष्ठामूललग्नौ गंधमुद्रा । इति गंधम्॥८॥ 'ॐ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः॥ मया निवेदिता भक्त्या गृहाण परमेश्वर ॥१॥"मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' अक्षतान्समर्पयामि॥इत्यक्षतान् ॥९॥"ॐ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभो ॥ मयानीतानि पुष्पाणि गृहाण परमेश्वर ॥१॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः श्रीवटुकभैरवाय नमः' पुष्पं समर्पयामि॥ तर्जन्यांगुष्ठमूललग्ने पुष्पमुद्रा ॥ १० ॥ एवं पुष्पांतं पूजयित्वा ततो देवाज्ञयावरणपूजां कुर्यात् ॥ अथावरणपूजा ॥ तत्र क्रमः ॥ " श्रीपदं पूर्वमुच्चार्य पादुकापदमुद्धरेत् ॥ पूजयामि नमः पश्चात्पूजयेदंगदेवताः ॥ १ ॥ " इत्युच्चरन् आवरणदेवताः पूजयेत ॥ ततः पुष्पांजलिमादाय " ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि वटुक परिवारार्चनाय मे ॥ २ ॥ " इत्युक्त्वा पुष्पांजलिं

For Private And Personal Use Only

भैरवोपरि दत्त्वा आज्ञां गृहीत्वा अत्र सर्वत्र पूज्यपूजकयोरंतराले प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्रयोगोक्तावरणपूजां कृत्वा धूपादिभिः पूजनं कुर्यात् ॥ अथ धूपादिपूजाप्रयोगः ॥ फडिति धूपपात्रं संप्रोक्ष्य मूलेन नमः इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय (ॐ रं) इति वह्निबीजेनोपरि अग्निं संस्थाप्य तदुपरि मूलेन दशांगं दत्त्वा घंटां वादयन् "ॐ वनस्पतिरसोद्भूतो गंधाढ्यो गंध उत्तमः॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यताम्॥ १॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीबटुकभैरवाय नमः' धूपं समर्पयामि॥इति नाभिदेशतः धूपयित्वा देववामतः धूपपात्रं निधाय तर्जनीमूलयोरंगुष्ठयोगे धूपमुद्रां प्रदर्शयेत्॥ इति धूपम्॥ १॥ ततो दीपपात्रे गोघृतमापूर्य एकविंशतितंतुभिर्वर्तिं निक्षिप्य प्रणवेन (ॐ) प्रज्वाल्य घंटां वादयन् नेत्रादिपादपर्यंतं दीपं प्रदर्शयेत् 'ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः ॥ स बाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यताम्॥ १॥"मूलं पठित्वा 'ॐ भूर्भुवः स्वः सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीबटुकभैरवाय नमः' दीपं समर्पयामि ॥ इति पठित्वा देवस्य दक्षिणभागे निधापयेत् ॥ ततः शंखजलमुत्सृज्य मध्यमांगुष्ठयोगे दीपमुद्रां प्रदर्शयेत् ॥ इति दीपम् ॥ २ ॥ देवस्याग्रे जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं संस्थाप्य तन्मध्ये षड्रसोपेतं माषपिष्टं तैलपक्वं वटकं च विविधप्रकारं वा नैवेद्यं संस्थाप्य 'ॐ ह्रीं नमः' इति मंत्रेणार्घ्यजलेन संप्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपरि तादृशं वामं निधाय नैवेद्येनाच्छाद्य (ॐ यं) इति वायुबीजं षोडशधा संजप्य वायुना तज्ञतदोषान् संशोष्य ततो दक्षिणकरतले तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ रं) इति वह्निबीजं षोडशवारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा ततो वामकरतले अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य (ॐ वं) इति सुधाबीजं षोड

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शवारं संजप्य तदुत्थामृतधारयाप्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गधापुष्पाभ्यां संपूज्य वामांगुष्ठेन नैवे
द्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा " ॐ सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम् ॥ निवेदयामि देवेश सानुगाय
गृहाण तत् ॥ १ ॥ मूलं पठित्वा 'ॐ भूर्भुवः स्वः सांगाय सपरिवाराय सायुधाय सवाहनाय श्रीमद्बटुकभैरवाय नमः' नैवेद्यं
समर्पयामि ॥ इति जलमुत्सृज्य 'ॐ अमृतोपस्तरणमसि स्वाहा' इति देवस्य दक्षहस्ते जलं दत्त्वा देवेन तज्जलं
प्राशितमिति भावयन् ॥ ततो वामहस्तेनानामामूलांगुष्ठयोगे ग्रासमुद्रां प्रदर्शयेत् ॥ दक्षिणहस्तेन प्राणादिपंचमुद्राः[1] प्रदर्शयेत् ॥ एवं पंच
मुद्राः प्रदर्श्य देवं भुक्तवंतं विभाव्य जलं दद्यात्॥ इति नैवेद्यम् ॥३॥ "ॐ नमस्ते देवदेवेश सर्वतृप्तिकरो वरः॥ परमानन्दपूर्णस्त्वं गृहाण
जलमुत्तमम् ॥१॥" मूलं पठित्वा "ॐ भूर्भुवःस्वः सांगाय सपरिवाराय श्रीमद्बटुकभैरवाय जलं समर्पयामि॥" इति मंत्रेण स्वर्णादिपात्र
स्थं कर्पूरादिसुवासितं जलं निवेद्य अंतःपटं दद्यात् ॥ ४ ॥ तद्यथा—"ब्रह्मेशाद्यैः सरसमभितः सोपविष्टः समंतात्सिजद्वालव्यजननिकरैर्वी
ज्यमानो वयस्यैः ॥ नर्मक्रीडाप्रहसनपरान्हासयन्पंक्तिभोक्तृन् भुंक्ते पात्रे कनकघटिते षड्रसान् भैरवेशः ॥ १ ॥ शालीभक्तं सुपक्कं शिशि
रकरसितं पायसापूपसूपं लेह्यं पेयं च चोष्यं सितममृतफलं घारिकाद्यं सुखाद्यम् ॥ आज्यं प्राज्यं सभोज्यं नयनरुचिकरं राजिकैलामरीच
स्वादीयःशाकराजीपरिकरममृताहारजोषं जुषस्व ॥ २ ॥" इति अंतःपटं दत्त्वाचमनं दद्यात् ॥ ५ ॥ तद्यथा--" ॐ वेदानामपि वेदाय

---

१ अंगुष्ठतर्जनीमध्यमानामाभिः ॐ प्राणाय नमः इति प्राणमुद्रा प्रथमा+अंगुष्ठतर्जनीमध्यमाभिःॐअपानाय स्वाहा इत्यपानमुद्रा द्वितीया+अंगुष्ठमध्यमानामाभि ॐ व्यानाय स्वाहा इति व्यानमुद्रा तृतीया+अंगुष्ठतर्जनीमध्यमानामाभिः ॐ उदानाय स्वाहा इति उदानमुद्रा चतुर्थी ॥ सर्वांगुलीभिः ॐसमानायस्वाहा इति समानमुद्रा पंचमीः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवानां देवतात्मने ॥ आचामं कल्पयामीश शुद्धानां शुद्धिहेतवे ॥ १ ॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः मांगाय सपरिवाराय श्रीमद्वटुक भैरवाय नमः' आचमनं समर्पयामि ॥ इत्याचमनं दत्त्वा गंडूषार्थं मूलमंत्रेण जलं दद्यात ॥ इत्याचमनम् ॥ ८ ॥ ततो गतसारं नैवेद्यं किंचिदुद्धृत्य "ॐ चंडेश्वराय नमः ॥" इति देवस्योच्छिष्टं चंडेश्वरायैशान्यां दिशि दद्यात् ॥ अथ पंचबलिदानविधिः ॥ ततो यंत्रस्य पूर्वदक्षिणपश्चिमोत्तरेषु त्रिकोणवृत्तचतुरस्रं मंडलं कृत्वा ॥ "ॐ ह्रीं मंडलाय नमः॥" इति मंडलं संपूज्य ॥ पूर्वे-"ॐ वं वटुकाय नमः" इति पाद्यादिभिः संपूज्य ततः पक्वान्नपूर्णसलिलमीनमांसं कमलाकारं दीपचतुष्टययुक्तं वा बलिपात्रेषु पूरयित्वा मीनमुद्रां प्रदर्श्य वामांगुष्ठाना माभ्यां गृहीत्वा ॥ "ॐ एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा एष बलिर्वटुकाय नमः॥" इति मंत्रेण पूर्वदल उत्सृजेत् ॥ १ ॥ ततो दक्षिणे-पूर्ववन्मंडलं संपूज्य तन्मध्ये 'यां योगिनीभ्यो नमः॥' इति योगिनीरभ्यर्च्य पूर्ववत्पात्रे द्रव्यं पूरयित्वा योनिमुद्रां प्रदर्श्य दक्षांगुष्ठनामाभ्यां बलिपात्रं गृहीत्वा ॥ "ॐ ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वा तले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा ॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीत्या देव्यः सदा नः शुभबलिविधिना पांतु वीरेन्द्रवंद्याः ॥ १ ॥" "ॐ योगिनीभ्यः स्वाहा सर्वयोगिनी हुं फट् स्वाहा

१ शारदातिलके-शाल्यन्नंपललंसर्पिर्लाजाचूर्णानिशर्करा ॥ गुडमिक्षुरसापूपैर्मध्वक्तैःपरिमिश्रितैः ॥ कृत्वा ग्रासं समाराध्य देवंप्रागुक्तवर्त्मनः ॥ रक्त चंदनपुष्पाद्यैर्निशि तस्मै बलिं हरेत् ॥ तंत्रांतरेऽपि-राजसो मांसरक्ताढ्यःपलत्रयसमन्वितः॥ आदावेतेप्रयोगाश्च वटुकायबलिंहरेत॥ विश्वसारतंत्रे-मेषकुक्कुटयोर्मांसंशाल्यन्नंघृतसंप्लुतम् ॥ लाजाचूर्णमपूपंचगुडमिक्षुसमन्वितम् ॥ मरीचैर्जीरकैश्चैवगुडखंडैस्तथैवच ॥ शालितंडुलभक्तंचगोक्षीरेणसमन्वितम् ॥ अन्यत्रापि-पलत्रयंमाषचूर्णंदधिक्षीरंघृतंतथा ॥ गुडोदकेनसंयुक्तंमिश्रीकृत्यविचक्षणः ॥ इतिबलिं दद्यात ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एष बलिर्योगिनीभ्यो नमः ” इति मंत्रेण बलिपात्रं दक्षिणमण्डल उत्सृजेत् ॥ २ ॥ ततः पश्चिमे पूर्ववन्मंडलं संपूज्य तन्मध्ये-‘क्षं क्षेत्रपालाय नमः’ इति क्षेत्रपालमभ्यर्च्य ॥ पूर्वोक्तपात्रे द्रव्यं पूरयित्वा अंकुशमुद्रां प्रदर्श्य दक्षांगुष्ठमध्यमानामाभ्यां बलिपात्रं गृहीत्वा “ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल धूपादिसहितं बलिं गृह्णगृह्ण स्वाहा एष बलिः क्षेत्रपालाय नमः” इति मंत्रेण बलिपात्रं पश्चिममण्डल उत्सृजेत् ॥ ३ ॥ततः उत्तरे-पूर्ववन्मंडलं संपूज्य तन्मध्ये ‘गं गणेशाय नमः’ इति गणेशमभ्यर्च्य पूर्वोक्तपात्रे द्रव्यं पूरयित्वा दक्षांगुष्ठतर्जनीनामाभ्यां बलिपात्रं गृहीत्वा--“ॐ गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं मे वशमानय बलिं गृह्णगृह्ण एष बलिर्गणपतये नमः ” इति मंत्रेण बलिपात्रमुत्तरमण्डल उत्सृजेत् ॥ ४ ॥ ततो गणपतिसमीपे पूर्ववन्मण्डलं कृत्वा--“ॐ ह्रीं व्यापकमण्डलाय नमः” इति संपूज्य साधारणबलिं माषभक्तं वा संस्थाप्य मूलेनाभिमंत्र्य तत्र धूपदीपादिभिः सर्वभूतानि संपूज्य तत्त्वमुद्रां प्रदर्श्य ‘ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्योहं स्वाहा एष बलिः सर्वभूतेभ्यो नमः’ ॥ इति मंत्रेण बलिपात्रं गणपतिसमीप उत्सृजेत् ॥ इति पंच बलीन शक्तश्चेदेकमेव बलिं भैरवाय दद्यात् ॥ इति पंचबलिदानम् ॥ अथ पशुबलिदानप्रयोगः ॥ अर्द्धरात्रे देवं संपूज्य पंचाब्दं सर्वलक्षणापेतं छागाद्यं पशुमानीय “ॐ वाराही यमुना गंगा करतोया सरस्वती ॥ कावेरी चन्द्रभागा च सिंधुभैरवसागराः ॥ १ ॥ अजस्नाने सभे शानि सान्निध्यमिहकल्पय ॥ पशुपाशविनाशाय हेमकूटस्थिताय च ॥ पराय परमेष्ठिने हूंकाराय च मूर्तये ॥ २ ॥” इति जलमभिमंत्र्य मूलेन स्नापयित्वा सिंदूरमाल्यादिभिरलंकृत्य देवस्याग्रे संस्थाप्य मूलं पठित्वा गन्धमिश्रितार्घ्योदकेन त्रिः संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुंठ्य धेनुमुद्रयामृतीकृत्य कृतांजलिः प्रार्थयेत् ॥ “ॐ छाग त्वं बलिरूपेण महाभाग्यादुपस्थितः ॥ प्रणमामि सदा भक्त्या

For Private And Personal Use Only

रूपिणं बलिरूपिणम् ॥ १ ॥ भैरवप्रीतिकामस्य दातुरापद्विनाशिने ॥ भैरवबलिरूपाय बले तुभ्यं नमोनमः ॥ २ ॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयिष्यामि तस्मायज्ञे वधोऽवधः ॥ ३ ॥" इति संप्रार्थ्य प्रत्यंगं पूजयेत् ॥ तथा च । "ॐ रुधिरवदनायै नमः । इति शिरसि ॥ १ ॥ ॐ चण्डिकायै नमः इति कपोले ॥ २ ॥ ॐ चन्द्रार्काभ्यां नमः । इति चक्षुषोः॥ ३ ॥ ॐ बृहस्पतये नमः । इति कर्णयोः ॥ ४ ॥ ॐ सरस्वत्यै नमः । इति नासायाम् ॥ ५ ॥ ॐ उग्रदंतिकायै नमः । इति जिह्वायाम् ॥ ६ ॥ ॐ महादंतिकायै नमः । इति ग्रीवायाम् ॥ ७ ॥ ॐ पृथिव्यै नमः । इति उदरे ॥ ८ ॥ ॐ धर्माय नमः । इति जंघाचतुष्ठये ॥ ९ ॥ इति संपूज्य जलं गृहीत्वा "ॐ ह्रीं वरुणमंडलाधिष्ठितविग्रहाय पशुरूपभैरवाय इमं पशुं प्रोक्षामि स्वाहा " इति संप्रोक्ष्य ततास्तिलकुशजलं गृहीत्वा देशकालौ संकीर्त्यामुकगोत्रः श्रीमदमुकशर्माहं छागसमसंख्याकपंचवर्षावच्छिन्नश्रीमद्बटुकभैरवप्रीतिकामोऽहमेताञ्छागान्वह्निदैवतान् श्रीमद्बटुकभैरवाय तुभ्यं घातयिष्ये इति संपूज्य खड्गपूजां कुर्यात्॥तथा च। खड्गं पुरतो निधाय"ॐ नीलं हयं समधिरुह्य पुरः प्रयांती नीलांशुकाभरणमाल्यविलेपनाढ्या ॥ निद्रापुटेन भुवनानि तिरोदधाना खड्गायुधा भगवती परिपातु भक्तान् ॥ ॥ १ ॥" इति खड्गं ध्यात्वा "ॐ ह्रीं श्रीं नमो भगवति माहेश्वरि सर्वपशुजनमनश्चक्षुस्तिरस्कारिणी कुरुकुरु स्वाहा ॥ ॐ ह्रीं क्लीं ऐं ग्लौं तिरस्कारिणी सकलजनवाग्वादिनी सकलपशुजनमनश्चक्षुःश्रोत्रजिह्वाघ्राणतिरस्करणी कुरुकुरु ठःठः ठः स्वाहा इति मंत्रद्वयेन नमस्कृत्य 'ॐ ह्रीं ह्रीं खड्ग आं कालिकालि वज्रेश्वरि लोहदंडाना नमः' इति गंधादिभिस्त्रिः संपूज्य खड्गोपरि सिंदूरादिना ह्रींकारं विलिख्य " ॐ खड्गाय नमः" इति संपूज्य बलिकर्णे पशुगायत्रीं श्रावयेत् ॥ तत्र मंत्रः॥"ॐ ह्रीं बलिरूपाय विद्महे बटुकप्रियाय धी

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महि ॥ तन्नः पशुः प्रचोदयात्” इति बलिकर्णे श्रावयित्वा खड्गं हस्ते चादाय प्रार्थयेत॥ “ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः ॥ श्रीगर्भो विजयश्चैव धर्मपाल नमोस्तु ते ॥ १ ॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा॥ नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः ॥ २ ॥ रोहिणी च शरीरं ते धाता देवो जनार्दनः ॥ पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥ ३ ॥ नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः ॥ भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥ ४ ॥ इयं येन धृता क्षोणी हतश्च महिषासुरः॥ तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥ ५ ॥ भैरवीरसनाबुद्ध्या एकघाते तु घातयेत् ॥ ६ ॥” इति खड्गं संप्रार्थ्य “ॐ रे वज्रासुरनाशाय देवकार्यार्थतत्परः ॥ पशुश्छेद्यः स्वयं शीघ्रं खड्गनाथ नमोस्तु ते ॥ १ ॥” इति पठित्वा “पशुपाशाय विद्महे विप्रकर्णाय धीमहि ॥ तन्नश्छागः प्रचोदयात्”इति मूलं पठित्वा श्रीवटुकभैरवाय इमं छागबलिं तुभ्यमहं प्रददे ॥ इति बलिस्कंधे खड्गं दत्त्वा सकलं रुधिरं मुण्डं च देवाग्रे कृत्वा ‘ॐ अद्य पंचवर्षावच्छिन्नश्रीवटुकभैरवप्रीतिकाम इमं छागरुधिरं समुण्डं श्रीवटुकभैरव तुभ्यमहं प्रददे ॥ इति समर्प्य ततः “ॐ बलिं गृह्णन्त्विमं देवा आदित्या वसवस्तथा ॥ मरुतो येऽश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥ १ ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः ॥ डाकिन्यो यक्षवेताला योगिन्यः पूतना शिवाः ॥ २ ॥ जृंभिकासिद्धगन्धर्वा मल्ला विद्याधरा नगाः ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनाशकाः॥ ३ ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ॥ ४ ॥ सौम्या भवन्तु तृप्ताश्च भूतप्रेतसुखावहाः ॥ ५ ॥” इति निवेदयेत् । ततो हस्तौ पादौ प्रक्षाल्य स्नात्वा तिलकं धृत्वा देवं संप्रार्थ्य पुष्पांजलिं च दत्त्वा बान्धवैः सह भुंजीत ॥ एवमेव गजतुरङ्गादिना बलिं दद्यात् ॥ “अनेन बलिदानेन सन्तुष्टो भैरवः स्वयम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुसैन्यं विभज्याथ स्वगणेभ्यः प्रयच्छति ॥ क्रुद्धः स भंजयेच्छीघ्रं नात्र कार्या विचारणा ॥ १ ॥" इति पशुबलिदानप्रयोगः ॥ अथ तांबूलम् ॥ "ॐ पूगीफलं महद्दिव्यं नागवल्लीदलान्वितम् ॥ कर्पूरादिसमायुक्तं तांबुलं प्रतिगृह्यताम् ॥" मूलं पठित्वा 'ॐ भूर्भुवः स्वः बटुकभैरवाय नमः' तांबूलं समर्पयामि ॥ इति तांबूलम्॥ ६ ॥ इति तांबूलं दत्त्वा छत्रचामरादीन् सर्वदेवोपयोगिपद्धतिमार्गेण दद्यात्॥ अशक्तश्चेदारार्तिकं कुर्यात् ॥ अथ आरार्तिकम् ॥ शालिगोधूमपिष्टेन सगुडजीरकेण च त्रिकोणाकारं मंडूकरूपं वा नव दीपान् स्वर्णादिस्थालीमध्ये संस्थाप्य घृतेनापूर्य कर्पूरादिवर्तीर्निःक्षिप्य मायाबीजेन (ह्रीं) प्रज्वाल्य चक्रमुद्रां प्रदर्श्य मूलेनारार्तिक्यं संपूज्य मूलं पठित्वा देवोपरि नेत्रादिपादपर्यंतं नववारं त्रिवारं वा भ्रामयित्वा घंटां नादयेत्। तत्र मंत्रः ॥ "अंतस्तेजा बहिस्तेजा एकीकृत्य निरंतरम् ॥ त्रिधा देवोपरि भ्राम्य कुलदीपं निवेदयेत् ॥ १ ॥ चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम्॥ २॥"मूलं पठित्वा 'ॐ भूर्भुवःस्वः बटुकभैरवाय नमः' नीराजनं समर्पयामि॥ततो देवदक्षिणतः निधाय शंखजलमुत्सृजेत्॥ इति आरार्तिक्यम्॥ अथ प्रदक्षिणा ॥ "यानि कानि च पापानि जन्मांतरकृतानि वै॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदेपदे॥ १ ॥"इति मंत्रेण तिस्रः प्रदक्षिणाः कृत्वा मूलमुच्चार्य "ॐ भूर्भुवः स्वः श्रीबटुकभैरवायनमः" प्रदक्षिणां समर्पयामि॥इतिप्रदक्षिणां कृत्वा"प्रपन्नं पाहि मामशिभीतं मृत्युग्रहार्णवात्॥" इति वदन् साष्टांगं प्रणमेत्॥ अथ पुष्पांजलिः॥"नानासुगंधपुष्पाणि यथाकालोद्भवानि च॥ पुष्पांजलिं मया दत्तं गृहाण भैरवेश्वर॥ १ ॥मूलं पठित्वा"ॐ भूर्भुवः स्वः श्रीबटुकभैरवाय नमः" पुष्पांजलिं समर्पयामि॥ इति पुष्पांजलिं दत्त्वा ततस्तुति पाठेन देवं स्तुत्वा बद्धाजलिपूर्वकं प्रार्थयेत् ॥ अथ प्रार्थना ॥ "ज्ञानतोऽज्ञानतो वाथ यन्मया क्रियते शिव ॥ मम कृत्यमिदं सर्वमिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देव क्षमस्व मे ॥१॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया॥दासोयमिति मां मत्वा क्षमस्व परमेश्वर॥२॥अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना ॥ ३ ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं शिव ॥४॥" इति बद्धांजलिपूर्वकं संप्रार्थ्य ॥ ततः "यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं च नैवेद्यं गृहाण चानुकंपय ॥ १ ॥ इति पठित्वा देवस्य दक्षिणकरे पूजार्पणजलं दत्त्वा सर्वदेवोपयोगिपद्धतिमार्गेण मालायाः संस्कारान्संपाद्याशक्तश्चेत्साधारणसंस्कारान् कुर्यात् ॥ अथ साधारणमालासंस्काराः ॥ जपार्थे रुद्राक्षमालामानीय क्वचित्पात्रे वामहस्तेनाच्छाद्य मूले नाद्यदिकेनाभ्युक्ष्य वस्त्रेणाशोष्य "ॐ मालेमाले महामाये सर्वशक्तिस्वरूपिणी।।चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्त्वं सिद्धिदा भव॥१॥"[1]इत्यनेन गंधपुष्पाभ्यां संपूज्य पुनः "ॐअविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा॥"इति मंत्रेण दक्षिणहस्ते मालामादाय हृदये धारयन् स्वेष्टदेवतां ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन् यथाशक्ति मूलमंत्रं जपेत्॥ नित्यमेव समाना जपाः कार्या न तु न्यूनाधिकाः॥ मूलमंत्रो यथा—"ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरुकुरु वटुकाय ह्रीं"इत्येकविंशत्यक्षरं मंत्रं जपेत् ॥ ततो जपांते "त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥१॥" "ॐ ह्रीं सिद्ध्यै नमः" इति मालां शिरसि निधाय गोमुखीं रहसि स्थापयेत् ॥ नाशुचिः स्पर्शयेत् नान्यस्मै दद्यात् ॥ अशुचिस्थाने न निधापयेत् ॥ स्वयो निवद् गुप्तां कुर्यात् ॥ ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमंत्रस्य ऋष्यादिन्यासं हृदयादिषडंगन्यासं च कृत्वा

१ जपस्थानार्चनस्थानं मालापुस्तकदर्शनम् ॥ स्वभक्तेषु महेशानि दर्शनं नैव कारयेत् ॥ इति वचनात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पंचोपचारैः संपूज्य पुष्पांजलिं च दत्वा जपं देवार्पणं कुर्यात् ॥ तद्यथा—अर्घोदकेन चुलुकमादाय "ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः ॥ १ ॥ " ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मदीयं च सकलं श्रीमद्बटुकभैरवदेवतायै समर्पयामि नमः ॥ " ॐ तत्सदिति ब्रह्मार्पणं भवतु ॥ इति देवदक्षिणकरे जपसमर्पणजलं दत्त्वा कृतांजलिपूर्वकं क्षमापनं पठेत् ॥ अथ क्षमापनम्॥"आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ २ ॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अन्तश्चरेण भूतानि द्रष्टस्त्वं परमेश्वर ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन रक्षस्व परमेश्वर ॥ ५ ॥ प्रातर्योनिसहस्राणां सहस्रेषु व्रजाम्यहम् ॥ तेषु तेष्वचला भक्तिरच्युतेस्तु सदा त्वयि ॥ ६ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्या च तव दर्शनात् ॥ ७ ॥ देवो दाता च भोक्ता च देवरूपमिदं जगत् ॥ देवो जयति सर्वत्र यो देवः सोहमेव हि ॥ ८ ॥ क्षमस्व देवदेवेश क्षम्यते भुवनेश्वर॥ तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे ॥ ९ ॥" इति कृतांजलिः प्रार्थयित्वा ततः शंखमुद्धृत्य देवोपरि भ्रामयित्वा "साधु वासाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणारा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धनं मम ॥ ३ ॥" इत्युच्चरन् देवस्य दक्षिणहस्ते किंचिज्जलं दत्त्वा प्राग्वदर्घ्यं देवशिरसि दत्त्वा शंखं यथास्थाने निवेश्य देवस्योच्छिष्ट नैवेद्यं शिरसि धृत्वा नैवेद्यादिकं देवभक्तेषु विभज्य स्वयं भुक्त्वा विसर्जनं कुर्यात॥ अथ विसर्जनम्॥'ॐ गच्छगच्छ परस्थाने स्वस्थाने परमेश्वर ॥ यद्धि ब्रह्मादयो देवा न विदुः परमं पदम् ॥१॥' इत्यक्षतान्निःक्षिप्य विसर्जनं कृत्वा देवं स्वहृदयमध्ये स्थापयेत॥तद्यथा—"तिष्ठतिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि ॥१॥"इति हृदयकमले हस्तं दत्त्वा देवं संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन् यथासुखं विहरेत् । ततोऽर्धरात्रे ग्रामाद्बहिश्चतुष्पथे नित्यं देवातिथ्यां वा रविशनि भौमवारेषु वा पूर्वोक्तविधिना बलिं दद्यात ॥ तथा च। पूर्ववन्मण्डलं कृत्वा मण्डलं संपूज्य तन्मध्ये वटुकं पंचोपचारैः संपूजयेत्॥ ततः "गदात्रिशूलडमरुपात्रहस्तं त्रिलोचनम् ॥ कृष्णाभं भैरवं ध्यायेत्सर्वविघ्ननिवारणम् ॥१॥" एवं ध्यात्वा ॐ श्रीवटुकभैरव एह्येहि बलिं गृह्णगृह्ण हुं फट् स्वाहा" इति बलिं दत्त्वा हस्तौ पादौ प्रक्षाल्य शांतिस्तोत्रं पठेत् ॥ अथ शांतिस्तोत्रम् ॥ "नश्यंतु प्रेतकूष्माण्डा नश्यंतु दूषका नराः ॥ साधकानां शिवाः संतु स्वाम्नायपरिपालनम् ॥ १ ॥ जयंतु मातरः सर्वा जयंतु योगिनीगणाः ॥ जयंतु सिद्धा डाकिन्यो जयंतु गुरुशक्तयः ॥ २ ॥ नन्दन्तु ह्यणिमाद्याश्च नन्दंतु भैरवादयः ॥ नन्दन्तु भैरवाः सर्वे सिद्धविद्याधरादयः ॥ ३ ॥ ये चाम्नायविशुद्धाश्च मंत्रिणः शुद्धबुद्धयः ॥ सर्वदा नन्दयानन्दं नन्दन्तु कुलपालकाः ॥ ४ ॥ इन्द्राद्यास्तर्पिताः सन्तु तृप्यंतु वास्तु

१ नैवेद्यलक्षणम्-अर्वाक् विसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते ॥ विसर्जिते जगन्नाथे निर्माल्यं भवति लक्षणात् ॥ २ नैवेद्यत्याज्यनिषेधः (आह्निकतत्त्वे) तृषार्ताः पशवो रुद्राः कन्यका च रजस्वला । देवता च सनिर्माल्या हंति पुण्यं पुराकृतम्॥ (रुद्रयामले विशेषः) निवेदितं च यद् द्रव्यं भोक्तव्यं तद्विधानतः ॥ तन्न चेद्भुज्यते मोहाद्रौक्षमायान्ति देवताः ॥

For Private And Personal Use Only

देवताः॥ चन्द्रसूर्योदयो देवास्तृप्यंतु गुरुभक्तितः ॥ नक्षत्राणि ग्रहा योगाः करणाद्यास्तथापरे ॥ ते सर्वे सुखिनो यान्तु मासाश्च तिथयस्तथा ॥ ६ ॥ तृप्यन्तु पितरः सर्वे ऋतवो वत्सरादयः ॥ खेचरा भूचराश्चैव तृप्यन्तु मम भक्तितः ॥ ७ ॥ अंतरिक्षचरा घोरा ये चान्ये देवयोनयः ॥ सर्वे तु सुखिनो यांतु सर्वा नद्यश्च पक्षिणः॥ ८ ॥ पर्वताःसुखिनः संतु तथा तत्कन्दरा गुहाः ॥ ऋषयो ब्राह्मणाः सर्वे शांतिं कुर्वंतु मे सदा ॥ ९ ॥ तीर्थानि पशवो गावो ये चान्याः पुण्यभूमयः ॥ वृद्धाः पतिव्रता नार्यः शिवं कुर्वंतु मे सदा ॥ १०॥ शिवं सर्वत्र मे चास्तु पुत्रदारधनादिषु ॥ राजानः सुखिनः सन्तु क्षेममार्गे तु मे सदा ॥ ११॥ शुभा मे दिवसा यान्तु शिवास्तिष्ठंतु मे शिवाः ॥ द्वेष्टारः साधकानां च सदैवाम्नायदूषकाः ॥ १२ ॥ डाकिनीनां मुखे यान्तु तृप्तातृप्ताश्च तेषु ताः ॥ शत्रवो नाशमायांतु मम निंदाकराः सदा ॥ १३ ॥ ये निंदकास्ते विपदं प्रयान्तु ये साधकास्ते प्रभवन्तु सिद्धाः ॥ ये सर्ववीराः करुणावलोकाः पुनः परेश मम सन्निधत्स्व ॥ १४ ॥" इति शांतिपाठं पठित्वा जलमुत्सृज्य स्वगृहे गत्वा पृष्ठदेशे नावलोकयेत् ॥ गृहद्वारमागत्य हस्तौ पादौ प्रक्षाल्य गृहप्रवेशं कृत्वा कुशासने शय्यायां यथासुखं स्वप्यात् ॥ इति श्रीवटुकभैरवपूजापद्धतिः समाप्ता ॥ श्रीगणेशाय नमः ॥ अथ श्रीवटुकभैरवब्रह्मकवचम्॥ उक्तं च रुद्रयामले॥ श्रीदेव्युवाच ॥"भगवन्सर्ववेत्ता त्वं देवानां प्रीतिदायकम् ॥ भैरवं कवचं ब्रूहि यदि चास्ति कृपा मयि ॥ १ ॥ प्राणत्यागं करिष्यामि यदि नो कथयिष्यसि॥ सत्यंसत्यं पुनः सत्यं सत्यमेव न संशयः ॥ २ ॥ इत्थं देव्या वचः श्रुत्वा प्रहस्याति स्वयं प्रभुः ॥ उवाच वचनं तत्र देवदेवो महेश्वरः ॥ ३ ॥ ईश्वर उवाच ॥ वाटुकं कवचं दिव्यं शृणु मत्प्राणवल्लभे ॥ चंडिकातंत्रसर्वस्वं वटुकस्य विशेषतः ॥ ४ ॥ तत्र मंत्राद्यक्षरं तु वासुदेवस्वरूपकम् ॥ शंखवर्णद्वयो ब्रह्मा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वटुकश्चन्द्रशेखरः ॥ ५ ॥ आपदुद्धारणो देवः भैरवः परिकीर्तितः ॥ प्रवक्ष्यामि समासेन चतुर्वर्गप्रसिद्धये ॥६॥ प्रणवं कामदं विद्याल्ल
ज्जाबीजं च सिद्धिदम् ॥ वटुकायेति विज्ञेयं महापातकनाशनम् ॥ ७ ॥ आपदुद्धारणायेति त्वापदुद्धारणं नृणाम् ॥ कुरुद्वयं महेशानि
मोहने परिकीर्तितम् ॥ ८ ॥ वटुकाय महेशानि स्तंभने परिकीर्तितम् ॥ लज्जाबीजं तथा विद्यान्मुक्तिदं परिकीर्तितम् ॥ ९ ॥ द्वाविंश
त्यक्षरो मंत्रः क्रमेण जगदीश्वरि ॥" पाठः ॥ ॐ अस्य श्रीवटुकभैरवब्रह्मकवचस्य भैरव ऋषिः । अनुष्टुप्छंदः । श्रीवटुकभैरवो देवता।
मम वटुकभैरवप्रसादसिद्ध्यर्थे जपे विनियोगः॥ "ॐ पातु नित्यं शिरशि पातु ह्रीं कंठदेशके ॥१०॥वटुकाय पातु नाभौ चापदुद्धारणाय
च॥ कुरु द्वयं लिंगमूले त्वाधारे वटुकाय च ॥११॥ सर्वदा पातु ह्रीं बीजं बाह्वोर्युगलमेव च॥ षडंगसहितो देवो नित्यं रक्षतु भैरवः ॥
॥ १२ ॥ ॐ ह्रीं वटुकाय सततं सर्वांगं मम सर्वदा ॥ ॐ ह्रीं पादौ महाकालः पातु वीरासनो हृदि ॥१३॥ ॐ ह्रीं कालः शिरः पातु
कंठदेशे तु भैरवः ॥ गणराट् पातु जिह्वायामष्टभिः शक्तिभिः सह ॥१४॥ ॐ ह्रीं दंडपाणिर्गुह्यमूले भैरवीसहितस्तथा ॥ ॐ ह्रीं विश्व
नाथः सदा पातु सर्वांगं मम सर्वदः ॥ १५ ॥ ॐ ह्रीं अन्नपूर्णा सदा पातु चांसौ रक्षतु चंडिका ॥ असितांगः शिरः पातु ललाटं
रुरुभैरवः ॥१६॥ ॐ ह्रीं चंडभैरवः पातु वक्त्रं कंठं श्रीक्रोधभैरवः॥ उन्मत्तभैरवः पातु हृदयं मम सर्वदा ॥१७॥ ॐ ह्रीं नाभिदेशे
कपाली च लिंगे भीषणभैरवः ॥ संहारभैरवः पातु मूलाधारं च सर्वदा ॥ १८ ॥ ॐ ह्रीं बाहुयुग्मं सदा पातु भैरवो मम केवलम् ॥
हंसबीजं पातु हृदि सोहं रक्षतु पादयोः॥१९॥ॐ ह्रीं प्राणापानौ समानं च उदानं व्यानमेव च ॥ रक्षतु द्वारमूले च दशदिक्षु समंततः॥
॥ २० ॥ ॐ ह्रीं प्रणवं पातु सर्वांगं लज्जाबीजं महाभये ॥ इति श्रीब्रह्मकवचं भैरवस्य प्रकीर्तितम् ॥२१॥ चतुर्वर्गप्रदं नित्यं स्वयंदेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशितम् ॥ यः पठेच्छृणुयान्नित्यं धारयेत्कवचोत्तमम् ॥ २२ ॥ सदानंदमयो भूत्वा लभते परमं पदम् ॥ य इदं कवचं देवि चिन्तयेन्मन्मुखोदितम् ॥ २३ ॥ कोटिजन्मार्जितं पापं विनश्यति च तत्क्षणात् ॥ जलमध्येऽग्निमध्ये वा दुर्ग्रहे शत्रुसंकटे ॥ २४ ॥ कवचस्मरणाद्देवि सर्वत्र विजयी भवेत् ॥ भक्तियुक्तेन मनसा कवचं पूजयेद्यदि ॥ २५ ॥ कामतुल्यस्तु नारीणां रिपूणां च यमोपमः ॥ तस्य पादांबुजद्वंद्वं राज्ञां मुकुटभूषणम् ॥ २६ ॥ तस्य भूतिं विलोक्यैव कुबेरोपि तिरस्कृतः॥ यस्य विज्ञानमात्रेण मंत्रसिद्धिर्न संशयः ॥ २७ ॥ इदं कवचमज्ञात्वा यो जपेद्बटुकं नरः ॥ न चाप्नोति फलं तस्य परं नरकमाप्नुयात् ॥ २८ ॥ मन्वंतरत्रयं स्थित्वा तिर्यग्योनिषु जायते ॥ इह लोके महारोगी दारिद्र्येणातिपीडितः ॥ २९ ॥ शत्रूणां वशगो भूत्वा करपात्री भवेज्जडः ॥ देयं पुत्राय शिष्याय शांताय प्रियवादिने ॥ ३० ॥ कार्पण्यरहितायालं वटुभक्तिरताय च॥ योपरागे प्रदाता वै तस्यस्याति सत्वरम् ॥ ३१ आयुर्विद्या यशो धर्म बलं चैव न संशयः ॥ इति ते कथितं देवि गोपनीयं स्वयोनिवत्॥ ३२॥ इति श्रीरुद्रयामलोक्तं श्रीवटुकभैरवब्रह्मकवचं संपूर्णम्॥

श्रीगणेशाय नमः ॥ अथ श्रीवटुकभैरवसहस्रनामस्तोत्रं (रुद्रयामले) ॥ ॐ अस्य श्रीवटुकभैरवसहस्रनामात्मकस्तोत्रस्य दुर्वासा ऋषिः ॥ अनुष्टुप् छंदः ॥ भैरवो वटुकनाथो देवता ॥ मम सर्वकार्यसिद्ध्यर्थं सर्वशत्रुनिवारणार्थं वटुकसहस्रनामपाठे विनियोगः ॥ ॐ

---

१ महाकालोस्य ऋषिरिति रुद्रजापे । १ दत्तात्रेय ऋषि रिति ब्रह्मजापे । १ गौतमऋषिरिति गौतमीतंत्रे । १ रावणोस्य ऋषिरिति भैरवीतंत्रे । १ हनुमानृषिरिति भैरवतंत्रे । १ निर्गुणो वटुकः सनकादय ऋषय इति मोक्षपट्के । १ महाविष्णुः श्रीकृष्ण ऋषिरिति विष्णुयामले । एवं कार्यपरत्वे यथारुचि पाठे ऋषिस्मरणं कृत्वा स्तोत्रं पठेत् ।

For Private And Personal Use Only

नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमो भद्रस्वरूपाय जयदाय नमोनमः ॥ १ ॥ नमः कल्पस्वरूपाय विकल्पाय नमो
नमः ॥ नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥ २ ॥ नमः कंकालरूपाय कालरूप नमोस्तु ते ॥ नमस्त्र्यंबकरूपाय महाकालाय
ते नमः ॥ ३ ॥ नमः संसारसाराय सारदाय नमोनमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ ४ ॥ नमः क्षेत्रनिवासाय
क्षेत्रपालाय ते नमः ॥ क्षेत्राक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमोनमः ॥ ५ ॥ नमो नागविनाशाय भैरवाय नमोनमः ॥ नमो मातंगरूपाय
भाररूप नमोस्तु ते ॥ ६ ॥ नमः सिद्धस्वरूपाय सिद्धिदाय नमोनमः ॥ नमो बिंदुस्वरूपाय बिंदुमिंधुप्रकाशिने ॥७॥ नमो मंगलरूपाय
मङ्गलाय नमोनमः ॥ नमः संकष्टनाशाय शंकराय नमोनमः ॥ ८ ॥ नमो धर्मस्वरूपाय धर्मदाय नमोनमः ॥ नमोऽनंतस्वरूपाय
एकरूप नमोस्तु ते ॥ ९ ॥ नमो वृद्धिस्वरूपाय वृद्धिकाकान्नमोस्तु ते ॥ नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥ १० ॥ नमो
जलदरूपाय सामरूप नमोस्तु ते ॥ नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥ ११ ॥ नमो नीलस्वरूपाय रंगरूपाय ते नमः ॥
नमो मंडलरूपाय मंडलाय नमोनमः ॥ १२ ॥ नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः ॥ नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमोनमः
॥ १३ ॥ नमस्त्रिशूलधाराय धाराधारिन्नमोस्तुते ॥ नमः संसारबीजाय विरूपाय नमोनमः ॥ १४ ॥ नमो विमलरूपाय भैरवाय नमो
नमः ॥ नमो जंगमरूपाय जलजाय नमोनमः ॥ १५ ॥ नमः कालस्वरूपाय कालरुद्राय ते नमः ॥ नमो भैरवरूपाय भैरवाय
नमोनमः ॥ १६ ॥ नमः शत्रुविनाशाय भीषणाय नमोनमः ॥ नमः शांताय दांताय भ्रमरूपिन्नमोस्तु ते ॥ १७ ॥ न्याय
गम्याय शुद्धाय योगिध्येयाय ते नमः ॥ नमः कमलकांताय कालवृद्धाय ते नमः॥ १८ ॥ नमो ज्योतिःस्वरूपाय सुप्रकाशाय ते नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः कल्पस्वरूपाय भैरवाय नमोनमः ॥ १९ ॥ नमो जयस्वरूपाय जगज्जाड्यनिवारिणे ॥ महाभूताय भूताय भूतानां पतये नमः ॥
॥ २० ॥ नमो नंदाय वृंदाय वादिने ब्रह्मवादिने ॥ नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥ २१ ॥ नमो भवस्वरूपाय मायानि
र्माणरूपिणे ॥ विश्ववंद्याय वंद्याय नमो विस्वंभराय ते ॥ २२ ॥ नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोऽस्तु ते ॥ नमो वरुणरूपाय भैरवाय
नमोनमः ॥ २३ ॥ नमो यमस्वरूपाय वृद्धरूपाय ते नमः ॥ नमः कुबेररूपाय कालनाथाय ते नमः ॥ २४ ॥ नमो ईशानरूपाय
अग्निरूपाय ते नमः ॥ नमो वायुस्वरूपाय विश्वरूपाय ते नमः ॥ २५ ॥ नमः प्राणस्वरूपाय प्राणाधिपतये नमः ॥ नमः संहाररूपाय
पालकाय नमोनमः ॥ २६ ॥ नमश्चंद्रस्वरूपाय चंडरूपाय ते नमः ॥ नमो मंदारवासाय वासिने सर्वयोगिनाम् ॥ २७ ॥ योगिग
म्याय योग्याय योगिनां पतये नमः ॥ नमो जंगमवासाय वामदेवाय ते नमः ॥ २८ ॥ नमः शत्रुविनाशाय नीलकंठाय ते नमः ॥
नमो भक्तिविनोदाय दुर्भागाय नमोनमः ॥ २९ ॥ नमो मान्यस्वरूपाय मानदाय नमोनमः ॥ नमो भूतिविभूषाय भूषिताय नमोनमः॥
॥ ३० ॥ नमो रजःस्वरूपाय सात्विकाय नमोनमः ॥ नमस्तामसरूपाय तारणाय नमोनमः ॥ ३१ ॥ नमो गंगाविनोदाय जटासंधा
रिणे नमः ॥ नमो भैरवरूपाय भाषणाय नमोनमः ॥ ३२ ॥ नमः संग्रामरूपाय संग्रामजयदायिने ॥ संग्रामसाररूपाय यौवनाय नमो
नमः ॥ ३३ ॥ नमो वृद्धिस्वरूपाय वृद्धिदाय नमोनमः ॥ नमस्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥ ३४ ॥ नमो द्वंद्वस्वरूपाय रूपदाय
नमोनमः ॥ नमः शत्रुविनाशाय शत्रुबुद्धिविनाशिने ॥ ३५ ॥ महाकालाय कालाय कालनाथाय ते नमः ॥ नमो भैरवरूपाय भैरवाय
नमोनमः ॥ ३६ ॥ नमः शंभुस्वरूपाय शंभुस्वरूपिन्नमोऽस्तु ते ॥ नमः कमलहस्ताय डमरुहस्ताय ते नमः ॥ ३७ ॥ नमः कुकुरवा

For Private And Personal Use Only

हाय वहनाय नमोनमः ॥ नमो विमलनेत्राय त्रिनेत्राय नमोनमः ॥ ३८ ॥ नमः संसाररूपाय सारमेयाय वाहिने ॥ संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥ ३९ ॥ नमो मंगलरूपाय मंगलाय नमोनमः ॥ नमो न्यायविशालाय मंत्ररूपाय ते नमः ॥ ४० ॥ नमो यंत्र स्वरूपाय यंत्रधारिन्नमोस्तु ते ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ ४१ ॥ नमः कलंकरूपाय कलंकाय नमोनमः ॥ नमः संसार पाराय भैरवाय नमोनमः ॥ ४२ ॥ रुंडमालाविभूषाय भीषणाय नमोनमः ॥ नमो दुःखनिवाराय विहाराय नमोनमः ॥ ४३ ॥ नमो दंडस्वरूपाय क्षणरूपाय ते नमः ॥ नमो मुहूर्तरूपाय सर्वरूपाय ते नमः ॥ ४४ ॥ नमो मोदस्वरूपाय श्रोणरूपाय ते नमः ॥ नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥ ४५ ॥ नमो विष्णुस्वरूपाय बिंदुरूपाय ते नमः ॥ नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोस्तु ते ॥ ॥ ४६ ॥ नमः कंथानिवासाय पटवासाय ते नमः ॥ नमो ज्वलनरूपाय ज्वलनाय नमोनमः ॥ ४७ ॥ नमो वटुकरूपाय धूर्तरूपाय ते नमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ ४८ ॥ नमो वैद्यस्वरूपाय वैद्यरूपिन्नमोस्तु ते ॥ नम औषधरूपाय औषधाय नमोनमः ॥ ४९ ॥ नमो व्याधिनिवाराय व्याधिरूपिन्नमोनमः ॥ नमो ज्वरनिवाराय ज्वररूपाय ते नमः ॥ ५० ॥ नमो रुद्रस्वरूपाय रुद्राणां पतये नमः ॥ विरूपाक्षाय देवाय भैरवाय नमोनमः ॥ ५१ ॥ नमो ग्रहस्वरूपाय ग्रहाणां पतये नमः ॥ नमः पवित्रधाराय परशुधाराय ते नमः ॥ ५२ ॥ यज्ञोपवीतिदेवाय देवदेव नमोस्तु ते ॥ नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥ ५३ ॥ नमोरगप्रतापाय तापनाय नमोनमः ॥ नमो गणेशरूपाय गणरूपाय ते नमः ॥ ५४ ॥ नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः ॥ नमो मलयरूपाय रश्मिरूपाय ते नमः ॥ ५५ ॥ नमो विभक्तिरूपाय विमलाय नमोनमः ॥ नमो मधुररूपाय माभिपूर्णकलापिने ॥ ५६ ॥ कालेश्वराय कालाय कालनाथाय ते नमः ॥

For Private And Personal Use Only

नमो विश्वप्रकाशाय भैरवाय नमोनमः ॥ ५७ ॥ नमो योनिस्वरूपाय भ्रातृरूपाय ते नमः ॥ नमो भगिनिरूपाय भैरवाय नमोनमः ॥ ५८ ॥ नमो वृषस्वरूपाय कर्मरूपाय ते नमः ॥ नमो वेदांतवेद्याय वेदसिद्धांतसारिणे ॥ ५९ ॥ नमः शाखाप्रकाशाय पुरुषाय नमो नमः ॥ नमः प्रकृतिरूपाय भैरवाय नमोनमः ॥६०॥ नमो विश्वस्वरूपाय शिवरूपाय ते नमः ॥ नमो ज्योतिःस्वरूपाय निगुणाय नमो नमः ॥ ६१ ॥ निरंजनाय शांताय निर्विकाराय ते नमः ॥ निर्मायाय विमोहाय विश्वनाथाय ते नमः ॥ ६२ ॥ नमः कण्ठप्रकाशाय शत्रुनाशाय ते नमः ॥ नम आशाप्रकाशाय आशापूरकते नमः ॥ ६३ ॥ नमो मत्स्यस्वरूपाय योगरूपाय ते नमः ॥ नमो वाराह रूपाय वामनाय नमोनमः ॥ ६४ ॥ नम आनन्दरूपाय आनन्दाय नमोनमः ॥ नमोस्त्वनर्घ्यकेशाय ज्वलत्केशाय ते नमः ॥६५॥ नमः पापविमोक्षाय मोक्षदाय नमोनमः ॥ नमः कैलासनाथाय कालनाथाय ते नमः ॥६६॥ नमो विन्ददविन्दाय विन्दुभाय नमोनमः॥ नमः प्रणवरूपाय भैरवाय नमोनमः ॥६७॥ नमो मेरुनिवासाय भक्तवासाय ते नमः ॥ नमो मेरुस्वरूपाय भैरवाय नमोनमः ॥६८॥ नमो भद्रस्वरूपाय भद्ररूपाय ते नमः ॥ नमो योगिस्वरूपाय योगिनां पतये नमः ॥६९॥ नमो मैत्रस्वरूपाय मित्ररूपाय ते नमः ॥ नमो ब्रह्म निवासाय काशीनाथाय ते नमः ॥ ७० ॥ नमो ब्रह्मांडवासाय ब्रह्मवासाय ते नमः ॥ नमो मातंगवासाय सूक्ष्मवासाय ते नमः ॥ ७१ ॥ नमो मातृनिवासाय भ्रातृवासाय ते नमः ॥ नमो जगन्निवासाय जलावासाय ते नमः ॥ ७२ ॥ नमः कौलनिवासाय नेत्रवासाय ते नमः ॥ नमो भैरववासाय भैरवाय नमोनमः ॥ ७३ ॥ नमः समुद्रवासाय वह्निवासाय ते नमः ॥ नमश्चन्द्रनिवासाय चन्द्रा वासाय ते नमः ॥ ७४ ॥ नमः कलिंगवासाय कलिंगाय नमोनमः ॥ नम उत्कलवासाय महेंद्रवासाय ते नमः ॥ ७५ ॥ नमः

कर्पूरवासाय सिद्धिवासाय ते नमः ॥ नमः सुन्दरवासाय भैरवाय नमोनमः ॥ ७६ ॥ नम आकाशवासाय वासिने सर्वयोगिनाम् ॥ नमो ब्राह्मणवासाय शूद्रवासाय ते नमः ॥ ७७ ॥ नमः क्षत्रियवासाय वैश्यवासाय ते नमः ॥ नमः पक्षिनिवासाय भैरवाय नमोनमः ॥ ७८ ॥ नमः पातालमूलाय मूलावासाय ते नमः ॥ नमो रसातलवासाय सर्वपातालवासिने ॥ ७९ ॥ नमः कंकालवासाय कंकवासाय ते नमः ॥ नमो मंत्रनिवासाय भैरवाय नमोनमः ॥ ८० ॥ नमोऽहंकाररूपाय रजोरूपाय ते नमः ॥ नमः सत्त्वनिवासाय भैरवाय नमोनमः ॥ ८१ ॥ नमो नलिनरूपाय नलिनांगप्रकाशिने ॥ नमः सूर्यस्वरूपाय भैरवाय नमोनमः ॥ ८२ ॥ नमो दुष्टनिवासाय साधूपायनरूपिणे ॥ नमो नम्रस्वरूपाय स्तंभनाय नमोनमः ॥ ८३ ॥ पंचयोनिप्रकाशाय चतुर्योनिप्रकाशिने ॥ नवयोनिप्रकाशाय भैरवाय नमोनमः ॥ ८४ ॥ नमः षोडशरूपाय नमः षोडशधारिणे ॥ चतुःषष्टिप्रकाशाय भैरवाय नमोनमः ॥ ८५ ॥ नमो बिंदुप्रकाशाय सुप्रकाशाय ते नमः ॥ नमो गणस्वरूपाय मुखरूप नमोस्तु ते ॥ ८६ ॥ नमश्चाम्बररूपाय भैरवाय नमोनमः ॥ नमो नानास्वरूपाय मुखरूप नमोस्तु ते ॥ ८७ ॥ नमो दुर्गस्वरूपाय दुःखहर्त्रे नमोस्तु ते ॥ नमो विशुद्धदेहाय दिव्यदेहाय ते नमः ॥ ८८ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमः प्रेतनिवासाय पिशाचाय नमोनमः ॥ ८९ ॥ नमो निशाप्रकाशाय निशारूप नमोस्तु ते ॥ नमः सोमार्धरामाय धराधीशाय ते नमः ॥ ९० ॥ नमः संसारभाराय भारकाय नमोनमः ॥ नमो देहस्वरूपाय अदेहाय नमोनमः ॥ ९१ ॥ देवदेहाय देवाय भैरवाय नमोनमः ॥ विश्वेश्वराय विश्वाय विश्वधारिन्नमोस्तु ते ॥ ९२ ॥ स्वप्रकाशप्रकाशाय भैरवाय नमोनमः ॥ स्थितिरूपाय स्थित्याय स्थितीनां पतये नमः ॥ ९३ ॥ सुस्थिराय सुकेशाय केशवाय नमोनमः ॥ स्थविष्ठाय गिरिष्ठाय प्रेष्ठाय

For Private And Personal Use Only

परमात्मने ॥९४॥ नमो भैरवरूपाय भैरवाय नमोनमः॥नमःपारदरूपाय पवित्राय नमोनमः॥९५॥नमो वेधकरूपाय अनिंदाय नमोनमः ॥ नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥ ९६ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमो निंदस्वरूपाय अनिंदाय नमोनमः ॥ ॥ ९७ ॥ नमो विशदरूपाय भैरवाय नमोनमः ॥ नमः शरण्यशरणाय शरण्यानां सुखाय ते ॥ ९८ ॥ नमः शरण्यरक्षाय भैरवाय नमोनमः ॥ नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥ ९९॥ नमो वौषट्स्वरूपाय भैरवाय नमोनमः ॥ अक्षराय नमस्तुभ्यं त्रिधामात्रास्वरूपिणे ॥ १०० ॥ नमोक्षराय शुद्धाय भैरवाय नमोनमः ॥ अर्धमात्राय पूर्णाय पूर्णाय ते नमोनमः ॥ १०१॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥ १०२ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमः सृणिस्वरूपाय सृष्टिकर्त्रे महात्मने ॥ १०३ ॥ नमः पाल्यस्वरूपाय भैरवाय नमोनमः ॥ सनातनाय नित्याय निर्गुणाय गुणाय ते ॥ १०४ ॥ नमः सिद्धाय शांताय भैरवाय नमोनमः ॥ नमो धारास्वरूपाय खड्गहस्ताय ते नमः ॥ १०५ ॥ नमस्त्रिशूलहस्ताय भैरवाय नमोनमः ॥ नमः कुंडलवर्णाय शवमुंडविभूषिणे ॥ १०६ ॥ महाक्रुद्धाय चंडाय भैरवाय नमोनमः ॥ नमो वासुकिभूपाय सर्वभूषाय ते नमः ॥ ॥ १०७ ॥ नमः कपालहस्ताय भैरवाय नमोनमः ॥ पानपात्रप्रमत्ताय मत्तरूपाय ते नमः ॥ १०८ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ माध्वाकारसुपर्णाय माधवाय नमोनमः ॥ १०९ ॥ नमो मांगल्यरूपाय भैरवाय नमोनमः ॥ नमः कुमाररूपाय स्वीभूर्याय नमोनमः ॥ ११० ॥ नमो गंधस्वरूपाय भैरवाय नमोनमः नमो दुर्गंधरूपाय सुगंधाय नमोनमः ॥ १११ ॥ नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः ॥ नमः पुष्पप्रकाशाय भैरवाय नमोनमः ॥ ११२ ॥ नमः पुष्पविनोदाय पुष्पपूजाय ते नमः ॥ नमो भक्ति

निवासाय भक्तदुःखनिवारिणे ॥ ११३ ॥ भक्तप्रियाय शांताय भैरवाय नमोनमः ॥ नमो भक्तिस्वरूपाय रूपदाय नमोनमः॥ ११४॥
नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमो वासाय भद्राय वीरभद्राय ते नमः ॥ ११५ ॥ नमः संग्रामसाराय भैरवाय नमोनमः ॥
नमः खट्वांगहस्ताय कालहस्ताय ते नमः ॥ ११६ ॥ नमो घोराय घोराय घोराघोरस्वरूपिणे ॥ घोरधर्माय घोराय भैरवाय नमोनमः ॥
॥ ११७ ॥ घोरत्रिशूलहस्ताय घोरपानाय ते नमः ॥ घोररूपाय नीलाय भैरवाय नमोनमः ॥ ११८ ॥ घोरवाहनगम्याय अगम्याय
नमोनमः ॥ घोरब्रह्मस्वरूपाय भैरवाय नमोनमः ॥ ११९ ॥ घोरशब्दाय घोराय घोरदेहाय ते नमः ॥ घोरद्रव्याय घोराय भैरवाय
नमोनमः ॥ १२० ॥ घोरसंगाय सिंहाय सिद्धिसिंहाय ते नमः ॥ नमः प्रचंडसिंहाय सिंहरूपाय ते नमः ॥ १२१ ॥ नमः
सिंहप्रकाशाय सुप्रकाशाय ते नमः ॥ नमो विजयरूपाय जयदाय नमोनमः ॥ १२२ ॥ नमो भार्गवरूपाय गर्भरूपाय ते नमः ॥ नमो
भैरवरूपाय भैरवाय नमोनमः ॥ १२३ ॥ नमोमेध्याय शुद्धाय मायाधीशाय ते नमः ॥ नमो मेघप्रकाशाय भैरवाय नमोनमः॥ १२४॥
दुर्जेयाय दुरंताय दुर्लभाय दुरात्मने ॥ भक्तिलभ्याय भव्याय भाविताय नमोनमः ॥ १२५ ॥ नमो गौररूपाय गौरवाय नमोनमः ॥
नमो भैरवरूपाय भैरवाय नमोनमः ॥ १२६ ॥ नमो विघ्ननिवाराय विघ्ननाशिन्नमोस्तु ते ॥ विघ्नविद्रावणायैव भैरवाय नमोनमः ॥
॥ १२७ ॥ नमः किंशुकरूपाय रजोरूपाय ते नमः ॥ नमो नीलस्वरूपाय भैरवाय नमोनमः ॥ १२८ ॥ नमो गणस्वरूपाय गणना
थाय ते नमः ॥ नमो विश्वविकासाय भैरवाय नमोनमः ॥ १२९ ॥ नमो योगिप्रकाशाय योगिगम्याय ते नमः ॥ नमो हेरंबरूपाय
भैरवाय नमोनमः ॥ १३० ॥ नमस्त्रिधास्वरूपाय रूपदाय नमोनमः ॥ नमः स्वरस्वरूपाय भैरवाय नमोनमः ॥ १३१ ॥ नमः सर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वातिरूपाय बुद्धिरूपाय ते नमः ॥ नमो वंयस्वरूपाय भैरवाय नमोनमः ॥ १३२ ॥ नमस्त्रिविक्रमरूपाय त्रिरूपाय ते नमः ॥ नमः शशांकरूढाय भैरवाय नमोनमः ॥१३३॥ नमो व्यापकरूपाय व्याप्यरूपाय ते नमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥१३४॥ नमो विशदरूपाय भैरवाय नमोनमः ॥ नमः सत्त्वस्वरूपाय भैरवाय नमोनमः ॥ १३५ ॥ नमः सूक्तस्वरूपाय शिवदाय नमोनमः ॥ नमो गंगास्वरूपाय यमुनारूपिणे नमः ॥ १३६ ॥ नमो गौरीस्वरूपाय भैरवाय नमोनमः ॥ नमो दुःखविनाशाय दुःखमोक्षणरूपिणे ॥ १३७ ॥ महाचलाय वंद्याय भैरवाय नमोनमः ॥ नमो नंदस्वरूपाय भैरवाय नमोनमः ॥ १३८ ॥ नमो नंदिस्वरूपाय स्थावररूपाय ते नमः ॥ नमः केलिस्वरूपाय भैरवाय नमोनमः ॥ १३९ ॥ नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने ॥ नमः शांताय शुद्धाय भैरवाय नमोनमः ॥ १४० ॥ नमो नर्मदरूपाय जलरूपाय ते नमः ॥ नमो विश्वविनोदाय जयदाय नमोनमः ॥ १४१ ॥ नमो महेन्द्ररूपाय महनीयाय ते नमः ॥ नमः संसृतिरूपाय शरणीयाय ते नमः ॥ १४२ ॥ नम स्त्रिबंधुवासाय चालकाय नमोनमः ॥ नमः संसारसाराय सरसां पतये नमः ॥ १४३ ॥ नमस्तेजःस्वरूपाय भैरवाय नमोनमः ॥ नमः कारुण्यरूपाय भैरवाय नमोनमः ॥ ॥ १४४ ॥ नमो गोकर्णरूपाय ब्रह्मवर्णाय ते नमः ॥ नमः शंकरवर्णाय हस्तिकर्णाय ते नमः ॥ १४५ ॥ नमो विष्टरकर्णाय यज्ञकर्णाय ते नमः ॥ नमः शंबुककर्णाय भैरवाय नमोनमः ॥ १४६ ॥ नमो दिव्यसुकर्णाय कालकर्णाय ते नमः ॥ नमो भयदकर्णाय भैरवाय नमोनमः ॥ १४७ ॥ नम आकाशवर्णाय कालकर्णाय ते नमः ॥ नमो दिग्रूपकर्णाय भैरवाय नमोनमः ॥ १४८ ॥ नमो विशुद्धकर्णाय विमलाय नमोनमः ॥ नमः सहस्रकर्णाय भैरवाय नमोनमः ॥ १४९ ॥ नमो नेत्रप्रकाशाय सुनेत्राय नमोनमः ॥ नमो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वरदनेत्राय जयनेत्राय ते नमः ॥ १५० ॥ नमो विमलनेत्राय योगिनेत्राय ते नमः ॥ नमः सहस्रनेत्राय भैरवाय नमोनमः ॥ १५१ ॥ नमः कलिंदरूपाय कलिंदाय नमोनमः ॥ नमो ज्योतिःस्वरूपाय ज्योतिषाय नमोनमः ॥ १५२ ॥ नमस्तारप्रकाशायताररूपिन्नमोस्तु ते ॥ नमो नक्षत्रनेत्राय भैरवाय नमोनमः ॥ १५३ ॥ नमश्चंद्रप्रकाशाय चन्द्ररूप नमोस्तु ते ॥ नमो रश्मिस्वरूपाय भैरवाय नमोनमः ॥ १५४ ॥ नम आनन्दरूपाय जगदानन्दरूपिणे ॥ नमो द्राविडरूपाय भैरवाय नमोनमः ॥ १५५ ॥ नमः शंखनिवासाय शंकराय नमोनमः ॥ नमो मुद्राप्रकाशाय भैरवाय नमोनमः ॥ १५६ ॥ नमो न्यासस्वरूपाय न्यासरूप नमोस्तु ते ॥ नमो बिंदुस्वरूपाय भैरवाय नमोनमः ॥ १५७ ॥ नमो विसर्गरूपाय प्रणवरूपाय ते नमः ॥ नमो मन्त्रप्रकाशाय भैरवाय नमोनमः ॥ १५८ ॥ नमो जंबुकरूपाय जंगमाय नमोनमः ॥ नमो गरुडरूपाय भैरवाय नमोनमः ॥ १५९ ॥ नमो लंबुकरूपाय लंबिकाय नमोनमः ॥ नमो लक्ष्मीस्वरूपाय भैरवाय नमोनमः ॥ १६० ॥ नमो वीरस्वनिराय विरणाय नमोनमः ॥ नमः प्रचंडरूपाय भैरवाय नमोनमः ॥ १६१ ॥ नमो डंबरस्वरूपाय डमरुधारिन्नमोस्तु ते ॥ नमः कलंकनाशाय कालनाथाय ते नमः ॥ १६२ ॥ नम ऋद्धिप्रकाशाय सिद्धिदाय नमोनमः ॥ नमः सिद्धस्वरूपाय भैरवाय नमोनमः ॥ १६३ ॥ नमो धर्मप्रकाशाय धर्मनाथाय ते नमः ॥ धर्माय धर्मराजाय भैरवाय नमोनमः ॥ १६४ ॥ नमो धर्माधिपतये धर्मध्येयाय ते नमः ॥ नमो धर्मार्थसिद्धाय भैरवाय नमोनमः ॥ १६५ ॥ नमो विरजरूपाय रूपारूपप्रकाशिने ॥ नमो राजप्रकाशाय भैरवाय नमोनमः ॥ १६६ ॥ नमः प्रतापसिंहाय प्रतापाय नमोनमः ॥ नमः कोटिप्रतापाय भैरवाय नमोनमः ॥ १६७ ॥ नमः सहस्ररूपाय कोटिरूपाय ते नमः ॥ नम आनन्दरूपाय भैरवाय नमोनमः ॥ १६८ ॥ नमः संहारबंधाय बंधकाय नमोनमः ॥ नमो

For Private And Personal Use Only

विमोक्षरूपाय मोक्षदाय नमोनमः॥१६९॥नमो विष्णुस्वरूपाय व्यापकाय नमोनमः॥नमो मांगल्यनाथाय शिवनाथाय ते नमः॥१७०॥
नमो व्यालाय व्याघ्राय व्याघ्ररूपिन्नमोस्तु ते ॥ नमो व्यालविभूषाय भैरवाय नमोनमः ॥१७१॥ नमो विद्याप्रकाशाय विद्यानां पतये नमः
नमो योगिस्वरूपाय क्रूररूपाय ते नमः ॥ १७२ ॥ नमः संहाररूपाय शत्रुनाशाय ते नमः ॥ नमः पालकरूपाय भैरवाय नमोनमः ॥
॥ १७३ ॥ नमः कारुण्यदेवाय देवदेवाय ते नमः ॥ नमो विश्वविलाशाय भैरवाय नमोनमः ॥ १७४ ॥ नमोनमः प्रकाशाय का
शीवासिन्नमोस्तु ते ॥ नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥ १७५ ॥ नमो भद्रस्वरूपाय भद्रकाय नमोनमः ॥ नमो भद्राधिपतये
भयहंतर्नमोस्तु ते ॥ १७६ ॥ नमो मायाविनोदाय मायिने मदरूपिणे ॥ नमो मत्ताय शांताय भैरवाय नमोनमः ॥ १७७ ॥ नमो
मलयगवासाय कैलासाय नमोनमः ॥ नमः कैलासवासाय कालिकातनयाय ते ॥१७८॥ नमः संसारपाराय भैरवाय नमोनमः ॥ नमो
मातृविनोदाय विमलायनमो नमः ॥ १७९ ॥ नमो यमप्रकाशाय नियमाय नमोनमः ॥ नमः प्राणप्रकाशाय ध्यानाधिपतये नमः ॥
॥ १८० ॥ नमः समाधिरूपाय निर्गुणाय नमोनमः ॥ नमो मंत्रप्रकाशाय मंत्ररूपाय ते नमः ॥ १८१ ॥ नमो वृंदविनोदाय वृंद
काय नमोनमः ॥ नमो बृंहितरूपाय भैरवाय नमोनमः ॥ १८२ ॥ नमो मान्यस्वरूपाय मानदाय नमोनमः ॥ नमो विश्वप्रकाशाय
भैरवाय नमोनमः ॥ १८३ ॥ नमो नैस्थिरपीठाय सिद्धपीठाय ते नमः ॥ नमो मंडलपीठाय उक्तपीठाय ते नमः ॥ १८४ ॥ नमो
यशोदानाथाय कामनाथाय ते नमः ॥ नमो विनोदनाथाय सिद्धिनाथाय ते नमः ॥ १८५ ॥ नमोनाथाय नाथाय ज्ञाननाथाय
ते नमः ॥ नमः शंकरनाथाय जयनाथाय ते नमः ॥ १८६ ॥ नमो मुद्गलनाथाय नीलनाथाय ते नमः ॥ नमो बालकना

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थाय धर्मनाथाय ते नमः ॥१८७॥ विश्वनाथाय नाथाय कार्यनाथाय ते नमः ॥ नमो भैरवनाथाय महानाथाय ते नमः ॥१८८॥ नमो
ब्रह्मसनाथाय योगनाथाय ते नमः ॥ नमो विश्वविहाराय विश्वभाराय ते नमः ॥ १८९ ॥ नमो रंगसनाथाय रंगनाथाय ते नमः ॥
नमो मोक्षसनाथाय भैरवाय नमोनमः ॥ १९० ॥ नमो गोरक्षनाथाय गोरक्षाय नमोनमः ॥ नमो मंदारनाथाय नन्दनाथाय ते नमः
॥ १९१ ॥ नमो मंगलनाथाय चंपानाथाय ते नमः ॥ नमः सन्तोषनाथाय भैरवाय नमोनमः ॥ १९२ ॥ नमोगरगिना
थाय सुखनाथाय ते नमः ॥ नमः कारुण्यनाथाय भैरवाय नमोनमः ॥ १९३ ॥ नमो द्रविडनाथाय दरिनाथाय ते नमः ॥
नमः संसारनाथाय जगन्नाथाय ते नमः ॥ १९४ ॥ नमो माध्वीकनाथाय मंत्रनाथाय ते नमः ॥ नमो न्याससनाथाय
ध्याननाथाय ते नमः ॥ १९५॥ नमो गोकर्णनाथाय महानाथाय ते नमः ॥ नमः शुभ्रसनाथाय भैरवाय नमोनमः ॥१९६॥ नमो विमल
नाथाय मंडलनाथाय ते नमः ॥ नमः सरोजनाथाय मत्स्यनाथाय ते नमः ॥ १९७ ॥ नमो भक्तसनाथाय भक्तिनाथाय ते नमः ॥
नमो मोहननाथाय वत्सनाथाय ते नमः ॥ १९८ ॥ नमो मातृसनाथाय विश्वनाथाय ते नमः ॥ नमो बिंदुसनाथाय जयनाथाय ते
नमः ॥ १९९ ॥ नमो मंगलनाथाय धर्मनाथाय ते नमः ॥ नमो गंगासनाथाय भूमिनाथाय ते नमः ॥ २०० ॥ नमो श्रीरसनाथाय बिंदु
नाथाय ते नमः ॥ नमः कंचुकिनाथाय शृंगिनाथाय ते नमः ॥ २०१ ॥ नमः समुद्रनाथाय गिरिनाथाय ते नमः ॥ नमो मांगल्यनाथाय
कुट्टनाथाय ते नमः ॥ २०२ ॥ नमो वेदांतनाथाय श्रीनाथाय नमोनमः ॥ नमो ब्रह्मांडनाथाय भैरवाय नमोनमः ॥ २०३ ॥ नमो
गिरिशनाथाय वामनाथाय ते नमः ॥ नमो बीजसनाथाय भैरवाय नमोनमः ॥ २०४ ॥ नमो मंदरनाथाय मंदनाथाय ते नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमो भैरवीनाथाय भैरवाय नमोनमः ॥२०५॥ अंबानाथाय नाथाय जंतुनाथाय ते नमः ॥ नमः कालिसनाथाय भैरवाय नमोनमः ॥ ॥२०६॥ नमो मुकुंदनाथाय कुंदनाथाय ते नमः ॥ नमः कुंडलनाथाय भैरवाय नमोनमः ॥२०७॥ नमोष्टचक्रनाथाय चक्रनाथाय ते नमः ॥ नमो विभूतिनाथाय शूलनाथाय ते नमः ॥ २०८ ॥ नमो न्यायसनाथाय न्यायनाथाय ते नमः ॥ नमो दयासनाथाय जंगमेशाय ते नमः ॥ २०९ ॥ नमो विशदनाथाय जगन्नाथाय ते नमः ॥ नमः कामिकनाथाय भैरवाय नमोनमः ॥२१०॥ नमः क्षेत्रसनाथाय जीवनाथाय ते नमः ॥ नमो केवलनाथाय चैलनाथाय ते नमः॥२११॥ नमो मात्रासनाथाय आगत्राय नमोनमः ॥ नमो द्वंद्वसनाथाय भैरवाय नमोनमः ॥ २१२ ॥ नमः शूरसनाथाय शूरनाथाय ते नमः ॥ नमः सौजन्यनाथाय सौजन्याय नमोनमः ॥ २१३ ॥ नमो दुष्टसनाथाय भैरवाय नमोनमः ॥ नमो भयसनाथाय बिंबनाथाय ते नमः ॥ २१४ ॥ नमो मायासनाथाय भैरवाय नमोनमः ॥ नमो विटंकनाथाय टंकनाथाय ते नमः ॥ २१५ ॥ नमश्चर्मसनाथाय खड्गनाथाय ते नमः ॥ नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥ ॥ २१६ ॥ नमो मानसनाथाय शापनाथाय ते नमः ॥ नमो यंत्रसनाथाय भैरवाय नमोनमः ॥ २१७ ॥ नमो गंडूषनाथाय गंडूषाय नमोनमः ॥ नमो डाकिनिनाथाय भैरवाय नमोनमः ॥२१८॥ नमो डामरनाथाय डारकाय नमोनमः ॥ नमो डंकसनाथाय डंकनाथाय ते नमः ॥२१९॥ नमो मांडव्यनाथाय यज्ञनाथाय ते नमः ॥ नमो यजुःसनाथाय क्रीडनाथाय ते नमः ॥ २२०॥ नमः सामसनाथायाथर्वनाथाय ते नमः ॥ नमः शून्याय नाथाय स्वर्गनाथाय ते नमः॥२२१॥इदं नामसहस्रं मे रुद्रेण परिकीर्तितम् ॥ यः पठेत्पाठयेद्वापि स एव मम सेवकः ॥२२२॥ यंयं चिंतयते कामं कारंकारं प्रियाकृतिम् ॥ यः शृणोति दुरायंतं तंतं प्रामोति मामकः ॥२२३॥ राजद्वारे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्मशाने तु पृथिव्यां जलसन्निधौ ॥ यः पठेन्मानवो नित्यं स शूरः स्यान्न संशयः ॥२२४॥ एककालं द्विकालं वा त्रिकालं वा पठेन्नरः ॥ स भावेद्बुद्धिमान्लोके सत्यमेव न संशयः ॥२२५॥ यः शृणोति नरो भक्त्या स एव गुणसागरः ॥ यः श्रद्धया रात्रिकाले शृणोति पठचेतं च वा ॥२२६॥ स एव साधकः प्रोक्तः सर्वदुष्टविनाशकः ॥ अर्धरात्रे पठेयस्तु स एव पुरुषोत्तमः ॥२२७॥ त्रिसंध्यायां देवगृहे श्मशाने च विशेषतः ॥ वने च मार्गगमने बले दुर्जनसन्निधौ ॥२२८॥ यः पठेत्प्रयतो नित्यं स सुखी स्यान्न संशयः ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम्॥२२९॥शौर्यार्थी लभते शौर्यं पुत्रार्थी पुत्रमाप्नुयात् ॥ एवंविंशतिमंत्रेण अक्षरेण सहैव मे ॥ २३०॥ यः पठेत्प्रातरुत्थाय सर्वं काममवाप्नुयात् ॥ रसार्थी पाठमात्रेण रसं प्राप्नोति नित्यशः॥२३१॥ अन्नार्थी लभते चान्नं सुखार्थी सुखमाप्नुयात् ॥ रोगी प्रमुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ २३२ ॥ शापार्थी लभते शापं सर्वशत्रुविनाशनम् ॥ स्थावरं जंगमं वापि विषं सर्वं प्रणश्यति ॥ २३३ ॥ सर्वलोकप्रियः शांतो मातृपितृप्रियंकरः ॥ संग्रामे विजयस्तस्य यः पठेद्भक्तिसंयुतः ॥ २३४ ॥ सर्वत्र जयदं देवि स्तोत्रमेतत्प्रकीर्तितम् ॥ इदं स्तोत्रं महत्पुण्यं निंदकाय न दर्शयेत् ॥२३५॥ असाधकाय दुष्टाय मातृपितृविकारिणे ॥ अधार्मिकायाकुलीनाय नैतत्स्तोत्रं प्रकाशयेत् ॥ ॥ २३६ ॥ साधकाय च भक्ताय योगिने धार्मिकाय च ॥ गुरुभक्ताय शांताय दर्शयेत्साधकोत्तमः ॥ २३७ ॥ अन्यथा पापलिप्तः स्यात्क्रोधाय भैरवोत्तमे ॥ तस्मात्सर्वप्रयत्नेन गोपनीयं प्रयत्नतः ॥ २३८ ॥ इदं स्तोत्रं च रुद्रेण रामस्यापि मुखेर्पितम् ॥ तन्मुखान्निःसृतं लोके दरिद्रायापि साधवे ॥ २३९ ॥ रामेण कथितं भ्रात्रे लक्ष्मणाय महात्मने ॥ ततो दुर्वाससा प्राप्तं तैनेवोक्तं तु पांडवे ॥ २४० ॥ पांडवोप्यब्रवीत्कृष्णं कृष्णेनेह प्रकीर्तितम् ॥ अस्य स्तोत्रस्य माहात्म्यं रामो जानाति तत्त्वतः ॥ २४१ ॥ रामोपि राज्यं

For Private And Personal Use Only

संप्राप्तो ह्यस्य स्तोत्रस्य पाठतः ॥ पांडवोपि तथा राज्यं संप्राप्तो भैरवस्य च ॥ २४२ ॥ अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति ॥ सर्वे लोकस्य पूज्यस्तु जायते नात्र संशयः ॥ २४३ ॥ इति श्रीरुद्रयामलोक्तश्रीवटुकभैरवसहस्रनामस्तोत्रं सम्पूर्णम् ॥ श्रीगणेशाय नमः ॥ अथ श्रीवटुकभैरवस्तवराजप्रारंभः ॥ (उक्तं च रुद्रयामले) ॥ मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनम् ॥ शंकरं परिपप्रच्छ पार्वती परमेश्वरम् ॥ १ ॥ पार्वत्युवाच ॥ य एष भैरवो नाम आपदुद्धारको मतः ॥ त्वया च कथितो देव भैरवः कल्प उत्तमः ॥ तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ॥ २ ॥ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥ यानि संकीर्तयन्मर्त्यः सर्वदुःखविवर्जितः ॥ ३ ॥ सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ॥ आपदुद्धारणस्येह नामाष्टशतमुत्तमम् ॥ ४ ॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् ॥ सर्वकामार्थदं देवि साधकानां सुखावहम् ॥ ५ ॥ सर्वमंगलमांगल्यं सर्वोपद्रवनाशनम् ॥ आयुःकरं पुष्टिकरं श्रीकरं च यशस्करम् ॥ ६ ॥ आद्यन्ते स्तोत्रपाठस्य मूलमंत्रं जपेन्नरः ॥ अष्टोत्तरशतं धीमान् यथासंख्यमथापि वा ॥ जपांतेप्युत्तरन्यासाः कर्तव्या जपसिद्धये ॥ ७ ॥ आयुरारोग्यमैश्वर्यं सिद्धार्थे विनियोजयेत् ॥ साधकः सर्वलोकेषु सत्यंसत्यं न संशयः ॥ ८ ॥ ॐ अस्य श्रीवटुकभैरवस्तोत्रमंत्रस्य बृहदारण्यक ऋषिः । अनुष्टुप्छन्दः । श्रीवटुकभैरवो देवता । अष्टबाहुमिति बीजम् ॥ त्रिनयनमिति शक्तिः । प्रणवः कीलकम् । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ बृहदारण्यकऋषये नमः शिरसि १ अनुष्टुछंदसे नमः मुखे २ श्रीवटुकभैरवदेवतायै नमः हृदये ३ अष्टबाहुमिति बीजाय नमः गुह्ये ४ त्रिनयनेति शक्तये नमः पादयोः ५ ॐ कीलकाय नमः नाभौ ६ विनियोगाय नमः सर्वांगे ७॥ इति ऋष्यादिन्यासः॥ॐ ह्रां वाँ ईशानः सर्वविद्यानामीश्वरः

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा।शिवो मे अस्तु सदाशिवोम् ॥ अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात्॥तर्जनीभ्यां नमः॥२॥ॐ हूँ वूँ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः॥सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ मध्यमाभ्यां नमः॥ ३॥ॐ हैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बल विकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ अनामिकाभ्यां नमः॥ ४॥ॐ हौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः॥भवे भवे नातिभवे भवस्य मां भवोद्भवाय नमः॥कनिष्ठिकाभ्यां नमः॥ ५॥ॐ हः वः पंचवक्त्राय महादेवाय नमः ॥ करतलकरपृष्ठाभ्यां नमः॥६॥इति करन्यासः॥ॐ ह्राँ वाँ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदा शिवोम् ॥ हृदयाय नमः॥ १॥ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात्॥शिरसे स्वाहा ॥ २ ॥ ॐ हूँ वूँ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥शिखायै वषट् ॥ ३॥ ॐ हैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मयाय नमः ॥ कवचाय हुम् ॥४॥ ॐ हौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः ॥ भवेभवे नाति भवे भवस्व मां भवोद्भवाय नमः ॥ नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ हः वः पंचवक्त्राय महादेवाय नमः अस्त्राय फट् ॥६॥ इति हृदयादि षडङ्गन्यासः ॥ ॐ ह्रीं भैरवाय नमः मूर्ध्नि॥ १॥ॐ ह्रीं भीमदर्शनाय नमः ललाटे॥ २॥ॐ ह्रीं भूताश्रयाय नमः नेत्रयोः॥ ३॥ॐ ह्रीं भूत

१ एवं न्यासप्रभावेणभक्तोपरि भैरवः प्रसन्नो भवति ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नायकाय नमः कर्णनोः ॥ ४ ॥ ॐ ह्रीं त्रिशूलाय नमः नासिकायाम् ॥ ५ ॥ ॐ ह्रीं रक्ताय नमः जिह्वायाम् ॥ ६ ॥ ॐ ह्रीं नागहारनागयज्ञोपवीतिकाय नमः कंठे ॥ ७ ॥ ॐ ह्रीं क्षेत्रज्ञाय नमः करयोः ॥ ८ ॥ ॐ ह्रीं क्षेत्रपालाय नमः हृदये ॥ ९ ॥ ॐ ह्रीं क्षेत्रदाय नमः नाभौ ॥ १० ॥ ॐ ह्रीं सत्रोधनाशानाय नमः कट्याम् ॥ ११ ॥ ॐ ह्रीं त्रिनेत्राय नमः ऊर्वोः ॥ १२ ॥ ॐ ह्रीं रक्तपायिने नमः जंघयोः ॥ १३ ॥ ॐ ह्रीं देवदेवेशाय नमः सर्वांगे ॥ १४ ॥ इति देहन्यासः ॥ ॐ ह्रीं भैरवाय नमः अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं भीमदर्शनाय नमः तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रीं भूतश्रेष्ठाय नमः मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रीं भूतनायकाय नमः अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रीं क्षत्रियाय नमः कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रीं क्षेत्रपालाय नमः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ ॐ ह्रीं क्षेत्रज्ञाय दिग्दिशायाम् ॥ ७ ॥ ॐ भैरवाय नमः सर्वांगे ॥ ८ ॥ इति करन्यासो द्वितीयः ॥ ॐ ह्रीं भैरवाय नमः शिरसि ॥ १ ॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे ॥ २ ॥ ॐ ह्रीं भूतहननाय नमः नेत्रयोः ॥ ३ ॥ ॐ ह्रीं सारमेयानुगाय नमः भ्रुवोः ॥ ४ ॥ ॐ ह्रीं भूतनाथाय नमः कर्णयोः ॥ ५ ॥ ॐ ह्रीं प्रेतवाहनाथाय नमः कपोलयोः ॥ ६ ॥ ॐ ह्रीं भस्मांगाय नमः नासापुटे ॥ ७ ॥ ॐ ह्रीं सर्पभूषणाय नमः ओष्ठयोः ॥ ८ ॥ ॐ ह्रीं आदिनाथाय नमः मुखे ॥ ९ ॥ ॐ ह्रीं शक्तिहस्ताय नमः गले ॥ १० ॥ ॐ ह्रीं दैत्यशमनाय नमः स्कंधयोः ॥ ११ ॥ ॐ ह्रीं अतुलतेजसे नमः बाह्वोः ॥ १२ ॥ ॐ ह्रीं कपालिने नमः करयोः ॥ १२ ॥ ॐ ह्रीं मुण्डमालिने नमः हृदये ॥ १३ ॥ ॐ ह्रीं शांताय नमः वक्षःस्थले ॥ १४ ॥ ॐ ह्रीं कामचारिणे नमः स्तनयोः ॥ १५ ॥ ॐ ह्रीं सदातुष्टाय नमः उदरे ॥ १६ ॥ ॐ ह्रीं क्षेत्रेशाय नमः पार्श्वयोः ॥ १७ ॥ ॐ ह्रीं क्षेत्रपालाय नमः पृष्ठे ॥ १८ ॥ ॐ ह्रीं क्षेत्रज्ञाय नमः नाभौ ॥ १९ ॥ ॐ ह्रीं पापौघनाशाय नमः कट्याम् ॥ २० ॥ ॐ ह्रीं वटुकाय नमः लिंगे ॥ २१ ॥ ॐ ह्रीं रक्षाकराय नमः

For Private And Personal Use Only

गुदे ॥ २२ ॥ ॐ ह्रीं रक्तलोचनाय नमः ऊर्वोः ॥ २३ ॥ ॐ ह्रीं घुर्घुराय नमः जानुनि ॥ २४ ॥ ॐ ह्रीं रक्तपायिने नमः जंघयोः ॥ २५ ॥ ॐ ह्रीं सिद्धपादुकाय नमः गुल्फयोः ॥ २६ ॥ ॐ ह्रीं सुरेश्वराय नमः पादपृष्ठे ॥ २७ ॥ ॐ ह्रीं आपदुद्धारकाय नमः आपादतलमस्तकपर्यंतं न्यसेत् ॥ २८ ॥ 'ॐ ह्रीं क्ष्म्रौं ब्लौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः ॥' अनेन सर्वाङ्गे व्यापकं कुर्यात् ॥ २९ ॥ इति व्यापकन्यासः ॥ ॐ ह्रीं डमरुहस्ताय नमः पूर्वे ॥ १ ॥ ॐ ह्रीं दंडधारिणे नमः दक्षिणे ॥ २ ॥ ॐ ह्रीं खड्गहस्ताय नमः पश्चिमे ॥ ३ ॥ ॐ ह्रीं घंटावादिने नमः उत्तरे ॥ ४ ॥ ॐ ह्रीं अग्निवर्णाय नमः अग्नये ॥ ५ ॥ ॐ ह्रीं दिगम्बराय नमः नैर्ऋते ॥ ६ ॥ ॐ ह्रीं सर्वभूतस्थाय नमः वायव्ये ॥ ७ ॥ ॐ ह्रीं अष्टसिद्धिदाय नमः ऐशान्याम् ॥ ८ ॥ ॐ ह्रीं खेचारिणे नमः ऊर्ध्वम् ॥ ९ ॥ ॐ ह्रीं रौद्ररूपिणे नमः पाताले ॥ १० ॥ इति दिग्न्यासः ॥ ॐ ह्रीं रुद्राय नमः अंगुष्ठयोः ॥ १ ॥ ॐ ह्रीं शिखिसखाय नमः तर्जन्याम् ॥ २ ॥ ॐ ह्रीं शिवाय नमः मध्यमायाम् ॥ ३ ॥ ॐ ह्रीं त्रिशूलिने नमः अनामिकायाम् ॥ ४ ॥ ॐ ह्रीं ब्रह्मणे नमः कनिष्ठिकायाम् ॥ ५ ॥ ॐ ह्रीं त्रिपुरांतकाय नमः करतलयोः ॥ ६ ॥ ॐ ह्रीं मांसाशिने नमः कराग्रेषु ॥ ७ ॥ ॐ ह्रीं दिगंबराय नमः करपृष्ठयोः ॥ ८ ॥ इति विलोमरूपेण करन्यासः ॥ ॐ ह्रीं भूतनाथाय नमः हृदयाय नमः ॥ ॥ १ ॥ ॐ ह्रीं आदिनाथाय नमः शिरसे स्वाहा ॥ २ ॥ ॐ ह्रीं आनन्दनाथाय नमः शिखायै वषट् ॥ ३ ॥ ॐ ह्रीं सिद्धशाबरनाथाय नमः कवचाय हुम् ॥ ४ ॥ ॐ ह्रीं सहजानन्दनाथाय नमः नेत्रत्रयाय वौषट् ॥ [१]५ ॥ ॐ ह्रीं श्रीआनन्दनाथाय नमः

१ एवं न्यासविधिं कृत्वा साक्षाद्भैरवो भवेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्त्राय फट् ॥६॥ इति हृदयादि षडङ्गन्यासः ॥ एवं न्यासविधिं समाप्य कामनापरत्वेनोपयोगिरूपं ध्यायेत्॥अथ सात्त्विकं ध्यानम् ॥ वंदे बालं स्फटिकसदृशं कुंडलोद्भासितांगं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराढ्यैः ॥ दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं हस्ताग्राभ्यां वटुकसदृशं शूलदंडौ दधानम् ॥ १॥ अथ राजसं ध्यानम् ॥ उद्यद्भास्करसन्निभं त्रिनयनं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलग्रीवमुदारभूषणयुतं शीतांशुखंडोज्ज्वलं बंधूकारुणवाससं भयहरं देवं सदा भावये ॥ २ ॥ अथ तामसं ध्यानम्॥ ध्यायेन्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गपाशाभयानि ॥ नागं घंटां कपालं करसरसिरुहै र्बिभ्रतं भीमदंष्ट्रं दिव्याकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराढ्यम् ॥ ३ ॥ अथ सकलमनोरथप्राप्त्यर्थमिदं त्रिगुणात्मक ध्यानम् ॥ शुद्धःस्फटिकसंकाशं सहस्रादित्यवर्चसम् ॥ नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥ १ ॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥२॥ भुजंगमेखलं देवमग्निवर्णं शिरोरुहम् ॥ दिगंबरं कुमारेशं वटुकाख्यं महाबलम्॥ ३॥ खट्वांगमसिपाशं च शूलं दक्षिणभागतः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ आत्मवर्णसमोपेतं सारमेयसमन्वितम् ॥ ४ ॥ अथ साधारणं ध्यानम् ॥ करकलितकपालः कुंडली दंडपाणिस्तरुणतिमिरनीलो व्यालयज्ञोपवीती ॥ क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साधकानाम् ॥ १ ॥ आनीलकुंतलमलक्तकरक्तवर्णं मौनीकृतं कृतमनोज्ञमुखारविंदम् ॥ कल्याणकीर्तिकमनीयकपालपाणिं वंदे महावटुकनाथमभीष्टसिद्ध्यै ॥ २ ॥ आनम्रसर्वगीर्वाणशिरोभृंगांगसंगि

१ क्रूरकार्येषु सर्वेषु ध्यानं वै तामसं स्मृतम् ॥ वश्ये विद्वेषणे स्तंभे राजसं ध्यानमीरितम् ॥ सात्त्विकं शुभकार्येषु ध्यानभेदः समीरितः ॥ सर्वकामार्थसिद्ध्यर्थं राजसं ध्यानमुच्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नम् ॥ भैरवस्य पदांभोजं भूयोऽस्या नौमि भूतये ॥ ३ ॥ एवं यथारुचि ध्यात्वा भैरवं प्रार्थयेत् ॥ तत्र मंत्रः ॥ "ॐ ह्रीं भैरवभैरवभयकरहरमांरक्षरक्षहुंफट्स्वाहा" इति मंत्रेण प्रार्थयित्वा पटलस्थयंत्रपीठे आवाहनादिप्राणं प्रतिष्ठाप्य षोडशोपचारैरभ्यर्च्य पुनः कामनापरत्वेन यथारुचि ध्यात्वा प्रार्थनामंत्रेण प्रार्थयित्वा दीपदानं कुर्यात् ॥ अथ दीपदानप्रयोगः॥ मंत्राक्षराणां संख्याकैस्तंतुभिर्ब्रह्मसूत्रजैर्वर्तिं दत्त्वा घृते नैव दीपं तत्र प्रदापयेत्॥ अथ दीपदानमंत्रः॥ "ॐ ह्रींश्रींक्लींह्रींश्रींवं सर्वज्ञाय महाबलपराक्रमाय वटुकाय नमः ॥ इमं दीपं गृहाण सर्वकार्यार्थ साधक दुष्टान्नाशयनाशय त्रासयत्रासय सर्वतो मम रक्षां कुरुकुरु फट् स्वाहा ॥" अनेन मंत्रेण दीपं दत्त्वा मूलमंत्रेण त्रिराचम्य हस्तौ प्रक्षालयेत्॥ एवं दीपदानं समाप्य बलिदानं कुर्यात्॥ अथ बलिदानप्रयोगः ॐ ह्रौं नमः॥ १ ॥ ॐ ह्रीं नमः ॥ २॥ ॐ कुं नमः॥ ३॥ एभिर्बीजैस्त्रिभिराचम्य मूलेन प्राणायामं कृत्वा देशकालौ संकीर्त्य ममामुकफलावाप्तये श्रीवटुकप्रीतये बलिदानमहं करिष्ये ॥ इति संकल्प्य गणपतिं दुर्गां रक्तैश्चन्दनाक्षतपुष्पैरभ्यर्च्य देवस्याग्रे त्रिकोणं चतुरस्रं मण्डलं कृत्वा तत्र गंधाद्यैरभ्यर्च्य पात्रस्थं कवलाकारं संपादितं बलिं निधाय गंधपुष्पाभ्यां मूलांते 'बलिरूपाय नमः' इति बलिं संपूज्य देवं तत्र संचित्य संपूज्य हस्ते बलिमादाय "ॐ एह्येहि देववटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशयनाशय सर्वोपचारसहितं बलिं गृह्णगृह्ण स्वाहा एषबलिर्वटुकाय नमः" इति मंत्रेण बलिं दद्यात् ॥ ततो देशकालौ संकीर्त्य मम सकलकामनासिद्ध्यर्थं श्रीवटुकभैरवस्तोत्रस्यैकादशसहस्रपुरश्चरणांगत्वेन प्रतिस्तोत्रंमूलमंत्रस्योत्तरशतसंख्याजपसंपुटितामुकसंख्यपाठमहं करिष्ये ॥ इति संकल्प्य ॥ मूलमंत्राष्टोत्तरशतवारं जपेत् ॥

१ द्विविधो बलिराख्यातो राजसः सात्त्विको बुधैः॥ राजसो मांसरक्ताढ्यः पलत्रयसमन्वितः ॥ मुद्गपायससंयुक्तो मधुरत्रयसंयुत ॥ सात्त्विको मांसरहितः शेषमन्यत्पुरोक्तवत् ॥ ब्राह्मणो नियतः शुद्धः सात्त्विकं बलिमाहरेत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ मूलमंत्रः ॥ "ॐ ह्रीं वटुकायापदुद्धारणाय कुरुकुरु वटुकाय ह्रीं ॐ" ॥ एवमष्टोत्तरशतमूलमंत्रस्यजपेन श्रीवटुकभैरवः प्रीयताम् ॥ ततो वटुकाय नमस्कृत्य पंचोपचारैः संपूज्य पुस्तकं पूजयित्वा स्तोत्रं पठेत् ॥ अथ स्तोत्रम् ॥ ॐ-ह्रीं भैरवोभूतनाथश्च भूतात्माभूतभावनः ॥ क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥ १ ॥ श्मशानवासीमांसाशीखर्पराशिःस्मरांतकृत् ॥ रक्तपःपानपःसिद्धःसिद्धिदः सिद्धसेवितः॥ २॥कंकालःकालशमनःकलाकाष्ठातनुः कविः ॥ त्रिनेत्रोबहुनेत्रश्चतथापिंगललोचनः ॥ ३ ॥ शूलपाणिःखड्गपाणिः कंकालीधूम्रलोचनः ॥ अभीरुर्भैरवोनाथोभूतपोयोगिनीपतिः ॥ ४ ॥ धनदोधनहारीचधनवान्प्रीतिभावनः ॥ नागहारोनागपाशो व्योमकेशः कपालभृत् ॥ ५ ॥ कालः कपालमालीचकमनीयःकलानिधिः ॥ त्रिलोचनोज्ज्वलन्नेत्रस्त्रिशिखीचात्रिलोकपः ॥ ६ ॥ त्रिनेत्रतनयोडिंभःशांतःशांतजनप्रियः ॥ वटुकोवटुवेषश्चखट्वांगवरधारकः ॥ ७ ॥ भूताध्यक्षःपशुपतिःभिक्षुकःपरिचारकः ॥ धूर्तोदिगंबरः शूरोहरिणःपांडुलोचनः॥ ८॥प्रशांतःशांतिदःसिद्धः शंकरःप्रियबांधवः ॥ अष्टमूर्तिर्निधीशश्चज्ञानचक्षुस्तपोमयः ॥ ९॥ अष्टाधारःषडाधारः सर्पयुक्तशिखीसखः ॥ भूधरोभूधराधीशोभूपतिर्भूधरात्मजः ॥ १० ॥ कंकालधारीमुंडीचनागयज्ञोपवीतवान् ॥ जृंभणोमोहनःस्तंभीमारणः क्षोभणस्तथा ॥ ११ ॥ शुद्धनीलांजनप्रख्यो दैत्यहा मुंडभूषितः ॥ बलिभग्बलिभुन्नाथो बालोबालपराक्रमः ॥ १२ ॥ सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥ कामी कलानिधिः कांतः कामिनीवशकृद्वशी ॥ १३ ॥ सर्वसिद्धिप्रदो वैद्यो प्रभुर्विष्णुरितीवहिः ॥ अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥ १४ ॥ मया ते कथितं देवि रहस्यं सर्वकामदम् ॥ य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ॥ १५ ॥ न तस्य दुरितं किंचिन्नच भूतभयं तथा ॥ न च मारीभयं तस्य ग्रहराजभयं तथा ॥ १६ ॥ न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम्॥ १७॥मारीभये राजभये तथा चोराग्निजे भये ॥ औत्पात्तिके महाघोरे तथा दुःस्वप्नदर्शने॥ १८॥ बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः ॥ सर्वं प्रशमनं याति भयं भैरवकीर्तनात् ॥ १९ ॥ एकादशसहस्रं तु पुरश्चरणमुच्यते ॥ यस्त्रिसंध्यं पठेद्देवि सम्वत्सरमतंद्रितः ॥ २० ॥ स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः ॥ षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥ २१ ॥राजशत्रुविनाशार्थं जपेन्मासाष्टकं पुनः॥रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान्॥ २२ ॥जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत्॥ धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥ २३॥ जपेन्मासत्रयं देवि वारमेकं तथा निशि ॥ धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः ॥ २४ ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥ भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः ॥ २५ ॥ निगडैश्चापि बद्धो यः कारागेहे निपातितः ॥ श्रृंखलाबंधनं प्राप्तं पठेच्चैव दिवानिशि ॥ २६ ॥ यंयं चिंतयते कामं तंतं प्राप्नोति निश्चितम् ॥ अप्रकाश्यं परं

१-ग्रंथांतरे विशेषः---रात्रौ वारत्रयं यो वै तस्य वश्यं जगद्भवेत् ॥ प्रातश्चैकादशावृत्तिं रात्रौ वा पुनरेव हि ॥१॥ पूर्ववच्च विधिं कृत्वा पठनीयः स्तवः शुभः॥ महानिशि त्रिरावृत्तिं यः करोति सदा शुचिः ॥ २ ॥ राजानो वशमायांति सभासोभास्करो भवेत् ॥ शनौ च प्रातरुत्थाय दशावृत्तिं चरेदिह ॥३॥ होमादिकं च संपाद्य षण्मासादतुलां श्रियम् ॥ शनौ चैवाश्वत्थमूले पूजयित्वा शिवं प्रिये ॥ ४॥ शतावृत्तिं पठित्वा तु जगद्वल्लभतामियात् ॥ रवौ च नाभिमात्रे हि जले स्थित्वा पठेदिह ॥ ५ ॥ एकादश तथावृत्तिं पठित्वा प्राप्नुयाच्छ्रियम् ॥ पठेच्च रोगशांत्यर्थं नक्षत्रे पुष्यसंज्ञके ॥ ६ ॥ अष्टावृत्तिं पठेद्यो वै आरोग्यं लभते ध्रुवम् ॥ रवौ च विप्रान्संपूज्य पाठयेच्छतवारकम् ॥ ७ ॥ वारे वारे च षण्मासं पठित्वा सुतमाप्नुयात् ॥ सप्तजन्मभवा वंध्या जीवत्पुत्रा भवेदिह ॥ ८ ॥ कन्याकामो भवेद्यो वै त्रिकालं रविवासरे ॥ षण्मासादप्सरातुल्यां लभते स्त्रियमुत्तमाम् ॥ ९ ॥ वैद्यानामप्यसाध्यो वै रोगो भवति यस्य च ॥ तस्य रोगस्य शांत्यर्थं पठेत्स्तोत्रमनुत्तमम् ॥ १० ॥ निष्फलश्च क्रतुस्तस्य भवतीह सदा प्रिये ॥ सहस्रावर्तनं कृत्वा सफलश्च क्रतुर्भवेत् ॥ ११ ॥ ग्रहणे च पठेद्यो वै विधिना चन्द्रसूर्ययोः ॥ मनोदिष्टां तदा सिद्धिं प्राप्नुयान्नात्र संशयः ॥ तीर्थे चैव शुभे क्षेत्रे शिवस्य सन्निधौ प्रिये । पठित्वा पुत्रमंत्रं च सद्यः सिद्धिं लभेदिह॥ त्रिरावृत्तिं दशावृत्तिं विंशतिं वा शतावधिः॥ सहस्रसंख्यया वाथ चैकादशसहस्रकम्॥ पुरश्चरणकं प्रोक्तं भैरवस्य महात्मनः॥ पुरश्चरणकं कृत्वा पठते नित्यमेव च । सद्यः सिद्धिं यथोक्तां हि प्राप्नुयान्नात्र संशयः ॥ मानुषं जन्म मासाद्य दुःखभाजो भवंति वै ॥ते भजंतु सदा देवं भैरवं सुखदायकम् ॥ तद्दुःखं नैव विद्येत भैरवो नाशयेदिह ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुह्यं न देयं यस्य कस्य चित् ॥ २७ ॥ सुकुलीनाय शांताय ऋजवे दंभवर्जिते ॥ दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम् ॥ २८ ॥
इतिश्रुत्वाततोदेवीनामाष्टशतमुत्तमम् ॥ जजापपरयाभक्त्यासदासर्वेश्वरेश्वरी ॥ २९ ॥ भैरवोपिप्रहृष्टोभूत्सर्वलोकमहेश्वरः ॥ वरंददाति
भक्तेभ्यःपठेत्स्तोत्रमनन्यधीः ॥ संतोषंपरमंप्राप्यभैरवस्यमहात्मनः ॥ ३० ॥ वारंवारंभुवनजननीप्रोच्यतेसाधुवादः सत्यंसत्यंजगति
सकलेभैरवोदेवएकः ॥ यांयांसिद्धिंभुवनजठरेकामयेन्मानवोयस्तांस्तां सिद्धिंवितरतिसदाभैरवःसुप्रसन्नः ॥ ३१ ॥ पाणिभ्यांपरितः
प्रपीड्यमुद्दढंनिश्चोत्यनिश्चोत्यच ब्रह्माण्डंसकलंप्रचालितरसालोचैःफलाभंमुहुः ॥ पायंपायमपाययत्रिजगतिह्युन्मुत्तवत्तैरसैर्नृत्यंस्तांडव
मंबरेणशिरसापायान्महाभैरवः ॥ ३२ ॥ बिभ्राणंःशुभ्रवर्णंद्विगुणनवभुजंपंचवक्त्रंत्रिनेत्रं ज्ञानेमुद्रेंद्रशाखंसविषममृतकंशंखभैषज्यचा
पम् ॥ शूलंखट्वांगवाणान्डमरुमसिगदावह्निमारोग्यमालामिष्टाभीतिंचदोर्भिर्जयतिखलुमहाभैरवःसर्वसिद्ध्यै ॥ ३३ ॥ क्वाकाशःक्वसमीरणः
क्वदहनःक्वापश्चविश्वंभरा क्वब्रह्माक्वजनार्दनःक्वतरणिःक्वेंदुश्चदेवासुराः ॥ कल्पांतेभदिगीशवत्प्रमुदितःश्रीसिद्धयोगीश्वरः क्रीडानाटकनायको
विजयतेदेवोमहाभैरवः ॥ ३४ ॥ लिखित्वापरयाभक्त्याभैरवस्तोत्रमुत्तमम् ॥ अष्टानांब्राह्मणानांचदेयंपुस्तकमादरात् ॥ ३५ ॥ यान्
यान्समीहतेकामांस्तांस्तान्प्राप्नोत्यसंशयम् ॥ इहलोकेसुखंप्राप्यपुस्तकस्यप्रसादतः ॥ ३६ ॥ शिवलोकमनुप्राप्यशिवेनसहमोदते ॥ लिखि
त्वाभूर्जपत्रेतुत्रिलोहपरिवेष्टितम् ॥ ३७ ॥ सौम्येचवस्तुवसनेकर्पटेचसुशोभने ॥ करेबाहौगलेकट्यांमूर्ध्नित्रिलोहगोपितम् ॥ यस्तुधारयतेस्तोत्रं
सर्वत्रजयमाप्नुयात् ॥ ३८ ॥ इति श्रीरुद्रयामलतंत्रे देवीश्वरसम्वादे आपदुद्धारकश्रीवटुकभैरवाष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥
अथ वटुकभैरवाष्टोत्तरशतनामस्तोत्रम् (कालसंकर्षणतंत्रे) ॐ अस्य श्रीवटुकभैरवस्तोत्रमंत्रस्य कालाग्निरुद्र ऋषिः । अनुष्टुप्छंदः । आप

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुद्धारकवटुकभैरवो देवता । ह्रीं बीजम् । भैरवीवल्लभः शक्तिः । नीलवर्णो दंडपाणिरिति कीलकम् । समस्तशत्रुदमने समस्तापन्निवारणे स
र्वाभीष्टप्रदाने च विनियोगः ॥ ॐ कालाग्निरुद्रऋषये नमः । शिरसि ॥ १ ॥ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ आपदुद्धारकवटुकभै
रवदेवतायै नमः । हृदये ॥ ३ ॥ ह्रीं बीजाय नमः । गुह्ये ॥ ४ ॥ भैरवीवल्लभशक्तये नमः । पादयोः ॥ ५ ॥ नीलवर्णो दंडपाणे
रिति कीलकाय नमः नाभौ ॥ ६ ॥ विनियोगाय नमः सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ अथ मूलमंत्रः ॥ "ॐ ह्रीं वां वटु
काय क्ष्रौं क्ष्रौं आपदुद्धारणाय कुरुकुरु वटुकाय ह्रां वटुकाय स्वाहा ॥ " इति मूलमंत्रः ॥ अथ ध्यानम् ॥ नीलजीमूतसंकाशो
जटिलो रक्तलोचनः ॥ दंष्ट्राकरालवदनः सर्वयज्ञोपवीतिवान् ॥ १ ॥ दंष्ट्रायुधालंकृतश्च कपालस्रग्विभूषितः ॥ हस्तन्यस्तकिरीटीको
भस्मभूषितविग्रहः ॥ २ ॥ नागराजकटीसूत्रो बालमूर्तिर्दिगंबरः ॥ मंजुसिंजानमंजीरपादकंपितभूतलः ॥ ३ ॥ भूतप्रेतपिशाचैश्च सर्व
तः परिवारितः ॥ योगिनीचक्रमध्यस्थो मातृमंडलवेष्टितः ॥ ४ ॥ अट्टहासस्फुरद्वक्त्रो भृकुटीभीषणाननः ॥ भक्तसंरक्षणार्थाय दिक्षु
भ्रमणतत्परः ॥ एवंभूतस्तु वटुको ध्यातव्यो भैरवीश्वरः॥५॥एवं ध्यात्वा स्तोत्रं पठेत् ॥ ॐ ह्रीं वटुको वरदः शूरो भैरवः कालभैरवः ॥
भैरवीवल्लभो भव्यो दंडपाणिर्दयानिधिः ॥६॥ वेतालवाहनो रौद्रो रुद्रभ्रुकुटिसंभवः ॥ कपाललोचनः कांतः कामिनीवशकृद्वशी ॥ ७ ॥
आपदुद्धारणो धीरो हरिणांकशिरोमणिः ॥ दंष्ट्राकरालो दष्टौष्ठो धृष्टो दुष्टनिबर्हणः ॥ ८ ॥ सर्पहारः सर्पशिरः सर्पकुंडलमंडितः ॥ क
पाली करुणापूर्णः कपालैकशिरोमणिः ॥ ९ ॥ श्मशानवासी मांसाशी मधुमत्तोट्टहासवान् ॥ वाग्मीवामव्रतोवाग्मीवामदेवप्रियंकरः ॥
॥ १ ०॥वनेचरो रात्रिचरो वसुदो वायुवेगवान् ॥ योगी योगव्रतधरो योगिनीवल्लभो युवा॥ १ १ ॥वीरभद्रो विश्वनाथो विजेता वीरवंदितः ॥

For Private And Personal Use Only

भूताध्यक्षो भूतिधरो भूतभीतिनिवारणः ॥ १२ ॥ कलंकहीनः कंकाली क्रूरः कुक्कुरवाहनः ॥ गाढो गहनगंभीरो गणनाथसहोदरः ॥ ॥ १३ ॥ देवीपुत्रो दिव्यमूर्तिर्दीप्तिमान् दीप्तिलोचनः ॥ महासेनप्रियकरो मान्यो माधवमातुलः ॥ १४ ॥ भद्रकालीपतिर्भद्रो भद्रदो भद्रवाहनः ॥ पशूपहाररसिकः पाशी पशुपतिः पतिः ॥ १५ ॥ चंडः प्रचंडचंडेशश्चंडीहृदयनंदनः ॥ दक्षो दक्षाध्वरहरो दिग्वासा दीर्घलोचनः ॥ १६ ॥ निरातंको निर्विकल्पः कल्पः कल्पांतभैरवः ॥ मदतांडवकृन्मत्तो महादेवप्रियो महान् ॥ १७ ॥ खट्वांगपाणिः खातीतः खरशूलः खरांतकृत् ॥ ब्रह्मांडभेदनो ब्रह्मज्ञानी ब्राह्मणपालकः ॥ १८ ॥ दिक्चरो भूचरो भूष्णुः खचरो खेलनप्रियः ॥ सर्वदुष्टप्रहर्ता च सर्वरोगनिषूदनः ॥ १९ ॥ सर्वकामप्रदः सर्वः सर्वपापनिकृंतनः ॥ इत्थमष्टोत्तरशतं नाम्नां सर्वसमृद्धिदम् ॥ २० ॥ आपदुद्धारजनकं वटुकस्य प्रकीर्तितम् ॥ एतच्च शृणुयान्नित्यं लिखेद्वा स्थापयेद्गृहे ॥ २१ ॥ धारयेद्वा गले बाहौ तस्य सर्वाः समृद्धयः ॥ न तस्य दुरितं किंचिन्न चोरनृपजं भयम् ॥ २२॥ न चापस्मृतिरोगेभ्यो डाकिनीभ्यो भयं नहि ॥ न कूष्मांडग्रहादिभ्यो नापमृत्योर्न च ज्वरात् ॥ २३ ॥ मासमेकं त्रिसंध्यं च शुचिर्भूत्वा पठेन्नरः ॥ सर्वदारिद्र्यनिर्मुक्तो निधिं पश्यति भूतले ॥ २४ ॥ मासद्वयमधीयानः पादुकासिद्धिमान् भवेत् ॥ अंजनं गुटिकाखड्गं धातुवादरसायनम् ॥ २५ ॥ सारस्वतं च वेतालवाहनं बिलसाधनम् ॥ कार्यसिद्धिं महासिद्धिं मंत्रं चैव समीहितम् ॥ २६ ॥ वर्षमात्रमधीयानः प्राप्नुयात्साधकोत्तमः ॥ एतत्ते कथितं देवि गुह्याद्गुह्यतरं परम्॥ २७॥ कालसंकर्षणीतंत्रे कल्मीकल्मषनाशनम् ॥ नरनारीनृपाणां च वशीकरणमंबिके ॥ २८ ॥ इति कालसंकर्षणतंत्रोक्तवटुकाष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे पूर्वखण्डे वटुकभैरवतंत्रे दशमस्तरंगः ॥ १० ॥ ॥ छ ॥

॥ अथ मिश्रस्तरंगप्रारंभः ॥ तत्रादौ क्षेत्रपालमंत्रप्रयोगः॥मंत्रो यथा—"ॐ क्षं क्षेत्रपालाय नमः" इति नवाक्षरो मंत्रः॥अस्य विधानम्॥ अस्य क्षेत्रपालमंत्रस्य ब्रह्मा ऋषिः। गायत्री छंदः। क्षेत्रपालो देवता। क्षं बीजम्। ळः शक्तिः। सर्वेष्टसिद्धये जपे विनियोगः॥ ॐ ब्रह्म ऋषये नमः शिरसि ॥१॥ ॐ गायत्रीछंदसे नमः मुखे ॥२॥ ॐ क्षेत्रपालदेवतायै नमः हृदि ॥ ३ ॥ ॐ क्षंबीजाय नमः गुह्ये॥४॥ ॐळः शक्तये नमः। पादयोः ॥५॥ॐ विनियोगाय नमः सर्वाङ्गे ॥६॥ इति ऋष्यादिन्यासः ॥ ॐ क्षां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ क्षीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ क्षूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ क्षैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ क्षौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ क्षः करतलकरपृष्ठाभ्यां नमः॥ ६ ॥ इति करन्यासः ॥ ॐ क्षां हृदयाय नमः ॥ १ ॥ ॐ क्षीं शिरसे स्वाहा ॥ २ ॥ ॐ क्षूं शिखायै वषट् ॥ ३ ॥ ॐ क्षैं कवचाय हुम् ॥ ४ ॥ ॐ क्षौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ क्षः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ नीलांजनाद्रिनिभमूर्द्धपिशंगकेशं वृत्तोग्रलोचनमुदात्तगदाकपालम् ॥ आशांबरं भुजगभूषणमुग्रदंष्ट्रं क्षेत्रेशमद्भुततनुं प्रणमामि देवम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य "ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः ॥" इति संपूजयेत् ॥ अस्य पीठशक्त्यादेरभावः ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्यावरणपूजां कुर्यात्॥ तद्यथा—षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च "ॐ क्षां हृदयाय नमः। हृदयश्रीपादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षीं शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ क्षूं शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ क्षैं कवचायहुम् ॥ कवचश्रीपा० ॥ ४ ॥ ॐ क्षौं नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ॥५॥ ॐ क्षः अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततो ऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेणान्यादिशः प्रकल्प्य प्राचीक्रमेण ॐ अग्निलाख्याय नमः[1] । अग्निलाख्यश्रीपा० ॥ १ ॥ ॐ अग्निकेशाय नमः । अग्निकेशश्रीपा० ॥ २ ॥ ॐ करालाय नमः करालश्रीपा० ॥ ३ ॥ ॐ घंटारवाय नमः । घंटारवश्रीपा० ॥ ४ ॥ ॐ महाकोपाय नमः । महाकोपश्रीपा० ॥५॥ ॐ पिशिताशनाय नमः पिशिताशनश्रीपा० ॥ ६ ॥ ॐ पिंगलाक्षाय नमः । पिंगलाक्षश्रीपा०

अथ क्षेत्रपालपूजनयन्त्रम्.



१ अग्निलाख्यमग्निकेशं करालं तदनंतरम् ॥ घंटारवमहाकोपं पिशिताशनसंज्ञकम् ॥ पिंगलाक्षमूर्ध्वकेशं पत्रेषु परितो यजेत् ॥

For Private And Personal Use Only

॥ ७ ॥ ॐ ऊर्द्ध्वकेशाय नमः । ऊर्द्ध्वकेशश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ ततः भुपुरे पूर्वादिक्रमेण इन्द्रादीन् दशदिक्पालान् वज्राद्यायुधानि च संपूज्य बलिं च दद्यात् ॥ 'ॐ क्षं क्षेत्रपालाय नमः' इति मंत्रेण माषभक्तबलिं दत्त्वार्धरात्रे पुनर्बलिं दद्यात्॥ अस्य पुरश्चरणं लक्षजपः॥ तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मभोजनं कुर्यात्॥ एवं कृते क्षेत्रपालः प्रसन्नो भवति॥ तथा च "लक्षमेकं जपेन्मंत्रं जुहुयात्तद्दशांशतः॥ चरुणा घृतसिक्तेन ततः क्षेत्रे समर्चयेत॥ १ ॥ बलिनानेन संतुष्टः क्षेत्रपालः प्रयच्छति॥ कांतिमेधाबलारोग्यतेजःपुष्टियशःश्रियः" इति क्षेत्रपालनवाक्षरमंत्रप्रयोगः॥ १ ॥ अथ वरुणमंत्रप्रयोगः ॥ मंत्रो यथा-ॐ ध्रुवासुत्वासक्षितिषु क्षियंतोव्यस्मत्याशु वरुणो मुमोच॥ अवोवन्वाना अदितेरुपस्थायूयंपातस्वास्तिभिःसदानःस्वैः॥ इति त्रिचत्वारिंशदक्षरो वरुणमंत्रः॥ अस्यविधानम् ॥ अस्य वरुणमंत्रस्य वशिष्ठ ऋषिः। त्रिष्टुप्छंदः। वरुणो देवता। सर्वेष्टसिद्धये जपे विनियोगः।। ॐ वशिष्ठऋषये नमः शिरसि॥ १ ॥ त्रिष्टुप्छंदसे नमः मुखे ॥ २ ॥ वरुणदेवतायै नमःहृदि ॥ ३॥ विनियोगाय नमः सर्वांगे॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ ध्रुवासुत्वासक्षितिषु इत्यंगुष्ठाभ्यां नमः॥ १॥ क्षियंतोव्य स्मत्याशु इति तर्जनीभ्यां नमः॥ २॥ वरुणो मुमोच इति मध्यमाभ्यां नमः ॥ ३॥ अवोवन्वाना अदिते इति अनामिकाभ्यां नमः ॥ ४॥ रुपस्थायूयंपात इति कनिष्ठिकाभ्यां नमः ॥ ५॥ स्वस्तिभिः सदानःस्वः इति करतलकरपृष्ठाभ्यां नमः ॥ ६॥ इति करन्यासः ॥ ॐ ध्रुवासुत्वासक्षितिषु हृदयाय नमः ॥ १ ॥ क्षियंतो व्यस्मत्याशु शिरसे स्वाहा ॥ २॥ वरुणो मुमोच शिखायै वषट्॥ ३॥ अवोवन्वाना अदितेः कवचायहुम् ॥ ४ ॥ रुपस्थायूयंपात नेत्रत्रयाय वौषट् ॥ ५ ॥ स्वस्तिभिः सदानः स्वः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ ध्रुं नमः दक्षपादांगुल्यग्रे ॥ १॥ ॐ वां नमः दक्षपादांगुलिमूले ॥ २॥ ॐ सुं नमः । दक्षगुल्फे॥ ३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ त्वां नमः । दक्षजानुनि ॥ ४ ॥ ॐ सं नमः दक्षपादमूले ॥ ५ ॥ ॐ क्षिं नमः । वामपादांगुल्यग्रे ॥ ६ ॥ ॐ तिं नमः वामपादांगुलिमूले ॥ ७ ॥ ॐ षुं नमः । वामगुल्फे ॥ ८ ॥ ॐ क्षिं नमः । वामजानुनि ॥ ९ ॥ ॐ यं नमः । वामपादमूले ॥ १० ॥ ॐ तों नमः गुदे ॥ ११ ॥ ॐ व्यं नमः लिंगे ॥ १२ ॥ ॐ स्मं नमः । आधारे ॥ १३ ॥ ॐ त्यां नमः । नाभौ ॥ १४ ॥ ॐ शुं नमः । दक्षिणकुक्षौ ॥ १५ ॥ ॐ वं नमः । वामकुक्षौ ॥ १६ ॥ ॐ रुं नमः । पृष्ठे ॥ १७ ॥ ॐ णों नमः । हृदि ॥ १८ ॥ ॐ मुं नमः । दक्षिणस्तने ॥ १९ ॥ ॐ मों नमः । वामस्तने ॥ २० ॥ ॐ चं नमः । गले ॥ २१ ॥ ॐ अं नमः । दक्षिणहस्तांगुल्यग्रे ॥ २२ ॥ ॐ वों नमः । दक्षिणहस्तांगुलिमूले ॥ २३ ॥ ॐ वं नमः । दक्षिणमणिबंधे ॥ २४ ॥ ॐ न्वां नमः । दक्षिणकूर्परे ॥ २५ ॥ ॐ नां नमः । दक्षबाहुमूले ॥ २६ ॥ ॐ अं नमः । बामहस्तांगुल्यग्रे ॥ २७ ॥ ॐ दिं नमः । वामहस्तांगुलिमूले ॥ २८ ॥ ॐ तें नमः । दाममणिबंधे ॥ २९ ॥ ॐ रुं नमः । वामकूर्परे ॥ ३० ॥ ॐ पं नमः । वामबाहुमूले ॥ ३१ ॥ ॐ स्थां नमः । वक्त्रे ॥ ३२ ॥ ॐ यूं नमः । दक्षकपोले ॥ ३३ ॥ ॐ यं नमः । वामकपोले ॥ ३४ ॥ ॐ पां नमः । दक्षिणनासापुटे ॥ ३५ ॥ ॐ तं नमः । वामनासापुटे ॥ ३६ ॥ ॐ स्वं नमः । दक्षिणनेत्रे ॥ ३७ ॥ ॐ स्तिं नमः । वामनेत्रे ॥ ३८ ॥ ॐ भिं नमः । दक्षिणकर्णे ॥ ३९ ॥ ॐ सं नमः । वामकर्णे ॥ ४० ॥ ॐ दां नमः भ्रूमध्ये ॥ ४१ ॥ ॐ नं नमः । मस्तके ॥ ४२ ॥ ॐ स्वं नमः । शिरसि ॥ ४३ ॥ इति मंत्रवर्णन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ चन्द्रप्रभं पंकजसन्निषण्णं पाशांकुशाभीतिवरं दधानम् ॥ मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥ १ ॥ इति ध्यात्वा मानसोपचारैः पूजयेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः । इति संपूजयेत् । अस्य पीठशक्त्यादेरभावः ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां दत्त्वा स्वच्छवस्त्रेण संशोष्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा—षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र ॥ १ ॥ ॐ शिरसे स्वाहा शिरःश्रीपा० ॥ २ ॥ ॐ शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ कवचाय हुम् । कवचश्रीपा० ॥४॥ ॐ नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ॥ ५ ॥ ॐ अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या

अथ वरुणपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समर्पये तुभ्यं प्रथमावरणार्चनम्॥ १ ॥इति पठित्वा पुष्पाजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति प्रथमावरणम्॥ १ ॥ततोऽष्टदलेषु पूज्यपूजक
योरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ शेषाय नमः शेषश्रीपा० ॥ १ ॥ ॐ वासुकये नमः । वासुकिश्रीपा०
॥२॥ ॐ तक्षकाय नमः । तक्षकश्रीपा० ॥ ३ ॥ ॐ कर्कोटकाय नमः कर्कोटकश्रीपा० ॥ ४ ॥ ॐ पद्माय नमः[११] । पद्मश्रीपा० ॥५॥
ॐ महापद्माय[१२] नमः । महापद्मश्रीपा० ॥६॥ ॐ शंखपालाय[१३] नमः ।शंखपालश्रीपा० ॥७॥ ॐ कुलिकाय[१४] नमः । कुलिकश्रीपा० ॥८॥
इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥२॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पां
जलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् । अस्य पुरश्चरणमेकलक्षजपः । तत्तद्दशांशेन होमतर्पण
मार्जनब्राह्मणभोजनं च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति ॥ सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च--"लक्षमेकं जपेन्मंत्रं पा
यसेन दशांशतः ॥ सर्पिःसिक्तेन जुहुयान्मत्री मंत्रस्य सिद्धये ॥ १ ॥ ऋणमुक्त्यै जपेन्मंत्रं प्रत्यहं साष्टकं शतम् ॥ जपेनानेन लभते
महतीमव्ययां श्रियम् ॥ २ ॥ सितेक्षुशकलैर्मंत्री जहुयाद्घृतसंप्लुतैः ॥ चतुर्दिनं दशशतमृणमुक्त्यै महाश्रिये ॥ ३ ॥ समिद्भिर्वेतसोत्था
भिः क्षीराक्ताभिर्दिनत्रयम् ॥ जुहुयाद्वृष्टिसंसिद्ध्यै मंत्रविद्विजितेन्द्रियः ॥ ४ ॥ अनेन विधिना मंत्री सूर्ये शतभिषं गते ॥ चतुःशतं घृत
युतं पायसं जुहुयाद्वशी ॥ ५ ॥ ऋणनाशाय संपत्त्यै वश्यारोग्याभिवृद्धये ॥ भृगुवारे कृतो होमः पायसेन ससर्पिषा ॥ ६ ॥ महतीं
संपदं कुर्यान्नाशयेत्सकलापदः ॥ शालिभिर्घृतसंसिक्तैः सरिदंतरितः सुधीः ॥७ ॥ त्र्यहं चतुःशतं हुत्वा स्तंभयेत्परसैन्यकम् ॥ सायं प्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यङ्मुखो वह्निमाराध्य प्रजपेमन्मनुम् ॥ ८ ॥ चतुःशतं विमुच्येत मंत्री सर्वैरुपद्रवैः ॥ मंत्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः ॥९॥ सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये ॥ बहुना किमिहोक्तेन मंत्रणानेन साधकः ॥ साधयेत्सकलान्कामाञ्जपहोमादितत्परः ॥ १० ॥ इति वरुणत्रिचत्वारिंशदक्षरमंत्रप्रयोगः ॥ अथ कामदेवबीजमंत्रप्रयोगः ॥ बीजं यथा--क्लीं इत्येकाक्षरो बीजमंत्रः ॥ अस्य विधानम् ॥ ॐ कामबीजमंत्रस्य संमोहन ऋषिः । गायत्री छंदः । सर्वसम्मोहनमकरध्वजो देवता । सर्वसंमोहने विनियोगः ॥ ॐ संमोहनऋषये नमः । शिरसि ॥ १ ॥ गायत्रीछंदसे नमः । मुखे ॥ २ ॥ सर्वसंमोहनमकरध्वजदेवतायै नमः । हृदि ॥ ३ ॥ विनियोगाय नमः । सर्वाङ्गे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ क्लां अंगुष्ठाभ्यां नमः ॥ १॥ ॐ क्लीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ क्लूं मध्यमाभ्यां नमः ॥ ३॥ ॐ क्लैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ क्लौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ क्लः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः॥ ॐ क्लां हृदयाय नमः ॥ १ ॥ ॐ क्लीं शिरसे स्वाहा ॥२॥ ॐ क्लूं शिखायै वषट् ॥३॥ ॐ क्लैं कवचाय हुम् ॥ ४ ॥ ॐ क्लौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ क्लः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडङ्गन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् । अथ ध्यानम् ॥ जपारुणं रक्तविभूषणाढ्यं मानध्वजं चारुकृतांगरागम् ॥ करांबुजैरंकुशमिक्षुचापपुष्पास्त्रपाशौ दधतं भजामि ॥ १ ॥ इति ध्यायेत् । ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य "ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः" इति संपूज्य नव पीठशक्तीः पूजयेत् ॥ पूर्वादिक्रमेण ॐ मोहिन्यै नमः ॥ १ ॥ ॐ क्षोभिण्यै नमः ॥ २ ॥ ॐ त्रास्यै नमः ॥३ ॥ ॐ स्तंभिन्यै नमः ॥

१ अन्यस्वरूपो यथा--'क्लीं कामदेवाय नमः' इत्यष्टाक्षरो मंत्रः । अन्यत्सर्वं पूर्ववत् ॥

For Private And Personal Use Only

॥ ४ ॥ ॐ कर्षिण्यै नमः ॥ ५ ॥ ॐ द्राविण्यै नमः ॥ ६ ॥ ॐ आह्लादिन्यै नमः ॥ ७ ॥ ॐ क्लिन्नायै नमः ॥ ८ ॥ मध्ये ॐ क्लेदिन्यै नमः ॥ ९ ॥ इति पूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य "ॐ क्लीं मकरध्वजाय सर्वसंमोहनशक्ताय पद्मासनाय नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वावाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा--पुष्पांजलिमादाय मूलमुच्चार्य "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि मे काम परिवारार्चनाय मे ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दद्यात् ॥ इत्याज्ञां गृहीत्वावरणपूजामारभेत् ॥ षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्येदिक्षु च ॐ क्लां हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ क्लीं शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ क्लूं शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ क्लैं कवचाय हुम् । कवचश्रीपा० ॥ ४ ॥ ॐ क्लौं नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ॥ ५ ॥ ॐ क्लः अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल । भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ तदग्रेषु ॥ ॐ द्रां शोषणाय नमः । शोषणश्रीपा० ॥ १ ॥ ॐ ह्रीं मोहनाय नमः । मोहनश्रीपा० ॥ २ ॥ ॐ संदीपनाख्यक्रीडाय नमः । संदीपनाख्यक्रीडश्रीपा० ॥ ३ ॥ ॐ ब्लूं तापनाय नमः । तापनश्रीपा० ॥ ४ ॥ ॐ मादनाय नमः । मादनश्रीपा० ॥ ५ ॥ इति पंच बाणान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥

For Private And Personal Use Only

इति द्वितीयावरणम् ॥२ ॥ ततोष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॥ ॐ कामाय नमः[१२] । कामश्रीपा० ॥ १ ॥ ॐ भस्मशरीराय नमः[१३] । भस्मशरीरश्रीपा० ॥ २ ॥ ॐ अनंगाय नमः[१४] । अनंगश्रीपा० ॥ ३ ॥ ॐ मन्मथाय नमः[१५] । मन्मथश्रीपा० ॥४॥ ॐ वसंतसखाय नमः[१६] । वसन्तसखश्रीपा० ॥ ५ ॥ ॐ स्मराय नमः[१७] । स्मरश्रीपा० ॥६॥ ॐ इक्षुधनुर्धराय नमः[१८] । इक्षुधनुर्धरश्रीपा० ॥ ७ ॥ ॐ पुष्पबाणाय नमः[१९] । पुष्पबाणश्रीपा० ॥ ८ ॥ इत्यष्टौ नामभिः पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततोष्टदलाग्रेषु वामावर्तेन ॐ अनंगरूपायै नमः[२०] । अनंगरूपाश्रीपा० ॥ १ ॥ ॐ अनंगमदनायै नमः[२१] । अनंगमदनाश्रीपा० ॥ २ ॥ ॐ अनंगमन्मथायै नमः[२२] । अनंगमन्मथाश्रीपा० ॥ ३ ॥ ॐ अनंगकुसुमायै नमः[२३] । अनंगकुसुमाश्रीपा० ॥ ४ ॥ ॐ अनंगकुसुमातुरायै नमः[२४] । अनंगकुसुमातुराश्रीपा० ॥ ५ ॥ ॐ अनंगशिशिरायै नमः[२५] । अनंगशिशिराश्रीपा० ॥ ६ ॥ ॐ अनंगमेखलायै नमः[२६] । अनंगमेखलाश्रीपा० ॥ ७ ॥ ॐ अनंगदीपकायै नमः[२७] । अनंगदीपकाश्रीपा० ॥ ८ ॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः षोडशदले प्राचीक्रमेण वामावर्तेन च ॐ युवत्यै नमः[२८] । युवतीश्रीपा० ॥ १ ॥ ॐ विप्रलंभायै नमः[२९] । विप्रलंभाश्रीपा० ॥ २ ॥ ॐ ज्योत्स्नायै नमः[३०] । ज्योत्स्नाश्रीपा० ॥ ३ ॥ ॐ सुभ्रुवे नमः[३१] । सुभ्रूश्रीपा० ॥ ४ ॥ ॐ मदद्रवायै नमः[३२] । मदद्रवाश्रीपा० ॥ ५ ॥ ॐ सुरतायै नमः[३३] । सुरताश्रीपा० ॥ ६ ॥ ॐ वारुण्यै नमः[३४] वारुणीश्रीपा० ॥ ७ ॥ ॐ लोलायै नमः[३५] लोलाश्रीपा० ॥ ८ ॥ ॐ कांत्यै नमः[३६] । कांतिश्रीपा० ॥ ९ ॥ ॐ सौदामिन्यै नमः[३७]।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौदामिनीश्रीपा० ॥१०॥ ॐ कामच्छत्रायै नमः । कामच्छत्राश्रीपा० ॥११॥ ॐ चन्द्रलेखायै नमः । चन्द्रलेखाश्रीपा० ॥१२॥ ॐ शुक्त्यै नमः । शुक्तिश्रीपा० ॥ १३ ॥ ॐ मदनायै नमः । मदनाश्रीपा० ॥ १४ ॥ ॐ योन्यै नमः । योनिश्रीपा० ॥ १५ ॥ ॐ मायावत्यै नमः । मायावतीश्रीपा० ॥ १६ ॥ इति संपूज्य पुष्पांजलिं च दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततः षोडशदशदलाग्रेषु ॐ शोकाय नमः । शोकश्रीपा० ॥ १ ॥ ॐ मोहाय नमः । मोहश्रीपा० ॥ २ ॥ ॐ विलासाय नमः । विलासश्रीपा० ॥ ३ ॥ ॐ विभ्रमाय नमः विभ्रमश्रीपा० ॥ ४ ॥ ॐ मदनातुराय नमः । मदनातुरश्रीपा० ॥ ५ ॥ ॐ अपजयाय नमः । अपजयश्रीपा० ॥ ६ ॥ ॐ युवाकामाय नमः । युवाकामश्रीपा० ॥ ७ ॥ ॐ चूतपुष्पाय नमः । चूतपुष्पश्रीपा० ॥ ८ ॥ ॐ रतिप्रियाय नमः । रतिप्रियश्रीपा० ॥ ९ ॥ ॐ ग्रीष्मांतकराय नमः । ग्रीष्मांतकरश्रीपा० ॥ १० ॥ ॐ ऊर्ज्योन्याय नमः । ऊर्ज्योन्यश्रीपा० ॥ ११ ॥ ॐ हेमंते शिशिरोन्मदाय नमः । हेमंते शिशिरोन्मदश्रीपा० ॥१२॥ ॐ इक्षुचापधराय नमः । इक्षुचापधरश्रीपा० ॥१३॥ ॐ पुष्पबाणहस्ताय नमः । पुष्पबाणहस्तश्रीपा० ॥ १४ ॥ ॐ रक्तभूषाय नमः । रक्तभूषश्रीपा० ॥ १५ ॥ ॐ वनितासक्तमानसाय नमः । वनितासक्तमानसश्रीपा० ॥ १६ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततोऽष्टदले प्राच्यादिचतुर्दिक्षु ॐ हावाय नमः । हावश्रीपा० ॥ १ ॥ ॐ भावाय नमः । भावश्रीपा० ॥ २ ॥ ॐ कटाक्षाय नमः । कटाक्षश्रीपा० ॥ ३ ॥ ॐ भ्रूविलासाय नमः । भ्रूविलासश्रीपा० ॥ ४ ॥ आग्नेय्यादिचतुष्कोणेषु ॐ माधव्यै नमः । माधवीश्रीपा० ॥ ५ ॥ ॐ मालत्यै

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कामदेवपूजनयन्त्रम्.



For Private And Personal Use Only



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः । मालतीश्रीपा० ॥ ६ ॥ ॐ धरिणाख्यै नमः । धरिणाखीश्रीपा० ॥ ७ ॥ ॐ मदोत्कटायै नमः । मदोत्कटाश्रीपा० ॥ ८ ॥
इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च
संपूज्य पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य पुष्पांजल्यष्टकं दद्यात् ॥तत्र मंत्रः--"ॐ नमोस्तु पुष्पबाणा
य जगदानंदकारिणे ॥ मन्मथाय जगन्नेत्ररतिप्रीतिप्रदायिने ॥ १ ॥" इति पुष्पांजल्यष्टकं दत्त्वा करौ बद्ध्वा प्रार्थयेत् ॥ तत्र मंत्रः—"ॐ
देवदेव जगन्नाथ वांछितार्थप्रदायक ॥ कृत्स्नान्पूरय मे त्वर्थान्कामान्कामेश्वरीप्रिय ॥ १ ॥" इति संप्रार्थ्य जपं कुर्यात् ॥ अस्य पुरश्च
रणं त्रिलक्षजपः ॥ तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान्
साधयेत् ॥ तथा च--"लक्षत्रयं जपेन्मंत्रं मधुरत्रयसंयुतैः ॥ पुष्पैः किंशुकजैः फुल्लैर्हुत्वा तत्तद्दशांशतः ॥ १ ॥ इत्थं यो भजते देवं
सुगंधिकुसुमादिभिः ॥ स भवेल्लब्धसौभाग्यो लक्ष्म्या जितधनेश्वरः ॥ २ ॥ अशोकपुष्पैर्दध्यक्तैर्जुहुयाद्दिवसत्रयम् ॥ अष्टोत्तरसहस्रं यः स
भवेज्जगतां प्रियः ॥ ३ ॥ गव्येनाज्येन जुहुयान्मंत्रेणाष्टोत्तरं शतम् ॥ साधकेन्द्रसंपातमर्चिते हव्यवाहने ॥ ४ ॥ संपाताज्येन वनि
ता भोजयेदात्मनः पतिम् ॥ अनया यद्यदादिष्टं तत्तत्स कुरुते सदा ॥ ५ ॥ कन्यार्थी जुहुयाल्लाजैर्दध्यक्तैर्मंडलांतरे ॥ कन्यामिष्टामवा
प्नोति सापि तत्पतिमाप्नुयात् ॥ ६ ॥ कथितं पुष्पबाणस्य सांगोपांगसमर्चनम् ॥ सौभाग्यकांतिविभवदारापुत्रसमृद्धिदम्
॥ ७ ॥ " अथ कामगायत्रीमंत्रो यथा "ॐ कामदेवाय विद्महे पुष्पबाणाय धीमहि ॥ तन्नोनंगः प्रचोदयात् ॥ "अष्टो
त्तरशतं कामगायत्र्या मंत्रवित्तमः ॥ गायत्र्येषा बुधैरुक्ता जप्या जनविमोहिनी ॥ ८ ॥ इति कामदेवबीजमंत्रप्रयोगः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कुबेरमंत्रप्रयोगः ॥ (मंत्रमहोदधौ ।) मंत्रो यथा--"ॐ यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा" इति पंचत्रिंशदक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य कुबेरमंत्रस्य विश्रवा ऋषिः।बृहतीछंदः। शिवमित्रधनेश्वरो देवता। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ विश्रवऋषये नमः। शिरसि ॥ १ ॥ बृहतीछंदसे नमः। मुखे ॥ २ ॥ शिवमित्रधनेश्वरदेवतायै नमः। हृदि॥ ३॥ विनियोगाय नमः। सर्वांगे ॥ ४॥ इति ऋष्यादिन्यासः ॥ ॐ यक्षाय हृदयाय नमः ॥ १॥ ॐ कुबेराय शिरसे स्वाहा ॥ २ ॥ ॐ वैश्रवणाय शिखायै वषट् ॥ ३ ॥ ॐ धनधान्याधिपतये कवचाय हुम् ॥ ४ ॥ ॐ धनधान्यसमृद्धिं मे नेत्रत्राय वौषट् ॥ ५ ॥ ॐ देहि दापय स्वाहा अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ यक्षायांगुष्ठाभ्यां नमः ॥ १ ॥ ॐ कुबेराय तर्जनीभ्यां नमः ॥ २ ॥ ॐ वैश्रवणाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ धनधान्याधिपतये अनामिकाभ्यां नमः ॥ ४ ॥ ॐ धनधान्यसमृद्धिं मे कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ देहि दापय स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "मनुजवाह्यविमानवरस्थितं गरुडरत्ननिभं निधिनायकम् ॥ शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुंदिलम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः पूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले धर्मादिपरतत्त्वांत पीठदेवताः संस्थाप्य "ॐ धर्मादिपरतत्त्वांतपीठदेवताभ्यो नमः" इति पीठदेवताः संपूज्यास्य पीठशक्त्यादेरभावः ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञयावरणपूजां कुर्यात् ॥ तद्यथा--

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुष्पांजलिमादाय "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि धनद परिवारार्चनाय मे ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इत्याज्ञां गृहीत्वावरणपूजामारभेत् ॥ तद्यथा--षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ यक्षाय हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र ॥ १ ॥ ॐ कुबेराय शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ वैश्रवणाय शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ धनधान्याधिपतये कवचाय हुम् । कवचश्रीपा० ॥ ४ ॥ ॐ धनधान्यसमृद्धिं मे नेत्रत्रयाय वौषट् । नेत्रश्रीपा० ॥ ५ ॥ ॐ देहि दापय स्वाहा अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत॥इति प्रथमावरणम्॥ १ ॥ततो भूपुरे इन्द्रादिदशदिक्पालान

अथ कुबेरपूजनयन्त्रम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षजपः । तिलाज्येन दशांशतो होमः । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । लक्षमेकं जपेन्मत्रं दशांशं जुहुयात्तिलैः ॥ सिद्धे मनौ प्रकुर्वीत प्रयोगानिष्ठ सिद्धये ॥ १ ॥ शिवालये जपेन्मंत्रमयुतं धनवृद्धये ॥ बिल्वमूलोपविष्टेन जप्तो लक्षं धनर्द्धिदः ॥ २ ॥ इति पंचत्रिंशदक्षरकुबेरमंत्रप्रयोगः ॥ अथ षोडशाक्षरकुबेरमंत्रप्रयोगः ॥ मंत्रो यथा--"ॐ श्रीं ॐ ह्रीं श्रीं ह्रीं क्लीं श्रीं क्लीं वित्तेश्वराय नमः ॥" इति षोडशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ ॐ श्रीं हृदयाय नमः ॥ १ ॥ ह्रीं श्रीं शिरसे स्वाहा ॥ २ ॥ ह्रीं क्लीं शिखायै वषट् ॥ ३ ॥ श्रीं क्लीं कवचाय हुम् ॥ ४ ॥ वित्तेश्वराय नेत्रत्रयाय वौषट् ॥ ५ ॥ नमः अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासं कुर्यात् ॥ ऋष्यादिकं ध्यानपूजादिकं च सर्वं पूर्ववत् ॥ तथा च-शोडषाक्षरमंत्रोयं सर्वदारिद्र्यनाशनः ॥ ध्यानार्चनादिकं सर्वमस्य पूर्ववदाचरेत् ॥ १ ॥ इति षोडशाक्षरकुबेरमंत्रप्रयोगः ॥

॥ श्रीगणेशाय नमः ॥ अथ चन्द्रमोमंत्रप्रयोगः ॥ अथ वक्ष्ये चन्द्रमसो मनुः सर्वसमृद्धिदः ॥ अथ षडक्षरचन्द्रमोमंत्रप्रयोगः ॥ मंत्रो यथा—(शारदातिलके) 'सौं सोमाय नमः' इति षडक्षरमंत्रः ॥ अस्य सोममंत्रस्य भृगुर्ऋषिः । पंक्तिश्छंदः । सोमो देवता । सौं बीजम् ॥ नमः शक्तिः । मम सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ भृगुऋषये नमः शिरसि ॥ १ ॥ पंक्तिश्छंदसे नमः । मुखे ॥ २ ॥ सोमदेवतायै नमः । हृदि ॥ ३ ॥ सौं बीजाय नमः । गुह्ये ॥ ४ ॥ नमः शक्तये नमः । पादयोः ॥ ५ ॥ विनियोगाय नमः । सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ सां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ सीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ सूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ सैं अनामिकाभ्यां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः ॥ ४ ॥ ॐ सौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ सः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ सां हृदयाय नमः ॥ १ ॥ ॐ सीं शिरसे स्वाहा ॥ २ ॥ ॐ सूं शिखायै वषट् ॥ ३ ॥ ॐ सैं कवचाय हुम् ॥४॥ सौं नेत्रत्रयाय वौषट्॥ ५ ॥ ॐ सः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुबिंबाननं मुक्तादामविभूषितेन वपुषा निर्मूलयंतं तमः ॥ हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं स्वस्यांकस्थमृगोदिताश्रयगुणं सोमं सुधाब्धिं भजे ॥ १ ॥ इति ध्यात्वा सर्वतोभद्रसोमतोभद्रमंडले वा मं मंडूकादिसोमांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिसोमांतपीठदेवताभ्यो नमः ॥' इति पीठदेवताः संपूज्य तन्मध्ये "ॐ सौं सोमाय रोहिणीपतये नमः" इति संपूज्य रौप्यादिनिर्मितं यंत्रमग्न्युत्तारणपूर्वकं "सौं सर्वशक्तिकमलासनाय नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञां गृहीत्वावरणपूजां कुर्यात् ॥ तत्र क्रमः ॥ षट्कोणकेसरेषु अग्निकोणे । ॐ सां हृदयाय नमः ॥ १ ॥ निर्ऋतिकोणे । ॐ सीं शिरसे स्वाहा ॥ २ ॥ वायव्ये । ॐ सूं शिखायै वषट् ॥ ३ ॥ ऐशान्ये । ॐ सैं कवचाय हुम् ॥ ४ ॥ पूज्यपूजकयोर्मध्ये ॐ सौं नेत्रत्रयाय वौषट् ॥ ५ ॥ देवतापश्चिमे । ॐ सः अस्त्राय फट् ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोर्मध्ये प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वामावर्तेन च । ॐ रोहिण्यै नमः । रोहिणीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ कृत्तिकायै नमः । कृत्तिकाश्रीपा० ॥ २ ॥ ॐ रेवत्यै नमः । रेवतीश्रीपा० ॥ ३ ॥ ॐ भरण्यै नमः । भरणीश्रीपा० ॥ ४ ॥ ॐ रात्र्यै नमः । रात्रिश्रीपा० ॥ ५ ॥ ॐ आर्द्रायै नमः । आर्द्राश्रीपा० ॥ ६ ॥ ॐ ज्योत्स्नायै नमः । ज्योत्स्नाश्रीपा० ॥ ७ ॥ ॐ कलायै नमः । कलाश्रीपा० ॥ ८ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलाग्रेषु ॐ आं आदित्याय नमः । आदित्यश्रीपा० ॥ १ ॥ ॐ भौं भौमाय नमः । भौमश्रीपा० ॥ २ ॥ ॐ बुं बुधाय नमः । बुधश्रीपा० ॥ ३ ॥ ॐ शं शनैश्वराय नमः । शनैश्वरश्रीपा० ॥ ४ ॥ ॐ बृं बृहस्पतये नमः । बृहस्पतिश्रीपा० ॥ ५ ॥ ॐ रां राहवे नमः । राहुश्रीपा० ॥ ६ ॥ ॐ शुं शुक्राय नमः । शुक्रश्रीपा० ॥ ७ ॥ ॐ कें केतवे नमः । केतुश्रीपा० ॥ ८ ॥ इत्यष्टौ ग्रहान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्

अथ चंद्रपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेण । ॐ लं इन्द्राय नमः[२३]।इन्द्रश्रीपा० ॥ १ ॥ ॐ रं अग्नये नमः[२४]।अग्निश्रीपा० ॥ २ ॥ ॐ मं यमाय नमः[२५]।यमश्रीपा० ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः[२६]। निर्ऋतिश्रीपा० ॥ ४ ॥ ॐ वं वरुणाय नमः[२७]।वरुणश्रीपा० ॥ ५ ॥ ॐ यं वायवे नमः[२८]।वायुश्रीपा० ॥ ६ ॥ ॐ कुं कुबेराय नमः[२९]।कुबेरश्रीपा० ॥ ७ ॥ ॐ हं ईशानाय नमः[३०] । ईशानश्रीपा० ॥ ८ ॥ इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः[३१] । ब्रह्मश्रीपा० ॥ ९ ॥ वरुणनिर्ऋत्योर्मध्ये ॐ ह्रीं अनंताय नमः[३२] । अनंतश्रीपा० ॥ १० ॥ इति दिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ तद्बाह्ये ॐ वं वज्राय नमः[३३] ॥ १ ॥ ॐ शं शक्तये नमः[३४] ॥ २ ॥ ॐ दं दंडाय नमः[३५] ॥ ३ ॥ ॐ खं खड्गाय नमः[३६] ॥ ४ ॥ ॐ पं पाशाय नमः[३७] ॥ ५ ॥ ॐ अं अंकुशाय नमः[३८] ॥ ६ ॥ ॐ गं गदायै नमः[३९] ॥ ७ ॥ ॐ त्रिं त्रिशूलाय नमः[४०] ॥ ८ ॥ ॐ पं पद्माय नमः[४१] ॥ ९ ॥ ॐ चं चक्राय नमः[४२] ॥ १० ॥ इत्यस्त्राणि पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं षड्लक्षजपः । षट्सहस्रहोमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च ॥ "रसलक्षं जपेन्मंत्रं साधको विजितेन्द्रियः ॥ तत्सहस्रं प्रजुहुयात्पायसेन ससर्पिषा ॥ १ ॥ सोमांतं पूजिते पीठे पूजयेद्रोहिणीपतिम् ॥ एवं सिद्धमनुर्मंत्री संपदां वसतिर्भवेत् ॥ २ ॥ हृत्पुंडरीकमध्यस्थं ताराहारविभूषणम् ॥ तारापतिं स्मरन्मंत्री त्रिसहस्रं मनुं जपेत् ॥ ३ ॥ राज्यैश्वर्यं दरिद्रोपि प्राप्नुयाद्वत्सरांतरे ॥ पूर्वोक्तसंख्यं प्रजपेच्छशिनं मूर्ध्नि चिंतयेत् ॥ ४ ॥ रोगापमृत्युदुःखानि जित्वा वर्षशतं वसेत् ॥ ब्रह्मचर्यरतः शुद्धश्चतुर्लक्षमिदं जपन् ॥ ५ ॥ निधानं भूगतं सद्यः प्राप्नुयाद्यत्नवर्जितम् ॥ जितेंद्रियो जपेन्मंत्रं पूर्णिमायां विशेषतः ॥ ६ ॥ भवेत्सौभाग्यनिलयः संपदामपरो निधिः ॥ घोराञ्ज्वरान् शिरोरोगानभिचारानुपद्रवान् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्विषामपि संघातं नाशयेन्मनुनाऽमुना ॥ पौर्णमास्यां निराहारो दद्यादर्घ्यं विधूदये॥८॥ प्राकृत्यगायतं कर्याद्रतले मंडलत्रयम् ॥ निषण्णः पश्चिमे मंत्री मंडले विहितासने ॥ ९ ॥ मध्यस्थे स्थापयेत्पश्चात्पूजाद्रव्याण्यशेषतः ॥ अस्मिन्हि मंडले सोममर्चयित्वांबुजान्विते ॥ १० ॥ राजतं चषकं भद्रं स्थापयेत्पुरतः सुधीः ॥ गोदुग्धेन समापूर्य स्पृष्ट्वा तं प्रजपेन्मनुम् ॥ ११ ॥ अष्टोत्तरशतं पश्चाद्विद्यामंत्रेण देशिकः ॥ दद्यादर्घ्यं शशांकाय सर्वकामार्थसिद्धये ॥ १२ ॥ अनेन विधिना कर्वन्प्रतिमासमतंद्रितः ॥ षण्मासाभ्यंतरे सिद्धिं साधकेंद्रः समश्नुते ॥ १३ ॥ श्रियमत्यूर्जितांपुत्रान्सौभाग्यं विपुलं यशः ॥ कन्यामिष्टामवाप्नोति कन्यापि वरमीप्सितम् ॥ १४ ॥ बहुना किमिहोक्तेन सर्वं दद्यान्निशापतिः ॥" इति षडक्षरचन्द्रमोमंत्रप्रयोगः ॥ अथ चन्द्रमस्स्तोत्रम् ॥ "ॐ श्वेताम्बरः श्वेतवपुः किरीटी श्वेतद्युति दंडधरो द्विबाहुः ॥ चन्द्रोमृतात्मा वरदः शुशांकः श्रेयांसि मह्यं प्रददातु देवः ॥ १ ॥ दधिशंखतुषाराभं क्षीरोदर्णवसंभवम् ॥ नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् ॥ २ ॥ क्षीरसिन्धुसमुत्पन्नो रोहिणीसहितः प्रभुः ॥ हरस्य मुकुटावास बालचन्द्र नमोस्तु ते ॥ ३ ॥ सुधामया यत्किरणाः पोषयंत्योषधीवनम् ॥ सर्वान्नरसहेतुं तं नमामि सिंधुनन्दनम् ॥ ४ ॥ राकेशं तारकेशं च रोहिणी प्रियसुन्दरम् ॥ ध्यायतां सर्वदोषघ्नं नमामीन्दुं मुहुर्मुहुः ॥ ५ ॥ इति चन्द्रमस्स्तोत्रं संपूर्णम् ॥ अथ धनपुत्रादिप्रदमंगलमंत्रविधानम् ॥ (मंत्रमहोदधौ) ॥ मंत्रो यथा--"ॐ हाँ हंसः खं खः" इति षडक्षरो मन्त्रः । अस्य विधानम् ॥ मार्गशीर्षे वैशाखे वा शुक्लपक्षे चंद्रतारादिबलान्विते भौमवासरे व्रतं प्रगृह्य वक्ष्यमाणविधिना संवत्सरपर्यंतं कार्यम् ॥ तद्यथा--मंगलवारे अरुणोदयवेला

१-घिंघिविद्यामालिनिचंद्रिणिचंद्रमुखिस्वाहेति विद्यामंत्रः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यामुत्थाय शौचविधिं विधाय अपामार्गकाष्ठेन मौनधारणपूर्वकं दंतधावनं कृत्वा नद्यादौ गृहे वा यथाविधि स्नात्वा रक्तवाससी परिधाय नित्य कर्म समाप्य शिवालये स्वगृहे वा रक्तगोमयलिप्तमंडले स्वासने प्राङ्मुख उदङ्मुखो वा उपविश्य दक्षिणपार्श्वे रक्तचंदनरक्तपुष्पादीनि सं पाद्य सपवित्रकर आचम्य मूलेन प्राणानायम्य देशकालौ स्मृत्वा मम जन्मराशेः सकाशान्नामराशेः सकाशाज्जन्मलग्नाद्वर्षलग्नाद्वा गोचरा च्चतुर्थाष्टमादित्याद्यनिष्टस्थानस्थितभौमसर्वानिष्टफलनिवृत्तिपूर्वकतृतीयैकादशशुभस्थानस्थितवदुत्तमफलावाप्त्यर्थं आयुरारोग्यवृद्ध्यर्थमृण च्छेदार्थममुकरोगविनाशार्थं वा पुत्रप्राप्त्यर्थं श्रीमंगलदेवताप्रसन्नतार्थं भौमव्रतं करिष्ये॥ तदंगत्वेन न्यासध्यानपूजार्घ्यदानादि च करिष्ये। इति संकल्प्य कर्ता स्वदेहे न्यासान् कुर्यात्॥ तद्यथा—अस्य मंत्रस्य विरूपाक्ष ऋषिः। गायत्री छंदः। धरात्मजो भौमो देवता। हां बीजम्॥ हंसः शक्तिः। सर्वेष्टसिद्धये जपे विनियोगः॥ ॐ विरूपाक्षऋषये नमः सिरशि १ गायत्रीछंदसे नमः मुखे २ धरात्मजभौमदेवतायै नमः हृदि ३ हां बीजाय नमः गुह्ये ४ हंसः शक्तये नमः पादयोः ५ विनियोगाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः॥ ॐॐ भौमाय अंगुष्ठाभ्यां नमः १ ॐ हां भौमाय तर्जनीभ्यां नमः २ ॐ हं भौमाय मध्यमाभ्यां नमः ३ ॐ सः भौमाय अनामिकाभ्यां नमः ४ ॐ खं भौमाय कनिष्ठिकाभ्यां नमः ५ ॐ खः भौमाय करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः॥ ॐॐ भौमाय हृदयाय नमः १ ॐ हां भौमाय शिरसे स्वाहा २ ॐ हं भौमाय शिखायै वषट् ३ ॐ सः भौमाय कवचाय हुम् ४ ॐ खं भौमाय नेत्रत्रयाय वौषट् ५ ॐ खः भौमाय अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः॥ ॐ मंगलाय नमः अंघ्र्योः १ ॐ भूमिपुत्राय नमः जानुनोः २ ॐ ऋणहर्त्रे नमः ऊर्वोः ३ ॐ धनप्रदाय नमः कट्याम् ४ ॐ स्थिरासनाय नमः गुह्ये ५ ॐ महाकायाय नमः उर

For Private And Personal Use Only

सि ६ ॐ सर्वकर्मावरोधकाय नमः वामबाहौ ७ ॐ लोहिताय नमः दक्षिणबाहौ ८ ॐ लोहिताक्षाय नमः गले ९ ॐ सामगानां कृपाकराय नमः वदने १० ॐ धरात्मजाय नमः अंसयोः ११ ॐ कुजाय नमः नेत्रयोः १२ ॐ भौमाय नमः ललाटे १३ ॐ भूतिदाय नमः भ्रुवोः १४ ॐ भूमिनंदनाय नमः मस्तके १५ ॐ अंगारकाय नमः शिखायाम् १६ ॐ यमाय नमः सर्वांगे १७ ॐ सर्वरोगप्रहारिणे नमः मूर्धादिहस्तांतम् १८ ॐ वृष्टिकर्त्रे नमः मूर्धादिपादांतम् १९ ॐ वृष्टिहर्त्रे नमः पादादिमूर्द्धांतम् २० ॐ सर्वरोगापहारकाय नमः दशदिक्षु च २१ ॐ अंगारकाय नमः नाभौ २२ ॐ वक्राय नमः वक्षसि २३ ॐ भूमिनंदनाय नमः मूर्ध्नि२४इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "जपाभं शिवस्वेदजं हस्तपद्मैर्गदा शूलशक्ती करे धारयंतम् ॥ अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य ताम्रार्घ्यं पद्धतिमार्गेण संस्थाप्य पीठपूजादिकं कुर्यात् ॥ तद्यथा--पीठादौ रचिते सर्वतोभद्रमंडले लिंगतोभद्रमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य " ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः " इति संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा--पूर्वादिक्रमेण ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरण्यै नमः ॥ ५ ॥ ॐ बलविकरण्यै नमः ॥ ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ मध्ये । ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णपत्रे ताम्रपत्रे वा एकविंशतित्रिकोणात्मकं यंत्रं रक्तचंदननिर्मितां प्रतिमां वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य "ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय भूमिपुत्राय योगपीठात्मने नमः।'इति मंत्रेण पुष्पाद्यासनं दत्त्वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पीठमध्ये संस्थाप्य प्राणस्थापनं कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य "ॐ अंगारकाय विद्महे शक्तिहस्ताय धीमहि॥तन्नो भौमः प्रचोदयात्" इति भौमगायत्र्या आवाहनादिरक्तगंधाक्षतरक्तपुष्पांतैरुपचारैः संपूजा आवरणपूजां कुर्यात् ॥ तद्यथा--यंत्रे अग्न्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ ॐ भौमाय हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ हाँ भौमाय शिरसे स्वाहा । शिरः श्रीपा० ॥२॥ ॐ हं भौमाय शिखायै वषट् । शिखाश्रीपा० ॥३॥ ॐ सः भौमाय कवचाय हुम् । कवचश्रीपा०॥४॥ ॐ खं भौमाय नेत्रत्रयाय वौषट् । नेत्रत्रय श्रीपा० ॥ ५ ॥ ॐ खः भौमाय अस्त्राय फट् । अस्त्रश्रीपा० ॥६॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्" ॥१॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततो यंत्रे पूज्यपूजकयोरंतराले प्राचीं तदनुसारेणान्या दिशः प्रकल्प्य प्राचीक्रमेण दक्षिणावर्तेन च ॐ मंगलाय नमः । मंगलश्रीपा० ॥ १ ॥ ॐ भूमिपुत्राय नमः । भूमिपुत्रश्रीपा० ॥ २ ॥ ॐ ऋणहर्त्रे नमः । ऋणहर्तृश्रीपा० ॥३॥ ॐ धनप्रदाय नमः । धनप्रदश्रीपा० ॥ ४ ॥ ॐ स्थिरासनाय नमः । स्थिरासनश्रीपा० ॥ ५ ॥ ॐ महाकायाय नमः । महाकायश्रीपा० ॥६॥ ॐ सर्वकर्मावरोधकाय नमः । सर्वकर्मावरोधकश्रीपा० ॥ ॥ ७ ॥ ॐ लोहिताय नमः । लोहितश्रीपा० ॥ ८ ॥ ॐ लोहिताक्षाय नमः । लोहिताक्षश्रीपा० ॥ ९ ॥ ॐ सामगानां कृपाकराय नमः । सामगानां कृपाकरश्रीपा० ॥ १० ॥ ॐ धरात्मजाय नमः । धरात्मजश्रीपा० ॥ ११ ॥ ॐ कुजाय नमः । कुजश्रीपा०॥ ॥ १२ ॥ ॐ भौमाय नमः । भौमश्रीपा० ॥ १३ ॥ ॐ भूतिदाय नमः । भूतिदश्रीपा० ॥ १४ ॥ ॐ भूमिनंदनाय नमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमिनंदनश्रीपा० ॥ १५ ॥ ॐ अंगारकाय नमः[२२] । अंगारकश्रीपा०
॥ १६ ॥ ॐ यमाय नमः[२३] । यमश्रीपा० ॥ १७ ॥ ॐ सर्वरोगप्रहारिणे
नमः[२४] । सर्वरोगप्रहारिश्रीपा० ॥ १८ ॥ ॐ सर्ववृष्टिकर्त्रे नमः[२५] । सर्ववृष्टि
कर्तृश्रीपा० ॥ १९ ॥ ॐ वृष्टिहर्त्रे नमः[२६] । वृष्टिहर्तृश्रीपा० ॥ २० ॥
ॐ सर्वरोगापहारकाय नमः[२७] । सर्वरोगापहारकश्रीपा० ॥ २१ ॥
इत्येकविंशतिनामभिः प्रत्येककोष्ठे पूजयित्वा पुष्पांजलिं च दद्यात् ॥
इति द्वितीयावरणम् ॥ ततो यंत्रे पूर्वाद्यष्टसु दिक्षु ॐ ब्राह्म्यै नमः[२८] ।
ब्राह्मीश्रीपा० ॥ १ ॥ ॐ माहेश्वर्य्यै नमः[२९] । माहेश्वरीश्रीपा० ॥ २ ॥
ॐ कौमार्य्यै नमः[३०] । कौमारीश्रीपादुकां० ॥ ३ ॥ ॐ वैष्णव्यै नमः[३१] ।
वैष्णवीश्रीपा० ॥ ४ ॥ ॐ वाराह्यै नमः[३२] । वाराहीश्रीपा० ॥ ५ ॥
ॐ इन्द्राण्यै नमः[३३] । इन्द्राणीश्रीपा० ॥ ६ ॥ ॐ चामुंडायै नमः[३४] ।
चामुंडाश्रीपा० ॥ ७ ॥ ॐ महालक्ष्म्यै नमः[३५] । महालक्ष्मीश्रीपा०
॥ ८ ॥ इत्यष्टौ मातृकाः संपूज्य पुष्पांजलिं च दद्यात् । इति

भौमपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृतीयावरणम् ॥ ३ ॥ ततो यंत्रे पूर्वादिक्रमेण ॐ लं इंद्राय नमः ॥ १ ॥ ॐ रं अग्नये नमः ॥ २ ॥ ॐ मं यमाय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ वं वरुणाय नमः ॥ ५ ॥ ॐ यं वायवे नमः ॥ ६ ॥ ॐ कुं कुबेराय नमः॥७॥ ॐ हं ईशानाय नमः ॥८॥ पूर्वेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः ॥ ९ ॥ वरुणनिर्ऋत्योर्मध्ये ॐ ह्रीं अनंताय नमः ॥ १० ॥इति दशदिक्पालान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः पूर्वादिक्रमेण इन्द्रादिसमीपे ॐ वं वज्राय नमः ॥ १ ॥ ॐ शं शक्तये नमः ॥ २ ॥ ॐ दं दंडाय नमः ॥ ३ ॥ ॐ खं खड्गाय नमः ॥ ४ ॥ ॐ पं पाशाय नमः ॥ ५ ॥ ॐ अं अंकुशाय नमः ॥ ६ ॥ ॐ गं गदायै नमः ॥ ७ ॥ ॐ त्रिं त्रिशूलाय नमः ॥ ८ ॥ ॐ पं पद्माय नमः ॥ ९ ॥ ॐ चं चक्राय नमः ॥ १० इत्यस्त्राणि संपूज्य पुष्पांजलिं च दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ इत्यावरणपूजां कृत्वा धूपदीपगोधूमान्ननैवेद्यतांबूलदक्षिणानीराजनादिभिः संपूज्य अर्घ्यं दद्यात् ॥ तद्यथा—जलपूर्णे ताम्रपात्रे गंधपुष्पाक्षतफलानि च निःक्षिप्य जानुभ्यामवनीं गत्वा । "ॐ भूमिपुत्र महातेजः स्वेदोद्भव पिनाकिनः ॥ सुतार्थिनी प्रपन्ना त्वां गृहाणार्घ्यं नमोऽस्तु ते ॥ १ ॥ रक्तप्रवालसंकाश जपाकुसुमसन्निभ ॥ महीसुत महाबाहो गृहाणार्घ्यं नमोऽस्तु ते ॥ २ ॥" इति मंत्रद्वयेनार्घ्यं दत्त्वा पूर्वोक्तैरेकविंशतिनामभिस्तावत्यः प्रदक्षिणाः कृत्वा साष्टांगं प्रणम्य यथासंख्यं मूलमंत्रं जप्त्वा रेखामार्जनं कुर्यात् ॥ तद्यथा—खदिरांगारकेण रेखात्रयं समं कृत्वा ततः "दुःखदौर्भाग्यनाशाय पुत्रसंतानहेतवे ॥ कृतरेखात्रयं वामपादेनैतत्प्रमार्ज्म्यहम् ॥ १ ॥ ऋणदुःखविनाशाय मनोऽभीष्टार्थसिद्धये ॥ मार्जयाम्यसिता रेखास्तिस्रो जन्मत्रयोद्भवाः ॥ २ ॥ "इति मंत्रद्वयेन वामपादेन मार्जयेत्॥" इति रेखामार्जनं कृत्वा पुष्पांजलिमादाय "ॐ धरणीगर्भ

For Private And Personal Use Only

गर्भसंभूतं विद्युत्तेजःसमप्रभम् ॥ कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् ॥ १ ॥ ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्यनाशिने ॥ नमामि द्योतमानाय सर्वकल्याणकारिणे ॥ २ ॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ सुखं यांति यतस्तस्मै नमो धरणिसूनवे ॥ ३ ॥ यो वक्रगतिमापन्नो नृणां विघ्नं प्रयच्छति ॥ पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः ॥४॥ प्रसादं कुरु मे नाथ मंगलप्रद मंगल ॥ मेषवाहन रुद्रात्मन्पुत्रान्देहि धनं यशः॥५॥" इति संप्रार्थ्य पुष्पांजलिं दद्यात् ॥ ततो ब्राह्मणान्संपूज्य गुरवे दक्षिणां दत्त्वा पूजायां निवेदितान्नं भक्षयेत् ॥ अस्य पुरश्चरणं षड्लक्षजपः ॥ समाप्ते व्रते सर्वतोभद्रमण्डलमध्ये ताम्रकलशं यथाविधि संस्थाप्य तत्र स्वर्णमयीं भौमप्रतिमां संपूज्य तदीशान्यां स्थंडिले अग्निं प्रतिष्ठाप्य आघारावाज्यहोमं कृत्वा मूलमंत्रेणाज्यमिश्रितखदिरसमिद्भिर्दशांशतो जुहुयात् ॥ ततः पूर्णपात्रदानांतं होमशेषं समाप्य स्वर्णमूल्यादिकमाचार्याय दत्त्वा पंचाशद्ब्राह्मणान् गोधमान्नेन भोजयेत्॥ एवं कृते मंत्रः सिद्धो भवति। सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । "रसलक्षजपैर्होमः समिद्भिः खदिरस्य च॥ इत्थं जपादिभिः सिद्धं स्वेष्टसिद्धौ प्रयोजयेत्॥ १ ॥नारी पुत्रमभीप्संती भौमाहे तद्व्रतं चरेत् ॥ मार्गशीर्षेऽथ वैशाखे तस्यारम्भः प्रशस्यते॥ २॥प्रतिभौमदिनं कुर्यादेवं संवत्सरावधिः ॥ तिलैर्विधापयेद्धोमं शतार्द्धं भोजयेद्द्विजान् ॥ ३ ॥ एवं व्रतपरा नारी प्राप्नुयात्सुभगान्सुतान् ॥ धनाप्त्यै ऋणनाशाय व्रतं कुर्यात्पुमानपि ॥ ४ ॥" इति भौमषडक्षरमंत्रप्रयोगः ॥ अथ मंगलस्तोत्रम् ॥ ॐ अस्य श्रीभौमस्तोत्रस्य गर्गऋषिः। मंगलो देवता। त्रिष्टुप्छन्दः। ऋणापहरणे जपे विनियोगः ॥ अथ ध्यानम् ॥ "रक्ताम्बरो रक्तवपुः किरीटी चतुर्मुखो मेघगदो गदाधृक् ॥ धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः ॥ १ ॥ ॐ मंगलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ॥ स्थिरात्मजो महाकायः सर्वकामार्थसाधकः ॥ २ ॥ लोहितो लोहितांगश्च

For Private And Personal Use Only

सामगानां कृपाकरः ॥ धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥ ३ ॥ अंगारको यमश्चैव सर्वरोगापहारकः ॥ वृष्टिकर्ताऽपहर्ता च सर्व कामफलप्रदः ॥ ४ ॥ एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ॥ ऋणं न जायते तस्य धनं प्राप्नोत्यसंशयः ॥ ५ ॥ अंगारको तिबलवानपि यो ग्रहाणां स्वेदोद्भवस्त्रिनयनस्य पिनाकपाणेः ॥ आरक्तचन्दनसुशीतलवारिणा योप्यभ्यर्चितोऽथ विपुलां प्रददाति सिद्धिम् ॥ ६ ॥ भोभो धरात्मज इति प्रथितः पृथिव्यां दुःखापहो दुरितशोकसमस्तहर्ता ॥ नृणामृणं हरति तान्धनिनः प्रकुर्याद्यः पूजितः सकलमंगलवासरेषु ॥ ७ ॥ एकेन हस्तेन गदां बिभर्ति त्रिशूलमन्येन ऋजुक्रमेण ॥ शार्क्तिं सदान्येन वरं ददाति चतुर्भुजो मंगलमादधातु ॥ ८ ॥ यो मंगलो मंगलमादधाति मध्यग्रहो यच्छति वांछितार्थम् ॥ धर्मार्थकामादिसुखं प्रभुत्वं कलत्रपुत्रैर्न कदा वियोगः ॥ ९ ॥ कनकमयशरीरतेजसा दुर्निरीक्ष्यो हुतवहसमकांतिर्मालवे लब्धजन्मा ॥ अवनिजतनयेषु श्रूयते यः पुराणो दिशतु मम विभूतिं भूमिजः सप्रभावः ॥ १० ॥ इति वशिष्ठसंहितायां भौमस्तोत्रं समाप्तम् ॥ अथ बुधस्तोत्रप्रारम्भः ॥ पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवदुःखापहर्ता ॥ धर्मस्य धृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च ॥ १ ॥ प्रियंगुकनकश्यामं रूपेणाप्रतिमं बुधम् ॥ सौम्यं सौम्यगुणोपेतं नमामि शशिनन्दनम् ॥ २ ॥ सोमसूनुर्बुधश्चैव सौम्यः सौम्यगुणान्वितः ॥ सदा शांतः सदा क्षेमो नमामि शशिनन्दनम् ॥ ३ ॥ उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युतिः ॥ सूर्यप्रियकरो विद्वान् पीडां हरतु मे बुधः ॥ ४ ॥ शिरीषपुष्पसंकाशः कपिशीलो युवा पुनः ॥ सोमपुत्रो बुधश्चैव सदा शांतिं प्रयच्छ तु ॥ ५ ॥ श्यामः शिरालश्च कलाविधिज्ञः कौतूहली कोमलवाग्विलासी ॥ रजोधिको मध्यमरूपधृक् स्यादाताम्रनेत्रो द्विजराजपुत्रः ॥ ६ ॥ अहो चन्द्रसुत श्रीमन् मागधर्मासमुद्भवः ॥ अत्रिगोत्रश्चतुर्बाहुः खड्गखेटकधारकः ॥ ७ ॥ गदाधरो नृसिंहस्थः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वर्णनाभसमन्वितः ॥ केतकीद्रुमपत्राभ इन्द्रविष्णुप्रपूजितः ॥ ८ ॥ ज्ञेयो बुधः पंडितश्च रौहिणेयश्च सोमजः ॥ कुमारो राजपुत्रश्च शैशेवः शशिनन्दनः ॥ ९ ॥ गुरुपुत्रश्च तारेयो विबुधो बोधनस्तथा ॥ सौम्यः सौम्यगुणोपेतो रत्नदानफलप्रदः ॥ १० ॥ एतानि बुध नामानि प्रातःकाले पठेन्नरः ॥ बुद्धिर्विवृद्धितां याति बुधपीडा न जायते ॥ ११ ॥ इति बुधस्तोत्रं समाप्तम् ॥ अथ बृहस्पतिमंत्र प्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा–"ॐ ब्रृं बृहस्पतये नमः ।" इत्यष्टाक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य बृहस्पतिमंत्रस्य ब्रह्मा ऋषिः । अनुष्टुप्छन्दः । सुराचार्यो देवता । ब्रृं बीजम् । नमः शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ ब्रह्मऋषये नमः । शिरसि ॥ १ ॥ अनुष्टुप्छन्दसे नमः । मुखे ॥ २ ॥ सुराचार्यदेवतायै नमः । हृदि ॥ ३ ॥ ब्रृं बीजाय नमः । गुह्ये ॥ ४ ॥ नमः शक्तये नमः । पादयोः ॥ ५ ॥ विनियोगाय नमः । सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ ब्रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ब्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ब्रूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ब्रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ब्रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ब्रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ब्रां हृदयाय नमः ॥ १ ॥ ॐ ब्रीं शिरसे स्वाहा ॥ २ ॥ ॐ ब्रूं शिखायै वषट् ॥ ३ ॥ ॐ ब्रैं कवचाय हुम् ॥ ४ ॥ ॐ ब्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ब्रः अस्त्राय फट् ॥ ६ ॥ इति हृदयादि षडंगन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "रत्नाष्टापदवस्त्रराशिममलं दक्षात्किरंतं करादासीनं विपणौ करं निदधतं रत्नादिराशौ परम् ॥ पीतालेपनपुष्पवस्त्रमखिलालंकारसंभूषितं विद्यासागरपारगं सुरगुरुं वंदे सुवर्णप्रभम् ॥ १ ॥" इति ध्यात्वा सर्वतोभद्रमंडले धर्माधर्मादिपीठांतं पीठदेवताः संस्थापयेत् ॥ अत्र पीठशक्तयो न संति ॥ ततः स्वर्णादिनिर्मितं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा—षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ ब्राँ हृदयाय नमः हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ ब्रीं शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ ब्रूं शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ ब्रैं कवचाय हुम् । कवचश्रीपा० ॥ ४ ॥ ॐ ब्रौं नेत्रत्रयाय वौषट् नेत्रत्रयश्रीपा० ॥ ५ ॥ ॐ ब्रः अस्त्राय फट् अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदश दिक्पालान् वज्राद्यायुधानि च

अथ बृहस्पतिपूजनयन्त्रम्.



For Private And Personal Use Only

संपूज्य पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमशीतिसहस्रजपः ॥ तद्दशांशतो घृतहोमः। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्॥तथा च। "जपित्वाशीतिसाहस्रं हुत्वा तेन घृतेन वा ॥ धर्माधर्मादिपीठे तं पूजयेदंगदिग्भवैः ॥ १ ॥ सिद्धे मनौ प्रकुर्वीत प्रयोगानिष्टसिद्धये ॥ हरिद्राकुसुमैर्हुत्वा घृताक्तैर्दिवसत्रयम् ॥ २ ॥ सविंशतिशतं मंत्री वासांसि लभते मणीन् ॥ शत्रुरोगादिपीडासु स्वजने कलहोद्भवे ॥ ३ ॥ जुहुयात्पिप्पलोत्थाभिः समिद्भिस्त न्निवृत्तये ॥४॥" इत्यष्टाक्षरबृहस्पतिमंत्रप्रयोगः ॥ अथ बृहस्पतिस्तोत्रप्रारंभः॥ "क्रौं-शक्रादिदेवैः परिपूजितोसि त्वं जीवभूतो जगतो हिताय ॥ ददाति यो निर्मलशास्त्रबुद्धिं स वाक्पतिर्मे वितनोतु लक्ष्मीम् ॥ १ ॥ पीताम्बरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः ॥ दधाति दण्डं च कमण्डलुं च तथाक्षसूत्रं वरदोस्तु मह्यम् ॥ २ ॥ बृहस्पतिः सुराचार्य्यो दयावाञ्छुभलक्षणः ॥ लोकत्रयगुरुः श्रीमान्सर्वज्ञः सर्वतो विभुः ॥ ३ ॥ सर्वेशः सर्वदा तुष्टः श्रेयस्कृत्सर्वपूजितः ॥ अक्रोधनो मुनिश्रेष्ठो नीतिकर्ता महाबलः ॥ ४ ॥ विश्वात्मा विश्वकर्ता च विश्वयोनिरयोनिजः ॥ भूर्भुवो धनदाता च भर्ता जीवो जगत्पतिः ॥ ५ ॥ पंचविंशतिनामानि पुण्यानि शुभदानि च ॥ नंदगोपालपुत्राय भगवत्कीर्तितानि च ॥६ ॥ प्रातरुत्थाय यो नित्यं कीर्तयेत्तु समाहितः ॥ विप्रस्तस्यापि भगवान् प्रीतः स च न संशयः ॥७॥" (तंत्रांतरेपि) देवानां च ऋषीणां च गुरुं कांचनसन्निभम् ॥ बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ १ ॥ अमराणां बुद्धिदाता वाग्मी यः करुणाकरः ॥ यावंतो ये च मुनयः पुरुषाकारपीतभाः ॥ २ ॥ बृहस्पतिः सुराचार्य्यो गीष्पतिर्धिषणो

---

१ सविंशतिशतं १२० ॥

गुरुः ॥ जीव आंगिरसो वाचस्पतिश्चित्रशिखण्डिजः ॥ ३ ॥सकलसुरविनेता ब्रह्मतुल्यप्रभावस्त्रिदशपतिकरैर्यो धृष्टपादारविंदः ॥ विमल
मतिविकासी सर्वमांगल्यहेतुर्द्ददतु मम विभूतिं वाक्पतिः सुप्रभावः ॥ ४ ॥ बृहस्पतिमहं नौमि गुरुं देवेन्द्रपूजितम् ॥ सर्वशास्त्रप्रवक्तारं सर्व
कामफलप्रदम् ॥ ५ ॥ सर्वसंशयच्छेत्तारं वेत्तारं सर्वकर्मणाम् ॥ परब्रह्ममयं नित्यं परमानंदरूपिणम् ॥ ६ ॥ सर्वसिद्धिप्रदं देवं शरण्यं
भक्तवत्सलम् ॥ वरेण्यं वरदं शांतं त्रिदशार्तिहरं परम् ॥ ७ ॥ लंबकूर्चं सुवर्णाभं स्वर्णयज्ञोपवीतिनम् ॥ पीतवस्त्रपरीधानं मार्तण्डतिल
कान्वितम् ॥८॥ चन्दनागुरुकर्पूरैः सुगंधैः शतपत्रकैः ॥ संपूज्य ध्यायते यस्तु भक्त्या सुदृढया नरैः ॥ ९ ॥ धनं धान्यं जयं सौख्यं
सौभाग्यं नृपमान्यता ॥ भवंति सर्वदा तेषां त्वत्प्रसादात्सुरेश्वर ॥ १० ॥ रोगाग्निसर्पचौराद्यास्तेषां न प्रभवंति हि ॥ सुस्थानस्थोधिदे
शे च ध्यानात्सर्वार्थसाधकः ॥ ११ ॥ (तंत्रांतरेपि) नमः सुरेन्द्रवंद्याय देवाचार्याय ते नमः ॥ नमस्त्वनंतसामर्थ्य वेदसिद्धांतपारग ॥
॥ १ ॥ सदानंद नमस्तेस्तु नमः पीडाहराय च ॥ नमो वाचस्पते तुभ्यं नमस्ते पीतवाससे ॥ २ ॥ नमोऽद्वितीयरूपाय लंबकूर्चाय ते
नमः ॥ नमः प्रहृष्टनेत्राय विप्राणां पतये नमः ॥ ३ ॥ नमो भार्गवशिष्याय विपन्नहितकारक ॥ नमस्ते सुरसैन्याय विपन्नत्राणहे
तवे ॥ ४ ॥ विषमस्थस्तथा नृणां सर्वकष्टप्रणाशनम् ॥ प्रत्यहं तु पठेयो वै तस्य कामफलप्रदम् ॥५॥ "बृहस्पतिमंत्रो" यथा ॐ नमो
स्तु बृहस्पतये पीतवस्त्राभरणाय यज्ञोपवीतमालाधराय ममार्चनं गृहाण कुरुकुरु स्वाहा" इति चत्वारिंशदक्षरमंत्रः ॥ इति बृहस्पतिस्तोत्रं
समाप्तम् ॥ अथ शुक्रमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा-"ॐ वस्त्रं मे देहि शुक्राय स्वाहा"इत्येकादशाक्षरो मंत्रः ॥ अस्य विधान
म् ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः। विराट्छन्दः। दैत्यपूज्यः शुक्रो देवता। ॐ बीजम्। स्वाहा शक्तिः। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मऋषये नमः । शिरसि ॥ १ ॥ विराट्छंदसे नमः । मुखे ॥२॥ दैत्यपूज्यशुक्रदेवतायै नमः। हृदि ॥ ३ ॥ ॐ बीजाय नमः । गुह्ये ॥४॥ स्वाहा शक्तये नमः । पादयोः ॥ ५ ॥ विनियोगाय नमः । सर्वाङ्गे॥६॥इति ऋष्यादिन्यासः । ॐ हृदयाय नमः ॥१॥ वस्त्रं शिरसे स्वाहा । २ । मे शिखायै वषट् । ३ । देहि कवचाय हुम् । ४ । शुक्राय नेत्रत्रयाय वौषट् । ५ । स्वाहा अस्त्राय फट् । ६ । इति हृदयादिषडंगन्यासः ॥ एवमेव करांगन्यासं कुर्यात् । एवं न्यासविधिं कृत्वा ध्यायेत् । अथ ध्यानम् ॥ श्वेतांभोजनिषण्णमापणतटे श्वेतांबरालेपनं नित्यं भक्तजनाय संप्रददतं वासो मणीन् हाटकम् ॥ वामेनैव करेण दक्षिणकरे व्याख्यानमुद्रांकितं शुक्रं दैत्यवरार्चितं स्मितमुखं वंदे सितांगं प्रभुम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य सर्वतोभद्रमंडले धर्मादिपरतत्त्वांतपीठदेवताः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्य्यात् ॥ षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये च दिक्षु पूर्वोक्तषडंगन्यासमंत्रेण षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतजपः । तद्दशांशतो घृतहोमः । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च । "अयुतं प्रजपेन्मंत्रं दशांशं जुहुयाद्घृतैः॥ सिद्धे मंत्री प्रकुर्वीत प्रयोगानिष्टसिद्धये॥ १ ॥सुगंधैः श्वेतकुसुमैर्जुहुयाच्छुभवासरे ॥ एकविंशतिवारं यो लभते सोंशुकं मणीन्"॥ इत्येकाद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शाक्षरशुक्रमंत्रप्रयोगः ॥ अथ शुक्रस्तोत्रप्रारंभः ॥ नमस्ते भार्गवश्रेष्ठ देव दानवपूजित॥वृष्टिरोधप्रकर्त्रे च वृष्टिकर्त्रे नमोनमः ॥१॥ देवयानीपितस्तुभ्यं वेदवेदांगपारग ॥ परेण तपसा शुद्ध शंकरो लोकशंकरम् ॥ २ ॥ प्राप्तो विद्यां जीवनाख्यां तस्मै शुक्रात्मने नमः ॥ नमस्तस्मै भगवते भृगुपुत्राय वेधसे ॥ ३ ॥ तारामण्डलमध्यस्थ स्वभासा भासिताम्बर ॥ यस्योदये जगत्सर्वं मंगलार्हं भवेदिह ॥ ४ ॥ अस्तं याते ह्यरिष्टं स्यात्तस्मै मंगलरूपिणे ॥ त्रिपुरावासिनो दैत्यान् शिवबाणप्रपीडितान् ॥५॥ विद्यया जीवयच्छुक्रो नमस्ते भृगुनन्दन ॥ ययातिगुरवे तुभ्यं नमस्ते कविनंदन ॥ ६ ॥ बलिराज्यप्रदो जीवस्तस्मै जीवात्मने नमः ॥ भार्गवाय नमस्तुभ्यं पूर्वं गीर्वाणवंदित॥ ७॥जीवपुत्राय यो विद्यां प्रादात्तस्मै नमोनमः ॥नमः शुक्राय काव्याय भृगुपुत्राय धीमहि॥ ८ ॥नमः कारणरूपाय नमस्ते कारणात्मने॥ स्तवराजमिदं पुण्यं भार्गवस्य महात्मनः॥ ९॥ यः पठेच्छृणुयाद्वापि लभते वांछितं फलम्॥पुत्रकामो लभेत्पुत्रान् श्रीकामो लभते श्रियम्॥ १ ० ॥राज्य

अथ शुक्रपूजनयन्त्रम्.



For Private And Personal Use Only

कामो लभेद्राज्यं स्त्रीकामः स्त्रियमुत्तमाम् ॥ भृगुवारे प्रयत्नेन पठितव्यं समाहितैः ॥ ११ ॥ अन्यवारे तु होरायां पूजयेद्भृगुनन्दनम् ॥ ॥ रोगार्तो मुच्यते रोगाद्भयार्तो मुच्यते भयात् ॥ १२ ॥ यद्यत्प्रार्थयते वस्तु तत्तत्प्राप्नोति सर्वदा ॥ प्रातःकाले प्रकर्तव्या भृगुपूजा प्रयत्नतः॥ १३॥ सर्वपापविनिर्मुक्तः प्राप्नुयाच्छिवसन्निधौ॥ १४॥ इति स्कंदपुराणे शुक्रस्तोत्रं समाप्तम् ॥ ॥ अथ व्यासमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा—"व्यां वेदव्यासाय नमः ॥" इत्यष्टाक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य मंत्रस्य ब्रह्मा ऋषिः। अनुष्टुप्छन्दः। सत्यवतीसुतो देवता। व्यां बीजम् । नमः शक्तिः। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ ब्रह्मऋषये नमः। शिरसि ॥ १ ॥ अनुष्टुप्छन्दसे नमः। मुखे ॥ २ ॥ सत्यवतीसुतदेवतायै नमः। हृदि ॥ ३ ॥ व्यांबीजाय नमः। गुह्ये ॥ ४ ॥ नमःशक्तये नमः। पादयोः ॥ ५ ॥ विनियोगाय नमः। सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ ॐ व्यां हृदयाय नमः ॥ १ ॥ ॐ व्यीं शिरसे स्वाहा ॥ २ ॥ ॐ व्यूं शिखायै वषट् ॥३॥ ॐ व्यैं कवचाय हुम् ॥ ४ ॥ ॐ व्यौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ व्यः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं करांगन्यासं कुर्यात् ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "व्याख्यामुद्रिकया लसत्करतलं सद्योगपीठस्थितं वामे जानुतले दधानमपरं हस्तेषु विद्यानिधिम् ॥ विप्रव्रात[1]वृतं प्रसन्नमनसं पाथोरुहांगद्युतिं पाराशर्यमतीव पुण्यचरितं व्यासं स्मरेत्सिद्धये ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः सर्वतोभद्रमंडले धर्मादिपीठदेवताः संस्थाप्य "ॐ धर्मादिपीठदेवताभ्यो नमः ॥" इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृते

१ समूह ।

नाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पान्तैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च । ॐ व्यां हृदयाय नमः[1] ॥ १ ॥ ॐ व्यीं शिरसे स्वाहा[2] ॥ २ ॥ ॐ व्यूं शिखायै वषट्[3] ॥ ३ ॥ ॐ व्यैं कवचाय हुम् ॥ ४ ॥ ॐ व्यौं नेत्रत्रयाय वौषट्[5] ॥ ५ ॥ ॐ व्यः अस्त्राय फट्[6] ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राच्यादिचतुर्दिक्षु दक्षिणावर्तेन च । ॐ शल्याय नमः ।शल्यश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र॥ १ ॥ॐ वैशंपायनाय नमः । वैशंपायनश्रीपा० ॥ २ ॥

अथ वैदव्यासपूजनयन्त्रम्.



Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ जैमिनये नमः । जैमिनिश्रीपा० ॥ ३ ॥ ॐ सुमन्ताय नमः सुमन्तश्रीपा० ॥ ४ ॥ आग्नेय्यादिचतुष्कोणेषु ॐ श्रीशुकाय नमः । श्रीशुकश्रीपा० ॥ ५ ॥ ॐ उग्रश्रवसे नमः । उग्रश्रवःश्रीपा० ॥ ६ ॥ ॐ समन्याय नमः । समन्यश्रीपा० ॥ ७ ॥ ॐ चिमनाय नमः । चिमनश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो भूपुरे इन्द्रादिदश दिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतजपाः ॥ पायसान्नेन दशांशतो होमः ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च "जपेदष्टसहस्राणि पायसैर्होममाचरेत् ॥ एवं सिद्धमनुर्मंत्री कवित्वं शोभनाः प्रजाः ॥ १ ॥ व्याख्यानशक्तिं कीर्तिं च लभते संपदां च यः ॥ मृत्युंजयेन पुटितं यो व्यासस्य मनुं जपेत् ॥ २ ॥ सर्वोपद्रवसंत्यक्तो लभते वांछितं फलम् ॥ मृत्युंजयस्य मंत्रोयं त्रिवर्णो मृत्युनाशनः ॥ ३ ॥ जप्तोयं केवलो नृणामिष्टसिद्धिं प्रयच्छति ॥ किं पुनस्तेन पुटितो वेदव्यासमनूत्तमः ॥ ४ ॥ इति वेदव्यासाष्टाक्षरमंत्रप्रयोगः ॥

॥ अथ धर्मराजमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा—" ॐ क्रों ह्रीं आँ वैं वैवस्वताय धर्मराजाय भक्तानुग्रहकृते नमः" इति चतुर्विंशत्यक्षरो मंत्रः ॥ अस्य विधानम् ॥ ॐ क्रों ह्रीं हृदयाय नमः ॥ १ ॥ आँ वैं शिरसे स्वाहा ॥ २ ॥ वैवस्वताय शिखायै वषट् ॥ ३ ॥ धर्मराजाय कवचाय हुम् ॥ ४ ॥ भक्तानुग्रहकृते नेत्रत्रयाय वौषट् ॥ ५ ॥ नमः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ क्रों ह्रीं अंगुष्ठाभ्यां नमः ॥ १ ॥ आँ वैं तर्जनीभ्यां नमः ॥ २ ॥ वैवस्वताय मध्यमाभ्यां नमः ॥ ३ ॥ धर्मराजाय अनामिकाभ्यां नमः ॥ ४ ॥ भक्तानुग्रहकृते कनिष्ठिकाभ्यां नमः ॥ ५ ॥ नमः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥

१ ॐ जूं सः व्यां वेदव्यासाय नमः सः जूं ॐ इति जपेत् ॥

For Private And Personal Use Only

एवं न्यासं कृत्वा सावधानमना देवं ध्यायेत ॥ अथ ध्यानम् ॥ "पाथःसंयुतमेघसन्निभतनुः प्रद्योतनस्यात्मजो नृणां पुण्यशुभावहः स्ववपुषा पापीयसां दुःखकृत् ॥ श्रीमद्दक्षिणदिक्पतिर्महिषगो भूषाभरालंकृतो ध्येयः संयमिनीपतिः पितृगणस्वामी यमो दंडभृत्॥ १॥" इति ध्यायेत् ॥ सिद्धमंत्रत्वादृष्यादिपूजाभावः ॥ "अभ्यस्तोयं सदा मंत्रः सकलापद्विनाशनः ॥ नरकप्राप्तिरोद्धा स्याद्रिपुभीतिनिवर्तकः ॥ २ ॥" इति धर्मराजमंत्रप्रयोगः ॥ अथ चित्रगुप्तमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा—" ॐ नमो विचित्राय धर्मलेखकाय यमवाहिकाधिकारिणे म्ल्व्यूं जन्मसंपत्प्रलयं कथयकथय स्वाहा" इत्यष्ट त्रिंशदक्षरो मंत्रः ॥ अस्य विधानम् ॥ ॐ नमो विचित्राय अंगुष्ठाभ्यां नमः ॥ १ ॥ धर्मलेखकाय तर्जनीभ्यां नमः ॥ २ ॥ यमवाहिकाधिकारिणे मध्यमाभ्यां नमः ॥ ३ ॥ म्ल्व्यूँ जन्मसंप्रत्प्रलयं अनामिकाभ्यां नमः ॥ ४ ॥ कथयकथय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ स्वाहा करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ नमो विचित्राय हृदयाय नमः ॥ १ ॥ धर्मलेखकाय शिरसे स्वाहा ॥ २ ॥ यमवाहिकाधिकारिणे शिखायै वषट् ॥ ३ ॥ म्ल्व्यूँ जन्मसंपत्प्रलयं कवचाय हुम् ॥४ ॥ कथयकथय नेत्रत्रयाय वौषट् ॥ ५ ॥ स्वाहा अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "किरीटोज्ज्वलं वस्त्रभूषाभिरामं विचित्रासनासीनमिंदुप्रभास्यम् ॥ नृणां पापपुण्यानि पत्रे लिखंतं भजे चित्रगुप्तं सखायं यमस्य ॥ १ ॥ " इति ध्यात्वा मंत्रं जपेत् ॥ तथा च। "मंत्रोयं चित्रगुप्तस्य सर्वदुःखौघनाशनः ॥ सिद्धोमनुरयं पुंसां जपतां चित्रगुप्तकः ॥ प्रसन्नो गणयेत्पुण्यं नैव पापं कदाचन ॥ १॥" इति चित्रगुप्तमंत्रप्रयोगः ॥ अथ घंटाकर्णमंत्रप्रयोगः ॥ (प्राकृतग्रंथे)मंत्रो यथा—"ॐ घंटाकर्णोमहावीरो देवदत्त सर्वोपद्रवनाशनं कुरुकुरु स्वाहा" इत्येकोनत्रिंशदक्षरो मंत्रः॥अस्य विधानम्॥स्वासने पूर्वाभिमुखः स्थित्वा गंधाक्षतपुष्पधूपदीपकर्पूरेण संपूज्य पंचत्रिंशेच्छतं प्रत्यहं जपेत्॥जपांते पश्चिमाभिमुखो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूत्वा गुग्गुलेन सहस्रं हुनेत्॥एवं कृतेन त्रिदिनांतरे सर्वोपद्रवा नश्यंति राजभयादिकं नश्यति निर्भयो भवति ॥ इति घंटाकर्णमंत्रप्रयोगः ॥
अथ कार्तवीर्यार्जुनमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) अथेष्टदान्मनून् वक्ष्ये कार्तवीर्यस्य गोपितान् ॥ यः सुदर्शनचक्रस्यावतारः क्षितिमंडले ॥ १ ॥ मंत्रो यथा—"ॐ फ्रों व्रीं क्लीं भ्रूं आँ ह्रीं क्रों श्रीं हुं फट् कार्तवीर्यार्जुनाय नमः" इति विंशत्यक्षरो मंत्रः ॥ अस्य विधानम् ॥ अस्य कार्तवीर्यार्जुनमंत्रस्य दत्तात्रेय ऋषिः । अनुष्टुप्छंदः । कार्तवीर्यार्जुनो देवता । ॐ बीजम् ॥ नमः शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ दत्तात्रेयऋषये नमः । शिरसि ॥ १ ॥ अनुष्टुप्छंदसे नमः । मुखे ॥ २ ॥ कार्तवीर्यार्जुनदेवतायै नमः । हृदि ॥ ३ ॥ ॐ बीजाय नमः । गुह्ये ॥ ४ ॥ नमः शक्तये नमः । पादयोः ॥ ५ ॥ विनियोगाय नमः सर्वाङ्गे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ फ्रां व्रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ क्लीं भ्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ हूं मध्यमाभ्यां नमः ॥ ३ ॥ क्रैं श्रैं अनामिकाभ्यां नमः ॥ ४ ॥ हुं फट् कनिष्ठिकाभ्यां नमः ॥ ५ ॥ कार्तवीर्यार्जुनाय नमः ॥ करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ फ्रां भ्रां हृदयाय नमः ॥ १ ॥ ॐ क्लीं भ्रीं शिरसे स्वाहा ॥ २ ॥ ओं हूं शिखायै वषट् ॥ ३ ॥ ॐ क्रैं श्रैं कवचाय हुम् ॥ ४ ॥ ॐ हुं फट् अस्त्राय फट् ॥ ५ ॥ ॐ कार्तवीर्यार्जुनाय नमः । सर्वांगे ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ फ्रों ॐ हृदये ॥ १ ॥ ॐ व्रीं ॐ जठरे ॥ २ ॥ ॐ क्लीं ॐ नाभौ ॥ ३ ॥ ॐ भ्रूं ॐ पुनः जठरे ॥ ४ ॥ ॐ आं ॐ गुह्ये ॥

१ मंत्रो दशविधः—फ्रों कार्तवीर्यार्जुनाय नमः; व्रीं कार्तवीर्यार्जुनाय नमः; फ्रों श्रीं कार्तवीर्यार्जुनाय नमः; कार्तवीर्यार्जुनाय नमः, फ्रों व्रीं कार्तवीर्यार्जुनाय नमः; फ्रों क्रों कार्तवीर्यार्जुनाय नमः; हुं कार्तवीर्यार्जुनाय नमः; फट् फ्रों ऐं कार्तवीर्यार्जुनाय नमः; फ्रों भ्रूं कार्तवीर्यार्जुनाय नमः; आं फ्रों कार्तवीर्यार्जुनाय नमः इति दशमंत्राणां त्रिष्टुप् छंदः । अन्यत् सर्वं पूर्ववज्ज्ञेयम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ५ ॥ ॐ ह्रीं ॐ दक्षपादे ॥ ६ ॥ ॐ क्रों ॐ वामपादे ॥७॥ ॐ श्रीं ॐ सक्थिनि ॥८॥ ॐ हुँ ॐ जानुनि ॥ ९ ॥ॐ फँ ॐ जंघयोः ॥१०॥ ॐ कां ॐ मस्तके ॥११॥ ॐ तं ॐ ललाटे ॥ १२ ॥ ॐ वीं ॐ भ्रुवोः ॥ १३ ॥ ॐ यां ॐ श्रुत्योः ॥१४॥ ॐ जुं ॐ नेत्रयोः ॥१५॥ ॐ नां ॐ नासिकायाम् ॥१६॥ ॐ यं ॐ वक्त्रे॥१७॥ ॐ नं ॐ गले ॥१८॥ ॐ मं ॐ अंसयोः ॥१९॥ ॐ फ्रों व्रीं क्लीं भ्रं आं ह्रीं क्रों श्रीं हुं फट् कार्तवीर्यार्जुनाय नमः॥इति सर्वांगे पादादिमूर्धांतं व्यापकं कुर्यात् ॥ इति मंत्रवर्णव्यापकन्यासः ॥

एवं न्यासविधिं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ उद्यत्सूर्यसहस्रकांतिरखिलक्षोणीधवैर्वंदितो हस्तानां शतपंचकेन च दधच्चापानिषूंस्ता वतः ॥ कंठे हाटकमालया परिवृतश्चक्रावतारो हरेः पायात्स्यंदनगोऽरुणाभवसनः श्रीकार्तवीर्यो नृपः ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य "ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः" इति संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा—पूर्वादिक्रमेण ॐ विमलायै नमः ॥ १ ॥ ॐ उत्कर्षिण्यै नमः ॥ २ ॥ ॐ ज्ञानायै नमः ॥ ३ ॥ ॐ क्रियायै नमः ॥ ४ ॥ ॐ योगायै नमः ॥ ५ ॥ ॐ प्रह्वयै नमः ॥ ६ ॥ ॐ सत्यायै नमः ॥ ७ ॥ ॐ ईशानायै नमः ॥ ८ ॥ मध्ये ॐ अनुग्रहायै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्त्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोध्य "ॐ नमो भगवते कार्तवीर्यार्जुनाय पद्मपीठात्मने नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥

तद्यथा—षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च। ॐ फ्रां व्रां हृदयाय नमः। हृदयश्रीपादुकां पूजयामि तर्पयामि नमः॥इति सर्वत्र ॥१॥ क्लीं भ्रीं शिरसे स्वाहा। शिरःश्रीपा० ॥२॥ ॐ हूं शिखायै वषट्। शिखाश्रीपा० ॥३॥ क्रैं श्रैं कवचाय हुम्। कवचश्री

For Private And Personal Use Only

पा० ॥ ४ ॥ ॐ हुं फट् अस्त्राय फट् । अस्त्रश्रीपा० ॥ ५ ॥ ॐ कार्तवीर्यार्जुनाय नमः[6] सर्वांगे ॥ सर्वांगश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य “ ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥” इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राच्यादिचतुर्दिक्षु ॐ चोरमदविभंजनाय नमः[7] ॥ १ ॥ ॐ मारीमदविभंजनाय नमः[8] ॥ २ ॥ ॐ अरिमदविभंजनाय नमः[9] ॥ ३ ॥ ॐ दैत्यमदविभंजनाय नमः[10] ॥ ४ ॥ आग्नेय्यादिकोणेषु । ॐ दुःखनाशाय नमः[11] ॥ ५ ॥ ॐ दुष्टनाशाय नमः[12] ॥ ६ ॥ ॐ दुरितनाशाय नमः[13] ॥ ७ ॥ ॐ रोगनाशकाय नमः[14] ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलाग्रेषु प्राची

अथ कार्तवीर्यार्जुनपूजनयन्त्रम्.



क्रमेणै ॥ ॐ क्षेमकरायै नमः[15] ॥ १ ॥ ॐ वश्यकरायै नमः[16] ॥ २ ॥ ॐ श्रीकरायै नमः[17] ॥ ३ ॥ ॐ यशस्करायै नमः[18] ॥ ४ ॥ ॐ आयुष्करायै नमः[19] ॥ ५ ॥ ॐ प्रज्ञाकरायै नमः[20] ॥ ६ ॥ ॐ विद्याकरायै नमः[21] ॥ ७ ॥ ॐ धनकरायै नमः[22] ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमेकलक्षजपाः ॥ तिलतंडुलपायसेन दशांशतो होमः॥एवं कृते मंत्रः सिद्धो भवति। सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्॥तथा च। "लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः॥सतंडुलैः पायसेन विष्णुपीठे यजेत्तु तम्॥ १॥एवं संसाधितो मंत्रः प्रयोगार्हः प्रजायते॥शुद्धभूमावष्टगंधैर्लिखित्वा यंत्रमादरात् ॥ तत्र कुंभं प्रतिष्ठाप्य तत्रावाह्यार्चयेन्नृपम् ॥ २ ॥ स्पृष्ट्वा कुंभं जपेन्मंत्रं सहस्रं विजितेन्द्रियः ॥ अभिषिंचेत्तदंभोभिः प्रियं सर्वेष्टसिद्धये ॥ ३ ॥ पुत्रान् यशो रोगनाशमायुःस्वजनरंजनम् ॥ वाक्सिद्धिं सुदृशः कुंभाभिषिक्तो लभते नरः ॥ ४ ॥ शत्रूपद्रवमापन्ने ग्रामे वा पुटभेदने ॥ संस्थापयेदिदं यंत्रमरिभीतिनिवृत्तये ॥ ५ ॥ सर्षपारिष्टलशुनकार्पासैर्माप्यते रिपुः ॥ धत्तूरैः स्तंभते निंबैर्द्वेषते वश्यतेंबुजैः ॥ ६ ॥ उच्चाट्यते बिभीतस्य समिद्भिः खदिरस्य च ॥ कटुतैलमहिष्याज्यैर्होमद्रव्यांजनं स्मृतम् ॥ ७ ॥ यवैर्हुतैः श्रियः प्राप्तिस्तिलैराज्यैरघक्षयः ॥ तिलतंडुलसिद्धार्थलाजैर्वश्यो नृपो भवेत् ॥ ८ ॥ अपामार्गार्कदूर्वाणां होमो लक्ष्मीप्रदोऽघनुत् ॥ स्त्रीवश्यकृत्प्रियंगूनां पुराणां भूतशांतिदः ॥ ९ ॥ अश्वत्थोदुंबरप्लक्षवटबिल्वसमुद्भवाः ॥ समिधो लभते हुत्वा पुत्रानायुर्धनं सुखम् ॥ १० ॥ निर्मोकहेमसिद्धार्थलवणैश्चोरनाशनम् ॥ रोचनागोमयैः स्तंभो भूप्राप्तिः शालिभिर्हुतैः ॥ ११ ॥ होमसंख्या तु सर्वत्र सहस्रादयुतावधिः ॥

१ मालकांगुनी। २ गूगल। ३ खोवा। ४ धतूरा।

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकल्पनीया मंत्रज्ञैः कार्यगौरवलाघवात् ॥ १२ ॥ इति विंशत्यक्षरो कार्तवीर्यार्जुनमंत्रप्रयोगः ॥ अन्यो मंत्रो यथा–"ॐ नमो भगवते श्रीकार्तवीर्यार्जुनाय सर्वदुष्टांतकाय तपोबलपराक्रमपरिपालितसप्तद्वीपाय सर्वराजन्यचूडामणये महाशक्तिमते सहस्रबाहवे हुं फट्" इति त्रिषष्टिवर्णो मंत्रः ॥ अस्य विधानम् ॥ राजन्यचक्रवर्तिने हृदयाय नमः ॥ १ ॥ वीराय शिरसे स्वाहा ॥ २ ॥ शूराय शिखायै वषट् ॥ ३ ॥ माहिष्मतीपतये कवचाय हुम् ॥ ४ ॥ रेवांबुपरितृप्ताय नेत्रत्रयाय वौषट् ॥५॥ कारागेहप्रबाधितदशास्याय अस्त्राय फट्॥६॥ इति षडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ "सिच्यमानं युवतिभिः क्रीडंतं नर्मदाजले ॥ हस्तैर्जलौघं रुंधंतं ध्यायेन्मत्तं नृपोत्तमम् ॥ १ ॥" इति ध्यायेत् ॥ अस्य पुरश्चरणमयुतजपः ॥ पूजादिकं सर्वं पूर्ववत् ॥ तथा च । "एवं ध्यात्वायुतं मंत्रं जपेदन्यत्तु पूर्ववत् ॥ पूर्ववत्सर्वमेतस्य समाराधनमीरितम् ॥ १॥ इति । अन्यो मंत्रो यथा–"ॐ कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ॥ तस्य संस्मरणादेव हृतं नष्टं च लभ्यते ॥" इत्यनुष्टुब्रूपो मंत्रः ॥ ॐ कार्तवीर्यार्जुनो नाम हृदयाय नमः ॥ १॥ राजा बाहुसहस्रवान् शिरसे स्वाहा ॥२॥ तस्य संस्मरणादेव शिखायै वषट् ॥ ३ ॥ हृतं नष्टं च लभ्यते कवचाय हुम् ॥ ४ ॥ ॐ कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्॥ तस्य संस्मरणादेव हृतं नष्टं च लभ्यते अस्त्राय फट् ॥ ५ ॥ इति पंचांगन्यासं कुर्यात् ॥ अन्यत् सर्वं पूर्ववत् ॥ अन्यः ॥ "ॐ कार्तवीर्यः खलद्वेषी कृतवीर्यसुतो बली ॥ सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः ॥ रक्तगंधो रक्तमाल्यो राजा स्मर्तुरभीष्टदः॥" इति मंत्रः ॥ अस्य विधानम् ॥ "द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् ॥ अनष्टद्रव्यता तस्य नष्टस्य पुनरागमः" इति ॥ गायत्रीमंत्रो यथा॥"ॐ कार्तवीर्याय विद्महे महावीर्याय धीमहि ॥ तन्नोऽर्जुनः प्रचोदयात्" ॥ गायत्र्येषार्जुनस्योक्ता प्रयोगादौ जपेत्तु ताम् ॥ अनुष्टुभं मनुं रात्रौ जपतां चौरसंचयाः ॥ पलायंते गृहाद्दूरं तर्पणाद्यचनादपि ॥ १ ॥ इति कार्तवीर्यार्जुनमंत्रप्रयोगः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमद्भागवतानुष्ठानचक्रम् ।

एकाहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	३३५	१२	१३

एकाहपारायणं शुकाचार्य्यमतात् श्रावणकृष्णपक्षे कुर्यात् ॥ १ ॥

द्व्यहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	१९०	९	१३
२	१४५	१२	१३

त्र्यारुणिमतात् द्व्यहपारायणं श्रावणशुक्लपक्षे कुर्यात् ॥२॥

त्र्यहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	१५३	७	१५
२	१३८	१०	९०
३	४४	१२	१३

त्र्यहपारायणं हारीतमतात् मुक्तिकाम आश्विनशुक्लपक्षे कुर्यात ॥ ३ ॥

चतुरहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	८१	४	२३
२	८९	८	१७
३	८३	१०	५२
४	८२	१२	१३

चतुरहपारायणं सर्व कामनामासौ शौनकमतात भाद्रपदशुक्लपक्षे कुर्यात् ॥ ४ ॥

पंचाहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	६९	४	७
२	६९	६	१९
३	६३	९	२४
४	६९	१०	६९
५	६५	१२	१३

पंचाहपारायणं अकृतव्रणमतात् सर्वकामनाप्राप्त्यर्थं भाद्रपदशुक्लपक्षे कुर्यात् ॥ ५ ॥

षडहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	६१	३	३२

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	७१	४	९

सप्ताहपारायणम् ।

दिन	ऽध्या.	स्कंध	ऽध्याय
१	५३	३	२४

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	४९	३	१०

For Private And Personal Use Only

५	७०	११	३९
६	२१	१२	१३

षट्दहपारायणं शांशपायनमतात् धनप्राप्तिकामो भाद्रपदकृष्णपक्षे कुर्यात् ॥ ६ ॥

५	३९	१०	७३
६	१७	१०	९०
७	४४	१२	१३

सप्ताहपारायणं शांशपायनमताद्धनप्राप्तिकामो भाद्रपदकृष्णपक्षे कुर्यात् ॥ ७ ॥

५	५१	१०	५५
६	४१	११	६
७	३८	१२	१३

सप्ताहपारायणं वाशिष्ठमतात्पुत्रप्राप्तिकामो वैशाखे कुर्यात् ॥ ७ ॥

५	४९	१०	४९
६	४८	११	९
७	४४	१२	१३

सप्ताहपारायणं सूतमतात्त्रिष्कामः कार्तिकशुक्लपक्षे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	२९	२	१०
२	६४	४	३१
३	४१	६	१९
४	३९	८	२४
५	७३	१०	४९
६	७२	११	३१
७	१३	१२	१३

सप्ताहपारायणं विश्वामित्रमतात् संकटमोचनार्थं मार्गशीर्षे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	४८	३	१९
२	५१	५	६
३	४९	७	१०
४	५३	९	२४
५	४९	१०	४९
६	४१	१०	९०
७	४४	१२	१३

सप्ताहपारायणं जमदग्निमताद्विषनाशनकामः पौषे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	६१	३	३६
२	५७	५	२६
३	३४	७	११
४	४८	९	२४
५	९०	१०	९०
६	३२	११	३१
७	१३	१२	१३

सप्ताहपारायणं भारद्वाजमतात् बंधमोक्षकामो माघे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्या.	स्कंध	ऽध्याय
१	४८	३	१९
२	६०	५	१५
३	४५	७	१५
४	६०	१०	१२
५	७२	१०	८४
६	३७	११	३१
७	१३	१२	१३

सप्ताहपारायणं गौतममतात् शत्रुपराजयकामः फाल्गुने कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	४९	३	२०
२	५०	५	६
३	३९	६	१९
४	५९	९	२०
५	३९	१०	३५
६	६१	११	६
७	३८	१२	१३

सप्ताहपारायणं अत्रिमताद्रोगमुक्तिकामश्चैत्रे कुर्यात् ॥ ७ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमद्भागवतानुष्ठानचक्रम् ।

एकाहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	३२५	१२	१३

एकाहपारायणं शुकाचार्यमतात् श्रावणकृष्णपक्षे कुर्यात् ॥ १ ॥

द्व्यहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	१९०	९	१३
२	१४५	१२	१३

वाल्मीकिमतात् द्व्यहपारायणं श्रावणशुक्लपक्षे कुर्यात् ॥२॥

त्र्यहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	१५३	७	१५
२	१२८	१०	९०
३	४४	१२	१३

त्र्यहपारायणं हारीतमतात् मुक्तिकाम आश्विनशुक्लपक्षे कुर्यात् ॥ ३ ॥

चतुरहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	८१	४	२३
२	८९	८	१७
३	८३	१०	५२
४	८२	१२	१३

चतुरहपारायणं सर्वकामनाप्राप्त्यै शौनकमतात् भाद्रपदशुक्लपक्षे कुर्यात् ॥ ४ ॥

पंचाहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	६९	४	७
२	६९	६	१९
३	६३	९	२४
४	६९	१०	६९
५	६५	१२	१३

पंचाहपारायणं अक्रूरमतात् सर्वकामनाप्राप्त्यर्थं भाद्रपदशुक्लपक्षे कुर्यात् ॥ ५ ॥

षडहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	६१	३	२२
२	५६	५	१४
३	६०	८	२४
४	६३	१०	२९
५	७०	११	२९
६	५१	१२	१३

षडहपारायणं शांशपायनमतात् धनप्राप्तिकामो भाद्रपदकृष्णपक्षे कुर्यात् ॥ ६ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	७१	४	९
२	६१	६	१३
३	५२	९	७
४	५१	१०	३४
५	३९	१०	७३
६	१७	१०	९०
७	४४	१२	१३

सप्ताहपारायणं शांशपायनमताद्धनप्राप्तिकामो भाद्रपदकृष्णपक्षे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्या.	स्कंध	ऽध्याय
१	५३	३	२४
२	४३	५	३
३	५०	७	८
४	५९	१०	४
५	५१	१०	५५
६	४१	११	६
७	३८	१२	१३

सप्ताहपारायणं वसिष्ठमतात्पुत्रप्राप्तिकामो वैशाखे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	४९	३	१०
२	६७	५	२३
३	३७	७	१५
४	४८	९	२४
५	४२	१०	४२
६	४८	११	९
७	४४	१२	१३

सप्ताहपारायणं सूतमतात् निष्कामः कार्तिकशुक्लपक्षे कुर्यात् ॥ ७ ॥

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	२९	२	१०
२	६४	४	३१
३	४५	६	१९
४	३९	८	२४
५	७३	१०	४९
६	७२	११	३१
७	१३	१२	१३

सप्ताहपारायणं विश्वामित्र [illegible] कार्त-

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	४८	३	१९
२	५२	५	६
३	४९	७	१०
४	५३	९	२४
५	४९	१०	४९
६	४१	१०	९०
७	४४	१२	१३

सप्ताहपारायणं जमदग्निम- [illegible] पौषे क-

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	६१	३	३६
२	५७	५	२६
३	३४	७	१५
४	४८	९	२४
५	९०	१०	९०
६	३२	११	३१
७	१३	१२	१३

सप्ताहपारायणं भारद्वाजम- तात [illegible] माघे

सप्ताहपारायणम् ।

दिन	ऽध्या.	स्कंध	ऽध्याय
१	४८	३	१९
२	६०	५	१५
३	४५	७	१५
४	६०	१०	१२
५	७२	१०	८४
६	३७	११	३१
७	१३	१२	१३

सप्ताहपारायणं गौतममतात् [illegible] फाल्गुने कु-

सप्ताहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	४९	३	२०
२	५०	५	६
३	३९	६	१९
४	५९	९	२०
५	३९	१०	३५
६	६९	११	६
७	३८	१२	१३

सप्ताहपारायणं अत्रिमतात्सं- [illegible]

For Private And Personal Use Only

Acharya Shri Kailassagarsuri Gyanmandir
www. kobatirth.org
Shri Mahavir Jain Aradhana Kendra

दशाहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	२५	३	६
२	३४	५	७
३	३३	५	२
४	२६	६	२१
५	२९	८	२४
६	३५	१०	११
७	३४	१०	४५
८	३४	१०	७९
९	३४	११	२३
१०	२१	१२	१३

दशाहपारायणं कश्यमताद्रा-ज्यमासिकाम आषाढे शुक्लपक्षे कुर्यात् ॥ १० ॥

पंचदशाहपारायणम् ।

दिन	ऽध्याय	स्कंध	ऽध्याय
१	२१	२	२
२	२३	३	१५
३	२२	४	४
४	२३	४	२१
५	२२	५	१८
६	२३	६	१५
७	२४	८	५
८	२५	९	६
९	२२	१०	४
१०	२२	१०	२६
११	२३	१०	४९
१२	२१	१०	७०
१३	२२	११	२
१४	२३	११	२५
१५	१९	१२	१३

बृहस्पतिमत स्वस्वकामासिकामा
ऽथेष्ठशुक्लपक्षे आषाढे वा कुर्यात् ?५

मासपारायणम् ।

कृष्णपक्षे				शुक्लपक्षे			
दिन	ऽध्या.	स्कंध	ऽध्या.	दिन	ऽध्या.	स्कंध	ऽध्या.
१	११	१	११	१	१४	८	१५
२	१०	२	२	२	१३	९	४
३	१०	३	२	३	१५	९	१८
४	१०	३	१२	४	१२	१०	६
५	११	३	२३	५	११	१०	१७
६	११	४	१	६	१२	१०	३०
७	९	४	१०	७	११	१०	४२
८	१२	४	२२	८	१२	१०	५४
९	१०	५	१	९	११	१०	६५
१०	९	५	१०	१०	१३	१०	७८
११	१०	५	२०	११	९	१०	९७
१२	११	६	५	१२	११	११	९
१३	११	६	१६	१३	१२	११	२१
१४	१०	७	७	१४	१२	१२	२
१५	९	८	१	१५	११	१२	१३

मासपारायणं यदा कृष्णादि तदा शुक्लांतं यदा शुक्लादि तदा कृष्णांतम् । एवं प्रजापालशादसर्वकामनाप्राप्तिमू° ष्ठकं बृहस्पतिमतमिदम् । एवं द्विमासत्रिकषाण्मासिक सांवत्सरिकादिकमपि पारायणं ज्ञेयम्॥बृहस्पतिमतस्योष्टः समाप्ता॥ मतांतरे वैशाखशुक्लपंचमीमारभ्य ज्येष्ठशुक्ल पंचमीं यावत् ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथ हनुमदादिषट्कवचप्रयोगः ॥ (श्रीमदानंदरामायणे मनोहरकांडे)आदौ नरैर्मारुतेश्च पठित्वा कवचं शुभम् ॥ ततः शत्रुघ्नकवचं पठनीयमिदं शुभम् ॥ १ ॥ पठनीयं भरतस्य कवचं परमं ततः ॥ ततः सौमित्रिकवचं पठनीयं सदा नरैः ॥ २ ॥ पठनीयं ततः सीताकवचं भाग्यवर्द्धनम् ॥ ततः श्रीरामचंद्रस्य कवचं सर्वदोत्तमम् ॥ ३ ॥ पठनीयं नरैर्भक्त्या सर्ववांछितदायकम् ॥ एवं षट् कवचान्यत्र पठनीयानि सर्वदा ॥ ४ ॥ पठनं षट्कवचानां श्रेष्ठं मोक्षैकसाधनम् ॥ ज्ञात्वात्र मानवैर्भक्त्या कार्यं च पठनं सदा ॥ ५ ॥ अशक्तेनात्र चत्वारि पठनीयानि सादरम् ॥ हनूमतश्च सौमित्रेः सीताया राघवस्य च ॥ ६ ॥ इमानि पठनीयानि चत्वारि कवचानि हि ॥ चतुर्णां कवचानां च पठने मानवाय च ॥ ७ ॥ न यद्यत्रावकाशश्चेत्तदा त्रीणि पठेन्नरः ॥ मारुतेश्चात्र सीताया स्तथा श्रीराघवस्य च ॥ ८ ॥ त्रयाणां कवचानां च न पाठावसरो यदा ॥ पठनार्थं मानवाय तदा द्वे कवचे स्मृते ॥ ९ ॥ मारुतेश्चाथ रामस्य सीताया राघवस्य वा ॥ नैकमेव पठेच्चात्र श्रीरामकवचं शुभम् ॥१०॥ अवकाशे कवचानां षट्कमेव सदा नरैः॥ पठनीयं क्रमेणैव कर्तव्यो नालसः कदा ॥ ११ ॥ यदावकाशो नास्त्येव तदा तेषां सुखाप्तये ॥ मया विशेषः प्रोक्तोऽयं न सर्वेषां मये रितः ॥ १२ ॥ तत्रादौ एकमुखिहनुमत्कवचप्रारम्भः ॥ एकदा सुखमासीनं शंकरं लोकशंकरम् ॥ प्रपच्छ गिरिजा कांतं कर्पूरधवल शिवम् ॥१॥ श्रीपार्वत्युवाच ॥ भगवन्देवदेवेश लोकनाथ जगत्प्रभो ॥ शोकाकुलानां लोकानां केन रक्षा भवेद्ध्रुवम् ॥२॥ संग्रामे संकटे घोरे भूतप्रेतादिके भये ॥ दुःखदावाग्निसंतप्तचेतसां दुःखभागिनाम् ॥ ३ ॥ श्रीमहादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि लोकानां हितकाम्यया ॥ विभीषणाय रामेण प्रेम्णा दत्तं च यत्पुरा ॥ ४ ॥ कवचं कपिनाथस्य वायुपुत्रस्य धीमतः ॥ गुह्यं तत्ते प्रवक्ष्यामि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषाच्छृणु सुंदरि ॥ ५ ॥ उद्यदादित्यसंकाशमुदारभुजविक्रमम् ॥ कंदर्पकोटिलावण्यं सर्वविद्याविशारदम् ॥ ६ ॥ श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ॥ अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥ ७ ॥ हनूमानंजनीसुनुर्वायुपुत्रो महाबलः ॥ रामेष्टः फाल्गुनसखः पिंगाक्षोऽमितविक्रमः ॥ ८ ॥ उदधिक्रमणश्चैव सीताशोकविनाशनः ॥ लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥ ९ ॥ एवं द्वादश नामानि कपींद्रस्य महात्मनः ॥ स्वापकाले प्रबोधे च यात्राकाले च यः पठेत् ॥ १० ॥ तस्य सर्वं भयं नास्ति रणे च विजयी भवेत् ॥ राजद्वारे गह्वरे च भयं नास्ति कदाचन ॥ ११ ॥ उल्लंघ्य सिंधोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ॥ आदाय तेनैव ददाह लंकां नमामि तं प्रांजलिरांजनेयम् ॥ १२ ॥ "ॐ नमो हनुमते सर्वसर्वग्रहान् भूतभविष्यद्वर्तमानान् समीपस्थान् सर्वकालदुष्टबुद्धीनुच्चाटयोच्चाटय परबलान् क्षोभयक्षोभय मम सर्वकार्याणि साधयसाधय ॐ ह्रां ह्रीं ह्रूं फट् घेघेघे ॐ शिवसिद्धिं ॐ ह्रां ॐ ह्रीं ॐ ह्रूं ॐ ह्रैं ॐ ह्रौं ॐ ह्रः स्वाहा परकृत्ययंत्रमंत्रपराहंकारभूतप्रेतपिशाचदृष्टिसर्वविघ्नदुर्जनचेष्टाकुविद्यासर्वोग्रभयानि निवारय २ बंध २ लुंठ २ विलुंच २ किलि ३ सर्वकुयंत्राणि दुष्टवाचं ॐ फट् स्वाहा" ॐ अस्य श्रीहनुमत्कवचस्तोत्रमंत्रस्य श्रीरामचन्द्र ऋषिः । श्रीहनुमान् परमात्मा देवता । अनुष्टुप्छंदः । मारुतात्मज इति बीजम् । अंजनीसूनुरिति शक्तिः । लक्ष्मणप्राणदातेति कीलकम् । रामदूतायेत्यस्त्रम् । हनुमान् देवता इति कवचम् । पिंगाक्षोऽमितविक्रम इति मंत्रः । श्रीरामचन्द्रप्रेरणया रामचन्द्रप्रीत्यर्थं मम सकलकामनासिद्ध्यर्थं जपे विनियोगः ॥ ॐ ह्रीं अंजनीसुताय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं रुद्रमूर्त्तये तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूं रामदूताय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रैं वायुपुत्राय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौं अग्निगर्भाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः ब्रह्मास्त्रनिवारणाय करतलकर

For Private And Personal Use Only

पृष्ठाभ्यां नमः॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रां अंजनीसुताय हृदयाय नमः ॥ १ ॥ ॐ ह्रीं रुद्रमूर्तये शिरसे स्वाहा ॥ २ ॥ ॐ ह्रूं रामदूताय शिखायै वषट् ॥ ३ ॥ ॐ ह्रैं वायुपुत्राय कवचाय हुम् ॥ ४ ॥ ॐ ह्रौं अग्निगर्भाय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः ब्रह्मास्त्रनिवारणाय अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ "ध्यायेद्बालदिवाकरद्युतिनिभं देवारिदर्पापहं देवेंद्रप्रमुखं प्रशस्तयशसं देदीप्यमानं रुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीतांबरालंकृतम् ॥ १ ॥ उद्यन्मार्तंडकोटिप्रकटरुचियुतं चारुवीरासनस्थं मौंजीयज्ञोपवीताभरणरुचिशिखं शोभितं कुण्डलांकम् ॥ भक्तानामिष्टदं तं प्रणतमुनिजनं वेदनादप्रमोदं ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम्॥ २॥ वज्रांगं पिंगकेशाढ्यं स्वर्णकुंडलमंडितम्॥ निगूढमुपसंगम्य पारावारपराक्रमम्॥ ३॥ स्फटिकाभं स्वर्णकांतिं द्विभुजं च कृतांजलिम् ॥ कुंडलद्वयसंशोभिमुखांभोजं हरिं भजे॥ ४॥ सव्यहस्ते गदायुक्तं वामहस्तकमंडलुम्॥ उद्यद्दक्षिणदोर्दंडं हनूमंतं विचिंतयेत्॥ ५॥" अथ मंत्रः॥ "ॐ नमो हनुमते शोभिताननाय यशोलंकृताय अंजनीगर्भसंभूताय रामलक्ष्मणानन्दकाय कपिसैन्यप्रकाशनपर्वतोत्पाटनाय सुग्रीवसाह्यकरणपरोच्चाटनकुमारब्रह्मचर्यगंभीरशब्दोदय ॐ ह्रीं सर्वदुष्टग्रहनिवारणाय स्वाहा ॥" "ॐ नमो हनुमते एहिएहिएहि सर्वग्रहभूतानां शाकिनीडाकिनीनां विषमदुष्टानां सर्वेषामाकर्षयाकर्षय मर्दयमर्दय छेदयच्छेदय मर्त्यान्मारयमारय शोषय २ प्रज्वल २ भूतमण्डलपिशाचमण्डलनिरसनाय भूतज्वरप्रेतज्वरचातुर्थिकज्वरब्रह्मराक्षसपिशाचच्छेदनक्रियाविष्णुज्वरमहेशज्वरान् छिंधिच्छिंधि भिंधिभिंधि अक्षिशूले शिरोभ्यंतरे ह्यक्षिशूले गुल्मशूले पित्तशूले ब्रह्मराक्षसकुलप्रबलनागकुलविनिर्विषझटिति २ ॐ ह्रीं फट् घेघे स्वाहा॥" "ॐ नमो हनुमते पवनपुत्रवैश्वानरमुखपापदृष्टिषोढादृष्टिहनुमते का आज्ञा फुरे स्वाहा" स्वगृहे द्वारे पट्टके तिष्ठ

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिष्ठेति तत्र रोगभयं राजकुलभयं नास्ति तस्योच्चारणमात्रेण सर्वे ज्वरा नश्यंति ॐ ह्रॉं ह्रीं ह्रूं घेघे स्वाहा॥ "श्रीरामचन्द्र उवाच ॥ हनुमान्
पूर्वतः पातु दक्षिणे पवनात्मजः ॥ पातु प्रतीच्यां रक्षोघ्नः पातु सागरपारगः ॥ १ ॥ उदीच्यामूर्ध्वगः पातु केसरीप्रियनन्दनः ॥ अधस्तु
विष्णुभक्तश्च पातु मध्यं तु पावनिः ॥ २ ॥ लंकाविदाहकः पातु सर्वापद्भ्यो निरंतरम् ॥ सुग्रीवसचिवः पातु मस्तकं वायुनंदनः ॥३॥
भालं पातु महावीरो भ्रुवोर्मध्ये निरंतरम् ॥ नेत्रे छायापहारी च पावनः प्लवगेश्वरः ॥ ४ ॥ कपोले कर्णमूले च पातु श्रीरामकिंकरः ॥
नासाग्रमंजनीसूनुः पातु वक्त्रं हरीश्वरः ॥ ५ ॥ वाचं रुद्रप्रियः पातु जिह्वां पिंगललोचनः ॥ पातु देवः फाल्गुनेष्टश्चुबुकं दैत्यदर्पहा ॥
॥ ६ ॥ पातु कंठं च दैत्यारिः स्कंधौ पातु सुरार्चितः ॥ भुजौ पातु महातेजाः करौ च चरणायुधः ॥ ७ ॥ नखान्नखायुधः पातु
कुक्षौ पातु कपीश्वरः ॥ वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः ॥ ८ ॥ लंकाविभंजनः पातु पृष्ठदेशे निरंतरम् ॥ नाभिं च रामदू
तस्तु कटिं पात्वनिलात्मजः ॥ ९ ॥ गुह्यं पातु महाप्राज्ञो लिंगं पातु शिवप्रियः ॥ ऊरू च जानुनी पातु लंकाप्रासादभंजनः ॥ १०॥
जंघे पातु कपिश्रेष्ठो गुल्फौ पातु महाबलः ॥ अचलोद्धारकः पातु पादौ भास्करसन्निभः ॥ ११ ॥ अंगान्यमितसत्त्वाढ्यः पातु पादां
गुलीस्तथा ॥ सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवित् ॥ १२ ॥ हनुमत्कवचं यस्तु पठेद्विद्वान्विचक्षणः ॥ स एव पुरुषश्रेष्ठो भुक्तिं
मुक्तिं च विंदति ॥ १३ ॥ त्रिकालमेककालं वा पठेन्मासत्रयं नरः ॥ सर्वान् रिपून्क्षणाज्जित्वा स पुमान् श्रियमाप्नुयात् ॥ १४ ॥
मध्यरात्रे जले स्थित्वा सप्तवारं पठेद्यदि ॥ क्षयापस्मारकुष्ठादितापत्रयनिवारणः॥ १५॥ अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान्॥ अ
चलां श्रियमाप्नोति संग्रामे विजयं तथा॥ १६॥ बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगताम्॥ सुदार्ढ्यं वाक्स्फुरत्वं च हनुमत्स्मरणाद्भवेत् ॥ १७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मारणं वैरिणां सद्यः शरणं सर्वसंपदाम् ॥ शोकस्य हरणे दक्षं वंदे तं रणदारुणम् ॥ १८ ॥ लिखित्वा पूजयेद्यस्तु सर्वत्र विजयी भवेत् ॥ यः करे धारयेन्नित्यं स पुमाञ्छ्रियमाप्नुयात् ॥ १९ ॥ स्थित्वा तु बंधने यस्तु जपं कारयति द्विजैः ॥ तत्क्षणान्मुक्तिमाप्नोति निगडात्तु तथैव च ॥ २० ॥ य इदं प्रातरुत्थाय पठेच्च कवचं सदा ॥ आयुरारोग्यसंतानैस्तस्य स्तव्यः स्तवो भवेत् ॥ २१ ॥ इदं पूर्वं पठित्वा तु रामस्य कवचं ततः ॥ पठनीयं नरैर्भक्त्या नैकमेव पठेत्कदा ॥ २२ ॥ हनुमत्कवचं चात्र श्रीरामकवचं विना ॥ ये पठंति नराश्चात्र पठनं तद्वृथा भवेत् ॥ २३ ॥ तस्मात्सर्वैः पठनीयं सर्वदा कवचद्वयम् ॥ रामस्य वायुपुत्रस्य सद्भक्तैश्च विशेषतः ॥ २४ ॥ इति श्रीमदानन्दरामायणे श्रीरामकृतैकमुखिहनुमत्कवचं समाप्तम् ॥ १ ॥ अथ शत्रुघ्नकवचप्रारंभः ॥ शत्रुघ्नं धृतकार्मुकं धृतमहातूणीरबाणोत्तमं पार्श्वे श्रीरघुनंदनस्य विनयाद्वामे स्थितं सुंदरम् ॥ रामं स्वीयकरेण तालदलजं धृत्वाऽतिचित्रं वरं सूर्याभं व्यजनं सभास्थितमहं तं वीजयंतं भजे ॥ १ ॥ अस्य श्रीशत्रुघ्नकवचमंत्रस्य अगास्तिर्ऋषिः । श्रीशत्रुघ्नो देवता । अनुष्टुप् छंदः । सुदर्शन इति बीजम् ॥ कैकेयीनन्दन इति शक्तिः । श्रीभरतानुज इति कीलकम् । भरतमंत्रीत्यस्त्रम् । श्रीरामदास इति कवचम् । लक्ष्मणांशज इति मंत्रः ॥ श्रीशत्रुघ्नप्रीत्यर्थं सकलमनःकामनासिद्ध्यर्थं जपे विनियोगः ॥ ॐ शत्रुघ्नाय अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ सुदर्शनाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ कैकेयीनन्दनाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ भरतानुजाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ भरतमंत्रिणे कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ रामदासाय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ शत्रुघ्नाय हृदयाय नमः ॥ १ ॥ ॐ सुदर्शनाय शिरसे स्वाहा ॥ २ ॥ ॐ कैकेयीनन्दनाय शिखायै वषट् ॥ ३ ॥ ॐ भरतानुजाय कवचाय हुम् ॥ ४ ॥

For Private And Personal Use Only

ॐ भरतमंत्रिणे नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ रामदासाय अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ रामस्य संस्थितं वामे पार्श्वे विनयपूर्वकम्॥कैकेयीनन्दनं सौम्यं मुकुटेनातिरंजितम् ॥१॥ रत्नकंकणकेयूरवनमालाविराजितम् ॥ रशनाकुंडलधरं रत्नहारसनूपुरम् ॥ २ ॥ व्यजनेन वीजयंतं जानकीकांतमादरात् ॥ रामन्यस्तेक्षणं वीरं कैकेयीतोषवर्द्धनम् ॥ ३ ॥ द्विभुजं कंजनयनं दिव्यपीतांबरान्वितम् ॥ सुभुजं सुन्दरं मेघश्यामलं सुन्दराननम् ॥ ४ ॥ रामवाक्ये दत्तकर्णं रक्षोघ्नं खड्गधारिणम् ॥ धनुर्बाणधरं श्रेष्ठं धृततूणीरमुत्तमम् ॥ ५ ॥ सभायां संस्थितं रम्यं कस्तूरीतिलकांकितम् ॥ मुकुटस्थावतंसेन शोभितं च स्मिताननम् ॥ ६॥ रविवंशोद्भवं दिव्यरूपं दशरथात्मजम् ॥ मथुरावासिनं देवं लवणासुरमर्दनम् ॥ ७ ॥ इति ध्यात्वा तु शत्रुघ्नं रामपादेक्षणं हृदि ॥ पठनीयं वरं चेदं कवचं तस्य पावनम् ॥ ८ ॥ पूर्वे त्ववतु शत्रुघ्नः पातु याम्ये सुदर्शनः ॥ कैकेयीनन्दनः पातु प्रतीच्यां सर्वदा मम॥९॥ पातूदीच्यां रामबन्धुः पात्वधो भरतानुजः ॥ रविवंशोद्भवश्चोर्ध्वं मध्ये दशरथात्मजः ॥ १० ॥ सर्वतः पातु मामत्र कैकेयीतोषवर्द्धनः॥ श्यामलांगः शिरः पातु भालं श्रीलक्ष्मणांशजः ॥ ११ ॥ भ्रुवोर्मध्ये सदा पातु सुमुखोऽत्रावनीतले ॥ श्रुतकीर्तिपतिर्नेत्रे कपोले पातु राघवः ॥ १२ ॥ कर्णौ कुण्डलकर्णोऽव्यान्नासाग्रं नृपवंशजः ॥ मुखं मम युवा पातु पातु वाणीं स्फुटाक्षरः ॥ १३ ॥ जिह्वां सुबाहुतातोऽव्याद्यूपकेतुपिता द्विजान् ॥ चबुकं रम्यचुबुकः कंठं पातु सुभाषणः ॥ १४ ॥ स्कंधौ पातु महातेजा भुजौ राघववाक्यकृत ॥ करौ मे कंकणधरः पातु खड्गी नखान्मम ॥ १५ ॥ कुक्षी रामप्रियः पातु पातु वक्षो रघूत्तमः ॥ पार्श्वे सुरार्चितः पातु पातु पृष्ठिं वराननः ॥ १६ ॥ जठरं पातु रक्षोघ्नः पातु नाभिं सुलोचनः ॥ कटी भरतमंत्री मे गुह्यं श्रीरामसेवकः ॥ १७ ॥ रामार्पितमनाः

For Private And Personal Use Only

पातु लिंगमूरू स्मिताननः ॥ कोदंडधारी पात्वत्र जानुनी मम सर्वदा ॥ १८ ॥ राममित्रः पातु जंघे गुल्फौ पातु मुनूपुरः ॥ पादौ नृपतिपूज्योऽव्याच्छ्रीमान्पादांगुलीर्मम ॥ १९ ॥ पात्वंगानि समस्तानि ह्युदारांगः सदा मम ॥ रोमाणि रमणीयोऽव्याद्रात्रौ पातु सुधा मिंकः ॥२०॥ दिवा मे सत्यसंधोऽव्याद्भोजने शरसत्करः ॥ गमने कलकंठोऽव्यात्सर्वदा लवणांतकः ॥ २१ ॥ एवं शत्रुघ्नकवचं मया ते समुदीरितम् ॥ ये पठंति नरास्त्वेतत्ते नराः सौख्यभागिनः ॥ २२ ॥ शत्रुघ्नस्य वरं चेदं कवचं मंगलप्रदम् ॥ पठनीयं नरैर्भक्त्या पुत्र पौत्रप्रवर्द्धनम् ॥ २३ ॥ अस्य स्तोत्रस्य पाठेन यंयं कामं नरोऽर्थयेत् ॥ तंतं लभेन्निश्चयेन सत्यमेतद्वचो मम ॥ २४ ॥ पुत्रार्थी प्राप्नुयात्पुत्रं धनार्थी धनमाप्नुयात ॥ इच्छाकामं तु कामार्थी प्राप्नुयात्पठनादिना ॥२५॥ कवचस्यास्य भूम्यां हि शत्रुघ्नस्य विनिश्चयात् ॥ तस्मादेतत्सदा भक्त्या पठनीयं नरैः शुभम् ॥२६॥ इति श्रीमदानंदरामायणे सुतीक्ष्णागस्त्यसंवादे शत्रुघ्नकवचं समाप्तम् ॥ २ ॥ अथ भरतकवचप्रारंभः ॥ अतः परं भरतस्य कवचं ते वदाम्यहम् ॥ सर्वपापहरं पुण्यं सदा श्रीरामभक्तिदम् ॥ १ ॥ कैकेयीतनयं सदा रघुवरन्यस्तेक्षणं श्यामलं सप्तद्वीपपतेर्विदेहतनयाकांतस्य वाक्ये रतम् ॥ श्रीसीताधवसव्यपार्श्वनिकटे स्थित्वा वरं चामरं धृत्वा दक्षिणसत्करेण भरतं तं वीजयंतं भजे ॥ २ ॥ अस्य श्रीभरतकवचमंत्रस्यागस्त्य ऋषिः ॥ श्रीभरतो देवता । अनुष्टुप् छंदः । शंख इति बीजम् । कैकेयीनंदन इति शक्तिः । भरतखण्डेश्वर इति कीलकम् । रामानुज इत्यस्त्रम् । सप्तद्वीपेश्वरदास इति कवचम् । रामांशज इति मंत्रः । श्रीभरतप्रीत्यर्थं सकलमनोरथसिद्ध्यर्थं जपे विनियोगः ॥ॐ भरताय अंगुष्ठाभ्यां नमः ॥१॥ ॐ शंखाय तर्जनीभ्यां नमः ॥ २ ॥ ॐ कैकयीनंदनाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ भरतखंडेश्वराय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ रामानुजाय कनिष्ठिकाभ्यां नमः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ५ ॥ ॐ सप्तद्वीपेश्वराय करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ भरताय हृदयाय नमः ॥ १ ॥ ॐ शंखाय शिरसे स्वाहा ॥ २ ॥ ॐ कैकेयीनंदनाय शिखायै वषट् ॥ ३ ॥ ॐ भरतखंडेश्वराय कवचाय हुम् ॥ ४ ॥ ॐ रामानुजाय नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ सप्तद्वीपेश्वराय अस्त्राय फट् ॥६॥ ॐ रामांशजाय चेति दिग्बंधः ॥७॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ ॐ रामचन्द्रसव्यपार्श्वे स्थितं केकयजासुतम् ॥ रामाय चामरेणैव वीजयंतं मनोरमम् ॥ १ ॥ रत्नकुंडलकेयूरकंकणादिसुभूषितम् ॥ पीतांबरपरीधानं वनमालाविराजितम् ॥ २ ॥ मांडवीधौतचरणं रशनानूपुरान्वितम् ॥ नीलोत्पलदलश्यामं द्विजराजसमाननम् ॥ ३ ॥ आजानुबाहुं भरतखंडस्य प्रतिपालकम् ॥ रामानुजं स्मितास्यं च शत्रुघ्नपरिवंदितम् ॥ ४ ॥ रामन्यस्तेक्षणं सौम्यं विद्युत्पुंजसमप्रभम् ॥ रामभक्तं महावीरं वंदे तं भरतं शुभम्॥५॥एवं ध्यात्वा तु भरतं रामपादेक्षणं हृदि ॥ कवचं पठनीयं हि भरतस्येदमुत्तमम् ॥६॥ ॐ पूर्वतो भरतः पातु दक्षिणे कैकयीसुतः ॥ नृपात्मजः प्रतीच्यां हि पातूदीच्यां रघूत्तमः ॥ १ ॥ अधः पातु श्यामलाङ्गश्चोर्ध्वं दशरथात्मजः ॥ मध्ये भरतवर्षेशः सर्वतः सूर्यवंशजः ॥ २ ॥ शिरस्तक्षपिता पातु भालं पातु हरिप्रियः ॥ भ्रुवोर्मध्यं जनकजावाक्यैकतत्परोऽवतु ॥ ३ ॥ पातु जनकजामाता मम नेत्रे सदाऽत्र हि ॥ कपोलौ मांडवीकांतः कर्णमूले स्मिताननः ॥ ४ ॥ नासाग्रं मे सदा पातु कैकेयीतोषवर्द्धनः ॥ उदारांगो मुखे पातु वाणीं पातु जटाधरः ॥ ५ ॥ पातु पुष्करताततो मे जिह्वां दंतान् प्रभामयः ॥ चुबुकं वल्कलधरः कंठं पातु वराननः ॥ ६ ॥ स्कंधौ पातु जितारातिर्भुजौ शत्रुघ्नवंदितः ॥ करौ कवचधारी च नखान् खड्गधरोऽवतु ॥ ७ ॥ कुक्षी रामानुजः पातु वक्षः श्रीरामवल्लभः ॥ पार्श्वे राघवपार्श्वस्थः पातु पृष्ठं सुभाषणः ॥ ८ ॥ जठरं च धनुर्धारी नाभिं शरकरोऽवतु ॥ कटिं पद्मेक्षणः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पातु गुह्यं रामैकमानसः ॥ ९ ॥ राममित्रः पातु लिंगमूरू श्रीरामसेवकः ॥ नंदिग्रामस्थितः पातु जानुनी मम सर्वदा ॥ १० ॥ श्रीराम पादुकाधारी पातु जंघे सदा मम ॥ गुल्फौ श्रीरामबंधुश्च पादौ पातु मुरार्चितः ॥ ११ ॥ रामाज्ञापालकः पातु ममांगान्यत्र सर्वदा ॥ मम पादांगुलीः पातु रघुवंशसुभूषणः ॥ १२ ॥ रोमाणि पातु मे रम्यः पातु रात्रौ सुधीर्मम ॥ तूणीरधारी दिवसं दिक्पातु मम सर्वदा ॥१३॥ सर्वकालेषु मां पातु पांचजन्यः सदा भुवि ॥ एवं श्रीभरतस्येदं सुतीक्ष्णकवचं शुभम् ॥ १४ ॥ मया प्रोक्तं तवाग्रे हि महा मंगलकारकम् ॥ स्तोत्राणामुत्तमं स्तोत्रमिदं ज्ञेयं सुपुण्यदम् ॥१५॥ पठनीयं सदा भक्त्या रामचंद्रस्य हर्षदम् ॥ पठित्वा भरतस्येदं कवचं रघुनंदनः ॥१६॥ यथा याति परं तोषं तथा स्वकवचेन न ॥ तस्मादेतत्सदा जप्यं कवचानामनुत्तमम् ॥१७॥ अस्यात्र पठना न्मर्त्यः सर्वान्कामानवाप्नुयात् ॥ विद्याकामो लभेद्विद्यां पुत्रकामो लभेत्सुतम् ॥१८॥ पत्नीकामो लभेत् पत्नीं धनार्थी धनमाप्नुयात् ॥ यद्यन्मनोभिलषितं तत्तत्कवचपाठतः॥१९॥लभ्यते मानवैरत्र सत्यंसत्यं वदाम्यहम् ॥ तस्मात्सदा जपनीयं रामोपासकमानवैः ॥ २० ॥ इति श्रीमदानंदरामायणे सुतीक्ष्णागस्त्यसंवादे श्रीभरतकवचं समाप्तम् ॥ ३ ॥ अथ लक्ष्मणकवचप्रारंभः ॥ अगस्त्य उवाच ॥ सौमित्रिं रघुनायकस्य चरणद्वंद्वेक्षणं श्यामलं बिभ्रंतं स्वकरेण रामशिरसि च्छत्रं विचित्रांबरम् ॥ बिभ्रंतं रघुनायकस्य सुमहत्कोदंडबाणासने तं वंदे कमलेक्षणं जनकजावाक्ये सदा तत्परम् ॥ १ ॥ अस्य श्रीलक्ष्मणकवचमंत्रस्य अगस्त्य ऋषिः। अनुष्टुप् छंदः । श्रीलक्ष्मणो देवता । शेष इति बीजम्। सुमित्रानन्दन इति शक्तिः। रामानुज इति कीलकम् । रामदास इत्यस्त्रम्।रघुवंशज इति कवचम् । सौमित्रिरिति मंत्रः। श्रीलक्ष्मणप्रीत्यर्थं सकलमनोभिलषितसिद्ध्यर्थं जपे विनियोगः ॥ ॐ लक्ष्मणाय अंगुष्ठाभ्यां नमः॥ १ ॥ॐ शेषाय तर्जनीभ्यां नमः॥ २॥

For Private And Personal Use Only

ॐ सुमित्रानंदनाय मध्यमाभ्यां नमः ॥ ३ ॥ ॐ रामानुजाय अनामिकाभ्यां नमः ॥ ४ ॥ ॐ रामदासाय कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ रघुवंशजाय करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः ॥ ॐ लक्ष्मणाय हृदयाय नमः ॥ १ ॥ ॐ शेषाय शिरसे स्वाहा ॥२॥ ॐ सुमित्रानन्दनाय शिखायै वषट् ॥ ३ ॥ ॐ रामानुजाय कवचाय हुम् ॥४॥ ॐ रामदासाय नेत्रत्रयाय वौषट् ॥५॥ रघुवंशजाय अस्त्राय फट् ॥६॥ ॐ सौमित्रये इति दिग्बंधः ॥ ७ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ रामपृष्ठस्थितं रम्यं रत्नकुंडलधारिणम् ॥ नीलोत्पलदलश्यामं रत्नकंकणमंडितम् ॥ १ ॥ रामस्य मस्तके दिव्यं बिभ्रतं छत्रमुत्तमम् ॥ वरपीतांबरधरं मुकुटेनातिशोभितम् ॥ २ ॥ तूणीरं कार्मुकं चापि बिभ्रतं च स्मिताननम् ॥ रत्नमालाधरं दिव्यं पुष्पमालाविराजितम् ॥ ३ ॥ एवं ध्यात्वा लक्ष्मणं च राघवन्यस्तलोचनम् ॥ कवचं जपनीयं हि ततो भक्त्यात्र मानवैः ॥ ४ ॥ लक्ष्मणः पातु मे पूर्वे दक्षिणे राघवानुजः ॥ प्रतीच्यां पातु सौमित्रिः पातूदीच्यां रघूत्तमः ॥ ५ ॥ अधः पातु महावीरश्चोर्ध्वं पातु नृपात्मजः ॥ मध्ये पातु रामदासः सर्वतः सत्यपालकः ॥ ६ ॥ स्मिताननः शिरः पातु भालं पातूर्मिलाधवः ॥ भ्रुवोर्मध्ये धनुर्धारी सुमित्रानंदनोऽक्षिणी ॥ ७ ॥ कपोले राममंत्री च सर्वदा पातु वै मम ॥ कर्णमूले सदा पातु कबंधभुजखण्डनः ॥ ८ ॥ नासाग्रं मे सदा पातु सुमित्रानंदवर्धनः ॥ रामन्यस्तेक्षणः पातु सदा मेऽत्र मुखं भुवि ॥ ९ ॥ सीतावाक्यकरः पातु मम वाणीं सदाऽत्र हि ॥ सौम्यरूपः पातु जिह्वामनंतः पातु मे द्विजान् ॥ १० ॥ चिबुकं पातु रक्षोघ्नः कंठं पात्वसुरार्दनः ॥ स्कंधौ पातु जितारातिर्भुजौ पंकजलोचनः ॥ ११ ॥ करौ कंकणधारी च नखान् रक्तनखोऽवतु ॥ कुक्षिं पातु विनिद्रो मे वक्षः पातु जितेन्द्रियः ॥ १२ ॥ पार्श्वे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राघवपृष्ठस्थः पृष्ठदेशं मनोरमः ॥ नाभिं गंभीरनाभिस्तु कटिं च रुक्ममेखलः ॥ १३ ॥ गुह्यं पातु सहस्रास्यः पातु लिंगं हरि प्रियः ॥ ऊरू पातु विष्णुतुल्यः सुमुखोऽवतु जानुनी ॥ १४ ॥ नागेन्द्रः पातु मे जंघे गुल्फौ नूपुरवान्मम ॥ पादावंगदतातोऽव्यात्पात्वं गानि सुलोचनः ॥ १५ ॥ चित्रकेतुपिता पातु मम पादांगुलीः सदा ॥ रोमाणि मे सदा पातु रविवंशसमुद्भवः ॥ १६ ॥ दशरथसुतः पातु निशायां मम सादरम् ॥ भूगोलधारी मां पातु दिवसेदिवसे सदा ॥ १७ ॥ सर्वकालेषु मामिंद्रजिद्धंताऽवतु सर्वदा ॥ एवं सौमित्रि कवचं सुतीक्ष्ण कथितं मया ॥१८॥ इदं प्रातः समुत्थाय ये पठंत्यत्र मानवाः ॥ ते धन्या मानवा लोके तेषां च सफलो भवः ॥१९॥ सौमित्रेः कवचस्यास्य पठनान्निश्चयेन हि ॥ पुत्रार्थी लभते पुत्रान्धनार्थी धनमाप्नुयात् ॥ २० ॥ पत्नीकामो लभेत्पत्नीं गोधनार्थी तु गोधनम् ॥ धान्यार्थी प्राप्नुयाद्धान्यं राज्यार्थी राज्यमाप्नुयात् ॥ २१ ॥ पठितं रामकवचं सौमित्रिकवचं विना ॥ घृतेन हीनो नैवेद्य स्तेन दत्तो न संशयः ॥ २२ ॥ केवलं रामकवचं पठितं मानवैर्यदि ॥ तत्पाठेन तु संतुष्टो न भवेद्रघुनन्दनः ॥ २३ ॥ अतः प्रयत्न तश्चेदं सौमित्रिकवचं नरैः॥ पठनीयं सर्वदैव सर्ववांछितदायकम् ॥२४॥ इति श्रीमदानन्दरामायणे सुतीक्ष्णागस्त्यसंवादे श्रीलक्ष्मणकवचं समाप्तम् ॥ ४ ॥ अथ सीताकवचप्रारम्भः ॥ या सीताऽवनिसंभवाऽथ मिथिलापालेन संवर्द्धिता पद्माक्षावनिभुक्सुताऽनलगता या मातु लिंगोद्भवा ॥ या रत्ने लयमागता जलनिधौ या वेदवारं गता लंकां सा मृगलोचना शशिमुखी मां पातु रामप्रिया ॥ १ ॥ अस्य श्रीसी ताकवचस्तोत्रमंत्रस्य अगस्तिर्ऋषिः । श्रीसीता देवता । अनुष्टुप् छन्दः । रमेति बीजम् । जनकजेति शक्तिः । अवनिजेति कीलकम् । पद्माक्षसुतेत्यस्त्रम् । मातुलिंगीति कवचम् । मूलकासुरघातिनीति मंत्रः॥ श्रीसीतारामचन्द्रप्रीत्यर्थं सकलकामनासिद्ध्यर्थं च जपे विनियोगः॥

For Private And Personal Use Only

ॐ ह्रां सीतायै अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं रमायै तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूं जनकजायै मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रैं अवनिजायै अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौं पद्माक्षसुतायै कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः मातुलिंग्यै करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रां सीतायै हृदयाय नमः ॥ १ ॥ ॐ ह्रीं रमायै शिरसे स्वाहा ॥ २ ॥ ॐ ह्रूं जनकजायै शिखायै वषट् ॥ ३ ॥ ॐ ह्रैं अवनिजायै कवचाय हुम् ॥ ४ ॥ ॐ ह्रौं पद्माक्षसुतायै नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः मातुलिंग्यै अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ अथ ध्यानम् ॥ "ॐ सीतां कमलपत्राक्षीं विद्युत्पुंजसमप्रभाम् ॥ द्विभुजां सुकुमारांगीं पीतकौशेयवासिनीम् ॥ १ ॥ सिंहासने रामचन्द्रवामभागस्थितां वराम् ॥ नानालंकारसंयुक्तां कुंडलद्वयधारिणीम् ॥ २ ॥ चूडाकंकणकेयूररशनानूपुरान्विताम् ॥ सीमन्ते रविचन्द्राभ्यां निटिले तिलकेन च ॥ ३ ॥ नूपुराभरणेनापि घ्राणेऽतिशोभितां शुभाम् ॥ हरिद्रां कज्जलं दिव्यं कुंकुमं कुसुमानि च ॥ ४ ॥ बिभ्रतीं सुरभिद्रव्यं सुगंधस्नेहमुत्तमम् ॥ स्मिताननां गौरवर्णां मंदारकुसुमं करे ॥ ५ ॥ बिभ्रतीमपरे हस्ते मातुलिंगमनुत्तमम् ॥ रम्यहासां च बिंबोष्ठीं चन्द्रवाहनलोचनाम् ॥ ६ ॥ कलानाथसमानास्यां कलकंठमनोरमाम् ॥ मातुलिंगोद्भवां देवीं पद्माक्षदुहितां शुभाम् ॥ ७ ॥ मैथिलीं रामदयितां दासीभिः परिवीजिताम् ॥ एवं ध्यात्वा जनकजां हेमकुंभपयोधराम् ॥ ८ ॥ श्रीसीता पूर्वतः पातु दक्षिणेऽवतु जानकी ॥ प्रतीच्यां पातु वैदेही पातूदीच्यां च मैथिली ॥ ९ ॥ अधः पातु मातुलिंगी ऊर्ध्वं पद्माक्षजाऽवतु ॥ मध्येऽवनिसुता पातु सर्वतः पातु मां रमा ॥ १० ॥ स्मिताननाशिरः पातु पातु भालं नृपात्मजा ॥ पद्माऽवतु भ्रुवोर्मध्ये मृगाक्षी नयनेऽवतु ॥ ११ ॥ कपोले कर्णमूले च पातु श्रीरामवल्लभा ॥ नासाग्रं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सात्त्विकी पातु पातु वक्त्रं तु राजसी ॥ १२ ॥ तामसी पातु मद्वाणीं पातु जिह्वां पतिव्रता ॥ दंतान् पातु महामाया चिबुकं कनकप्रभा ॥ १३ ॥ पातु कंठं सौम्यरूपा स्कंधौ पातु सुरार्चिता ॥ भुजौ पातु वरारोहा करौ कंकणमंडिता ॥ १४ ॥ नखान् रक्तनखा पातु कुक्षौ पातु लघूदरा ॥ वक्षः पातु रामपत्नी पार्श्वे रावणमोहिनी ॥ १५ ॥ पृष्ठदेशे वह्निगुप्ताऽवतु मां सर्वदैव हि ॥ दिव्यप्रदा पातु नाभिं कटिं राक्षसमोहिनी ॥ १६ ॥ गुह्यं पातु रत्नगुप्ता लिंगं पातु हरिप्रिया ॥ ऊरू रक्षतु रंभोरूर्जानुनी प्रियभाषिणी ॥ १७ ॥ जंघे पातु सदा सुभ्रूर्गुल्फौ चामरवीजिता ॥ पादौ लवसुता पातु पात्वंगानि कुशांबिका ॥ १८ ॥ पादांगुलीः सदा पातु मम नूपुरनिःस्वना ॥ रोमाण्यवतु मे नित्यं पीतकौशेयवासिनी ॥ १९ ॥ रात्रौ पातु कालरूपा दिने दानैकतत्परा ॥ सर्वकालेषु मां पातु मूलकासुरघातिनी ॥ २० ॥ एवं सुतीक्ष्ण सीतायाः कवचं ते मयेरितम् ॥ इदं प्रातः समुत्थाय स्नात्वा नित्यं पठेत्पुनः ॥ २१ ॥ जानकीं पूजयित्वा स सर्वान्कामानवाप्नुयात् ॥ धनार्थी प्राप्नुयाद्द्रव्यं पुत्रार्थी पुत्रमाप्नुयात् ॥ २२ ॥ स्त्रीकामार्थी शुभां नारीं सुखार्थी सौख्यमाप्नुयात् ॥ अष्टवारं जापनीयं सीतायाः कवचं सदा ॥ २३ ॥ अष्टभूसुरसीतायै नरैः प्रीत्यार्पयेत्सदा ॥ फलपुष्पादिकादीनि यानि तानि पृथक्पृथक् ॥ २४ ॥ सीतायाः कवचं चेदं पुण्यं पातकनाशनम् ॥ ये पठंति नरा भक्त्या ते धन्या मानवा भुवि ॥ २५ ॥ पठंति रामकवचं सीतायाः कवचं विना ॥ तथा विना लक्ष्मणस्य कवचेन वृथा स्मृतम् ॥ २६ ॥ इति श्रीमदानंदरामायणे मनोहरकांडे सुतीक्ष्णागस्त्यसंवादे श्रीसीतायाः कवचं समाप्तम् ॥ ५ ॥ अथ श्रीरामकवचप्रारंभः ॥ "आजानुबाहुमरविंददलायताक्षमाजन्मशुद्धरसहासमुखप्रसादम् ॥ श्यामं गृहीतशरचापमुदाररूपं रामं सराममभिराममनुस्मरामि ॥ १ ॥ "अस्य श्रीराम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कवचस्य अगस्त्य ऋषिः । अनुष्टुप्छंदः । सीतालक्ष्मणोपेतः श्रीरामचन्द्रो देवता । श्रीरामचन्द्रप्रसादसिद्ध्यर्थं जपे विनियोगः ॥ अथ ध्यानम् ॥ "नीलजीमूतसंकाशं विद्युद्वर्णांबरावृतम् ॥ कोमलांगं विशालाक्षं युवानमतिसुंदरम् ॥ १ ॥ सीतासौमित्रिसहितं जटामुकुटधारिणम् ॥ सासितूणधनुर्बाणपाणिं दानवमर्दनम् ॥ २ ॥ यदा चोरभये राजभये शत्रुभये तथा ॥ ध्यात्वा रघुपतिं क्रुद्धं कालानलसमप्रभम् ॥ ३ ॥ चीरकृष्णाजिनधरं भस्मोद्धूलितविग्रहम् ॥ आकर्णाकृष्टशरकोदंडभुजमंडितम् ॥ ४ ॥ रणे रिपून् रावणादींस्तीक्ष्णमार्गणवृष्टिभिः ॥ संहरंतं महावीरमुग्रमैंद्ररथस्थितम् ॥ ५ ॥ लक्ष्मणाद्यैर्महावीरैर्वृतं हनुमदादिभिः ॥ सुग्रीवाद्यैर्महावीरैः शैलवृक्षकरोद्यतैः ॥ ६ ॥ वेगात्करालहुंकारैर्भुभुक्कारमहारवैः ॥ नदद्भिः परिवादद्भिः समरे रावणं प्रति ॥ ७ ॥ श्रीराम शत्रुसंघान्मे हन मर्दय खादय ॥ भूतप्रेतपिशाचादीन् श्रीरामाशुविनाशय ॥ ८ ॥ एवं ध्यात्वा जपेद्रामकवचं सिद्धिदायकम् ॥ सुतीक्ष्णवज्रकवचं शृणु वक्ष्याम्यनुत्तमम् ॥ ९ ॥ श्रीरामः पातु मे मूर्ध्नि पूर्वे च रघुवंशजः ॥ दक्षिणे मे रघुवरः पश्चिमे पातु पावनः ॥ १ ॥ उत्तरे मे रघुपतिर्भालं दशरथात्मजः ॥ भ्रुवोर्दूर्वादलश्यामस्तयोर्मध्ये जनार्दनः ॥ २ ॥ श्रोत्रं मे पातु राजेन्द्रो दृशौ राजीवलोचनः ॥ घ्राणं मे पातु राजर्षिर्गंडौ मे जानकीपतिः ॥ ३ ॥ कर्णमूले खरध्वंसी भालं मे रघुवल्लभः ॥ जिह्वां मे वाक्पतिः पातु दंतावली रघूत्तमः ॥४॥ ओष्ठौ श्रीरामचंद्रो मे मुखं पातु परात्परः ॥ कंठं पातु जगद्वंद्यः स्कंधौ मे रावणांतकः ॥ ५ ॥ धनुर्बाणधरः पातु भुजौ मे वालिमर्दनः ॥ सर्वाण्यंगुलिपर्वाणि हस्तौ मे राक्षसांतकः ॥ ६ ॥ वक्षो मे पातु काकुत्स्थः पातु मे हृदयं हरिः ॥ स्तनौ सीतापतिः पातु पार्श्वे मे जगदीश्वरः ॥ ७ ॥ मध्यं मे पातु लक्ष्मीशो नाभिं मे रघुनायकः ॥ कौसल्येयः कटिं पातु पृष्ठं दुर्गतिनाशनः ॥ ८ ॥ गुह्यं पातु हृषीके

For Private And Personal Use Only

शः सक्थिनी सत्यविक्रमः ॥ ऊरू शार्ङ्गधरः पातु जानुनी हनुमत्प्रियः ॥ ९ ॥ जंघे पातु जगद्वचापी पादौ मे ताडिकांतकः ॥ सर्वांगं पातु मे विष्णुः सर्वसंधानमामयः ॥ १० ॥ ज्ञानेन्द्रियाणि प्राणादीन् पातु मे मधुसूदनः ॥ पातु श्रीरामभद्रो मे शब्दादीन्विषयानपि ॥ ११ ॥ द्विपदादीनि भूतानि मत्संबंधीनि यानि च ॥ जामदग्न्यमहादर्पदलनः पातु तानि मे ॥ १२ ॥ सौमित्रिपूर्वजः पातु वागादीनींद्रियाणि च ॥ रोमांकुराण्यशेषाणि पातु सुग्रीवराज्यदः ॥ १३ ॥ वाङ्मनोबुद्ध्यहंकारैर्ज्ञानाज्ञानकृतानि च ॥ जन्मांतरकृतानीह पापानि विविधानि च ॥ १४ तानि सर्वाणि दग्ध्वाशु हरकोदण्डखण्डनः ॥ पातु मां सर्वतो रामः शार्ङ्गबाणधरः सदा ॥ १५॥ इति श्रीरामचंद्रस्य कवचं वज्रसंमितम् ॥ गुह्याद्गुह्यतमं दिव्यं सुतीक्ष्ण मुनिसत्तम ॥१६॥ यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः॥ स याति परमं स्थानं रामचन्द्रप्रसादतः ॥ १७ ॥ महापातकयुक्तो वा गोघ्नो वा भ्रूणहा तथा ॥ श्रीरामचन्द्रकवचपठनाच्छुद्धिमाप्नुयात् ॥ १८ ॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ भोसुतीक्ष्ण यथा पृष्टं त्वया मम पुरा शुभम् ॥ तथा श्रीरामकवचं मया ते विनिवेदितम् ॥ १९ ॥ इति श्रीमदानन्दरामायणे मनोहरकांडे सुतीक्ष्णागस्त्यसंवादे श्रीरामकवचं समाप्तम् ॥ एवं षट् कवचान्यत्र पठनीयानि सर्वदा ॥ पठनं षट्कवचानां श्रेष्ठं मोक्षैकसाधनम् ॥ इति श्रीहनुमदादिषट्कवचप्रयोगः समाप्तः ॥ ६ ॥

अथ हरिवाहनगरुडमंत्रप्रयोगः ॥ (मंत्रमहोदधौ)मंत्रो यथा—"क्षिप ॐ स्वाहा" इति पंचाक्षरो मंत्रः ॥अस्य मंत्रस्य अनंत ऋषिः । पंक्तिच्छंदः । पक्षीन्द्रो देवता । ॐ बीजम् । स्वाहा शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥ॐ अनंतऋषये नमः । शिरसि ॥१॥ पंक्तिच्छंदसे नमः । मुखे ॥२॥ पक्षींद्रदेवतायै नमः । हृदि ॥३॥ ॐ बीजाय नमः । गुह्ये ॥४॥ स्वाहाशक्त्यै नमः । पादयोः॥५॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विनियोगाय नमः । सर्वाङ्गे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ ज्वलज्वल महामते स्वाहा हृदये ॥ १ ॥ ॐ गरुडचूडान
ने स्वाहा शिरसि ॥ २ ॥ ॐ गरुडशिखे स्वाहा शिखायै वषट् ॥ ३ ॥ ॐ गरुड प्रभंजयप्रभंजय प्रभेदयप्रभेदय त्रासयत्रासय विमर्द
यविमर्दय स्वाहा कवचाय हुम् ॥ ४ ॥ ॐ उग्ररूपधर सर्वविषहर भीषयभीषय सर्वं दहदह भस्मीकुरुकुरु स्वाहा नेत्रत्रयाय वौषट् ॥
॥५॥ ॐ अप्रतिहतबलाप्रतिहतशासन हुँ फट् स्वाहा अस्त्राय फट् ॥६॥ इति हृदयादिषडंगन्यासः ॥ ॐ ज्वल २ महामते स्वाहा अंगु
ष्ठयोः ॥ १ ॥ ॐ गरुडचूडानने स्वाहा तर्जन्योः ॥ २ ॥ ॐ गरुडशिखे स्वाहा मध्यमयोः ॥ ३ ॥ ॐ गरुडप्रभंजय २ प्रभेदय २
विमर्दय २ स्वाहा अनामिकयोः॥४॥ॐ उग्ररूपधर सर्वविषहर भीषय २ सर्वं दह २ भस्मी कुरुकुरु स्वाहा कनिष्ठयोः॥५॥ ॐ अप्रति
हतबलाप्रतिहतशासन हुं फट् । करतलकरपृष्ठयोः ॥६ ॥ इति करन्यासः ॥ ॐ क्षिं नमः पादयोः ॥१॥ ॐ पं नमः कट्योः ॥२॥
ॐ ॐ नमः हृदि ॥ ३ ॥ ॐ स्वां नमः वक्त्रे ॥ ४ ॥ ॐ हां नमः मूर्ध्नि ॥ ५ ॥ इति मंत्रवर्णन्यासः ॥ एवं न्यासं कृत्वा ध्या
येत् ॥ अथ ध्यानम् ॥ तप्तस्वर्णनिभं फणीन्द्रनिकरैः क्लृप्तांगभूषं प्रभुं स्मर्तॄणां शमयंतमुग्रमखिलं नॄणां विषं तत्क्षणात् ॥ चंच्वग्रप्रच
लद्भुजंगमभयं पाण्योर्वरं बिभ्रतं पक्षोच्चारितसामगीतममलं श्रीपक्षिराजं भजे ॥१॥ इति ध्यात्वा स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे
निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य बाह्यरेफद्वयहुंकारमध्यस्थक्षकाराविंदुंतताक्ष्यबीजमुक्तकर्णि
कं स्वरद्वंद्वात्मकं केसरेषु कचटतपयशलाष्टवर्गयुक्ताष्टदले मातृकापद्मपीठे ॐ पक्षिराजाय स्वाहा इति मंत्रेणासनं दत्त्वा पीठमध्ये संस्थाप्य
पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पान्तैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा—पुष्पांजलिमादाय"संविन्मयः परो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवः परामृतरसप्रियः ॥ अनुज्ञां देहि गरुड परिवारार्चनाय मे॥ १॥" इति पठित्वा पुष्पांजलिं च दद्यात् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत् ॥ ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॥ ॐ ज्वल ज्वल महामते स्वाहा ॥ हृदयश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ ॐ गरुडचूडानने स्वाहा शिरः श्रीपा० ॥ २ ॥ ॐ गरुडशिखे स्वाहा । शिखाश्रीपा० ॥ ३ ॥ ॐ गरुड प्रभंजय २ प्रभेदय २ त्रासय २ विमर्दय २ स्वाहा । वर्मश्री० ॥ ४ ॥ ॐ उग्ररूपधर सर्वविषहर भीषय २ सर्वं दह२भस्मीकुरु २ स्वाहा । नेत्रश्रीपा० ॥५॥ ॐ अप्रतिहतबलाप्रतिहतशासन हुं फट् स्वाहा । अस्त्रश्रीपा० ॥ ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥

अथ गरुडपूजनयन्त्रम्.



For Private And Personal Use Only

ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण दक्षिणावर्तेन च । ॐ अनंताय नमः । अनंतश्रीपा० ॥ १ ॥ ॐ वासुकये नमः । वासुकिश्रीपा० ॥ २ ॥ ॐ तक्षकाय नमः । तक्षकश्रीपा० ॥ ३ ॥ ॐ कर्कोटकाय नमः । कर्कोटकश्रीपा० ॥ ४ ॥ ॐ पद्माय नमः । पद्मश्रीपा० ॥ ५ ॥ ॐ महापद्माय नमः । महापद्मश्रीपा० ॥ ६ ॥ ॐ शंखपालाय नमः । शंखपालश्रीपा० ॥ ७ ॥ ॐ कुलिकाय नमः । कुलिकश्रीपा० ॥ ८ ॥ इत्यष्टौ नागान् पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्रायायुधानि च संपूज्य पुष्पांजलिं च दद्यात ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं पंचलक्षजपः ॥ तद्दशांशतस्तिलाज्यहोमः ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च । "पंचलक्षं जपेन्मंत्रं दशांशं जुहुयात्तिलैः ॥ पूजयेन्मातृकापद्मे गरुडं वेदविग्रहम् ॥१॥ एवं सिद्धे मनौ मंत्री नाशयेद्गरलद्वयम् ॥ विष्णुभक्तिपरो नित्यं यो भजेत्पक्षिनायकम् ॥ २ ॥ शत्रून्सर्वान्पराभूय सुखी भोगसमन्वितः ॥ जीवेदनेकवर्षाणि सेवितो धरणीधवैः ॥ कलेवरांते श्रीनाथसायुज्यं लभते तु सः ॥ ३ ॥ इति श्रीगरुडपंचाक्षरमंत्रप्रयोगः ॥ १ ॥ अथ गरुडमालामंत्रः ॥ (तंत्रसारे)" ॐ नमो भगवते गरुडाय कालाग्निवर्णाय एह्येहि कालानललोलजिह्वाय पातय २ मोहय २ विद्रावय २ भ्रम भ्रम भ्रामय २ हन २ दह २ पत २ हुं फट् स्वाहा"॥ अस्य विधानम् ॥ अस्य पुरश्चरणमयुतजपाः । घृताक्तैः कृष्णपुष्पैर्दशांशतो होमः । एवं ध्यानमात्रेण दष्टो निर्विषो भवेत् । चिरं जीवेत्॥तथा च।"विषमालोकनेनैव हन्यान्नागकुलोद्भवम् ॥" इति मालामंत्रप्रयोगः ॥ ॥ अन्यत् ॥ " ॐ नमो भगवते गरुडाय महेन्द्रपर्वतशिखराकाररूपाय संहार २ मोचय २

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्विष २ विषमप्यमृतं चाहारसदृशरूपमिदं ज्ञापयामि स्वाहा ” इति मालामंत्रः ॥ अस्य विधानम् ॥ अनेन गरुडमंत्रप्रसादेन मंत्री गरुडो भूत्वाभिमंत्रितं स्थावरविषं भक्षितमप्यमृतं भवति किममृतान्नापादिकमिति ॥” अथ गरुडस्तवः ॥ (तंत्रसारे) । सुपर्णं वैनतेयं च नागारिं नागभीषणम् ॥ जेतारकविषारिं च अजितं विश्वरूपिणम् ॥ १ ॥ गरुत्मंतं खगश्रेष्ठं तार्क्ष्यं कश्यपनंदनम् ॥ द्वादशैतानि नामानि गरुडस्य महात्मनः ॥ २ ॥ यः पठेत्प्रातरुत्थाय स्थाने वा शयनेपि वा ॥ विषं नाक्रमते तस्य न च हिंसंति हिंसकाः ॥ ३ ॥ संग्रामे व्यवहारे च विजयस्तस्य जायते ॥ बंधनान्मुक्तिमाप्नोति यात्रायां सिद्धिरेव च ॥ ४ ॥ इति गरुडस्तवः । (हारीतः) “ नर्मदायै नमः प्रातर्नर्मदायै नमो निशि ॥ नमोस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥ १ ॥ सर्पापसर्प भद्रं ते दूरं गच्छ महाविष ॥ जन्मेजयस्य यज्ञान्ते आस्तीकवचनं स्मर ॥ २ ॥ आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते ॥ शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥ ३ ॥ एतान्गरुडमंत्रांस्तु निशायां पठते यदि ॥ मुच्यते सर्वबाधाभ्यो नात्र कार्या विचरणा ॥ ४ ॥” (गोभिलः) “ अगस्तिर्माधवश्चैव मुचुकुन्दो महाबलः ॥ कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥ १ ॥” इति गरुडमंत्रप्रयोगः ॥

॥ अथ चरणायुधमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) चरणायुधमंत्रस्य विधानमभिधीयते ॥ मंत्री यद्विधिना कृत्वा साधयेत्स्वमनोरथान् ॥ मंत्रो यथा “आं यूं कोलियूं कोलि ह्रीं वां ह्रीं यूं कोलियूंकोलि चुवाक्रों” इत्यष्टादशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ प्रातः कृत्यक्रियश्चं द्रतारादिबलान्विते सुमुहूर्ते शैलाग्रे सरितस्तटे वा वृषशून्ये शंकरमंदिरे वा स्वासने पश्चिमाभिमुखः स्थित्वाचम्य प्राणानायम्य देशकालौ संकीर्त्य मम चरणायुधाभुकमंत्रसिद्ध्यर्थं चरणायुधप्रसन्नार्थं लक्षजपस्तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति संकल्प्य भूतशुद्ध्यादिमातृकान्यासं कृत्वा प्रयोगोक्तन्यासादिकं कुर्यात् ॥ तद्यथा अस्य चरणायुधमंत्रस्य महारुद्र ऋषिः । अतिजगती छन्दः । ह्रीं बीजम् । क्रों शक्तिः । चरणायुधो देवता । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ महारुद्रऋषये नमः । शिरसि ॥ १ ॥ अति जगतीछन्दसे नमः । मुखे ॥ २ ॥ ह्रीं बीजाय नमः । गुह्ये ॥ ३ ॥ क्रों शक्तये नमः । पादयोः ॥ ४ ॥ चरणायुध देवतायै नमः । हृदि ॥ ५ ॥ विनियोगाय नमः । सर्वांगे ॥ ६ ॥ इति ऋष्यादिन्यासः ॥ आं यूं कोलि अंगुष्ठाभ्यां नमः ॥ १ ॥ यूं कोलि तर्जनीभ्यां नमः ॥ २ ॥ वां ह्रीं मध्यमाभ्यां नमः ॥ ३ ॥ यूं कोलि अनामिकाभ्यां नमः ॥ ४ ॥ यूं कोलि कनिष्ठिकाभ्यां नमः ॥५॥ चुवाक्रों करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ आं यूं कोलि हृदयाय नमः ॥१॥ यूं कोलि शिरसे स्वाहा ॥ २ ॥ वां ह्रीं शिखायै वषट् ॥३॥ यूं कोलि कवचाय हुम् ॥ ४ ॥ यूं कोलि नेत्रत्रयाय वौषट् ॥५॥ चुवाक्रों अस्त्राय फट्॥६॥ इति हृदयादिषडंगन्यासः ॥ ॐ आं नमः । मूर्ध्नि ॥ १ ॥ ॐ यूं नमः । भाले ॥ २ ॥ ॐ क्रों नमः । दक्षिणभ्रुवि ॥ ३ ॥ ॐ लिं नमः । वामभ्रुवि ॥ ४ ॥ ॐ यूं नमः । दक्षनेत्रे ॥ ५ ॥ ॐ क्रों नमः । वामनेत्रे ॥ ६ ॥ ॐ लिं नमः दक्षकर्णे ॥ ७ ॥ ॐ वां नमः । वामकर्णे ॥ ८ ॥ ॐ ह्रीं नमः । दक्षनासापुटे ॥ ९ ॥ ॐ यूं नमः । वामनासापुटे ॥ १० ॥ ॐ क्रों नमः । वक्रे ॥११॥ ॐ लिं नमः । कंठे ॥ १२ ॥ ॐ यूं नमः । कुक्षिद्वये ॥ १३ ॥ ॐ क्रों नमः । नाभौ ॥ १४ ॥ ॐ लिं नमः । लिंगे ॥१५॥ ॐ चुं नमः । गुदे ॥ १६ ॥ ॐ वां नमः । जानुद्वये ॥ १७ ॥ ॐ क्रों नमः । पादद्वये ॥ १८ ॥ इति मंत्रवर्णन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ सर्वालंकृतिदीप्तकंठचरणो हेमाभदेहद्युतिः पक्षद्वंद्वविधूननेतिकुशलः सर्वामराभ्यर्चितः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गौरीहस्तसरोजगोरुणशिखः सर्वार्थसिद्धिप्रदो रक्तं चंचुपुटं दधच्चलपदः पायान्निजान्कुक्कुटान् ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमंडले वा मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य "ॐ मं मंडूकादिपरतत्त्वां तर्पीठदेवताभ्यो नमः ॥" इति पीठदेवताः संपूज्य नवपीठशक्तीः पूजयेत् ॥ तद्यथा । पूर्वादिक्रमेण—ॐ वामायै नमः ॥ १ ॥ ॐ ज्येष्ठायै नमः ॥ २ ॥ ॐ रौद्र्यै नमः ॥ ३ ॥ ॐ काल्यै नमः ॥ ४ ॥ ॐ कलविकरिण्यै नमः ॥ ५ ॥ ॐ बलविकरिण्यै नमः ॥ ६ ॥ ॐ बलप्रमथिन्यै नमः ॥ ७ ॥ ॐ सर्वभूतदमन्यै नमः ॥ ८ ॥ मध्ये ॐ मनोन्मन्यै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य "ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय चरणायुधाय योगपीठात्मने नमः ॥" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्ति प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य कुक्कुटाज्ञां गृहीत्वाऽऽवरणपूजां कुर्यात् ॥ तद्यथा—पुष्पांजलिमादाय मूलमुच्चार्य "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां कुक्कुट देहि परिवारार्चनाय मे ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् । इत्याज्ञां गृहीत्वाऽऽवरणपूजामारभेत् । तद्यथा—षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च । "ॐ आं यूं कोलि हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र ॥ १ ॥ ॐ यूं कोलि शिरसे स्वाहा । शिरःश्रीपा० ॥ २ ॥ ॐ वां ह्रीं शिखायै वषट् । शिखाश्रीपा० ॥ ३ ॥ ॐ यूं कोलि कवचाय हुंम् । कवचश्रीपा० ॥ ४ ॥ ॐ यूंकोलि नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ॥५॥ ॐ चुवा क्रों अस्त्राय फट् । अस्त्रश्रीपा० ॥ ६ ॥

For Private And Personal Use Only

इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ ॥ १ ॥" इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत्॥ इति प्रथमावरणम् ॥ १ ॥ ततोष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण आन्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ शंकराय नमः ॥ शंकरश्रीपा० ॥ १ ॥ ॐ गौर्य्यै नमः । गौरीश्रीपा० ॥ २ ॥ ॐ गणपतये नमः । गणपतिश्रीपा० ॥ ३ ॥ ॐ कार्तिकेयाय नमः ॥ कार्तिकेयश्रीपा० ॥ ४ ॥ ॐ मंदाराय नमः । मंदारश्रीपा० ॥ ५ ॥ ॐ पारिजाताय नमः । पारिजातश्रीपा० ॥ ६ ॥ ॐ मयूराय नमः । मयूरश्रीपा० ॥ ७ ॥ ॐ बर्हिणे नमः । बर्हिश्रीपा० ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥२ ॥ दलाग्रेषु इन्द्रादयष्टलोकपालान् वज्रादायुधानि च संपूज्य पुष्पांजलिं च दद्यात्॥इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य बलिं दद्यात्॥ तद्यथा—दधिदुग्धमधुकर्पूरसितातांबूलमिश्रितं

अथ चरणायुधपूजनयन्त्रम्.



---

१ महाकालमिति पाठः ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पायसेन पिंडं कृत्वा गंधाक्षतपुष्पैः संपूज्य दीपं निधाय "ॐ यूं क्ष ह्रीं कुक्कुट कुक्कुट एह्येहि इमं बलिं गृह्ण २ गृह्णापय सर्वान्कामान्देहि यंकुंह्रींयूं नमः कुक्कुटाय" इति मंत्रेण निवेदयेत् ॥ इति बलिं दत्त्वा हस्तौ पादौ प्रक्षाल्य पुनर्ध्यात्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षं जपः । तिलाज्येन दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्॥तथा च—"एवं ध्यात्वा समासीनः शैलाग्रे सरितस्तटे ॥ वृषशून्ये पश्चिमास्थे यद्वा शंकरसद्मनि ॥ १ ॥ शैवे पीठे यजेत्ताम्रचूडं गौरीकरस्थितम् ॥ लक्षं क्षपेद्दशांशेन तिलैर्हवनमाचरेत् ॥ २ ॥ एवं कृते प्रयोगार्हो जायते मंत्रनायकः ॥ प्रयोगादौ प्रजप्योऽर्थ[१०२००]वियुतं द्विशताधिकम् ॥ ३ ॥ दध्ना क्षीरेण मधुना चंद्रेण सितयान्वितैः ॥ दद्याद्बलिं सतांबूलैः पायसैर्बलिमंत्रतः ॥ ४ ॥ भोजनादौ भोजनांते लक्ष्मीसंप्राप्तये सुधीः ॥ बलिमेतत्प्रदायाथ कुर्वे रोधननाथताम् ॥ शांतौ पुष्टावपि बलिमेतमेव प्रदापयेत् ॥ ५ ॥ "अन्न राजौ स्त्रिमधुरोपेतैर्दद्यात् बलिं निशि ॥ वशयेदखिलं विश्वं त्रिदिनं चोदनैर्नृपः ॥ ६ ॥" अन्यत् ॥ "दुग्धमिश्रितगोधूमपिष्टैः कुर्यादपूपकम् ॥ आज्यकर्पूरयुक्तेन तेन दद्याद्बलिं निशि ॥ त्र्यहमेवं बलौ दत्ते सुखी स्याद्वशयेज्जगत्॥ ७॥" अन्यत् ॥ "करवीरैर्बिल्वपत्रैः पीतपुष्पैः सुगंधिभिः ॥ सहस्रसंख्यैः प्रत्येकं पूजयित्वा जपेन्मनुम् ॥ ८ ॥ सहस्रं निशि सप्ताह यमुद्दिश्य जनं सुधीः ॥ स याति दासतां तस्य मनोवचनमकर्मभिः ॥ ९ ॥" अन्यत् ॥"छागलावकयोर्मांसैः सप्ताहं वितरेद्बलिम् ॥ सहस्रं प्रत्यहं जप्त्वा वशयेदखिलं जगत् ॥ १० ॥ नृपोत्थिते सपत्नोत्थे भये जाते च संकटे॥आपद्यपि तथान्यस्यां बलिं दद्यात् सुखाप्तये ॥ गोपनीयो विधिरयं बलेः

१ ओदनैस्त्रिदिनं बलिं दत्त्वा नृपं वशयेत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथ्यो न दुर्मतौ ॥ ११ ॥" अन्यत् ॥ "मुक्तकेश उदावक्त्रो जपेद्भानुसहस्रकम् ॥ प्रत्यहं वसुवस्त्रांतं यमुद्दिश्याधियामिनि ॥ तमाकर्षति दूरस्थमपि किं निकटस्थितम् ॥ १२ ॥" अन्यत् ॥ "जातीफलैलाः संचूर्ण्य कर्पूरं मध्यतः क्षिपेत् ॥ अभिमंत्र्यार्कसाहस्रं सिंदूररजसा युतम् ॥१३॥ उष्णीकृत्याग्नितापेन क्लेदयेद्गांगपाथसा ॥ स्थापयेदायसे पात्रे तत्पृष्ठं स्तंभितो भवेत् ॥१४॥" अन्यत् ॥ "कर्मारसदनाद्वह्निमानीयायसभाजने ॥ स्थापयित्वेंधयेत्काष्ठैः करवीरसमुद्भवैः ॥१५॥ जुहुयात्तत्र धत्तूरबीजानि शतसंख्यया ॥ सिद्धार्थतैललिप्तानि विषकर्णयुतानि च ॥ १६ ॥ सप्ताह एवं कृत्वारिं स्थानादुच्चाटयेद्ध्रुवम् ॥ पक्षं देशांतरगतं मासं संप्रापयेन्मृतिम्॥ १७॥" अन्यत् ॥"तालपत्रं नराकारं कृत्वात्र स्थापयेदसून् ॥ जपेदष्टसहस्रं तत्तीक्ष्णतैलविलेपितम् ॥ १८ ॥ तस्य खंडानि पंचाशत् कृत्वा पितृवनोत्थिते ॥ उन्मत्ततरुसंदीप्ते जुहुयाज्जातवेदसि॥ १९॥एवं प्रकर्वस्त्रिदिनं मारयेन्मोहयेदरिम् ॥ "अन्यत् ॥ "साध्यर्क्षतरुकाष्ठेन कृत्वा पुत्तलिकां शुभाम् ॥ तस्यामसून्प्रतिष्ठाप्य सहस्रं प्रजपेन्मनुम् ॥ २० ॥ चिताकाष्ठस्य कीलेन तां स्पृष्ट्वा पितृकानने ॥ छिंद्याद्यदंगं शस्त्रेण

---

१ वसुवस्त्रांतमष्टादिनपर्यंतम् ॥ २ अधियामिनि रात्रौ ॥ ३ गांगपाथः गंगाजलम् ॥ ४ आयसे पात्रे लोहपात्रे ॥ ५ कर्मारेति लोहकारगृहाद्वह्निमानीय लोहपात्रे संस्थाप्य करवीरकाष्ठैः संदीप्य तत्र सर्षपतैलाक्तानि विषचूर्णयुतानि धत्तूरबीजानि शतं शतं सप्ताहं हुत्वा शत्रुमुच्चाटयेत् । एवं पक्षं कृत्वा देशांतरं नयेत् । मासं कृत्वा मारयेत् ॥ ६ तालेति नराकारं तालपत्रं कृत्वा रात्रौ शत्रोः प्राणान् संस्थाप्य भल्लातकतैलेन विलिप्य अष्टाधिकं सहस्रमभिमंत्र्य तस्य पंचाशत्खंडानि कृत्वा धत्तूरकाष्ठदीप्ते श्मशानाग्नौ त्रिदिनं हुत्वारिं मारयेन्मोहयेच्च ॥ ७ साध्येति नक्षत्रवृक्षा उक्ताः तेन शत्रुपुत्तलिकां कृत्वा रात्रौ शत्रोः प्राणान्संस्थाप्य सहस्रमभिमंत्र्य चिताकाष्ठकीलेन तां पुत्तलीं स्पृष्ट्वा सहस्रं जपेत् । तस्याः प्रतिमायाः श्मशाने यदंगं शस्त्रेण छिंद्यात्तदंगं तस्य शत्रोर्नश्यति ॥

For Private And Personal Use Only

तदंगं तस्य नश्यति ॥ २१ ॥ अन्यत ॥ "वैरिमूत्रयुतां मृत्स्नां तत्पादरजसा सह ॥ कुलालमृद्युतां कृत्वा पुत्तलीं रचयेत्तया ॥ २२ ॥ तस्या हृदि पदे मूर्ध्नि नामकर्मान्वितं मनुम् ॥ लिखेच्छ्मशानजांगारैरसून्संस्थापयेत्ततः ॥ २३ ॥ जप्त्वा सहस्रं मंत्रेण तीक्ष्णतैलविलेपिताम् ॥ शस्त्रेण शतधा कृत्वा जुहुयात्पितृभूवसौ ॥ २४ ॥ बिभीतकाष्ठसंदीप्ते यमाशावदनो निशि ॥ शत्रोर्निधनतारायां कृत्वैवं मारयेदरिम् ॥ २५ ॥" अन्यत् ॥ "निधाय गोमयं भूमौ प्रकुर्यात्प्रतिमां रिपोः ॥ तालपत्रे समालिख्य मनुं नाम्ना विदर्भितम् ॥ २६ ॥ तत्पत्रं निक्षिपेत्तस्या हृदि तत्प्रतिमोपरि ॥ मृज्जं वा दारुजं कुंभं गोमयोदकपूरितम् ॥ २७ ॥ मनूनामयुतं ताडपत्रेणाद्यं निधापयेत् ॥ तदसून्स्थापयेत्कुंभे त्रिसंध्यं प्रजपेन्मनुम् ॥ २८ ॥ प्रत्यहं शतसंख्याकं छाया यावद्भवेद्रिपोः गोमयांभसि दृष्टायां तच्छायायां तु साधकः ॥ २९ ॥ अध स्थायाः प्रतिकृतेश्छिद्यादंगमभीप्सितम् ॥ शस्त्रेण तस्य नाशाय मृतये हृदयं गलम् ॥ ३० ॥ प्रविद्धे कंटकैर्मूर्ध्नि शिरोरोगो भवेद्रिपोः ॥

---

१ वैरिमूत्रमृदं तस्य पादरजसान्वितामेकीकृत्य कुलालमृत्तिकायां निःक्षिप्य वैरिपुत्तलिकां कृत्वा तां श्मशानांगारैः "अमुकस्यामुककर्म कुरुकुरु" इति मंत्रांते संयोज्य हृदि पदे मूर्ध्नि मंत्रं लिखेत् ॥ तत्र शत्रोः प्राणान्संस्थाप्य भल्लातकतैलेन विलिप्य सहस्रमंत्रैरभिमंत्र्य शतखंडं कृत्वा विभीतककाष्ठदीप्ते श्मशानाग्नौ दक्षिणाभिमुखः निधनताराजन्मनक्षत्रात्सप्तमनक्षत्रं षोडशं पंचविंशं च रात्रौ हुत्वारिं मारयेत् ॥ २ गोमयेन शत्रोः प्रतिमां कृत्वा नामविदर्भितमंत्रतालपत्रे विलिख्य तत्तालपत्रं गोमयप्रतिमाहृदि निःक्षिप्य प्रतिमोपरि रूप्यताम्रमृदादारुजान्यतमनिर्मितं घटं संस्थाप्य गोमयोदकाभ्यामापूर्य तत्रापि नामविदर्भितमंत्रलेखयुतं तालपत्रं निःक्षिप्य तत्र कलशे शत्रोः प्राणस्थापनं कृत्वा प्रत्यहं त्रिसंध्यं शतं मंत्रं कुंभं स्पृष्ट्वा जपेत् ॥ यावत् शत्रोः प्रतिबिंबं घटे दृश्यते तावत्कालं जपेत् । घटोदके शत्रुप्रतिबिंबे दृष्टे घटाधःस्था या गोमयप्रतिमा तस्याः यदंगं छिद्यते तद्रिपोर्नश्यति । हृदि गले च छिन्ने तन्मृतिः । प्रतिमामूर्ध्नि कंटकैर्विद्धे शिरोरोगः । हृदि विद्धे मनः पीडा । पादयुग्मे कंटकविद्धे पादरोग इत्यादि ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आचयो हृदये विद्धे पदोः पादस्तथा भवेत् ॥ ३१ ॥" अन्यत् ॥ "दारुणा कुक्कुटं कृत्वा तत्रास्य स्थापयेदमून् ॥ तं स्पृष्ट्वा पूर्वं
वद्धयात्वा जपेद्दविमंहस्रकम्[1] ॥ ३२ ॥ उपचारैः समभ्यर्च्य छादयेद्रक्तवाससा ॥ रथे संस्थाप्य तं देवं दिक्षु योधान्निधापयेत्॥३३॥
चतुरो वर्मसंवीतानश्वारूढानुदायुधान् ॥ तत्संयुतो रणे गच्छेज्जेतुं बलवतो रिपून् ॥ ३४ ॥ वीराढ्यं कुक्कुटं दृष्ट्वा पलायंते रणेऽरयः॥
भीता दश दिशः सर्वे हर्यक्षं करिणो यथा ॥ ३५ ॥" अन्यत ॥ "ताम्रचूडस्य मंत्रेण मोदकाद्यभिमंत्रितम् ॥ यस्मै
ददीत भक्षाय स वशो मंत्रिणो भवेत् ॥ ३६ ॥" अन्यत् ॥ "अष्टोत्तरशतं जप्त्वा रोचनाचन्दनादिभिः ॥ विदधत्ति
लकं भाले दर्शनाद्वशयेज्जनान् ॥ ३७ ॥ इति श्रीचरणायुधस्य ताम्रचूडकुक्कुटस्य वा मंत्रप्रयोगः ॥ अथ पक्षि
राजघूकतंत्रप्रारंभः ॥ चतुर्दश्याममायां वा रविवारो भवेद्यदि ॥ गृहीत्वा पक्षिराजं चोदरं तस्य विदार्य च ॥ १ ॥ विष्ठा त
स्य बहिष्कृत्य नग्नो भूत्वा श्मशानके ॥ प्रज्वाल्य नृकपाले तु तस्यान्त्रोद्भूतकज्जलम् ॥ २ ॥ गुग्गुलं धूपयेत्तस्य मंत्रेण चाभिमंत्रयेत् ॥
अष्टोत्तरशतं वारं तदा सिद्धो भवेद्ध्रुवम् ॥ ३ ॥ कज्जलं तेन संग्राह्य ताम्रयंत्रेण वेष्टिता॥गुटिका मुखमध्यस्था स्याताऽदृश्यत्वकारिणी॥
॥ ४ ॥ कज्जलेनाञ्जयेन्नेत्रे तदा पश्यति देवताम् ॥ भूतप्रेतपिशाचादियक्षैश्च योगिनीः सह ॥ ५ ॥ नेत्रे प्रक्षाल्य गोमूत्रैर्मानुषी
दृक् प्रजायते ॥ योगद्वयेन कथिता मंत्रस्यैकं वदामि ते ॥६॥ तत्र मंत्रः॥ "ॐ कुरुकुरु स्वाहा मेहमरीअनेनधनेयः पाठेश्वरीनमः॥"
उक्तयोगानामयं मंत्रः ॥ "उलूकमज्जातैलेन कज्जलं पारयेन्नरः ॥ तेनांजनेन वै कृत्वा अदृश्यं भवति ध्रुवम् ॥७॥ घूकनेत्रं गृहीत्वा तु

१ चन्दनादिभिरित्यादिशब्दात्कुंकुमकस्तूरीकर्पूरगजमदा ग्राह्याः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैलेन सह घर्षयेत् ॥ श्मशाने कज्जलं पार्थ नेत्रे तेनांजयेत्ततः ॥ ८ ॥ अदृश्यो भवति क्षिप्रं देवैरपि न दृश्यते ॥ काकोलूकस्य पिच्छानि आत्मकेशास्तथैव च ॥ ९ ॥ अंतर्धूमगतान् दग्ध्वा सूक्ष्मचूर्णं तु कारयेत् ॥ अंकोलतैलगुटिकां कृत्वा शिरसि धारयेत् ॥ १० ॥ अदृश्यो जायते क्षिप्रं देवानामपि दुर्लभम् ॥ काकोलूकस्य नीलस्य ग्राह्ये एतेषु च लोचने ॥ ११ ॥ तल्लोहेनांजयेच्चक्षुरदृश्यो भवति ध्रुवम् ॥ नेत्रे प्रक्षाल्य गोमूत्रैर्मानुषी दृक् प्रजायते ॥ १२ ॥ उलूकस्य शृगालस्य सूकरस्याक्षिरक्तकम् ॥ नीलांजनयुतं पिष्ट्वा दग्ध्वा श्वापदे दहेत् ॥ १३ ॥ तेनांजितो नरोऽदृश्यो जायते नात्र संशयः ॥ सर्वयोगेन वै मंत्रं कथयामि शृणु प्रिये ॥ १४ ॥ तत्र मंत्रः ॥ "ॐ नमो भगवते उड्डामरेश्वराय नमो रुद्राय हिलि २ चिलि २ व्याघ्रचर्मपरिधानाय मरुल २ कुरु २ चंडप्रचंड किलिकिलि स्वाहा" उक्तयोगानामयं मंत्रः ॥ अन्यत् ॥ रविदिने वृकमांसं रक्तचंदनकुंकुमैः ॥ सह पिष्ट्वा वटीं कृत्वा टंकमानं तदा बुधैः ॥ १५ ॥ धूपो देयो गुग्गुलोश्च मंत्रात्समभिमंत्रयेत् ॥ ताबूले दीयते यस्मै सा वश्या भवति ध्रुवम् ॥ १६ ॥ वृकतालुं च तांबूले धृत्वा नारीं प्रदापयेत् ॥ वश्या भवति सा नारी प्राणैरपि धनैरपि ॥ १७ ॥ वृकतुंडं गृहीत्वा तु नागकेसरकेसरैः ॥ गोरी चनेन संयुक्तं मंत्रात्समभिमंत्रयेत् ॥ १८ ॥ अष्टोत्तरशतं वारं तिलकं क्रियते नरैः ॥ तस्य दर्शनमात्रेण वश्या भवति निश्चितम् ॥ १९ ॥ वृकजिह्वां निंबपत्रैः एकीकृत्य प्रपेषयेत् ॥ नेत्रांजनेन वै पश्येत्सर्वं वश्या भवंति हि ॥ २० ॥ वृकनेत्रं गृहीत्वा तु बिडालीनेत्रसंयुतम् ॥ वत्सनागसमायुक्तं नागकेशरकेशकैः ॥ २१ ॥ रससर्षपयोगेन समभागेन पेषयेत् ॥ श्मशाने गर्तकुंडे तु स्थापयेद्दिनसप्तकम् ॥ २२ ॥ ततो निष्कास्य यस्या वै शिरसि प्रक्षिपे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्बुधः ॥ विनाह्वानप्रसंगेन साऽऽयाति निश्चितं प्रिया ॥ २३ ॥ पूर्वोक्तसर्वद्रव्यैश्च नांदनवनकपासकैः ॥ वर्तिं कृत्वा प्रयत्नेन एकवर्णि
कगोघृतम् ॥ २४ ॥ मृत्पात्रे तद्विनिःक्षिप्य मघायां रविवासरे ॥ अर्द्धरात्रे भवेन्नग्नः श्मशाने विजितेन्द्रियः ॥ २५ ॥ श्लोटुखर्परपा
त्रेण ह्यथ वा नरकपालके ॥ कज्जलं पारयेयत्नान्मंत्रेण चाभिमंत्रयेत् ॥ २६ ॥ अष्टोत्तरशतं वारं गुग्गुलं धूपयेत्ततः ॥ सिद्धो भवति
सर्वत्र काम्यकर्मणि योजयेत् ॥२७॥ योषिद्वस्त्रे कज्जलेन रेखामेकां तु कारयेत् ॥ वश्याऽऽयाति तथा नारी यथाब्धौ सरिदागमः ॥२८॥
घूकविष्ठां गृहीत्वा तु काकविष्ठासमायुताम्॥यस्या मूर्ध्नि क्षिपेच्चूर्णं वश्या भवति निश्चितम्॥२९॥उलूकहृदयं मांसं गोरोचनसमन्वितम् ॥
अष्टाविंशतिवारं च मंत्रेणैवाभिमंत्रयेत् ॥ ३० ॥ अंजनं चांजयेन्नेत्रे दृष्टिमात्रेण वश्यताम् ॥ योगसिद्धिकरं मंत्रं कथयामि शृणु प्रिये
॥३१॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश अमुकं मे वशे कुरुकुरु स्वाहा ॥" उक्तयोगानामयं मंत्रः ॥ अन्यत् ॥ "एकहस्ते काकपक्षे
घूकपक्षे परे करे ॥ मंत्रयित्वा मेलयित्वा कुशसूत्रेण बंधयेत् ॥ ३२ ॥ अंजलिभिर्जलेनैव तर्पयेद्धस्तपक्षके ॥ एवं सप्तदिनं कुर्याद
ष्टोत्तरशतं जपेत् ॥ ३३॥ विद्वेषं कुरुते यस्य भवेत्तस्य हि नान्यथा ॥ उक्तयोगमयं मंत्रं शृणु यत्नेन वै पुनः ॥ ३४॥ तत्र मंत्रः॥ "ॐ
नमो महापंखेश अमुकस्य अमुकेन सह विद्वेषं कुरुकुरु स्वाहा॥" उक्तयोगानामयं मंत्रः॥ अष्टोत्तरशतजपात्सिद्धिः॥ ३५॥ अन्यत्॥ घूकपक्षे
कुजे वारे यद्गृहे निखनेन्नरः ॥ उच्चाटनं भवेत्तस्य विना मंत्रेण सिध्यति ॥ ३६ ॥ उल्लूविष्ठां गृहीत्वा तु सिद्धार्थैः सह मानवः ॥
यस्यांगे निक्षिपेच्चूर्णं सद्य उच्चाटनं भवेत् ॥ ३७ ॥ काकोलूकस्य पक्षं तु हुत्वा चाष्टाधिकं शतम् ॥ यन्नाम्ना मंत्रयोगेन ह्यवश्योच्चा

१ विना बुलाये ॥ २ काचा टीकरा ॥

For Private And Personal Use Only

टनं भवेत् ॥ ३८ ॥ पक्षिराजशिरश्चूर्णं रिपोश्च मस्तके क्षिपेत् ॥ मंत्रयोगेन वै तं स शीघ्रमुच्चाटयेद्ध्रुवम् ॥ ३९ ॥ उल्लूदंष्ट्रां निंबुकाष्ठं बिडालीनखचर्मणी ॥ धत्तूराम्बु श्मशानास्थि अरिगेहे विनिःक्षिपेत् ॥ ४० ॥ उच्चाटनं भवेत्तस्य सिद्धियोग उदाहृतः ॥ उक्तयोगमयं मंत्रं शृणु यत्नेन वै पुनः ॥ ४१ ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश अमुकं सपुत्रबांधवैः सह हनहन दहदह पचपच शीघ्रमुच्चाटयोच्चाटय हुं फट् स्वाहा ठः ठः॥" उक्तयोगानामयं मंत्रः॥अष्टोत्तरशतजपैः सिद्धिः॥अन्यत् ॥ "उल्लूविष्ठां गृहीत्वा तु विषचूर्णसमन्वितम् ॥ यस्यांगे निःक्षिपेच्चूर्णं सद्यो याति यमालयम् ॥४२ ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश कालरूपाय अमुकं भस्मीकुरुकुरु स्वाहा ॥" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैः सिद्धिः ॥ अन्यत् ॥ "उलूकस्य कपेर्वापि तांबूले यस्य दापयेत् ॥ विष्ठां प्रयत्नतस्तस्य बुद्धिस्तंभः प्रजायते ॥ ४३ ॥ "ॐ नमो महापंखेश बुद्धिस्तंभनं कुरुकुरु स्वाहा ॥" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैः सिद्धिः ॥ अन्यत् ॥ "उल्लूविष्ठां गृहीत्वा त्वैरंडतैलेन पेषयेत् ॥ यस्यांगे निःक्षिपेद्बिंदुं विक्षिप्तो जायते नरः ॥४४॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश विक्षिप्तं कुरुकुरु स्वाहा॥" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैः सिद्धिः॥अन्यत् ॥ "उलूकहृदयं मांसं मंत्रेण चाभिमंत्रयेत् ॥ गुग्गुलुं धूपयेत्तस्य शयानस्य हृदि क्षिपेत् ॥४५॥मान सं वक्ति वृत्तान्तं यत्किंचिद्वर्तते हृदि ॥ यस्मै कस्मै न दातव्यं सिद्धियोग उदाहृतः ॥ ४६ ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश स्वप्नावस्थायां मनोभिलषितं कथय स्वाहा" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैः सिद्धिः ॥ अन्यत् ॥ आषाढे कृष्णपक्षे च चतुर्दश्यां शुभे दिने ॥ उलूकस्य कपाले तु धत्तूरं च मृदा सह ॥ ४७ ॥ बीजयेद्धूपं दत्त्वा च निखनेद्भूमिमंडले ॥ भैरवं च पुनर्ध्यात्वा जलोच्छिष्टेन सिंचयेत् ॥४८॥ दीपं प्रज्वालयेन्नित्यं घृतेन सह साधकः ॥

For Private And Personal Use Only

यावत्संभवति वृक्षस्तावत्कालं यथाविधि ॥ ४९ ॥ फलपुष्पत्वचामूलं पिष्ट्वा तु तिलकं यदि ॥ इन्द्ररूपं भवेत्तस्य सहस्रनयनैर्युतम् ॥ ५० ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश सहस्राक्षिरूपं कुरुकुरु स्वाहा॥" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैः सिद्धिः ॥ अन्यत् ॥ पक्षिराजशिखायुक्तं हरितालं मनःशिला ॥ वर्ती कृत्वा प्रयत्नेन मंत्रेण चाभिमंत्रयेत् ॥ ५१ ॥ अष्टोत्तरशतवारं सिद्धो; भवति तां वर्तीम् ॥ अंजयेन्नेत्रयुगुले रात्रौ पठति पुस्तकम् ॥ ५२ ॥ उलूकस्य कपालेन घृतेन सह कज्जलम् ॥ तेन नेत्रांजनं कृत्वा रात्रौ पठति पुस्तकम् ॥ ५३ ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश रात्रौरात्रौ दर्शय स्वाहा ॥" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैः सिद्धिः ॥ अन्यत ॥ "उलूकचक्षुरादाय कुंकुमं रोचनं शशी ॥ समांसं मधुना पिष्ट्वा अंजनं भूनिधिं दिशेत् ॥५४॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश भूनिधिं दर्शय २ ठःठः स्वाहा॥" उक्तयोगानामयं मंत्रः॥अष्टोत्तरशतजपैः सिद्धिः॥अन्यत ॥ "उलूकदक्षिणं पक्षं सित सूत्रेण वेष्टयेत ॥ बन्धयेद्वामकर्णे तु हरत्यैकाहिकं ज्वरम् ॥ ५५ ॥ उल्लूपक्षं गुग्गुलुं च कृष्णवस्त्रेण वेष्टयेत् ॥ वर्तिं कृत्वा प्रयत्नेन घृतेन सह कज्जलम् ॥ ५६ ॥ चातुर्थिकज्वरशांतिरंजनेन कृतेन वै ॥ महाश्चर्यमिदं ज्ञेयं नान्यथा शंकरोदितम् ॥ ५७ ॥ उल्लूविष्ठां गृहीत्वा तु गुंजामात्रेण वै नरः ॥ ताम्बूले भक्षिता सा तु सर्वज्वरविनाशकृत ॥ ५८ ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश ज्वरं नाशयनाशय स्वाहा ॥" उक्तयोगानामयं मंत्रः ॥ अष्टोत्तरशतजपैःसिद्धिः ॥ अन्यत् ॥ "उल्लूमांसं गृहीत्वा तु च्छाया शुष्कं तु कारयेत ॥ धूपं दत्त्वा प्रयत्नेन भूतबाधा विनश्यति ॥ ५९ ॥ तत्र मंत्रः ॥ "ॐ नमो महापंखेश भूतबाधां नाशयनाशय स्वाहा ॥" उक्त योगस्यायंमंत्रः ॥ अष्टोत्तरशतजपैरस्य सिद्धिः ॥ इति भूतबाधामंत्रप्रयोगः ॥

अथ संतानोपायः ॥ अरुण उवाच ॥ वृथा धनं गृहं धान्यमपुत्रजन्म निष्फलम् ॥ ममोपरि दयां कृत्वा प्रायश्चित्तं वदस्व मे ॥ १ ॥ श्रीसूर्य उवाच ॥ विप्ररत्नापहारी च सोनपत्यः प्रजायते ॥ तेन कार्यं विशुद्ध्यर्थं महारुद्रजपादिकम् ॥ २ ॥ तीर्थयात्रा प्रकर्तव्या रेवातापीसमुद्भवा ॥ एकेनापि हि वस्त्रेण दंपतीस्नानमुत्तमम् ॥ ३ ॥ श्रवणं हरिवंशस्य ब्राह्मणोद्वाहनं खग ॥ अष्टोत्तरशतान् विप्रान् मिष्टान्नेन तु तर्पयेत् ॥ ४ ॥ ईशान इति मंत्रेण जपं कुर्यात्सहस्रकम् ॥ दशांशहोमसंयुक्तं कुर्याच्च विधिवत्ततः ॥ ५ ॥ पद्मैस्तु लक्षसंख्याकैः शिवं संपूज्य यत्नतः ॥ स्वर्णधेनुः प्रदातव्या सवत्सा सुरभिस्तथा ॥ ६ ॥ घृतकुंभं वैनतेय ब्राह्मणाय निवेदयेत् ॥ एवं कृतेन वै तस्य ह्यपत्यं जायते सुता ॥ ७ ॥ (गारुडेपि) हरिवंशकथां श्रुत्वा शतचण्डीविधानतः ॥ भक्त्या श्रीशिवमाराध्य पुत्रमुत्पादयेत्सुधीः ॥ ८ ॥ (महार्णवेपि) सौवर्णं बालकं कृत्वा दद्याद्दोलासमन्वितम् ॥ अथवा वृषभं दद्याद्विप्रोद्वाहनमेव वा ॥ महारुद्रजपो वापि लक्षपद्मैः शिवार्चनम् ॥ ९ ॥ अथ मृतपुत्रत्वहरोपायः ॥ बालघाती च पुरुषो मृतवत्सः प्रजायते ॥ ब्राह्मणोद्वाहनं चैव कर्तव्यं तेन शुद्ध्यति ॥ १० ॥ श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि ॥ महारुद्रजपं चैव कारयेच्च यथाविधि ॥ ११ ॥ जुहुयाच्च शतांशेन दूर्वा आज्यपरिप्लुताः ॥ एकादश स्वर्णनिष्काः प्रदातव्या च दक्षिणा ॥ १२ ॥ एकादश पशूंश्चैव दद्याद्वित्तानुसारतः ॥ अन्येभ्योपि यथाशक्ति द्विजेभ्यो दक्षिणां दिशेत् ॥ १३ ॥ स्नापयेद्दम्पती पश्चान्मंत्रैर्वरुणदैवतैः ॥ आचार्याय प्रदेयानि वस्त्रालंकरणानि च ॥ १४ ॥ तत्रादौ हरिवंशश्रवणविधानम् ॥ (कौस्तुभे) दंपत्योरनुकूले सुदिने कृतनित्यक्रियः देवालयादिपुण्यस्थले स्वगृहे वा स्वासने प्राङ्मुख उपविश्य आचम्य प्राणानायम्य देशकालौ स्मृत्वा अनेकजन्मार्जितानपत्यत्वमृतापत्यत्वादिनिदानभूतबालघातनिक्षेपहरण विप्ररत्नापहरणा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिदुरितसमूलनाशद्वारा दीर्घायुर्बहुपुत्रादिसंततिप्राप्तिकामो हरिवंशं श्रोष्यामि । तदंगत्वेन गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये इति संकल्प्य गणपतिपूजनादिनांदीश्राद्धांतं सर्वं कुर्यात् ॥ ततो विभवानुसारेण श्रुताध्ययनसंपन्नं ब्राह्मणमासने उदङ्मुखमुपवेश्य स्वयं प्राङ्मुख उपविश्य पादप्रक्षालनं कृत्वा गंधादिभिः संपूजयेत् ॥ ततो वरणद्रव्याणि गृहीत्वा देशकालौ संकीर्त्य दीर्घायुष्मत्पुत्रकामनयाऽमुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्गंधपुष्पस्वर्णमुद्रिकासनकमंडलुतांबूलवासोभिर्हरिवंशश्रवणार्थं श्रावयितारं त्वामहं वृणे ॥ इति वृत्वा 'ॐ वृतोस्मि' इति प्रतिवचनानंतरं वस्त्रालंकारैः संपूज्य पुस्तकं दद्यात् ॥ ततः आचार्यः प्रतिदिनं पुस्तकं संपूज्य ॐ नारायणं नमस्कृत्यानंतरं स्वगुरून्प्रणम्य स्पष्टपदाक्षरं वाचयेत् ॥ दंपती प्रतिदिनं "ॐ देवकीसुत गोविंद वासुदेव जगत्पते ॥ देहि मे तनयं कृष्ण त्वामहं शरणं गतः॥ १ ॥" इति मंत्रजपपूर्वकमेकचित्तौ श्रवणं कुर्याताम् ॥ तैलतांबूलक्षौरमैथुनखट्वाशयनानि यावत्समाप्ति वर्जयंतौ हविष्यं भुंजीयाताम् वाचकमपि प्रत्यहं पायसादिना भोजयेत् ॥ ग्रंथसमाप्तौ वाचकाय स्वलंकृतां पयस्विनीं सवत्सां स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं कांस्यपित्तलदोहिनीं वस्त्रयुतां स्वर्णाभूषणादिदक्षिणां च दत्त्वा परितोष्य न्यूनं संपूर्णं वाचयित्वा शतं विप्रान् चतुर्विंशतिमिथुनानि च पायसान्नेन भोजयेत् ॥ एवं कृते पुत्रो भवति न संदेहः ॥ इति हरिवंशश्रवणविधानम् ॥ १ ॥

अथ संतानगोपालमंत्रप्रयोगः ॥ (मंत्रमहोदधौ) मंत्रो यथा—"ॐ देवकीसुत गोविंद वासुदेव जगत्पते । देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥ १ ॥ इत्यनुष्टुभो मंत्रः । अस्य विधानम् ॥ अस्य गोपालमंत्रस्य नारद ऋषिः । अनुष्टुप् छंदः । कृष्णो देवता । मम पुत्रकामनार्थं जपे विनियोगः । ॐ नारदऋषये नमः शिरसि १ अनुष्टुप्छंदसे नमः मुखे २ कृष्णदेवतायै नमः हृदि ३ विनियोगाय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमः सर्वाङ्गे ४ इति ऋष्यादिन्यासः ॥ ॐ देवकीसुत हृदयाय नमः १ गोविंद तर्जनीभ्यां नमः २ वासुदेव मध्यमाभ्यां नमः ३ जगत्पते अनामिकाभ्यां नमः ४ देहि मे तनयं कृष्ण कनिष्ठिकाभ्यां नमः ५ त्वामहं शरणंगतः करतलकरपृष्ठाभ्यां नमः ६ इति करन्यासः ॥ ॐ देवकीसुत हृदयाय नमः १ गोविंद शिरसे स्वाहा २ वासुदेव शिखायै वषट् ३ जगत्पते कवचाय हुम् ४ देहि मे तनयं कृष्ण नेत्रत्रयाय वौषट् ५ त्वामहं शरणं गतः अस्त्राय फट् ६ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् । ॐ विजयेन युतो रथस्थितः प्रसमानीय समुद्रमध्यतः ॥ प्रददत्तनयान् द्विजन्मने स्मरणीयो वसुदेवनंदनः ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य बहिःपूजां कुर्यात् । तथाच-पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः पद्धतिमार्गेण संस्थाप्य ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नम इति संपूज्य नवपीठशक्तीः पूजयेत् । तथा च-पूर्वादिक्रमेण ॐ विमलायै नमः १ । ॐ उत्कर्षिण्यै नमः २ । ॐ ज्ञानायै नमः ३ । ॐ क्रियायै नमः ४ । ॐ योगायै नमः ५। ॐ प्रह्व्यै नमः ६। ॐ सत्यायै नमः ७ । ॐ ईशानायै नमः ८ । मध्ये ॐ अनुग्रहायै नमः ९ । इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोध्य "ॐ नमोभगवते श्रीगोपालाय सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगपद्मपीठात्मने नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्यात् । तथाच-पुष्पांजलिमादाय मूलमुच्चार्य "ॐ संविन्मयः परो देवः परामृतरसप्रियः ॥ अनुज्ञां देहि

---

१ इति न्यासो मंत्रमहोदधेर्ज्ञेयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोपाल परिवारार्चनाय मे॥ १ ॥ इति" पठित्वा पुष्पांजलिं च दत्त्वा विशे षार्घाद्बिंदुं निःक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् । इत्याज्ञां गृहीत्वा आवरणपूजामारभेत् ॥ तथाच-षट्कोणकेसरेषु आग्नेय्यादिचतुर्षु दिक्षु मध्ये दिक्षु च ॐ देवकीसुत हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः १ ॥ इति सर्वत्र । ॐ गोविंद शिरसे स्वाहा शिरः श्रीपा० २ ॥ ॐ वासुदेव शिखायै वषट् । शिखाश्रीपा० ३ ॥ ॐ जगत्पते कवचायहुम् । कवचश्रीपा०॥४॥ देहि मे तनयं कृष्ण नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा०॥५॥ॐ त्वामहं शरणं गत अस्त्राय फट् । अस्त्रश्रीपा०६॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य "ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत।इति प्रथमावरणम्॥ १ ॥ततः पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्याष्टदले प्राच्यादिक्रमेण ॐ कालिंद्यै नमः ।

सन्तानगोपालपूजनयन्त्रम्.



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालिंदीश्रीपा० १ ॥ ॐ नाग्नजित्यै नमः । नाग्नजितीश्रीपा० २ ॥ ॐ मित्रविंदायै नमः । मित्रविंदाश्रीपा० ३ ॥ ॐ चारुहासिन्यै नमः । चारुहासिनीश्रीपा० ४ ॥ ॐ रोहिण्यै नमः । रोहिणीश्री० ५ ॥ ॐ जांबवत्यै नमः । जांबवतीश्रीपा० ६ ॥ ॐ रुक्मिण्यै नमः । रुक्मिणीश्रीपा० ७ ॥ ॐ सत्यभामायै नमः । सत्यभामाश्रीपा० ८ ॥ इत्यष्टौ पट्टराज्ञीः पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलाग्रेषु प्राचीक्रमेण ॐ ऐरावताय नमः१॥ ॐ पुंडरीकाय नमः२॥ ॐ वामनाय नमः३॥ ॐ कुमुदाय नमः४॥ ॐ अंजनाय नमः५॥ ॐ पुष्पदंताय नमः६॥ ॐ सार्वभौमाय नमः७॥ ॐ सुप्रतीकाय नमः८॥ इत्यष्टौ दिग्गजान् पूजयित्वा पुष्पांजलिं च दद्यात् । इति तृतीयावरणम्॥ ३॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात् । इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् । अस्य पुरश्चरणं लक्षजपे पुत्रप्राप्तिर्भवति । तथा च 'लक्षं जपोऽयुतं होमस्तिलैर्मधुरसंयुतैः॥ अर्चा पूर्वोदिता चैव मंत्रः पुत्रप्रदो नृणाम्॥ १॥' इति संतानगोपालमंत्रपुरश्चरणप्रयोगः॥ २॥ अथ पुत्रप्रदाभिलाषाष्टकम् ॥ विश्वानर उवाच ॥ एकं ब्रह्मैवाद्वितीयं समस्तं सत्यंसत्यं नेह नानास्ति किंचित् ॥ एको रुद्रो न द्वितीयोऽवतस्थे तस्मादेकं त्वां प्रपद्ये महेशम् ॥ १ ॥ एकः कर्ता त्वं हि विश्वस्य शंभो नानारूपेष्वेकरूपोस्यरूपः ॥ यद्वत्प्रत्यर्क एकोप्यनेकस्तस्मान्नान्यं त्वां विनेशं प्रपद्ये ॥ २ ॥ रज्जौ सर्पः शुक्तिकायां च रौप्यं वारां पूरस्तन्मृगाख्ये मरीचौ ॥ यद्वत्तद्वद्विष्वगेव प्रपंचो यस्मिञ्ज्ञाते तं प्रपद्ये महेशम् ॥ ३ ॥ तोये शैत्यं दाहकत्वं च वह्नौ तापो भानौ शीतभानौ प्रसादः ॥ पुष्पे गंधो दुग्धमध्ये च सर्पिर्यत्तच्छंभो त्वं ततस्त्वां प्रपद्ये ॥ ४ ॥ शब्दं गृह्णास्यश्रवास्त्वं हि जिघ्रस्यघ्राणस्त्वं व्यंघ्रिरायासि दूरात् ॥ व्यक्षः पश्येस्त्वं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 रसज्ञोप्यजिह्वः कस्त्वां सम्यग्वेत्त्यतस्त्वां प्रपद्ये ॥५॥ नो वेदस्त्वामीश साक्षाद्धि वेद नो वा विष्णुर्नो विधाताऽखिलस्य ॥ नो योगीन्द्रा
 नेन्द्रमुख्याश्च देवा भक्तो वेद त्वामतस्त्वां प्रपद्ये ॥ ६ ॥ नो ते गोत्रं नाऽपि जन्मापि नाख्या नो वा रूपं नैव शीलं न देशः ॥ इत्थं
भूतोपीश्वरस्त्वं त्रिलोक्याः सर्वान् कामान् पूरयेस्तद्भजे त्वाम् ॥ ७ ॥ त्वत्तः सर्वं त्वं हि सर्वं स्मरारे त्वं गौरीशस्त्वं च नग्नोऽतिशांतः ॥
त्वं वै वृद्धस्त्वं युवा त्वं च बालस्तत्किं यत्त्वं नास्यतस्त्वां नतोस्मि ॥ ८ ॥ स्तुत्वेति भूमौ निपपात विप्रः स दंडवद्यावदतीव हृष्टः ॥
तावत्स बालोखिलवृद्धवृद्धः प्रोवाच भूदेववरं वृणीहि ॥ ९ ॥ तत उत्थाय हृष्टात्मा मुनिर्विश्वानरः कृती ॥ प्रत्यब्रवीत्किमज्ञातं सर्व
ज्ञस्य तव प्रभो ॥ १० ॥ सर्वांतरात्मा भगवाञ्छर्वः सर्वप्रदो भवान् ॥याच्ञां प्रति नियुक्तं मां किमीशो दैन्यकारिणी ॥ ११ ॥ इति
श्रुत्वा वचस्तस्य देवो विश्वानरस्य ह ॥ शुचेः शुचिव्रतस्याथ शुचि स्मित्वाब्रवीच्छिशुः ॥ १२ ॥ बाल उवाच ॥ त्वया शुचे
शुचिष्मत्यां योभिलाषः कृतो हृदि ॥ अचिरेणैव कालेन स भविष्यत्यसंशयः ॥ १३ ॥ तव पुत्रत्वमेष्यामि शुचिष्मत्यां महामते ॥
ख्यातो गृहपतिर्नाम्ना शुचिः सर्वामरप्रियः ॥ १४ ॥ अभिलाषाष्टकं पुण्यं स्तोत्रमेतत्त्वयेरितम् ॥ अब्दं त्रिकालपठनात्कामदं शिव
सन्निधौ ॥ १५ ॥ एतत्स्तोत्रस्य पठनं पुत्रपौत्रधनप्रदम् ॥ सर्वशांतिकरं वापि सर्वापत्परिणाशनम् ॥ १६ ॥ स्वर्गापवर्गसंपत्तिकारकं
नात्र संशयः ॥ प्रातरुत्थाय सुस्नातो लिंगमभ्यर्च्य शांभवम् ॥ १७ ॥ वर्षं जपन्निदं स्तोत्रमपुत्रः पुत्रवान्भवेत् ॥ वैशाखे कार्तिके
माघे विशेषनियमैर्युतः ॥१८॥ यः पठेत्स्नानसमये लभते सकलं फलम् ॥ कार्तिकस्य तु मासस्य प्रसादादहमव्ययः ॥१९॥ तव पुत्रत्व
मेष्यामि यस्त्वन्यस्तत्पठिष्यति ॥ अभिलाषाष्टकमिदं न देयं यस्य कस्यचित् ॥ २० ॥ गोपनीयं प्रयत्नेन महावंध्याप्रसूतिकृत् ॥

For Private And Personal Use Only

स्त्रिया वा पुरुषेणापि नियमाल्लिंगसन्निधौ ॥ २१ ॥ अब्दं जप्तमिदं स्तोत्रं पुत्रदं नात्र संशयः ॥ इत्युक्त्वांतर्दधे बालः सोपि विप्रो गृहं गतः ॥२२॥ इति श्रीस्कंदपुराणे काशीखंडे विश्वेश्वरस्तोत्रं संपूर्णम् ॥ अन्यः पुत्रप्राप्तिप्रयोगः॥मंत्रो यथा-"ॐ ह्राँ ह्रीं ह्रूँ पुत्रं कुरुकुरु स्वाहा"इति द्वादशाक्षरो मंत्रः। अस्य विधानम् ॥ चूतवृक्षसमारूढो जपेदेकाग्रमानसः ॥ अपुत्रो लभते पुत्रं नान्यथा शंकरोदितम् ॥ १ ॥ इति द्वादशाक्षरमंत्रप्रयोगः ॥ पुत्रोत्पत्तिकारकयत्रम् ॥ इस यंत्रको अच्छे नक्षत्र और शुभ दिनमें गोरोचनसे भोजपत्रपर लिख गूगलकी धूप देकर सोना या चांदी में मढायकर बंध्यास्त्रीके कंठमें बांधे तो जिसस्त्रीके लडका न होता होवै अथवा होकर मरजाता होवै तो उस्के निश्चय पूर्वक पुत्र उत्पन्न होकर जीवता है इस्में संदेह नहीं इस यंत्रका वडा प्रभावजानना ॥ १ ॥

शंकरमातुशंकरपितु

४०	४२	४	५
१	३	४८	४३
४६	४७	५	४
२	७	४७	४४

मृतवत्सालक्षणं यत्नं च--(दत्तात्रेयतन्त्रे) ॥ गर्भः संजातमात्रो हि पक्षे मासे च वत्सरे ॥ म्रियते द्वित्रिवर्षेषु यस्याः सा मृतवत्सका ॥ १॥ तस्योपायः॥अत्र योगः प्रकर्तव्यः यथाशंकरभाषितम् ॥ मार्गशीर्षेथ वा ज्येष्ठे पूर्णायां लेपिते गृहे ॥ २ ॥ नूतनं कलशं पूर्णं गन्धतोयेन कारयेत् ॥ शाखाफलसमायुक्तं नवरत्नसमन्वितम् ॥ ३ ॥ सुवर्णमुद्रिकायुक्तं षट्कोणमण्डलस्थितम् ॥ तन्मध्ये पूजयेद्देवीमेकांतीं नाम विश्रुताम् ॥ ४ ॥ गन्धपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसंयुतैः ॥ अर्चयेद्भक्तिभावेन मधुना दुग्धमाषकैः ॥ ५ ॥ वाराही च तथा चान्द्री ब्राह्मी माहेश्वरी तथा ॥ कौमारी वैष्णवी देवी षट्सु पत्रेषु मातरः ॥ ६ ॥ पूजयेन्मंत्रभावेन दधिपिंडानि कारयेत् ॥ सप्तसंख्याप्रमाणा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नि षट्संख्याषट्मात्रतः ॥ ७ ॥ सप्तमं तु पृथग्धृत्वा शुचिस्थाने विशेषतः ॥ तद्भुक्का गृहमागच्छेत् कन्या वा वटुकस्त्रियः ॥ ८ ॥ भोजयेद्दक्षिणां दत्त्वा प्रणामं कारयेत्ततः ॥ विसृज्य देवतां चाथ नयां तत्कलशोदकम् ॥ ९ ॥ सुकुलं वीक्षयेद्धीमाञ्शुभेन शुभमादिशेत् ॥ विपरीतं पुनः कुर्याद्यागं तावत्सुसिद्धिदम् ॥ १० ॥ प्रतिवर्षमिदं कुर्याद्दीर्घजीवी सुतो भवेत् ॥ सिद्धियोगमिदं ज्ञानं नान्यथा शंकरोदितम् ॥ ११ ॥ अस्य मंत्रः "ॐ नमः परब्रह्मपरमात्मने अमुके गृहे गर्भजीवितं सुतान् कुरुकुरु स्वाहा॥" इति मंत्रमयुतं जपेत् सिद्धिः ॥१॥ अथ काकवन्ध्यालक्षणं यत्नं च ॥ पूर्वं पुत्रवती या सा कचिद्वन्ध्या भवेद्यदि ॥ काकवन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ॥ १ ॥ विष्णुक्रांतां समूलां तु पिष्ट्वा महिषीदुग्धके॥महिषीनवनीतेन ऋतुकाले तु भोजयेत् ॥ २॥ एवं सप्तदिनं कुर्यात् पुनर्गर्भं च लभ्यते ॥ तत्र मंत्रः "ॐ नमो शक्तिरूपाय अमुकगृहे पुत्रं कुरुकुरु स्वाहा"। अष्टोत्तरशतं जपेत् सिद्धिः ॥१॥ औषधीप्रयोगो यथा ॥ तत्रादौ वन्ध्याशुद्धिप्रयोगः (तंत्रसारे) एकविंशादिनं यावद्दुग्धेन सह मेथिकाम् ॥ मेथी तोलकमेवं च खंडकं तोलकद्वयम् ॥ १ ॥ घृतं तोलकमेकं च पिबेद्दुग्धेन मिश्रितम् ॥ मृतवत्सा मृतगर्भा काकवंध्या तथैव च ॥२॥ पुत्रहीना च वन्ध्या च पंच चैवं प्रकीर्तिताः ॥ संहरेत्सर्वदोषांश्च मेथीभक्षणमुत्तमम् ॥ ३ ॥ नाडीशुद्धायां स्त्रियामुपरिऋतुकालमिदमौषधं देयम् ॥ पलाशपत्रयोगः ॥ (दत्तात्रेयतंत्रे) ॥ पत्रमेकं पलाशस्य गर्भिणीपयसान्वितम् ॥ ऋत्वंते तानि पीतानि वंध्या भवति गर्भिणी ॥ १ ॥ तत्र मंत्रः-"ॐ नमः सिद्धिरूपाय अमुकी पुत्रं कुरुकुरु स्वाहा"। अष्टोत्तरशतं जपेत। सिद्धिः॥१॥अथानेकयोगाः (चिकित्साशास्त्रे)॥ समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत् ॥

१ सर्पाक्षी लक्ष्मणा इतिबोध्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकवर्णा गवा क्षीरैः कन्याहस्तेन पेषयेत् ॥१॥ ऋतुकाले पिबेद्वंध्या पलार्द्ध तद्दिनेदिने॥क्षीरशाल्यन्नमुद्गांश्च लघ्वाहारं प्रदापयेत् ॥ एवं सप्तदिनं कुर्याद्वंध्यापि लभते सुतम् ॥२॥श्वेतायाः कंटकार्याश्च मूलं तद्वच्च गर्भकृत्॥न कर्म कारयेत् किंचिद्वर्जयेच्छीतमातपम् ॥३॥ शिफो[२]बर्हिशिखायास्तु क्षीरेण परितोषितम् ॥पिबेदृतुमती नारी गर्भधारणहेतवे ॥४॥ अश्वगंधाकषायेण सिद्धं दुग्धं घृतान्वितम्॥ऋतुस्नातांगना प्रातः पीत्वा गर्भं दधाति हि ॥५॥ अथ गर्भप्राप्ति यंत्रम्॥मेहतरजब्राईलका कौल है कि यह दुवा हज़रतअहमद मुज़तबी महम्मद मुस्तफेसे वास्ते पैदाइश फरजन्दके पहुंची है जिस्के लडका पैदा न होताहो इस यंत्रको स्त्री अपनी दाहिनी रान अर्थात जंघामें बांधै तो इन्शाल्लाफरजन्द अर्थात् लडका नेक जमाल अर्थात् सुन्दर रूपवाला पैदा होगा अगर शक लावे तो काफर है॥ इति सन्तानोपायः ॥



अथ प्रथमरजस्वलायाः शुभाशुभम् ॥ प्रथमो ज्ञायते कालो रजोदर्शनकारकः ॥ शुभाशुभं प्रयत्नेन लक्षणज्ञा रजस्वला ॥ १ ॥ रवौ वैधव्यमिन्दौ तु सुपुत्रजननी भवेत्॥ स्वात्महा मंगले सौम्ये बहुकन्या न संशयः ॥ २ ॥ गुरौ सुपुत्रतां याति शनौ कुत्सितसंततिः ॥ एवं ज्ञात्वा नरो धीमान् प्रायश्चित्तं तु कारयेत ॥ ३ ॥ इति श्रीमन्त्रमहार्णवे पूर्वखण्डे मिश्रतन्त्रे एकादशस्तरंगः ॥ ११ ॥ समाप्तोऽयं पूर्वखण्डः ॥

२ बर्हिशिखा मोरशिखा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयं मंत्रमहार्णवपूर्वखण्डः मुम्बय्यां खेमराजश्रीकृष्णदास इत्यनेन स्वकीये
"श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणयंत्रालये मुद्रापयित्वा प्रकाशितः ।

For Private And Personal Use Only